अथवाराहसंहितासमूलटीकाप्रारंभोयम॥

वराह॰ सं॰

१

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ ॥ अथ वराहसंहितासटीक प्रारंभः ॥ ॥ ब्रह्माजशंकररवींदुकुजज्ञजी-
वशुक्रार्कपुत्रगणनाथगुरून्प्रणम्य ॥ यः संग्रहोर्कवरलब्धविरूढबुधैरवंतिकस्य तमहं विवृणोमि कृत्स्नं ॥ १ ॥
यश्चान्ध्रं सविता चकार विपुलैः स्कंधैस्त्रिभिर्ज्योतिषां तस्योच्छित्तिभयात्पुनः कलियुगे संसृत्य यो भूतलं ॥ भू-
यः स्वल्पतरं चकार मिहिरव्याजेन सर्वस्य धाहिसं य एव इति मोक्षकांक्षा तस्मिन्नमो भास्वते ॥ २ ॥ वराहमिहि-
रोदधौ सुबहुभेदतोयाकुले ग्रहर्क्षगणयादसि प्रचुरयोगरत्नोज्वले ॥ भ्रमंति परितो यतो लघुधियो यतस्तु बु-
धास्ततः करोमि विवृतिप्लवं निजधिया हमत्रोत्पलः ॥ ३ ॥ इदानीं शास्त्रसंबंधाभिधेयप्रयोजनानि भवं-
तीत्युच्यते ॥ कार्यवाचकलक्षणः संबंधः ॥ वाच्यार्थो वाचकः शब्दः ॥ अथवा उपायोपेयलक्षणः संबंधः ॥ उपा-
यमिदं शास्त्रमुपेयं ज्ञानं ॥ अथवा आब्रह्मादिविनिःसृतमिदं वेदांगमिति संबंधः ॥ अनेन शास्त्रेण यद्ग्र-
हनक्षत्राणां शुभाशुभानां दिव्यांतरिक्षभौमानां उत्पातानां फलपरिज्ञानं तदभिधेयं जगतः शुभाशुभ-
कथनं प्रयोजनं ॥ सम्यग्ज्ञानान्मोक्षावाप्तिरिति प्रयोजनं किमभिरुचितमित्युच्यते ॥ श्रोतॄणां संबंधाभिधेय-
प्रयोजनकथनात् शास्त्रविषये श्रद्धा जायत इति ॥ तथा चोक्तं मतार्थे ॥ सिद्धिः श्रोतृप्रवृत्तीनां संबंधकथना-
द्यतः ॥ तस्मात्सर्वेषु शास्त्रेषु संबंधः पूर्वमुच्यते ॥ किंचिद्वा अभिधेयं स्यादिति प्रश्नकेनचित् ॥ यद्वि-
ज्ञात्वा नैतत्फलं श्रव्यं न तद्भवेत् ॥ सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित् ॥ यावत्प्रयोजनं नोक्तं तावत्त-
त्केन गृह्यते ॥ तस्मात् संबंधाभिधेयप्रयोजनानि वक्तव्यानि ॥ कस्मिन् शास्त्रेऽधिकार इत्युच्यते ॥ शि-
क्षाकल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः ॥ छंदसां लक्षणं चैव षडंगो वेद उच्यते इति ॥ सतां समयमाचारा-
यश्शास्त्रारंभेष्वभिमतदेवतानमस्कारं कुर्वंति ॥ तदयमथावंतिकाचार्यमगधाद्विजवराहमिहिरोर्कलब्ध- ॥१॥
वरप्रसादो ज्योतिःशास्त्रसमस्तलक्षणतद्वा स्कंधांसंक्षिप्तीकृतशास्त्रस्कंधसंक्षिप्तार्थं कर्तुं गोष्ठीविघ्नोप-
शांतये भगवंतं प्रधानं श्रीसूर्यमादावेव प्रणनाम ॥ ॥ जयति जगतः प्रसूतिर्विश्वात्मा सहजभूषणं नभ-
द्रुतकनकसदृशदशशतमयूखमालार्चितः सविता ॥ १ ॥ सविता भगवान् श्रीसूर्यो जयति ॥ सः

सर्वोत्कर्षेण वर्तते ॥ कीदृशः जगतः प्रसूतिः प्रसूयते उत्पद्यते अस्मात् जगदिति प्रसूतिः ॥ ततः तदुत्पन्नत्वे संभ-
वत्यतोऽनंतरं प्रजा इति ॥ तथा च भगवान्मनुः ॥ अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठति ॥ आदित्या-
ज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा ॥ विश्वात्मा ॥ विश्वस्य स्थावरजंगमस्य चात्मा प्राणरूपेण हृदयांतरस्थितः
तथा च श्रुतिः ॥ सूर्य आत्मा जगतस्तस्थुषश्चेति जगतो जंगमस्य तस्थुषः स्थावरस्य सूर्य एव आत्मा ॥ सहज-
भूषणं नभसः ॥ नभसः आकाशस्य सहजभूषणं यतो दृश्याकाशभागस्थोऽर्कः ततस्तस्य सहजं नाम सहज-
भूषणं ॥ द्रुतकनकसदृशेति ॥ द्रुतं गलितं कनकं सुवर्णं द्रुतकनकसदृशा तुल्या दशशताः संख्यया ये मयूखाः कि-
रणास्तेषां ये माला प्रचयास्ताभिरर्चितो व्याप्त इति ॥ एवमिष्टदेवतासंकीर्तनात् कायवाङ्मनोभिः प्राधान्यात् ध-
र्मः ॥ धर्मेण चाधर्मनिवृत्तिः ॥ तन्निवृत्तौ विघ्नोपशमः तदुपशमात् अविघ्नेन शास्त्रपरिसमाप्तिरिति न
न्वेषु ज्योतिःशास्त्रेषु सत्सु किमिदं प्रारब्धमिति प्राप्ते परिहारार्थमाह ॥ ॥ प्रथममुनिकथितमवि-
तथमवलोक्य ग्रंथविस्तरस्यार्थं ॥ नातिलघुविपुलरचनाभिरुद्यतः स्पष्टमभिधातुं ॥ २ ॥ प्रथममुनिः ब्र-
ह्मादेवः ॥ शेषं स्पष्टं ॥ मुनिविरचितमिदमिति यच्चिरंतनं साधु न मनुजग्रथितं ॥ तुल्येर्थेऽक्षरभेदादमं-
त्रके का विशेषोक्तिः ॥ ३ ॥ अधुना मुनिकृतानां महत्त्वं स्वशास्त्रस्य चाल्पत्वं दर्शयितुमाह ॥ क्षितितनयदिव-
सवारो न शुभ इति पितामहप्रोक्ते ॥ कुजदिनमनिष्टमिति वा कोऽत्र विशेषो नृदिव्यकृते ॥ ४ ॥ टी॰ देवर्षि-
कृतविस्तररूपग्रंथस्य मनुष्यकृत अल्परचनारूपग्रंथकृतस्य अर्थेन्यूनाधिकत्वं नास्ति ॥ सकलमुनिनि-
बद्धशास्त्रसंग्रहकरणे हेतुं दर्शयितुमाह ॥ ॥ आब्रह्मादिविनिःसृतमालोक्य ग्रंथविस्तरं क्रमशः ॥ क्रिय-
माणकमेवैतत्समासतोऽतो ममोत्साहः ॥ ५ ॥ ॥ टी॰ आब्रह्मादिविनिर्मितमिति ॥ ब्रह्मादिभ्यो ऋषिभि-
ः सृतं विनिर्गतं ग्रंथविस्तरं विस्तीर्णशास्त्रं तच्चालोक्य दृष्ट्वा ॥ अथवा तस्मात् ग्रंथविस्तराद्यालोक्य क्रम-
शः क्रमेण समासतः संक्षेपेण तच्छास्त्रं क्रियमाणमेव ऋज्वानीन्य यार्थं मुनिभिः पारंपर्येण संक्षिप्तीकृत-
मपि संक्षिप्तीकरोमि ॥ अतो मम उत्साहः ॥ शृंगार इति ॥ तथा च भगवान् गर्गः ॥ स्वयंस्वयंभुवा

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

वरा॰ सं॰ सप्तचक्षुर्भवति द्विजन्मनां॥ वेदांगं ज्योतिषं शास्त्रं यत्तद्धिताय वर्ततं॥ यथाञ्जयं भुवः प्रार्थिवा ज्ञानं प्रसाधनं॥ वेदानां मूलमंगं ज्योतिःशास्त्रं लोकव्यवहारकारकं॥ मन्त्रस्तस्मान्न कर्मप्रारंभं वा रयितुं न शक्नोति तस्माज्ज्योतिषं भृशं विद्यात् स्वर्ग इह स्वतरति॥ अस्मिन् शास्त्रे जगतः शुभाशुभकथनं वाच्यं॥ तत्र जगतः कुत उत्पत्तिरिति तद्विशेषज्ञो भावि
२ इदं॥ आसीत्तमः किलेदं तत्रापां तैजसेभवद्धैमं॥ स्वर्भूशकलेब्रह्मा विश्वकृदण्डेऽर्कशशिनयनः॥ किलशब्द आगमप्रदर्शनार्थः॥ इदं जगत् किल तम आसीत्॥ अन्धकारमभूत्॥ तस्मिंस्तमसि अपां मध्ये हैमं सुवर्णमयं तैजसं तेजोमयं वृषभकं शाकलकं स्वर्गभूशकलं स्वर्गो द्वितीयं भूः॥ तयोर्ब्रह्मा विश्वकृत्
। सर्वस्य कर्ता अण्डे। कीदृशो ब्रह्मा अर्कशशिनयनः॥ अर्क आदित्यः शशी चन्द्रः॥ तौ नयने नेत्रे यस्य। विश्व
कृत् विश्वस्रष्टा॥ एतदुक्तं भवति॥ तमोभूतेऽस्मिन् जगति भगवान् अव्यक्तः प्रजाः सिसृक्षुरादावेवापः स
सर्ज॥ तासु वीर्यमुत्सृष्टवान्॥ ततस्तदण्डं सौवर्णं सहस्रांशुसन्निभमभवत् तस्मिन् स्वयं ब्रह्मा जज्ञे॥ ततः
स भगवान्॥ तत्र परिवत्सरमुषित्वा स्वयमेव ध्यानात् तदण्डं द्विधाकरोत्॥ ताभ्यां शकलाभ्यामेकं स्वर्गं द्वितीयं भू
मिं च निर्ममे॥ स ब्रह्मा सहस्रनयनश्चः सर्वलोकपितामहोऽर्कचन्द्रलोचन इति स्मृतिकारः॥ तथा च भगवान्मनुः॥
आसीदिदं तमोभूतमप्रज्ञातमलक्षणं॥ अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः॥ ततः स्वयंभूर्भगवानव्य
क्तो व्यंजयन्निदं॥ महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः॥ योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः॥
सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ॥ सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः॥ अप एव सस
र्जादौ तासु वीर्यमवासृजत्॥ तदण्डमभवद्धैमं सहस्रांशुसमप्रभं॥ तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामह
॥ आपो नारा इति प्रोक्ता आपो वै नरसूनवः॥ ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः॥ यत्तत्कारणमव्यक्तं नि
त्यं सदसदात्मकं॥ तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते॥ तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरं॥ स्व
यमेवात्मनो ध्यानात्तदण्डमकरोद्द्विधा॥ ताभ्यां स शकलाभ्यां तु दिवं भूमिं च निर्ममे॥ मध्ये व्योम दिशश्चाष्टा

वपां स्थानं च शाश्वतमिति॥ अत्रैव पक्षान्तराण्याह॥ कपिलः प्रधानमाहुर्द्रव्यादीन् कणभुगस्य विश्वस्य॥ कालं
कारणमेके स्वभावमपरे जगुः कर्म॥ १॥ कपिलः सांख्याचार्यो जगतः कारणं प्रधानमाह कथयति॥ सत्त्वर
जस्तमसां त्रयाणां गुणानां सुखदुःखमोहलक्षणानां प्रकाशप्रवृत्तिनियमार्थानां साम्यावस्था प्रधानमु
च्यते॥ प्रधानमव्यक्तं प्रकृतिरिति पर्यायाः॥ प्रकृतेर्महान् भवति महान् बुद्धिरध्यवसाय इति पर्यायाः॥ तस्या
बुद्धेः सत्त्वाधिकाया धर्मो ज्ञानं वैराग्यमैश्वर्यमिति धर्माः॥ अध्यवसायो निश्चयः॥ यथा पुरुषो वायं गो
रेवायमश्व एवायमिति॥ ततो महतस्त्वहंकारो भवति॥ अभिमान इत्यर्थः॥ यथाहं कुलजातोऽहं सुरू
पोऽहमीश्वर इत्यादि॥ अहंकारात् षोडशको गणो भवति॥ तद्यथा॥ एकादशकरणानि सत्त्वाधिकादहं
कारात्॥ तानि पंच बुद्धीन्द्रियाणि॥ श्रोत्रं त्वक्चक्षुर्जिह्वा घ्राणमिति॥ एवं कर्मेन्द्रियाणि वाक्पाणिपाद
पायूपस्थानीति॥ मनस्तु एकादशमुभयात्मकमिति॥ [illegible]
दहंकारात्पंच तन्मात्राणि भवन्ति॥ तद्यथा॥ शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धत
न्मात्रमिति॥ एभ्यः पंचभ्यः पंच महाभूतानि भवन्ति॥ आकाशवाय्वग्निजलपृथिव्याख्यानि॥ तेभ्यः शरी
रिणां शरीराण्युत्पद्यन्ते॥ यतः पंचमहाभूतमयानि शरीराणि॥ एवं प्रधानं चिद्रूपस्य पुरुषस्य विश्वं भो
गार्थं मोक्षार्थं च भवति॥ स्वजाति॥ भुक्तभोग्यस्य वैराग्योत्पादनं मोक्षाय कल्पितमिति॥ तथा च कपिलाचा
र्यः॥ प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गणश्च षोडशकः॥ तस्मादपि षोडशकात् पंचभ्यः पंच भूतानि॥
अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यं सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तं॥ २॥ अभिमानोऽहंका
रस्तस्माद्द्विविधः प्रवर्तते सर्गः॥ ऐन्द्रिय एकादशकस्तन्मात्रपंचकश्चैव॥ ३॥ सात्त्विक एकादशकः प्रवर्तते वैकृ
तादहंकारात् भूतादेस्तन्मात्रः स तामसस्तैजसादुभयं॥ बुद्धीन्द्रियाणि॥ कर्णत्वक्चक्षूरसनानासिकाख्या
नि॥ वाक्पाणिपादपायूपस्थाः कर्मेन्द्रियाण्याहुः॥ संकल्पकमत्र मनः॥ तच्चेन्द्रियमुभयथा समाख्यातं॥
अतः शब्दविषयं तस्मादुभयं प्रचारं तत् रूपादिषु पंचानामालोचनमात्रमिष्यते वृत्तिः॥ वचनादान

द्व्यणोत्सर्गानंतरं क्रम पंचानां स्वालक्षणत्वनियमस्यैषाभवत्यसामान्या॥ सामान्यकारणत्वात्तः प्राणाद्यावायवःपंच
॥युगपच्चतुष्टयस्य वृत्तिः क्रमशश्चतस्य निर्दिष्टा॥ दृष्टेतथाप्यदृष्टेत्र यस्य तत्पूर्विका वृत्तिरिति॥ द्रव्यादीनक
३ णभुगस्य विश्वस्येति। कणभुक्कणादो सा विश्वस्य द्रव्यादीनि षट्पदार्थानि कारणमाह॥ द्रव्यगुणकर्मसा
मान्यविशेषसमवायाख्याः षट्पदार्थाः॥ तत्र द्रव्यं नवविधं॥ तद्यथा॥ आकाशवाय्वग्निजलपृथिव्याख्या
नि पंच महाभूतानि॥ आत्मा मनः कालो दिक्चेति॥ तथाच खादीन्यात्मा मनः कालो दिक्चेति द्रव्यसंग्रहः इति॥
द्रव्याश्रिताश्चतुर्विंशतिगुणाः केते उच्यंते॥ तत्रात्मगुणानविशेषगुणाः॥ तद्यथा॥ बुद्धिः इच्छा सुखं दुःखं प्रय
त्नः संस्कारः। पुण्यं पापं द्वेषश्चेति। तथाच॥ बुद्धीच्छा सुख दुःख प्रयत्न संस्कार पुण्यपापानि द्वेषश्चेति नवा
त्मगुणत्वनित्याः। सुखादि भुक्तौ कदाचिद्भवंति। कदाचिन्न भवति॥ एते विशेषगुणा महाभूतानां रसादीनां
पंचानां पंच यथाक्रमं शब्दादयो गुणाः समाश्रिताः। तथाच संख्या परिमाणं पृथक्त्वं च संयोगविभागो परत्वा
परत्वे स्नेहो द्रवत्वं गुरुत्वं च॥ एते चतुर्विंशति गुणाः। पंचविधं कर्म॥ उत्क्षेपणापक्षेपणमाकुंचनप्रसारणं
गमनं चेति सामान्यं॥ परं सत्तारव्यं महाविषयत्वात्॥ यतो द्रव्यादयस्त्रयः पदार्थाः सत्तया व्याप्ताः॥ अ
परं द्रव्यत्वगुणत्वकर्मत्वादीनि नित्यद्रव्यप्रवृत्तयो ह्यन्त्या विशेषाः॥ नित्यानि द्रव्याणि आकाशपरमाणुप्र
भृतीनि॥ अपृथक्सिद्धानामाधाराधेयभावः संबंधः समवाय इति। एतेषां षण्णां पदार्थानां
साधर्म्य वैधर्म्यतानं निश्चयस्य हेतुः साधर्म्यं सादृश्यं। वैधर्म्यं वैलक्षण्यं भेदो विशेष इति॥ साध
र्म्यतानमवबोधः निश्चयस्य मोक्षस्य हेतुः॥ एवमेते द्व्यणुकादिप्रक्रमेण कार्यं निवर्तयंति। चतुर्वि
धाः परमाणवः क्षितिजलाग्निवायूनां॥ द्वाभ्यां परमाणुभ्यां द्व्यणुकमारभ्यते॥ त्रिभिः परमाणु
भिः त्र्यणुकमारभ्यत इति॥ क्रमेण स्थूलकार्यस्य द्रव्यस्योत्पत्तिः॥ एवं जगतः संभवः कालः कारणम
इति॥ एकेऽन्ये कालकारणिकाः पौराणिकाः कालं कारणमाहुः। उक्तं च तैः कालस्य लक्षणं॥ नित्य ३
मेकं विभु द्रव्यं परिमाणं क्रियावतां॥ व्यापारव्यतिरेकेण कालमेके प्रचक्षते॥ आदित्यग्रहताराणां
परिस्पंदमथापरे भिन्नमावृत्तिभेदेन कालं कालविदो विदुरिति॥ एवं जगतः कालं कारणम्॥

कालः प्रजाः सृजति स एव संहरति तथाच तद्वाक्यं॥ कालः सृजति भूतानि कालः संहरति प्रजाः॥ कालः सुप्तेषु जा
गर्ति कालो हि दुरतिक्रम इति॥ अपरेऽन्ये लोकायतिकाः स्वभावं जगतः कारणमाहुः॥ स्वभावादेव जगद्विचि
त्र्यमुपपद्यते॥ स्वभावतो विलयं याति॥ तथाच तद्वाक्यं॥ कः कंटकानां प्रकरोति तैक्ष्ण्यं विचित्रभावं मृगपक्षि
णां च॥ माधुर्यमिक्षौ कटुतां च निंबे स्वभावतः सर्वमिदं प्रवृत्तमिति॥ अपरे जगतः कर्मेति॥ अपरेऽन्ये मीमां
सका जगतः कर्म कारणं जगुरुक्तवंतः॥ शुभाशुभं कर्म प्राणिनां पुण्यापुण्यरूपं जगतः कारणं॥ शुभेन कर्म
णा शुभकर्मभागी जायते॥ अशुभेन विपरीत इति॥ पूर्वजन्मार्जितं यच्च कर्म पुंसां शुभाशुभं॥ तदेव सर्वजंतू
नां सृष्टिसंहारकारणमिति॥ एवमनेककारणेषु उक्तेषु किं जगत्कारणं निश्चितमित्यत्रानिषेधमाह॥ ॥ तदलमति
विस्तरेण प्रसंगवादार्थनिर्णयोतिमहान्॥ ज्योतिःशास्त्रांगानां च कश्चिन्निर्णयात्कमया॥ ॥ अलमतिविस्त
रेण पक्षहेतुदृष्टांतैर्दर्शनांतराणि निरूप्य कारणनिश्चयः स च हि प्रस्तुतः। कुतो जगदुत्पत्तिरिति प्रसंगादाग
त॥ प्रसंगेवादः प्रसंगवादः प्रसंगवादे तिमहानतीवाऽनर्थस्य निर्णयो विचारो य आरब्धस्तस्यालं भवतु
॥ अनेनास्माकं न किंचित्प्रयोजनं॥ यतो मयास्मिन् शास्त्रे ज्योतिःशास्त्रांगानां निश्चयो वक्तव्यः॥ ज्योतीं
षि ग्रहनक्षत्रादीनि तान्यधिकृत्य कृतं शास्त्रं ज्योतिःशास्त्रं॥ ग्रहनक्षत्रयोगेन जगतः शुभाशुभसंभवात्ज्यो
तिःशास्त्रे यान्यंगानि गणितहोराशाखाख्यानि तेषां निर्णयो निश्चयो वक्तव्यः॥ कथनीयः॥ यत्रापि गणि
तहोरास्कंधौ प्रागेवोक्तौ॥ तथाप्यत्रांगत्वेऽपाकृतः॥ पुरुषलक्षणादेर्जातकं समागमादिषु गणितमिति
॥ अथवा तट्टकस्यात्र फलकथनं क्रियत इति॥ ॥ अथ ज्योतिःशास्त्र स्वरूपं तत्र संतांतराण्याह॥ ज्योतिःशा
स्त्रमनेकभेदविषयं स्कंधत्रयाधिष्ठितं तत्कार्त्स्न्योपनयस्य नाम मुनिभिः संकीर्त्यते संहिता॥ स्कंधोस्मि
न् गणितेन या ग्रहगतिस्तंत्राभिधानस्त्वसौ होरान्योंगविनिश्चयश्च कथितः स्कंधस्तृतीयोपरः॥ १॥ ज्यो
तिःशास्त्रं कादृतं। अनेकभेदविषयं भेदो विशेषः॥ अनेकोबहुप्रकारो भेदः॥ अनेकभेदः॥ अनेकभेदो
विषयो यस्य। भिद्यते सामादिति भेदः॥ यथा श्वेतवर्णो यागोः कृष्णो वर्णोभिद्यते॥ एवं बहुप्रकारो भेदः
स्कंधत्रयमध्यान्नाईश स्तस्य विषय गोचरं॥ तथा स्कंधत्रयाधिष्ठितं॥ स्कंधत्रयेण गणितहोराशाखा

व॰ संहि॰

५

स्येनाधिष्ठितं शास्त्रं ॥ तत्कात्स्न्योपनयस्येति । तस्य ज्योतिःशास्त्रस्य कार्त्स्न्येन निरवशेषेणोपनयः कथनं यस्मि
न्शास्त्रे तस्य संहितेति मुनिभिर्गर्गादिभिर्नाम संकीर्त्यते कथ्यते ॥ तथा च भगवान्गर्गः ॥ गणितं जातकं शा
खां यो वेत्ति द्विजपुंगवः ॥ त्रिस्कंधज्ञो विनिर्दिष्टः संहितापारगश्च सः ॥ स्कंधोऽस्मिन्निति । अस्मिन्ज्योतिःशा
स्त्रे ग्रहाणामादित्यादीनां या गतिर्गमनं प्रतिराशि । संचरणं साधनेन ज्ञायते तद्गणितं तस्य तंत्रमिति संज्ञा ॥
असौ गणितस्कंधस्तंत्राभिधानः ॥ होराख्योंगविनिश्चयश्च कथित इति ॥ जन्मयात्राप्रश्नविवाहादीनां लग्नग्रहच
ग्रेण शुभाशुभं फलं तन्मागतिर्येन निश्चीयते सा होरा ॥ अन्योद्वितीयोंगविनिश्चयः । अंगस्य विशेषेण निश्चयों
गविनिश्चयः ॥ होराख्य इति कथित उक्तः । एवं होरास्कंधो द्वितीयः ॥ स्कंधस्तृतीयोऽपर इति ॥ अपरस्तृतीयः
स्कंधो वक्ष्यमाणः शाखाख्य इति ॥ अत्र स्कंधत्रये प्रतिभागमाह ॥ ॥ वक्रानुवक्रास्तमयोदयाद्यास्ताराग्र
हाणां करणे मयोक्ताः ॥ होरागतं विस्तरतश्च जन्मयात्राविवाहैः सह पूर्वमुक्तं ॥ १० ॥ ॥ ताराग्रहा भौमाद
यः ॥ तेषां वक्रं प्रतीपगमनं ॥ यथा भौमादिको ग्रहो मेषस्थो मीनं याति स प्रतीपगतित्वाद्वक्रित इत्युच्यते ॥
अनुवक्रं स्पष्टगतित्वं वक्रां गतिं त्यक्त्वा स्पष्टां गतिं आश्रितोऽनुवक्रित इत्युच्यते ॥ अस्तमयस्तेषामेव ग्रहा
णां सूर्यवशेन भवति ॥ यः कश्चिच्चंद्रादिको ग्रहः सूर्यसमीपवर्ती भवति स च रविकरनिकराभिभूतो गग
ने लोकानामालोकं न याति तदास्तमित इत्युच्यते ॥ तथा स एव ग्रह आदित्यमंडलाद्विप्रकृष्टो यदा भवति
तदा नभसि दृश्यते स चोदित उच्यते ॥ एवं वक्रानुवक्रास्तमयोदया आद्या ग्रहाणां आदिग्रहणात् परस्परं ग्र
हाणां युद्धं चंद्रेण नक्षत्रैश्च समागमं ज्ञेयं ॥ एतदप्युपलक्षणार्थं ॥ मध्यगतिस्तिथिनक्षत्रच्छेदः ॥ स्फुटा गति
स्त्रिप्रश्नश्चंद्रार्कग्रहणे इत्यस्तमयोश्रृंगोन्नतिः समागमताराग्रहसंयोग इत्येते सर्वे करणसिद्धांतिका
या मुक्ताः ॥ कथिताः सर्व एव ॥ होरागतं विस्तरतश्च जन्म इति ॥ विस्तरतो विस्तरेण प्रपंचेन जन्म जातकम
होरागतं होराशास्त्रसंबंधं यात्राविवाहैः सह यात्राविवाहपटलेन सह पूर्वं मया होरायां कथितं । एतदुक्तं भ
वति ॥ बृहज्जातकं बृहद्यात्राविवाहपटलं च मया आदावेव विरचितमिति ॥ ॥ अथात्र वक्ष्यमाणसं ५
धे अनुपयोगिकं त्यक्त्वा सारभूतं तद्वक्ष्याम्येतदाह ॥ ॥ प्रश्नप्रतिप्रश्नकथाप्रसंगात् स्वल्पोपयोगान्ग्र

हसंभवांश्च ॥ संत्यज्य फल्गूनि च सारभूतार्थमर्थैः सकलैः प्रवक्ष्ये ॥ प्रश्नो यथा ॥ हिमवत्पार्श्वे स्थितो गर्गाद
क्रो मुनिः शिष्येण क्रोष्टुकिपूर्वकेण पृष्टः ॥ भगवन् ज्योतिःशास्त्रं ज्ञातुमिच्छामि ॥ किंस्वरूपं केनोत्पादितं
किं तेन कारणमित्यादि ॥ प्रतिप्रश्नो यथा ॥ गर्गादिको मुनिः शिष्यवचनं श्रुत्वा आह ॥ यत्त्वयाहं पृष्टस्त
त्ते वक्ष्यामि इति ॥ तथा च प्रश्नः ॥ ॥ हिमवच्छिखरे रम्ये नानाधातुविचित्रिते ॥ नानाद्रुमलताकीर्णे ना
नाश्चर्यसमाकुले ॥ १ ॥ हंसकारंडवक्रौंचचक्रवाकविराजिते ॥ सिद्धगंधर्वसंकीर्णे देवर्षिगणसेविते ॥ २ ॥
हुताग्निहोत्रमासीनं आश्रमे देवदर्शनं ॥ वृद्धगर्गं द्विजश्रेष्ठं मुनिभिः परिवारितं ॥ ३ ॥ अभिगम्य समीपस्थो
विनयात्संशितव्रतः ॥ क्रोष्टुकिः परिपप्रच्छ प्रश्नं लोकानुकंपया ॥ ४ ॥ भगवन्मुनिशार्दूल सर्वज्ञानविशारद
॥ ज्योतिषं श्रोतुमिच्छामि परं कौतूहलं हि नः ॥ ५ ॥ ज्योतिषज्ञानमुत्पन्नं कथमेतद्द्विजोत्तम ॥ केन वा पूर्वमेवोक्तं
ऋषिणा दैवतेन वा ॥ ६ ॥ किमस्य कारणं लोके परिज्ञानाच्च किं फलं ॥ नामतश्चानुपूर्वेण ब्रूहि मे मुनिसत्तम
॥ ७ ॥ ॥ इति प्रश्नः ॥ एवमुक्तस्तु मुनिना वृद्धगर्गो महातपाः ॥ प्रोवाच तान्यथान्सर्वान् क्रोष्टुकिप्रमुखान्स्थि
तान् ॥ १ ॥ श्रूयतां स्वर्ग्यमायुष्यं धर्म्यं पुण्यं यशस्करं ॥ ज्ञानविज्ञानसंपन्नं द्विजानां पावनं परं ॥ २ ॥ कालं
ज्ञानमिदं पुण्यमाद्यं हि ज्ञानमुत्तमं ॥ सिसृक्षुणा पुरा वेदानेतत्सृष्टं स्वयंभुवा ॥ ३ ॥ वेदांगमाद्यं वेदानां
क्रियाणां च प्रधानकं ॥ ज्योतिर्ज्ञानाद्धि सिद्धानां मतो वेदविदुर्बुधाः ॥ ४ ॥ ज्योतिश्चक्रे तु लोकस्य सर्वस्यो
क्तं शुभाशुभं ॥ ज्योतिर्ज्ञानं तु यो वेत्ति स तु वेत्ति परां गतिं ॥ ५ ॥ चंद्रनक्षत्रताराणां ग्रहाणां भास्करस्य
च ॥ ज्योतिषामपि यज्ज्योतिर्ज्योतिषामपि भावनं ॥ ६ ॥ तद्भावभावनायुक्तं न देवा ब्राह्मणा विदुः ॥ तस्मा
त्सर्वमधीयात् ज्योतिर्ज्ञानं द्विजोत्तमः ॥ ७ ॥ धर्मसत्रं ततः पश्चात् यज्ञकर्मविधिक्रियां ॥ यज्ञांश्चायुष्यहो
मांश्च हापनयनानि च ॥ ८ ॥ साम्नायं पौर्णमास्यं च पितृदैवततर्पणं ॥ सर्वारंभश्च तदागतो लोके च
द्विविधाः क्रियाः ॥ ९ ॥ तद्वत् ज्योतिषं ता संप्रवृत्तिरुपलभ्यते ॥ आप्याय्यते च देवानां यज्ञाः प्रोक्ताः
क्रियाश्रयाः ॥ १० ॥ यज्ञार्थमपि च प्रोक्ताः स्वयं वेदाः स्वयंभुवा ॥ तेनेदं संप्रवर्तते कालज्ञानात्कथं च
न ॥

यज्ञक्रियाग्निहोत्रं चक्रियाश्चान्याः न गह्विताः ॥ तस्मात्पुण्यं समं वेदैर्यस्तेन स्कः सनातनं ॥१२॥ स्वर्णमध्ये यमध्य
ग्नेर्ज्योतिषैः संश्रितं ततः ॥ ततः कालप्रसिध्यर्थं राज्ञय पूर्वमीरिताः ॥१३॥ अहोरात्रविभागश्च तिथीनां च
क्रियाविधिः ॥ सोमसूर्यविलग्नानामृक्षाणां च विनिश्चयः ॥१४॥ कर्मोपि भोग्यमानानां लेख्यप्रश्नविधिस्त
था ॥ एवमाद्याबहुविधाः क्रियाज्योतिषसंश्रिताः ॥१५॥ ॥ इति एवमादिकान प्रतिप्रश्नान तथान्यान कथाः
प्रसंगान ॥ आख्यायिकाकथात्र प्रसक्तिः प्रसंगो यथा ॥ भगवता पराशरेण पुष्यस्नाने कथाकृता ॥ पुरा
खलु सुराः सुराणां महतिमहायुधा विपरीतविग्रहे भार्गवप्रयुक्ताः भिचारोपहतवीर्यप्रभावाः सुराः शतक्र
तुमाहूततेजसः स्वयंभुवः शरणमभिजग्मुः ॥ शुक्र एव बोगतिरित्याहिष्टाः सुराः शुक्रमभिससंत्याननताः
पवित्रैर्मंत्रैराधैरभिष्टुवंतः सर्वरत्नधनधान्याधिपत्यं यत्तभागं चास्मै दत्वा वरमभियाचयांबभूवुः ॥
अनेकविधमयुतस्याद्यधर्मस्य पितामहाज्ञपयोदिवा अपरं तस्याय थानस्यान्नागरतथा भगवान्नोविध
तां ॥ यथा चनोत्सुहस्यति रूपाध्यायस्तथा भगवानपि भवतु ॥ इति शुक्रः परिसित्युक्त्वा देवान् शांति
स्वस्त्ययनादिभिः पुनस्तेजसामभिवर्धयामास ॥ नहिमंत्रवेदकर्मणां यथावत्प्रयुक्तानां किंचिदप्यसाध्यं
पश्यामः ॥ तेषां शुद्धाशुद्धिमंत्राचार्यप्रतिग्रहान देशकालकरणद्रव्यसाधनसामग्र्यं ॥ इतरथा हि मि
थ्याज्ञानमंत्रप्रयोगा यजमानस्यैवाभिचाराय भवंति ॥ पुरा खलु सुराधिपत्यमाजिहीर्षुरभिवृद्धवीर्यो
त्साहात् वृत्रः पुरंदरमभिचचार ॥ अथैनं कर्मविधिमभासाद्यैंद्रनात्रप्रधिवचनसुरापराधिनमिंद्र एव
शत्रुमभिरक्षो वृत्रमभिजघान ॥ एवमनियतकर्मारंभाः शतक्रतुं सुराविकृत्य जग्मुः ॥ अतोविधिहीनक
र्मारंभादनारंभश्रेयान ॥ तत्राभिचारकर्मादर्थे वेदमंत्रा पदिष्टरूपकल्पयोदित्यादि ॥ एवमादिकाः प्रश्न ॥५॥
प्रतिप्रश्नकथाप्रसंगाः प्रायेन कुत्रचिदुपयुज्यंते ॥ आचार्येण यद्यपि तोदृष्टा योगादिर्शितकथाप्रसंगः
प्रदर्शितः ॥ तथापि न दोषः ॥ यत आचार्येण सहृदयहृदयाल्हादकं शास्त्रंकृतं ॥ तन्मात्रेण च तेषां चितरंजनं

भवति ॥ तथा ग्रहसंभवाश्च ॥ ग्रहाणामादित्यादीनां संभवा उत्पत्तयः कुतः सूर्यादय उत्पन्नइति ॥ तथा च भगवान्प
राशरः ॥ हिमवति हिमावदाते वनिधरवरशिखरे परिवर्तिनामभवविवस्वंतं भगवंतं पराशरमभिगम्य विनया
वनतः कौत्सिकोप्याह ॥ भगवान्कालगतिविधाता सूर्यः ॥ तस्य चरितमभिशुश्रूषामहे ॥ द्वादशाचस्वयंते
एक एव तपन दृश्यते ॥ शीतोष्णवर्षाभ्रानिलानां कथमस्मात्प्रादुर्भावः ॥ कथं च कृतवर्तन्मानमनुवर्तते ॥ मार्ग
प्रमाणवर्णसंस्थानादिशुभाशुभकलभिव्याहर्तुमर्हसीति ॥ तमुवाच भगवान पराशरः ॥ पुरा खल्वपरिमितद्यु
तिप्रभाववीर्यायुरारोग्यसुखैश्वर्यधर्माः सत्वशुद्धतेजसः पुरुषा बभूवुः ॥ तेषां क्रमादपचीयमानसत्वानामप
चीयमानरजस्तमसां लोभः प्रादुरभूत ॥ लोभात्परिग्रहः ॥ परिग्रहाद्वैरं गोरक्षाद्दाकल्यं आलस्यान्निद्रा न
ईर्ध्यं ॥ अथ भगवान्परमर्षिरचिंत्यः पुरुषोनारायणः स्वदेहमयमात्मानं द्वादशधा कश्यपाददित्यां जनया
मास ॥ येन नेत्रं पुनर्जगदभवत ॥ यान्द्वादशादित्यानाचक्षते ॥ इंद्रो विष्णुर्विवस्वान्मित्रोंऽशुमान्धाता त्व
ष्टा पूषा वरुणोर्यमा भगः सवितेति ॥ अथ भगवंतं सवितारमहोभिस्तुष्टाव ॥ वरार्हेनेवरयां चकार ॥ यथा
धामोदित्येभ्यः स्वामभिख्यास्यतीति ॥ सतोयोगस्तेजोरूद्रा त्वयमग्रीषोसी वायुरस्तं मर्त्येचेति ॥ चंद्रस्य
पराशर मुनिमासंभवोनोक्तः ॥ राहोर्यथा ॥ भगवंतमनिलबलसमीरितप्रोद्धृदुतवदप्रभाभासुरमवित
थदर्शनमुदासीनमाश्रमस्थमभिक्रम्य कौशिकोविनयात्पराशरमुवाच ॥ भगवन्सकलभवनविलयनोद्भव
स्थितिविकरणो कथमुपरज्येते सूर्याचंद्रमसौ ॥ कोवाग्रहोग्रहणप्रयोजनं फलं किमस्य ग्रहणे नियतमनिय
तं चेति ॥ तमुवाच भगवान पराशरः ॥ पुरा पुरुहूतपितरं कश्यपमपत्यार्थमकालेसिंहिकाभियाचयामा
स ॥ तस्यै मुनिरकालयाचाकोपाद्दारुणं यमकालांतकोपमं सुतमदात ॥ यंराहुरित्याचक्षते कुलकाः ॥ स
जातमात्र एवाहितसूतं संगरावमर्दोदनभिमुखीकृतः ॥ क्रोधाद्दमंचादस्य मत्युमपृतं वर्षाणां तपोभ
प्यत ॥ पितामहाद्धिक्किरेण ममरतां सुरविजयमर्कचंद्रमसोर्भक्षणं वरमभियाचयामास ॥ तस्मै भगवा
न अमरवरगुरुः स्वयंभूः प्रहसन्नुवाच ॥ इति वरमहाकस्ते तोड़ारयितुं किं त्वतदस्तित्युक्तांतर्हिते भगव

प·सं· तिादिनकरराजनिकरावभिदुद्रावार्धग्रस्तयोर्द्दैरिरविमथनंचक्रमुपरिक्षिप्यास्वद्विरश्मिर्लोवाच॥सर्वमपित
थंपितामहस्यचाभवतितिकस्मिन्युगेपर्वणिग्रहणंकुर्वन्जगतःशुभाशुभानांकर्ताभविष्यसीति॥ ॥भौमस्य
६ यथा॥अथभगवान्जगदादिसर्गएवप्राक्प्रजापतिःसिसृक्षुरीश्वरःकारणक्रोधात्स्वतेजसाभिनिष्पंदम
ग्नितेजसएवजुहाव॥अथतदाज्यमग्नितोनिपपातभुव्यग्नितेजोभिःसंभूतमुदतिष्ठत्तंप्रजापतिं
प्राजापत्यंभौममितिमन्यंते॥सस्वयंभुवोनियोगाद्दक्षचक्रमनुचरन्शेषग्रहसामान्यचारातवक्रानुव
क्राभ्यांचराचरंभूतग्रामंविशिष्टाविशिष्टेनकर्मणायुनक्तीति॥ ॥बुधस्ययथा॥प्राक्असुरसुरसंनिपाते
सुरगुरुमाययाभिभूताःसंतःसुराःस्वयंभुवमभिगम्योचुः॥भगवन्निष्प्रभूताःस्मः॥त्वमेतानांद्विषद्विघात
हेतुमभिध्यायस्वेति॥स्वयंभुवाग्रहपतिरयंतेजसामोभिध्यायोक्तः॥सुतस्त्रिभुवनोद्भवनविलयनगो
पायनप्रजापतिर्भविता॥सकलविबुधगणान्बुधाभिरक्षितेत्यतोजगदभिगम्यर्थंगतिवर्णचारमार्गोस्य
मनोदयप्रचारैर्जगतोस्यशुभाशुभकरोभवितेति॥ ॥बृहस्पतेर्यथा॥अथामरवरगुरुमधिकृत्यगुरुर्भ
गवान्पराशरःशिष्येणाभिचोदितः॥सुरगुरुगुरुमखिलमतिप्रणम्यगुरुरेवोवाच॥आदिसर्गएवपिताम
हांगिरसंमनसाभिजज्ञे॥अंगिरसोमुखाद्भूत्धामएवंत्रिभुवनगोप्ताप्रजापतिर्भगवान्बृहस्पतिरजा
यत॥तमुत्पन्नमात्रमेवसहसाधिपतिःपिनाकधृक्सुरवरगणस्यार्थंवरयामास॥पितामहमिवत्वं॥
प्रभाप्रभावर्धिमहद्योगज्ञानंमंत्रप्रलकर्माण्युपलप्स्यसीति॥गुरुरपिचसुराणांजगतिशुभाशुभकारित्व
मेवभवितेति॥ ॥शुक्रस्ययथा॥प्राक्भगवंतममलतपसमनेकर्षिगणपरिवृतमसकृद्दृशासपरात
संनाग्यमुपेत्यसंप्राप्यान्कौशिकपराशरंविनयादवोच्यत॥भगवन्दितिसुतगुरुश्चरितामिदमग्रेभग
वानुवाच॥तत्संप्राप्योनःकथममरवपुषःतस्यायताःप्रज्ञाभावाःभावाः॥तमुवाचभगवान्पराशर ६
ः॥प्रागादिसर्गेभगवतस्त्रिलोचनस्यशंभोरोरुच्यमाणस्यपितामहोभवइतियंनामाकरोत॥तस्यापि

मूर्तेःसभ्रगुकन्यकायामुत्पन्नार्थांशक्रंजनयामास॥सपुरायुतवर्षकैणकणधूमव्रतेनत्रिभुवनगुरुंपिनाकि
नमाराध्य॥सकलधनपतित्वममरवरवपुःप्रज्ञाप्रभावतपःश्रुततेजोधिकत्वमसुरसुरगुरुत्वमपवर्गनिग्र
हंप्रजापतित्वंलेभे॥तस्यभगवतश्चरितमुदयास्तमयर्क्षमार्गवर्णवीथीमंडलैरुपादिष्टंतीति॥ ॥सौर
स्ययथा॥अथभगवतःपुरादियुगेएवातिभासुरमभितएवोदितविवस्वततेजसाभिमथ्यमानेषुभूतेषु
स्वयंस्वयंभूर्भगवंतंविवस्वतमुवाच॥अलमतितेजसानदेवदेवअपतांतेजसःपरमलमतिसोढुंक
मेणा॥पुनःप्रजाप्रजापतिनेत्यादिष्टो॥तितेजोनिवारणादधिक्रुद्धःस्वभावातक्रोधमेवापत्यंजनयामास
॥यंशनैश्चरमित्याचक्षते॥ ॥अगस्त्यस्ययथा॥अथभगवंतंअमितयशसंपराशरंकौशिकोभ्यु
वाच॥नितद्विश्विकिंतत्किमर्थंवाप्राचींदिशामपहायदक्षिणेनभगवंतंयास्यांदिशियातिपातमपहरूपमुदि
तमालक्ष्यते॥नक्षत्रग्रहमार्गव्युत्क्रांतचारि॥नतत्वेत्मिकिंनताकमर्थंवाप्राचींदिशामपहायदक्षिणे
नप्रावृट्कालानोदितंशरत्कालांतोदितंवाकातिपयादमहदृश्यंभवति॥तंनोभगवन्वक्तुमर्हसीति॥एवमु
क्तेभगवानुवाच॥श्रूतश्चर्वस्तेपृथिव्यामेकमांदशातिरिक्तप्रभावः॥शैलराडूविंध्योनाम॥सस्वनीयेव
लमुक्तायविरोध्यमन्वेषमाणोदिव्यपंचवर्षसहस्रमुग्रंतपस्तेपे॥सपितामहाद्देन्यहेतोःपातमात्रप्रमा
णमुच्चयेणवर्धस्वेतिवरंलेभे॥तस्यातिदश्यादिवसकरआवृत्तः॥तेनांधमिवजगदभवत॥ततोदेवार्ष
गंधर्वोरगयक्षरक्षांसिपितामहमभिजग्मुः॥भगवन्विंध्यपरिरुध्याजगदवसीदतामूचुः॥ततःस्वयंभु
वाःगस्तिनामामहर्षिरनेकवर्षसहस्रसंभृततपोध्यात्युक्तश्च॥त्वमेकःशक्तोविंध्याभिवृद्धिविवर्तनंकर्तुं
गुलेवाऽस्मिन्कर्मणिनभमावराजिष्यसे॥दर्शदेनावतेजगतिसर्वविषयविनाशोभविष्यसेवमास्थितिकृत्वा
महर्षिरगसाद्विध्यसकाशमुपवांचेनदंतरंगेयप्रयाछतीर्थयात्रांकारिष्याम्यनागतेचमविनत्वयावर्धित
व्यमित्येवमुपश्रुत्यततःप्रभावविस्तरस्याभिहतोमहर्षेरचलाधिरवरस्यादोःभयविषादविकुचमतिरुवाच॥
भगवन्बहुरसंकीर्णमविषमनेकतरुगणोदकमकाद्रानामार्गमयाउद्यिष्यामि॥येनभगवान्यास्यतीत्यवभु

बृ·सं·
१

कोऽभगवांश्चक्रेोप॥ क्रोधरक्तनेत्रो वदत॥ ममात्राशो भात कदाचित्सर्वथैव भविष्यतीत्यतः॥ शेषं स्वप्रभावभ
यभीतः स्वभावमुपगतो नागते भगवांतेन यक्षिण्यास्मीति॥ ततो मद्दूर्वदक्षिणांदुशमगामत॥ एवोगरूपः
शेषरट्रिव्याघातनिमित्तं नप्रत्येति॥ दक्षिणस्यामुदयति तस्यामेवास्तं गच्छतीति॥ ॥केतोः केतुचारात्कालजोः
त्पत्तिः॥ तथाच गर्गः॥ जातस्तु शनैः शुक्रः सूर्यपुत्रः शनैश्चरः॥ सोमस्य तु बुधः पुत्रोभूमेरंगारकः सुतः॥
पुत्रमंगिरसः प्राद्रुर्भूदुवाक्यंबृहस्पतिं॥ राहुः स्वर्भानुपुत्रः स्यात्पुत्रः केतुर्विभावसोः॥ मनसा ब्रह्मणा ध्याता बुभौ
सोमदिवाकरावपि॥ ग्रहसंभवाः एतानपि लल्लाः पयोगानसत्यान्यत क्रान्यानविफल्यान्यसाराण्ययुक्तिभिर्ग
णितगोलचारोर्विरुद्धान्यभिहितानि॥ यथा भुवनविभागे भूमेर्मेर्दुप्रमाणत्वं दर्पणोदराकारं तान्चकः
थयंति॥ मेरोश्च महाप्रमाणं च तत्वंततः पृष्ठास को ध्रुवश्च॥ नक्षत्राणि चावलंबमानानि॥ तथाच भगवान्
पराशरः॥ सप्तकोटिसहस्राण्यशीतियोजनकोटयो भूतपृथिवीमंडलं॥ परस्मात्गम्यतमः तन्मध्ये हिरण्म
यो मेरुश्चतुराशीतियोजनसहस्रोच्छ्रितः॥ षोडशाधस्तात्त्रिगुण विस्तारायामो यं सर्वमान्वक्षते॥ ॥तोद्द
नार्कचंद्रज्योतिश्चक्रं पर्येति॥ तस्यच्छायां निशामिच्छंति कुशलाः॥ एवमादिकं प्रकारमस्माकं गोलकवानेन मिथ्
ति॥ तथाच मेरोरर्धप्रमाणेन सूर्यस्य गतिरुच्यते॥ भगणस्याथ पंचाशत आदित्याद्उपरिस्मृता॥ भगणात्
सप्तषष्टिस्तु सोमस्य गतिरुच्यते॥ अध्यर्धं तु शतं सोमात भार्गवस्य गतिः स्मृता॥ बृहस्पतिर्बुधश्चैव प्राजा
पत्यः शनैश्चरः॥ केतवश्च ग्रहाः सर्वे येषाः सोमसमागतो॥ निमेषांतरमात्रेण योजनानां शतत्रयं॥ प्रत्येति
भगवान्नर्को भाच यन्भूत भावनः॥ अंते निष्क्रान्तता मध्ये कुर्मपृष्ठोपमा मही॥ त्रिगुणात्भूपरीणाहात्
अष्टभागादिगंतरं॥ एवमादिकानि वाक्यानि निरुपपत्तिकानि गोलकविरुद्धान्यसाराणि संत्यक्त्वयत्सा
रभूतं श्लोकंलोके प्रत्ययजनकभूतार्थं च सत्यार्थं दृष्टप्रत्ययं सकलैः समंत्रैः परिपूर्णैरर्थैरनाकांक्षैः प्रत्य
सेकथयिष्यामीति॥ ॥श्री॥ इति भट्टोत्पलविरचितायां संहिताविवृतौ शास्त्रोपनयनाध्यायः प्रथमः॥ १॥ श्री॥

एवंशास्त्रस्यस्वरूपकथनेनोत्कर्षंप्रदर्श्याधुनाकीदृक्योगीति शास्त्रेऽधिकारीत्यतोऽधिकारिस्वरूपं प्रदर्श
यितुमाह॥ ॥अथातः सांवत्सरसूत्रं व्याख्यास्यामः॥ अथातइत्ययं समुदायः॥ अथातोस्मात्शास्त्रोपनय
नादनंतरं सांवत्सरसूत्रं व्याख्यास्यामः॥ कथयिष्यामः॥ अथवाऽथशब्दो मंगलार्थः अतोस्मात्शास्त्रोपन
यनादनंतरं सांवत्सरसूत्रं विविधैरर्थैः शास्त्र समासैर्व्याख्यास्यामः॥ प्रथयिष्यामः॥ संवत्सरं वेत्ति सांव
त्सरः॥ सूच्यतेऽर्थोऽनेनेति तत्सूत्रं सांवत्सरस्यरूपमित्यर्थः॥ तत्र सांवत्सरोऽभिजातः प्रियदर्शनो विनीत
वेषः सत्यवाकनसूयकः समः सुसंहितोपचितः गात्रसंधिरविकलश्चारुकरचरणनखनयनचिबुकश्रव
णललाटोत्तमांगो वपुष्मान् गंभीरोदात्तघोषः प्रायः शरीराकारानुवर्तिनो हि गुणा दोषाश्च भवंति॥ त
स्मिन्नेतानि शांस्त्रे सांवत्सरो देवज्ञः कीदृशः॥ संवत्सरो वर्षः॥ तत्र शुभाशुभज्ञानार्थं यः कृतो यं ग्रंथः॥ स सांव
त्सरः॥ तमधीते वेद यः सोपि सांवत्सरः॥ सचाभिजातः कुलीनः सांवत्सरः प्रसूतः शास्त्रकृच्चेत॥ यादृक्कुलोप
वक्ष्यमाणगुणयुक्तो न भवति तत् किं तेन॥ तस्मात् सांवत्सरकुले निरवद्ये जातोस्मिन् प्रधानकुले वा सांवत्सर
कुलाज्ञयेन विद्या सांगमधीता सोऽत्राभिजातो विवक्षितः प्रियदर्शनो दृश्यमानः सुखजनको विनीतवेषोवि
नीतोऽनुद्धतो वेषः शरीरालंकरणं यस्य॥ आचार्येणान्यत्राप्युक्तं॥ सांवत्सरस्तस्यविनीतवेषइतिसत्यवाक्
॥अवितथभाषी अननुसूयकोऽनिंदकः समो रागद्वेषरहितः शत्रौ मित्रे च तुल्यस्त्वेद इत्यर्थः॥ सुसंहितः
पचितगात्रसंधिः सुसंहिता अतिसंलग्ना उपचिताः समांसला गात्राणां वा हूहूस्ताः रत्नानगल्फपादेषु सं
धयो यस्य॥ अधिकत्वाद्योगाः॥ परिपूर्णा वयवाः॥ चारुकरचरणनखचिबुकनयनदशनश्रवणललाटत्
तमांगाः॥ करौ हस्तौ पादौ चरणौ नखाः करस्थाः नयने चक्षुषी चिबुकं मुखाधोभागः दशना दंताः॥ श्रवणौ
कर्णौ ललाटं मुखस्योर्ध्व भागः॥ भ्रुवोरूर्ध्वनयनोपरि शिरसि खउत्तमांगं शिरः॥ एतानि चारूणि दर्शनीयानि यस्य
॥प्रयुक्तलक्षणैः संयुक्तानीत्यर्थः॥ वपुष्मान् शरीरं शोभनं विद्यते यस्य रूपवानित्यर्थः॥ गंभीरोदात्तघोषः॥
गंभीरः सानुनादः उदात्त उच्चो घोषः शब्दो यस्य॥ मेघमृदंगसमध्वनिरित्यर्थः॥ प्रियसमार्थप्रायो बाहुः

वरा॰ सं॰

८

त्येन शरीराकारानुवर्तिनः शरीरस्याकारः शरीराकारः तमनुवर्तते शरीराकारानुवर्तिनः॥ केचिद्गुणाश्च दोषाश्च भवंति। शरीरस्य सादृश्य गुणाश्च दोषाश्चानुवर्तंते निर्दोषशरीरं गुणा अनुवर्तंते संवंते। सदोषशरीरं दोषाश्च नुवर्तंत इति। तथा चोक्तं॥ यत्राकृतिस्तत्र गुणा वसंति॥ ॥अथ गुणानाह॥ तत्र गुणाः॥ शुचिर्दक्षः प्रगल्भो वाग्मी प्रतिभानवान् देशकालवित्॥ सात्त्विको न परिषद्भीरुः सहाध्यायीभिरनभिभवनीयः कुशलोऽव्यसनी शांतिकपौष्टिकाभिचारस्नानविद्याभिज्ञो विबुधार्चनव्रतोपवासनिरतः॥ स्वतंत्राश्चर्योत्पादितप्रभावः॥ पृष्टाभिधायी न दैवात्ययात् ग्रहगणितसंहिताहोराग्रंथार्थस्य वेत्ता॥ तत्र गुणा इति॥ तत्र तस्मिन् सांवत्सरे शरीरवर्तिगुणाः केते न यथा॥ शुचिः शास्त्रोक्तशौचानुष्ठाता परस्वे देवधनादावलुब्धश्च॥ दक्षश्चतुरः शीघ्रकारी॥ प्रगल्भः सभायामवकुंठकः॥ वाग्मी प्रशस्तः शास्त्रानुसारिणी वाक् यस्य॥ प्रतिभानवान् प्रतिभानं विद्यते यस्यासौ प्रतिभानवान्। पृष्टः सन् पूर्वापर्येण शास्त्रस्य उत्तरं ददातीत्यर्थः॥ देशकालवित्। देशवित् सर्वदेशाः प्रविभाग दाक्षिणात्य मध्यदेशादिप्राच्यदेशेषु यच्चेष्टितं तज्जानाति॥ ॥कालवित् कालस्वरूपज्ञः॥ पूर्वाह्ण मध्याह्नापराह्णादिषु कालेषु धर्मवर्षशीतसाधारणकालेषु च यत् क्रियते यन्न क्रियते इति जानाति॥ कालं यात्रादिं योग्यमिदं योग्यमिति जानाति॥ अथवा देशमनूपजांगलमरुभूम्यादिकं दूरस्थस्वराष्ट्रतावादिमनुष्यगम्यं जानाति॥ अथवा देशवित् यथा॥ काश्मीरादिषु हिमप्रधानेषु देशेषु बहुशीतादि संभवं दृष्ट्वा तन्नचम ध्यदेशादी चकि॥ कालवित् यथा॥ चित्रगर्भोद्भवाः स्त्रीगवाश्वमृगपक्षिषु॥ पत्रांकुरलतानां तु विकाराः शिशिरे शुभा इति॥ सात्त्विको निर्मलचित्तः॥ भयहर्षशोकादिभिरनभिभावनीयः॥ न परिषद्भीरुः परिषदि सभायां अभीरुरत्यलोभयः॥ सहाध्यायिभिरनभिभवनीयः॥ सह समानधर्ममध्ययनं कृतं यैस्ते सहाध्यायिनः॥ तैः सहाध्यायिभिः समानशास्त्रैरनभिभवनीयो जय्यः॥ कुशलः शिक्षितः इंगितज्ञः॥ अव्यसनी॥ गीतवाद्यनृत्यस्त्रीद्यूतपानादिव्यसनेष्वसक्तः॥ शांतिकपौष्टिकाभिचारस्नानविद्याभिज्ञः॥ उत्पातप्रतिकारार्थं वेदोक्तमंत्रपाठविनियोगानुष्ठानशांतिकविद्याभिज्ञः॥ आयुर्धनादिविवृद्धिकरणं पौष्टिकविधानविदभिज्ञः॥ उत्पादनतो ८

उच्चाटन मारणोच्चाटन विद्वेषण वशीकरण स्तंभनचालनादिकमभिचारविद्याभिज्ञः॥ स्नानविद्या नित्यनैमित्तिककाम्यक्रियांगास्त्वभिज्ञः॥ पुष्यस्नानादिषु वेत्ता॥ अभिमुख्येन जानातीत्यभिज्ञः॥ विबुधार्चनव्रतोपवासनिरतः॥ विबुधा देवास्तेषां अर्चनं पूजा॥ आवाहनस्नानमाल्यानुलेपनधूपोपहारनैवेद्य वाद्यगेयनृत्यस्तोत्रपाठादिषु भिज्ञः॥ व्रतानि॥ कृच्छ्रपाराकचांद्रायणप्रभृतीनि॥ उपवासः अभोजनं॥ यथा एकादश्यां न भुंजीत इत्यादिष्वेतेषु निरतः सक्तः॥ स्वतंत्राश्चर्योत्पादितप्रभावः॥ स्वतंत्रं ग्रहगणितं तत्रार्केन्दुग्रहणग्रहसमागमयुद्धानामागताभिधायकात्वंर्तणाकूर्म मयूरचापशंसघटादिरूपादीनां काष्ठविरचितानां स्वयमेव कालयंत्रकलाद्याश्चर्यं कृत्वा दृष्टं तेनोत्पादितज्ञानितआत्मनः प्रभावउत्कर्षो येन॥ पृष्टाभिधायी पृष्टस्यार्थस्याभिधायको वक्ता॥ नापृष्टश्च किंचित्॥ अन्यत्र दैवात्ययात्॥ दृष्टांतरिक्षभौमेषूत्पातेषु यद्राष्ट्रभ्रंशं दैवात्ययः॥ तं निवारणाय शांत्यादिकमपृष्टेनाप्यभिधातव्यं॥ ग्रहगणितसंहिताहोराग्रंथार्थवेत्ता॥ ग्रहगणिते पंचसिद्धांतिकायां संहितायां फलग्रंथे होरायां जातकादौ ग्रंथार्थवेत्ता॥ ग्रंथतोऽर्थतश्च॥ ग्रंथपाठकत्वं दीर्घवादित्यर्थः॥ अथान्य लक्षणमाह॥ तत्र ग्रहगणिते पौलिशरोमकवासिष्ठसौरपैतामहेषु पंचस्वेतेषु सिद्धांतेषु युगवर्षायनर्तुमासपक्षाहोरात्रयाममुहूर्तनाडीप्राणत्रुटित्रुट्याद्यवयवस्य कालस्य क्षेत्रस्य वेत्ता॥ तत्रेति॥ तत्र तस्मिन् ग्रहगणिते पंचसिद्धांता भवंति॥ के ते॥ पौलिशरोमकवासिष्ठसौरपैतामहाः॥ पुलिशसिद्धांतो रोमकसिद्धांतो वासिष्ठसिद्धांतः सूर्यसिद्धांतो ब्रह्मसिद्धांत इति॥ एतेषु सिद्धांतेषु पंचसु वेत्ता॥ अभिज्ञः॥ युगवर्षायनर्तुमासपक्षाहोरात्रयाममुहूर्तनाडीप्राणत्रुटित्रुट्याद्यवयवस्य कालस्य वेत्ता॥ युगानां कृतत्रेताद्वापरकलीनां प्रमाणज्ञः॥ यथोक्तं तावद्धि सौरैर्वर्षैः कृतयुगं भवत्येतावद्भिस्त्रेतायुगमेतावद्भिर्द्वापरमेतावद्भिः कलिरिति। तद्यथा॥ खखखदंताब्धयः कलियुगप्रमाणं एतदेव द्विगुणं द्वापरप्रमाणं त्रिगुणं त्रेतायुगप्रमाणं चतुर्गुणं कृतयुगप्रमाणं भवति॥ एते सर्व एकीकृत्य चतुर्युगप्रमाणं भवति। तथा च ब्रह्मसिद्धांते॥ खरचतुष्टयरदवेदा रविवर्षाणां चतुर्युगं भवति॥ संक्रांतिसदृशत्वादिपृथक्कृतादीनि॥ युगदशभागो गुणितः कृतं चतुर्भिस्त्रिभिस्त्रेता॥ द्विगुणो द्वापर

Dr. BHAU DAJI

मेकेनसंगुणः कलियुगंभवति॥ तथाच पुलिशसिद्धांते दिव्येनमानेन पठ्यते॥ अष्टाचत्वारिंशत्सार विहीनशः क्रमा
त्कृतादीनामशब्दास्ते शतगुणितांग्रहतुल्ययुगं तदेकत्वमिति॥ तद्यथा॥ ४८००॥३६००॥२४००॥१२००॥ एते
दिव्येन मानेन॥ अतः षष्टिशतत्रयेण गुणिताः॥ १७२८००० कृतं॥ १२९६००० त्रेता॥ ८६४००० द्वापरं॥ ४३२०००
कलि॥ एवंयुगादीनां वेत्ता॥ यावता कालेनार्को द्वादशराशिकं भचक्रं मेषादिमीनांतं भुंक्ते तद्वर्षं सौरं॥ तेनप्रमा
णेन युगसंख्यानं॥ एवंरविराशिभोगो मासः॥ द्वादशभिर्मासैर्वर्षमिति॥ तत्र मकरादिराशिषट्कस्थे उत्तरायणं॥
कर्कटादिराशिषट्कस्थे दक्षिणायनं इति॥ ऋतवः षड्भवंति॥ शिशिरादयः॥ ते च मासद्वयात्मकाः॥ तद्यथा॥
मकरकुंभस्थेऽर्के शिशिरः॥ मीनमेषस्थे वसंतः॥ वृषमिथुनस्थे ग्रीष्मः॥ कर्कसिंहस्थे वर्षा॥ कन्यातुलस्थे शरत्॥
वृश्चिकधनुस्थे हेमंतः॥ तथाचार्यः॥ उदयनं मकराद्यृतवः शिशिराद्यश्च सर्ववगात॥ द्विभवनकालसमा
ना दक्षिणायनं च कर्कटादिरिति॥ तथाच ब्रह्मसिद्धांते॥ द्वौ द्वौ राशी मकराद्यृतवः षड्समर्पयशात भाल्यः॥ शि
शिर वसंत ग्रीष्म वर्षा शरद्धेमंता इति॥ मासश्चैत्रादिकः॥ सचरविराशिभागः॥ त्रिंशद्दिनात्मकः॥ पक्षो
मासार्धं पंचदशाहिनादि॥ अहोरात्रं षष्टिर्घटिका॥ यामोऽहोरात्राष्टभागः॥ दिनस्य तु भागोऽत्रेष्व॥ मुहूर्तो
ऽहः पंचदशांश स्तोरात्रेश्च॥ पंचदशभागः॥ नाडीघटिका होरात्रषष्ठ्यंशः॥ विनाडी घटिकाषष्ठ्यंशः॥ प्राणः
श्वासविनिर्गमप्रवेशौ॥ त्रुटिश्च क्षणं निमेषद्वयं॥ त्रुट्याद्यन यचदस्तर्धं॥ आदिग्रहणात त्रुटिश्च तु भोगम
पि॥ एवमादिकस्य कालस्य वेत्ता॥ तथाच भगवान्पराशरः॥ यावता कालेन विकृतमक्षरमुच्चार्यते स निमे
षः॥ निमेषद्वयं त्रुटिः॥ त्रुटीद्वयं लवः॥ लवद्वयं क्षणः॥ दशक्षणा काष्ठा॥ दशकाष्ठा कला॥ दशकला नाडि
का॥ नाडिकाद्वयं मुहूर्तः॥ त्रिंशद्दिनं मुहूर्तो दिनमिति॥ एवं कालस्य वेत्ता॥ तथाच क्षेत्रस्य वेत्ता॥ तत्र क्षेत्र
कालयोः साम्यं॥ तद्यथा॥ कालेषट् प्राणा विघटिका घटिकानां षष्ट्या दिनं दिनानां त्रिंशता मासः॥
मासानां द्वादशवर्षं भवति॥ अथक्षेत्रं॥ षष्ट्या तत्पराणां विलिप्ता भवंति॥ विलिप्तानां लिप्ताः॥ लिप्तानां षष्ट्या

भागो भागानां त्रिंशता राशि॥ राशिद्वादशकं भगण इति॥ तथाच ब्रह्मसिद्धांते॥ प्राणैर्विनाडिकाख्यैः षड्भिर्घटि
का विनाडिका षष्ट्या॥ एतासां त्रिंशद्भिर्मासस्ते द्वादशभिरब्दः॥ षष्ट्या तु तत्पराणां विकलाः तत्पर्यादिकला तासां
॥ षष्ट्या शास्त्रिंशदंशास्त्रिंशद्भिर्द्वादशभचक्रं॥ तथाचार्यभटः॥ वर्षं द्वादशमासास्त्रिंशद्दिवसो भवेत्स मास
स्तु। षष्टिनाड्यो दिवसः षष्टिश्च विनाडिका नाडी॥ गुर्वक्षराणि षष्टिर्विनाख्यः॥ षडेव च प्राणाः॥ एवं कालवि
भाग क्षेत्रविभागस्तथा भगणात्॥ अन्यदप्याह॥ चतुर्णां च समासानां सौरसावननाक्षत्रचांद्राणामधिक
मासक्षयमसंभवस्य च कारणाभिज्ञः॥ चतुर्णां च मासानामिति॥ त्रिंशद्भागपरिकल्पनया यावता कालेनार्को
भागमेकं भुंक्ते तत्सौरदिनं॥ तत्त्रिंशता मासः॥ एवं राशिभोगेन संक्रांत्यावधिको मासः॥ एतत्सौरमानं सर्वेषां
ग्रहनक्षत्राणां स्वोदयात्पुनः स्वोदयो यावत॥ स सावनं दिनं॥ तत्त्रिंशता मास इति॥ एवं सावनं मानं॥ नक्षत्रमा
नं॥ चंद्रनक्षत्रभोगः॥ यावता कालेन नक्षत्रमेकं चंद्रमा भुंक्ते तन्नाक्षत्रं दिनं॥ तत्र दिनानां सप्तविंशत्या मासो
भवति॥ एवं नाक्षत्रं मानं॥ अमावास्यांतात्प्रभृत्यर्कात् चंद्रः प्रतिदिनं प्रतिदिनमग्रगो भूत्वा प्रतिपदाद्या
पंचदशतिथीन्निवर्तयति॥ यावत्पौर्णमास्यंतं॥ तथा कृष्णपक्षप्रतिपत्प्रभृत्यर्कसमीपं गत्वा अमावा
स्यांतं निवर्तयति॥ इति चांद्रं मानं॥ एवं तिथिरेव चांद्रदिनं॥ त्रिंशत्तिथयो मास इति॥ तथाच पुलिशसिद्धां
ते॥ सावनमानकृतं चंद्रसूर्येंदुसमागमात दिनीकृत्य॥ सौरं भूदिनराशिभगण दिनानि नाक्षत्रं॥ सावन
मानकृतं स्वयमेव सिद्धं॥ यावंतश्चतुर्युगेनार्कभगणास्तावंत एव सौरमानेनाब्दाः॥ यदस्माकं सौरमानं॥ तत्पु
लिशाचार्यस्य सावनं॥ एते चतुर्युगाब्दाः॥ ४३२०००० एतस्य द्वादशगुणिताः सावनमासाः॥ ५१८४००००
एतावत्यश्च तु युगेनार्कभागा इंके॥ तत्र यावता कालेनार्को भागमेकं भुंक्ते स सावनो दिवससिद्धः॥ चांद्र
सूर्येंदुसंगमान्दिनीकृत्य॥ तद्यथा॥ परिवर्तैर्युतगुणैः द्विःत्रिकृतेर्भास्करो युगं भुंक्ते इति रविभगणाः
४३२०००० रसदहनद्युतवह्नानलमुनिपचनेंदुश्चंद्रः॥ ५७७५३३३६ अर्कचंद्रभगणानामंतरम्
५३४३३३३६ एतान्सूर्येंदुसमागमान् एतान्चांद्रदिनीकृत्य त्रिंशता संगुणयेद्दिनरूपा भवंति॥ तेचाद

व॰ संहि॰

मेकेनसंगुणः कलियुगं भवति। तथाच पुलिशसिद्धांते दिव्येनमानेन वक्ष्यते। अष्टाचत्वारिंशत्सहस्रे विहीनाः क्रमा
त्कृतादीनामद्वाभ्यां सत्रिगुणितांशतुल्ययुगं तदेकत्वमिति। तद्यथा॥ ४८००॥ ३६००॥ २४००॥ १२००॥ एते
दिव्येन मानेन॥ अतः षष्टिशतत्रयेण गुणिताः॥ १७२८००० कृतं॥ १२९६००० त्रेता॥ ८६४००० द्वापरं॥ ४३२०००
कलि॥ एवं युगादीनां वेत्ता॥ यावता कालेनार्को द्वादशराशिकं भचक्रं मेषादिमीनांतं भुंक्ते तद्वर्षं सौरं॥ तेनप्रमा
णेन युगसंख्यानं॥ एवं रविराशिभोगो मासः॥ द्वादशभिर्मासैर्वर्षमिति॥ तत्र मकरादिराशिषट्कस्थे उत्तरायणं॥
कर्कटादि राशिषट्कस्थेर्के दक्षिणायनं इति॥ ऋतवः षड्भवंति॥ शिशिरादयः॥ ते च मासद्वयात्मकाः॥ तद्यथा॥
मकरकुंभस्थेर्के शिशिरः॥ मीनमेषस्थे वसंतः॥ वृषमिथुनस्थे ग्रीष्मः॥ कर्कसिंहस्थे वर्षा॥ कन्यातुलस्थे शरत्॥
वृश्चिकधनुस्थे हेमंतः॥ तथाचार्यः॥ उदयनं मकराद्यावृतवः शिशिरादयश्च सूर्यवशात्॥ द्विभवनकालसमा
ना दक्षिणामयनं च कर्कटाद्येरिति॥ तथाच ब्रह्मसिद्धांते॥ द्वौ द्वौ राशी मकराद्यृतवः षट् सूर्यवशात् आद्यः॥ शि
शिरवसंतग्रीष्मावर्षाशरद्धेमंता इति॥ मासश्चैत्रादिकः॥ सत्तरविराशिभोगः॥ त्रिंशद्दिनात्मकः॥ पक्षो
मासार्धं पंचदशदिनादि॥ अहोरात्रं षष्टिर्घटिका॥ यामो होरात्राष्टभागः॥ दिनस्य तु भागो रात्रेश्च॥ मुहूर्तो
ऽहः पंचदशांश अहोरात्रेश्च॥ पंचदशभागः॥ नाडी घटिका होरात्रषष्ट्यंशः॥ विनाडी घटिकाषष्ट्यंशः॥ प्राणः
श्वासविनिर्गमप्रवेशौ॥ त्रुटिश्च क्षणं निमेषद्वयं॥ त्रुट्याद्यनयचदशत्वर्थं॥ आदित्यदर्शनात्त्रुटिश्च तु भागम
पि॥ एवमादिकस्य कालस्य वेत्ता॥ तथाच भगवान्पराशरः॥ यावता कालेनाविकृतमक्षरमुच्चार्यते स निमे
षः॥ निमेषद्वयं त्रुटिः॥ त्रुटीद्वयं लवः॥ लवद्वयं क्षणः॥ दशक्षणाः काष्ठा॥ दशकाष्ठाः कला॥ दशकला नाडि
का॥ नाडिकाद्वयं मुहूर्तः॥ त्रिंशद्दिनं मुहूर्तो दिनमिति॥ एवं कालस्य वेत्ता॥ तथाच क्षेत्रस्य वेत्ता॥ तत्र क्षेत्र
कालस्य योः साम्यं॥ तद्यथा॥ कालेषट् प्राणा विघटिका षष्ट्या घटिका तासां षष्ट्या दिनं दिनानां त्रिंशता मासः॥
मासात् द्वादशवर्षं भवति॥ अथ क्षेत्रे॥ षष्ट्या तत्पराणां विलिप्ता भवंति॥ विलिप्तानां लिप्ताः॥ लिप्तानां षष्ट्या

भागो भागानां त्रिंशता राशिः॥ राशिद्वादशकं भगणइति॥ तथाच ब्रह्मसिद्धांते॥ प्राणैर्विनाडिकाख्यैः षड्भिर्घटि
का विनाडिकाषष्ट्या॥ एतासां त्रिंशद्भिर्मासस्तैर्द्वादशभिरब्दः॥ षष्ट्या तु तत्पराणां विकलातल्लिप्तरपि तत्कला तासां
॥ षष्ट्यंशास्त्रिंशद्राशिस्तैर्द्वादशभचक्रं॥ तथाचार्यभटः॥ वर्षं द्वादशमासास्त्रिंशद्दिवसो भवेत्स मास
स्तु। षष्टिर्नाड्यो दिवसः षष्टिश्च विनाडिकानाडी॥ गुर्वक्षराणि षष्टिर्विनाड्यः॥ षडेव च प्राणाः॥ एवं कालवि
भागः क्षेत्रविभागस्तथा भगणात्॥ अन्यदप्याह॥ चतुर्णां च समासानां सौरसावननाक्षत्रचांद्राणामधिक
मासक्षयमसंभवस्य च कारणाभिज्ञः॥ चतुर्णां च मासानामिति॥ त्रिंशद्भागपरिकल्पनया यावता कालेनार्को
भागमेकं भुंक्ते तत्सौरदिनं॥ तत्त्रिंशता मासः॥ एवं राशिभोगेन संक्रांत्यावधिर्मासः॥ एतत्सौरमानं सर्वेषां
ग्रहनक्षत्राणां सौदयात्पुनः सोदयो यावत्॥ स सावनं दिनं॥ तत्त्रिंशता मास इति॥ एवं सावनं मानं॥ नक्षत्रमा
नं॥ चंद्रनक्षत्रभोगः॥ यावता कालेन नक्षत्रमेकं चंद्रमा भुंक्ते तन्नाक्षत्रं दिनं॥ तत्रादिनानां सप्तविंशत्या मासो
भवति॥ एवं नाक्षत्रं मानं॥ अमावास्यांतात्प्रभृत्यर्कात् चंद्रः प्रतिदिनं प्रतिदिनमग्रतो भूत्वा प्रतिपदाद्या
पंचदशतिथीन्निवर्तयति॥ यावत्पौर्णमास्यंतं॥ तथा कृष्णपक्षप्रतिपत्प्रभृत्यर्कसमीपं गत्वाऽमावा
स्यांतं निवर्तयति॥ इति चांद्रं मानं॥ एवं तिथिरेव चांद्रदिनं॥ त्रिंशत्तिथयो मास इति॥ तथाच पुलिशसिद्धां
ते॥ सावनमानकृतं चंद्रसूर्ययुगमागमालदिनीकृत्य॥ सौरं भूदिनराशिभगण दिनानि नाक्षत्रं॥ सावन
मानकृतं स्वयमेव सिद्धं॥ यावंतश्च चतुर्युगेनार्कभगणास्तावंत एव सौरमानेनाब्दाः॥ यदस्माकं सौरमानं॥ तत्पु
लिशाचार्यस्य सावनं॥ एते चतुर्युगाब्दाः॥ ४३२०००० एत एव द्वादशगुणिताः सावनमासाः॥ ५१८४००००
एतावत्यश्च चतुर्युगेनार्कभागाद्वैकः॥ तत्र यावता कालेनार्को भागमेकं भुंक्ते स सावनो दिवसः सिद्धः॥ चांद्र
सूर्ययुगं स मानं दिनीकृत्य॥ तद्यथा॥ परिवर्ते रयुतगुणैः द्विखेशकृतैर्भास्करो युगं भुंक्ते इति रविभगणाः
४३२०००० रसदहनदृतवद्दानलमुनिपर्वनंद्रयश्चंद्रः॥ ५७७५३३३६ अर्कचंद्रभगणानामंतरम्
५३४३३३३६ एतान्सूर्यदुमागमाणतानेवा दिनीकृत्य त्रिंशता संगुणयात्दिनराशि भवंति॥ तेचदि

नीकृताज्ञाताः॥१६०३००००८०॥ चतुर्युगेनैतावंतश्चांद्रेण मानेन दिवसा भवंति॥ यदेवं चांद्रमानं सैव तिथि॥
व·सिद्ध॰ सौरं भूदिनराशिरिति॥ भूदिनराशिश्चतुर्युगाहर्गणः॥ तस्यानयनमहर्गणविधिनैव॥ तच्चाग्रे दर्श्यते॥ साव
न मान मासानामेतेषां॥५१८४०००॥ चतुर्युगाधिमासकाः॥ केनेदुच्यते॥ अधिमासकाः षड्गिनित्रिअ
१० युताधिमासकाः॥३६८८१०००० कुदहन्मिद्व्यारयूपाः॥ १५९३३३६ एतान्संशोध्य जातं॥ ५३४३३३६॥
एत एव रविचंद्रसमागमाः उत्पन्नाः॥ यदुक्तं॥ भगणांतरमेव यत्समागमा मास्तद्व्यर्कयोः स्युरिति॥ एत एव त्रि
ज्ञाता गुणिता जाताः॥१६०३००००८० एते चंद्रमानदिवसा उत्पन्नाः॥ एतेषां चतुर्युगोनराश्याः॥ केनेदुच्यते॥ १५७७९१७८००
तिथिक्षयाः खवसुद्विकदस्राष्टकशून्यद्वारपक्षाः॥२५०८२२८०॥ एतान्संशोध्य जातं॥१५७७९१७८००
एव दिनराशिश्चतुर्युगाहर्गणः॥ एतावंतश्चतुर्युगेनादिवसाः सौरेण मानेन भवंति॥ यदस्माकं सावनं मानं तत
पुलिशाचार्यस्यैव सौरमानं॥ अर्धरात्रादर्धरात्रं यावत्॥ सौरेण मानेनादिनमुदयादुदयं वा ज्ञात्वा भगणादि
नानि नाक्षत्रमिति॥ तत्र भगणाः॥१५८२२३७८२८ एते त्रिंशद्गुणिताः संतो दिनीकृताः॥१५८२२३७८२८०
एतावंतश्चतुर्युगेन नाक्षत्रमानदिवसाः॥ अथ नक्षत्रभागादिनं॥ चंद्रभगणान्त्रिंशत्भागादिनं॥ एवं या
वता कालेन चंद्रो द्वादश भागान् भुंक्ते तावता कालेन नाक्षत्रं दिनं॥ भगवद्वसिष्ठादिभिर्नक्षत्रभागेनना
क्षत्रदिनमभिहितं॥ किमुतैर्नक्षत्रमानेन सप्तविंशत्याहोरात्रैर्मासोऽभिहितः॥ एवं पुलिशाचार्यस्य नाक्ष
त्रमानं वसिष्ठादिभिः सदृशं॥ अस्य सर्वमानपुत्रिंशाहात्मको मास इति॥ प्रतिदिनमर्कोदयादर्कोदयं यतः
सौरमानं तस्यैतेन सावनमिति संज्ञाकृता॥ सावनस्य सौर इति॥ अथैतानेव पठति॥ ॥ इत्यार्यबाणतिथ्यवालक्ष
णाहता॥ सावनेनैते दिवसा॥ विषयाष्टौ रसचतुष्कत्रिखषोडशचंद्रमानेन वसुसप्तपवनमुनिनररतिथयः शतगुणा
श्च सौरेण॥ आर्यणखाष्टखत्रयषट्पद्दस्रगुणाः निजशशांकाः॥ अथ चंद्रभगणाः॥ सप्तविंशत्यागुणि ॥१०॥
ताश्चाश्विन्यादिदिनमानेन नाक्षत्रमानं॥ पक्षससखशून्याब्धिगुणागार्थशरेंदवः॥ चतुर्युगशान्येतानि कथिता
नि पुरातनैः॥१५८२२३४०० ७२॥ तथा च भगवान् भट्टवल्भद्रः॥ रव्यंशभागाः हीनाश्च सौरश्चंद्रमस

तिथिः॥ चंद्रनक्षत्रभोगश्च नाक्षत्रः परिकीर्तितः॥ सयावनोऽर्कस्य स्फुटं यावदुदयादुदयावधिः॥ नक्षत्रमानेन मा
सः स्यात्सप्तविंशति वासरः॥ शेषमानेषु निर्दिष्टो मासस्त्रिंशद्दिनात्मकः॥ इष्टाः सर्वेषु मानेषु मासा द्वादशमा
सिकाः॥ इति॥ अन्यच्च॥ नाक्षत्रं मानं सावनमानस्य मूलभूतं॥ यतो नक्षत्रपरिवर्त्यानि यतामेव तथा भग
तिमत्वात्॥ नक्षत्रपरिवर्तैर्भगणानां संशोध्य प्रत्येकस्य ग्रहस्य सावनं मानं भवति॥ अतो नक्षत्रचंद्रार्यत्र
कल्पितो भवतः॥ तदा नक्षत्रगतिमत्वात् तत्र वर्तिष्यति॥ ग्रहस्तु स्वगतिवशेन प्रतिपदं नक्षत्रगो भूत्वा दृष्टा
स्तमयोदयं करोति॥ भूम्यासन्नदृष्टिपर्ययातीति यावत् तेन नाक्षत्रमानं सावनमानसाधकं॥ तथा च मूलपुलिश
सिद्धांते पठ्यते॥ नक्षत्रपरिवर्ताः खखाष्टमुनिरामाश्विनेत्राष्टशराशिरात्रिणः॥ भानां चतुर्युगेनैते परिवर्ता
: प्रकीर्तिताः॥ १५८२२३७८०० एभ्यः सूर्यभगणान् संशोध्य॥ जाताः सावनदिवसा इति १५७७९१७८००
तथा च ब्रह्मसिद्धांते॥ रविभगणोनाभानोः सावनादिवसाः कुदिवस्य वा॥ तथा च॥ नक्षत्रसावनदिनात्मसौ
रानां सावनदिनानि॥ यस्मात्तस्माद्दृश्यं दुरधिगमं मंदबुद्धीनामिति॥ अधिमासकावमसंभवस्य चका
रणाभिलः॥ अधिमासकसंभवश्च॥ सौरमानचांद्रमानयोरंतरात् यथा॥ अहर्गणे क्रियमाणे पूर्वं
सौरो वर्षगणो भवति॥ तस्मिन्मासीकृते सति वर्तमानात्तगतमासचर्षसंयुते चैत्रादिका पञ्चानगता
धिमासकान् संयोज्य चांद्रो मासगणो भवति॥ तेषां सौरमासचांद्रमासानामंतरमधिमासकाः॥ तथा च ब्रह्म
सिद्धांते॥ शशिमासाः सूर्यमासोनाः अधिमासका इति॥ तथा वमसंभवः प्रदर्श्यते॥ शशिमानसावनमा
नयोः रंतरादवमोत्पत्तिः॥ चांद्रमानं यावत् सावनमानेनानीयते॥ तावत् प्रतिवर्षं षड्दिनान्यधिकतराणि
न दृश्यंते तान्येवोनरात्रवाच्यानि तिथीनां च-प्रनता च तानि॥ तत्र तिथ्यानयने कर्मे॥ अर्कोनस्य चंद्रस्य
लिप्तापिंडीकृतस्यायमस्वेरोभोगेहृते भुक्तातिथयो लभ्यंते॥ शिष्टस्य षष्टिगुणस्य चंद्रार्कस्फुटभुक्त्यंतरभा
गाहारः॥ तच्च कदाचिन्न्यूनं कदाचिदधिकं भवति॥ तेन मध्यमभुक्त्यारंतरेणात्पातः प्रदर्श्यते॥ तद्यथा॥
अर्कमध्यभुक्तिः॥५९॥ चंद्रमध्यभुक्तिः॥ ७९०॥ अनयोरंतरस्य जातसप्तमेव त्रिंशदधिकं॥ ७३१॥ अत्रस्व

वा॰सं॰

११

यमस्मात्संशोध्य एकादशावशिष्यंते॥ तान्येवमनाद्यावाख्यानि॥ तानि चानुदिनं तिथिप्रमाणाधिकमपनीताः
कलिचंद्रोभूत्वा तिथिक्षयं करोति॥ तदेव चावमरात्रसंज्ञं॥ एवं शशिदिवसानां सावनदिवसानां चांतरमवमानि॥
तथा च ब्रह्मस्फुटे॥ शशिसावनमानयोरंतरमवमानीति॥ अत्र पुलिशाचार्यः॥ चांद्रैः सावनवियुतैः प्रचयस्तेर
यचयोः कृतदिनहीनैः॥ चतुर्युगचंद्रदिवसानां सावनदिवसान् संशोध्य। चतुर्युगादिमासदिवसा भवंति॥ तेषां
त्रिंशता भागमपहृत्य चतुर्युगाधिमासकाः॥ ते रेव चंद्रदिवसैरर्कसावनदिनहीनैर्यदवशिष्यंते तावंति च
तुर्युगाप्रचयदिनानि भवंति॥ ऊनरात्रा इत्यर्थः॥ एवं सावनमानस्य चांद्रमानेन सहांतरं कृते यदवतिष्ठते
॥ तदधिमासाख्याः॥ चंद्रमासात् सौरं यदूनं तदूनरात्राः॥ तद्यथा॥ चतुर्युगचंद्रदिवसानामेतेषां॥
१६०३०००८० सावनमानाद्दिनानि॥ १५५५२००००० संशोध्य जातं॥ ४७८०००८० सावनमान
स्य प्रदर्श्यते॥ तत्र सावनमानेन स्वानि संवत्सरादिनानि॥३६०॥ अस्मिन् च सावनसंवत्सरे चंद्रदिनानि॥३७१८..
एतेषामुत्पत्तिरग्रतः प्रदर्शयिष्यामः॥ अत्र सावनमानाद्दिनानि॥३६०॥ संशोध्य जातं एतावंति
दिनानि प्रतिसंवत्सरे प्रचयो भवति॥ अथ संवत्सरप्रचयदिनानि प्रकारांतरेणानीयं
अथ अथाधिमासप्रचयश्च प्रदर्श्यते॥ त्रैराशिकेन न्यासः ४३२०००० ४७८००० ८०॥

२८००८०	४३२००००
२८००८०	४३२०००

अतः फलं च रेत॥ अथ कियता कालेनाधिमासः पततीति तत्प्रदर्श्यते॥ न्यासः॥ ३६० ३०४७८०० ८०
तस्मात् आद्योराशिश्चतुर्युगाद्यैर्गुणितः सवर्णीभूतः तस्मादंतोपि
गुणितो जातः १२९६००००० ॥ अत्राद्योराशिः सवर्णीकृतो जातः

४७८००८०
४३२००००

राशिश्चतुर्युगादैरेव गगहारराशिस्तथा...
अथ भागाहारराशिशेषः ४७८०००८० ॥ गुणाराशिनोपरिस्थाधिकेस्त्रिभिः शून्यैरपवर्तिते ३३२०७८
एष भागाहारराशिः॥ अथ भाज्य भाजकराशी जातौ १२९६०००००, ३३२०७८॥३६०॥३० एभिः
किं लभ्यते लब्धाधिमासरूपं॥ एते पुनर्द्वाभ्यामपवर्तितौ जातौ ६४८००००० । ६६३८९॥ भाज्यस्य भाग

राशिना भागमपहृत्या वासं॥

३६३५५२०००००	०७६
०७६	४३३६
५३३३६६६३८९	६६३८९

फलं॥
०७६
०१४०६४
०५९३३३६

एतावद्भिः सावनमानदिवसैर्गतैरधिमासः पतति॥ वर्षद्वयं मासाष्टकं षोडशदि
नमासाद्दिनैताः वर्षैरपि मासा अनेनकालेन भवंति ०२८००८०४३२००००
एतेषामेवदिनानां प्रकारांतरेणाः यनं त्रैराशिकेन १५९३३॥ अत्र च शेषच्छेदौ
चतुर्भिःशून्यैरपवर्तितौ जातौ अधिमासकोत्पत्तिः प्रदर्शिता॥ अथावमानाः प्रद
र्श्यंते॥ तत्र चतुर्युगचंद्रदिनानामेतेषां १६०३०००८०॥ सूर्यदिवसानीतो १५७७९१७८००
जातं॥ २५०८२२८०॥ एतावंतः चतुर्युगेणोनरात्राः॥ अथ संवत्सरेण प्रदर्श्यते॥ तत्र च
क्ष्यमाणविधिना॥ चांद्रसंवत्सरे सौरमानादिनानि॥३७४॥ एतानि चांद्रसंवत्सरस्वोदयेभ्य एते
भ्यः ३६० संशोध्य जातं॥ ॥एतावंतः संवत्सरेणोनरात्रा भवंति॥

६३३३८८
०८५२००८

एतेषां त्रैराशिकेन प्रकारां

२८१९३००
०८५२२७०८

तरेण नयनं न्यासः॥ १६०३०००८०। २५०८२२८०। ३६०॥ अत्राद्यो भागहारराशिः॥ गुण
कराशिनोपरिस्थाधिकैः स्त्रिभिः शून्यैरपवर्तितो जातः॥ ०८५२००७८॥ एतावंत ऊनरा
अनेन राशिना चतुर्युगेन रात्राणां भागमपहृत्या वासं॥ २८१९३८० त्राः संवत्सरेण

अत्र च शेषच्छेदौ द्वाभ्यामपवर्तितौ
१४००६०५
२२२६३३८९

पूर्वानीतसंवादिताः इति॥ अथ कतिभिः दिवसै ०८५२००७८ भवंति॥
रूनरात्रपातो भवतीति प्रदर्श्यते॥ न्यासः॥ ३६०॥ अत्राद्योराशिः सवर्णीकृतः॥ २५०८२२८०
यस्माद्घनेन राशिना गुणित आद्योराशिः सवर्णीकृतः॥ ०८५२००७८॥ तस्मादनेनैव
राशिनां त्योराशिरेषः॥३॥ गुणितो जातः॥ ४४५२००७८॥ एष भाज्य राशिः॥ ॥अथाद्यभाजकराशिः २५०८२२८०
गुण्य राशिना नेन ३६० भागमपहृत्यावाप्तं ६९६०३॥ अनेन भाज्यस्य राशेः ४४५२००७८॥ भागमपहृत्या
एतावद्भिः रेतावद्भिः चंद्रमानदिवसैरूनरात्रः पतति॥ अस्यैव कालस्यानयनं त्रैराशिकेनाप्र कारः॥ २५०८२२८०।३६०।३०००० । ३ अतः फलं॥६३॥ वाप्तं॥

६३
६२३७०
६०६७३

६३
६३३७०
६९६०३

अत्रापि च शेषच्छेदौ पक्षाधिकैः स्त्रिभिः शून्यैरपवर्तितौ जातौ तत एवोनरा

त्रिंशद्दिवसाः पूर्णानीति षु संज्ञिता इति॥ तथा चाचार्यः॥ युगार्कमासपिंडं रविमानं साधिमासकाधिकं चांद्रं॥ अव
वृ॰ग॰सं॰ मावष्टिनं सावनमैंदवमब्दान्वितं तास्वैमेवमधिकमासकावमसंभवस्य च कारणाभिहितः॥ अन्यत्र कारणांतरेण
न्नाहुरित्याहुः॥ षष्ट्यब्दयुगवर्षमासदिनहोराधिपतीनां प्रतिपत्तिश्छेदवित॥ षष्टिवर्षाणि षष्ट्यब्दः स च पुनः पुनर्भ
१२ वति॥ तस्य प्रवृत्तिः प्रवर्तनं॥ कस्मिन्काले षष्ट्यब्दस्य प्रारंभो भविष्यति। एतच्च बृहस्पतिचारे वक्ष्यत्याचार्यः।
आद्यं धनिष्ठांशमभिप्रपन्नो माघे यदा यात्युदयं सुरेज्यः॥ षष्ट्यब्दः पूर्वः प्रभवः स नाम्ना प्रवर्तते भूतहितस्तदा
ब्दः॥ इति छेदस्येव षष्ट्यब्दस्य निवृत्तिः॥ तां वेत्ति जानाति। प्रतिपत्तिश्छेदवित॥ तन्मध्येन द्वादशयुगानि भवं
ति॥ विष्णुः सुरेज्यो बलभिद्धुताशः त्वष्टोत्तरप्रोष्ठपदाधिपश्च॥ क्रमाद्युगेशाः पितृविश्वसोमशक्रानला
ख्याश्विभगाः प्रदिष्टाः॥ इति॥ एतेषामाचार्यो बृहस्पतिचारे गणितविधानं वक्ष्यति। वयमपि तत्रैव
व्याख्यास्यामः। एषामपि प्रतिपत्तिश्छेदवित्। तत्र सावनमानेन वर्षपतिर्भवति। तस्य चानयनमाचार्येण
तंत्रे उक्तं। यथा चाह गणानयनं॥ सप्ताश्विवेदसंख्यं शककालमपास्य चैत्रशुक्लादौ। अर्धास्तमिते भानौ
यवनपुरे भौमदिवसाद्ये॥ मासीकृते समासे द्विघ्ने सप्ताहतेऽष्टयमपक्षैः॥ लब्धैर्युतोऽधिमासैस्त्रिंशद्घ्नस्ति
थियुतो द्विघ्नः॥ रुद्रघ्नः समनुरसरोलब्धोनो गुण वसुसप्ताभिर्द्युगणाः॥ रोमकसिद्धांतोऽयं नातिचिरे पौलिशेऽप्येव
मिति॥ ॥अतो वर्षाधिपानयनं॥ मुनियमदियुक्ते द्विगुणस्त्र्यादिरूपं च यमभक्ते॥ प्रतिराशिषट्तद्वदनेन लब्धं व
र्षाणि यातानि॥ तानि प्रयत्नसहितान्यग्निगुणान्यश्विवर्जितानि हरेत॥ सप्तभिरेवं शेषो वर्षाधिपतिः
क्रमात्सूर्यात्॥ अत्राहर्गणस्य षष्टित्रिंशतत्र्यधिकेन भागे हृते यच्छेषं तानि दिनानि प्रवृत्तस्याब्दपतेर्गतानि॥
तान्येव षष्ट्यधिकाच्छतत्रयात् संशोध्य यच्छेषं भविष्यति। तावत्येव दिनानि स एवाब्दपतिर्भविष्यति॥ एवमब्द १२॥
पतेः प्रतिपत्तिश्छेदौ ज्ञातौ॥ मासपतिरपि सावनेनैव मानेन प्रवृत्तीनिवृत्ती भवतः॥ तस्य चानयनमाचार्ये
णतंत्र एवोक्तं॥ तथा च॥ त्रिंशद्धृतेऽर्कमासाः प्रपंचसहिता द्विसंगुणेऽप्येकाः॥ सप्तोद्धृतावशेषा मासाधिपति

र्थ्येवार्कात्॥ तत्र त्रिंशता भागे हृते यच्छेषं भविष्यति। तावंत्येव दिनानि तस्य मासपतेः प्रवृत्तस्य गतानि॥ तानि
चात्रिंशतः संशोध्य यच्छेषं भविष्यति तावंति दिनानि स एव मासपतिर्भविष्यति॥ एवं मासपतेः प्रतिपत्तिश्छेदौ ज्ञा
तौ॥ तथा च ब्रह्मसिद्धांते। षष्टिघ्नात्त्र्यभक्तात्कल्पगताहर्गणान्न फलं त्रिगुणं। सैकं सप्तविभक्तं सावनवर्षा
धिपाः क्रमशः॥ द्युगणात्त्रिंशद्भक्तादल्पाद्द्विगुणितं स्वरूपं ततः॥ सप्तविभक्तं शेषं सावनमासाधिपाः क्रमशः
॥ २॥ दिनपतिहोराधिपत्योराचार्याणामनैक्यमेतानि॥ केषांचिदौदयिके वाराधिपतिरन्येषामाध्यान्दिक॥
ऽन्येषामस्तमयिकोऽन्येषामर्धरात्रिक इति॥ तथा चाचार्यः॥ द्युगणाद्दिनवारास्तिर्युगणापि देशकालसंबंधः॥
लाचार्येणोक्तं यवनपुरेऽर्धास्तगे सूर्ये॥ रव्युदये लंकायां सिंहाचार्येण दिनगणोऽभिहितः॥ यवनानां निशि दश
भिर्गतैर्मुहूर्तैश्च तद्गुणाः॥ लंकायामर्धरात्रे समये दिनप्रवृत्तिं जगाद चाचार्यभटः॥ भूयः स एव चार्कोदया
त्प्रभृत्याह लंकायां॥ देशांतरसंशुद्धे कृतान्चेन्न घटते तथास्मिन॥ साम्यंतेऽखिलं यथा शास्त्रं॥ मध्यान्दिन
ग्राः श्वेवस्तमयं कुरुषु कृतमालानां॥ कुरुतेऽर्धरात्रमुदग्गुरुतवर्षं युगपदर्कः॥ उदयो यो लंकायां सोऽस्तम
यः सवितुरेव सिद्धपुरे। यमकोट्यां मध्याह्नो रोमकविषयेऽर्धरात्रं स्यात्॥ अधिमासकोन रात्र्यदादिनति
थिदिवसमेषचंद्रार्काः॥ अयनत्वर्क्षगतिनिशाः समं प्रवृत्ता युगस्यादौ॥ अन्य द्रामकविषयाद्देशांतरमन्यदे
वयवनपुरात्॥ लंकार्धरात्रसमयादन्यत्सूर्योदयाच्चैव॥ सूर्यस्यार्धास्तमयात्प्रतिवर्षं यादृदिनाधिपक्रमः
तत्रापि ना सवासयन त्र युक्तिः काचिदप्यास्ति॥ संध्याः क्वचित क्वचिदर्द्धः क्वचिन्निशार्धे दिनपतेः क्वचित्क्वचित॥ सू
र्यस्वसेरुवा नस्याकुल मेवाद्दिनपतित्वं। होरावर्तोप्येवं यस्मात होरादिनाधिपस्यापि॥ तस्मात शनि दिनहो
राधिपतिः कथं भवति॥ अविचार्यैव प्राप्यो दिनं चारेऽत्र न पदं प्रवृत्तार्थं॥ स्फुटतिथिविच्छेदसमयत्तमिदं
प्राहुराचार्या इति॥ एवं स्थिते सति दिनवारश्चौदयिक इति॥ अस्माकं मतं॥ यस्माद्बहुलग्नसेनोक्तो गतितते मार्तं
मिन सूक्ष्मादौ भास्करादिभिः सृष्टिः॥ यस्माद्दिनप्रवृत्तिर्दिनवारो ऽर्कोदयस्तस्मात्॥ तत्र विशेषः॥ दिनवारा
दिः १२ पश्चाद्दुल्लाधिन्यां दक्षिणोत्तरायां॥ प्राग्देशोदेशां बरघटिकाभिः पश्चात् प्राक्भवति॥ रव्युदया

दिति॥ तत्रविशेषः॥ दिनाधिपस्तु सावनेनैवमानेन भवति किंतु॥ देशे देशे स्वदेशांतरघटिकादिभिश्च रात्रिशेषा
भिर्वारप्रवृत्तिरिति॥ एवंविषुवद्दिने चरस्याभावात॥ अन्यकाले चरदलं मधियायोज्यं॥ यथा संभवं तत्रायं प्रयो
गः॥ स्वदेशमध्यान्हघटिकाभिः पंचदशभ्यो ऽधिकशेषा याघटिकास्ताभिरेखाप्राक्भागे मध्यान्हात प्राकूवा
दिः स्वदेशे नित्यं वक्तव्यः॥ रेखापश्चिमभागे ऽधिकात्रादूर्ध्वं तावत्ताभिरेव घटिकादिति॥ यथाह भट्टबलभद्रः॥ उ
ज्जयिनी नस्वगतायां रेखासा दक्षिणेन लंकायां॥ उत्तरतः स्वयुमेरुस्तु या देशांतराख्यासा॥ स्वदेशारेखांतर योजना
नां षष्ट्यादत्तानां स्फुट भक्तानां॥ ते यत्स्वलब्धा घटिकाद्विकालो देशांतराख्यः स ततं स्वादेशे चराधितकालयुता
गता यां दिवा स होरादिनपादिवेका॥ लेखाविभागत्रिदिवेशरात्रीकालांतराद्यश्चरखंड शेषः॥ कालेन तेन
क्षणदाच शेषन्यूने चरार्धे तु दिवा गतेस्यात॥ रेखाः परार्धे तु कृते तराले चरार्धकाले व्यधिके दिनस्य॥ का
ले प्रयाते त्रिदशान्दवेलातदूनतायां क्षणदाव शेषे॥ एवं यस्मिन्काले वर्तमानस्य दिनपतेः प्रवृत्तिः तस्मि
न्काले ऽतीतस्यानिवृत्तिरिति॥ एवं दिनपतेः प्रवृत्तिर्ज्ञातातो॥ अहोरात्राधिपतेः। तत्र यावतीनां घटिकानांता
रापते रारंभात प्रवृत्तिर्दिनगतानां रात्रिगतानां वा कालहोरा ज्ञातुमिष्यते॥ ता घटिका अभीष्टकाले गताए
कीकृता यावत्यो भवंति॥ ताद्विगुणा कार्याः॥ ततस्तासां पंचभिर्भागमपहृत्यावासं॥ भुक्तहोरा भवंति॥
ताश्च पंचगुणाः॥ सैकाश्च कार्याः। ततस्तासां सप्तभिर्भागमपहृत्य यच्छेषांकस मोदिनपालप्रभृतीष्ट
कालेहोराधिपो भवति। पंचभिर्भागे हृते यच्छेषं तदधः पंचभ्यः शोधयेत॥ ततो द्वाचष्ट्र ऽधोधः स्थितांक
काचहीकृत्यार्ध्वस्थितो वर्तमानहोरापतेर्गतः कालो ऽधः स्थितायस्ता वत्काले स एव होराधिपतिः॥ तथाच भ
ट्टबलभद्रः॥ प्रारंभकालादिनपस्य याते काले यमर्थ हृते तु लब्धिः॥ आरादतावंद्रयुताद्विभक्ता शेषस्तु होराधिपति
र्घ्नपादिः॥ तथाचास्मदार्यवचनं॥ वारपते रारंभात कालद्विगुणाच्छरैर्हृता लब्धं॥ पंचघ्नं सैकयुतं मुनिभ
क्तं वारपानस होरेषः॥ अत्र होरापतेर्नाडिकाद्वयं सार्धभागं परिकल्प्य प्रवृत्तिनिवृत्योः परिकल्पना कार्या॥ १३॥

तथाच ब्रह्मसिद्धांते॥ दिनगतघटिकाद्विगुणाः पंचहृता वान्यमतमेतदिति॥ तथाचार्यः॥ समो हृते ऽष्कि गु
णाल्ये कोयुतश्च होराभिः पंचधः सप्तहृतो विज्ञेयः कालहोरेशः॥ अत्राहर्गणायो दिनपतिस्ततास्यानयनं
कार्यं॥ एवं च वर्षाधिपादीनां॥ अयं गणनाक्रमः॥ वर्तमानवर्षाधिपश्चतुर्थो ऽन्यस्मिन वर्षे भवति॥ मासा
धिपान्मासपस्तृतीयः॥ होराधिपाद्धोराधिपः षष्ठः॥ दिनाधिपतिर्निरंतरइति। तथाचाचार्यः॥ कक्षाक्रमगा
अयने दक्षिणोत्तरे ॥ तथा तेनैव प्रकारेण एतानि सर्वाण्याकुलानि स्युर्भवेयुः ॥ अथवा आकुलानि

नष्टागमानि स्युः ॥ यदि सांवत्सरो दैवविन्न स्यात् ॥ अन्यत्प्रशंसार्थमाह ॥ ॥ तस्माद्राज्ञाधिगंतव्यो विद्वान्सांव
त्सरोग्रणीः ॥ जयं यशः श्रियं भोगान् श्रेयश्च समभीप्सता ॥ तस्मात्पूर्वोक्ताद्धेतोः राज्ञा नृपेण अधिगं
तव्योधिगमनीयः ॥ विद्वान्पंडितः सांवत्सरो दैववित् ॥ अग्रणीः प्रधानः ॥ कीदृशेन राज्ञा ॥ जयं शत्रु
विजयं ॥ यशः कीर्तिं श्रियं लक्ष्मीं ॥ भोगान् उपभोगान् ॥ श्रेयः आरोग्यं समभीप्सता ॥ प्राप्तुमिच्छता ॥
अन्यदप्याह ॥ तस्मात्सांवत्सरिके देशे वस्तव्यं भूतिमिच्छता ॥ चक्षुर्भूता हि यत्रैष पापं तत्र न विद्यते
भूतिं समृद्धिमिच्छता प्रार्थनपरेण ॥ पुंसा असांवत्सरिके दैवज्ञवर्जिते देशे स्थानेन वस्तव्यं ॥ न निवस
नीयं ॥ हि यस्मात्कारणात् यत्र यस्मिन्देशे एष दैवविच्चक्षुर्भूतः प्रकाशकः स्यात्तत्र तस्मिन्देशे पापं म
नोनविद्यते ॥ न भवति ॥ तत्पुण्यकारित्वात् ॥ अथ दैवविद्प्रशंसार्थमाह ॥ ॥ न सांवत्सरपाठी च
नरकेषूपपद्यते ॥ ब्रह्मलोकप्रतिष्ठां च लभते दैवचिंतकः ॥ सांवत्सरमधीत्य यः कृतं शास्त्रं सांवत्सरं ॥
तत्पठनशीलः ॥ सांवत्सरपाठी ॥ नरकेषु नोपपद्यते ॥ नरकान्न प्राप्नोति ॥ यतो दैवचिंतकः कालवित्
ब्रह्मलोके धातृभुवने प्रतिष्ठां लभते ॥ स्थितिं प्राप्नोति ॥ अन्यत्प्रशंसार्थमाह ॥ ॥ ग्रंथतश्चार्थतश्चैतं
कृत्स्नं जानाति यो द्विजः ॥ अग्रभुक्स भवेच्छ्राद्धे पूजितः पंक्तिपावनः ॥ एतं ज्योतिःशास्त्रं ग्रंथतः पाठेन अ
र्थतो व्याख्यया च कृत्स्नं निरवशेषं यो द्विजो ब्राह्मणो जानाति वेत्ति ॥ स श्राद्धे पितृतर्पणे पूजितः अग्रभुक्
प्रथमभोक्ता भवति ॥ स च पूजितोर्चितः पंक्तिपावनः यस्यां पंक्तावुपविशति ॥ तां पवित्रीकरोति ॥ अ
न्यदप्याह ॥ ॥ म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितं ॥ ऋषिवत्तेपि पूज्यंते किं पुनर्दैवविद्द्विजः
हि यस्मादर्थे ॥ यवनाः किल म्लेच्छजातयः ॥ तेषु यवनेष्विदं ज्योतिःशास्त्रं स्फुटतरमागमनः स्थितं ॥
यतः एवाचार्येभ्यस्तैः प्राप्तं ॥ तथा च ॥ यद्दानवेंद्राय मयाय स्वयं शास्त्रं ददौ प्रणताय पूर्वं ॥
विस्तार्य मिश्रमहर्षिमुख्याः तानामतं यत्परमास साद ॥ परा नरास्ताभ्यधिगम्य सम्यक्सांख्यं सुराणां
परमाद्भुतं च यत ॥ प्रकाशयां चक्रुरथ क्रमेण महार्थमेतावदनेन तंत्र ॥ इति तेपि ऋषिवन्मुनिवः

संपूज्यंते। अभ्यर्च्यंते॥ किंपुनर्योऽङ्गविद्ब्राह्मणो दैवविद्भवतीति॥ अत आह अव्याप्त्यनादरं॥ ॥कुहकावेशपिहि
तैः कर्णोपश्रुतिहेतुभिः। कृतादेशो न सर्वत्र प्रष्टव्यो न स दैववित॥ कुहकेन इन्द्रजालेन प्रसंनादिकेन आवेशेन
देवदत्तादिप्रवेशनेन पिहितः प्रच्छन्नो य उपचारः॥ कुत्रचित्समापि रभित्यादिकः भूतरक्षितो व्यक्तवाचा
मं भाषते॥ एतैः कुहकावेशपिहितैः तथा कर्णोपश्रुत्या कश्चिन्मंत्रविशेषो ज्ञप्तः। कर्णे यः प्रश्नः कथ्यते॥ ता
कु कर्णपिशाचिकोपि प्रसिद्धा अथवा प्रष्टा यत्रापि पिशाचिता रतनमस्य आत्मीयां गूढार्थां विस्तृय तेषां सन्
पारस्परीं च यमाणामाकर्णयति॥ तामा कर्णोपश्रुतिं॥ यथास्य इमभिप्रायं तस्य भवतादेवं कुं। यस्य
इमभिप्रायं तस्य देवं कुर्यामिति॥ हेतुनार्तकेणाम्पा यच्च आकर्णितं कुहकावेशपिहितकर्णोपश्रुतिहेतुभि
रिति पठंति॥ तथापि न कश्चिद्दोषः॥ एवमादिभिः कृतादेशः आदेशः कृतो येन स सर्वत्र न वचनकृतिप्रष्टव्योयतः
स दैववित् न यतः शास्त्रं न वेत्ति। अथ तं प्रत्याह॥ ॥अविदित्वैव यः शास्त्रं दैवज्ञत्वं प्रपद्यते। स पंक्तिदूष
कः पापो ज्ञेयो नक्षत्रसूचकः॥ यः शास्त्रमविदित्वा अज्ञात्वा दैवज्ञत्वं ज्योतिर्वित्वं प्रतिपद्यते अंगीकरोति
॥ दैवज्ञत्वमाचरति॥ स पंक्तिदूषकः पंक्तिमपवित्रां करोति॥ दूषयतीति पापः॥ नक्षत्रसूचको नक्षत्राणि
गुणो ज्ञेयो ज्ञातव्यः॥ इति। यदि केनचित्कदाचिद्दत्तं तद्वचनं सत्यरूपं भवति॥ तदुच्यते॥ ॥नगरद्वारलो
ष्टस्य यद्वत्स्यादुपयाचितं। आदेशस्तद्वदज्ञानां यः सत्यः स विभाव्यते॥ नगरद्वारं पुरद्वारं॥ लोष्टो पा
षाणखंडस्तस्योपयाचितं प्रार्थितं यद्वद्यथा सत्यं स्यात्सत्यरूपं भवेत्॥ कदाचित्काकतालीयन्यायेन तद्व
दज्ञानां मूर्खाणां य आदेशो वार्ताकथनं स एव विभाव्यते॥ सत्यमिव प्रतिभाति॥ अविदग्धसांवत्सरं
प्रत्याह॥ संपत्त्या योजितादेशस्तद्विच्छिन्नकथाप्रियः। मत्तः शास्त्रैकदेशेन त्याज्यस्तादृङ्महीक्षिता॥ २८
यो दैववित् संपत्त्या योजितादेशः। संपत्त्या अर्थदानेन योजितं आदेशो येन। यथा पूर्वं मे वमम मा मुकस्य
कथितमेतन्मे देवदत्तेनैव यथा आस्पदिति॥ यद्विच्छिन्नतिः शास्त्रैकदेशस्य तत विच्छिन्ना। यथा न शास्त्रस्य
कदेशं प्रकरणं ज्ञात्वा तेनैव मत्तः सदर्पस्तादृक्तथाभूतो दैववित् महीक्षिता राज्ञा त्याज्यस्त्यक्तव्यः।

नेनं विधानात्मसात्कुर्यादिति। विदग्धसांवत्सरं प्रत्याह॥ यस्तु सम्यग्विजानाति होरागणितसंहिताः। अभ्य
र्च्यः स नरेन्द्रेण स्वीकर्तव्यो जयैषिणा॥ यस्तु पुनः सम्यक्स्फुटतराः समस्ता माश्च होरागणितसंहिताः त्रिस्कं
धज्योतिःशास्त्रं जानाति॥ स नरेन्द्रेण राज्ञा जयैषिणा विजयमाकांक्षता प्राप्तुमिच्छता अभ्यर्च्यः संपूजनी
यः। स्वीकर्तव्य आत्मसात्कार्यश्चेति॥ विदग्धसांवत्सरिकाद्गुणमभवतीत्यर्थः॥ न तत्सहस्रं करिणां वाजि
नां च चतुर्गुणं। करोति देशकालज्ञो यथैको दैवचिंतकः॥ ३८॥ गजाः करिणां हस्तिनां सहस्रं दशशतानि
न तत्कार्यं करोति॥ तथा वाजिनामश्वानां चतुर्गुणं चत्वारि सहस्राणि न तत्कार्यं कुर्वंति॥ यथा देशकालज्ञो दैव
चिंतकः। सांवत्सरिक एक एव कार्यं करोति। देशकालज्ञः क्षणं प्रयोगं च व्याख्याति॥ तथा च भगवान्पराशरः॥ यथांग
व मुखाग्नि॥ अग्निमुखास्तथा देवाः॥ दैवविन्मुखा राजानो राजमुखाश्च प्रजाः॥ तस्माद्विज्ञानात यत्नात् श्रेय
सो नरपतिर्द्विजा मन्त्रवच्छ्रेयोर्थाभिविजिगीषुरेनमधिगच्छेत्॥ कुलीनमनहंकृतमस्तब्धमजिह्ममप्रमत्तमवि
षयमव्यंगमविकृतप्रमाणं लक्षणं वेदवेदांगेतिहासपुराणधर्मशास्त्राविदाते शुचिं ... अरण्यं समत्वं चाद्विज
मक्रोधनमग्निदेवद्विजगुरुवृद्धाचार्यपूजाभिरतमनुगम्यमनमाचार्यशिष्यं वाभ्युपेत्यैनाच ज्ञानीयात
रहस्यं चैनं पृच्छेत। यस्माद्देवं परं नविदुः। नास्मिन्प्रशान्त्यर्थानविमुह्यंति चात्र॥ हिंसादंभानृतलोभदुष्टादिदोष
वर्जितं॥ नरेन्द्राहूतमक्रोधंश्चिरं कालविदं विदुः। भूतभव्यभविष्यस्य कालस्य ज्ञानपारगं॥ अहीनांगं गुणोप
तं गुरुभक्तं प्रियंवदं॥ यथांगिरस्समाचार्यमधिगम्य शतक्रतुः। त्रैलोक्यराज्यं गतवान् तद्वज्जैवविदं नृपः॥ ३९
अथ नक्षत्रश्रवणात्फलमाह॥ दुःस्वप्नदुर्विचिंतितदुःप्रेक्षितदुःकृतानि कर्माणि। क्षिप्रं प्रयांति नाशं शशिनः
श्रुत्वा भसंवादं॥ ४०॥ दुःस्वप्नं दुष्टस्वप्नं दुर्विचिंतितमनभिमतं ध्यातं दुःप्रेक्षितममंगलस्य दृष्टं दुःकृतानि दुष्टा
नि चर्याणि कर्माणि कृतानि शशिनश्चंद्रमसो भसंवादं भैर्नक्षत्रैः सह संवादं श्रुत्वा सर्वाण्येतानि क्षिप्र
माशु एव विनाशं प्रयांति॥ क्षयं व्रजंति। तिथिनक्षत्रं श्रुत्वा सर्वपापानि विनश्यंतीत्यर्थः॥ तथा चोक्तं॥ श्रुत्वा ति
थिं भग्रहवासरं च प्राप्नोति धर्मार्थयशांसि सौख्यं। आरोग्यमायुर्वित्तं यसुतं च दुःस्वप्नघातं प्रियतां

बृ॰ सं॰ चन्द्रार्क॥ इति।आप्तस्यैतिवचनमाह॥न तथेच्छति भूपतेःपिताजननीवा स्वतनोश्च यामृद्धिं॥ स्वयशोभिविवृद्ध
ये यथाहितमाप्तः सबलस्य दैववित्॥५०॥ भूपतेः राज्ञः सबलस्य यन्कस्यहितस्य स्वयशोभिविवृद्धये आ
२० त्मीयकीर्तिवृद्ध्यर्थं यथा आप्तः शास्त्रज्ञानतत्त्वार्थवित् दैवविद् हितमिच्छति। श्रेयआकांक्षति॥तथा
न पिताजनकोजननीमातान स्वतनोर्वांधवजनानाम्‌वृद्धिमित्रं तथाहितमिच्छतीति॥ आनंतकरतेरचितसांव
त्सरसूत्रमहार्घ्यो। अर्थिनामुपकथ्यकल्पा मया विवृतिपूर्वमिति॥५०॥ ॥इतिश्रीभट्टोत्पलविरचितायां
संहिताविवृतौसांवत्सरसूत्रनामाध्यायो द्वितीयः॥ ॥अथादित्यचारोव्याख्यायते।तत्रतावत्परमतेना
यनयोर्लक्षणमाह॥आश्लेषार्द्धाद्दक्षिणमुत्तरमयनं रवेर्धनिष्ठाद्यं॥ नूनं कदाचिदासीद्येनोक्तं पूर्व
शास्त्रेषु॥१॥ यदुक्तं पाराशरतंत्रे॥ श्रविष्ठाद्यात्पौष्णार्धचरतः शिशिरवसंतः।पौष्णार्धाद्रोहिण्यंतं सौ
म्याद्यात्सार्पार्धं ग्रीष्मः प्रावृट्॥सार्पार्धाद्धस्तांतं चित्राद्यैन्द्रार्धं शरत्॥ हेमंतो ज्येष्ठार्धाद्वैष्णवांतमिति॥
तत्रैरवेरादित्यस्याश्लेषार्धात्सार्पार्धात् दक्षिणमयनं॥तथा धनिष्ठाद्यंवासवप्रारंभमुत्तरमयनं॥ नू
नं निश्चितं कदाचित्कस्मिंश्चित्कालवशादासीदभूत्॥ येन पूर्वशास्त्रेषु पराशरादिषूक्तं कथितं॥ नूनमनुमानेन
वा॥१॥ अधुनास्वमतमाह॥ सांप्रतमयनं सवितुः कर्कटाद्यं मृगादितश्चान्यत्॥ उक्ताभावो विकृतिः प्रत्य
क्षपरीक्षणैर्व्यक्तिः॥२॥ सांप्रतमिदानीयुक्तवासवितुरादित्यस्य कर्काद्यंकुलीरप्रथमभंकमयनं।द
क्षिणं मृगादितो मकरादितश्चान्यद्वितीयमयनमुत्तरं॥ एवमुक्तस्य कथितस्यार्थस्य यद्यभावोन्यथा
त्वं स्यात्तद्विकृतिर्विकारः॥२॥ तत्र प्रत्यक्षपरीक्षणैर्दृश्यमानैर्व्यक्तिः॥ स्पष्टं भवति। विकृतेरुक्तेनमित्य
र्थः॥२॥ तत्र च परीक्षणमाह॥ दूरस्थचिह्नवेधादुदयेस्तमयेवासहस्रांशोः॥ छायाप्रवेशनिर्गमचि २०
ह्नैर्वामंडलेमहति॥ दूरेतिष्ठतीति दूरस्थं। दूरस्थं च तच्चिह्नं च दूरस्थचिह्नं। तेन वेधो दूरस्थचिह्नवेधः। तस्मा
त् दूरस्थचिह्नवेधात् सहस्रांशोरादित्यस्योदये उदयकाले अस्तमयकाले चलनमन्वेष्यं॥ यतो मकरादित्यः प्र

तिदिनमुत्तरांदिशं याति। तथा कर्कटादावस्थितः प्रतिदिनं दक्षिणां दिशं याति। तेन दूरस्थितं चिह्नं आदित्यमुदये
स्तमये च वा सवितुश्चिह्नं कृत्वा द्वितीयदिने तत्रैव स्थिता पुनरपि विचारः कार्यः। किमयनचलननिवृत्ति
र्जाता। न वेति। एवं दिन सप्तकं यावद्गणितागत संक्रांतिकालात् प्राक्पश्चाद्वा लक्ष्यं। स्फुटगणितागतसंक्रांति
कालतुल्याज्ज्ञाताकिं मासेकिं पश्चाद्वेति। तथा मृत्पिण्डादिनंगलेन द्रयास्तमययमम्‌ंतीत्यर्थः॥ छायाप्र
वेशनिर्गमने च यानि चिह्नानि उपलक्षणानि तैरपि। वाशब्दः प्रकाशाय। एतदुक्तं भवति। समायामवनौ
वृहद्वृत्तमुत्पाद्य द्वादशांगुलिकं त्यानतमध्ये शंकुं विन्यसेत्॥ तत्र विषुवद्दिने सूर्योदयास्तमयोः पूर्वापरं
रेखायां तत्स्पर्शं छाया पतति॥ ततो यथाकोमिथुनांतं यावदापि। तथा कर्कोदयकाले छाया दक्षिणेन याति
प्राच्यपरं रेखाया अस्तमयेप्येवं॥ ततः कर्कटादौ स्थिते कर्कप्रतिदिनं छायोत्तरेण याति। यावत्कन्यांतं॥ तुला
दौ पुनः प्राच्यपरे रेखायां पतति॥ ततो धन्वंतं यावत्प्रतिदिनं दक्षिणेन याति॥ यावन्मीनांतं॥ एवमत्यंत
मनतिवृत्तावासन्नायां यस्मिन्मंडलप्रदेशे पूर्वा च्छाया प्रविशति॥ तत्र चिह्नं कार्यं॥ यत्र चाप
राह्णे निर्गच्छति॥ तत्रापि चिह्नं कार्यं। पुनरपि द्वितीयदिने यथास्थितस्य तस्य शंकोश्छाया प्रवेशनि
र्गमचिह्ने कार्ये॥ एवमन्वेष्यं॥ प्रतिदिनं दिनसप्तकं यावत्प्रथमदिनकृतचिह्नाद्द्वितीयदिनकृतचिह्नयोर्य
दा साम्यमुत्पन्नं॥ तदा तद्दिने अयननिवृत्तिरेवं यत्स्यात्तावत्सविचार्यते॥ किमयननिवृत्तिः करणागतसंक्रां
तिकालतुल्याकिं मासेपश्चाद्वेति॥ एवं प्राकृताया विकृताया वायननिवृत्तावन्वेषणं कार्यमिति॥३॥ इदानीं
वैकृतफलमाह॥ अप्राप्य मकरमर्को विनिवृत्तो हंति सापरां याम्यां॥ कर्कटमकं संप्राप्तो निवृत्तश्चोत्तरां सैंद्रीं॥
४॥ अर्कआदित्यो मकरमप्राप्य विनिवृत्तो निवृत्तस्तदा सापरां याम्यामपरया पश्चिमया सहयाम्यां दक्षि
णां दिशं हंति॥ तत्स्थानजनान्नाशयतीत्यर्थः॥ तथा कर्कटं कुलीरमसंप्राप्तो गतोयन्निवृत्तो भवति॥ तदा
उत्तरामुदीचीं दिशं सेंद्रीं सपूर्वां हंति। तत्स्थानजनानाननाशयतीत्यर्थः। तथा च गर्गः। यदा निवर्ततेप्राप्तः श्रवि
ष्ठामुत्तरायणे॥ आश्लेषां दक्षिणं प्राप्त स्तदा विद्यान्महद्भयं॥ इति॥ तथा च पराशरः॥ यदा प्राप्तो वैष्णव

व०मां० उदक्स्थात्वं प्रपद्यते। दक्षिणमाश्लेषार्धाद्दक्षिणेति॥ ॥अथाधिकृतायां शुभाशुभमाह॥ उत्तरमयनमती
त्य व्यावृत्तः क्षेमसस्यवृद्धिकरः॥ प्रकृतिस्थश्चाप्येवं विकृतगतिर्भयकृदुष्णांशुः॥ ४॥ उत्तरमयनमतीत्याति
३० क्रम्य मकरं प्राप्यं पश्चाद्यदि निवृत्तो भवति॥ तदा क्षेमसस्यवृद्धिकृद्भवति॥ कल्यपालनं क्षेमः॥ क्षेमं करोति
लोके सस्यानां च वृद्धिं करोति। तस्य च दिनाधिक्यादुत्तरमयनग्रहणमुपलक्षणार्थं। दक्षिणमयनेप्येवं ज्ञे
यं॥ तथा प्रकृतिस्थः स्वनाडिस्थश्चाप्येवं क्षेमसस्यवृद्धिकृद्भवति॥ एतदुक्तं भवति। स्फुटगणितेन यस्मिन्दि
ने अयननिवृत्तिर्ज्ञाता। तस्मिन्नेव दिने यदि छायाप्रवेशनिर्गमाभ्यां चिह्नं सम्यगिति मंडले दृश्यते। तदा प्रकृतिस्थः
। तथा च भगवान्वृद्धगर्गः॥ अयने कप्रभः स्निग्धः सेवते यदि भास्करः॥ सुवृष्टिश्च सुभिक्षं च योगक्षेमं
च निर्दिशेत्॥ अनिवृत्ते समे वापि निवृत्तः स्यात्तु रविः॥ दीनभयाय लोकानां दुर्भिक्षमकरग्रहः॥ विकृ
तगतिर्भयकृदिति। विकृता सविकारा गतिर्यस्यासौ विकृतगतिः॥ तथाभूतो भयकृल्लोकस्य भयं भीतिं क
रोति॥ अयननिवृत्तो दृश्यां पुनर्यदि प्रलंबगतित्वमर्कस्य दृश्यते। तदा विकृतगतिर्ज्ञातव्यः॥ पराशर
तंत्रे ऽर्कस्य पंचधा गतिरुक्ता। तथा च॥ पंचधा गतिमुदयास्तमययोरंतरा भजत्यध्यांति यदि मंडला
मध्यान्न स्वस्यानुयायिनीमपि तिर्यग्गच्छति। कासायाम धोगच्छति॥ चोदयं॥ प्रातरारंभमनुक्रम्य मध्यं
गच्छति भास्करः॥ मध्यान्हं चापयन लोकान्मंडलं कुरुते गतिं॥ अपरस्तु पिच मध्यान्हाद्धो गच्छति भा
स्करः॥ अस्तं गच्छन्नपि रविर्निश्चयमनुगच्छति। एषामपि यदि सविकारा दृश्यते। तथापि भयकृदिति॥
६॥ त्वष्टानामग्रहस्तदादित्यस्य यदशुभं फलं तदाह॥ सतमस्कं पर्वविना त्वष्टानामार्कमंडलं कुरुते॥ स निहं
ति सप्त भूपान्जनांश्च शस्त्राग्निदुर्भिक्षैः॥ ६॥ त्वष्टा नाम ग्रहोर्कमंडलं सूर्यमंडलं पर्वविना अपर्वण्यपि सत ३०
मस्कं तमसांधकारेण संप्रयुक्तं कुरुते॥ स तु दृष्टः सप्त भूपानष्टकर्मोत्तमान्॥ न वानांस्वपाणां मध्यात्सप्त
संख्यान्भूपान्नृपान्हंति घातयति। तथा शस्त्राग्निदुर्भिक्षैः॥ शस्त्रेण संग्रामेणाग्निना दहनेन दुर्भि

क्षेण असुभिक्षेण च जनान्लोकान्निहंति॥ तथा च भगवान्पराशरः॥ अपर्वणि शशांकार्कौ त्वष्टानाम महाग्रहः
॥ आवृणोति तमःश्यामः सर्वलोकविपत्तये॥ ॥अथ तामसकीलकानामर्कमंडलगतानां फलमाह॥ तामस
कीलकसंज्ञा राहुसुताः केतवः त्रयस्त्रिंशत्॥ वर्णस्थानाकारैस्तान्दृष्ट्वार्के फलं ब्रूयात्॥ ७॥ राहुसुताः स्वर्भा
नुपुत्राः त्रयस्त्रिंशत् केतवस्तामसकीलकसंज्ञाः॥ तामसकीलक इति तेषां नाम॥ तान्तामसकीलकानर्केना
र्कमंडले वर्णस्थानाकारैर्दृष्ट्वा॥ वर्णः श्वेतादिः॥ स्थानं प्रवेशो बिंबविभागः॥ आकारः स्वाकृतिः॥ ध्वांक्षादि
सादृश्यं॥ एतैर्वर्णस्थानाकारैर्दृष्ट्वा लोकस्य लोके जनपदे फलं शुभाशुभं ब्रूयाद्वदेत्॥ ॥अथ तेषां शुभाशु
भफलमाह॥ ते चार्कमंडलगताः पापफलाश्चंद्रमंडले सौम्याः॥ ध्वांक्षकबंधप्रहरणरूपाः पापाः शशांके
पि॥ ८॥ तामसकीलकाश्चार्कमंडले सूर्यबिंबगताः प्राप्ताः पापफला अनिष्टफलदा भवंति। चंद्रमंडले शशि
मंडले गताः॥ सौम्याः शुभफलप्रदा भवंति। तथा ध्वांक्षः काकः॥ कबंधश्छिन्नशिराः॥ प्रहरणं खड्गादि॥ ध्वां
क्षकबंधप्रहरणरूपास्तदाकृतयः॥ शशांके चंद्रमंडलेप्यशुभदाः॥ अपिशब्दः संभावनायां॥ चंद्रमंडले शुभाः
ते ऽर्कमंडले नितरामशुभाः॥ इति॥ अथ तेषामुदयनिमित्तान्याह॥ तेषामुदयो रजसा भः कलुषं रजोवृतं व्यो
म॥ नगतरुशिखरामर्दी सशर्करो मारुतश्चंडः॥ ९॥ ऋतुविपरीतास्तरवो दीप्ता मृगपक्षिणो दिशां दाहः
॥ निर्घातमहीकंपादयो भवंत्यथ चोत्पाताः॥ तेषामिति। तेषां तामसकीलकानामुदये दर्शने रूपाण्येता
नि लक्षणानि दृश्यंते॥ तथा भः पानीयं निमित्तं विना कलुषमप्रसन्नं॥ व्योम आकाशं रजोवृतं रजसाच्छादितं॥
तथा मारुतो वातश्चंडः॥ परुषो वाति। वहति। कीदृशः॥ नगतरुशिखरामर्दी सशर्करः॥ सह कणिकाभिः श
र्कराभिः सहितः॥ ऋतुविपरीता इति॥ तरवो वृक्षा ऋतुविपरीताः॥ तेषां स्वे अकाले कुसुमफलादीनाम
भावः॥ अनृतौ कुसुमफलान्युत्पद्यंते॥ तथा मृगा आरण्यपशवः पक्षिणः खगाश्च दीप्ताः सूर्याभि
मुखा दीप्तरुताः परुषरवाश्च भवंति॥ दिशां दाहो दिग्दाहश्च सर्वा दृश्यते। अत्रास्मिन्तामसकीलको
दये निर्घातः॥ निर्घातलक्षणं वक्ष्यति॥ पवनः पवनाभिहतो गगनादवनौ यदा समापतति। भवति

तद्वदिति महीकंपो भूकंपः॥ आदित्यरूपाद्युल्कानां रजःकपातगंधर्वनगराणि दृश्यंते। दृश्यंते॥ एते उत्पाता भ
वंति। अथैतेषामुत्पातानां निष्फलत्वमाह॥ अपृथक्फलानि तेषां कीलकरादुर्दर्शनानि यदि तदृश्यकारण
मेषां कीलकादीनां फलं ब्रूयात॥२२॥ तेषामंभःकलुषादीनामुत्पातानां पृथक्फलानि भवंति॥ यदि निर्गाविनः कीलाः
कीलकानां तामसकीलकानां राहोः स्वर्भानोश्च दर्शनानि भवंति॥ अर्कचंद्रयोरन्यतमस्य ग्रहणं भवतीत्यर्थः॥
एतेषां समाहांतरदर्शनेदुत्पातानि फलादीयाः॥ तद्दृश्यकारणमिति॥ अतएषां कीलादीनां फलमेव ब्रूया
द्दैवज्ञः॥ केतु तामसकीलकराहूणामिति॥ एतदुक्तं भवति॥ अंभःकलुषादिभिरुत्पातैर्दृष्टैर्नैश्चयं कीलादी
नामुदयो वक्तव्यः॥ अथ कदाचित्कीलादीनां दर्शनं न भवति॥ तदा अंभःकलुषादीनां फलानि वदेत्॥ अथ ता
मसकीलकादीनां दर्शनवशात्फलमाह॥ यस्मिन्यस्मिन्देशे दर्शनमायांति तस्मिन्नर्कबिंबगाः॥ तस्मिंस्तस्मि
न्व्यसनं महीपतीनां परिज्ञेयं॥२२॥ क्षतजस्नानतरीरा मुनयोऽप्युत्सृष्टधर्मसच्चरिताः॥ निर्मांसबालहस्ताः
कृच्छ्रेणायांति परदेशं॥२३॥ तस्करविलुप्तवित्ताः प्रदीर्घनिश्वासमुकुलिताक्षिपुटाः॥ संतः संनशरीराः शो
कोद्भवबाष्परुद्धदृशः॥२४॥ क्षामा जुगुप्समानाः स्वनृपतिपरचक्रपीडिता मनुजाः॥ स्वनृपतिचरितं कर्म
च पुराकृतं प्रब्रुवंत्यन्ये॥२५॥ गर्भेष्वपि निष्पन्ना वारिमुचो न प्रभूतवारिमुचः॥ सरितो यांति तनुत्वं क्वचि
त्क्वचिज्जायते सस्यं॥२६॥ यस्मिन्निति॥ ते तामसकीलकाः सूर्यबिंबस्था आदित्यमंडलगता यस्मिन्
यस्मिन्यत्र यत्र देशे दर्शनमायांत्युपगच्छंति तस्मिंस्तस्मिन्तत्र तत्र देशे महीपतीनां राज्ञां व्यसनं दुःखं
परिज्ञेयं॥ क्षतजस्नानइति॥ अपिशब्दः संभावनायां वर्तते॥ मुनय ऋषयः। पीडितक्रुद्धाः क्षतजस्नानश
रीराः शुद्धभक्षणत्याकंकर्पणातिशयेन म्लानातिशरीराणि देहा येषां ते तथाभूताः। तथा उत्सृष्टं त्यक्तं
धर्मसच्चरितं शोभनचरित्रं च यैस्ते तथोक्ताः॥ तथा निर्मांसा मांसरहिता दुर्बला ये बालाः शिशवो हस्ता ३१
भावात्तेषु हस्तेषु येषां ते तथाभूताः॥ कृच्छ्रेण कष्टेन परदेशमन्यदेशमायांति॥ प्राप्नुवंति॥ तस्करवि
लुप्त इति॥ संतः साधवो जनाः तस्करविलुप्तवित्ताः। तस्करैश्चौरैर्विलुप्तानि वित्तानि धनानि येषां। तथा प्रदी

र्घनिश्वासमुच्छ्वासेन मुकुलिताः। संकुचिता अक्षिपुटा नेत्राच्छादनानि येषां॥ संनशरीराः॥ सन्ना
न्यवसादं गतानि शरीराणि देहा येषां ते तथोक्ताः॥ क्षामा इति॥ क्षामाः कृशा जुगुप्समाना निंदंतो मनुष्या मनुजाः
यतः स्वनृपतिपरचक्रपीडिताः॥ स्वनृपतिना आत्मीयनृपेण परचक्रेण अन्यराष्ट्रेण पीडिता उपतप्ता
॥ अतो जुगुप्समानाः। अन्ये परे एवं प्रब्रुवंति कथयंति। तथा यत्कर्मास्माभिरद्यानुभूयते॥ तत्पुराकृतं स्वचरि
तमात्मनाकृतं नृपतिकृतं राज्ञा वार्जितमित्यर्थः॥ गर्भेष्वपि निष्पन्ना इति। वारिमुचो मेघा गर्भेष्वपि निष्प
न्ना गर्भलक्षणयुक्ता। अपि वृष्टिकालसमये न प्रभूतं न बहु वारि पानीयं मुंचंति त्यजंति॥ तथा सरितो न
द्यस्तनुत्वं स्वल्पतामल्पत्वं यांति॥ गच्छंति। जलाभावात्सस्यं धान्यादिकं क्वचित्क्वचित्कुत्रचिज्जायते॥ उत्पद्य
ते न सर्वत्रेति॥ अथ तेषामाकृतिवशेन फलमाह॥ दंडे नरेंद्रमृत्युर्व्याधिभयं स्यात्कबंधसंस्थाने॥ ध्वांक्षे च
तस्करभयं दुर्भिक्षं कीलके कीले॥२७॥ अर्कः सूर्यमंडलमध्ये दंडेन दंडाकारचिह्नेन नरेंद्रस्य राज्ञो मृत्युर्मरणं
स्यात्। कबंधच्छिन्नशिराः॥ पुरुषः कबंधसंस्थाने कबंधाकारचिह्ने कीले व्याधिभयं रोगभीतिः स्यात्।
भवेत्। ध्वांक्षः काकः तस्मिन्नर्के तस्करभयं चौरभयं वदेत्। कीलके कीलकाकारे कीले दुर्भिक्षमसुभिक्षं
वक्षेत॥ अन्यदप्याह॥ राजोपकरणरूपैश्छत्रध्वजचामराद्यैर्विद्धः॥ राजान्यत्वकृदर्कः स्फुलिंगधूमादि
भिर्जनहा॥२८॥ राजानृपस्तस्योपकरणानि हस्त्यश्वादीनि तद्रूपैस्तदाकारैरर्कः सूर्यो यदि विद्धो भव
ति॥ तदा छत्रचामरादिभिः छत्रमातपत्रं॥ ध्वजः पताका। चामरं वालव्यजनं॥ आदिग्रहणात् भृंगारकुं
भाकारैर्यदार्को विद्धो भवति॥ तदा राजान्यत्वकृत। राज्ञोऽन्यत्वं करोति॥ अन्यो राजा भवतीत्यर्थः॥ अथ स्फु
लिंगैरग्निकणैर्धूमेन च॥ आदिग्रहणात् ज्वालाभिर्युक्तो भवति॥ तदा जनहा जनानां हंति घातयतीत्य
र्थः॥२९॥ अन्यदप्याह॥ एको दुर्भिक्षकृद्द्वाद्याः स्युर्नरपतेर्विनाशाय॥ सितरक्तपीतकृष्णैस्तैर्विद्धोऽ
नुवर्णघ्नः॥३०॥ एकोऽर्ककीलो दुर्भिक्षमसुभिक्षं करोति॥ द्वाद्या द्वौ आद्यौ येषां ते द्वाद्याः। द्वित्रयश्चत्वारो वा ते
भानरपतेः राज्ञो विनाशाय भावाय स्युर्भवेयुः॥ अर्के आदित्ये तैश्चिह्नैः सितरक्तपीतकृष्णैर्विद्धः

बृ·सं· सुवर्णश्चाभवत्यर्कः। क्रमेण वर्णान्ब्राह्मणादीन्हंति॥ तद्यथा॥ सितः श्वेतवर्णोऽर्कः स्निग्धो ब्राह्मणान्हंति घात
यति। रक्तवर्णः क्षत्रियान्। पीतवर्णो वैश्यान्। कृष्णवर्णः शूद्रानिति॥ विशेषफलमाह॥ दृश्यंते च यत
३२ स्ते रविबिंबस्योत्थिता महोत्पाताः॥ आगमस्तल्लोकानां तेनैव भयं प्रदेशेन॥ ते महोत्पाता ध्वांक्षप्रभृत
यो रविबिंबस्यार्कमंडलस्योत्थिताः संनायत्तोयस्यां दिशि दृश्यंते॥ पूर्वस्यां दक्षिणस्यां पश्चिमायां उत्तरस्यां
वा विदिक्षु वा तेनैव प्रदेशेन लोकानां जनानां भयं भीतिरागच्छत्यागच्छति॥ अर्करश्मिवशेन शुभाशुभफल
माह॥ ऊर्ध्वकरो दिवसकरस्ताम्रः सेनापतिं विनाशयति॥ पीतो नरेंद्रपुत्रं श्वेतस्तु पुरोहितं हंति॥ चित्रो
थवापि धूम्रो रविरश्मिर्व्याकुलं करोत्यूर्ध्वं॥ तस्करशस्त्रनिपातैर्यदि सलिलं नाशुपातयति॥ ऊर्ध्वकरो दि
नकर इति॥ दिनकर आदित्य ऊर्ध्वकरः॥ यदोर्ध्वरश्मिर्दृश्यते॥ अधोभागे तस्य रश्मयो न दृश्यंत इत्यर्थः॥
स च ताम्रस्ताम्रवर्णश्च॥ तदा सेनापतिं चमूनाथं विनाशयति॥ विघातयति॥ ऊर्ध्वकरः पीतवर्णश्च। नरें
द्रपुत्रं नृपसुतं हंति॥ मारयति ऊर्ध्वकरः श्वेतवर्णश्च पुरोहितं हंति। चित्रो थवेति॥ रवेरादित्यस्य संबंधी
रश्मिः कर ऊर्ध्वस्थितः स च चित्रो नानाविधवर्णोऽथवा धूम्रो धूम्रवर्णः॥ तस्करशस्त्रसंनिपातैर्दस्युव्या
कुलं लोकं गच्छं भवति॥ यद्याशु शीघ्रमेव जलं न पातयति॥ न वर्षति। तदेवं॥ अथ सलिलपातं करोति
तदाशिवमिति॥ अथ भगवतो भास्करस्य जलवर्णलक्षणमाह॥ ताम्रः कपिलो वार्कः शिशिरे हरिकुंकुम
च्छविश्च मधौ॥ आपांडुकनकवर्णो ग्रीष्मे वर्षासु शुक्लश्च॥ शरदि कमलोदराभस्ताम्रः कपिलो वार्कः शिशि
रे हरिकुंकुमच्छविश्च मधौ। आपांडुकनकवर्णो ग्रीष्मे च वर्षासु शुक्लश्च॥ शरदि कमलोदराभो हेमंते रुधिरसंनि
भः शस्तः॥ प्रावृट्काले शस्तः सर्वर्तुनिभोऽपि शुभदायी॥ ताम्रः कपिलो वार्क इति॥ शस्त इति शब्दः सर्वत्र सं
बध्यते॥ शिशिरे माघफाल्गुनयोरर्क आदित्यस्ताम्रः॥ ताम्रवर्णः कपिलो वा शस्तः शुभफल इत्यर्थः॥ मधौ ३२
वसंते चैत्रवैशाखयोर्हरिकुंकुमच्छविः हरितकांतिः शुकाभः कुंकुमच्छविः कुंकुमवर्णः पीतलोहितः प्रशस्तः॥
ग्रीष्मे ज्येष्ठाषाढयोरापांडुरवर्णः ईषच्छुक्लः कनकवर्णः सुवर्णकांतिश्च शस्तः॥ वर्षाकाले श्रावणभाद्रपद

DR. BHAU DAJI MEMORIAL

योः शुक्लः श्वेतवर्णः शस्तः। चशब्दात्पांडुरः कनकवर्णश्चैव॥ शरदि कमलोदराभो भवति। शरदि का
र्त्तिकआश्वयुजकार्त्तिकयोः कमलोदराभः। कमलं पद्मं तस्योदरमभ्यंतरं तत्सदृशी आभा कांतिर्यस्य॥ सत
थाभूतः शस्तः। हेमंते मार्गशीर्षपौषयोः रुधिरनिभो रक्तवर्णः शस्तः॥ प्रावृट्काले वर्षाकाले स्निग्धो विम
लः सर्वर्तुनिभः॥ सर्वेषां शिशिरादीनां वर्णा उक्ताः तेषां निभः सदृशः स्तद्वर्णः विशुभदायी शुभप्रदो भवति
तथा च समाससंहितायां॥ ताम्रघृतकनकमुक्ताकमलासृक्संनिभः सविता। शिशिरादिषु षट्स्वृतुषु प्रा
वृषि सर्वर्तुभः स्निग्धः॥ तथा च वृद्धगर्गः॥ शिशिरे ताम्रसंकाशः कपिलो वापि भास्करः॥ वसंते कुंकुमव
र्णाभो हरितो वापि शस्यते॥ २॥ ग्रीष्मे कनकवद्दूर्यः सर्वरूपो जलागमे॥ शस्ताः शरदि पद्माभो हेमंते लोहित
प्रभः॥ ३॥ एतत्स्वरूपं सवितुर्विपरीतमतोऽन्यथा॥ तथा च पराशरः॥ शिशिरे ताम्रकपिलो वसंते कुंकुमा
भो हरितो ग्रीष्मे कपिलो वैदूर्यप्रभः॥ प्रावृषि सर्ववर्णः॥ शरदि पद्माभो लोहितः॥ सर्वर्तु श्वेतः पांडुर
वर्णः प्रशस्यते॥ विपरीतो विपरीतकारी॥ अन्यस्त्वाह॥ रूक्षः श्वेतो विप्रान् रक्ताभः क्षत्रियान्विनाश
यति॥ पीतो वैश्यान् कृष्णस्तु तापरान् शुभकरः स्निग्धः॥ रूक्ष इति सर्वत्र संबध्यते॥ श्वेतः शुक्लवर्णो रूक्षः
स्निग्धरहितो विप्रान् ब्राह्मणान्विनाशयतीति। रक्ताभो लोहितकांती रूक्षश्च क्षत्रियान्विनाशयति
॥ पीतः पीतवर्णो रूक्षश्च वैश्यान्विनाशयति॥ कृष्णः कृष्णवर्णो रूक्षश्च पकोऽपरान् तादृत्यनेन वै
श्याः परामृश्यंते। तेभ्योऽपरानन्यान् शूद्रान्हंतीति शुभकरः स्निग्धइति॥ यथोक्तवर्णो यदि स्नि
ग्धो भवति। ततस्तेषामेव शुभकरो भवति। तथा च। स्निग्धः श्वेतो ब्राह्मणानां शुभकरो भवति। रक्ता
भः स्निग्धः क्षत्रियाणां। पीतस्निग्धो वैश्यानां। कृष्णः स्निग्धः शूद्राणामिति॥ २५॥ अथ ऋतुष्वनीत्या
शुभवर्णमाह॥ ग्रीष्मे रक्तो भयकृत्। वर्षास्वसितः करोत्यनावृष्टिं॥ हेमंते पीतोऽर्कः करोति न चि
रेण रोगभयं॥ २६॥ अर्क आदित्यो रक्तो लोहितवर्णः। ग्रीष्मे दृष्टो भयकृत्। भयं करोति। वर्षासु वर्षा
कालेऽसितः कृष्णवर्णोऽनावृष्टिमवर्षभावं करोति॥ हेमंते पीतः पीतवर्णो नचिरेण रोगभयं

बृ॰सं॰ इति। करोतीति। शेषं तु पुनर्विशेषः। पूर्वोक्तमेव शुभाशुभमिति। अन्यदप्याह॥ सुरचापपाटिततनुर्नृप
तिविरोधप्रदः सहस्रांशुः॥ प्रावृट्काले सद्यः करोति विमलद्युतिर्वृष्टिम्॥२१॥ वर्षाकाले वृष्टिं करोति॥ सद्यः
३३ शिरीषपुष्पाभः। शिखिपत्रनिभः सलिलं द्वादश वर्षाणि न करोति॥२२॥ सुरचापेति॥ सहस्रांशुरादित्य
ः सुरचापपाटिततनुः सुरचापमिंद्रधनुस्तत्तुल्येन चिह्नेन पाटिता विदारिता तनुर्मूर्तिर्यस्य॥ तथाभूतो न
पतेर्राज्ञो विरोधप्रदो भवत्यशुभ इत्यर्थः। प्रावृट्काले वर्षाकाले विमलद्युतिर्निर्मलकांतिः सद्यस्तस्मि
न्नेवाह्नि वृष्टिं करोति। वर्षतीत्यर्थः। वर्षाकाल इति वर्षाकाले प्रावृट्समये शिरीषपुष्पाभः शिरीषकुसुम
सदृशकांतिः नातपति इत्यर्थः॥ तथाभूतोर्कस्तस्मिन्नेवाह्नि वृष्टिं करोति। शिखिपत्रनिभः शिखी मयूरस्त
स्य पत्रं पक्षस्तत्तुल्यस्तत्सदृशः॥ मयूरचंद्रकाभो द्वादश वर्षाणि सलिलं न करोति। न वर्षतीत्यर्थः। तथा च वृ
द्धगर्गः। मयूरचंद्रकाभो यदा दृश्येत भास्करः॥ पूर्णे तु द्वादशे वर्षे तदा देवः प्रवर्षति॥२२॥ अन्यदप्याह॥ श्या
मे र्कः कीटभयं भस्मनिभे भयमुशंति परचक्रात्। यस्यार्कः क्षे स्थिद्रस्तस्य विनाशः क्षितीशस्य॥२३॥ अर्के
सूर्ये श्यामे श्यामवर्णे कीटभयं कृमिभीतिः सस्यानां भयं भवति। भस्मनिभे भस्मवर्णे पांडुरे परचक्रा
दन्यनृपाद्भयमुशंति कथयंति। अर्क आदित्यो यस्मिन्नक्षत्रे नक्षत्रे स्थितः सच्छिद्रो दृश्यते। तं नक्षत्रं यस्य
क्षितीशस्य राज्ञः कर्मविभागेन भवति॥ तस्य विनाशो मृत्युर्भवति। अन्यदप्याह॥ शशरुधिरनिभे भानौ
नभस्तले भवंति संग्रामाः॥ शशिसदृशे नृपतिवधः क्षिप्रं चान्यो नृपो भवति॥२४॥ शशः प्राणिविशेषः
अनावृते आदित्ये शशरुधिरनिभे शशलोहितवर्णे अतिरक्त इत्यर्थः॥ नभस्तलस्थे स्वच्छाभ्रोपलक्षिते संग्रा
मा युद्धानि भवंति नभस्तलग्रहणमदृश्यास्तमयकालपरिहारार्थं॥ तत्र किल स्वभावादेव लोहितो रविर्भ
वति। तथा च वृद्धगर्गः॥ शशलोहितवर्णाभो यदा भवति भास्करः॥ तदा भवंति संग्रामा घोरा रुधिरकर्द ३३
माः॥ शशिसदृश इति॥ शशिसदृशे चंद्रनिभे रवौ रश्मिशीतले नृपते राज्ञो वधो मरणं भवति॥ क्षिप्रं
शीघ्रमेवान्यो परो नृपो भवति॥ अन्यदप्याह॥ क्षुन्मारकृद्घटनिभः खंडो जनहा विदीधितिर्भयदः॥

तोरणरूपः पुरहा छत्रनिभो देशनाशाय॥२५॥ घटनिभो घटाकारोऽर्कः क्षुन्मारकृत् दुर्भिक्षं मारणं मृत्युं
मरणं च करोति। खंडः एकदेशदृष्टो जनान् हंति घातयति। विदीधितिर्निर्गतरश्मिर्भयदो भयं ददाति। तो
रणरूपस्तोरणाकारः पुरहा पुरं नगरं हंति घातयति॥ छत्रनिभश्छत्राकारो देशस्य जनपदस्य विनाशाय
विघाताय भवति॥ अन्यदप्याह॥ ध्वजचापनिभे युद्धानि भास्करे वेपने च रूक्षे च॥ कृष्णा रेखा सवितरि य
दि हंति नृपं ततः सचिवः॥२६॥ ध्वजः प्रसिद्धो बहुपटविरचितः पताकारूपः। चापं धनुः। भास्करे सूर्ये ध्वज
चापनिभे तदा युद्धानि संग्रामा भवंति॥ तथा च वेपने कंपमाने रूक्षे चास्निग्धे युद्धान्येव भवंति॥
सवितर्यादित्ये कृष्णा कृष्णवर्णा रेखा यदि मध्ये दृश्यते॥ तदा नृपं राजानं सचिवो मंत्री हंति। घातयति। के
चिदेवं पठंति॥ नृपः सचिवं। नृपो राजा सचिवं हंति॥ तथा च पराशरः॥ विवर्णो वर्णतो महाभयाय श्यामा
जनमरणाय च॥ सुवर्णरजतपद्माभो विमलः स्निग्धो जनहिताय॥ धूम्राभो वृष्टिनिग्रहाय॥ ऊर्ध्वदंडो
ज्ज्वलः शस्त्रकोपव्याधिमृत्युकरो महान्॥ परिमंडलः कुक्षिमान् विशालो घृतमंडनिभः क्षेमारोग्यकरः
संक्षिप्तः क्षयाय॥ वज्राकारो दुर्भिक्षाय॥ सर्वतश्छिद्रो दृष्टिबाधा दृश्यमानो मृत्युं देशविनाशं चावहेत्॥
शिरीषपुष्पाभो वार्षिको निःप्रभो जनमारकः रोधसंरुद्धः क्षुत्कृत॥ ताम्ररुधिराभः शस्त्रकोपकरः॥
खं उच्छिद्रो भ्रमति पल्लीभयकारी परुषो वा पन्नः परसैन्यागति ध्वजाकारो वा सद्य आहवाय विरुग्णश्चे
त्यात्मभविनाशः। पुरुषाकारो रुधिरप्रभो नृपतिसहस्रपातकः। कृष्णवर्णो जगतः क्षयाय॥ पर्वण्यु
परक्तः सर्वलोकविनाशाय व्यामिश्रवर्णो यावत्स दृश्यते। तावत्परस्य नृपतिविनाशाय कृष्णरुधि
रः पीतवर्णो जगतः क्षयकारी विदूर्यः कृष्णवर्णः पांडुवर्णो वा रजनकरो मयूरचंद्रकाभो द्वादशवार्षिकीमना
वृष्टिं धत्ते॥ एवमन्यथा मिश्रवर्णो विगीतकारी भवति॥२६॥ अन्यदप्याह॥ दिनकरमुदयसंस्थ
मुल्काशनिविद्युतो यदा हन्युः। नरपतिमरणं विद्यात्तदान्यराजप्रतिष्ठां च॥ दिवसकरमादित्यमु
दयसंस्थमुदयस्थमुल्काशनिर्विद्युच्चेत्येतानि विद्युदंतान् हन्युस्ताडयेयुः। आसन्नक्षणं

बृ०सं० दृश्यते। तदा तस्मिन्काले नरपते राज्ञो मरणं मृत्युं विधान॥ जानीयात॥ तथान्यराज्यप्रतिष्ठामन्यस्य राज्ञोन्यप
देप्रतिष्ठा॥ स्थितस्तत्क्षणमेव भवति॥ तथा च पराशरः॥ उदयास्तमये भानुमुल्कादृन्यात्समुत्थिता॥ प्रज्वल
३८ तिनदा राजाक्षि प्रं शस्त्रेण वध्यते॥ अन्यल्लक्षणमाह॥ प्रतिदिवसमहिमकिरणः परिवेषः संध्ययोर्द्वयोरस्थ
वा। रक्तोरुसितिरश्चोदितश्च भयं करोत्यन्यं॥३४॥ अहिमकरउष्णरश्मिर्थाम् सूर्यः प्रतिदिवसं प्रतिपरिवेषोमंड
लवान्भवति। अथवा द्वयोः संध्ययोरुदयास्तमययोरत्यर्थं परिवेषो भवति॥ अथवा रक्तवर्णोस्तमित्यस्तं
गच्छति॥ रक्तवर्णश्चोदेति॥ एतदुक्तं भवति। यादृश एव लोहितवर्ण उदेति। तादृश एव समकलमस्तं याति रक्त.
वर्ण एवास्तमेति॥ प्रतिदिवसं सर्वत्र संबध्यते॥ तदा तस्मिन्प्रकारत्रये नृपराज्ञानमन्यं हितायं करोति॥ अथा
स्य संध्याकाले शुभलक्षणमाह॥ प्रहरणसदृशोर्द्धकेदैः स्थगितः संध्ययापि रणकारी मृगमहिषविहंगख
रकरभसदृशरूपश्च भयदायी॥३५॥ प्रहरणमायुधं खड्गादि। प्रहरणसदृशैरायुधाकृतिभिर्जलदैर्मेघै
र्यदि संध्याद्वये॥ उदयास्तमयकाले स्थगित आच्छादितो भवति॥ सूर्यस्तदा रणकारी संग्रामकारी॥ युद्ध
कृद्भवति॥ अपिशब्दः संभावनायां। एकस्यां संध्यायां द्वितीयस्यां चेत्यर्थः॥ मृग आरण्यचारी॥ महिषप्र
सिद्धः॥ विहंगः पक्षी खरो गर्दभः॥ करभ उष्ट्रः॥ एषां सदृशरूपस्तुल्याकारो यदा संध्याद्वय स्थगितो भव
ति॥ तदा भयदायी भीतिं ददाति॥३५॥ अथार्काक्रान्तस्य नक्षत्रस्य संतापशोधनेत्याह॥ दिनकरतापादृक्षं
प्राप्नोति॥ सुमहतीं पीडां। भवति च पश्चात्शुद्धं कनकमिव हुताशपरितापात्॥३६॥ यस्मिन्नृक्षे नक्षत्रे दिन
करः सूर्यः स्थितः। तदृक्षं दिनकरकराभितापात् सूर्यरश्मिसंतापनात् महतीं पीडामतिरत्नं प्राप्नोति। ल
भते॥ तदेव सूर्यमुक्तमृक्षं पश्चादनंतरं निर्दोषं भवति॥ यथा कनकं सुवर्णं हुताशपरितापादग्निसंताप
नेन शुद्धं निर्मलं भवति॥ तथा च पराशरः॥ सूर्योपसृष्टं नक्षत्रं सवितुर्योगमागतं॥ विशोधयति तत्तापं
पावकोग्निरिव कांचनं॥ तथा च गर्गः॥ यथाग्निप्रज्वलितो दहत्यन्तमदारिणः॥ तथार्कस्याथ दृशं क्ष ३८
शांत दीपितव्यते॥ अथ प्रतिसूर्यलक्षणमाह॥ दिवसकृतः प्रतिसूर्यो जलकृदुदग्दक्षिणस्थितोनिल

कृत्। उभयस्थः सलिलभयं नृपमुपरि हन्त्यधो जनहा॥३७॥ उदयास्तमने तत्र दूरे कुत्रचन ननु घनघनोर्कस
मीपे यदा भवति। तदा रश्मिवशात्तत्र द्वितीयोर्क इव लक्ष्यते। स प्रतिसूर्य उच्यते॥ एवमस्तमनेपि संभवति
॥ दिवसकृत आदित्यस्यादिगुत्तरे यदा प्रतिसूर्यो दृश्यते। तदा जलकृत्। जलं पानीयं करोति। वर्षतीत्यर्थः।
अथ दक्षिणतस्य वार्कस्य स्थितो भवति। तदानिलकृत्॥ वातं करोति॥ उभयस्थ उत्तरदक्षिणभागयोरपि
स्थितः सलिलभयं सलिलभीतिं करोति॥ तस्य वार्कस्योपर्यूर्ध्वेन नृपं राजानं हंति घातयति। अधः स्थितः स
एव प्रतिसूर्यो जनान् हंति॥ अन्यदप्याह॥३७॥ रुधिरनिभो वियत्यवनिपांतकरो न चिरात्परुषरजोरुणी
कृततनुर्यदि वा दिनकृत्॥ असितविचित्रनीलपरुषो जनघातकरः। खगमृगभैरवस्वररुतैश्च निशाद्युमुखे
॥३८॥ दिनकृदादित्यो वियत्याकाशे अकस्मादेव रुधिरनिभो रक्तवर्णो यदा दृश्यते॥ तदा नचिरान्नचिरमेव॥
अवनिपस्य राज्ञोऽन्तकरो मृत्युकरो भवति। वियत्ग्रहणमत्रोदयास्तमययोर्विहायान्यत्र ग्रहणार्थं॥ परुषर
जोरुणीकृततनुर्यदि वा परुषेण रूक्षेण रजसा पांशुना अरुणीकृता लोहिता तनुर्मूर्तिर्यस्य॥ स तथाभूतो
ऽवनिपांतकरः। शीघ्रमेव भवति असितः कृष्णो विचित्रो नानावर्णो नीलवर्णः परुषो रूक्षः एवंविधः को
जनघातकरः। जनानां लोकानां घातं विनाशं करोति। खगाः पक्षिणो मृगा अरण्यजातयः। एतेषां भै
रवा भीषणा ये स्वराः शब्दास्तैर्यानि रुतानि तैर्यदि निशामुखे संध्यामुखे उदयसमये भवति॥
तदापि जनघातकरो भवति। अथ शुभलक्षणमाह॥ अमलवपुरवक्रमंडलः स्फुटविपुलामलदीर्घदी
धितिः॥ अविकृततनुवर्णचिह्नभृज्जगति करोति शिवं दिवाकरः॥३९॥ एवंविधो दिवाकरः सूर्यो जगति
जनानां श्रेयः शिवं करोति॥ कीदृशो मलवपुर्निर्मलशरीरः। अवक्रमंडलः स्पष्टबिंबः। तथा च पराशरः
श्वेतः शिरीषपुष्पाभः पद्माभो रूप्यसंनिभः। वैदूर्यघृतमंडाभो हेमाभश्च दिवाकरः॥ वर्णैरेभिः प्रशा
न्तस्थानमरुस्निग्धः प्रतापवान्॥ भवेन्नः सर्वसस्यानां क्षेमारोग्यसुभिक्षदः॥ स्फुटविपुलामलदीर्घदी
धितिः। स्फुटा प्रकटा। विपुला विस्तीर्णा अमला निर्मला दीर्घा आयामिनो दीधितयो रश्मयो यस्य॥

बृ·सं· तथाच पराशरः॥ स्निग्धाः परिपूर्णाः शुक्ला मांजिष्ठाः पीता अत्यंतगामिनो रश्मयः शस्यंते॥ रूक्षा विच्छिन्ना
स्तनवो ह्रस्वा धूम्राभाः कपिलवर्णा विगर्हिता इति॥ अविकृततनुवर्णचिन्हः प्रदिष्टि। अविकृता निर्विकारा
३५ तनुर्मूर्तिः। तथाविकृतो वर्णः कांतिः। अविकृतं चिन्हं लक्ष्मः एतान्यविकृतानि भवंति। बिभर्ति धारय
ति॥ तथाभूत इति॥ ॥इति श्रीभट्टोत्पलविरचितायां संहिताविवृतावादित्यचारो नामाध्यायस्तृतीयः
॥ ॥४॥ अथ चंद्रचारो व्याख्यायते॥ तत्रादावेव ये रवेरधःस्थं चंद्रमसमिच्छंति। तान्प्रत्याह॥ नित्यमधस्थ
स्येंदोर्भाभिर्भानोः सितं भवत्यर्धं॥ स्वच्छायया अन्यदसितं कुंभस्येवातपस्थस्य॥१॥ इंदोश्चंद्रमसो भानो
रादित्यस्याधःस्थस्य भानवीभिर्भाभिः सूर्यस्य रश्मिभिर्नित्यं सर्वकालमेकमर्धं दलं सितं शुक्लं भवति॥ यस्मि
न् गोलकभागे अर्करश्मयः पतंति तदेवार्धं शुक्लं भवति। अन्यद्द्वितीयमर्धं तच्छायया आत्मीयया भयासि
तं कृष्णं नित्यमेव भवति॥ कथमुच्यते कुंभस्येवातपस्थस्य॥ यथा कुंभस्यातपस्थस्य सूर्यकिरणाभिमुख
यस्मिन्नर्धे अर्करश्मयः पतंति॥ तदर्धं शुक्लं तस्य दृश्यते॥ अन्यदर्धं स्वच्छायया कृष्णं दृश्यते॥ तथाच
ब्रह्मसिद्धांते। रविदृश्यं सितमर्धं कृष्णमदृश्यमथातपस्थस्य॥ कुंभस्य तथासंनस्थे रधःस्थस्य चंद्रस्य॥ त
थाच सूर्यसिद्धांते॥ ॥ मदूतश्चाप्यधःस्थस्य नित्यं भासयते रविः। अर्धं शशांकबिंबस्य न द्वितीयं कथंच
न॥ नलिंद्रप्रकाशतापकं भास्वच्छायया अन्यदसितमिति॥ अथान्य प्रत्यक्षबाधामन्यमानमाह॥ सलि
लमये शशिनि रवेर्दीधितयो मूर्छितास्तमो नैशं॥ क्षिपयंति दर्पणोदरविहृता इव मंदिरस्य॥२,
॥शशिनि चंद्रमसि सलिलमये अप्मये रवेरादित्यस्य संबंधिनो दीधितयो रश्मयो मूर्छितास्तत्र
संलग्नाः प्रतिफलिता नैशं निशाभवं रात्र्युत्पन्नं तमोंधकारं क्षिपयंति विनाशयंति। यथा दर्पणोद ३५
रे आदर्शमध्ये द्वारप्रदेशस्थस्य सूर्यस्य रश्मयो विहृताः संरुद्धा मंदिरस्य गृहस्यांतर्मध्ये तमः क्षिपयं
ति॥ तद्वदिति॥ तथा सूर्यसिद्धांते। तेजसां गोलकः सूर्यो ग्रहर्क्षाण्यंबुगोलकाः॥ प्रभावंतो हि दृश्यंते सू

र्यरश्मिप्रदीपिताः॥ तथाचाचार्यभट्टः॥ भूग्रहभानां गोलकार्धानि स्वच्छायया विवर्णानि अर्धानि य
था सार्धं सूर्याभिमुखानि दीप्यंते॥३॥ ॥अथ शशिनः पश्चिमदिग्भागोत्क्रितवृद्धिः किमित्यपरभ्य
नुद्यत आह॥ त्यजतोर्कतलं शशिनः पश्चादवलंबते यथा शौक्ल्यं॥ दिनकरवशात्तथेंदोः प्रकाशतेंऽध
ःप्रभृत्युदयः। शशिनः चंद्रमसोर्कतलं सूर्याधोभागं त्यजतः परित्यजतो यथा येन प्रकारेण पश्चात्पश्चि
मायां दिशि शौक्ल्यं शुक्लत्वमवलंबते आक्रमते॥ तथा तेनैव प्रकारेण इंदोश्चंद्रस्य दिनकरवशात् सूर्यद्वार
धःप्रभृति अधोभागादारभ्य उदयो विराजते प्रकाशत्वमिति॥ एतदुक्तं भवति॥ रवेरधोभागस्थश्चंद्रमा अ
मावास्यांते भवति। तत्र च तस्य चार्धं गोलकस्य सूर्याभिमुखं गोलकं शुक्लं भवत्यधःस्थितमदृश्यभागं कृ
ष्णवर्णं भवति। ततः प्रतिपदादिषु यथायथा स्वभावतुल्येनार्धेनार्कात्प्राक् स्फुरगः शीघ्रगतित्वाद्याति॥
तथा तथा पृष्ठवर्तिनं सितमधोभागं वलंबितमिति॥ तथाच सूर्यसिद्धांते। विप्रकृष्टो यथा याति ह्यध
स्थश्चंद्रमा रवेः॥ तथा तथास्य भूदृश्यमंशं भासयते रविः॥ ॥प्रतिदिनं कथं चंद्रगोलः शुक्लवृद्धिर्भवति
॥ तदर्थमाह॥ प्रतिदिवसमेवमर्कात्स्थानविशेषेण शौक्ल्यपरिवृद्धिः॥ भवति शशिनोपराह्णे पश्चाद्भा
गे घटस्येव॥ ४॥ एवमनेन प्रकारेण शशिनश्चंद्रमसश्चार्कादादित्यात्स्थानविशेषेण स्थानांतरगमने
न शौक्ल्यस्य शुक्लभावस्य परिवृद्धिर्वृद्धिरधिकतरा भवति। यथायथा शशी भागवर्गेन याति तथातथा
तस्य शुक्लाधिक्यं भवति। तदेतदुक्तं भवति॥ यथा सूर्यः स्वात्मीयो राशिभागवर्गेन याति तथातथा
शौक्ल्यपरिवृद्धिर्भवति॥ यावत्शुक्लपक्षस्यार्धं गते चंद्रे यांतरितस्यार्धशुक्लता भवति॥ पौर्णमास्यंते ष
ड्राश्यंतरितस्य सर्वशुक्लता भवति॥ ततो यथायथा अर्कसंनिकृष्टमायाति तथातथा शौक्ल्यहानि
र्भवति॥ यावत्कृष्णाष्टम्यर्धशुक्लता भवति॥ अमावास्यांते सर्वकृष्णता भवतीति॥ अथ चंद्रनक्षत्र
गमनेन शुभाशुभमाह॥ ॥ऐंद्रस्य शीतकिरणो मूलाषाढाद्वयस्य वा याते॥ याम्येन बीजजलचरका
ननघ्नो वह्निभयदश्च॥ ऐंद्रं ज्येष्ठा। मूलं नैर्ऋतं। आषाढाद्वयं पूर्वाषाढोत्तराषाढे॥ शीतकिरणश्चं

ब॰ सं॰

३८

द्रमाः। चंद्रस्य मूलाषाढाद्वयस्य च याम्येन दक्षिणेन यद्यायातो गमनं तदा बीजानि दह्यंते। जलचरान्
जलप्राणिनः काननानि च वनानि च हंति नाशयति। तथा वन्हिभयं अग्निभयं च भवति। अर्थादेवोत्त
रेण गतः शोभन इति। यतो वक्ष्यति॥ भानां यथासंभवमुत्तरेण यातो ग्रहाणां यदि वा शशांकः। प्रद
क्षिणं तत्पुनरंत्यपौष्णयाम्यस्थितो यातो न शिवः शशांकः इति॥ अन्येषामप्याह॥ दक्षिणपार्श्वेन गतः
शशी विशाखानुराधयोः पापः। मध्येन तु प्रशस्तः पित्र्यविशाखयोश्चापि॥ ६॥ विशाखानुराध
प्रसिद्धं। अनयोः शशी चंद्रो दक्षिणपार्श्वेन याम्यभागेन यातो गतः पापफलदो निष्टो भवति॥
अर्थादेवोत्तरेण शुभः॥ पित्र्यं मघा। विशाखा प्रसिद्धा। अनयोर्द्वयोर्मध्येनांतरेण चंद्रमा गतः प्र
शस्तः शुभफलदः। अपिशब्दादुत्तरेण संशोभयति॥ तेन मघाविशाखयोरुत्तरेणापि गतः चंद्रः शु
भफलप्रदः॥ ॥ तथा च समाससंहितायां॥ दक्षिणः सर्वेषामपि पित्र्यविशाखयोश्चांतरितः
तथा च पाराशरः॥ अथ मार्गाग्नेयवासव कुरोति वर्गकरो मैत्रसावित्राभ्यां प्रतापितकारी॥ ज्येष्ठाग्ने
यमैत्राणामुत्तराषाढाणां दक्षिणश्चरन्॥ पुष्कलफलप्रदः॥ उपरिष्टाद्दाधिको धान्यविनाशाय च संपतन्मघा
नुराधाभ्यां मध्येन गमनमिति॥ शोभनं शशिनः सौम्ययोर्दक्षिणेनाशुभदो वर्षासु च पंकरः॥ सर्वत्रैव
नैर्ऋत्याश्विवैश्वदेवानां चेति॥ ॥ अथ चंद्रमसो नक्षत्रयोगमाह॥ षडनागतानि पौष्णाद् द्वादश रौद्रा
न्मध्ययोगीनि। ज्येष्ठाद्यानि नव भान्यतीत्य युज्यंते॥ ७॥ पौष्णं रेवती तस्मात्प्रभृति षड् न
क्षत्राणि रेवत्यश्विनीभरणीकृत्तिकारोहिणीमृगशिरश्चैतानि षड् नक्षत्राणि। षट्संख्यानि नक्षत्राणि
अनुपेतानि चंद्रेण सहासागतान्यप्राप्तानि संयुज्यंते। संयोगं यांति। यथा उत्तरभाद्रपदास्थश्चंद्रमा ३८
रेवत्या सह संयोगो दृश्यते। रेवतीसंस्थितस्यापि अश्विन्या सह एवमन्येषामपि। द्वादश रौद्राच्च मध्य
योगीनि रौद्रं चार्द्रा तस्मात्प्रभृति द्वादश नक्षत्राणि। आर्द्रा पुनर्वसु पुष्य आश्लेषा मघा पूर्वाफाल्गुन्यु

त्तराफाल्गुनी हस्तचित्रास्वातीविशाखानुराधाश्चेति। एतान्युद्गतानि मध्ययोगीनि युज्यंते। चंद्रमा यत्र काले
एषां मध्यगतो भवति। अर्धभोगयुक्त इत्यर्थः॥ यथार्द्रास्थितः चंद्र आर्द्रयैव सह संयोगं याति। एवम
न्येषामपि। ज्येष्ठाद्यानि नव भीष्णानि। ज्येष्ठाद्यानि ज्येष्ठाप्रभृति नव नक्षत्राणि। ज्येष्ठा मूल पूर्वाषाढोत्तराषा
ढाश्रवणधनिष्ठाशतभिषक्पूर्वाभाद्रपदोत्तराभाद्रपदश्चेत्येतान्युद्गतानि अतीत्यातिक्रम्य युज्यंते। यथामू
लस्थस्य चंद्रमसो ज्येष्ठया सह संयोगो दृश्यते। पूर्वाषाढास्थस्य मूलेनैवमन्येषामपि। एतदुक्तं भवति। गर्गा
दिभिः कानिचिन्नक्षत्राण्यर्धभोगान्युक्तानि। कानिचिदध्यर्धभोगानि कानिचित्समभोगानि तान्यती
त्य युज्यंते॥ यान्यर्धभोगानि। तान्यनागतानि यानि समभोगानि तानि मध्ययोगीनि युज्यंते। तथा
च गर्गः॥ उत्तराश्च तथादित्यं विशाखा चैव रोहिणी॥ एतानि षडध्यर्धभोगानि सहनक्षत्राणि॥ मघाश्वि
नीकृत्तिकामैत्रपित्र्यभगाह्वयाः॥ सावित्रं चानुराधा मूलं तोयं च वैष्णवं॥ धनिष्ठा चैव पौष्णं च स
मवर्गः प्रकीर्तितः॥ एतानि पंचदश समभोगानि मध्यक्षेत्राणि॥ याम्यैंद्ररौद्रवायव्यसार्पवारुणसंज्ञि
ताः॥ एतानि षडर्धभोगानि। स्वल्पक्षेत्राणि॥ तथाचार्येणान्यथोक्तान्येतानि॥ अन्यथा स्थितान्युच्यंते॥
आचार्येणान्यानि गोलवदुत्तरायाद्यंत्रेणादेव दर्शनं दृक्समान्युक्तानि॥ अथ किंप्रमाणं मध्यभोगि
नां किंचार्धभोगिनां किंच समभोगिनामिति। उच्यते॥ चंद्रमध्यभुक्तिरध्यर्धगुणा॥ अध्यर्धभोगिनां
प्रमाणमर्धं॥ गुणार्धभोगिनामेकगुणा समभोगिनामिति॥ तथा च ब्रह्मसिद्धांते॥ कृत्यादित्य
विशाखाध्रौव्यपदार्थमल्पं वैश्वदेवानि॥ षट्पदं पितृमैत्रभरणीस्वात्यार्द्रावारुणाश्लेषाः॥ पंचदशान्यत्रा
न्येकाभिजित उक्तभोगान्याः॥ तस्मात्तं नाक्षत्रं दुरधिगमं संबुद्धीनां॥ अध्यर्धार्धसमक्षेत्राणां मध्य
मानि स्थिकाः राशिः॥ अध्यर्धार्धैकगुणाभभोगकलिप्तास्ते चांत्याः॥ मंडलकलिप्तास्तेषां भोगाभिजिन इ
ति॥ ॥ अथ चंद्रमसः संस्थानानि दश भवंति। तद्यथा॥ नौलांगलं॥ १ दुष्टलांगलं २ सामान्यं ३
कार्मुकं ४ युगं ५ पार्श्वशायी ६ वलिताकुरल्यामति॥ तत्र नौसंस्थानस्य लक्षणं फलं चाह॥ उन्नतमुपु

शृंगं नौसंस्थाने विशालता चोक्ता॥ नाविकपीडा तस्मिन् भवति शिवं सर्वलोकस्य॥८॥ ईषत्किंचिदुन्नते
व०सं० उच्चे शृंगे यस्य। तथा च विशालता विस्तीर्णता च भवति तं नौसंस्थानं॥ तन्नौसंस्थानेन नाविकानां नौकर्णधा
३२ राणां पीडा उक्ता कथिता॥ तथा च सर्वलोकस्य समस्तजनस्य च शिवं श्रेयो भवति॥ तथा लांगलसंस्थान
फलं चाह॥ अर्धोन्नते च लांगलमिति। पीडा तदुपजीविनां॥ तस्मिन्प्रीतिश्चानिर्निमित्तं मनुजपतीनां सु
भिक्षं च॥ शशिनि चंद्रे शृंगे चोन्नते अर्धोन्नते लांगलमिति हलनाम॥ तत्संस्थाने तस्मिन्संस्थाने तदुपजीविनां लां
गलोपजीविनां पीडा भवति॥ तथा च मनुजपतीनां राज्ञां चानिर्निमित्तं कारणं विना। प्रीतिः स्नेहो भवति॥ लोक
स्याच्छिवं श्रेयः सुभिक्षं च भवति॥ तथा च वृद्धगर्गः॥ यदा सोमः प्रतिपद्दिनात्संस्थानसंप्रपद्यते। उन्नतोदयः
लशृंगो वा लांगलाख्यो मनोहरः। क्षेमं सुभिक्षमारोग्यं सर्वभूतेषु निर्दिशेत्॥ राष्ट्रं च विपुलं ब्रूयात् वर्धते शृंग
णास्तथा॥ ॥अथ दुष्टलांगलसंस्थानफलमाह॥ दक्षिणविषाणमर्धोन्नतं यथा दुष्टलांगलाख्यं तत॥ पां
ड्यनरेश्वरनिधनकृत् उद्योगकरं च बलानां॥१०॥ पांड्यदेशेश्वरस्य राज्ञस्तस्य निधनं मरणं करोति॥
तथा बलानां सैन्यानामुद्योगकरं सेनानामुद्योगमुद्यमं करोति॥ यात्रायाः॥ तथा च वृद्धगर्गः॥ दक्षिणं च
भवेत्तुंगं दीनं शृंगमथोत्तरं॥ दुष्टलांगलसंज्ञं तु प्रजानाशकरं स्मृतं॥ ॥अथ समचंद्रसंस्थानमाह॥
समशशिनि सुभिक्षक्षेमवृष्टयः प्रथमदिवससदृशाः स्युः॥ दंडवदुदिते पीडा गवां नृपश्चात्युग्रदंडोऽत्र॥११॥
समशशिनि तुल्यशृंगे चंद्रे प्रथमदिवससदृशाः प्रथमदिनं प्रतिपत्सदृशास्तत्तुल्याः सुभिक्षक्षेमवृष्ट
यः स्युः भवेयुः॥ प्रतिपद्दिने यादृशाः सुभिक्षा यादृशं क्षेमं यादृशी वृष्टिः तादृशाः सर्व एव मासं यावत्स्यु
र्भवेयुः॥ दंडवदुदित इति॥ दंडवदुदिते दंडाकारे गवां पीडा भवति॥ तथात्रास्मिन्संस्थाने नृपो राजा
ग्रदंडः तीव्रदंडकरो भवति॥ तथा च वृद्धगर्गः॥ समशृंगो यदा दृश्यः समः क्षेमसुभिक्षकृत्॥ प्रतिपत्
सदृशस्तत्र मासो वा वर्षं तेन तदा॥ चंद्ररेखा यदा चाब्दमण्डलीदंडवर्त्मिता॥ उत्कृष्टशृंगाधिकसमो दंडस्थानं ३२
तदुच्यते॥ यत्र कुदंडा राजानो विनिघ्नंति समंततः॥ गवां पीडां विजानीयात् दंडस्थाने यदा शशी॥ अ

थ कार्मुकयुगसंस्थानयोर्लक्षणस्य फलमाह॥ कार्मुकरूपे युद्धानि यत्र ज्या तत्र जयस्तेषां॥ स्थानं युगमिति याम्यो
त्तरायतं भूमिकंपाय॥१२॥ कार्मुकं धनुस्तद्रूपे तदाकारे संस्थाने युद्धानि संग्रामा भवंति॥ यत्र तु ज्यायस्मि
न्भागे गुणः तत्र तस्यां दिशि स्थिता राजानो जयंते तेषां॥ तथा च वृद्धगर्गः॥ उदये तु यदा सोमः पश्चाद्धनुरि
वोदितः॥ धनुर्धराणामुद्योगं तु गा युद्धकरो भवेत्॥ क्षत्रियाः क्षत्रियान्घ्नंति वर्णाश्चैव तथापरे॥ ज्यायत
श्च जयस्तेषां दृष्टलूपराजयः॥ स्थानं युगमिति॥ यत्स्थानं याम्योत्तरा दक्षिणसौम्यभागविस्तीर्णं मध्य
मंडलं यदि भवति॥ यत युगं नाम॥ तच्च भूमिकंपाय भवति॥ एतदुक्तं भवति॥ एवंविधं स्थानं दृष्ट्वा लोके
ना समध्ये भूकंपो वक्तव्यः॥ तथा च वृद्धगर्गः॥ चंद्ररेखा यदा दृश्या दक्षिणोत्तरमायता॥ शुक्लादौ प्रतिपद
ततस्तु युगस्थानलक्षणं॥ सैन्योद्योगा भवंत्यत्र भूमिकंपश्च जायते॥ ॥अथ पार्श्वशायिनः संस्थानफ
लमाह॥ युगमेव याम्यकोट्यां किंचित्तुंगं स पार्श्वशायीति॥ विनिहंति सार्थवाहान् वृष्टेश्च विनिग्रहं कुर्या
त॥१३॥ युगमेव युगसंस्थानं याम्यकोट्यां दक्षिणशृंगाग्रे किंचित्तुंगमुच्चं यदि भवति॥ स पार्श्वशायीति॥ चं
द्रपार्श्वशायीत्यभिनमिति॥ तत्संस्थानसंज्ञा॥ स च सार्थवाहान् सार्थप्रधानान् वणिजो हंति घातयति॥ तथा च
वृष्टेर्वर्षणस्य निनिग्रहं विनाशमभावं कुर्यात्॥ न वर्षतीत्यर्थः॥ तथा च वृद्धगर्गः॥ याम्यकोट्यां यदा किंचि
त युगकालो यदा भवेत्॥ पार्श्वशायीति संज्ञेयं सार्थवाहविनाशनः॥ ॥अथावर्जितसंस्थानलक्षणस्य
फलमाह॥ ॥अभ्युच्छ्रायादेकं यदि शशिनो विवृतमेव तच्छृंगं॥ आवर्जितमित्यसुभिक्षकारि तद्गोध
नस्यापि॥ १४॥ आभिमुख्येनोच्छ्रायादभ्युच्छ्रायात्समात् शशिनः चंद्रस्य यद्येकं शृंगमवाङ्मुखमधोमु
खं भवति तत्संस्थानमावर्जितं नाम इति शब्दः प्रकारार्थः एवंप्रकार इत्यर्थः॥ तथा चाधोमुखं यदा शृंगं श
शिनो दृश्यते तदा संस्थानमावर्जितकं गोघ्नं दुर्भिक्षकारकं॥ ॥अथ कुंडाख्यसंस्थानलक्षणमाह॥ अव्य
च्छिन्नरेखा समंतात् मंडले च कुंडाख्यं॥ अस्मिन्मांडलिकानां स्थानत्यागो नरपतीनां॥१५॥ ॥समंततः
सर्वत्र। यद्यव्यच्छिन्ना खंडरेखा दृश्यते॥ तदा तत्संस्थानं कुंडाख्यं॥ कुंडमित्याख्या नाम यस्य॥ अस्मिन्संस्था

बृ॰ सं॰ ने मांडलिकानां नरपतीनां मंडलेपरिमिते दृष्टो राज्ञां तेषां स्थानत्यागः स्थानचलनं भवति। स्थानच्युतिरित्यर्थः
॥ तथा च वृद्धगर्गः॥ अच्छिन्नामंडलेरेखा शशिनो दृश्यते यदा॥ कुंडाख्यं नाम संस्थानं नृपविग्रहदायकं॥ नक्ष
३८ त्रे चंद्रमसो यानि संस्थानान्युक्तानि तेषां कानिचित गणितविधिना शृंगोन्नतिपरिलेखकरणेनोत्पद्यंते।
कानिचिन्नोत्पद्यंते॥ तथा चाचार्येणोक्तं॥ ॥अयनांतरसंयुक्तात् दृग्गणितात शशांकविवरात मूल
नयेनचिच्छेद्यं विक्षेपसंयुक्तो॥ फलमिंदकोटिर्भागात् शोध्यं तपनान्मृगविक्षेपे॥ तद्विन्यास दृश्यं विपरीतं प्र
वेसंध्यायां॥ दिनचरमसमभवनात नोदयनाडिकाद्रसंयरविच॥ विद्यतिविमलतरं दंडलोके स्थान्कोकमार्यातो
॥द्विगुणं प्रवृत्तिरसः समशृंगामस्तं तुंगमद्गुणाधिपतेः॥ दंडं च भुजा दृष्टे तत शीतांशुकर्णानिरूपकांद्वाः॥ अयनां
तरविक्षेपाद्भिक्ष्याप्यसंयुतात्यतः कोटिः॥ कर्णार्कात्मुविवरं तत्रैव भूमिविचरान्वरं वादः॥ सवितायतः शशं
कात कोट्यापरिकल्पितः ततः कोटिः॥ दृष्यां चाकांगुलसमा भुजकर्णानांगुलैरेव॥ द्विगुणं शशिम्यथाप्रात्कर्णकोटि
दितो भुजः शशांकधनुः॥ परिध्यार्धशंभोः शोत्रुमध्यास्त्रधनुः याम्यादिग्विक्षेपात्समत्वाद्भृत्यं
स्तरावातः॥ उदये शशिनोद्युः क्षयोविपर्यस्तसमये॥ एवमकांद्रसाधनाद्यः यस्याधिकावा। तदुद
यकाले नद्विधानिस्तिचशशांको दृश्यो वाच्या॥ कृत्वैवं वक्ष्यत्रिकोण्यर्द्धं द्विचित्रं शस्यैच कोधानि॥ शेषादस्यकाल
समे भागशिद्वियसार्धे नाशोमध्यः॥ एवमत्र तानि नोत्पद्यंते तेन अर्थमाचार्येण फलमुक्तं मन्त्रोच्यते॥ यानि
नोत्पद्यंते॥ परिलेखविधानान्युत्पातरूपाणि कदाचिद् दृश्यंते॥ अतस्तेषां भगवता गार्गादिभिरचितन्ना
त्याष्टफलानि दृश्यंते॥ तानि चाचार्येण पूर्वशास्त्रानुसारेणोक्तानि॥ पराशरतंत्रे अष्टौ संस्थानान्युक्तानि॥
तथा च पराशरः॥ तत्राष्टौ संस्थानानि भवंति॥ तद्यथा लांगलं। नौर्दंडलांगलं। दंडं धनुः युगं॥ समं चाक
पिरः॥ ८॥ तत्र तेषां मीषदुन्नतोत्तरशृंगलांगलं संस्थानं॥ तत्र भिक्षक्षेमवृद्धिकारं नाम भयदूताभय ३८
शृंगः कुक्षिमान् विशालो नौसंस्थानी॥ फलतः सम पूर्वेण दक्षिणोत्तरशृंगो दृष्टलांगलं॥ परसैन्योद्योगना
शकृत। दंडवत दैर्घ्यस्थानाद् दंडवत प्रजानां। धनुः प्रख्यो धनुः स्थानी धनुर्धरोद्योगकृत। यतोस्यजात

DR. BHAU DAJI MEMORIAL

तोग्रयः॥ य युगाय तार्दक्षिणेन चास्य लेखा भवति न तु युगस्थानमिच्छंति। त गतनिद्रवभकृत्यायः॥ समोभयशृं
गं समसंस्थानं तन्मसूभयकृत। शुभ्रफलसर दृश्यते। वाकचिरः। अथ तानि शकुप्रतिपादितायां वा लक्षणा
नि भवंति॥ तथा च समाससंहितायां॥ उदगुन्नतः शुभफलः समः समा। दक्षिणोन्नतोन शुभः। युद्धानि चापरु
पेत्याः स्य न यन स्लेच्छ पालयिनः। नाविकपीडानो वलांगलसंक्षिप्तविकराणां॥ दंडो वास्कुरवसंकुद तत्रैर्पीडा
कृतिर्न शुभः॥ उत्पातात्यामयानायेकं नंदप्राप्ते नैर्निर्दिष्टाः। शृंके भवंति याश्याः व्यामधिकपापफलप्राप्तित
॥ अथ सामान्यलक्षणमाह॥ प्रोक्तसंस्थानाभावादुन्नतश्चः क्षेमवृद्धिकरः। दक्षिणतुंगश्चेंद्रो दुर्भिक्षभया
यनिर्दिष्टः॥ ३६ ॥ प्रोक्तानि कथितानि यानि संस्थानानि नावादीनि तेषामभावादसंभवात। यद्युदगुच्चः
उन्नतोन्नतश्चंद्रमाः। तदा क्षेमवृद्धिकरः। कल्याणं क्षेमरतं चकरोति। वृद्धयः सस्यवृद्धयः। वृष्टिर्व
र्षं॥ तौ चकरोति॥ अथ दक्षिणतुंगो याम्योन्नतो भवति दक्षिणविषाणोन्नतस्तदा दुर्भिक्षभयायनिर्दिष्टः॥
दुर्भिक्षं भयं च करोति। अथान्यदप्याह। शृंगेणैकेन दुविलीनमथवाप्यवाङ्मुखं शृंगं॥ संपूर्णं वाभि
नवं दृष्ट्वैको नैवा विनातत्र श्येत॥ ३७॥ एवंविधं दुर्वर्द्ध दृष्ट्वा वृको वयएकोमनुतोक्तो विनातभ्रंश्येतपतेत्
॥ यएव एकः पश्यति सोम्रियतइत्यर्थः॥ कीदृशं एकेन शृंगेणापलक्षितं। अथवा विलीनं गलितं केण्ट
गण अपि ऊर्ध्वविकृत्यतार्थः॥ ॥अथवा वाङ्मुखमधोमुखं शृंगं वास्य भवति॥ तदा संपूर्णमभि
नवं अभिमुख्येन नवं॥ च शब्दः समुच्चये॥ अथवाभिमुख्येन नवोद्गतायां चंद्रमसं यो विधं पश्यति॥ ॥
तथा च समाससंहितायां॥ उदयं तमथ सदृशं न शुभं चद्रूपताथे वै कस्य॥ एकश्चेंद्र विकारं पश्ये स्वास्थ
चिरंजीवित॥ ॥अथ चंद्रमसो रूपाण्याह। संस्थासंस्थानविधिः कथितो रूपाण्यस्माद्रुवंति चंद्रमसः॥ स्वल्प
दुर्भिक्षकरो महान्सुभिक्षावहः प्रोक्तः॥ ३८॥ मध्यतनुर्वज्राख्यः क्षुद्भयदः संभ्रमाय राज्ञां च॥ चंद्रोम
दंगरूपः क्षेमसुभिक्षावहो भवति। ३९॥ योक्तं विशालमूर्तिर्नरपतिलक्ष्मीविवृद्धये चंद्रः॥ स्थूल
सुभिक्षकारी प्रियधान्यकरः स्तनुमूर्तिः॥ ४०॥ संस्थानविधिरिति॥ संस्थानविधिः संस्थानप्रका

बृ॰ सं॰ रश्चंद्रमसः कथितः। उक्तं। अस्मात्परतो रूपाणि भवंति तानि चाह॥ स्वल्पो दुर्भिक्षकरः अत्यल्पमूर्तिः सुभि
क्षं करोति॥ महान्पृथुमूर्तिः सुभिक्षावहः सुभिक्षमावहति। करोति॥ प्रोक्तः कथितः॥ मध्यमतनुरिति॥
३९ यो मध्यतनुर्मध्यादघनः स वक्ष्याम्यावक्ष्य संतः स तु शुद्धयदः शुद्धयंदुर्भिक्षं च करोति॥ राज्ञां नृपाणां
संभ्रमायोद्यमाय च भवति॥ तथा च वृद्धगर्गः॥ विकृत संस्थो मे घाभो नक्ष संस्थान संस्थितः॥ मध्यच्छिद्रो
विलीनो वा भयं च जनयेन्महत्॥ चंद्रो मृदंगरूपः ऽतः॥ चंद्रः ऽनो विशालमूर्तिः विस्तीर्णविंबो नरपतेरा
तो लक्ष्मीविवृद्धये श्रेयोऽर्थं इति यो ज्ञातव्यः॥ स्थूलो घनः सुभिक्षकारी सुभिक्षं करोति॥ तनुमूर्तिश्च
नरेंद्रः॥ प्रियधान्यकरो दुर्भिक्षकारी भवति॥ २०॥ अथ चंद्रस्य कुजादिताराग्रहैः शृंगाभिन्ने फलमाह॥ ॥
प्रत्यंतान् कुनृपानिहंत्युदुपतिः शृंगे कुजेनाहते शाख्यश्चिद्धयमेन शशिजेनावृष्टिदुर्भिक्षकृत्॥
श्रेष्ठान् हंति नृपान्महेंद्रगुरुणा शुक्रेण चाल्यान्नृपान् शुक्रेचास्य मिदं फलं च सकलं तद्रश्मियथा क्रमं॥ २१॥ चंद्रस्य
ताराग्रहैः सह संयोगसमागमो ज्योतिषवृद्धिना ग्रहणवत कर्मणि जाते भूताधो भावेन भौमादयो विश्व
भेदनं कुर्वंति॥ तत्र शृंगभेदेन इदं फलं॥ मध्यभेदेन वक्ष्यमाणं॥ प्रत्यंतानिति॥ उदुपतिश्चंद्रः कुजेन भौ
मेन शृंगे विषाणे आहते ताडिते सति प्रत्यंतान् दूरवासिनः कुनृपान् कुत्सितनृपतीन् हंति घातयति॥ यमे
न शनैश्चरेणाहते शृंगे शाख्यश्चिद्धयकृत शस्त्रभयं युद्धं शुद्धयं दुर्भिक्षभयं करोति॥ शशिजेन बुधेना
हते अनावृष्टिं अविस्युद्धतं दुर्भिक्षभयं च करोति॥ महेंद्रगुरुणाहते तेन श्रेष्ठान्नृपान् नरपतीन् हंति घातयति।
येऽज्यः सम्यक्॥ सर्वत्र च॥ शुक्रेणाहते शृंगे अल्पान्नृपान् नरपतीन् हंति घातयति॥ शुक्रे चाल्य
मिति॥ इदं च सकलं शृंगभंगफलं शुक्लपक्षे कृष्णपक्षे याल्प भवति किंचिन्न्यूनमित्यर्थः॥ कृष्णे कृष्णपक्षे यथा
क्रमं यथानिर्दिष्टं सकलं फलं भवतीति॥ तथा च पराशरः॥ अथ शृंगाभिमर्दने गुरुः प्रधाननृपति
नाशाय गुरुर्वाधितां नृपाणां भौमः॥ सौम्यो दुर्भिक्षाय्यावृष्टये शुक्रः शस्त्रभयदः॥ सौरइति॥ तथा ३९
च समाससंहितायां॥ ॥प्रत्यंतनिवासिनो नश्यंति महाजनपीडा च॥ संग्रामाश्चाभिहते शृंगे भौमा

दिभिः क्रमशः इति॥ अधुना शुक्रभिन्नविंबस्य चंद्रमसः फलमाह॥ ॥भिन्नः सितेन मगधान् यवनान् पुलिंदा
न्नेपालभृंगिमरुकच्छसुराष्ट्रमद्रान्॥ पांचालकैकयकुलूतकपौरवादान् हन्यादुशीनरजनानपि सप्तमा
सान्॥ २२॥ सितेन शुक्रेण यदाभिन्नश्चंद्रो मध्याद्विदारितः॥ तदा मगधान् जनान् यवनान् पुलिंदान् एतान्
सर्वान् जनान् हन्यात्॥ नेपालो देशः भृंगिमरुकच्छसुराष्ट्रमद्रान् एतान् जनान् पांचालान् कैकयान् कुलूत
कान् जनानेव॥ पौरवान् पुरुषभक्ष्यान् उशीनरजनान् एतान् सर्वान् पाककालादनंतरं सप्तमासान् यावनाति
हन्यात्॥ घातयेत्॥ पश्चात् भानोः सोमस्य मासिकं गारकस्येन॥ आर्द्रानाद्यपाकोबुधस्य॥ जीवस्य वर्षे
ण॥ षड्भिः सितस्य मासैः शनेश्चरेन त्रिमासुरद्विषोः ब्दर्धात॥ वर्षात् सूर्यग्रहेण सद्यः स्यात् लक्ष्मकालकृत्या॥ पाका
ध्याय उक्तः॥ २३॥ ॥अथ जीवाद्विभिन्नस्याह॥ गांधारसौवीरकसिंधुकीरान् धान्यानि शैलान् द्रविडा
धिपांश्च॥ द्विजांश्च मासान् दश शीतरश्मिः संतापयेद्वाक्पतिना विभिन्नः॥ २३॥ शीतरश्मिश्चंद्रो
वाक्पतिना गुरुणा विभिन्नो विदारितो विंबः गांधारकान् सौवीरकान् सिंधवान् कीरान् एतान् सर्वानेव जना
न् संतापयेत् पीडयेत्॥ तथा धान्यानि व्रीह्यादयः॥ शैलान्पर्वतान् द्रविडाधिपान् द्रविडदेशाधिपान् अधि
पान् द्विजांश्च ब्राह्मणान् एतान्दशमासान् यावत्पीडयेत्॥ पाकाध्यायनिर्दिष्टकालात्परतः इदं ज्ञेयमि
ति सर्वत्र॥ ॥अथ भौमभिन्नस्याह॥ उग्रान् सदवाहनान्नरपतीन् त्रैगर्तकान् मालवान् कौलिंदान् गणपुं
गवानथ शिबीनायोध्यकान्पार्थिवान्॥ हन्यात्कौरवमत्स्यशुक्तिपतीन् राजन्यमुख्यानपि प्रालेयांशुरसृङ्मयूखहतनुर्गत्वा षण्मासं मर्यादया॥ २४॥ प्रालेयांशुर्हिमरश्मिश्चंद्रोऽसृङ्मयूखोऽगारकः तनुगतस्सो
रक्तो भौमभिन्न इत्यर्थः॥ षण्मासमर्यादया षण्मासावधिं यावदेतान् हन्यात् घातयेत्॥ उग्रान् सदवाह
नैर्नरपतीन्नृपानुद्योगस्थितान्विजिगीषून् वाहनैरश्वादिभिः सह हन्यात् घातयेत्॥ त्रैगर्तान् जनान् मालव
कान् कौलिंदान् आयोध्यकान् अयोध्याभवान् पार्थिवान् तान्यपि हन्यात्॥ तथा कौरवाणां जनान्॥ मत्स्या
नांशुक्तीनां च याजाधिपतीन् स्वामिनः तान् पिराजन्यमुख्यान् क्षत्रियप्रधानान् हन्यात्॥ २४॥ अथ शनै
श्चरभिन्नस्याह॥ यौधेयान् सचिवान् सकौरवान् प्राचीशानथ चार्जुनायनान्॥ हन्याद्रविजाभिन्नमंड

ऽशीतांशुर्दशमासपीडया॥ २५॥ शीतांशुश्चंद्र आर्किभिन्नमंडलः सौरविदारितबिंबो दशमासपीडयाद-
शमासोपतापेन एतान् हन्यात्॥ घातयेत्॥ यौधेयान् जनान्। सचिवान्मंत्रिणः। कौरवान् कौरवजनैः सहप्रा-
चीशान् पूर्वस्यां दिशि स्थानधिपान्॥ अथशब्दः पादपूरणे। चशब्दः समुच्चये। अर्जुनायनान् जनानिति॥
२५॥ अथ बुधभिन्नस्याह॥ मगधान्मथुरांश्च पीडयेत् वेणायाश्च तटं शशांकजः॥ अपरत्र कृतं युगं वदे-
त्॥ यदि भित्त्वा शशिनं विनिर्गतः॥ २६॥ शशांकजो बुधो यदि शशिनं चंद्रं भित्त्वा विदार्य विनिर्गतो विनिः-
सृतः तदा मगधान् देशान् मथुरां च पीडयेत्॥ हंति। तद्वासिनो जनान् विनाशयति॥ वेणानाम नदी तस्या-
स्तटे तत्तीरे ये निवसंति तान् जनान् हंति॥ एतानुक्तान् वर्जयित्वा अपरत्रान्यदेशेषु कृतयुगं वदेत्॥ कृतयुगा-
नुकारं ब्रूयात्॥ तद्धर्मानुवृत्ता॥ २६॥ अथ केतुभिन्नस्याह॥ क्षेमारोग्यसुभिक्षविनाशी शीतांशुः शिखि-
ना यदि भिन्नः॥ कुर्यात् आयुधजीविविनाशं चौराणामधिकेन पीडां॥ २७॥ शीतांशुः चंद्रः। शिखिना के-
तुना यदि भिन्नो विदारितबिंबो भवति॥ तदा क्षेमारोग्यसुभिक्षविनाशी भवेत्॥ क्षेमं आरोग्यं नीरुजत्वं॥ सु-
भिक्षं च विनाशयति॥ तद्वत्॥ तथायुधजीविनां आयुधेन ये जीवंति तेषां विनाशमुपघातं च कुर्यात्
चौराणां तस्कराणामधिकेनातिशयेन पीडां रुजं कुर्यात्॥ तथा च पराशरः॥ अथ भौमसुरगुरुभिन्नः पं-
चालमगधमद्रकुलिंदकोशलककैकययवनधूम्राश्वेष्टमार्गांगनारट्टवंगिमरुकच्छोदीच्यान् दशपु-
लिंदपुराश्चाद्वैनपालान् सप्तमासान् तापयति॥ अमरगुरुणा दशमासान्॥ गंधारवसातिसिंधुबाल्हीक-
पार्वतकाश्मीरान्॥ क्षितिसुतभिन्नः कुरुशिबिमालवत्रिगर्तकुलिंदाश्वोधान्वाधिपतीश्च यायिभिः सह
षण्मासान् संतापयतीति॥ अर्कसूनुसंभेदे नृपतिविरोधामात्यभेदगणपयौधेयाश्चार्जुनायनभ-
याद्यानार्यक्षिप्रादुर्भावश्च दशमासान् बुधभिन्नसुभिक्षक्षेमवृष्टिकरः॥ २ ॥ केतोस्तद्विपर्ययश्चद्ध-
मानोपतापरात्रीतो ग्रहभिन्नोऽप्यशुभफलसंहर्तेति॥ ॥ अथ ग्रहणकालवदुल्कापातस्य चंद्रस्य फ- ४०
लमाह॥ उल्कायाथवा शशी ग्रस्तः एक हन्यते। हन्यते तदा नृपो यस्मिन्नामांकितः॥ शशी चंद्रो ग्रस्तो

ग्रहो ग्रस्तोगतो यदोल्कया हन्यते। तदभिमुखी उल्का याति। तदा यस्य नृपस्य जन्मनि जन्मनक्षत्रे स्थितः॥ सह-
न्येत प्रयत इत्यर्थः॥ तथा च समाससंहितायां॥ उल्काभिहतो ग्रहणे तं नक्षत्रं नृपं हंति॥ ॥ अथ चंद्रमः
सौवर्णलक्षणमशुभमाह॥ ॥ भस्मनिभः परुषोऽरुणमूर्तिः शीतकरः किरणैः परिहीनः॥ श्यामतनुः स्फु-
टितः स्फुरणो वा क्षुत्समरामयचौरभयाय॥ २९ ॥ एवंविधः शीतकरः चंद्रः क्षुत्समरामयचौरभयाय भ-
वति॥ क्षुत् दुर्भिक्षं। समरः शस्त्रकलहः। आमयो रोगः॥ चौरस्तस्करः। एषां संबंधि भयं भवति॥ कीदृशः
भस्मनिभो भस्मवर्णः। परुषः परुषो अतिरूक्षः। अरुणमूर्तिर्लोहितः॥ शीतकरः किरणै रश्मिभिः परिहीनो
वर्जितः॥ श्यामतनुः कृष्णवर्णशरीरः॥ स्फुटितो भग्नः॥ स्फुरणः कंपमान इति॥ २९॥ अन्यदप्याह॥ प्रा-
लेयकुंदकुमुदस्फटिकावदातो यत्नादिवाद्रिसुतया परिमृज्य चंद्रः॥ उच्चैः कृतो निशि भविष्यति मशि-
वाय यो दृश्यते स भविता जगतः शिवाय॥ ३०॥ एवंविधश्चंद्रो यो दृश्यते लोके कथ्यते॥ स जगतः ज-
नानां श्रेयसे शिवाय भवति॥ कीदृशः॥ प्रालेयकुंदकुमुदस्फटिकावदातः॥ प्रालेयं हिमं॥ कुंदकुम-
दे पुष्पविशेषे शुक्ले॥ स्फटिकः स्फटिकोपलः। तद्वदवदातः शुभ्रः निर्मल इत्यर्थः॥ तथा च अद्रिसु-
तया गौर्यात्यादरात् यत्नतः परिमृज्य समंतात् निर्मलीकृत्यालिः कृतइवोपरिन्यस्तः किमर्थं॥ निशाक-
रो मे शिवाय महेश्वराय भविष्यति श्रेयसे चेति निश्चित्य॥ तथा च पराशरः॥ भस्मारुणवह्निताम्र-
पीतपांडुरूक्षनीलवर्णः शुद्धकरः स्निग्धः प्रसन्नो रश्मिवान् श्वेतः सुभिक्षवृष्टिकरः॥ इति॥ अथ प-
क्षवृद्धौ हानौ चाशुभाशुभमाह॥ शुक्लपक्षे संप्रवृद्धे प्रवृद्धिं ब्रह्म क्षत्रं याति वृद्धिं प्रजाश्च॥ हीने हानिस्तु-
ल्यता तुल्यतायां कृष्णे सर्वं तत्फलं व्यत्ययेन॥ ३१॥ शुक्लपक्षे चंद्र मासार्धे संप्रवृद्धे सम्यक् प्रवृद्धिं गते
प्रवृद्धिं याति॥ ब्राह्मणा द्विजाः। क्षत्रियाः राजन्याः प्रवृद्धिं गच्छंति॥ तथा च प्रजाश्च वृद्धिं यांति। हीने हा-
निर्गते॥ तस्मिन्नेव शुक्लपक्षे हीने क्षयं गते सति ब्रह्मक्षत्रप्रजानां हानिर्भवति। तुल्यता तुल्यतायामिति॥
तुल्यतायां समत्वेन न वृद्धौ न च हानौ ब्रह्मक्षत्रप्रजानां तुल्यता समता सामान्यमेव भवति न च वृद्धिर्न च हानिः

कुमुदसवर्णतनुकं स्पष्टत्वेन॥ कुमुदकुसुमपक्षे सवर्णतनुकं स्पष्टत्वेन विपरीतेन तेन। एतदुक्तं भवति। कुमुदपक्षे
बृ०सं० प्रवृद्धशुक्लपक्षचन्द्रकालानां हानिः समं समत्वमिति। अन्यदप्याह॥ यदि कुमुदमृणालहारगौरस्तिथिनिय
मात्क्षयमेति वर्धते वा॥ अविकृतगतिमण्डलांशुयोगी भवति नृणां विजयाय शीतरश्मिः॥ ३२॥ एवंविधः
४१ शीतरश्मिश्चन्द्रो नृणां पुंसां विजयाय भवति। कीदृशः॥ यदि कुमुदमृणालहारगौरः॥ कुमुदं पुष्पविशे
षः॥ मृणालं बिसं॥ हारो मुक्ताहारः॥ तद्वद्यदि गौरः श्वेत इत्यर्थः॥ तिथिनियमात्तिथिक्रमेण क्षयमे
ति॥ तिथिक्रमेण वा वर्धते वृद्धिं याति॥ शुक्लकृष्णप्रतिपदाद्यासु तिथिषु वृद्धिक्षयावन्योन्यं भवतः। न क
दाचिद्धीनाधिकेति। अविकृतगतिः अविकृता विकाररहिता गतिर्गमनं यस्य कंपनादिदोषरहितः॥
अविकृतमण्डलं बिंबं यस्य। अविकृतैरंशुभिः किरणैर्यस्य संयोगः॥ तथाभूत इति॥ ॥इति श्रीभट्टोत्प
लविरचितायां संहिताविवृतौ चन्द्रचारो नामाध्यायश्चतुर्थः॥ ४ ॥अथ राहुचारो व्याख्यायते॥
तत्रादावेव राहोर्ग्रहत्वप्रतिपादनाय परमतमाह॥ ॥अमृतास्वादविशेषाच्छिन्नमपि शिरः किलासु
रस्येह। प्राणैरपरित्यक्तं ग्रहतां यातं वदंत्येके॥ किलशब्द आगमप्रदर्शनार्थः॥ एके केचिदाचार्या एवं
वदंति। कथयंति॥ कोऽसौ राहुरित्युच्यते॥ स चासुरः सैंहिकेयः। तस्य पराऽमृतं पिबतो भगवता हरि
णा सुदर्शनाख्यचक्रेण शिरो मूर्धा छिन्नं कृतमपि अमृतास्वादविशेषाद्रसता स्वादनहेतोः प्राणैरसुभि
रपरित्यक्तं॥ नोज्झितं॥ ग्रहतां यातं तदेव ग्रहत्वं प्राप्तमित्यर्थः॥ तथा च पुराणकारः॥ सिंहिकातनया
द्राहोश्छिन्नस्य तं पुरा। शिरश्छिन्नोऽपि न प्राणैस्त्यक्तोऽसौ ग्रहतां गत इति॥ यद्येवंविधो राहुस्तत्कथ
मित्याकारेणोपलक्ष्यते। तदर्थमाह॥ इंद्वर्कमण्डलाकृतिरसितत्वात्किल न दृश्यते गगने॥ अन्यत्र पर्व
कालाद्वरप्रदानात्कमलयोनेः॥ २॥ इंदुमण्डलस्यार्कमण्डलस्य सदृशं मण्डलं बिंबं यस्य च या दृश्या कृतिराकृ ४१
रस्याः दृश्येव राहुमण्डलस्यापि॥ यद्येवं ततः कुमिति (?) गगने आकाशे न दृश्यते॥ असितत्वात्किलेति॥
असितत्वात्कृष्णत्वात्किल न दृश्यते। यतोऽसौ तमोमय इति॥ यदि न दृश्यते तदप्यस्य दर्शनमस्ती

त्याह॥ अन्यत्र पर्वकालादिति॥ कमलयोनेर्ब्रह्मणो वरप्रदानात्पर्वकालाद्ग्रहणसमयादन्यत्रान्यस्मिन्
काले न दृश्यते॥ पर्वकाले तु पुनर्दृश्यते॥ तथा च पराशरः॥ पुरा पुरुहूतार्पितरंजनयपत्न्यार्थकाले सिंहिका
याचयामास॥ तस्मै मुनिरकालयाच्याकोपात्तदा ग्रहणीयमकालांतकोपमं सुतमददात। यं राहुमित्याच
क्षते कृताः। स जातमात्र एव बाहिते मातासंगराभिमर्दनादनभिमुखीकृतः। कोपाद्धिमवंतादिव्यमयुतम
सुतं वर्षाणां तपोऽतप्यत॥ स पितामहात् बहुविचरणामसुरतां सर्वविद्यमर्कचंद्रमसोश्च क्षणेन चरमभिया
चमास॥ तस्मै भगवानमरवरगुरुः स्वयंभूः प्रहृष्टमनुवाच॥ अतिवरमज्ञानत्वमेतोपरयितुं किंत्वेवमस्तु यत्ता
तथापि भगवतोऽदिनकररजनीकरावभिद्रव॥ अर्धग्रस्तयोर्दीप्तरश्मिमथ्यनं चक्रमुत्क्षिप्यामिरः क्रिया
वाच॥ सर्वमवितथं पितामहवचो भवितव्यं स्वयुगपर्वाणि ग्रहणं कुर्वन् जगतः शुभाशुभानां कर्ता भविष्य
तीति॥ तथा च गर्गः॥ आदित्यनिकषा राहुः सोमं गच्छति पर्वसु॥ आदित्यमेति सोमाच्च पुनश्चांद्रेषु पर्व
स्विति॥ अन्यदपि मतांतरमाह॥ मुखपुच्छविभक्तांगं भुजंगमुपदिशंत्यन्ये॥ कथयंत्यमूर्तमपरे तमो
मयं सैंहिकेयाख्यं॥ ३॥ राहुं मुखपुच्छविभक्तांगं भुजंगमुपदिशंति कथयंति॥ मुखपुच्छाभ्यां विभक्तमंगमा
नियस्य॥ न देवस्य ज्ञायते॥ नान्यदेव यथा दिक् मुखपुच्छाभ्यां परतः॥ तथा च वीरभद्रः॥ सिंहिकात
नयस्यास्य राहोः पुच्छमस्याकृतिः॥ नान्यदस्य परं बाहुः कुठिपादकर्णादिकमिति॥ भुजंगाकारमुपदिश
त्येके॥ अन्ये आचार्या भुजंगाकृतिं सर्पाकारं च वदंति॥ कथयंति॥ यथा सर्परूपो राहुः॥ तथा च वसिष्ठः॥
भवद्कांतस्तो राहुः सर्पांगः समसावुभौ॥ दृढाद्यायुर्गकालो वरदानात्स्वयंभुव इति॥ कथयंत्यमूर्तम
परे इति॥ अपरे अन्ये पुनर्मूर्तिरहितं तमोमयं अंधकारमयं राहुं कथयंति वदंति॥ तथा च देवलः॥ अं
धकारमयो राहुर्मेघखंडेऽवस्थितः॥ आक्रामयति सोमार्कौ पर्वकालेऽप्युपस्थिते॥ अधुनैतन्मतमप
रं दूषयितुमाह॥ यदि मूर्तो भविचारी शिरोऽथवा मण्डली भवति राहुः॥ भगणार्धेनांतरितौ ग्र
हणाति कथयंति यत्नचारः॥ यद्यसौ राहुर्मूर्तो मूर्तिमान् सावयवो भविचारी। भंपन (?) क्षत्रेषु राशिषु

चाचरणशीलः॥ नित्यं थयाभवति शीघ्रगामी॥ राहुर्मंडली मंदस्थानचानहा नियतचारो निश्चितगतिर्भला
ब्रा·सं· कथं भगणार्धेन राशिषट्केनांतरितो ऽवचादूतः। सर्वाचंद्रमसो ग्रहणहाति। किंकास्यत्रिकिमाल्कादेश
किंप्राश्चगणितलंके शोनानियतागतिर्यस्य सनियतचारः॥ तस्य षड्राश्यंतरिता गतिर्न संभाव्यते।
४२ अर्काद्दिनांग्रथोति॥ अथ दूषणांतरमाह॥ अनियतचारः खलु चेद्दृपलब्धिः संख्यया कथं तस्य॥ पुच्छा
ननाभिधानांतरेण कस्मान्नग्रहाति॥ ७॥ यद्यसौ राहुरनियतचारो अनियतगतिः॥ केनादिभिर्
नलत्कथं तस्य संख्यया गणितेनोपलब्धिः॥ दृपलब्धिर्भवनतायने। यथास्मिन राशौ राहुस्तिष्ठति॥
अथवा पुच्छाभिधानामुखपुच्छविभक्तांगस्तदंतरेण मध्येन कथं न गृह्णाति। यथा षड्राश्यंतरितोग्र
ह्णाति। तथा राश्याद्यंतराशित्रयेण राशिचतुष्केण राशिपंचकेन वा कस्मान्न हृतो न गृह्णाति॥ अन्यदपि दूष
णमाह॥ ॥अथ तु भुजंगेंद्ररूपः सर्पाकारः स च षड्राश्यंतरितोर्कचंद्रौ पुच्छेन कांगलेन वदनेन वा गृह्णा
ति॥ एवं चेन्मुखपुच्छांतरसंस्थमुखपुच्छमध्यवर्तिभगणार्धराशिषट्कं कस्मान्न हृतो न ग्रसयति॥ नाक्रा
दयति किंकृत दुपपद्यते इति। अथ राहुद्वयमस्मि। तत्रैको नियतचारो ऽन्योनियतचार इति। यश्चा
नियतचारः स भषड्कांतरितयोरर्कचंद्रमसोर्ग्रहणं करोति॥ एतत्प्रतिषेधयन्नाह॥ राहुद्वयं यदि
स्यात् ग्रस्तेस्तमिते ऽथवोदितेऽचंद्रे॥ तत्समगतिनान्येन ग्रस्तः स्फुटोपिदृश्येत॥ ८॥ ॥यदि चेन्राहु
द्वयं स्वर्भानुयुगं स्यात् भवेत्। चंद्रे शशिनि ग्रस्ते स्तमिते वा ग्रस्तउदिते सति सर्वा विरविचन्द्र समगतिनासर्वतुल्य
गतिना अन्येनापरेण द्वितीयेन राहुणा सर्वकालं विग्रस्त आच्छादितो दृश्यतां विलोक्यतां एतदुक्तं भवति॥ य
दा ग्रस्तश्चंद्रमा उदेति॥ ग्रस्तो वास्तमेति तदा पूर्वापरक्षितिज सक्तस्य दारकस्यापि पूर्वापरक्षितिजासक्त
र्भवति। षड्राश्यंतरितादुपलभ्यते। द्वावपि क्षितिजादुपरिस्थितौ दृश्यौ भवतः॥ एकैककालस्य संभवादेकेनापि ४२
अनियतचारेण चंद्रः छाद्यते॥ अपरेणानियतचारेण षड्राश्यंतरितेन षड्राश्यंतरितः सूर्य इति॥ एवमं
तराणि निराकृत्य सिद्धांतमाह॥ भूछायां स्वग्रहणे भास्करमर्कग्रहे प्रविशतींदुग्रहणमतः पश्चान्नेंदो

र्भानोश्च पूर्वार्धात्॥ यादृशा दृष्टमर्कचंद्रयोर्ग्रहणं तादृशो ग्राग्रहणं पश्चात्स र्वस्येति॥ किमेतन्नराहोरेकं वक्ता
दयाह॥ भूछायामिति। इंदुः चंद्रः स्वग्रहणआत्मीयापरागे भूछायां प्रविशति। अर्कग्रहणे सर्वोपरागे भास्कर
मर्कं प्रविशति। यतो ऽकृतिसप्तमराश्यां भूछायाभ्रमति। चंद्रस्य पूर्णमास्यंते तत्रैव भवति॥ स चंद्रो शीघ्रगतित्वात्पू
र्वाभिमुखो भूछायां प्रविशति॥ तत्र च प्रविष्टस्य खंडं नातादृश्यते। अतस्तस्य पूर्वार्धात् ग्रहणं भवति॥ सूर्यग्रहणे चं
द्रार्कावेकराशिगतौ भवतः तत्र चंद्रमाः शीघ्रगतित्वात्पश्चादागच्छत्यमावास्यांते ऽर्कतलं प्रविशति॥ अतोति शीघ्रतस्
एवाधः स्थोर्कमाच्छादयति॥ अतः पश्चात्सूर्यमंडलमुपपश्यते॥ अतोऽकस्मात्तदंतरादश्चंद्रस्य पश्चात् ग्रहणंभ
वति॥ भानोरादित्यस्य पूर्वार्धात्ग्रहणं भवति॥ ॥अथ राह्वोर्वा भूछायाभवति यतेन तत्प्रतिपादयन्नाह॥ वृक्षः
स्य स्वछायायथैकपार्श्वे भवति। दीर्घा च निशि निशि तनदृक् गतावरणं च यद्दिनस्य॥ ९॥ यथा वृक्षस्य तरोः स्वछा
याआत्मीयाभादिनेशस्यादित्यस्यावरणवशाद् छादनवशात् तदंतरेकस्मिन पार्श्वे भवति दीर्घा च॥ यामिनीत्यादि रूपस्ता
यादृशी भवति॥ तद्वतेनैव प्रकारेण निशा रात्रि रात्रिर्दिने वास्यावरणवशात् सूर्यतः सर्वमाच्छादयति॥ अतो दृतोरेकपार्श्वे
भवति॥ दीर्घा च॥ यद्येवंतत्प्रतिमासं किमिति चंद्रस्य ग्रहणं न भवति॥ इत्येतत्प्रतिपादयन्नाह॥ सूर्यात्सप्तमराश्यां
यदि चोदक्दक्षिणेन नाभिगतः॥ चंद्रः सूर्याभिमुखः छायां मार्गांति दाविशति॥ १०॥ यदि चंद्रः शशी सूर्याभिमु
खः सप्तमराशिस्थितो भूछायाममृगुजरेण दक्षिणेन वाप्यर्थमायाति। स्वल्पेन विक्षेपेण विशिष्टोभवतीत्यर्थ
:॥ तदा पूर्वाभिमुखो गच्छन् प्राच्यां दिशा मनुसरन् इंदुः भूछायां प्रविशति नान्यथेति। यतो भूछाया मृगलांछन
तीभवति भग्रासस्यासा॥ चंद्रकक्षाया मूर्ध्वं न याति॥ अत्र खः चंद्रमा अत्यल्पविक्षिप्तो यदा भवति तदा सर्वग्रासं दृश
यते। विक्षेपसतित दनुसारेण चतुर्भागग्रासप्रमाणमर्धग्रासप्रमाणं पादोनग्रासप्रमाणं ग्रासाभावो वा स्वबुध्या
ऊह्यमिति॥ तथा च ब्रह्मसिद्धांते॥ भूछायां शशिकक्षायां रवेर्भार्धांतरस्थितः॥ यदा विक्षेपाल्पविक्षिप्तः चंद्रः स्यात्तत्
ग्रहस्तदा॥ अथ चंद्रग्रहणं सर्वत्रैकरूपं दृश्यते॥ अर्कग्रहणं प्रतिदिनमन्यादृशमिति॥ एतदेतत्प्रतिपादयन्नाह॥
चंद्रोऽधस्थः स्थगयति रविं मंबुदवत्समागतः पश्चात्॥ प्रतिदेशमतश्चित्रं दृष्टिवशाद्भास्करग्रहणं॥ आदित्य

स्याः धस्तः चंद्रः स पश्चात्पश्चिमभागात्समागतो बुद्बुदवन्मेघखंडश्चंद्रबिंबमाच्छादयति॥ आच्छादयति॥ अतोः
स्थाच्छादितः प्रतिदेशं। देशं देशं प्रति॥ भास्करग्रहणं सूर्योपरागः दृक्छिवशाद्दर्शनदेशोच्छ्रितत्वेन नानाप्रकारं दृश्यते अव
लोक्यते॥ क्वचित्सर्वग्रहणं क्वचित्खंडग्रहणं क्वचिद्ग्रहणाभावः॥ यथा मेघखंडाच्छादितमर्कं समाधोवर्तिनां स
र्वमेवादृश्यं॥ पार्श्ववर्तिनां केषांचिद्दृश्यते॥ केषांचित्तुर्भागदृश्यमन्येषां सर्वं दृश्यमिति॥ ॥तथाच सूर्यसिद्धांते॥
इंदुनाच्छादितं सूर्यमधोविक्षिप्तगामिना॥ न पश्यति यदा लोकः कृतदास्यात भास्करग्रहः॥ तमोमयस्यतमसोरवि
रश्मिप्रकाशिनः॥ भूछायां चंद्रबिंबं च स्थाने दृपरिकल्पितइति॥ ॥तथाच ब्रह्मसिद्धांते॥ भूछायं दुश्चंद्रः सूर्यंछाद
यति मानयोगार्धात्॥ विक्षेपाय घनः शुक्लतरं च दृश्यते॥ अथार्धछन्नस्य चंद्रमसः कुंठविषाणता भवत्यर्ध
छन्नस्यार्कस्य तीक्ष्णविषाणता भवति॥ तत्किंकृतात्सा दृक्स्थितं तत्प्रतिपादयितुमाह॥ ॥आवरणं महदिंदोः कुंठवि
षाणतार्धसंछन्नः॥ स्वल्पं रवेर्यतोतस्तीक्ष्णविषाणो रविर्भवति॥ ॥ इंदोश्चंद्रमस्य महान् अतिबहुल कृष्णादावर
णमाच्छादनकः॥ ततः तस्मात्द्धेतोरर्धसंछन्नोर्धग्रस्तः कुंठविषाणो भग्नशृंगो भवति॥ रवेरादित्यस्य स्वल्पमाव
रणं॥ यतो यस्मात्तोस्मादर्धछन्नस्तीक्ष्णविषाणस्तीक्ष्णशृंगो भवति॥ एतच्च भूछायाचंद्रयोरेव संभवति॥
परिलेखकरणेनात्रोपपत्तिरिति॥ तथाचाचार्यैरपि पंचसिद्धांतिकायां॥ खे भूछायामिंदुः स्पृशत्यतः स्पृश्यते न पश्चा
र्धे॥ भानुग्रहेर्कमिंदुः प्राग्ग्रहणं रवेर्नेतः॥ ॥तथाच ब्रह्मसिद्धांते॥ महदिंदोरावरणं कुंठविषाणो यतोर्धसंछन्नः॥
अर्धछन्नो भानुस्तीक्ष्णविषाणस्ततोस्यामिति॥ ॥राहुकृतं कर्मचंद्रयोर्न ग्रहणमित्येतत्प्रतिपादयितुमाह॥ एवमुप
रागकारणमुक्तमिदं दिव्यदृष्टिभिराचार्यैः॥ राहुकारणमित्युक्तः शास्त्रसद्भावः॥ एवमनेन प्रकारेण इदमुपरागकारणं ग्र
हणनिमित्तं दिव्यदृग्भिराचार्यैरुक्तं॥ दिव्यज्ञानसंयुक्ता दृष्टिर्येषां ते दिव्यदृशः॥ तैर्दिव्यदृग्भिरुक्तं कथितं॥ अस्मिन्नुप
रागे राहुकारणमितोनिमित्तं॥ इति शास्त्रसद्भावः॥ परमार्थं इतः कथितः॥ इति ऊँनःआल्हः शास्त्रनिश्चयार्थं॥ तथा
च ब्रह्मसिद्धांते॥ यदि राहुः प्राक्भागादिंदुच्छादयति किं तथा नार्कं॥ क्लिष्टार्थम दृष्टिदार्यं तोरनियग्रहणं॥ ग्रासान्यतन
नता राहुकृतं ग्रहणमर्केंदोरिति॥ ननु यद्येवमर्केंदोर्न राहुकृतं ग्रहणं॥ तत श्रुतिसंहितालोकैः सद्बिरुध्यते॥ यता

लोके राहुकृतं ग्रहणं श्रुत्यागोपालांगनाभिः प्रसिद्धं॥ स्मृतिपूर्वकमत्र सिद्धं॥ निशास्नानं राहोरन्यत्र दर्शनात्॥ त
थाच॥ राहुदर्शनसंक्रांतिविवाहात्ययवृद्धिषु स्नानदानादिकं कुर्यान्निशिकाम्यव्रतेषु चेति॥ तथाच श्रुतिः॥ स्वर्भा
नुरासुरिः सूर्यं तमसाविध्यादिति संहितासु॥ तथाच गर्गः॥ यन्नक्षत्रगतो राहुर्ग्रसते शशिभास्करौ॥ तज्जातानां भवे
त्पीडा ये नराः शांतिवर्जिताः॥ तथाच ब्रह्मसिद्धांते॥ राहुकृतं ग्रहणं द्रष्टुमागोपालांगनादिप्रसिद्धमिदं॥ बहुफ
लमिदमपि सिद्धं जपहोमस्नानफलमत्र॥ १॥ स्मृतिपूर्वं स्नानं रात्रौ राहोरन्यत्र दर्शनाद्रात्रौ॥ राहुग्रस्ते सूर्ये सर्वं
गंगासमं तोयं॥ स्वर्भानुरासुरिरिनं तमसाविध्याध वेद वाक्यमिति॥ एवं सत्यलौकिकश्रुतिस्मृतिसंहितानां य
थैक्यं भवति॥ तत्प्रतिपादनाय राहोरेव ग्राहकत्वमाह॥ योसावसुरो राहुस्तस्य च वरो ब्रह्मणायमादत्तः॥ आ
प्यायनमुपरागे दत्तहुतांशेन ते भवति॥ तस्मिन्काले सान्निध्यमस्यतो नोपचर्यते राहुः॥ यास्योत्तरशराग्रा ति
र्गणितेप्युपचर्यते येन॥ योसावसुर इति॥ योसावसुरः सैंहिकेयाख्यो राहुस्तस्य राहोर्ब्रह्मणा पितामहेन वरो
यमादत्तः॥ यथोपरागे ग्रहणे अर्कचंद्रयोर्दत्तहुतांशेन ग्रहणकाले यज्ञदानं दीयते॥ वन्हौ हूयते तत्तयोः
सार्धं तेन भागरतेन दत्तहुतांशेन तवाप्यायनं तर्पणं भविता भविष्यतीति॥ यस्मिन्काले ग्रहणसमये स्य राहो
: सान्निध्यं संनिहितत्वं कमलजवरदानाद्भवति॥ तेन कारणेन लोके राहुरित्युपचर्यते॥ तेन भूछायां चंद्रगोले हुता
नेतस्यनिवासार्थं परिकल्पितेन त्रिकलासएयाभास्कर इति सर्वत्र प्रसिद्धिः॥ गणिते तु पुनः शशिगतिश्चंद्रस्य ग
तिर्याम्योत्तरा दक्षिण सौम्याविक्षेप चन्द्रपातसंपर्कविक्षेपउपपद्यते॥ पातवशात्॥ यत श्चंद्रपातं एव लोके राहुरि
त्यप्रसिद्धः॥ भौमादीनां ताराग्रहाणामपि पाता विद्यंते॥ तेषामपि तद्वशाद्विक्षेपो भवति॥ तेन याम्योत्तरगति
र्लक्ष्यते॥ किमयं ग्रहः॥ संक्रांत्यग्रादुत्तरेण विक्षिप्तः किंवा दक्षिणेनेति॥ एवं चंद्रस्य याम्या सौम्या दक्षिणोत्तरा
गतिः पातवशात् सिध्यति॥ सोपि लोके राहुरर्थेनापि सूच्यते यच्छाद्यते॥ अपिशब्दो निश्चयार्थे॥ एतदुक्तं
भवति॥ चंद्रविक्षेपसाधनार्थं चंद्रपातः परिकल्पितः॥ स एव लोके राहुरित्युच्यते॥ तथाच ब्रह्मसिद्धांते॥
श्रुतिस्मृतिसंहितानां यथैक्यं भवति तद्वितपरः॥ राहुस्तच्छादयति॥ प्रविशति यन शुक्लं च दृश्यते॥ भूछाया

तमसां दुर्वरप्रदानात्मकत्वस्य ॥ चंद्रं भूमयोर्धःस्थायद्गिनमय भास्करस्थमासांते ॥ छादयति शशिनं तां परावृ
च्छादयति तत्सवितुः ॥ भूच्छायांत्वासमसमः शशिकक्षायांस्थितः शशिग्रहणं ॥ राहुश्छादयतीदं सूर्यग्रहणेर्कबिंदु
समः ॥ यच्च दधिकं तमामयराहुत्वाज्ञस्य मर्याद इष्टंतत ॥ नश्यति भ क्षांचंद्रवर्षास समस्मात् भवतिराहुः भूच्छाद
४२ द्गतोग्रहणे छादयतिनार्कबिंदुवो ॥ तच्छलद्वास समोराहुश्छादयति नाविस्मर्यांवाति ॥ गर्गादिभिरुत्पातैर्ग्रह
णज्ञानानिमित्तान्युक्तानि ॥ तैर्ग्रहणज्ञानं न स्फुटं भवतीत्येतत्प्रतिपादयितुमाह ॥ न कथंचिदपि निमित्तैर्ग्रहणं
विज्ञायते निमित्तानि ॥ अस्मिन्नपिकाले भवंत्यथोत्पातरूपाणि ॥ निमित्तैश्चिन्हैः उत्पातरूपैर्ग्रहणपरिज्ञानं न कथं
चिदपिपरिज्ञायते ॥ यतो निमित्तान्यस्मिन्नपिकाले परसमये संभवति ॥ तथाच चोत्पातरूपाणि उत्पातभूतानि
गण्यंते ॥ एतदुक्तं भवति ॥ गर्गादिभिरुत्पातवर्गेन यत्ग्रहणज्ञानमुक्तं ॥ तं न शोभनं ॥ यतो निमित्तानि ग्रहण
काल एव न भवति ॥ अस्मिन्नेव काले भवंति ॥ तच्चतान्युत्पातरूपाणि गण्यंते ॥ तत्र च ग्रहणकारणानीति ॥ तथा
च पराशरः ॥ तद्यथा ॥ ग्रहणनिमित्तानि ॥ चंद्रमसः प्रावृतप्रसादनं ज्योत्स्नाल्पत्वं दैन्यं पांडुत्वं सततपरिवेषणं
विरोहितः ज्योत्स्नाप्रभाभंगः ॥ क्षीणतारका मता ॥ दक्षिणशृंगतमोमयी उत्तरस्याप्यर्धतुंगता चैवाभ्यनस्थ ॥ आ
दित्यस्यापि वेपनं परिवेषस्तदागंद रश्मिता ॥ रक्तकुल्माषतो भयोरपि चोल्कापात संध्यादिग्दाह भूमिकंपाश
निःनिर्घातस्तनयित्नु पांशुवर्षविषमवात नीतोष्णानिकृतानि ॥ वज्रकनकरजतमणीनांप्रभाभंगः ॥ त्वले
लासंदर्शनमर्कमंडलोत्थितायाः ॥ दृश्यते याः सीमानुप्रवेशाः गुप्तास्तिवाख्यगणारूतानिविकृतिर्नदीरचप
रिसर्पणं ॥ रश्मिजालव्याकुलत्वं तमोभिसंवीतता क्षीरिणां क्षीरक्षयः ॥ अकस्मात मत्स्यम्लानिः पंचतारग्रहे
दयोरोहिणीपीडनमिति ॥ चंद्रग्रहणेर्कविकृति रर्कग्रहणे चंद्रसाम्बलत्वनमध्यतनुनिमित्तहेतुकानि सर्वार्थकं
चित्ग्रहणायानुपूर्व्यायतानिमित्तोत्पातस्ततोग्रहणं ॥ अतएव पापसरणं ततोमोक्षइति ॥ अथान्यदूषणमा ४४
ह ॥ पंचग्रहसंयोगान्नेकिल ग्रहणस्य संभवो भवति ॥ तैलंजलेऽष्टम्यां न विचिंत्यमिदं विपश्चिद्भिः ॥ कृतेयागम
संवने ॥ गास्त्रांतरेष्वेवमुक्तं ॥ यथा पंचानां ग्रहाणां संयोगात ग्रहणसंभवोन भवति ॥ एतदुक्तं भवति ॥

पौर्णमास्याममावास्यायां च पंचग्रहसंयोगो यदि भवति तदा ग्रहणाभाव इति ॥ तथा च रुद्रगर्गः ॥ ग्रहपंच
कसंयोगं दृष्ट्वा न ग्रहणं वदेत ॥ यदिनस्याद्बुधस्तत्र तं दृष्ट्वा ग्रहणं वदेत ॥ एतदसत ॥ अत्रापि दूषणपरिहारार्थ
माह ॥ तैलं च जलेऽष्टम्यामिति ॥ सोमग्रहणं सूर्यग्रहणं वा यदा भवति तदाऽष्टम्यां समीपे चातैलं ततो जलम
ध्ये तैलं विक्षिप्तं यस्यां दिशि न प्रसरति तस्यामेव दिशि ग्रहणं वक्तव्यं ॥ पुनरपि मोक्षार्थं जलमध्ये भूयस्तै
लं क्षिप्तं यस्यामेव दिशि न प्रसरति तस्यामेव मोक्षो वक्तव्यः ॥ तथा च वृद्धगर्गः ॥ अष्टम्यां परिवेषस्यात
तैले जलगते यदा ॥ प्रसारितं विज्ञानीयात यतः स्वैरं ततस्तमः ॥ एतदप्यसत ॥ यतोन्यस्मिन् भांडगते जले तै
लं क्षिप्तमन्यस्यां दिशि न प्रसरति अन्यत्र सर्वत्र प्रसरते ॥ तस्मात्सर्वमेतदसत ॥ तथा च वृद्धगर्गः ॥ दिग्दाह
दोल्कामही कंपतमोधूतरजांसि च ॥ स्वस्थं यस्यागमं राहोः पुनः पर्वण्युपाकृते ॥ तत्राऽष्टम्यां जले तैलं क्षिप्त्वा तां
विनिर्दिशेत ॥ पारवेषो यतः स्वैरः तत्र ज्ञेयो गमागमौ ॥ पंचग्रहसमायोगः ष्वासोम्यविवर्जितं ॥ ग्रहणं न वदेत
त्र सबुधेन ग्रहं वदेत ॥ एतत्सर्वमसत ॥ तस्माद्विपश्चिद्भिः पंडितैरिदं न विचिंत्यं नाशंका कार्या ॥ पंचग्रहसंयोगात
तैलं च जलेऽष्टम्यामिति ॥ ॥ अथ ग्रहणे ग्रासप्रमाणं दिग्ज्ञानं वेलाज्ञानं च ॥ अवनत्यर्कग्रासो दिग्ग्रहे याव
नयानवत्याच ॥ तिथ्यवसाना वेला करणे कथितानि तान्यनया ॥ १८ ॥ अवनतिरिति स्फुटविक्षेपस्य नाम
॥ तया विनत्या स्फुटविक्षेपेणार्कज्ञाते सूर्यग्रासो ज्ञेयः ॥ अल्पेविक्षेपे महाग्रहणं महतिविक्षेपेऽल्पमिति ॥ ए
वं चंद्रार्कमानयोगार्धं दिनतिमपास्य कोऽवरविमानार्धधिकसर्वग्रहणमेव संडग्रहणमशुद्धग्रहणाभावः
एवमवनत्यार्कग्रासो वेदितव्यः ॥ दिग्ग्रहयावलनवत्याच ॥ वलनयातत्काले यः नयानवत्या स्फुटविक्षेपेण च प
रिलेखकरणेन च ग्रहणादीनां दिग्ज्ञेया ॥ तिथ्यवसानात वेलातदोरमावास्यायोसावयमानः ॥ दूरिजसंस्का
रेण मध्यान्हमप्राप्य निवृत्तिर्मध्यादूर्ध्वं वा ॥ तत्र मध्यग्रहणं ॥ तस्मिन्नेव प्रतिग्रहणे कस्फुटस्थित्यर्धं संशो
ध्य प्रग्रहणकालो भवति ॥ तत्रैव मोक्षस्फुटस्थित्यर्धं संयोज्य मोक्षकालो भवति ॥ एवं तिथ्यवसानमानादिका
॥ अत्रार्कग्रहणमुपलक्षणार्थं ॥ चंद्रग्रहणेपि स्पष्टकरणैः स्वमध्यान्हैनग्रासाद्दिग्वेलावान्या ॥ एतान्युप

Dr. BHAU DAJI MEMORIAL

बृ॰सं॰ रणानि करणे पंचसिद्धांतिकायां मया कथितान्युक्तानीति। तथा च पंचसिद्धांतिकायां॥ दिनमध्यमसंज्ञास याने
त्यानादिकाद्यनीतावा॥ ताभ्यः षड्गुणिताभ्योऽपांशेभ्यो विंशत्यंशहृतेर्नाम॥ इत्यादि प्रभृति चनाडीयायाः स्युः प्राक्
लग्नमानयेत्ताभिः॥ तस्मात्तु न च समेतापरस्कमांशांलितिश्चित्य॥ लग्नाच्चिरविनाड्यादिगुणांस्वरसांशांस्सं
४५ युताग्रयनात॥ ज्ञात्वात्रिकृत्वा सोविक्षेपे क्षेपतया वाः॥ उत्तरमशात गुणंयास्यमाक्षेन दक्षिणोविज्ञात
॥ उत्तरमक्षाक्षेधिकमंतरमेवं विजानीयात॥ तत्ताद्यशनिभुक्तिर्ध्रुवाभिः शनैः स्फुटावनतिः॥ मध्यममा
नांतराद्धानाः शशिनस्तदुन्नतस्थितात॥ ममलितरादुर्विक्ष्यायस्त्रा मुक्तानाव हृताश्च॥ अनवत्यायुतविक्षेप
ताश्चादिकृसामवलोम्य॥ मध्यममानाभ्यस्ता स्फुटभुक्तिमध्यभुक्तिभक्ताच॥ भयांतिकृदापरिमाणंतत्कालीनमंव
ल्लांशोः॥ अनवतिवर्गतस्याद्ग्रंवदपरिमाणयो॥ हृत्वग्रांत॥ तत्फलानुडिगुणातिथिभुक्तिनद्दाद्रांकाले॥
रविशशिमानयुतिदलादवनतिहीनादुतंतयालिसाः॥ तान्यंगुलानिविद्यादुन्नताछन्नानि चंद्रमसा॥ अर्धेनादित्यः
रविंतत्रावनतिग्रथादिशंमध्यात॥ अनवत्यंताश्चंद्रविलिखितग्रासार्थमधेन॥ इति॥ एवमेव चंद्रस्यापि क
रणेः सदाद्यार्यं॥ तथा च तिथ्यंते ग्रहमध्यं प्राकुपरस्थितिदलेन चाद्यंतौ॥ रक्तः कपिलो वर्णो बुध्याध्यः स्पार्श
नितरं॥ सर्वग्रासेन्यवर्णो वंशोपंचदर्शनानाथे॥ इत्यादि शेषधूम्रवर्णग्रहणे सविकल्पाभामिति॥ ॥ए
वं पंचग्रहसंयोगात्सिद्धांतदृढीकृतं सर्वमसाहितं॥ इदानीं कृत्वादौ षण्मासोत्तरवृद्ध्या सप्त पर्वाणि भवंतीति भ
वंति॥ तेषां देवतानामान्याह॥ षण्मासोत्तरवृद्ध्या पर्वेशाः सप्तदेवताः क्रमशः॥ ब्रह्मशशींद्रकुबेरा वरुणाग्नि
यमाश्च विज्ञेयाः॥ कल्यादारभ्य षण्मासोत्तरवृद्ध्या षड्भिर्मासैर्गतैः पर्व भवति। तानि च सप्त पर्वाणि। तेषां
पर्वणां क्रमशः क्रमेण सप्त देवताः ब्रह्माद्याः॥ तद्यथा। ब्रह्मा कमलजः। शशी चंद्रः। इंद्रः शक्रः। कुबेरो वैश्रवणः
वरुणो जलसांपतिः। अग्निर्हुताशनः॥ यमः पितृपतिः। एते सप्त यथा संख्यं सप्तानां पर्वणां अधिपतयो वेदित ४५
व्याः॥ यथा संख्यं एषामानयनं गणितसिद्धं॥ तथा च खंडखाद्यके॥ अस मध्ये वचनं॥ द्विनवग्रहात॥ खखाष्टशत
षण्णवरविभिर्विभाजितादाप्तं॥ शमर्कखंडसाद्विशिष्ट पतग्रहभजनाद्विभिस्तत॥ कष्टःकमलजप्रथमः पूर्व
गणः सप्तभाजितशेषः॥ गतगम्याति ह्यनेन गणान वेदस सर्वपर्वः स्यात॥ अत्र यत्कल्पसदनीतं ततः परमे

वर्तमानं भवति। अथ तेषां फलान्याह॥ ब्राह्मे द्विजपशुवृद्धिः क्षेमारोग्याणि सस्यसंपच्च॥ तद्वत्सौम्ये तस्मि
न्पीडा विदुषो मनावृष्टिश्च॥२१॥ ऐंद्रे भूपविरोधः शारदसस्यक्षयो न च क्षेमं॥ कौबेरे अर्थपतीनामर्थविनाः
शः सुभिक्षं च॥२२॥ वारुणमवनीशानामशिवं क्षेमवृद्धि सस्यकरं॥ आग्नेयं मित्राख्यं सस्यारोग्याभयां
बुकरं॥२३॥ याम्यं करोत्यवृष्टिं दुर्भिक्षं संक्षयं च सस्यानां॥ यदतः परं तदशुभं क्षुन्मरकावृष्टिदं पर्व॥२४
॥ ॥ ब्राह्मे द्विजपशुवृद्धिः क्षेमारोग्याणीति॥ ब्राह्मे पर्वणि द्विजानां ब्राह्मणानां पशूनां च तुष्पदानां वृद्धिर्वर्धनं
तथा क्षेमं लब्धपालनं आरोग्यं नीरोगत्वं एतानि भवंति॥ सस्यानां च संपच्च वृद्धिर्भवति॥ तद्वत्सौम्य इति॥ सौ
म्ये चांद्रे पर्वणि तद्वत् द्विजपशुवृद्धि क्षेमारोग्याणि भवंति॥ सस्यसंपच्च भवति। तस्मिन्सौम्ये तु पुनः विदुषां
पंडितानां पीडा॥ अनावृष्टिरवर्षणं च भवति। ऐंद्रे भूपविरोध इति॥ ऐंद्रे पर्वणि भूपानां राज्ञां परस्परं विरोधः
कलहः। तथा च शारदानां धान्यानां सस्यानां क्षयो विनाशो लोके क्षेमं न भवति। कौबेरे पर्वणि अर्थपतीनां ई
श्वराणां अर्थनाशो वित्तक्षयः सुभिक्षं च भवति॥ वारुणमवनीशानामशुभमिति॥ वारुणं नाम पर्व यत
दवनीशानां राज्ञां अशुभमश्रेयस्करं अन्येषां सर्वजनानां श्रेयस्करं क्षेमकरं॥ तथा सस्यानां वृद्धिकरं भव
ति॥ आग्नेयं मित्राख्यमिति। आग्नेयस्य पर्वणो वाख्यमित्यपरं नाम॥ तच्च सस्यारोग्यकरं सस्यानि
निष्पादयति॥ आरोग्यं च करोति॥ तथा जलकृतभयं भयरहितं॥ नातिबहुनात्यल्पं मध्यमं यथाकालोप
योग्यं करोति॥ याम्यमिति। याम्यं पर्व अविद्यमानवर्षणं दुर्भिक्षं क्षुद्भयं सस्यानां च संक्षयं विनाशं करोति॥ य
दतः परमपि॥ अतोऽस्मात्पर्वकालाद्यत्परमन्यत्पर्व तदशुभं मनिष्टं॥ एतदुक्तं भवति॥ षण्मासोत्तरवृ
द्ध्या पर्वेशा उक्ताः॥ तत्र कदाचिद्दुत्पातवशात्पंचभिर्मासैः सार्धैः पंचभिर्वा षड्भिः सप्तभिर्वा भवति॥ तद्
त्पादि न भवति तच्च क्षुन्मकरं राजभिदं॥ क्षुत् दुर्भिक्षं मरकं जनक्षयमवृष्टिमवर्षणं च ददाति॥ तथा च प
राशरे ग्रंथे॥ षण्मासात्कृष्णमा पंचदशमासांतराग्रहणानि। इंदुभानोः प्रबला भवंति। तानि चानियामभयेन प
ण्मास्यं चंद्रमसः॥ ततोल्पष्ट्वेलादित्यस्यापि पृक्तिमातुरा नायोः॥ सप्तदशात्र योदशपंचादशेतमासिका
नि॥

ऐंद्राण्यापि विसंधिग्रहणानि क्षुद्भयाधिमरकदुर्भिक्षोपद्रवाय वेदितव्यानि॥ एवमेतानि नानारूपत्वेन ग्रहणानि
॥ अतःपरं सप्तविधपर्वाणि कथयिष्यामः॥ ब्राह्मसौम्यकौबेरवारुणाग्नेययाम्यानि षण्मासांतरितानि सप्त भवंति
॥ तत्र ब्राह्मंपसस्यजनकं॥ तद्वत्सौम्यं॥ ऐंद्रं भूपालविरोधकृत्क्षेमकरं॥ कौबेरमीश्वराणां ऐश्वर्यविनाशकरं॥ क्षे
मसस्यकृच्च वारुणं॥ दृश्यमसस्य क्षेमारोग्यकरमाग्नेयं॥ अग्निनाशक्षुत् अनावृष्टिर्याम्यं चेति॥ तथाच
गर्गः॥ चंद्रे पंचममासे तु मासे तेऽकादशे तथा॥ सप्ताष्टनवमासे यस्य ग्रहणं क्षुद्भयायतत॥ ॥ अथ वेलाहीना
तिवेलपर्वफलमाह॥ वेलाहीनपर्वणि गर्भविपत्तिश्च शस्त्रकोपश्च॥ अतिवेले कुसुमफलक्षयो भयं सस्यना
शश्च॥ गणितागतग्रहणकालात् पूर्वं यदि दृश्यग्रहणं दृश्यते तदा तत् पर्व वेलाहीनं॥ अथ गणितागतग्रहण
कालात् पश्चात् दृश्यग्रहणं भवति। तदा तत् पर्वातिवेलं॥ वेलाहीने पर्वणि गर्भाणां विपत्तिर्नाशो भवति॥ गर्भो गर्भ
लक्षणोक्त अत्र ज्ञेयाः॥ तत्र च शस्त्रकोपो युद्धं भवति॥ अतिवेलपर्वणि कुसुमानां फलानां क्षयो विनाशो भव
ति॥ लोके भयं सस्यानां नाशश्च भवति॥ तथाच गर्गः॥ वेलाहीने शस्त्रभयं गर्भाविघ्नाश्च पंतयाः॥ फलपुष्पौष
धानां वातिवेलफलमादिशेत्॥ हृकसाम पर्वणि नृपा निर्वैरा विगतज्वराः॥ प्रजाश्च मुदिनः सर्वा भयरोगविव
र्जिताः॥ तथाच कश्यपः॥ अनागतमतीतं वा ग्रहणं पर्वदृश्यते॥ गर्भस्रावमनावृष्टिं फलपुष्पं विनश्यति॥
एतन्मया पूर्वशास्त्रानुसारेणोक्तं॥ नस्वमतेनेति एतत्प्रतिपादयितुमाह॥ हीनातिरिक्तकाले फलमतं पूर्वशा
स्त्रदृष्टत्वात्॥ स्फुटगणितविदां कालः कथंचिदपि नान्यथा भवति॥ हीनातिरिक्तकाले पर्वणि यन्मया फलमुक्तं
थितं तत्पूर्वशास्त्रदृष्टत्वात्॥ पूर्वशास्त्रेषु भगवत गर्गादिप्रणीतेषु यतः दृष्टं यतः स्फुटगणितविदः कालज्ञात
स्फुटगणितं वेत्ति जानाति इति स्फुटगणित तावत् तस्य स्फुटगणितज्ञस्य कालः ग्रहणादीनां समयः कथंचिद
न्यथा न भवति॥ यतो देशांतरकर्मणा विनातिथि चलनं न भवति॥ तच्च गणितज्ञ एव जानाति॥ इत्थं च गणि ४६
तग्रहण पश्चाद्दृग्ग्रहणं भवेत्॥ सप्रागदर्शनं यथा पश्चात् रेखायाः सानुमिकतः॥ इत्थं [illegible] ता यावत् [illegible] कं
स्याद्दक्षिणोत्तरा॥ तदंतर्घटिका भुक्ति वधात षष्ट्याहृतात्फलं॥ मध्येन धर्णं पश्चात् प्राकृत घटिकाद्युणो

यदैकस्मिन्मासउत॰

भवेत॥ एवं संस्कृता ग्रहाद्रकुमासा भवतीत्यर्थः॥ अधुनैकमासे अर्केंदुग्रहणयोः फलमाह॥ यद्येकस्मिन्मासे
ग्रहणं रविसोमयोः - - - - - - सूर्यचंद्रमसोर्यदि ग्रहणमुपरागो भवति॥ तदा क्षितिपाः स्वबलक्षोभैः
आत्मसैन्यानां क्षोभनैः क्षयं विनाशं यांति प्राप्नुवंति॥ अतिशस्त्रकोपो घोराः संग्रामा भवंति॥ तथाच क
श्यपः॥ चंद्रार्कयोरेकमासे ग्रहणं न प्रशस्यते॥ परस्परं वधं कुर्युः स्वबलक्षुभिता नृपाः॥ इतिनन्वत्रोक्तं॥ यद्येकस्मि
न्मासे ग्रहणं रविसोमयोरिति॥ तदत्र वक्ष्यमाणेन सोमग्रहो निवृत्ते पक्षांते यदि भवेत ग्रहोऽर्कस्य॥ तत्रान्यः मंत्रा
नां दंपत्यो वैरमन्योन्यमित्यनेन न सह पुनरुक्तदोषः स्यात्॥ तस्मात् ज्योतिःशास्त्रे मासः शुक्लादिश्च॥ इतः प्रथम
पक्षांते सोमग्रहो द्वितीयपक्षांते मावास्यामर्कग्रहो भाव्ये कएव मासः संजायते तस्मादयं महान्दोषः॥ अन्ये ए
वं व्याचक्षते॥ तथाधिमासक एवं संभवति॥ यदि समाने मासद्वये सूर्येंदोर्ग्रहणं भवति॥ तदेकमासोक्तफलम
न्यत्र पक्षांतरितग्रहणफलमर्केंदोर्वक्ष्यमेतत॥ सप्तमोत्पातिकं वचनं भवति॥ यस्मादाचार्येणोत्पाताचारस
र्वोपरकस्यापर्वणि फलमुक्तं॥ सतमस्कपर्वविनालक्षणामार्कमंडलं कुरुते॥ स निहंति सप्तभूपान् जनांश्च शस्त्रा
ग्निदुर्भिक्षैरिति॥ तथाच व्यास आह॥ ततो व्योमहाराजमारुतोऽर्कमहर्षणः॥ राहुणाग्रसतादित्यं युगप
त्सोममेव च॥ यद्येकस्मिन्मासे ग्रहणं रविसोमयोरित्यस्यामार्यायामौत्पातिकं पर्वविना रविसोमयोरेकस्मि
न्मासे ग्रहणफलमुक्तं तल्लभ्यत इत्युच्यते॥ तथाच भगवान्व्यासः॥ चंद्रसूर्यावुभौ ग्रस्तावेकमासे त्रयोदशे
॥ अपर्वणि ग्रहावेतौ प्रजाः संक्षयमुपेष्यत इति॥ तथाच भगवान्पराशरः॥ अपर्वणि शशांकार्कौ लिखानाममा
हाग्रहः॥ आवृणोति तमः श्यामः सर्वलोकविपत्तये॥ तथाच वृद्धगर्गः॥ मासित्रयोदशे सूर्याः सोमार्केग्रह
संगतो॥ क्षत्राण्यनेकानि तदा भज्यंते भूमिपक्षये॥ सपुत्रदारा गच्छंति संग्रामे लोमहर्षणे॥ अनेन वानिता या
सर्वेधर्म्यांत करोधिकं॥ कालः शोकावहः पुंसां देशे नैकविनाशनः॥ स च कृपरचक्रेश्च विनश्यति वसुंधरा॥
सोमग्रहे निवृत्ते पक्षांते यदि भवेत ग्रहोऽर्कस्य॥ ॥ इत्यत्र पक्षांते मासांते पर्वनियतमाह॥ तस्मात्पुनरुक्तदो
षत्राव गम्यत इति॥ अन्ये एवं व्याचक्षते॥ यथा कथमेकस्मिन्मासे रविसोमयोर्ग्रहणं स्यात्॥ यावच्चेत्सिता

धान्यासाद्यतिष्ठितिः॥ अत्रोच्यते॥ यदि पंचदश्यां चंद्रग्रहणं भवति ततः पुरस्तादमावास्यायामर्कग्रहणं भवति
॥ तत्र चलंबनमग्रणगतं भवति तदैकमासो भवति॥ अथ लंबनलं गतं भवति॥ ततः पुरस्तात्पौर्णमास्यां चं
द्रग्रहणं भवति तत्राप्येको मासो युज्यते॥ नान्यत्रातएव मत्राधिमासो यदुक्तं तदेव शोभनमृषिवचनादेकमा
सेत्रयोदश्याद्यति॥ ॥अस्तमयास्तादिता यौ ग्रस्तावस्तमितयोश्चार्कचंद्रयोः फलमाह॥ ग्रस्ताबुदितावस्तमितौ शारद
धान्यावनीश्वरक्षयदौ॥ सर्वग्रस्तौ दुर्भिक्षकरौ मरककरौ पापसंदृष्टौ॥ ग्रस्ताबुदितावस्तमितावित्यत्र शशिसूर्य
योः प्रत्येकस्य फलेन संबंधः॥ चंद्रो यदा ग्रस्तोदितो ग्रस्तास्तमितो वा भवति तदा शारदधान्यस्य क्षयदो विनाश
कर्ता भवति॥ एवमर्को ग्रस्तोदितो ग्रस्तास्तमितश्च अवनीश्वरस्य राज्ञः क्षयदो भवति॥ ननु सर्वदा यथासंख्येन कुमा
फलेन संबध्यते॥ ग्रस्तोदितौ सर्वदा शारदधान्यक्षयदौ॥ ग्रस्ताबुदितावनीश्वरक्षयदौ॥ इति अत्रोच्यते नैतद्युक्तं॥
तस्माद्वृद्धगर्गः॥ उद्गच्छति ग्रहीतश्चेदर्कसंवा यदि गच्छति॥ शारदं तु तदा सस्यं जातं जातं विपद्यते॥ ग्रीष्मेण त
त्र जीवंति नरा मूलफलेन वा॥ भयदुर्भिक्षरोगैश्च तदा संपीड्यते जगत्॥ तथा च ऋषिपुत्रकः॥ यावंतोंशा
न ग्रसितौ दृष्टव्यौ अस्तमितौ वा॥ तावंतोंशान पृथिव्या हतमेव विनाशयेत्॥ उदयेस्तमये वापि सूर्यस्य
ग्रहणं भवेत्॥ तदा त्वभयं विंद्यात् परचक्रस्य चागमं॥ चिरं गृह्णाति सोमार्कौ सर्वं वा ग्रसते तदा॥ हन्यात्सफ
लानं जनपदान् विज्ञांश्चैव नराधिपान्॥ ग्रीष्मेण तत्र जीवंति नरा मूलफलेन वा॥ भयदुर्भिक्षरोगैश्च त
दा तत्पीड्यते जगदिति॥ सर्वग्रस्तावित्ति॥ सूर्येंदु सर्वग्रस्तौ निःशेषावच्छादितौ तावपि पापसंदृष्टौ॥ पा
पग्रहैर्यौ अंगारकसौर्यान्यतमेन दृष्टौ भवतः॥ तदा दुर्भिक्षमरककरौ॥ दुर्भिक्षं मरकं च दद्दत इति॥ अर्धोदय
नृपभयं सस्यक्षयं यावत् ग्रस्तावर्धं द्वावर्कयोः समस्ताकाशभागेषु॥ फलमाह॥ अर्धोदितोपरक्तो नैकृतिकान्
हंति सर्वयज्ञांश्च॥ अग्न्युपजीविगुणाधिकविप्राश्रमिणो युगाभ्युदितः॥ कर्षकपाषंडवणिक्क्षत्रियबलनाय ४७
कान्द्वितीयांशे॥ कारुकशूद्रम्लेच्छान् सतृतीयेंशे समंत्रिजनान॥ मध्यान्हे नरपतिहा मध्यदेशं च शोभन
श्च धान्यार्घः॥ तृणभुगमात्यांतःपुरवैश्यघ्नः पंचमेंशे॥ स्त्रीशूद्रान् षष्ठेंशे दस्युप्रत्यंतहा समयकाले॥

अस्मिन्नंशे मोक्षस्तत्सौकार्यं शिवं भवति॥ अर्धोदितोपरक्त इति॥ चंद्रोर्को वा अर्धोदितोयमुपरक्तो भवति
ग्रस्त इत्यर्थः॥ तदा नैकृतिकान् निषादान् सर्वयज्ञानि श्रेयस्यज्ञांश्च हंति नाशयति॥ आह दिनप्रमाणस्य सप्त
भिर्भागमपहृत्य यल्लभ्यते तेन तत्वांशोप्रमाणं॥ अनेनाकाशमपि सप्तकृतं भवति॥ स्याहिकं मोक्षकं चान्यंका
लं समसागणं हरेत॥ दिनमानेन यल्लब्धं सांशंमानं युगस्य तत एवं कृत्वा विचार्येत॥ कस्मिन्नाकाशभागे ग्र
हणं मोक्षो वा॥ तत्र यश्चाभ्युदित उदक्तत एव चंद्रः सूर्यो वाभ्युदिते प्रथम आकाशभागे अभ्युदितो विषमे वा प्रथमइत्य
र्थः॥ ग्रस्तो दृश्यते॥ तदाग्न्युपजीविनः सुवर्णकारप्रभृतयो गुणाधिका गुणिनो वा विप्रा ब्राह्मणाः॥ आश्रमि
णो ये चतुर्थाश्रमिणो यतयः॥ एतान्सर्वान्निहंति॥ पाषंडकर्षकवणिगिति॥ कर्षकाः कृषिकाराः॥ पाषंडिनो वे
दबाह्या॥ वाणिज्यं क्रयविक्रयिणः॥ क्षत्रिया राजन्याः॥ बलनायकाः सेनापतयः॥ एतान्द्वितीये द्वितीये
विभागे निहंति॥ कारुकाः शिल्पिनः शूद्राः शूद्रजातयः॥ म्लेच्छा म्लेच्छजातयः॥ एतान्समंत्रिजनान् मंत्रि
जनैः सचिवैः सह तृतीये भागे तृतीय आकाशविभागे निहंति॥ मध्यान्ह इति॥ मध्यान्हे चतुर्थे खांशे नरपतिम
ध्यदेशाद्यान्॥ नरपति राज्ञां मध्यदेशं च निहंति॥ देशेयो राज्ञानमेव निहंति॥ धान्यः स्यार्घः शोभनो भव
ति॥ समर्घं धान्यं भवतीत्यर्थः॥ तृणभुजश्च तुष्पादाः॥ अमात्या मंत्रिणः॥ अंतःपुरं राज्ञ दारान वैश्यान
वैश्यजातीयान पंचमे खांशे आकाशभागे निहंति॥ स्त्रीशूद्रान इति॥ स्त्रियो योषितः॥ शूद्राः शूद्रजात
यः एतान षष्ठे भागे आकाशप्रदेशे निहंति॥ दस्यवश्चौराः प्रत्यंतगह्वरवासिनः एतान्यस्तमयकाले सप्त
म आकाशभागे निहंति॥ यस्मिन्नंशे मोक्ष इति॥ यस्मिन्नंशे प्रथम आकाशभागे मोक्षो भवति॥ तस्मि
न्नाकाशविभागकथितानां अग्न्युपजीविप्रभृतीनां शिवं श्रेयो भवति॥ अथ यस्मिन्नंशे ग्रस्तः
स्मिन्मोक्षो भवति॥ तदा यदुक्तं फलं तन्न भवति॥ शुभाशुभं समत्वात॥ तथा च काश्यपः॥ उदितास्तमितौ
ग्रस्तौ नृपसस्यभयंकरौ॥ सर्वग्रस्ताव केंद्रो दुर्भिक्षभयकारकौ॥ प्रथमांशे विप्रपीडा क्षत्रियाणां द्विती
यके॥ शूद्राः श्रेण्यः तृतीयांशे चतुर्थे मध्यदेशनाशनं॥ वैश्यानां पंचमेंशे षष्ठेंशे प्रमदा भयं॥

नु॰ सं॰ दस्युः सत्यंतकार्त्तिकाः पीड्यंते समस्तांशकैः। येषामंशे भवेन मोक्षः फलमेतेषां शुभं वदेत॥ तथा च वृद्धगर्गः।
येषां सोमो ग्रहणे ग्रस्तो विमर्दयत्र चाभवेत॥ तेषां पीडां विजानीयात् मोक्षे तु शुभमादिशेत्। तथा च पराशरः॥ स
मस्तानान्युदयादीन्यस्तमयांतानि॥ तत्र च यद्दर्शनं ततः तद्विनाशाय धर्षितं ग्रहणं गुणाधिकमपि तस्य क्षत्रि
५८ यबलाध्यक्षयोः सद्धाभिक्षाविणः शेषभावानामध्यमान्यत्सानुग्रहानां किंचिदन्यत्तस्य क्षत्रियस्त्रीणां व्या
ऽवबितस्यश्चरतस्करणामसामयदिति॥ ३१॥ ॥अथायनफलं दृक्फलं चाह॥ द्विजनृपतीनुदगयने विट्शू
द्रान् दक्षिणायने हंति॥ राहुरुदगादिदृष्टः प्रदक्षिणं हंति विप्रादीन॥ ३२॥ म्लेच्छान् विदिक्स्थितो यायिन
श्च हन्यात् हुताशसक्तांश्च॥ सलिलचरांश्च घाताख्यो याम्येनोदगाचामशुभः॥ ३३॥ पूर्वेण सलिलपूर्णां करो
ति वसुधां समागतोदेत्यः॥ पश्चात्कर्षकसेवकबीजविनाशाय निर्दिष्टः॥ ३४॥ ॥द्विजनृपतीनुदगयन इति
॥ मकरादिराशिषट्कमुत्तरमयनं॥ कर्कटादिराशिषट्कं दक्षिणमिति॥ उदगयने उत्तरायणे राहुस्तमो
दृष्टो द्विजान्ब्राह्मणान् नृपतीन् क्षत्रियांश्च हंति। तथा च विट्शूद्रान् दक्षिणायने हंति॥ घातयति॥ तथा च गर्गः
॥ उत्तरायणसंदृष्टो ब्रह्मक्षत्रविनाशनः॥ दक्षिणायनगो राहुर्वैश्यशूद्रप्रमर्दनः॥ राहुरुदगादिदृष्ट इति। उ
दगादिषु उत्तराद्यासु चतसृषु दिक्षु दृष्टः प्रदक्षिणेन विप्रादीन् निहंति॥ एतदुक्तं भवति॥ सूर्यस्य चंद्रस्य वा यधु
त्तरस्यां दिशि राहुः प्रग्रहं करोति। तदा ब्राह्मणान् निहंति॥ पूर्वस्यां दृष्टः क्षत्रियान् निहंति॥ दक्षिणस्यां वैश्या
न्॥ पश्चिमायां शूद्रानिति॥ ननु चात्र यदुक्तमुदगादिदृष्टो राहुः प्रदक्षिणं विप्रादीन् हंति। तदुत्तरदक्षिणाद्यभा
गान्तदानि दृष्टिरविशशिनोः प्रग्रहमोक्षौ न भवतः॥ तत्किमुक्तमेतत्॥ असत्यं गणितागमविरुद्धमित्यत्रो
च्यते। पूर्वशास्त्रेषु भगवत्पराशरगर्गादिविरचितेषु दृश्यते। तेभ्यो नातिकंपवाधिकल्पितं फलमेतत्॥
तथाचार्यः पर्वणि शशांकार्कावेति॥ तदेव पूर्वशास्त्रदृष्टत्वात् दाचार्येणाप्युक्तमिति। यत स्तस्य प्रतिषेधं॥ ५८
ज्योतिषमागमशास्त्रं विप्रतिपत्तौ न योग्यमस्माकं॥ स्वयमेव विकल्पयितुं॥ किंतु बहूनां मतं वक्ष्ये॥ तथा
च कश्यपः। सौम्यायामागतो विप्रान् पूर्वस्यां क्षत्रजातयः॥ वैश्यान् दक्षिणतो राहुर्हंति पश्चिमतापरान्॥

इति॥ तथा च पराशरः॥ उदक्प्राक्दक्षिणप्रत्यक्कु ब्राह्मणक्षत्रियविट्शूद्रोपघातनायानुपूर्व्यापि च॥ म्लेच्छान् विदि
क्स्थित इति॥ विदिक्स्थितो राहुरीशान्याग्नेयनैरृत्यवायव्यास्थित्यर्थः॥ म्लेच्छान् म्लेच्छजातान्॥ तथा यायिनः
प्रोयतान् हुताशसक्तान् अग्निं च तानग्निहोत्रं च हन्यात् घातयेत्॥ दक्षिणोत्तरयोः पुनरपि विशेषफलमाह
॥ सलिलचर इति॥ याम्येन दक्षिणेन दृष्टः सलिलचरान् जलचरान्प्राणिनः हंति॥ तथा इति नागाश्च हंति घात
यति तच्छीलो घाती॥ उदगुत्तरेण दृष्टो गवामशुभो निहंति॥ अथ पश्चिमपूर्वयोर्दिशोः पुनरपि विशेषमाह
॥ पूर्वेण सलिलपूर्णामिति॥ पश्चात् आगतः कर्षुकाणां कृषिकराणां सेवकानां परार्थनरतानां॥ बीजानां
विनाशाय घाताय निर्दिष्ट उक्तः॥ उप्यंते यानि तानि बीजानि॥ तथा च कश्यपः॥ पूर्वे सलिलघातः स्यात् पश्चा
द्धान्यकृषीवलान्॥ याम्ये हंति जलचरान् सौम्ये गोनाशकृत्स्मृतः॥ म्लेच्छान् यायिनृपान् हंति विदिक्स्थः सिंहि
कासुतः॥ तथा च समाससंहितायां॥ उदगादिषु दिक्ष्वशुभो विप्रादीनां सितादिवर्णस्य विनिर्गतो न हन्याद्रा
हुर्म्लेच्छान् साग्निगी नृपान्द्विजराजन्यान् हन्यादुदगयने दक्षिणे च विट्शूद्रान् सममरामयाम्य राहुर्यदि पश्चा
त्तु दृश्यंत इति॥ ३४॥ ॥अथ चंद्रार्कयोर्मेषादिषु राशिषु ग्रस्तयोः फलान्याह॥ पांचालकलिंगशूरसे
नाः कांबोजोड्रकिरातशस्त्रवार्ताः॥ जीवंति च ये हुतावहवृत्त्या ते पीडामुपयांति मेषसंस्थे॥ पांचालाः जनाः
कलिंगाः शूरसेनकांबोजाः उड्राः किराता एते सर्व एव जनाः॥ तथा च शस्त्रवार्ता शस्त्रवृत्तयः॥ शस्त्रं वर्तनं ये
षां। हुतावहवृत्त्या अग्निवृत्त्या च जीवंति। सुवर्णकारलोहकारास्थकारप्रभृतयः॥ ते सर्वे पीडामुपयां
ति प्राप्नुवंति। चंद्रे सूर्ये वा मेषस्थे ग्रस्ते सति। ३५॥ ॥अथ वृष आह॥ गोपाः पशवोऽथ गोमिनो वा
मनुजाश्च महत्त्वमागताः॥ ते पीडामुपयांति भास्करे ग्रस्ते शीतकरेऽथवा वृषभे॥ ३६॥ ॥गोपा इति रक्ष
ति गोपाः॥ पशवः चतुष्पदः॥ गोमिनो गोमंतः॥ गावो विद्यंते येषां॥ ज्योत्स्नात मध्या इति गोमान् नुच्चरः॥ ये
च मनुजा मनुष्याः महत्त्वमागताः प्रख्यातां प्राप्ताः ते च सर्व एव भास्करे शीतकरे वा वृषस्थे ग्रस्ते पीडामुपयां
ति॥ प्राप्नुवंति॥ ३६॥ अथ मिथुन आह॥ मिथुने प्रवरांगना नृपा नृपमात्रा बलिनः कलाविदः। यमुनातट
ग्राः

बृ॰सं॰

४९

सबाल्हिकाः मत्स्याः सुभ्रकृतैनैः समन्विताः॥ ३७॥ प्रवरांगनाः प्रधानस्त्रियो नृपा राज्ञानो नृपसदृशा नृप
मात्या अमात्या बाल्हिनः प्राणिनः कलाविदः चित्रगीतनृत्यवाद्याद्यभिज्ञाः॥ यमुनातटजाः यमुनानदीकूलि
दीतस्या रतटे तीरे ये जनाः ते च॥ सबाल्हिका बाल्हिकैर्जनैः सहिताः॥ तथा मत्स्याजनाः ते च सुभ्रकृतैनैः स
मन्विताः सहिताः॥ एते सर्वे एव मिथुनेऽस्थ्य शीतकिरणे चंद्रे वा पीडामुपयांति॥ ॥अथ कर्कटकस्याह॥ आभीरा
न शबरान सपल्हवान मल्लान्मत्स्य कुरून् शकानपि॥ पांचालान् विकलांश्च पीडयत्यन्नं चापि निहंति कर्कटे॥
॥३८॥ ॥आभीरान् जनान् शबरान् विततान् सपल्हवान् पल्हवैः सहितान् मल्लान् बाहुयुद्धज्ञान् मत्स्य
कुरून् मत्स्यान् कुरूंश्च शकानपि पांचालान् एतान् सर्वान् च जनान् विकलान् गहीनान् एतान् पीडयत्युपतापयति॥
अन्नं चापि निहंति॥ कर्कटे यदा कर्के चंद्रो ग्रस्तो भवतः॥ ॥अथ सिंहकन्ययोराह॥ सिंहे पुलिंदगणान् मेकलस
त्त्वयुक्तान् राजोपमान् नरपतीन् वनगोचरांश्च॥ षष्ठे तु सस्यकविलेखकगेयसक्तान् हन्त्यश्मकान् त्रिपुरशालियु
तांश्च॥ ३९॥ ॥पुलिंदा निषादादयः जनगणाः समूहाः सत्वयुक्ताः॥ प्रधाना राजोपमा राजतुल्याश्चित्र प्रतिपति
युक्तान् नरपतयो राजानो वनगोचरा वनमरण्यं गोचरो विषयो येषां ते वनगोचरा इत्यर्थः॥ एतान् सिंहे
निहंति॥ षष्ठे त्विति॥ सस्यानि सुप्रसिद्धानि॥ कवयः काव्यज्ञाः लेखकाः लिपिज्ञाः॥ गेयसक्ता गीतरसा
ः॥ अश्मकाजनाः॥ त्रिपुरी नगरी॥ शालियुतान् देशान् येषु शालयो धान्यानि बहूनि भवंति॥ एतान् स
र्वान् षष्ठे कन्यायां हंति॥ ३९॥ ॥अथ तुलावृश्चिकयोराह॥ तुलाधरेवंत्यपरांत्यसाधून् वणिक्दशा
र्णान् कुरुकच्छकांश्च॥ आलिन्यथोदुंबरमद्रचोलान् द्रुमान् सयौधेयविषायुधीयान्॥ ४०॥ ॥आवंत्या
ना अपरांत्या जनाः एवं साधवः सज्जनाः॥ एतास्तथा वणिजः॥ किराटाः दशार्णाः जनाः कुरुकच्छकान् जनान्
तान् सर्वान् तुलाधरे तुलायां हंति॥ आलिन्यथेति॥ उदुंबराजनाः मद्राः चोलाः एतान् पिज्जनान् द्रुमान् च
श्चान योधेयान् जनान्॥ विषायुधीयान् विषमायुधं येषां॥ सद्ययोधेयो विषायुधीयान् एतान् अलि ४९
नि वृश्चिके हंति॥ ॥अथ धनुर्मकरयोराह॥ धन्विन्यमात्यवरवाजिविदेहमल्लान् पांचालवैद्यवणिजो

विषमायुधज्ञान्॥ हन्यान्मृगेऽथ झषमंत्रिकुलानि नीचान् मंत्रौषधीषु कुशलान् स्थविरायुधीयान्॥ ४१॥ ॥
अमात्या मंत्रिणो कालकप्राप्ताः॥ वरा प्रधानाः॥ अथवा अमात्यवराः वाजिनो अश्वाः विदेहजनाः॥ मल्ला बाहुयु
द्धज्ञाः पांचालजनाः॥ वैद्याः कायचिकित्सकाः॥ वणिजः क्रयविक्रयिणः॥ विषमायुधाः आयुधज्ञाः आयु
धवेत्तारः॥ एतान् धन्विनि हन्यात्॥ हन्यान्मृगेऽथेति॥ झषा मत्स्याः॥ मंत्रिणः चाणक्यादयः॥ सचिवाः॥ कुला
नि वंशाः॥ अथवा मंत्रिणां कुलानि॥ नीचा अधमकर्मकराः॥ एतान् तथा मंत्रौषधीषु कुशलान्॥ मंत्रे पुत्रे वैद्य
स्य च मौरेषु॥ औषधीषु कुशलान् शक्तान् स्थविरान् वृद्धान्॥ आयुधीयान् आयुधजीविनः॥ एतान् मृगे मकरे
हन्यात्॥ ॥अथ कुंभमीनयोराह॥ कुंभेंतर्गिरिजान् सपश्चिमजनान् भारोद्वहांस्तस्करान् आभीरान् दरदार्य
सिंहपुरकान् हन्यात्तथा बर्बरान्॥ मीने सागरकूलसागरजलद्रव्याणि मान्यान् जनान् प्राज्ञान् वा युपजीवि
नः अभ्रकं कूर्मोपदेशाद्वदेत्॥ ॥कुंभ इति॥ अंतर्मध्ये गिरयः पर्वतास्तत्रजाता अंतर्गिरिजाः॥ तान् पर्वतमध्यज
जातान्॥ सपश्चिमजनान् पश्चिमदिक्वासिभिर्जनैः सह॥ क्वचित् गिरिजं पश्चिमजनानिति पाठः तेऽज्ञातान् जनान्
प्राकृता अन्यत्र ग्रंथे भन इति॥ तथा भारोद्वाहकान् भारवहकान् तस्करान् चोरान्॥ आभीरान् दरदान् जनान् च
आर्यान् प्रधानजनान्॥ सिंहपुरकान् बर्बरांश्च तथा तेन च प्रकारेण एतान् सर्वान् कुंभे हन्यात्॥ मीने साग
रकूलेति॥ सागरकूलं समुद्रतटं॥ सागरजलद्रव्याणि समुद्रतोयोत्पन्नानि रत्नानि॥ मान्यान् पूज्यान् जनान्
हन्यात्॥ जनानिति पठंति॥ धनेभवा धान्यास्तान् पूर्ववाक्य वर्धयेयान्॥ प्राज्ञान् बुद्धियुक्तान्॥ वा युपजीविनो
जलोपजीविनः द्रव्यकविक्रयेण ये जीवंति॥ तान्मीने हन्यात्॥ अभ्रकं कूर्मोपदेशात् कूर्मविभागकथिताद्वदेत्॥ अ
यातः॥ यन्नक्षत्रस्थार्कचंद्रौ ग्रहणसमये भवतः तन्नक्षत्रं कूर्मविभागेन यस्मिन् देशे उक्तं॥ तत्र जनानां पी
डा भवति॥ तच्च वक्ष्यति॥ नक्षत्रत्रयवर्गैराग्नेयाद्यैर्व्यवस्थितैर्नवधा॥ भारतवर्षमध्ये प्रागादिविभाजिता देशा
इति॥ तथा च पराशरः॥ अथ कृत्तिकासु कालिंगान्मगधाधिपतीन् पीडयति॥ रोहिण्यां शूलशस्त्रराजः प्रजाम
गधरांस्त्र॥ सात्वानिष्वादेकेकयानार्दायां॥ पुष्ये मूकभान् पल्लवोपजीविनः श्वापनर्वसौ पांड्यान् कुरुकपा

सं च॥ पुष्येणमिति सिंधुसौवीरकुरुपांचालकान। सार्पे काश्मीरककलिंगसिंहलकराजन्यान॥ पित्र्ये दंडकनिवासिनः पि
व॰ सं॰ तृधान्यं च॥ भाग्ये सकभगानवकां बोज्जान सुराष्ट्राधिपतिं च॥ मगधानयुवनानार्यम्णे इत्से दशार्णान् लाट्टमद्रान् कु
रुक्षेत्रं च॥ वाग्ये काश्मीरान् शौराननवाजिनश्च॥ विशाखयोर्द्वेक्ष्वाकुन् कार्मैत्रे कोशलान्॥ ज्येष्ठायां अंत्यजन्पती
५४ न् इंद्रद्वीपश्च मूले॥ क्षुद्रमालवयोधेयान॥ आप्ये पंचनदसुविराधिपतिं च॥ वैश्वदेवे अर्जुनायनं यौधेयशिबमालवा
नश्चवरुणे। सात्वानां वंकांश्च वासावे धनिनः॥ शाकगंडताश्चवारुणे वै केकयपांचालकवश्वात्रैवगामगधकुकुराना
हिर्बुध्ने समके क्षुद्रकत्रिगर्तान्॥ पौष्णे दहानंतकसिंधुसौवीरानाश्विने श्वाश्वाध्यक्षान् वनश्च याम्ये कलिंगान
दक्षिणानुपतापयतीति॥ तथा च समाससंहितायां॥ कूर्मभागेन वदेत् पीडां देशस्य वाक्ष्यनक्षत्रं॥ सहितोग्रह
णे येन च तद्देशश्चाप्युपयाति पीडां॥ ४२॥ ॥अथार्कशशिनोर्द्दश ग्रासा भवंति॥ तेषां नामान्याह॥ सव्यापस
व्यलेहग्रसननिरोधावमर्दनारोहाः॥ आघ्रातं मध्यतमस्तमोंत्य इति दश ग्रासाः॥ ४३॥ सव्य १ अपस
व्यं २ लेह ३ ग्रसनं ४ निरोधं ५ अवमर्दनं ६ आरोहं ७ आघ्रातं ८ मध्यतमः ९ तमोंत्यं १०॥ इत्येवं प्रकारा
स्ते दश ग्रासा इति। अथैतेषां लक्षणानि फलान्याह॥ सव्ये गते तमसि जगज्जलप्लुतं भवति मुदितमभयं च॥ अ
पसव्येन रपतितस्कराचमर्दैः प्रजानाशः॥ ४४॥ तमसि राहौ सव्यगते चंद्रस्यार्कस्य वा दक्षिणभागगते जगत् जल
प्लुतं वारिणाप्लावितं मुदितं हृष्टमभयं भयरहितं च भवति॥ अपसव्ये वामभागगते तमसि नरपतिराज्ञस्तस्करा
णां चोराणामवमर्दैः पीडनैः प्रजानां नाशः॥ संक्षयो भवति॥ अथ चंद्रग्रहणे आग्नेयां राहोर्गमनं सव्यः॥ ने
शान्यामपसव्यः॥ अर्कग्रहणे वायव्ये सव्यः नैरृत्यामपसव्य इति॥ अथ लेहस्याह॥ जिह्वोपलेढि परितस्ति
मिरनुदो मंडलं यदि स लेहः॥ प्रमुदितसमस्तभूता प्रभूततोयाच तत्र मही॥ ४५॥ तिमिरनुद् चंद्रमसोर्कस्य
वा॥ तिमिरं अंधकारं नुदति प्रेरयतीति तिमिरनुत्। तस्य परितः समंततो मंडलं बिंबं जिह्वोपलेढि जिह्वया रसन ५०
योपलीढमिव दृश्यते। तदा ग्रासो लेह इति तस्मिन् ग्रासे मही भूः प्रमुदितसमस्तभूता प्रकर्षेण मुदितानि हृ
ष्टानि समस्तानि निरवशेषाणि भूतानि प्राणिनो यस्याः॥ तथा प्रभूततोया वारिबहुला च भवति॥ ॥अथ

DR. BHAU DAJI MEMORIAL

ग्रसनस्याह॥ ॥ग्रसनमिति यदा स्वपंचाः पादो वा गृह्यते। तथाप्यर्द्धं स्फीतनृपतिवित्तहानिः पीडा च स्फीत
देशानां ४६॥ स्वं ग्रास्त्रिभागः पादश्चतुर्भागोर्द्धं वार्द्धं वा बिंबं गृह्यते तमसा छाद्यते तदा ग्रासो ग्रसनमिति।
तस्मिन् ग्रासे स्फीतानां मतिवित्तयुक्तानां नृपाणां राज्ञां वित्तहानिः धननाशो भवति। तथा स्फीतानां साध
नानां देशानां च पीडा भवति। अथ निरोधस्याह॥ ॥पर्यंतेषु गृहीत्वा मध्ये पिंडीकृतं तमस्तिष्ठेत्॥ स निरोधो
विनेयः प्रमोदकृत् सर्वभूतानां॥ ४७॥ तमो राहुः पर्यंतेषु गृहीत्वा समंततः संछाद्य मध्ये मध्यविभागे पिंडीकृतं
घनतरं भूत्वा यदि तिष्ठेदास्ते॥ तदा ग्रासो निरोधसंज्ञो विज्ञेयो ज्ञातव्यः॥ स च सर्वभूतानां निःशेषप्राणिनां प्रमोदकृत् हृ
र्षकृत्॥ ॥अथावमर्दनस्याह॥ अवमर्दनमिति निःशेषमेव संछाद्य चिरं तिष्ठेत्॥ हन्यात् प्रधानभूपान् प्रधा
नदेशांश्च तिमिरमयः॥ ४८॥ ॥तिमिरमयो राहुः निःशेषं समग्रमेव मंडलं संछाद्य स्थगयित्वा यदि चिरं बहु
कालं तिष्ठेत तदावमर्दनं नाम ग्रासः॥ तेन ग्रासेन प्रधानभूपान् मुख्यनृपान् प्रधानांश्च देशान् हन्यात् घातय
त॥ ॥अथारोहणस्याह॥ कृते ग्रहे यदि तमस्तत्क्षणमावृत्य दृश्यते भूयः॥ आरोहणमित्यन्योन्यमर्दनै
र्भयंकरं राज्ञां॥ ४९॥ ग्रहे ग्रहणनिमित्ते निःक्रांते भूय पुनर्यदि तमो राहुस्तत्क्षणमावृत्य पुनश्छादयत
दृश्यते॥ तदारोहणं नाम ग्रासः॥ तत्र राज्ञां नृपाणां अन्योन्यमर्दनैः परस्परावघृष्टैर्भयं भीतिं करोति
॥इति शब्दः प्रकारार्थः। एतद्दोषाति कुयतो नोपपद्यते॥ गणितागणितगोलकवासनया॥ आचार्येण पूर्व
शास्त्रानुसारेणोक्तं॥ ॥अथाघ्रातस्याह॥ दर्पणमिव एकदेशे सबाष्पनिःश्वासमारुतोपहतं॥ दृश्येता
घ्रातं तत् सवृष्टिवृध्यावहं जगतः॥ ५०॥ दर्पण आदर्शमिव एकदेशे एकस्मिन् स्थाने सबाष्पेण सोष्मणा
निःश्वासमारुतेन श्वसनवायुनाचोपहतं दृश्यत अवलोक्यते॥ तदाघ्रातं नाम ग्रासः॥ तच्च जगतः सुभिक्ष
वृष्टिवृध्यावहं शोभनां वृष्टिं वृद्धिं च वहति। जगतो जनपदस्य॥ ॥अथ मध्यतमस आह॥ मध्ये तमः प्रवि
ष्टं वितमस्कं मंडलं च यदि परतः॥ तन्मध्यदेशनाशं करोति कुक्ष्यामयभयं च॥ ५१॥ तमो राहुर्मध्ये तथोस्त्र
विशोद्यते। परितः समंततो मंडलं वितमस्कं तमोरहितं निर्मलं भवति। तदा ग्रासो मध्यतमो नाम॥ तच्च म

ध्वरेखानाशं विघातं करोति॥ तथा कुक्ष्यामयं कुक्षिरोगभयं च॥ अस्य ग्रासस्य संस्थानमर्कग्रहणे एव संभवति।
बृ॰सं॰ क्कादर्कस्येंदोरत्यन्तात्त्वं च ग्रहणग्राह्यस्यात्यन्तात्तच्छादकत्वन भूछायायामरत्वान्न संभवतीति॥ ॥अथ तमो
व्याख्यमाह॥ पर्यंतेष्वतिबहुलं स्वल्पं मध्ये ततस्तमो व्याख्यं॥ सस्यानामीतिभयं भयमस्मिंस्तस्कराणां च॥ ५२
५१ तमः पर्यंतेषु बिंबपरिधौ तत्र भागेषु अतिबहुलमतिघनं मध्यमध्यभागे स्वल्पं अल्पं दृश्यते॥ तदाख्यासस्तमोव्याः
ख्यानाम॥ अस्मिन्तमोव्याख्ये ग्रासे सस्यानामीतिभयं भवति॥ ईतयः सस्योपद्रवाः॥ तथा च॥ अतिवृष्टिरना
वृष्टिर्मूषकाः शलभाः शुकाः॥ अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः॥ आभ्यः सस्यानां भयं॥ तथा चौ
राणां तस्कराणां भयं॥ चौरकृता भीतिर्भवतीत्यर्थः॥ तथा च पराशरः॥ तद्यथा दश ग्रासोपप्लवाः॥ ग्रसनारोहणोप
घातो मर्दनान रोधपरिलेखनापसव्यसव्यानि मध्यतमउपप्लवाश्च॥ तत्रार्धत्रिभागपादग्रहणं ग्रसनं प्रख्या
तं नृपतिविप्रत्युतये मंडलमध्ये ग्रहावर्तनं आरोहणं नरपतिक्षोभकरं प्रजानां शमार्थतस्य ग्रहणमुपघातं॥ त
गाढं नाशयो नाऽर्दनं चिरमर्केंदु सकलमंडलाक्रमणं प्रजानिद्रवकरं सर्वमंडलध्यामावरणं निरोधः॥ तद्रोगक्षेम
सुभिक्षलक्षणं॥ समंतात्तिन्नया यांताभिलेहनं परिलेखनं समानफलं॥ पूर्वेण दक्षिणमपसव्यं प्रजाभयाय॥
॥अथ दक्षिणसव्यमभयाय॥ मंडलांतमध्ययोर्ग्रहणमंतमध्यं नृपतिक्षोभकरं॥ मध्यात्तमसावरणं तम
उपप्लवाः॥ परस्परं स्नेहसतत्र फलं दृश्यते। तथा च काश्यपः॥ सव्यगे तु सुभिक्षं स्यात् अपसव्ये तु तस्करात्
क्लीदे प्रजाः प्रहृष्टाः स्युर्ग्रसनं लोकनाशनं॥ निरोधे च न हर्षः स्याद्रोगेन्द्रेन्द्रपसंक्षयः॥ आमार्दितावपमर्दस
यं क्षयं यांति पार्थिवाः॥ सर्ववर्णप्रदर्शं यद्घ्रातं तदुघाताय॥ मध्येतमसी संदृष्टे पीड्यते मध्यदेशजान॥
दृष्टे तमसि पर्यंते सस्यानामीतिजं भयमिति॥ ॥अथ राहोर्वर्णानवतुकामआह॥ श्वेते क्षेमसुभिक्षं
ब्राह्मणपीडां च निर्दिशेत राहौ॥ अग्निभयमनलवर्णे पीडां च हुताशवृत्तीनां॥ ५३॥ ॥हरिते रोगोल्बणता स ५१
स्यानामीतिजश्च विध्वंसः॥ कपिले चतुष्प्रगलम्लेच्छध्वंसोऽथ दुर्भिक्षं॥ ५४॥ ॥अरुणकिरणानुरूपे दुर्भि
क्षावृष्टयो विहगपीडा॥ आधूम्रे क्षेमसुभिक्षमादिशेन्मंदवृष्टिं च॥ ५५॥ ॥कपोतारुणकपिलश्यावा

भे क्षुद्भयं विनिर्दिशेत्॥ कपोतः शूद्राणां व्याधिकरः कृष्णवर्णश्च॥ ५६॥ विमलकमणिपीताभो वैश्यध्वंसी भवे
त्सुभिक्षाय॥ सार्चिष्मत्यग्निभयं गैरिकरूपे तु युद्धानि॥ ५७॥ ॥दूर्वाकांडश्यामे हारिद्रे चापि निर्दिशेन्मरकं॥
अशनिभयं संभ्रदायी पाटलकुसुमोपमो राहुः॥ ५८॥ पांशुविलोहितरूपः क्षत्रध्वंसाय भवति रश्मिश्च॥ बालर
विकमलसुरचापरूपभृत्शस्त्रकोपाय॥ ५९॥ ॥श्वेते क्षेमसुभिक्षमिति॥ राहौ तमसि शुक्लवर्णे दृष्टे क्षेमसुभि
क्षं ब्राह्मणानां च पीडां शंकं विनिर्दिशेत्॥ अनलवर्णे अग्निसदृशे अग्निभयं हुताशभयं॥ हुताशवृत्तीना
मग्निवार्तानां लोहकारसुवर्णकारादिसंस्कारादीनां च पीडा भवति॥ हरित इति॥ हरिते हरितवर्णे शुकाभे रा
हौ रोगाणामुल्बणता रोगप्राचुर्यं॥ सस्यानामीतिभीतिरिति॥ अतिवृष्टिप्रभृतिभिरुपद्रवैर्विध्वंसो नाश
शो भवति॥ कपिले कपिलवर्णे शीघ्रगानां चतुरगजातीनां प्राणिनां मुष्ट्रादीनां तथा म्लेच्छानां च विध्वंसो नाशः
शो दुर्भिक्षं च भवति॥ अध्यायचः स्वार्थे॥ अरुणकिरणानुरूप इति॥ अरुणकिरणानुरूपे अरुणरश्मि
सदृशे ईषल्लोहितवर्ण इत्यर्थः॥ दुर्भिक्षावृष्टयो भवंति॥ विहगानां च पीडा भवति॥ आधूम्रे धूम्र
वर्णे क्षेमसुभिक्षं चादिशेत वदेत॥ मंदां च स्वल्पां च वृष्टिमादिशेत्॥ वदेत्॥ कपोतारुणेति॥ कपोतव
र्णः तथारुणः॥ कपिलो लोहितकपिलमिश्रवर्णो तथा श्यावाभः श्यामकांतिः॥ क्षुद्भयं दुर्भिक्षभयं
विनिर्दिश्य वक्तव्यं॥ कपोतः कपोतवर्णः कृष्णवर्णश्च॥ शूद्राणां व्याधिकरः॥ पीडावहः॥ विमलके
ति॥ विमलकमणेरिव पीता आभा कांतिर्यस्य स विमलकमणिपीताभः नीलपीत इत्यर्थः॥ एवंवि
धो वैश्यध्वंसी वैश्यहंता स्यात्॥ भवेत्॥ सुभिक्षाय भवति॥ सुभिक्षकृद्भवेत्॥ सार्चिष्मति सज्वालाराहौ
वह्निभयं भवति॥ तथा गैरिकवर्णे गैरिकरूपे युद्धानि संग्रामा भवंति॥ दूर्वाकांडश्याम इति॥ दूर्वा
कांडश्यामे शाड्वलप्रवालतुल्यवर्णे हारिद्रे चातिपीतवर्णे मरकं विनिर्दिशेत् वदेत्॥ राहुर्यदि पाटलकु
सुमोपमः पाटलपुष्पसदृशः श्वेतलोहित इत्यर्थः। तथाभूतोऽशनिभयं॥ संप्रदाय॥ अशनिभ
यं सस्यानां ददातीति पांशुविलोहित इति॥ पांशुवर्णो विलोहितरूपश्च॥ व्यामिश्रवर्णः॥ क्षत्रध्वंसायश्च

स्त्रियाणां नानाप्यरश्चस्थनाशाय भवति॥ तथा च बालरवेर्बिंबदृश्यस्य कुमकस्य पद्मस्य मरक्तापस्येंद्रधनुष
: सादृश्यं तुल्यं रूपं कांतार्कं भर्तिधारयति॥ तदा शस्त्रकोपाय भवति॥ शस्त्रकोपं करोति॥ युध्यानि भवंती
त्यर्थः॥ तथा च पराशरः॥ वर्णाः कृष्णकपोता अतिवृष्ट्यश्च दुर्भिक्षरोगाय॥ नीलरक्ताग्र कृष्णश्चेदेत्यना
शाय॥ पांशुधूम्रलोहितः क्षत्रविनाशाय॥ बालार्करक्तकपिलो दुर्भिक्षाय॥ हारिद्रो व्याधये॥ दूर्वांकुरह
रितो जनमारकाय॥ पाटलकुसुमसंनिकाशो ज्ञानभयदो भवति॥ अधुना चंद्रार्कयोर्ग्रहदृष्टिफलान्याह
॥ ॥ पश्यन् ग्रस्तं सौम्यो घृतमधुतैलक्षयाय राज्ञां च॥ भौमः समरविमर्दं शिखिकोपं तस्करभयं च॥ ६०
शुक्रः सस्यविमर्दं नानाक्लेशांश्च जनयति धरित्र्याः॥ रविजः करोत्यवृष्टिं दुर्भिक्षं तस्करभयं च॥ ६१॥ ॥पश्य
न् ग्रस्तं सौम्येति॥ सौम्यो बुधो ग्रहग्रस्तमर्कं चंद्रं वा पश्यति॥ तथा घृतमधुतैलानां प्राणांश्च क्षयाय
नाशाय भवति॥ भौमश्चेत्पश्यति तदा समरविमर्दं युद्धं शिखिकोपं अग्निप्रकोपं तस्करभयं चौरभीतिं
च करोति॥ शुक्रः सस्यविमर्दमिति॥ शुक्रश्चेत्पश्यति॥ तदा सस्यविमर्दं सस्यविनाशं॥ धरित्र्यां भूमौ नाना
नाक्लेशान् अनेकान् दुःखान् जनयत्युत्पादयति॥ रविजः सौरश्चेत्पश्यति तदा अवृष्टिमवर्षणं दुर्भिक्षं तस्कर
भयं चौरभीतिं जनयति॥ अधुना शुभदृष्टिप्रशंसार्थमाह॥ ॥ यदशुभमवलोकनाभिरुक्तं ग्रहजनितं ग्र
हणे प्रमोक्षणे वा॥ सुरपतिगुरुणावलोकितं तच्छममुपयाति जलैरिवाग्निरिद्धः॥ ६२॥ ॥पश्यन् ग्रस्तं सौ
म्य इत्यादिकाभिरवलोकनाभिर्दृष्टिभिर्ग्रहजनितं ग्रहोत्पादितं यदुक्तमशुभं फलं तत्र ग्रहकाले मोक्ष
काले वा तत्सर्वं सुरपतिगुरुणा बृहस्पतिना अवलोकिते दृष्टे शममुपशांतिमुपयाति गच्छति॥ यथा जलैः
रंबुभिः समिद्धः प्रज्वलितोऽग्निरिद्धस्तद्वदिति॥ ग्रहणप्रमोक्षवेलायां विकल्पः कृतः॥ यदि कदाचिद्ग्रहण
काले सौम्यो दृष्ट्वा न पश्यति स एव राश्यंतरं संक्रामति॥ तदा तानि फलानि फलानि भवंति॥ तेन प्रग्र
हमोक्षांतं फलमभिमतमिति॥ ॥अथ प्रग्रहकालान्मोक्षांतं यावत् ग्रहणसमयस्तन्मध्ये उत्पाते दृष्टे
रन्यः सौम्यग्रहणस्य परिज्ञानमाह॥ ॥ग्रस्ते क्रमान्निमित्ते पुनर्ग्रहो मासषट्कपरिवृद्ध्या॥ पवनोल

काथात रजः क्षितिकंपतमोनिर्घातैः पातैः॥ ६३॥ ग्रस्ते निंद्ये वा ग्रस्ते ग्रहे सति यद्येवमुत्पाता दृश्यंते॥ तदा पु
नर्भूयो मासषट्कपरिवृद्ध्या वृद्धिः षड्मासैर्ग्रहणं भवति॥ तद्यथा॥ यस्मिन् ग्रहणकाले यदि पवनो वायुर्भवति
तदा तेनोत्पातः॥ पुनः षड्मासैर्ग्रहणं भवति॥ एवमुल्कापातेन द्वादशभिर्मासैः रजसा पांशुवर्षणाष्टादशभिः
क्षितिकंपने भूमिचलनेन मासचतुर्विंशत्या तमसा मासत्रिंशता॥ अनिर्घातेन मासषट्त्रिंशता
॥ तथा च पराशरः॥ इपरे यश्चंद्रार्कबलवान्वाति मारुतः॥ मासषट्के तथा विद्याद्राहोरागमनं ध्रुवम्॥
उल्कापाते द्वादशभिर्मासैः रजस्यष्टादशे तथा॥ भूमिकंपे चतुर्विंशे त्र्यंशत्तमसि निर्दिशेत्॥ षट्त्रिंशे च
निर्घातेऽस्यात् सर्वेष्वस्याद्भुतरिति॥ अथ भौमादीनां ग्रस्तानां फलमाह॥ ॥आवंतिकाजनपदाः कावेरीनर्म
दातटाश्रयिणः॥ दृप्ताश्च मनुजपतयः पीड्यंते क्षितिसुते ग्रस्ते॥ ६४॥ ॥अत्रादौ तावत्तारग्रहाणां ग्र
स्तत्वं व्याख्यायते॥ योग्रहोर्कमंडलेन चंद्रेण वा संदृष्टो भवति॥ तत्र चेत्तस्य क्षितिसुनुर्भवति॥ तदा च्छा
दनात् ग्रहेस्य सौम्यदृश्यो भवति॥ तेन ग्रस्त इत्युच्यते॥ एवं क्षितिसुतेः गारके ग्रस्ते आवंतिका इति॥
अवंतिदेशभवा जनपदाः॥ तथा च कावेरीनदीनर्मदा च तयोस्तटं तीरं येषां समाश्रिताः संनिवासिनः॥ तथा दृप्ताद
र्पिष्टा ये मनुजपतयो मनुजा मनुष्याणां पतयो राजानः एते सर्वे पीड्यंते॥ ॥अथ बुधस्याह॥ अंतर्वेदीं सर
यूं नेपालं पूर्वसागरं शोणं॥ स्त्रीनृपयोधकुमारान् सह विद्वद्भिर्बुधो हंति॥ ६५॥ अंतर्वेदी गंगायमुनयोर्म
ध्यं॥ सरयूर्नदी॥ नेपालो धातुः॥ पूर्वसागरः प्राक्सागरः॥ प्राक्समुद्रः॥ शोणो नदः॥ स्त्रियो योषितः॥ नृपा
राजानो॥ योद्धाः संग्रामकुशलाः॥ कुमारा बालाः॥ प्रथमवयस्काः॥ एतान् सर्वान् विद्वद्भिः पंडितैः सह बु
धो ग्रस्तो हंति घातयति॥ ॥अथ जीवस्याह॥ ग्रहणोपगते जीवे विद्वन्नृपमंत्रिगजहयध्वंसः॥ सिंधुतटवा
सिनामपि उदक्दिशाश्रितानां च॥ ६६॥ जीवे बृहस्पतौ ग्रहणोपगते ग्रहणप्राप्ते सति विदुषां पं
डितानां॥ नृपाणां राज्ञां मंत्रिणां सचिवानां गजानां हस्तिनां हयानामश्वानां च विध्वंसो विनाशो भव
ति॥ तथा सिंधुनामनदी तत्र वासिनां तेषामपि॥ तथा उदक्दिशं संश्रितानां उत्तरदिग्वासिनां च

सत्त्वं भवति॥ ॥अश्वयुजस्याह॥ भृगुतनये राहुगते दासेरककैकयाः समौधेयाः॥ आर्यावर्ताः शबराः स्त्री
बृ०सं० मन्त्रिगणाश्च पीड्यन्ते॥ ६६॥ भृगुतनये शुक्रे राहुग्रस्ते सति दासेरकाः जनाः॥ केकयाः समौधेयाः सहयौ
धेयैर्जनै रार्यावर्ताः प्रधानदेशजनाः॥ शबराः जनाः स्त्रियो योषितः सचिवाः मंत्रिणः। गणाः समूहाः
५३ ॥एते सर्वएव पीड्यंते उपताप्यंते॥ ॥अथ सौरस्याह॥ सौरे मरुभवपुष्करसौराष्ट्रा धातवोऽर्बुदान्त्यजनाः॥
गोमंतपारियात्राश्रिताश्च नाशं व्रजंत्याशु॥ ६७॥ ॥सौरे शनैश्चरे ग्रस्ते मरुभवा मरुभूमावुत्पत्तिर्येषां
॥पुष्करजनाः सौराष्ट्रजनाश्च॥ धातवो धातुद्रव्याणि॥ अर्बुदाः जनाः अर्बुदः पर्वतः तत्र ये निवसंति॥ अं
त्यजनाः निकृष्टजनाः॥ गोमतो गोमिनः केचित् गोनंद इति पठंति॥ गोनंदाः जनाः। पारियात्राश्रिताश्च॥
पारियात्रः पर्वतः। तत्र येऽश्रिताः स्थिताः एते सर्व एवाशु क्षिप्रमेव नाशं क्षयं व्रजंति॥ ६८॥ ॥अथ मा
सफलानि वक्तुकामस्तान्याह॥ तत्रादावेव कार्तिकमाह॥ कार्तिक्यामनलोपजीविमगधान् प्राच्याधिपा
न् कोशलान् कल्माषान्। अथ शूरसेनसहितान् काश्यांश्च संतापयेत्॥ हन्याच्चाशु कलिंगदेशनृपतिं सामा
त्यभृत्यं तमो दृष्टं क्षत्रियतापदं जनयति क्षेमं सुभिक्षान्वितं॥ ६९॥ कार्तिकस्य यं पौर्णमास्यमावास्य का
र्तिकी॥ कार्तिक्यां तमो राहुर्दृष्टो दर्शनमागतो ग्रहणं भवतीत्यर्थः॥ तदा अनलोपजीविनोऽग्निजीविनः सुवर्ण
कारप्रभृतयो मागधाः जनास्तान्॥ तथा प्राच्याधिपान् पूर्वस्यां दिशि ये राजानस्तान् तथा कोशलान् जना
न् कल्माषान् जनानेव॥ अथ शब्दः स्वार्थे तांश्च शूरसेनसहितान् शूरसेनाः जनास्तैः संयुक्तान् तथा का
श्यान् जनान् एतान् सर्वान् संतापयेत् पीडयेत्॥ तथा कलिंगदेशनृपतिं कलिंगदेशो यो नृपतिः राजानं सा
मात्यभृत्यं अमात्यैर्मंत्रिभिः भृत्यैश्च सर्वकर्मकरैः सहितं मारयेत् क्षिप्रं हन्यात् घातयेत्॥ तथा च क्षत्रि
यतापदं क्षत्रियाणां राज्यन्यानां तापं संतापं ददाति॥ क्षेमं च सुभिक्षान्वितं सुभिक्षसहितं जनयत्युत्पादय ५३
ति॥ ॥अथ मार्गशीर्षस्याह॥ काश्मीरकान् कौशलकान् सपुंड्रान् मृगांश्च हन्यादपरांतकांश्च॥ ये सोम
पास्तांश्च निहंति सौम्ये सुभिक्षकृत् क्षेमसुभिक्षकृच्च॥ ७०॥ सौम्ये मार्गशीर्षमासे राहुर्दृष्टः काश्मीरकान्

जनान् कौशलकान् जनानेव तांश्च सपुंड्रकान् पुंड्रैर्जनैः सहितान् मृगान् जनान् अरण्यपशवो वा मृगाः॥ एतान्
सर्वान् हन्यात् घातयेत्॥ अपरांतकांश्च जनान् तानपि हन्यात्॥ तथा च सोमपाः॥ सोमः पीतो यैः ते सोम
पाः क्रतुयाजिनः तांश्च हन्यात्॥ सुभिक्षकृत् शोभनं वृष्टिं करोति॥ क्षेमं सुभिक्षं च करोति॥ ॥अथ पौषस्याह॥
पौषे द्विजक्षत्रजनोपरोधः ससैंधवाख्याः कुकुरा विदेहाः॥ ध्वंसं व्रजंत्यत्र च मंदवृष्टिर्भयं च विद्यादसु
भिक्षयुक्तं॥ ७१॥ पौषे मासि दृष्टे द्विजानां ब्राह्मणानां क्षत्रजनानां चोपरोध उपद्रवो भवति॥ तथा
सैंधवजनाः सैंधव इत्याख्या नाम येषां॥ कुकुराश्च जनाः एव सह सैंधवाख्यैः ये कुकुराः वर्तंते ते ससैंधवा
ख्याः कुकुराः॥ तथा विदेहजनाः॥ एते सर्वे ध्वंसं विनाशं व्रजंति गच्छंति॥ अत्रास्मिन् पौषे मंदवृष्टिमल्पव
र्षणं भयं भीतिं च विद्यात् जानीयात्॥ कीदृशं भयं असुभिक्षयुक्तं दुर्भिक्षसमेतं॥ ॥अथ माघमासः
आह॥ माघे तु मातृपितृभक्तान् वसिष्ठगोत्रान् स्वाध्यायधर्मनिरतान् करिणस्तुरंगान्॥ वंगांगकाशिम
नुजांश्च दुनोति राहुर्वृष्टिं च कर्षकजनाभिमतां करोति॥ ७२॥ माघे मासि राहुर्दृष्टो मातृपितृभक्तान् जन
नीजनकतत्परान्॥ तथा वसिष्ठगोत्रान् वसिष्ठो गोत्रे येषां द्विजानां॥ तथा स्वाध्याये पाठे धर्मे च निर
तान् सक्तान्॥ करिणो हस्तीन् तुरंगान् अश्वान् वंगान् जनान् अंगानपि काशिमनुजान् काशिदेशमनु
ष्यान्॥ अथवा मनुजशब्दः प्रत्येकमभिसंबध्यते॥ वंगमनुजान् अंगमनुजान् काशिमनुजान्॥ एतान्
सर्वान् दुनोत्युपतापयति॥ तथा कर्षकाणां जनानां अभिमतामभीष्टां वृष्टिं करोति॥ ॥अथ फाल्गुनमा
ह॥ पीडाकरं फाल्गुनमासि पर्व वंगाश्मकावंतकमेकलानां॥ नृत्यज्ञसस्यप्रवरांगनानां धनुष्करक्षत्र
तपस्विनां च॥ ७३॥ ॥फाल्गुने मासि पर्वग्रहणं वंगानां जनानां अश्मकानामावंतकानां मेकलानामेषां पी
डाकरमुपतापकरं॥ तथा नृत्यज्ञानां नाट्यविदां सस्यानां प्रवरांगनानां प्रधानस्त्रीणां धनुष्कराणां
क्षत्रियाणां क्षत्रियाणां तपस्विनां तपोनिरतानामेषां सर्वेषां पीडाकरमेव॥ ॥अथ चैत्र आह॥ चैत्र्यां तु
चित्रकरलेखकगेयसक्तरूपाज्ञवेदनिगमान् हिरण्यपण्यान्॥ पौंड्रौड्रकैकयजनानथ चाश्मकांश्च ता

पः स्यन्दनयमरणोऽत्र विचित्रवर्षः ॥ २५ ॥ ॥ चैत्र्यां पौर्णमास्याममावास्यायां वा चित्रकराश्चित्रज्ञाः शिल्पि
बृ० सं० नो ॥ लेखककाण्डपटाः ॥ गेयसक्ता गेयरता लोकाः ॥ तथा रूपोपजीविनो वेश्या जनाः ॥ निगमदा वेदपाठका
:॥ हिरण्यपण्याः सुवर्णविक्रयिणः एतानपि ॥ तथा पौण्ड्रा जनाः औड्राः केकयाः स्तत्र सर्वे जनाः ॥ अथशब्दः पाद
५३ पूरणे ॥ अश्मकाश्च जनाः एतान् सर्वानेव तापः स्पृशति ॥ एते सोपद्रवा भवन्तीत्यर्थः ॥ तथात्रास्मिन् वर्षे अमरपतिरिन्द्रो
विचित्रवर्षी भवति ॥ विचित्रं नानाप्रकारं वर्षति ॥ क्वचिद्वर्षति क्वचिन्न वर्षतीत्यर्थः ॥ केचित् पठन्ति ॥ अमरराड् वि
चित्रवर्षीति ॥ ॥ अथ वैशाख आह ॥ वैशाखमासि ग्रहणे विनाशमायान्ति कर्पासतिलाः समुद्गाः ॥ इक्ष्वाकुयौ
धेयशकाः कलिङ्गाः सोपद्रवाः किन्तु सुभिक्षमस्मिन् ॥ २५ ॥ वैशाखमासे ग्रहणे विनाशमायान्ति के ते ॥ क
र्पासतिलाः समुद्गाः मुद्गसहिताः एते विनाशमायान्ति ॥ तथेक्ष्वाकवो जनाः ॥ यौधेयाः शकाः कलिङ्गाः ॥ ए
ते सर्वे जनाः सोपद्रवाः महदुपद्रवेण पीडा उपतापेन सहिता भवन्ति ॥ किन्तु पुनरस्मिन् ग्रहणे सुभिक्षं भवति ॥
॥ ॥ अथ ज्येष्ठ आह ॥ ज्येष्ठे नरेन्द्रद्विजराजपत्न्यः सस्यानि वृष्टिश्च महागणाश्च ॥ प्रध्वंसमायान्ति नराश्च सौ
म्याः साल्वैः समेताश्च निषादसंघाः ॥ २६ ॥ ॥ ज्येष्ठे मासि पर्वणि नरेन्द्रा राजानो द्विजा ब्राह्मणाः राजपत्न्यो राज्ञः
स्त्रियः ॥ सस्यानि प्रसिद्धानि ॥ वृष्टिर्वर्षणं ॥ महागणा महासमूहाश्च ॥ एते सर्वे प्रध्वंसं नाशमायान्ति प्राप्नु
वन्ति ॥ तथा च ये नराः सौम्याः दर्शनीयाः ॥ उत्तरदिक्वासिन इत्यन्ये ॥ तथा च साल्वैर्जनैः समेताः सहि
ता निषादानां प्राणिघातिनां संघाः समूहाः प्रध्वंसमायान्ति ॥ ॥ अथ आषाढ आह ॥ आषाढपर्वण्यु
दपानवप्रनदीप्रवाहान् फलमूलवार्तान् ॥ गान्धारकाश्मीरपुलिन्दचीनान् हतान् वदेन्मण्डलवर्षमस्मिन् ॥ २७ ॥
आषाढपर्वणि आषाढे मासि ग्रहणे उदपानं जलधारा वापीकूपतडागादि ॥ तस्य उदपानस्य ॥ वप्रं तटं ॥
नदीप्रवाहान् पुलिनान्तरतरान् फलमूलवार्तान् फलानि मूलानि वार्ता वर्तनं वृत्तिर्वर्तनं येषां ॥ तथा गान्धार ५३
जनाः काश्मीराः पुलिन्दाः चीनाः एतान् सर्वान् हतान् नष्टान् विनिर्दिशेत् ब्रूयात् सर्व एव विनश्यन्तीत्यर्थः ॥
अस्मिन् पर्वणि मण्डलवर्षं भवति ॥ क्वचित् क्वचिन्न वर्षतीत्यर्थः ॥ ॥ अथ श्रावण आह ॥ काश्मीरान् सपुलि

न्दचीनान् यवनान् हन्यात् कुरुक्षेत्रजान् गान्धारानपि मध्यदेशसहितान् दृष्टो ग्रहः श्रावणे ॥ काम्बोजैकशफांश्च
शारदमपि त्यक्त्वा यथोक्तानिमान् अन्यत्र प्रचुरान्नहृष्टमनुजैर्धात्रीं करोत्यावृतां ॥ २८ ॥ ॥ श्रावणमासि य
द्योग्रहणं दृष्टं काश्मीरजान् जनान् सपुलिन्दचीनान् यवनान् पुलिन्दैः सहितान् यवनान् चीनांस्तथा कुरुक्षेत्र
जातान् तान् जनान् एतान् हन्यात् घातयेत् ॥ न केवलमेतान् ॥ यावत् गान्धारानपि मध्यदेशसहितान् दृष्टो
ग्रहः श्रावणे ॥ एतान् सर्वानपि हन्यात् ॥ तथा काम्बोजान् जनान् एकशफान् गर्दभांश्च ॥ चशब्दः समुच्चये ॥ न के
वलमपि शारदमपि धान्यादिकं ॥ एतान् सर्वानपि हन्यात् ॥ इमान् पूर्वोक्तान् यथाकथितान् काश्मीरकादीन् त्य
क्त्वा विहाय अन्यत्र देशे पुधात्रीं भूमिं प्रचुरान्नहृष्टमनुजैः ॥ प्रचुरेण प्रभूतेनान्नेन ॥ तथा हृष्टमनुजैर्हृष्टैर्मनु
ष्यैरावृतां व्याप्तां करोति ॥ ॥ अथ भाद्रपद आह ॥ कलिङ्गवङ्गान् मगधान् सुराष्ट्रान् म्लेच्छान् सुवीरान् दरदा
श्मकांश्च ॥ स्त्रीणां च गर्भानसुरो निहन्ति सुभिक्षकृत् भाद्रपदेऽभ्युपेतः ॥ २९ ॥ ॥ असुरो राहुर्भाद्रपदे ऽ
भ्युपेतः आगतः ॥ कलिङ्गान् जनान् ॥ मगधान् सुराष्ट्रान् म्लेच्छान् सुवीरान् दरदान् अश्मकान् एतान् सर्वा
न् जनानान् हन्ति ॥ घातयति ॥ केचित् दरदांश्च गाश्चेति पठन्ति ॥ तथा स्त्रीणां योषितां गर्भांश्च निहन्ति ॥ सु
भिक्षकृत् सुभिक्षं करोति ॥ २९ ॥ ॥ अथाश्वयुज आह ॥ काम्बोजचीनयवनान् सह शल्यहद्भिर्बाह्लीकसिन्धुत
टवासिजनांश्च हन्यात् ॥ आनर्तपौण्ड्रभिषजश्च तथा किरातान् दृष्टोऽसुरोऽश्वयुजि भूरिसुभिक्षकृच्च ॥ ३० ॥
असुरो राहुरश्वयुजि मासि दृष्टः काम्बोजान् जनान् चीनान् यवनान् एतान् सर्वान् सह शल्यहद्भिः शल्यहर्त्तृभिश्चिकित्स
कैः सह तथा बाह्लीकान् जनान् सिन्धुतटवासिनः सिन्धोर्नद्यास्तटे ये निवसन्ति जनाः एतान् सर्वान् हन्यात् घात
येत् ॥ चशब्दः सर्वत्रात्र समुच्चये ॥ आनर्ता जनाः ॥ पौण्ड्रजनाश्च भिषजो वैद्याः ॥ तथा तेनैव प्रकारेण किरात
जना एतान् हन्यात् घातयेत् ॥ तथा भूरिसुभिक्षकृच्च ॥ भूरि यत् बाहुल्येन सुभिक्षं करोति ॥ ॥ तथा च समास
संहितायां ॥ आश्वयुजि माघकार्तिकभाद्रपदेष्वागतः सुभिक्षकारः ॥ राहुरवशिष्टमासेषु अशुभकरो वृ
ष्टिधान्यानां ॥ तथा च पराशरः ॥ तत्र कार्त्तिके सुभिक्षक्षेमाय ॥ काशिकोसलसरसेनाभावाय ॥ मार्गशीर्षे

१०सं० ५५

मगधेषां दस्योपभयायोक्तये। पौषभयदुर्भिक्षमल्पक्षत्रोपरोधाय॥ माघेऽङ्गवङ्गकोपाय प्राद्रदद्वडये॥ वंगांगनर्तकयवनकाश्मीरदेशगोत्मादनकृत॥ फाल्गुनेच संपच्चनटनर्तककयवनमनकरमस्यविनाशाय॥ चैत्रवैशाखे मकपुंड्रद्राक्षभृगुकक्षसस्याभावाय॥ ज्येष्ठेऽन्त्यपपल्लीगणमुख्यमस्योपद्रवाय। साल्वनिषादश्चाक्षियस्य घ्नमाषाढे॥ श्रावणे क्षेमसुभिक्षमन्यत्र चीनकाश्मीरपुलिंदगांधारेभ्यः॥ भाद्रपदे मगधदरदकलिंगकांगवंगानयायसस्यक्षेमायच॥ अश्वयुजि ग्रहणे सुभिक्षक्षेमाय॥ अवंतिबाह्लीकानर्तककांबोजसैंधवानामभावाय॥ ॥अथार्कचंद्रयोर्दश मोक्षा भवंति। तेषां नामान्याह॥ ॥ हनुकुक्षिपायुभेदा द्विद्विः संछर्दनं च जरणं च। मध्यांतयोश्च विदरणमिति दश शशांकसूर्ययोर्मोक्षाः॥ ८१॥ हनुः कुक्षिः पायुभेदात द्विद्विः द्वौ द्वौ वा रोद्विद्विः॥ हनुभेदौ द्वौ। कुक्षिभेदौ द्वौ। पायुभेदौ द्वौ॥ एवं षट्॥ तथा छर्दनं च जरणं च॥ चकारः समुच्चये॥ तथा मध्यविदरणमंत्यविदरणं॥ इत्येवंप्रकाराः शशिसूर्ययोर्मोक्षाः॥ अथैतेषां लक्षणं सफलं च कुलकमाह॥ तत्रादावेव दक्षिणहनुभेदस्य लक्षणं सफलमाह॥ आग्नेय्यामपगमनं दक्षिणहनुभेदसंज्ञितं शशिनः॥ सस्यविमर्दो मुखरुक्नृपपीडा स्यात्सुवृष्टिश्च॥ ८२॥ आग्नेय्यां पूर्वदक्षिणस्यां दिशि यद्यपगमनं निवर्तनं तमः करोति। तदा स मोक्षो दक्षिणहनुभेदसंज्ञितः दक्षिणहनुभेद इति तस्य संज्ञा॥ कस्य मोक्षः॥ शशिनश्चंद्रस्य शशिग्रहणमत्रोपलक्षणार्थं॥ रवेरस्यापि तत्तावच्छ्यति॥ एते सर्वे मोक्षा व्याख्याः॥ भास्करेपीति॥ अस्मिन्विमोक्षे सस्यविमर्दः सस्यविनाशो भवति। तथा मुखरुक् वदनपीडा नृपस्य राज्ञः पीडा स्यात् भवेत्॥ सुवृष्टिः शोभना वृष्टिश्च भवेत्॥ तथा च कश्यपः॥ दक्षिणे हनुभेदे स्यात् आग्नेय्यां चेत्तमोगतः॥ सस्यप्रणाशं कुरुते नृपभंगं सुदारुणं॥ ॥अथ वामहनुभेदलक्षणं सफलमाह॥ पूर्वोत्तरेण वामो हनुभेदो नृपकुमारभयदायी॥ मुखरोगं शस्त्रभयं तस्मिन्विद्यात्सुभिक्षं च॥ पूर्वोत्तरेण ऐशान्यां दिशि यद्यपगमनं राहोर्भवति तदा स वामो हनुभेदो नाम मोक्षः॥ स च नृपकुमाराणां राजपुत्राणां भयदायी भवति भीतिं

५५

ददाति॥ तस्मिन्नेव मोक्षे मुखरोगं च नृपपीडां शस्त्रभयं संग्रामभीतिं च विद्यात् जानीयात् सुभिक्षं च भवति॥ तथा च कश्यपः॥ पूर्वोत्तरे परो भेदान्नृपपुत्रभयप्रदः॥ ॥अथ दक्षिणकुक्षिविभेदलक्षणं सफलमाह॥ दक्षिणकुक्षिविभेदो दक्षिणपार्श्वेन यदि भवेन्मोक्षः॥ पीडा नृपपुत्राणामभियोग्या दक्षिणा रिपवश्च॥ ८४॥ ॥दक्षिणपार्श्वेन दक्षिणभागेन यदि मोक्षो भवेत्। स दक्षिणकुक्षिविभेदो नाम मोक्षः॥ तस्मिन्मोक्षे नृपपुत्राणां राजसुतानां पीडा भवति॥ तथा दक्षिणा रिपवो दक्षिणदिक्स्थाः शत्रवोऽभियोज्याः। तेषामुद्योगः इति॥ एतदौत्पातिकं यतो गणितगोलवासनया दक्षिणोत्तरस्यां दिशि ग्रासमोक्षौ न भवतः कदाचिदपि॥ आचार्येण पूर्वशास्त्रानुसारेणोक्तं॥ तथा च कश्यपः॥ दक्षिणे कुक्षिभेदः स्यात् वामो मोक्षाभवे यदि॥ राजपुत्रभयं तत्र दक्षिणाशापतेर्वधः॥ ॥अथ वामकुक्षिभेदलक्षणं फलमाह॥ वामस्तु कुक्षिभेदो यद्युत्तरमार्गसंस्थितो राहुः॥ स्त्रीणां गर्भविपत्तिः सस्यानि च तत्र मध्यानि॥ ८५॥ ॥राहुर्यद्युत्तरमार्गसंस्थः उत्तरस्यां दिशि स्थितो भवति॥ तदा स वामकुक्षिभेदो नाम मोक्षः॥ तत्र तस्मिन्मोक्षे स्त्रीणां योषितां गर्भविपत्तिर्गर्भनाशो भवति॥ सस्यानि धान्यानि मध्यानि भवंति माध्यानि न बहूनीत्यर्थः॥ एतदौत्पातिकं॥ तथा च कश्यपः॥ सौम्यायां तु यदा मोक्षो वामकुक्षिविभेदनः॥ स्त्रीणां गर्भविनाशाय सौम्याशाधिपतेर्वधः॥ ८५॥ ॥अथ दक्षिणवामौ पायुभेदौ सफलावाह॥ नैर्ऋतवायव्यस्थौ दक्षिणवामौ तु पायुभेदौ द्वौ॥ गुह्यरुगल्पावृष्टिर्द्वयोस्तु राज्ञीक्षयो वामे॥ ८६॥ नैर्ऋत्यां दक्षिणपश्चिमायां दिशि व्यवस्थिते तमसि पायुभेदः॥ पायुभेदेनापानस्थानमुच्यते॥ वायव्यपश्चिमोत्तरस्यामवस्थिते वामपायुभेदः॥ ॥अनयोर्द्वयोरपि गुह्यरुक् अल्पा वृष्टिर्वर्षणं भवति। गुह्यं लिंगं तत्र रोगः॥ वामस्य विशेषमाह॥ राज्ञीक्षयो वाम इति॥ वामपायुभेदे राज्ञो राजपत्न्याः क्षयो मरणं भवति॥ तथा च कश्यपः॥ पायुभेदे गुह्यरोगो वायव्ये नैर्ऋताशयोः॥ गुह्यरोगभयं विद्यात् वामे राज्ञीभयं वदेत्॥ ॥अथ संछर्दनफलमाह॥ पूर्वेण प्रग्रहणं कृत्वा प्राग्वापसर्पीत॥ संछर्दनमिति तत्क्षेमसुभिक्षार्दिप्रदं जगतः॥ ८७॥ पूर्वेण पूर्वेण प्रग्रहणं कृत्वा प्राग्वापसर्पीत॥ संछर्दनमिति तत्क्षेमस्य हार्दैः प्रदं जगतः॥

व॰ सं॰ स्यांदिशिप्रग्रहणंकृत्वाप्रागेवपूर्वस्यामेवयथासम्यग्गमनंकरोति॥ समोक्षः संछर्दनमिति॥ तत्रजगतो
लोकस्यक्षेमप्रदंसस्यप्रदंहार्दिः प्रदंतुष्टिदंभवति॥ तथाचकश्यपः॥ ग्रासमोक्षौयदापूर्वेछर्दनंतत
५६ दाभवेत्॥ क्षेमहार्दिप्रदंज्ञेयंसस्यनिष्पत्तिकारकं॥ ८७॥ ॥अथजरणस्यफलमाह॥ प्राक्प्रग्रहणं
यस्मिन्पश्चादपसर्पणंतुतज्जरणं॥ क्षुत्शस्त्रभयोद्विग्नानशरणमुपयांतितत्रजनाः॥ ८८॥ यस्मि
न्ग्रहणेप्राक्पूर्वस्यांदिशिप्रग्रहणंपश्चात्पश्चिमायांदिशिग्रहसर्पणंगमनंयदिकरोतितदाजरणं
नाममोक्षः॥ तत्रैतस्मिन्मोक्षेजनामर्त्याः क्षुच्छस्त्रभयोद्विग्नाः क्षुद्भयंदुर्भिक्षभीतिंशस्त्रभयंसंग्राम
भीतिंततउद्विग्नाः दुःखितानशरणमुपयांतिशरणंनप्राप्नुवंतिनिःशरणाभवंतीत्यर्थः॥ तथाचक
श्यपः॥ पूर्वेणग्रसतेराहुरपरस्यांविमुंचति॥ क्षुत्तस्करभयंतत्रमोक्षंस्याज्जरणंस्मृतं॥ ॥अथविद
रणस्यफलमाह॥ मध्येतमःप्रकाशंप्रथमंतन्मध्यविदरणंनाम॥ अंतःकोपकरंस्यात्सुभिक्षंनाति
वृष्टिकरं॥ ८९॥ ॥प्रथममादौमध्येमध्यविभागेयदिप्रकाशोबिंबस्यप्रकाशमुत्पद्यते॥ तन्मध्यवि
दरणंनाममोक्षः॥ तथांतःकोपकरं॥ अंतःअभ्यंतरेराजगृहेकोपकरंस्वयमेवसैन्यस्यक्षोभक
रंस्यान्नभवेत्॥ तथासुभिक्षंदंसुभिक्षंददाति॥ नातिवृष्टिकरंभवति॥ प्रभूतंनवर्षतीत्यर्थः॥ एतदौ
त्पातिकंगणितगोलविरुद्धं॥ तथाचकश्यपः॥ यदाप्रकाशोमध्येस्यात्दुर्भिक्षमरकौतदा॥ अथांत्य
विदरणाख्यस्यफलमाह॥ ॥पर्यंतेषुविमलताबहुलंमध्येतमोंऽत्यदारणाख्ये॥ मध्याख्यदेशनाशः
स्याच्छारदसस्यक्षयश्चास्मिन्॥ ९०॥ ॥पर्यंतेषुबिंबांत्यभागेषुयदिविमलतानिर्मलत्वंभवति॥
मध्येमध्यभागेबहुलंसंततंतमःतदांत्यदारख्योमोक्षः॥ अस्मिन्मोक्षेमध्याख्यदेशस्यनाशोभवति
॥ मध्यदेशोविनश्यति॥ तथाचशारदानांसस्यादीनांक्षयः॥ एतदौत्पातिकंयतोगणितगोलविरुद्ध ५६
मिति॥ तथाचकश्यपः॥ पर्यंतेविमलत्वंस्यात्॥ तमोमध्येयदाभवेत्॥ मध्याख्यदेशनाशस्या
न्शारदंसस्यंविनश्यति॥ ॥अथैतएवमोक्षाभास्करस्यातिदिशन्नाह॥ एतेसर्वेमोक्षावक्तव्याः

Dr. BHAU DAJI MEMORIAL

भास्करेपिकिंतत्र॥ पूर्वादिक्शशिनियथातथारवौपश्चिमाकल्प्या॥ ९३॥ यएतेसर्वेमोक्षाश्चंद्रमस्युक्ता
स्तेभास्करेसूर्येपिवक्तव्याः॥ कथनीयाः॥ किंतत्रायंविशेषः॥ यथाशशिनिचंद्रेपूर्वादिक्तथारवावादित्ये
पश्चिमादिक्॥ पूर्वेपरिकल्प्याकल्पनीया॥ एतदुक्तंभवति॥ आदित्यस्यपश्चिमादिक्पूर्वापूर्वाचपश्चिमा
दक्षिणोत्तराउत्तरादक्षिणाविदिशश्चैवानेनानुक्रमेणमपिकल्प्याचंद्रवन्मोक्षावाच्याइति॥ ॥अथग्र
हणेमुक्तेसप्ताहांतःफलानाह॥ मुक्तेसप्ताहांतःपांशुनिपातोन्नसंक्षयंकुरुते॥ नीहारोरोगभयंभूकंपःप्र
वरन्पमरणं॥ ९२॥ उल्कामंत्रिविनाशंनानावर्णाघनाश्चभयमतुलं॥ स्तनितंगर्भविनाशंविद्युन्नृप
दंष्ट्रिपरिपीडां॥ ९३॥ परिवेषोरुक्पीडांदिग्दाहोनृपभयंचाग्निभयंच॥ रूक्षोवायुःप्रबलश्चोरसमु
त्थंभयंदत्ते॥ ९४॥ निर्घातःसुरचापंदंडश्चक्षुद्भयंसपरचक्रं॥ ग्रहयुद्धंनृपयुद्धंकेतुश्चतदेवसंदृष्टः॥
९५॥ ॥अविकृतसलिलनिपातैःसप्ताहांतःसुभिक्षमादेश्यं॥ यच्चाशुभंग्रहणजंतत्सर्वंनाशमाया
ति॥ ॥मुक्तेसप्ताहांतरिति॥ चंद्रसूर्ययोर्ग्रहणविमुक्तेसप्ताहांतःसप्तदिनमध्येयदिपांशुनिपातोभ
वति॥ पांशुवर्षणंदृश्यते॥ तदान्नसंक्षयंदुर्भिक्षंकुरुते॥ एवंनीहारोरोगभयंरोगभीतिंकरोति॥ भूकं
पःक्षितिचलनंप्रवरस्यप्रधानस्यराज्ञोमरणंमृत्युंकरोति॥ उल्कापतितामंत्रिणःसचिवस्यविनाशं
करोति॥ नानावर्णाविविधकालयोघनामेघाअतुलमसमंभयंभीतिंकुर्वंतिस्तनितंमेघगर्जितंगर्भा
गर्भलक्षणाकालेयाश्चविद्युन्नृपदंष्ट्रिपरिपीडां॥ नृपोराजा॥ दंष्ट्रिणःवराहप्रभृतयःतेभ्योलोकेपी
डांवदेत्॥ परिवेषोरुक्पीडांरोगव्यथांकरोति॥ दिग्दाहोदिशोदाहोनृपभयंराजभीतिंसाग्निभयम
ग्निभयसहितंकरोति॥ रूक्षःपरुषः॥ प्रबलःप्रचंडोवायुःपवनः॥ चोरसमुत्थंतस्करोत्थंभयंदत्तेददाति
॥ निर्घातोनिर्घातशब्दःतस्यलक्षणंवक्ष्यति॥ पवनःपवनाभिहतइति॥ सुरचापमिंद्रधनुः॥ दंडोरवि
किरणजलदसहतांसंघातः॥ एतेषामन्यतमंक्षुद्भयंदुर्भिक्षभयंसपरचक्रंपरचक्रभयसहितंचकरोति
॥ ग्रहयोर्युद्धेनृपयुद्धंनृपाणांराज्ञांयुद्धेसंग्रामोभवति॥ केतुःशिखीचसंदृष्टःतदेवयुद्धंकरोति॥ अवि

कृतसलिलनिपातइति॥ मसाद्गोतः मसाद्गुर्मे ध्वे अविकृतमविकारं कृत्वा सलिलस्य जलस्य निपातो भवति सम्यक्
वृष्टिर्भवतीत्यर्थः॥ तदा सुभिक्षमारोग्यं च तस्मादेव॥ यद्यग्रहणं ग्रहणोद्भवं फलं उग्रशुभं तत्सर्वं निरवशेषं
नाशमायाति॥ विनश्यतीत्यर्थः॥ तथा च समाससंहितायां॥ परुषपवनाभ्रगर्जितविद्युत्परिवेषभूप्रकंपाद्याः॥ सप्ताहांतर्नृपभयग्रहणनिवृत्तोशुभावृष्टिः॥ तथा च पराशरः॥ अथैवं ग्रहविमुक्ते सप्ताहांतर्भवेद्यदि पांशुवर्षोन्ननाशाय नीहारो रोगवृद्धये॥ नृपनाशाय भूकंप उल्का मंत्रिविपत्तये॥ नैगायपरिवेषस्यात भयायैवाभ्रसंप्लवः॥ विद्युत गर्भविनाशाय यादृग्दाहोग्निविवृद्धये॥ निर्घातेंद्रधनुर्द्वंद्वादुर्भिक्षाय भयाय च॥ पवनः परुषो रूक्षः चोरोपद्रवसूचकः॥ सर्वोपद्रवनाशाय सम्यक् वृष्टिर्भवेद्यदि॥ यद्रात्रुद्धरितं सोकं चंद्रग्रहणहेतुकं॥ तदेव सकलं सर्वं वेदितव्यं शुभाशुभं॥ चंद्रग्रहणादनंतरं यद्यर्कग्रहणं पक्षांते दृश्यते तत्र फलमाह॥ सोमग्रहे निवृत्ते पक्षांते यदि भवेत् ग्रहोर्कस्य॥ तत्रानयः प्रजानां दंपत्योर्वैरमन्योन्यं॥ १७॥ ॥ सोमग्रहे चंद्रग्रहणे निवृत्ते पक्षांते मासार्धसमाप्तौ यद्यर्कस्यादित्यस्य ग्रहो भवति सूर्यग्रहणं दृश्यते॥ तदा तत्र तस्मिन् ग्रहणे लोकानाम् अनयो दुर्नयो भवति॥ दंपत्योर्जायापत्योरन्योन्यं परस्परं वैरं द्वेषो भवति॥ ॥ ॥ अथार्कग्रहात् शशिग्रहे तत्फलमाह॥ अर्कग्रहात्तु शशिनो ग्रहणं यदि दृश्यते॥ ततो विप्रानेकक्रतुफलभाजो भवंति मुदिताः प्रजाश्चैव॥ ॥१८॥ अर्कग्रहात् सूर्यग्रहणादनंतरं पक्षांते यदि शशिनश्चंद्रस्य ग्रहणं दृश्यते अवलोक्यते ततो विप्राः ब्राह्मणाः अनेकक्रतुफलभाजः अनेकानां बहूनां क्रतूनां यज्ञानां फलभाजिनो भवंति॥ तथा सर्वाः प्रजा मुदिता हृष्टाश्च भवंतीति॥ ॥१९॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ राहुचारो नामाध्यायः पंचमः॥ ५॥ ॥ ६॥ ॥१॥ ॥ अथातो भौमाध्यायो व्याख्यायते॥ तत्र भौमस्य पंच वक्रा भवंति॥ तद्यथा॥ आदौ सोमसमायोगे पश्चात्तस्मात भास्करे॥ तस्य संपुटको नाम रुंडमुंडं मदीतलं॥ द्वादशाद्दशमे काद्दशान् नक्षत्रात् वक्रिते कुजे॥ अमुखं॥ दूषयति रसान् उदये करोति रोगानवृष्टिं च॥ ३ ॥ उदयनक्षत्रात् द्वादशे दशमे चैकाद ५७

शेवा कुजे अंगारके वक्रिते प्रतीपतो गतो अश्रुमुखनामं नामं वक्रं॥ तत उदये उदककाले पुनरर्कमंडलान्निर्गमे रसान् मधुरादीन् मधुराम्ललवणतिक्तकटुककषायान् दूषयति॥ सदोषान् करोति॥ तेच दुष्टा नराणां भक्षमाणाः पीडयंति पीडामुपयांति॥ उत्पादयति॥ एवं च रोगान् गदान् करोति॥ तथा अवृष्टिम् अवर्षणं च करोति॥ तथा च गर्गः॥ दशमैकादशे वापि द्वादशे वा निवर्तितः॥ लोहितांगो ग्रहो ज्ञेयं वक्रमश्रुमुखं च तत॥ नाववर्षति पर्जन्यो दूषयत्यशुभान् रसान्॥ तदुष्टा दूषयंत्याशु नराणां धातूंस्तथाश्रयां॥ बहवो व्याधयः क्रूराः उत्पद्यंते शरीरिणां॥ बहुभिः कारणैर्दैन्यं ततो लोकः प्रलीयते॥ तथा च पराशरः॥ दशमैकादशद्वादशेष्वपवृत्य वाते द्रव्यरसान् दूषयन् प्रजानां धातून् कोपयन् व्याधीन् प्रवर्तयन् अवृष्टिं च करोति॥ ॥ अथ व्यालस्याह॥ व्यालं त्रयोदशर्क्षाच्चतुर्दशाद्वापि पच्यते तस्मये॥ दंष्ट्रिव्यालमृगेभ्यः करोति पीडां सुभिक्षं च॥ उदयोपक्षयात् त्रयोदशर्क्षात् त्रयोदशान्नक्षत्रात् चतुर्दशाद्वा कुजे वक्रिते व्यालं नाम वक्रं॥ तच्चास्तमये विपच्यते यस्मिन् काले भौमोर्कमंडले पुरस्तात् अस्तमेति॥ तत्र परिपाकमायाति॥ दंष्ट्रिणः सूकराः कुकुरादयः व्यालाः सर्पाः॥ मृगा अरण्यजातयः॥ तेभ्यः पीडां तत्कृतां लोकानां पीडां करोति॥ सुभिक्षं च करोति॥ तथा च गर्गः॥ त्रयोदशेथ नक्षत्रे यदि वापि चतुर्दशे॥ निवृत्तिं कुरुते भौमस्तद्वक्रं व्यालमुच्यते॥ भवंति प्रचुरा व्यालास्तेभ्यो लोकभयं भवेत॥ नृपाणामभयं विंद्यात् सस्यसंपत्तिमादिशेत॥ तथा च पराशरः॥ त्रयोदशचतुर्दशयोः सस्यदंष्ट्रिव्यालः प्राबल्यं हिरण्यसंचयं च॥ ॥ अथ रुधिराननस्याह॥ रुधिराननमिति वक्रं पंचदशात् षोडशाच्च विनिवृत्ते॥ तत्कालं मुखरोगं सभयं सुभिक्षमावहति॥ उदयापेक्षया पंचदशान्नक्षत्रात् षोडशाद्वा विनिवृत्ते वक्रितेंगारके रुधिराननमिति वक्रं॥ रुधिराननं नाम तद्वक्रं तच्च तत्कालं यावत् वक्रं तावन्मुखरोगं॥ वक्रप्रारंभादारभ्य यावद्वक्रीभविता तावत् वक्रपीडां करोति॥ तथा च सभयं भयसहितं सुभिक्षमावहति उत्पादयति॥ तथा च गर्गः॥ यदि पंचदशर्क्षे तु भूसुतः षोडशेपि वा॥ निवृत्तिं कुरुते वक्रस्तद्विज्ञेयं लोहिताननं॥ दीप्तिमंतः पार्थिवाश्च भवंति प्रथिताभुवि॥ क्षत्रकोपश्च सुभ

दान मुखरोगाभवंतिच॥ तथाचपराशरः॥ पंचदशषोडशयोर्मुखरोगान्पक्षोभशस्त्रकोपाच सुभिक्षंच॥
बृ॰सं॰ अथासितमुशलंस्यात्॥ ॥असितमुशलंसप्तदशाद्वादशतोवानदनुवक्रे॥दस्युगणेभ्यःपीडांकरोत्य
वृष्टिंसशस्त्रभयं॥ ६॥ ॥उदयापेक्षयासप्तदशान्नक्षत्राद्वादशतोपिवा अष्टादशाद्वावक्रितेअंगारके
५८ तद्वक्रमसितमुशलंनामतच्चानुवक्रेस्पष्टगत्याश्रितेभौमेदस्युगणेभ्यःचौरसंघेभ्यःप्रजानांपीडांभवति।
तथाअवृष्टिंसशस्त्रभयंशस्त्रभयेनसहितांचकरोति॥ तथाचगर्गः॥ सप्तदशेद्वादशेवालोहितांगानिवर्ति
तः॥निस्त्रिंशमुशलंनामतद्वक्रंपरिकीर्तितं॥ पशुपुत्रधनंधान्यमाहरंतेत्रदस्यवः॥प्राणिनांजीवनंहंतितथायत्रशस्त्र
संभ्रमः॥तथाचपराशरः॥ सप्तदशेष्टादशेवादस्युगणैःप्रजानामुपद्रवमवृष्टिंशस्त्रभयंच॥ ॥अथात्रैवयो
गचोनविशेषफलमाह॥ भाग्यार्यमोदितोयदिनिवर्ततेवैश्वदेवेभौमः॥ प्राजापत्येःस्तमितस्त्रीनपि
लोकान्पीडयति॥ ७॥भाग्यंपूर्वाफल्गुनी।आर्यमणमुत्तराफल्गुनी॥भौमोंगारकःतयोरेकतरस्याभ्युदि
तोभवति।रविमंडलान्निर्गतः॥ततोन्येवैश्वदेवेउत्तराषाढायांनिवर्तते॥ वक्रंकरोति॥ तथाचप्राजापत्ये
स्तमितोरोहिण्यामस्तंगतोयदिभवति॥ तदात्रीनपिभूर्भुवःस्वराख्यान्लोकान्पीडयति॥ तथाचपरा
शरः॥ फाल्गुन्योरुदयंकृत्वावक्रेस्याद्वैश्वदेवते।प्राजापत्येप्रवासश्चत्रैलोक्यंतत्प्रपीडयेत्॥ अन्यमपिवि
शेषमाह॥ ॥श्रवणोदितस्यवक्रंपुष्येमूर्धाभिषिक्तपीडाकृत॥यस्मिन्नृक्षेभ्युदितस्तद्दिग्व्यूहान्जनान्वि
निहंति॥ ८॥ ॥श्रवणस्थस्यांगारकस्यसूर्यमंडलादुदितस्ययदाग्रतःपुष्येवक्रंकरोति।तदामूर्धाभि
षिक्तानांराज्ञांपीडांकरोति॥ तथाचपराशरः॥ उदितःश्रवणेभौमःपुष्येवक्रंचरेद्यदि॥मूर्धाभिषिक्तरा
ज्ञानोविनश्येयुःपरस्परं॥ यस्मिन्नृक्षेभ्युदितइति॥ सूर्यमंडलस्थोयस्मिन्नृक्षेयत्रनक्षत्रेस्थितोभ्यु
दितः॥ सूर्यमंडलादुद्गतःतस्यनक्षत्रस्ययादिक्नक्षत्रकूर्मोक्तायाचनक्षत्रकूर्मोक्तायश्चव्यूहोक्तस्तत्रनक्ष ५८
त्रव्यूहोक्तान्तत्रस्थितानारजनान्हंति।घातयति॥ तथाचपराशरः॥यथाजनपदव्यूहेदिग्विभागःप्रदर्शि
तः॥नक्षत्रेषूदितःकुर्यात्लोहितांगस्तथामुखं॥अन्यमपिविशेषमाह॥ ॥मध्येनयदिमघानांगतागा

तंलोहितःकरोतिततः॥ पांड्योनृपोविनश्यतिशस्त्रोद्योगाद्भयमवृष्टिं॥ ९॥ लोहितांगारकोयदिचेन्मघानां
मध्येनगतागतंकरोतिस्पष्टगतिगमनमध्येनतारकाणांगत्वापुनर्वक्रेणागमनंतन्मध्येनैवकरोतिततस्मा
तद्धेतोःपांड्योनृपोविनश्यति॥ पांड्यदेशेयोराजासविनश्यतिनाशमायाति॥ लोकेचशस्त्रोद्योगात्भयंभवति
॥शस्त्राणामुद्योगःसंग्रामोअवृष्टिअवर्षणंचभवति॥ ॥अन्यदपियोगमन्येनाह॥ भित्वामघांविशाखां
भिंदन्भौमःकरोतिदुर्भिक्षं॥मरकंकरोतिघोरंयदिभित्वारोहिणीयाति॥ १०॥ भौमोंगारकोमघांभित्वाम
घाख्योयोगतारकाभेदंकृत्वायदिविशाखांभिंदन्नामपिप्रभिनत्ति॥ तदादुर्भिक्षंक्षुद्भयंकरोति॥ यदिरो
हिणींभित्वायातिरोहिण्यामागतस्तारकाभेदंकृत्वागच्छतितदाघोरंतीव्रंमरकंजनानांकरोतीतिविदधाति॥ अ
न्यदप्याह॥दक्षिणतोरोहिण्याश्चरन्निति रोहिण्यायोगतारकायादक्षिणभागेनयदिगच्छतितदाअर्घस्य
वृष्टेश्चानिग्रहंकरोति॥ विनाशमित्यर्थः॥अर्घस्यनिग्रहःस्वल्पत्वं॥वृष्टेर्निग्रहोरभावः॥ धूमायनसशि
खोवेति॥ धूमायनधूमश्रुद्धमतसशिखोसज्वरोवा॥ यदिदृश्येत॥ तदापारियात्रस्थान्विहन्यात्॥ पारिया
त्रःपर्वतःतत्रस्थितान्जनान्हन्यात्घातयेत्॥ ॥अथभौमस्यवार्षिकाणिनक्षत्राण्याह॥ प्राजापत्यश्र
वणमूलत्रिषुचोत्तरासुशाक्रेच॥ विचरन्घननिवहानामुपघातकरःक्षमातनयः॥ १२॥ क्षमाभूःतत्तन
योंगारकः॥ प्राजापत्येरोहिण्यांस्थितः॥ श्रवणेमूलेत्रिषुनक्षत्रेषूत्तरेषुउत्तराषाढआदौयेषांउत्तराफा
ल्गुन्युत्तराषाढोत्तराभाद्रपदासुतिसृषुउत्तरास्वपापाद॥ शाक्रेज्येष्ठायांचसमुच्चये॥ एतेषामेकतरेवि
चरन्निवसन्॥ घननिवहानांमेघवृंदानामुपघातकरोविनाशकर्ताभवति।अवृष्टिकृदित्यर्थः॥ ॥
अथास्ययेषुनक्षत्रेषुस्थितस्योदितस्यवाविशेषफलमाह॥ चारोदयाःप्रशस्ताःश्रवणमघादित्यहस्तमू
लेषु॥ एकपादाश्विविशाखाप्राजापत्येषुचकुजस्य॥ १३॥ यस्मिन्नृक्षेभ्युदितःतद्दिग्व्यूहान्जनान्हंति
॥ तथाप्राजापत्येश्रवणेदुत्यनयोरपवादोयं॥श्रवणेमघायांआदित्येपुनर्वसौहस्तेमूलेएकपदेपूर्व
भाद्रपदायांअश्विन्यांविशाखायांप्राजापत्येरोहिण्यां॥ चशब्दःसमुच्चये॥एतेषुनक्षत्रेषुकुजस्यचारोदयाः

प्रशस्ताः शोभनाः॥ पूर्वोक्तमशुभफलं न भवतीत्यर्थः॥ ॥ अथवर्णलक्षणमाह॥ विपुलविमलमूर्तिः किंशु
काशोकवर्णः स्फुटरुचिरमयूखस्तप्तताम्रप्रभाभः॥ विचरति यदि मार्गं चोत्तरं मेदिनीजः शुभकृदवनिपा
नां हार्दिदश्च प्रजानां॥ १४॥ मेदिनी भूः तस्या जातो मेदिनीजः॥ अंगारकः विपुलविमलमूर्तिः विपुला वि
स्तीर्णा विमला निर्मला मूर्तिस्तनुर्यस्य॥ तथा किंशुकाशोकवर्णः॥ किंशुकाशोकौ पुष्पवृक्षौ अतिलोहि
तौ तत्सदृशवर्णः॥ अतिलोहित इत्यर्थः॥ स्फुटरुचिरमयूखः॥ स्फुटाः स्पष्टाः रुचिरा दीप्तिमंतो मयूखा रश्म
यो यस्य॥ तप्तताम्रप्रभाभः॥ तप्तगलितस्य ताम्रस्य यादृशी प्रभा कांतिर्यस्य तत्तुल्य बिंबछाया यस्य॥ यदि
चोत्तरं मार्गं विचरति॥ यस्मिन्नृक्षे स्थितस्तस्योत्तरभागेन यदि याति॥ अवनिपानां राज्ञां शुभकृच्छ्रेयस्क
रः॥ प्रजानां लोकानां च हार्दिदं हर्षं ददाति भवति॥ तथा च पराशरः॥ वर्णरश्मिप्रभाप्रमाणतो ह्यायुक्तउदयमा
र्गगः॥ लोहिताङ्गः सर्वलोकहिताय पचि॥ प्रदक्षिणगतिः कांतः स्निग्धश्च कुलशोपमः॥ तप्तकांचनसंका
शो भवेल्लोकविरुद्धये॥ अन्ये एवं व्याचक्षते॥ यथा भरण्यादिमघांतं उत्तरो मार्गः॥ तत्र यदा विचरति॥ तदा
अवनिपानां शुभकृत् प्रजानां हार्दिदः॥ तथा च गर्गः॥ याम्यादिपित्र्यपर्यंतं नक्षत्रमार्गमुत्तरं॥ भाग्यादि ने
र्ऋतांतं मध्यमं मार्गमुच्यते॥ आषाढाद्याश्विन्यंतं तु दक्षिणं समुदाहृतं॥ सौम्यमार्गस्थितो भौमः प्रजानां
हितकारकं॥ मध्येन मध्यफलदो याम्ये तु भयदः स्मृत इति॥ ॥ इति श्रीभट्टोत्पलविरचितायां संहिता
विवृतौ भौमचारो नामाध्यायः षष्ठः समाप्तः॥ ६॥ ॥ ७॥ ॥ अथ बुधचारो व्याख्यायते॥
तत्रादावेव बुधस्योदितस्य फलमाह॥ नोत्पातः परित्यक्तः कदाचिदपि चंद्रजो व्रजत्युदयं॥ जलदहनपवनभ
यकृत् धान्यार्घक्षयाय वृध्यैव॥ १॥ चंद्रजो बुध उत्पातपरित्यक्त उत्पातविरहितः कदाचिदपि कालेपि उ
दयं संदर्शनं न व्रजति न गच्छति॥ अपि तु यदा यदोद्गच्छति तदा तदा सोत्पात एवेति॥ कथमुत्पातं करोति॥ ज
लदहनपवनभयकृदिति॥ जलमुदकं। दहनोग्निः पवनो वायुः एभ्यो भयं करोति॥ तथा धान्यार्घस्य
क्षयाय भवति॥ वृध्यै वृद्धये वा भवति॥ बहुमूल्यतार्घक्षयः॥ स्वल्पमूल्यतार्घवृद्धिः तथा च समा

ससंहितायां॥ उदयं याति शशिसुतो नोत्पातवर्जितः कदाचिदपि॥ पवनाग्निसलिलधान्यार्घमूल्यवृद्धिक्षयं क
रोति॥ ननु जलदहनादिभिरुत्पातैः परित्यक्तश्चंद्रजः कदाचिदप्युदयं न गच्छति॥ केषामेतेषां जलदहनादी
नां अन्यतमोत्पातसमेन उदयं करोति॥ किं वा सर्वैरेव युक्त इत्यत्राप्युच्यते॥ येनोत्पातेन लक्षत प्रतिलोमग
श्चंद्रज उदयं याति॥ अमुमेवार्थं गर्ग आह॥ अवर्षं कुरुते वर्षं वर्षे वर्षान्नियच्छति॥ भयेन कुरुते क्षेमं सर्वत्र
प्रतिलोमगः॥ उदयोक्तफलमेव विशेषोक्तारं तत्फलं प्रयच्छति॥ तथा च काश्यपः॥ नाकस्माद्दर्शनं याति विनो
त्पातेन सोमजः॥ भयदाता तपाद्दिमे रघ्वर्ध क्षयादिभिः॥ अधुना नक्षत्राचलितस्य बुधस्य फलमाह॥
विचरन् श्रवणधनिष्ठाप्राजापत्येंदुवैश्वदेवानि॥ मृण्हन् हिमकरतनयः करोत्यवृष्टिं सरोगभयं॥ २॥
श्रवणं धनिष्ठा प्राजापत्यं रोहिणी॥ इंदुर्मृगशिरः॥ वैश्वदेवमुत्तराषाढा॥ हिमकरस्य चंद्रस्य तनयो बुधः॥ एता
नि नक्षत्राणि विचरन् निवसन् एते षामन्यतमर्क्षं मृण्हन् उपमर्दयन् विचरति॥ उपमर्दनं भेदः॥ तदा अ
वृष्टिमवर्षणं सरोगभयं गदभीत्यासहितां करोति॥ मर्दनमत्र श्रवणादिषु मध्यात कैश्चित्संभवति॥ आचा
र्याणां पूर्वशास्त्रानुसारेणेति॥ तथा च काश्यपः॥ रोहिणीं वैश्वदेवं च सौम्यं वैष्णवं च वासवं नाशितश्च सदा हं
ति प्रजा रोगैश्च पीडयेत॥ अन्ये पुनक्षत्रमाह॥ रौद्रादीनि मघांतान्युपाश्रितेचंद्रजे प्रजापीडा॥ शस्त्रनिपा
तक्षुद्भय रोगानावृष्टि संतापैः॥ ३॥ रौद्रमार्द्रा तदादीनि मघांतानि पंच नक्षत्राणि चंद्रजे बुधे उपाश्रिते
व्यवस्थिते तानि चोपमर्दयन्॥ यदि विचरति तदा प्रजानां पीडा भवति॥ कैः शस्त्रनिपात क्षुद्भय रोगानावृष्टि
संतापैः॥ शस्त्रनिपातेन युद्धेन क्षुद्भयेन दुर्भिक्षपीडया रोगैर्गदैरनावृष्ट्या अवर्षणेन संतापेन उपतापेन च॥
तथा च काश्यपः॥ रौद्रादीनि पंच नक्षत्राणीं दुतनयोन्यदृश्यभिनत्ति॥ शस्त्रदुर्भिक्षव्याधिभिः पीडयेत् जग
त॥ ॥ अन्ये त्वाह॥ हस्तादीनि विचरन् षड् ऋक्षाणि उपपीडयन् गवामशुभः स्नेहरसार्घवृद्धिं करोति चोर्वी
प्रभतान्नं॥ ४॥ हस्तादीनि षड् नक्षत्राणि॥ हस्तचित्रास्वातिविशाखानुराधाज्येष्ठेति॥ एतानि षड् नक्षत्रा
णि विचरन् बुधः॥ एतेषु व्यवस्थितः॥ यथोपपीडयन् योगतारकां भिंदन् गवामशुभो भवति॥ स्नेहरसानां

तिक्तादीनां रसानां मधुरादीनामर्घवृद्धिं समर्घं ॥ तथोर्ध्वं भूमिप्रभृतीनां पर्यायमस्यांश्च करोति ॥ तथा च काश्यपः
बृ०सं० ॥ रूक्षादीनि विचरन् अटन् नक्षत्राणि दृढं दृढः ॥ गवामशुभदः प्रोक्तः सुभिक्षक्षेमकारकः ॥ ॥अन्ये त्वाह ॥
आर्यम्णरुद्रोत भुक् भद्रपदा मूलरोहिणीमघाश्च ॥ चंद्रस्य सुतो निघ्नन् प्राणभृतां धातुसंक्षयकृत् ॥ ५ ॥ आर्य
६० म्णमुत्तराफल्गुनी ॥ रौद्रभुजंगत्रिका ॥ हुतभुक् इति हुतभुक् ॥ अग्निरस्येदं रौद्रं भुजं ॥ भद्रपदा उत्तरा ॥
यमेशं भरणी ॥ चशब्दः समुच्चये ॥ एतानि नक्षत्राणि चंद्रसुतो बुधो निघ्नन् उपमर्दयन् प्राणभृतां देहिनां
॥ धातूनां संक्षयं विनाशं करोति ॥ रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः ॥ इति ॥ तथा च काश्यपः ॥ भ
रणीकृत्तिकाचाद्रामघादिर्बुधं च चंद्रजः ॥ चरन् धातुविनाशाय प्राणिनां परिकीर्तितः ॥ ॥अन्ये त्वाह ॥
आश्विनवारुणमूलान्युपमर्दन् रेवतीं चंद्रसुतः ॥ पण्यभिषक्नौजीविकसलिलजतुरगोपघातकरः ॥ ६ ॥
आश्विनमश्विनी । वारुणं शतभिषक् । मूलं । एतानि नक्षत्राणि तथा रेवतीं च ॥ चंद्रसुतो बुधश्चरन् उपम
र्दयन् पण्यजीविनां पण्यवृत्तीनां वणिक्प्रभृतीनां । भिषजां वैद्यानां ॥ नौजीविनां ॥ नाविकानां ॥ सलिल
जातानां सलिलोत्पन्नानां द्रव्याणां मुक्ताफलादीनां तुरगाणां मश्वादीनां उपघातकरो विनाशकृत् भ
वति ॥ तथा च काश्यपः ॥ रेवतीं वारुणं मूलमाश्विनं चोपमर्दयन् ॥ बुधो वणिक्तुरगाणां सलिलजानां च ना
शनः ॥ ॥अन्ये त्वाह ॥ पूर्वात्रितयादेकमपि तारेः सुतो भिन्द्यात् ॥ क्षुच्छस्त्रतस्करामयभ
यप्रदायी चरन् जगतः ॥ ७ ॥ पूर्वशब्द आद्यायस्य नक्षत्रस्य तत्पूर्वा नक्षत्रत्रयं ॥ पूर्वाफल्गुनी ॥ पूर्वाषा
ढा ॥ पूर्वाभाद्रपदेति ॥ अस्मान्नक्षत्रत्रितयादिंदोः सुतो बुधश्चरन् एकमपि नक्षत्रमभिभिन्द्यात् ॥
पीडयेत् ॥ तदा जगतो लोकस्य क्षुच्छस्त्रतस्करामयभयप्रदायी भवति ॥ क्षुत् दुर्भिक्षभयं ॥ शस्त्रं संग्रा
मः ॥ तस्कराश्चौराः ॥ आमयो रोगाः ॥ एतेभ्यो भयं भीतिं ददाति ॥ तद्योगः ॥ तथा च काश्यपः ॥ पूर्वात्रये ६०
चरन् सौम्यो भेदं कुर्याद्यदि व्रजेत् ॥ क्षुच्छस्त्रतस्करभयं करोति प्राणिनां वधं ॥ अत्र बुधस्य सप्तगतय
उक्ताः पराशरतंत्रे । तासां तन्मतेन तानि नामान्याह ॥ ॥ प्राकृतविमिश्रसंक्षिप्ततीक्ष्णयोगान्तघोरपापा
ख्याः ॥

सप्त पराशरतंत्रे नक्षत्रैः कीर्तितगतयः ॥ ८ ॥ प्राकृता १ विमिश्रा २ संक्षिप्ता ३ तीक्ष्णा ४ योगान्तिका ५ घोरा ६
पापाख्या ७ ॥ एताः सप्तगतयः पराशरतंत्रे नक्षत्रैः कीर्तिता उक्ताः ॥ ॥अथैतासां नक्षत्रवशेन नामान्या
ह ॥ प्राकृतासंज्ञा वायव्ययाम्यपैतामहानि बहुलाश्च ॥ मिश्रा गतिः प्रदिष्टा शशिशिवपितृभुजगदैवा
नि ॥ ९ ॥ संक्षिप्तायां पुष्यं पुनर्वसू फाल्गुनीद्वयं चेति ॥ तीक्ष्णायां भद्रपदाद्वयं सशाक्राश्वयुक्पौष्णं ॥ १० ॥
योगान्तिकेति मूलं द्वे चाषाढे सुतस्येंदोः ॥ घोरा श्रवणं त्वाष्ट्रं वसुदैवं वारुणं चैव ॥ ११ ॥ पापाख्या सावित्रं
मैत्रं चेंद्राग्निदैवतं चेति ॥ १२ ॥ ॥प्राकृतसंज्ञेति ॥ वायव्यं स्वाती ॥ याम्यं भरणी ॥ पैतामहं रोहिणी ॥ बहुलाः कृत्ति
काश्च ॥ एतानि नक्षत्राणि प्राकृतसंज्ञा गतिः ॥ एतेषां नक्षत्राणामेकतममाक्रान्तो बुधः प्राकृत्या गत्याक्रान्तो भवति ॥ मि
श्रागतिर्गतिरिति ॥ शशिदैवं मृगशिरः ॥ शिवदैवं आर्द्रा ॥ पितृदैवं मघाः ॥ भुजगदैवमाश्लेषा ॥ एतानि नक्षत्रा
णि बुधस्य मिश्रा नाम्नी गतिः ॥ प्रादिष्टा उक्ता संक्षिप्तायामिति ॥ पुष्यः पुनर्वसू फाल्गुनीद्वयं उत्तराफाल्गुनी ॥
एतानि नक्षत्राणि संक्षिप्तायां गतौ ॥ तीक्ष्णायामिति ॥ भद्रपदाद्वयं ॥ पूर्वभद्रपदोत्तरभद्रपदे ॥ शाक्रं ज्ये
ष्ठा । अश्वयुक् अश्विनी । पौष्णं रेवती तच्च सशाक्राश्वियुक् ॥ शाक्राश्वयुजाभ्यां सहपौष्णमित्यर्थः ॥ एता
नि नक्षत्राणि तीक्ष्णायां गतौ योगान्तिके ॥ मूलं द्वे चाषाढे पूर्वाषाढोत्तराषाढे एतानि नक्षत्राणि इंदोः सुत
स्य बुधस्य योगान्तिका नाम्नी गतिः ॥ घोरेति ॥ श्रवणं । त्वाष्ट्रं चित्रा ॥ वसुदैवं धनिष्ठा । वारुणं शतभिषक्
एतानि नक्षत्राणि घोरनाम्नी गतिः ॥ पापाख्येति ॥ सावित्रं हस्तः ॥ मैत्रमनुराधाः ॥ इंद्राग्निदैवतं विशाखा ॥
एतानि नक्षत्राणि पापाख्या पापनाम्नी गतिः ॥ इतिशब्दः प्रकाराख्य ॥ यथाह पराशरः ॥ अथास्य गतिः
सप्तान्वक्षते ॥ प्राकृता विमिश्रा संक्षिप्ता तीक्ष्णा योगान्तिका घोरा पापा च ॥ तत्र प्राकृता याम्याग्नेयरोहिणी
वायव्यानीति ॥ मिश्रा सौम्यार्द्रामघाश्लेषाश्च ॥ संक्षिप्ता पुष्यार्यम्णभाग्यादित्यानि ॥ तीक्ष्णाजपदाद्यानि
चत्वारि शाक्रं च ॥ घोरा श्रवणादीनि त्वाष्ट्रं । पापा सावित्रं द्राग्निदैवमित्राणि ॥ योगान्तिका मूलाषाढा
॥ अथ पराशरमतेन सौभाग्यस्योदयास्तमयलक्षणमाह ॥ उदयप्रवासदिवसैः उदयः सूर्यमंडला

निर्गमः॥ प्रवासस्तत्रैवास्तमयः॥ तेष्वहःसु गतिलक्षणं प्राह॥ उक्तवान्॥ चत्वारिंशदिति॥ एतानि चत्वारिंश
बृ० सं० दादीनि दिनानि प्राकृतादीनां गतीनां मध्ये प्रवासेन प्रमाणं॥ तद्यथा॥ प्राकृतायां गतौ यदि बुधः स्थित इ
देति॥ तदा चत्वारिंशद्दिनानि उदितएवातिष्ठति॥ अथास्तमेति॥ तदा चत्वारिंशद्दिनान्यस्तमितएवातिष्ठति
६३ ॥ एवंमिश्रायां त्रिंशत् संक्षिप्तायां॥ द्विसमेतानि विंशतिर्द्वाविंशतिः॥ तीक्ष्णायां दिनचक्रमष्टादश योगांतिक
यां नवा घोरायां मासार्धं॥ पंचदशदिनानि॥ पापाख्यायां दशान्येकसंयुता॥ एकादशदिनानीति॥ यद्यपि
गणितशास्त्रेणैतन्नोपपद्यते॥ तथापि पराशरमतमंगीकृत्याचार्येणोक्तं॥ तथा च पराशरः॥ अथ चत्वारिंशत्
त्रिंशद्द्वाविंशत्यष्टादश पंचदशैकादशानि च प्राकृतादिगतिकमाद्दिवसैः भिद्यंते॥ तान्येवास्तमितो भव
ति॥ उदयगतिवाप्यत्र सूर्येंदुग्रहणान्योदयति॥ सस्यविघाताय चेति॥ न केवलं पराशरेणोक्तं॥ यावत गर्गा
दिभिरपि॥ तथा च वृद्धगर्गः॥ चत्वारिंशत् प्राकृतायां गतावालक्ष्यते बुधः॥ मासमेकं विमिश्रायां दृश्यं
यित्वास्तमृच्छति॥ अन्यां द्वाविंशतिसार्धं संक्षिप्तामित्यलक्ष्यते॥ अष्टादशाहं तीक्ष्णायां घोरायां दशपं
च च॥ पापाख्यायां दशाह्नानि तथैकादश तिष्ठति॥ योग्यांतिक्यामिदं सकृत् नर्तवा दृष्ट्वा लक्ष्यते तथा॥ नारकाले
यमे सोकः सोमपुत्रस्य भार्गवः॥ अस्तकालस एव स्यात् सूर्यमंडलचारिणः॥ तथा च कश्यपः॥ चत्वारि
शत्तथा त्रिंशत् दिनानि द्वौ च विंशतिः॥ अष्टादशार्धमासं च दशैकयुतानि च॥ न च च प्राकृतायां तु सो
मजस्य दिनसंख्या॥ अस्तंगतः सर्वकाले तिष्ठतीति विनिश्चयः॥ आचार्यस्यैतन्नाभिमतं॥ यतः समाससंहि
तायां मयैवोक्तं॥ प्राकृतविमिश्रसंक्षिप्ततीक्ष्णयोगांतिकाघोरपापाख्याः॥ गतयो लक्षणमासां तोदयादि
वसैः स्फुटं भवति॥ पराशरमतेन नक्षत्रैः प्राकृतात्रिभागायाम्यार्तामिश्रागतिः नागशिरोखरभुजंगपित्र्य दैव
तानि सौम्यं च॥ संक्षिप्तानामगतिः पुनर्वसुः फाल्गुनीद्वयं पुष्यं॥ तीक्ष्णभद्रपदाद्यं नक्षत्रचतुष्टयं ज्ये ६३
ष्ठा॥ मूलाख्यश्वयोगात् घोरात्रिभं च श्रवणात् सराष्ट्रं॥ पापाख्या तिविशाखाद्दृस्तो मैत्रं च नागशिसतो
॥ ॥ अथैतासां फलान्याह॥ प्राकृतगत्या मारोग्यवृष्टिसस्यवृद्धयः क्षेमं॥ संक्षिप्तमिश्रतीक्ष्णयो

र्मिश्रमेतदन्यासु विपरीतं॥ ॥ प्राकृतायां गत्यां स्थिते बुधे आरोग्यं नीरोगता॥ वृष्टिवर्षणं॥ प्ररूढातिप्रभूता
सस्यानां वृद्धिः॥ एता भवंति॥ तथा लोके क्षेमं च भवति॥ संक्षिप्तामिश्रयोर्द्वयोर्गत्योरेतद्वृष्ट्यादिकं फलं वि
मिश्रं॥ आरोग्यवृष्टिसस्यवृद्धयः॥ क्षेमं च मध्यमं भवति॥ अन्यासु पारिशेषात्तीक्ष्णयोगांतघोरापापा
ख्यासु विपरीतं॥ अनारोग्यमवृष्टिं सस्यानामवृद्धिमक्षेममिति॥ तथा च पराशरः॥ तासां प्रमाणगति
॥ क्षेमारोग्यांबुसस्यानि॥ इतरेद्वे त्वामिश्रफले शेषाश्चतस्रो दुर्भिक्षा॥ क्षेमाय विनाशस्तु सौम्यादिषु नक्षत्रचा
री क्रूरद्वयेश्च विश्वावरुणयोश्च दक्षिणतो नैरृतं दुपूर्वासु भयकृत्॥ अश्विन्यां वणिक् विनाशाय॥ वाष्ट्रे शरत्स
स्यानां रोहिणीश्रवणाग्नेयब्रह्मराशिवं भोदविनाशः॥ हस्तोदितो मैत्रमनुचरन् पशुगोकोन्मालानभिहंति॥
विशाखा मध्यगश्च सस्यमिति॥ तथा च गर्गः॥ क्षेमारोग्यसुभिक्षेषु लक्षणा प्राकृता गतिः॥ संक्षिप्ता च वि
मिश्रा च शुभाशुभफलोदये॥ तीक्ष्णा घोरा च पापा च तथा योगांतिकापरा॥ एताश्चतस्रः सौम्यस्य दुर्भिक्ष
भेमलक्षणं॥ अधुना देवलमतेन बुधस्य गतिचतुष्टयमाह॥ ॥ ऋज्व्यतिवक्रावक्राविमला च मतेन देवल
स्यैताः॥ पंच च चतु ओर्काद्दात् ऋज्व्यादीनां षड्भ्यस्ताः॥ १४॥ प्रकृत्यैव या स्वाभाविकी गतिः सा ऋज्वी॥
वक्रं कुटिलगतित्वमाश्रित्य तन्मध्याग्रहस्य यदा भुक्ताभावो भवति तदा तिवक्रा गतिरुच्यते॥ ऋजुमार्गं परि
त्यज्य निवृत्तिं करोति सा वक्रा विमला वैकारिकी गतिः॥ यान् धना ऋज्वी चाति वक्रा च वक्रा च ताः ऋज्व्यतिव
कावक्रा॥ न केवलं ऋज्व्यतिवक्रा॥ वक्राद्या बहुकला च॥ चकारः समुच्चये॥ देवलस्य मतेनैताश्चतस्रो गत
यः॥ तथा च गर्गः॥ ऋजु गच्छति येन्मार्गमविकारं प्रदक्षिणं॥ ग्रहो यस्यानुतस्या तस्या गतिर्ऋज्वीति चोच्य
ते॥ कुर्वंति वक्रं वक्रायायस्मान्नित्यं महाग्रहाः॥ अंगारकप्रभृतयस्तस्मात् वक्रेति सा गतिः॥ वक्रादूर्ध्वम
हा वक्रमनुकुर्वंति चेद्ग्रहाः॥ अनेनैवानुमानेन सातिवक्रोच्यते गतिः॥ विक्षिपंति यथा चारान् मार्गान्
अस्तमयाद्यात॥ गतिः स्मस्माश्च विकला सा गतिः परिकीर्त्यते॥ तथा चाचार्येण विकला गतिः प्रदर्शिते
च॥ ॥ अप्राप्य मकरं कर्कं विनिवृत्तो हंति सापरांत्याम्यां॥ कर्कटमसंप्राप्तो निवृत्तः स्तयो नरान् सिंहे॥ तथा

बृ॰ सं॰ ऋषिपुत्रेणोक्तं ॥ उन्मार्गस्थान मार्गस्थान् प्रहृष्टः कुर्वीत पार्थिवान् ॥ मार्गानं तथ मार्गस्थान कुर्वीतच स धाधिपान ॥
सत्पथः प्रतिपन्नेषु पार्थिवेषु भवंति हि ॥ प्रजाः सत्पथमापन्ना विपर्यासे विपर्ययः ॥ इदानीं तेनैवाकृत्याद्या
गतयः । कृत्यतिवक्रावक्रा विकलाश्च ॥ आसां प्रमाणमाह ॥ पंचतुर्द्व्येक द्वाभ्यां ति । उदयप्रवासदिवसैस्थियनुव
६२ र्तते ॥ पंचषड्भ्यस्ताः षड्गुणितास्त्रिंशद्दिनानि भवंति ॥ एतानि कृत्यादिप्रमाणानि ॥ एतदुक्तं भवति ॥ यदा बुध
स्त्रिंशद्दिनान्युदितस्तिष्ठति ॥ अस्तमितो वा सा कृत्या नाम्नी बुधस्य गतिः ॥ एवमन्यासामपि ज्ञेयं ॥ चत्वारः ष
ड्भ्यस्ताश्चतुर्विंशतिर्दिनानि अतिवक्रायाः प्रमाणं ॥ द्वौ षड्भ्यस्तौ द्वादशदिनानि वक्रायाः प्रमाणं ॥ एकः ष
ड्भ्यस्तः षड्दिनानि भवंति ॥ एतानि विकलायाः प्रमाणं ॥ ॥ अथासां फलान्याह ॥ कृत्यादिकृता प्रजानां अ
तिवक्रार्थं गतिर्विनाशयति ॥ शस्त्रभयदा वक्रा विकलाभयरोगसंजननी ॥ १६ ॥ कृत्यागतिः प्रजानां हितासु
खकरी ॥ अतिवक्रागतिरर्थं विनाशयति ॥ दुर्भिक्षं करोति ॥ वक्रा शस्त्रभयदा शस्त्रभयं संग्रामभीतिं करो
ति ॥ विकला भयभीति रोगान् गदान् जनयति ॥ उत्पादयति । तथा च देवलः ॥ दिनानि त्रिंशदुदितास्तिष्ठे
द्यस्त्रिसौम्यजः ॥ कृत्या गतिः सा विज्ञेया प्रजानां हितकारिणी ॥ चतुर्विंशतिदिनान्येवं यदि तिष्ठत्सौम्यज
ः ॥ अतिवक्रागतिर्ज्ञेया दुर्भिक्षभयलक्षणा ॥ अहानि द्वादश बुधो यथातिष्ठत्यथास्तितः ॥ वक्रा गतिस्सा
विज्ञेया शस्त्रसंभ्रमकारिणी ॥ षड्दिनानि यदा तिष्ठेदुदितः सोमनंदनः ॥ विकलासा गतिर्ज्ञेया भयरोग
विवर्धिनी ॥ एवमस्तमयस्य सर्वगतिष्वपि फलमादिशेत ॥ सोमजस्य तु भावाः भावाय लोकानां फलं चाप्यशु
भाशुभं ॥ ॥ अथोदयास्तमययोः शुभाशुभलक्षणमाह ॥ पौषाषाढश्रावणवैशाखेष्विंदुजः समा
घेषु ॥ दृष्टो भयाय जगतः शुभफलकृत् प्रोषितस्तेषु ॥ १७ ॥ एतेषु पौषाषाढश्रावणवैशाखमासेषु
माघसहितेषु इंदुजो बुधो दृष्ट उदित इत्यर्थः ॥ जगतो लोकस्य भयाय भीत्यै भवति ॥ तेष्वेव पौषादि ६२
षु प्रोषितोऽस्तमितः शुभकृद्भवति ॥ जगतः शुभं फलं करोति ॥ अमुमेवार्थं वृद्धगर्ग आह ॥ वैशाखेषा
षमाघेषु श्रावणाषाढयोरपि ॥ न दृश्यते बुधः प्रायो मासेष्वन्येषु दृश्यते ॥ यदा दृश्येषु दृश्यः स्या

Dr. BHAU DAJI MEMORIAL

दृश्येषु न दृश्यते ॥ सर्वारोगस्तदानार्घं दुर्भिक्षं चापि निर्दिशेत ॥ तथा च पराशरः ॥ वैशाखाषाढयोर्माघपौ
षश्रावणयोस्तथा ॥ बुधो न दृश्यते जातु दृश्यते भयमादिशेत ॥ ॥ अथान्यदप्याह ॥ कार्त्तिकाश्वयुजिवायदि
मासे दृश्यते तनुभवः ॥ शिशिरांशोः शस्त्रचौरहुतभुग्गदतोयक्षुद्भयानि च तथा विदधाति ॥ १८ ॥ कार्त्ति
के आश्वयुजिमासे वा यदि शिशिरांशोः शीतरश्मेश्चंद्रस्य तनुभवः पुत्रो बुधः दृश्यते उद्गत इत्यर्थः ॥ भयःश
ब्दः प्रत्येकमभिसंबध्यते ॥ शस्त्रभयं संग्रामभीतिं । चौरभयं तस्करभयं ॥ हुतभुग्भयं अग्निभयं ॥
गदभयं रोगभयं ॥ तोयभयं अनावृष्टिभयं ॥ क्षुद्भयं दुर्भिक्षभयं ॥ एतानि विदधाति करोति ॥ अथान्यदु
दयास्तमयवशेनेंदुजस्य फलमाह ॥ ॥ रुद्ध्वानि सौम्यस्तगते पुराणि यान्युद्गतेनान्युपयांति मोक्षं ॥ अन्ये
तु पश्चादुदिते वदंति लाभः पुराणां भवतीति तज्ज्ञाः ॥ १९ ॥ ॥ सौम्ये बुधेऽस्तंगते सूर्यमंडलं यानि पुरा
णि नगराणि रुद्धानि शत्रुभिर्वेष्टितानि ॥ तानि तस्मिन्नेवोद्गते पुराणां लाभो लब्धिः ॥ उदिते रविमंडल
न्निष्क्रांते मोक्षमुपयांति प्रमुच्यंति ॥ तत्र रोधाच्चलंतीत्यर्थः ॥ अन्ये त्विति ॥ अन्ये तु पुनस्तज्ज्ञाः पंडितानं
दीप्ररश्मयः पश्चादुदिते बुधे पश्चिमायां दिश्युद्गते पुराणां लाभो लब्धिर्भवति ॥ इति वदंति कथयंति
॥ लाभश्चाभियोक्तुर्भवति ॥ अन्यथा रुदिते पुरपतेरेव ॥ तथा च नंदी ॥ पश्चार्धादुदिते सौम्ये लभते पुर
रोधकः ॥ पुनः प्रादुर्गते तस्मिन् पुरमोक्षं विनिर्दिशेत ॥ ॥ अथान्यद्बिंबलक्षणमाह ॥ हेमकांतिरथवा
शुभवर्णः शस्यकेन मणिना सदृशो वा ॥ स्निग्धमूर्तिरलघुश्च हिताय व्यत्ययेन शुभकृत् शशिपुत्रः ॥ २०
॥ ॥ हेमकांति सुवर्णाभः ॥ अथवा शुभवर्णः शुभ्रकांतिः नीलपीतवर्ण इत्यर्थः ॥ शस्यकेन मणिना
नीलेन वर्णेन सदृशस्तुल्यो वा ॥ तथा स्निग्धमूर्तिर्निर्मलो बोधो देहः ॥ अलघुर्विस्तीर्णबिंबः ॥ एवंविध
ः शशिपुत्रो लोकानां हिताय श्रेयसे भवति ॥ व्यत्ययेन उक्तविपर्ययेणाशुभकृत् अशुभकरः ॥ तथा च प
राशरः ॥ विमलरजतस्फटिकाभः प्रशस्यत इति ॥ ॥ श्री ॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ
बुधचारो नामाध्यायः सप्तमः ॥ ७ ॥ समाप्तः ॥ ॥ श्री ॥ श्री श्री ॥ ॥ श्री ॥ ॥

॥ ॥अथ बृहस्पतिचारो व्याख्यायते॥ तत्रादावेव महाकार्तिकादीनां बार्हस्पत्यवर्षाणां संज्ञाज्ञापनार्थमाह॥
बृ॰सं॰ ॥नक्षत्रेण सहोदयमस्तं वा येन याति सुरमंत्री॥ तत्संज्ञं वक्तव्यं वर्षं मासक्रमेणैव॥१॥ येन नक्षत्रेण सहोदयं
याति सुरमंत्री सुरगुरुः यस्मिन्नक्षत्रे स्थितः सूर्यमंडलादुदयं दर्शनं याति॥ तं नक्षत्रं गुरुसहितं अथवा ये
६३ न नक्षत्रेण सहास्तं याति यस्मिन्नक्षत्रे सूर्यमंडलप्राप्तगति तत्संज्ञं तन्नामधेयं वर्षं वक्तव्यं॥ कथं वाच्यं॥ तच्च
मासक्रमेणैव मासप्रतिपाद्यानंतरान्त्यस्यान्यनक्षत्रेण सहास्तंगतोऽन्यमासनक्षत्रेण सहोदयः॥ तथा रोहि
णीमृगशीर्षयोरस्तमित्यस्य संदेहव्युदासार्थमाह॥ मासक्रमेणैव यद्यन्यमासनक्षत्रेण सहास्तंगतोऽन्यमासनक्षत्रेण
सहोदितः॥ यथा रोहिण्यां सहास्तंगतो मृगशिरसश्चोदयं गतस्तदा तत्र गतिक्रांतमाससंज्ञितवर्षक्रमेण वा
ध्यमिति॥ ऋषिपुत्रादिभिरुदयमाससंज्ञितक्रमेण वर्षं ज्ञातव्यमित्युक्तं॥ ॥तथा च ऋषिपुत्र आह॥ यत्रोदि
तनक्षत्रे सह येन प्रवर्धते॥ संवत्सरः स विज्ञेयः स नक्षत्राभिधानकः॥ तथा च काश्यपः॥ संयुगवत्सरे च
रणश्चांगिरसः सुतः॥ यन्नक्षत्रोदयं कुर्यात् तत्संज्ञं वत्सरं विदुः॥ प्रभवादीनामब्दानां प्रवृत्तिर्गुरोरुदय
कालोदित एव यतो गुरुस्तत्राचारत्वेन स्थितः॥ तथा च ऋषिपुत्र आह॥ तिथ्यादिवत् युगं प्राकुर्वसिष्ठात्रिपरा
शराः॥ बृहस्पतेरुक्तं सौम्यानां यद्द्वादशवार्षिकं॥ उदेति यस्मिन्मासे तु तद्वासपतिर्गिरः॥ तस्मात्संव
त्सरो मासात्तु बार्हस्पत्योऽथ गण्यते॥ तथा च गर्गः॥ प्रयासांत सहर्क्षेणोदितो युगपंचरेत॥ तस्मात्का
लक्षयप्रवृत्तिगुरोरधःप्रवर्तते॥ केचित्कृत्तिकादियुक्ते गुरौ यच्चंद्रयुक्तं नक्षत्रं चैत्रमासादितो भवति॥ तन्ना
म महाकार्तिकादीनि संवत्सराणि प्रभवादीनि च गण्यंते परं सौरमानेन चैत्रादीनि गण्यंते तदयुक्तं॥
यस्मात् सौरमानमधिगुरुमानात् यदुक्तं तन्मानं तत्स्वल्पतरमानेनानुमीयमानं बहुतरं भवति। यथाष्ट
यवैरंगुलैन पादोना एकाशीतिहस्ताः सह यवेनानुमीयमानाद्धस्तशतं भवति॥ एवं सौरमानं गुरु ६३
मानात् चतुर्युगेन न्यूनं भवति॥ आर्यभट्टेन च प्रदर्शितं॥ गुरुभगणा राशिगुणाश्वयुजाद्या
गुरोरब्दाः गुरुभगणानां संख्या नयनवेदतुल्य भतितुल्याः॥ ३६४२२४। राशिगुणा इति॥

सगणा द्वादशराशयो भवंति॥ वैगुणा द्वादशगुणा इति॥ द्वादशगुणा गुरोरब्दाः॥ वत्सरसंख्या राशिगुणवेद तु
ल्याः॥ ४३७०६८८ रविभगणा एव रव्यब्दाः॥ खचतुष्टयरदवेदतुल्याः॥ ४३२०००० गुरोरब्दानां रव्यब्दानां
चांतरे कृते गुरोरब्दाः समधिकाः॥ ज्ञाता च खर्तुरवेषवः॥ ५०६८८ अत्र च त्रैराशिकं यदि चतुर्युगरव्यब्दानां
मंतरं प्रदर्शितं॥ गुरुरव्यब्दांतरं लभ्यते॥ तदेकस्य रव्यब्दस्य किं यदीति न्यासः॥ ४३२००००।५०६८८।१।
फलं रविभागहृति। रव्यब्दानां कृतखगुणयमैः॥ २३०४। अपवर्तितानां भागांशं दत्वा लभ्यते॥ १८७५॥ ता
वद्भागेन रविगुरुवर्षांतरस्य द्व्यधिका विंशतिर्भवति॥ २२॥ स सत्यब्दशते एकादशभागैः पंचभिरधिके गते
गुरुयुक्तनक्षत्रमाससंवत्सरसंज्ञा। वर्षद्वयमधिकं भवति॥ तथा च गर्ग आह॥ युगानि द्वादशाब्दानि तत्र तानि बृह
स्पतेः॥ तत्र सावनसौराभ्यां मासानाब्दानि रुच्यंते॥ एवमाश्वयुजं चैव चैत्रं चैव बृहस्पतिः॥ संवत्सरेणाश्वयेस
सत्यब्दशतेधिके॥ एवं नष्टजातकलग्नत्रिकोणेषु गुरुस्थिभागैर्विकल्प्य वर्षाणि वयोनुमानादिप्रयत्नेन गणि
तेनानीतानि तानि वर्षाण्यागतानि॥ अधिकवर्षाविंशत्या गुणयित्वा पादोनैरेकोनविंशतिशतैर्विभज्य॥ १८७५
लब्धमनंतरोक्तकालगुरुणा तीतजन्मवर्षाणि विशोध्य शेषं स्फुटतरमतीतजन्मवर्षपिंडो भवतीति॥ अ
थ गुणकारभागहारयोराचार्येण द्विगुणितोपगुणितश्च द्वयं न आचार्यप्रणीतम् अथ स्वब्दाद्वयं वर्षद्वयं त्र
यो मासाश्चतुर्दशदिनानि॥ दिनमेव नाश्चि द्विशतस्य गोष्टरूपछेदा॥ तत्परिणामाय छेदस्तेन वर्षद्वयेन सं
गुण्य ततो मासत्रयं दिनानि कृत्य सदिनं कृत्वा तेन छेदं संगुण्य शेषं संयुक्तं कृत्वा रसवेदाग्निभिर्विभज्याप्तं॥
३६०॥ ज्ञात पंचकं चतुश्चत्वारिंशत् अधिकं सार्धं तच्च वर्षद्वयापच्छेदं संयोज्यात॥ तस्य च सविकल्पात् सवर्ण
नीय द्वाभ्यां गणना क्रियते॥ स्वधः स्वरूपार्धयोज्यते॥ ततः सवर्णिता भवति॥ एवं क्षेपस्य द्विगुणत्वात् गु
णकारं भागहारं च आचार्येण द्विगुणावुपनिबद्धाविति॥ तदर्थं न तु अश्वत्वारिंशत् गुणकारः॥ शून्यद्वारां गराग
माभागाहार इति॥ यदुक्तं मासक्रमेणैव तत्कथमित्यत आह॥ ॥ वर्षाणि कार्तिकादीन्याग्नेयाद्भद्वयानु
योगीनि॥ क्रमशस्त्रिभं तु पंचमपांत्यसत्यं च यद्रूपं॥ कार्तिकादीनि कार्तिकमासि पूर्वाणि वर्षाणि भवंति॥

बृ०सं०

६४

मासस्मानि द्वादश च तानि चाग्नेयकृत्तिकाप्रभृति भद्वयानुयोगीनि। भद्वयेनानुयोगो येषां। नक्षत्रद्वयानु
योगीनि। क्रमशः क्रमेण परिपाट्या भवन्ति। त्रिभं तु पंचममुपान्त्यमन्त्यं च यदुद्दिष्टमिति। पंचमं फाल्गुनवर्षं
त्रिभं नक्षत्रत्रयानुयोगि अन्त्यं द्वादशं चाश्वयुजं त्रिभं तस्य समीपं उपान्त्यं। एकादशं त्रिभमेव। उपांत्यमं
त्यं च यदुद्दिष्टं त्रिभं तथा। तद्यथा॥ कृत्तिकारोहिणीभ्यां कार्तिकः॥ मृगशिरआर्द्रा मार्गशीर्षः॥ पुनर्वसुपुष्या
भ्यां पौषः॥ आश्लेषामघाभ्यां माघः॥ पूर्वाफाल्गुन्युत्तराफाल्गुनीहस्तैः फाल्गुनः॥ चित्रास्वातिभ्यां चैत्र
ः॥ विशाखानुराधाभ्यां वैशाखः॥ ज्येष्ठामूलाभ्यां ज्येष्ठः॥ पूर्वाषाढोत्तराषाढाभ्यामाषाढः॥ श्रवणधनि
ष्ठाभ्यां श्रावणः॥ शतभिषक्पूर्वाभाद्रपदोत्तराभाद्रपदाभिः भाद्रपदः॥ रेवत्यश्विनीभरणीभिराश्वयुजः॥ इति
। तदुक्तं भवति। यदा कृत्तिकायां रोहिण्यामवस्थितो वा गुरुरुदयं याति। तदा तत्कार्तिकवर्षं ज्ञेयं। एवमन्येषाम
पि। अत्रान्ये एवं व्याचक्षते। यथा पंचममन्त्यं चेत्यत्रोपान्त्यमेकादशमन्त्यं चेत्यत्रान्त्यशब्दः समीपवाची। उपां
त्यस्य एकादशस्य समीपं दशमं श्रावणं। न तु द्वादशमाश्वयुजमिति। यतस्तत्र गर्गादिवचनैः सह विरोधो भ
वति॥ ॥तथा च गर्ग आह॥ फाल्गुनाद्धस्तचित्रे द्वे चरेद्यदि बृहस्पतिः॥ स फाल्गुनोऽब्दः क्रूरः स्यात् धान्यम
हार्घतां व्रजेत॥ श्रवणादीनि चेत्त्रीणि चरेद्यदि बृहस्पतिः॥ श्रावणो नाम सोऽब्दः स्यात् क्षेमसौभिक्ष्यपुष्टि
मान्॥ पूर्वोत्तरे प्रोष्ठपदे चरेद्रेवतीमेव च॥ प्रोष्ठपाद इति ज्ञेयो मध्यमो वत्सरो द्विजः॥ अश्विनं चैव याम्यं
च चरेद्यदि बृहस्पतिः॥ संवत्सरः सोऽश्वयुक् स्यात् सर्वभूतहितावहः॥ तथा च पराशरः॥ कृत्तिकारोहि
णीषूदिते। सुतनुगाम्यास्यनारोहि व्याधिप्राबल्यं गोशाकटिकपीडा च। सौम्यरौद्रयोरत देवगवादिस्वर्ग
॥ पुनर्वसुतिष्ययोः ... विपर्ययः॥ पुष्यवत्स्याश्लेषामघासु। राज्ञामुपगतापश्च॥ फाल्गुनीसावित्रेषु क्वचित्
क्वचित्क्षेमसुभिक्षमीरदोर्भाग्यं च॥ चित्रास्वात्योरतिदीतोन्नरुपस्यचर्षक्षेमारोग्यकरः॥ एवमेव मैत्रेन्द्र ६४
योः॥ ऐंद्रनैर्ऋतयोर्वा नस्याति सस्यवर्षेश्चेषन्नृपतिप्रधानानां विनाशाय॥ एतद्वयद्वये॥ आषाढयोः प्राप्त
रसानां द्वयेम मध्यक्षेमवर्षमन्योन्यभेदश्च॥ श्रवणधनिष्ठावारुणेषु यत्नेन्नसस्यवर्षारोग्यवृद्धये॥

अजाहिर्बुध्न्यपौष्णेष्वाषाढवत्फलं। प्राकृतसस्याविपर्ययः॥ प्रभूततृणसस्यादिनिलक्षणमाश्वयुक्भरण्यो
रिति। एवमर्थान्तरेण समीपं दशमं च वर्षं श्रावणमन्त्यमाश्वयुजमिति। शोभनं। अत्र केचित्कृषिपुत्रस्य म
तमिदं मन्यन्ते। त्रिनक्षत्रास्त्रयस्तत्र स्युः॥ सौम्यत्वाष्ट्रे वैश्वाख्याः। द्विनक्षत्राः स्मृताः शेषाः पूर्वपश्चिमयोग
तः॥ स्वमतेनैतन्न विरुध्यते। यतस्त्रिनक्षत्रयो मार्गशीर्षस्तथा माघश्च तिकनक्षत्रो भवति। द्विनक्षत्राः स्मृताः
तेन नक्षत्रो नास्त्येव। तस्मात्पुस्तकपाठोऽयं सिद्धान्तपाठः कथ्यते। त्रिनक्षत्रास्त्रयस्तत्र ते याम्यार्द्रवैश्वा
॥ द्विनक्षत्राः स्मृताः शेषाः पूर्वपश्चिमयोगतः॥ तथा च गर्गः॥ नव चारा द्विनक्षत्रास्त्रयो द्वादशमासकाः॥ शेषा
स्त्रयस्त्रिनक्षत्राः पंचमैकादशान्तिकाः॥ तथा च कश्यपः॥ कार्तिकादिसमाख्याता द्विनक्षत्राश्च चारिणः॥ त्रिभं
भाद्रपदं ज्ञेयं फाल्गुनं श्रावणं तथा॥ तस्मात्क्रमशस्त्रिभं तु पंचममुपान्त्यमन्त्यं च॥ यदुक्तमिति। अत्र पंचमैका
दशद्वादशास्त्रिनक्षत्रकाः शोभनं॥ अथैतेषां कार्तिकादीनां वर्षाणां फलान्याह॥ ॥शकटानलोपजीविगो
पीडाव्याधिशस्त्रकोपश्च॥ वृद्धिस्तु रक्तपीतककुसुमानां कार्तिके वर्षे॥३॥ ॥कार्तिके वर्षे शकटजीविनां। श
कटेन गंत्र्या ये जीवन्ति तेषां॥ तथा अनलोपजीविनां सुवर्णकारलोहकारादीनां गवां च पीडा भवति॥ तथा
च व्याधयो रोगाः॥ शस्त्रकोपश्च युद्धानि भवन्ति॥ तथा रक्तपीतकुसुमानां द्रव्याणां॥ रक्तं पीतं च पुष्पं येषां संभ
वति तेषां वृद्धिर्भवति॥ तथा च गर्गः॥ कार्तिकः प्रचुरातंकः शुष्कस्त्वग्निभयप्रदः॥ गोशाकटिकपीडाकृत्सर्व
मशक्तिदः॥ ॥अथ मार्गशीर्षस्याह॥ सौम्येऽब्दे नावृष्टिः मृगाखुशलभांडजैश्च सस्यवधः॥ व्याधिभयं मित्रै
रपि भूपानां जायते वैरं॥४॥ ॥सौम्ये मार्गशीर्षेऽब्दे अनावृष्टिर्भवति॥ मृगा आरण्याः पशवः॥ आखवो
मूषकाः॥ शलभाः प्राणिनः कीटजातयः॥ अंडजाः पक्षिणः॥ एते सस्यानां वधाय नाशाय भवन्ति॥ तथा
व्याधिभयं रोगभयं रोगभीतिः॥ भूपानां राज्ञां मित्रैरपि सुहृद्भिरपि वैरं अप्रीतिर्जायते॥ उत्पद्यते॥ कंप
नः शत्रुभिः सह नभवेदिति॥ तथा च गर्गः॥ नवाहीना व्याधिकरो मिश्रभेदभयावहः॥ शलभाद्याकुलः
सौम्यो दुर्भिक्षस्य कारकः॥ ॥अथ पौषस्याह॥ शुभकृज्जगतः पौषो निवृत्तवैराः परस्परं क्षितिपाः॥

द्विगुणा धान्यार्घः पौष्टिककर्मप्रसिद्धिश्च॥५॥ पौषाब्दे जातो लोकस्य स्वस्थभवतश्च भमिष्टं करोति। शिशिरतया
व० सं० राजानः परस्परमन्योन्यं नित्यं वैरा विरागद्वेषा भवंति। द्वित्रिगुणा धान्यार्घः॥ धान्यस्यार्घो द्विगुणस्त्रिगुणो
वा भवति। धान्यस्य यन्मूल्यं मासं तेन वा द्विगुणं त्रिगुणं वा धान्यं लभ्यते॥ तथा पौष्टिककर्मणां पुष्टिदानां का
६५ र्याणां प्रसिद्धिर्भक्त्यातिशयेन भवतीत्यर्थः॥ तथा च गर्गः॥ प्रशांतव्याधिदुर्भिक्षदस्वर्षा शानितस्करः॥ सर्वल
क्षणसंपन्नः पौषः संवत्सरोत्तमः॥ ॥अथ माघस्याह॥ पितृपूजापरिवृद्धिर्माघे हार्दिश्च सर्वभूतानां॥ आ
रोग्यवृष्टिधान्यार्घसंपदो मित्रलाभश्च॥६॥ माघेब्दे पितृणां पूजापरिवृद्धिर्भवति। अत्यर्थं जनाः पितृपू
जापरायणा भवंतीत्यर्थः॥ मघा पितृदैवतत्वात॥ सर्वभूतानां हार्दिश्च तुष्टिर्भवति। तथा आरोग्यं नीरो
गता॥ वृष्टिवर्षणं॥ धान्यस्यार्घसंपत्समर्घता॥ एते भवंति। तथा मित्रलाभश्च भवति। यः कश्चिन्मित्र
त्वमापद्यत इत्यर्थः। तथा च गर्गः॥ क्षेमारोग्यसुभिक्षं च वर्षणं त्रिय मेचत्र॥ पितृपूजा प्रवर्धते माघे राज्ञां
वशालयः॥ ॥अथ फाल्गुन आह॥ फाल्गुनवर्षे विंद्यात् क्वचित् क्वचित् क्षेमवृष्टिसस्यानि। दौर्भाग्यं प्रमदा
नां प्रबलाश्चौरा नृपाश्चोग्राः॥७॥ ॥फाल्गुनवर्षे क्वचित् क्वचित् क्षेमवृष्टिसस्यानि चावघातं जानीयात॥
क्वचित्क्षेमं क्वचिद्वृष्टिः। क्वचित्सस्यं न भवति सर्वत्र॥ तथा प्रमदानां स्त्रीणां दौर्भाग्यं दुर्भगत्वं भर्तॄणामवाल
भ्यं भवति॥ प्रबलाश्चौराः तस्कराः बहवो भवंति। नृपाश्च राजान उग्राः क्रूराः भवंति। तथा च गर्गः। नारीदुर्भाग्य
कृद्घोरः फाल्गुनः सस्यवर्षदः॥ क्वचित्क्षेमं सुभिक्षं च क्वचित्क्षेमकारकः॥ ॥अथ चैत्रस्याह॥ चैत्रे मंदा वृष्टिः
प्रियमन्नं क्षेममवनिपा मृदवः। वृद्धिश्च कोशधान्यस्य भवति पीडा च रूपवतां॥८॥ चैत्रेब्दे वृष्टिर्मंदा अल्पा भ
वति। प्रियमन्नं सदुर्लभमन्नं भवति॥ लोके क्षेमं कल्याणं॥ तथा अवनिपा राजानो मृदवः क्रूरा भवंति॥ कोश
धान्यस्याशीति धान्यस्य मुद्गादेर्वृद्धिर्भवति। बाहुल्यं जायते॥ तथा रूपवतां मनुष्याणां पीडा भवति॥ चशब्दः ६५
समुच्चये॥ तथा च गर्गः॥ मृदुप्रचुरा राजानः प्रियमन्नं जनस्य च॥ क्षेमारोग्यं मंदवृष्टिश्चैत्रवर्षे तथा मृदुः
॥ ॥अथ वैशाखस्याह॥ वैशाखे धर्मपरा विगतभयाः प्रमुदिताः प्रजाः सनृपाः॥ यज्ञक्रियाप्रवृत्तिर्निष्पत्तिः

सर्वसस्यानां॥९॥ वैशाखेब्दे सनृपाः प्रजाः नृपेण राज्ञा सहिताः सर्वे जनपदा धर्मरता धर्मसक्ता॥ विगतभ
या भयरहिताः। प्रमुदिताः प्रहृष्टा भवंति। तथा यज्ञक्रियाणां यागकर्मणां प्रवृत्तिः प्रवर्तनं भवति। सस्यानां
सर्वेषां निष्पत्तिः। अशेषाणि सस्यानि भवंतीत्यर्थः। तथा च गर्गः। ईतयः प्रशमं यांति सत्रं कुर्वंति पार्थिवाः॥
वैशाखः सस्यजननो वृष्टयः संभवंति हि॥ ॥अथ ज्येष्ठ आह॥ ज्येष्ठे जातिकुलधनश्रेणीश्रेष्ठा नृपाश्च धर्म
ज्ञाः पीड्यंते धान्यानि च हित्वा कंगुशमीजातिं॥१०॥ ज्येष्ठेब्दे जातिकुलधनश्रेणीश्रेष्ठाः॥ जातीनां ये श्रेष्ठाः
प्रधानाः। कुलश्रेष्ठाः सत्कुलजाः॥ धनश्रेष्ठा अतिधनिनः। श्रेणीश्रेष्ठाः। बहूनां समानजातीयानां संघः श्रे
णी तत्र श्रेष्ठाः प्रधानाः॥ नृपा राजानः ते च सधर्मज्ञाः धर्मवेदिनः सहिताः॥ एते सर्व एव पीड्यंते। सर्वाण्येव
सस्यानि॥ किंतु हित्वा कंगुशमीजातं॥ कंगु प्रियंगुः। शमीजातिस्तिलमुद्गादिः। केचिच्छमीजातिरिति पठंति
॥ एतान् हित्वा वर्जयित्वा॥ तथा च गर्गः॥ वृक्षगुल्मलता सस्यक्षेमवर्षविनाशनः॥ कुराज्ञां दारिद्र्यजननो ज्येष्ठ
सः श्रेष्ठनृपांतकृत॥ ॥अथाषाढ आह॥ आषाढे जायंते सस्यानि क्वचिद्वृष्टिरन्यत्र॥ योगक्षेमं मध्यं व्य
ग्राश्च भवंति भूपालाः॥११॥ आषाढेब्दे क्वचित् क्वचित् सस्यानि जायंते उत्पद्यंते। न सर्वत्र॥ अन्यत्रान्य
देशे वृष्टिरवर्षणं भवति॥ तथा लोके क्षेमं मध्यमं भवति॥ अलब्धलाभो योगः॥ लब्धपालनं क्षेमः॥ तद्व
मध्यमं भवति॥ न चात्युत्कृष्टं न चातिनिकृष्टमित्यर्थः॥ भूपाला राजानो व्यग्राः॥ सोद्यमा भवंति॥ तथा गर्ग
ः॥ दुर्भिक्षक्षेमजननश्चाषाढोन्योन्यभेदकृत॥ भूपालयुद्धजननो मध्यमक्षेमकारकः॥ अथ श्रावणः
आह॥ ॥श्रावणवर्षे क्षेमं सम्यक् सस्यानि पाकमुपयांति। क्षुद्रा ये पाषंडाः पीड्यंते ये च सद्भक्ताः॥१२
॥ श्रावणवर्षे क्षेमं भवति। तथा सर्वाणि सस्यानि सम्यक् निश्चयेन पाकं निष्पत्तिमुपयांति प्राप्नुवंति
॥ तथा ये क्षुद्राः क्रूराः पाषंडा वेदबाह्यास्ते सर्वे पि पीड्यंते॥ ये च तद्भक्ता स्तेषां पाषंडानां भक्ताः सेव
काः स्तेपि पीड्यंते बाध्यंते॥ तथा च गर्गः॥ श्रवणः सस्यसंपन्नः क्षेमारोग्यकरः स्मृतः॥ धान्यं च म
र्घतां यातं सम्यक् वर्षति वासवः॥ क्षुद्राः पाखंडिनः सर्वे तद्भक्ताश्चोपतापयेत॥ अथ भाद्रपदाह॥

भाद्रपदे चन्द्रीतं निष्पत्तिं याति पूर्वसस्यं च ॥ न भवत्यपरं सस्यं क्वचित् सुभिक्षं क्वचिच्च भयं ॥ २३ ॥ भाद्रपदे देवे
बृ॰सं॰ ज्योतिं मुद्गादिकं निष्पत्ति परिपाकं याति प्राप्नोति ॥ तथा च पूर्वं प्रथमं मुद्गं निष्पत्तिं याति ॥ अपरं पश्चात् उत्पन्नं स
स्यं न भवति ॥ क्वचित् सुभिक्षं क्वचिद्देशे भयं भीतिर्भवति ॥ तथा च गर्गः ॥ प्रोष्ठपदे तु सस्यानां नाशो
६६ यत्यपरं च तत् ॥ क्वचित् वृष्टिः क्वचित् क्षेमं क्वचिदक्षेमकारकः ॥ ॥ अथाश्वयुज्याह ॥ आश्वयुजेऽब्दे ऽजस्रं
पतति जलं प्रमुदिताः प्रजाः क्षेमं ॥ प्राणचयः प्राणभृतां सर्वेषामन्नबाहुल्यं ॥ २४ ॥ आश्वयुजेऽब्दे अजस्रं स
ततं जलं वृष्टिः पतति ॥ सततं वर्षतीत्यर्थः ॥ तथा सर्वाः प्रजाः प्रमुदिताः प्रहृष्टाः क्षेमं च भवति ॥ तथा प्राण
भृतां शरीरिणां सर्वेषां अवशेषाणां प्राणचयो बलोपचयो भवति ॥ तथान्नबाहुल्यं अति सुभिक्षं च ॥ तथा
च वृद्धगर्गः ॥ पर्याप्तसस्यो तज्जलः क्षेमश्चाश्वयुजः स्मृतः ॥ संप्रहृष्टोत्सवः श्रीमान् सर्वकामः सुखावहः ॥
तथा समास संहितायां ॥ गुरुरुदयं नक्षत्रे यस्मिन् तत्संज्ञानि वर्षाणि ॥ द्वितीये ज्येष्ठा ग्यात्तत्त्रिभं त्र्यं पंच
मम् पांत्यं ॥ अनेन वाक्येन आचार्यस्य प्रमाणमेव व्याख्या साध्वी ॥ उपांत्यमेकादशं अंत्यं द्वादशमिति ॥
तथा च फाल्गुनचैत्राषाढमध्याः सौम्याधमस्तथाऽपरे ॥ वैशाखपौषमाघाश्च ॥ अथ नक्षत्रचर
तो गुरोर्विशेषफलमाह ॥ ॥ उदगारोग्यसुभिक्षक्षेमकरो वाक्पतिश्चरन् भानां ॥ याम्येन तद्विपरीतो मध्ये
न मध्यफलदायी ॥ वाक्पतिर्बृहस्पतिर्भानां नक्षत्राणां उत्तरेण चरन् गच्छन् आरोग्यसुभिक्षक्षेमकरः ॥
आरोग्यं सुभिक्षं क्षेमं करोति ॥ याम्येन दक्षिणेन चरन् तद्विपरीतः अनारोग्यमसुभिक्षाऽक्षेमं करोति ॥ म
ध्येन चरन् मध्यभागेन नक्षत्रस्य गच्छन् मध्यफलप्रदायी भवति ॥ मध्यमं फलं ददातीत्यर्थः ॥ न शुभं नाशुभमि
ति ॥ ॥ अन्यदप्याह ॥ विचरन् भद्वयमिष्टः तत्सार्धवत्सरेण मध्यफलः ॥ सस्यानां विध्वंसी किंचिदधिकं य
दि कदाचित् ॥ २६ ॥ ॥ संवत्सरेण वर्षेण भद्वयं नक्षत्रद्वयं विचरन् गच्छन् गुरुरिष्टः शोभनः ॥ एतदुक्तं भवति ६६
॥ बृहस्पतिर्यदा वर्षेण नक्षत्रद्वयं भुंक्ते तदा प्रजानां शुभकरो भवति ॥ तत्सार्धवत्सरेण मध्यफलः ॥ तन्नक्ष
त्रद्वयं सार्धयदि वत्सरेण विचरति तदा मध्यफलं ॥ मध्यमं फलं करोति ॥ न शुभं नाशुभमित्यर्थः ॥ सस्या

नां विध्वंसमतः ॥ अधिकं भद्वयात्सार्धं यदि कदाचिद्गुरुरेकवर्षेण तदा सस्यानां विध्वंसी भवति ॥ सस्यानि विनाश
यतीत्यर्थः ॥ तथा च पराशरः ॥ मध्यदक्षिणोत्तरमार्गप्रविचारी मध्यचारी मध्यदारुणोत्तमप्रजाभावकराः ॥
श्वेतरक्तपीतकृष्णवर्णा ब्राह्मणादिवर्णाश्रयाय ॥ सपादमृक्षद्वयमब्देन प्रविचरन् सर्वसस्यसंपत्करो वि
पर्ययाद्विपरीतः ॥ अथ गुरोर्वर्णलक्षणमाह ॥ ॥ अनलभयमनलवर्णे व्याधिः पीते रणागमः श्यामे ॥
हरिते चैतस्करेभ्यः पीडा रक्ते तु शस्त्रभयं ॥ २७ ॥ धूमाभे नावृष्टिः त्रिदशगुरोर्नष्टवधो दिवा दृष्टे ॥ विपुले
मलेऽमुतारे रात्रौ दृष्टे प्रजाः स्वस्थाः ॥ २८ ॥ ॥ अनलभयमिति ॥ त्रिदशगुरौ देवाचार्ये बृहस्पतौ अनलवर्णे
अग्निगर्भे अनलभयमग्निभीतिर्भवति ॥ पीते पीतवर्णे व्याधिः पीडा ॥ श्यामे श्यामवर्णे रणागमः संग्रामः ॥
हरिते हरिद्वर्णे शुकाभे तस्करेभ्यः पीडोपतापो लोकानां भवति ॥ रक्ते लोहितवर्णे शस्त्रभयं ॥ धूमाभे धूमप्र
भे नावृष्टिरवर्षणं ॥ दिवसभागे दृष्टे नृपवधो राज्ञो मृत्युर्भवति ॥ तथा च पराशरः ॥ कदाचित्तत्र दृश्यते दि
वा दृष्टपुरोहितः ॥ राजा चाभ्रियते तत्र सदेशो चापि नश्यति ॥ विपुले विमल इति ॥ विपुले महति बिंबे अमले नि
र्मले सुतारे शोभनतारे रात्रौ निशि दृष्टे प्रजा लोकाः स्वस्थानीरुजो भवंती ॥ केचिन्नृपाः स्वस्था इति पठंति ॥ अथ सं
वत्सरपुरुषमाह ॥ ॥ रोहिण्योऽनलभं च वत्सरतनुर्नाभिस्त्वषाढाद्वयं सार्पं हृत्पितृदैवतं च कुसुमं शुद्धैः शुभैः
फलं ॥ देहे क्रूरनिपीडिते त्वग्न्यनिलजं ताभ्यां भयं क्षुत्कृतं पुष्पे मूलफलक्षयोऽथ हृदये सस्यस्य नाशो ध्रुवं ॥ २९
॥ ॥ रोहिण्योऽनलभं च वरं कृत्तिका एते द्वे नक्षत्रे संवत्सरतनुः संवत्सरपुरुषस्य शरीरं ॥ आषाढाद्वयं पूर्वाषा
ढोत्तराषाढे तस्यैव नाभिः ॥ सार्पमाश्लेषा हृदयं ॥ पितृदैवतं मघा तु कुसुमं ॥ पुष्पमिति ॥ प्रयोजनमप्याह
शुद्धैः शुभैः फलमिति तच्चादिभिः शुद्धैः पापग्रहरहितैः लोके शुभं फलं भवति ॥ देहे क्रूरनिपीडित इति ॥ क्रू
रग्रहा रविभौमसौराः ॥ देहे तनौ कृत्तिकारोहिण्यादित्यर्थः ॥ क्रूरनिपीडिते क्रूरहतैस्तथोत्थैर्दीपिताः स्थिता
भवंति तदाग्न्यनिलजं भयं भवति ॥ अग्निर्दुर्वहः अनिलो वायुः ॥ अनयोर्जातं तथा ताभ्यां पीडितायां मा
षाढाद्वय इत्यर्थः ॥ क्षुत्कृतं दुर्भिक्षं भयं भवति ॥ पुष्पे मघायां पीडितायां मूलफलक्षयः ॥ मूलानां मू

मूलद्रव्याणां फलानां चाप्यादीनां क्षयो विनाशो भवति॥ अथाब्दः स्वार्थे हृद्येनिर्यातिते श्वेतायांध्रुवमवश्यं सस्य
नाशो भवति॥ तथा च काश्यपः॥ कृत्तिकारोहिणीपार्श्वे संवत्सरतनुः स्मृतः॥ आषाढद्वितयं नाभिः सार्पर्क्षं कुसुमम
घा॥ क्रूरस्य ह गते देहे दुर्भिक्षाग्निमारुतान्॥ भयं तनु भवेत्ताभ्यां पुष्पमूलफलक्षयः॥ हृदयस्य स्मृता नित्या
तसौम्ये पुष्टिः प्रकीर्तिताः॥ अधुना षष्ट्यब्दानयनमाह॥ ॥ गतानि वर्षाणि शकेंद्रकालाद्धतानि रुद्रैर्गुणयेच्च
तुर्भिः। नवाष्टपंचाष्टयुतानि कृत्वा विभाजयेच्छून्यशरागरामैः॥२०॥ लब्धेन युक्तं शकभूपकालं संशोध्य
षष्ट्या विषयैर्विभज्य॥ युगानि नारायणपूर्वकाणि लब्धानि शेषाः क्रमशः समाः स्युः॥२१॥ शकानामम्लेच्छजा
तयो राजानस्ते च यस्मिन्काले विक्रमादित्यदेवेन व्यापादिताः शकाः॥ स कालो लोके शक इति प्रसिद्धः॥ तस्मात् शकें
द्रकालात् शकनृपवधे रारभ्याभीष्टवर्षं यावत् यानि वर्षाणि गतान्यतीतानि तानि संस्थाप्य हतानि रुद्रैः॥ रुद्रैरे
कादशभिर्गुणयेत्॥ ततः पुनरपि चतुर्भिर्गुणयेत्॥ एवं चतुश्चत्वारिंशता गुणितानि भवंतीत्यर्थः॥ ततो
नवाष्टपंचाष्टयुतानि कुर्यात्॥ अष्टभिः सहस्रैः पंचभिः शतैरेकोननवत्यधिकैरित्यर्थः॥ ८५८९॥ एवं कृत्वा
ततः शून्यशरागरामैर्विभजेत्॥ त्रिभिः सहस्रैः सप्तभिः शतैः सार्धैरित्यर्थः॥ ३७५०॥ एतैर्भागमपहरेत्।
लब्धफलं वर्षाणि तान्येव बृहस्पतिराशयः॥ शेषं त्रिंशता संगुण्यते नैव च्छेदेन विभज्यावाप्तं॥ भागाः त्रिंशी
नामधः स्थाप्याः॥ भागशेषं षष्ट्या संगुण्यते नैव च्छेदेन विभज्याप्तं भागाः॥ लिप्तानामधः स्थाप्याः शेषं ष
ष्ट्या संगुण्यते नैव भागाप्ता संविलिप्ताः लिप्तानामधः स्थाप्याः॥ लब्धेन युक्तमित्यर्थः॥ ततस्तेन लब्धेन राश्या
दिना फलेन शकभूपकालं शकनृपसमानयुक्तं कार्यं वर्षेषु राश्यायक्षेप्याः लिप्तमधः स्थापयेत्॥ यतस्तानि
वर्षरूपाण्येव गुरोराशयः संपन्नाः॥ ततः संशोध्य षष्ट्या वर्षस्थाने यो सौ राशिर्जाता तस्याः षष्ट्या भागम
पहरेत्॥ लब्धमतीतषष्ट्यब्दाः॥ शेषं वर्तमानषष्ट्यब्दस्य गतवर्षाणि॥ यतो गुरुराशिभोग एव वर्षः॥ तत
स्तान्यनष्टान्यन्यत्र विषयैः पंचभिर्विभज्य लब्धं वर्तमानषष्ट्यब्दस्यातीतयुगानि॥ तानि च नारायणपूर्व ६७
काणि विष्णुप्रभृतीनि भवंति। पंचभिर्भागे हृते यच्छेषं तदेव वर्तमानयुगस्याब्दाः॥ सविकलागताः॥ शेष

क॰

पंचभ्यः पंचभ्यः संशोध्य यद्वशिष्यते तावंति वर्षाणि तद्युगं भवति॥ ॥ अथ बृहस्पतिनक्षत्रस्थानं येनोनच
वर्षं तानमाह॥ एकैकमब्देषु नवाहतेषु दत्वा पृथक् द्वादशकक्रमेण॥ हृत्वा चतुर्भिर्वसुदेवताद्यान्युडूनि शेषं स्याक
पूर्वमब्दं॥२२॥ ॥ वर्तमानस्य षष्ट्यब्दस्य ये गताः सविकला अब्दाः अनष्टाः पृथक् स्थापिताः तान् सविकलान् पृ
थगेकत्र नवभिर्गुणयेत्॥ ततो द्वितीयस्थानेभ्यो वर्तमानषष्ट्यब्दगतवर्षेभ्यो द्वादशभागगतवर्षाद्येकं गृहीत्वा
ता नवभिर्गुणिते ष्वब्देषु योजयेत्॥ यदुक्तं॥ एकैकमब्देषु नवाहतेषु दत्वा पृथक् द्वादशकक्रमेणेति॥ द्वादशक्र
मेण द्वादशभिर्वर्षैरेकैकं योजयेत्॥ वर्षस्थाने द्वादशभिर्भागमपहृत्य लब्धं वर्षाणि तदेव राशयः॥ शेषं त्रिं
शता षष्ट्या च संगुण्य सविकलसहितं कृत्वा प्राग्वा भावा द्यानीयत इदं च रां शा नामधः स्थापयित्वा ततद्वादशभा
गं न वा हृत वर्षेषु योजयेत्॥ यथास्थानमेव॥ ततः स्वच्छेदैर्भागमपहृत्यवाप्तं॥ यथास्थानमुपर्युपरि
योजयेत्॥ ततस्तत्र चतुर्भिर्भागमपहृत्य यल्लब्धं तानि नक्षत्राणि वसुदेवाद्यानि धनिष्ठादीनि भवंति॥ शे
षं स्थाप्यं लब्धमस्य सप्तविंशत्या भागमपहृत्यावशेषांकसमं धनिष्ठादिकं नक्षत्रं वक्तव्यं॥ तत्र चतुर्विभा
गहृते यच्छेषं स्थापितं तदंशाः पूर्वमब्दं भवति॥ लब्धसंख्यनक्षत्रात् परस्परनक्षत्रस्य तावद्भिरंशैः च
तुर्भागे गुणाभक्तैर्वर्तमानानपूर्वस्य कार्तिकादेः प्रवृत्तिरिति॥ यदुक्तं॥ वर्षाणि कार्तिकादीन्याग्नेयाद्
द्भयानुयोगीनि॥ एतन्मध्यमगत्या तेयं न स्फुटगत्येति॥ अत्रानयनमाचार्येण स्फुटतरं पंचसिद्धांतिका
यामुक्तं॥ तथा च॥ रविशशिनोः पंचयुगं वर्षाणि पितामहोपदिष्टानि॥ अधिमासो त्रिंशत्सु मासेषु
व मन्त्रिपक्ष्यहान्॥ झनंशांकेंद्रकालं च पंचभिरुद्धृत्य शेषवर्षाणां द्विगुणं माघसिताद्यं कुर्यात् युगपनत
दुदयात्॥ सैकान्त्रिंशाद्युगुणेति॥ तिथिभिर्मासेन वा हृतेषु कैर्वाहादिग भागैः सप्तभिर्नक्षत्रैर्भधनिष्ठा
द्यमिति॥ गतानि वर्षाणीत्यत्रोपपत्तिः प्रदर्श्यते॥ पूर्वमेव स्वच्छदानां गुरुवर्षाणां चांतरं कृतं त्रैराशिकेन प्र
तिवर्षमंतरं प्रदर्शितं॥ तत्र फलाभावात् भाज्यभाजक राशी द्वावप्यपवर्तितौ॥ तत्र भाज्यराशेर्लब्धं द्वाविंश
तिः २२॥ भाजकराशेः शरागाग्नेंदवः १८७५ तत्र शकेंद्रकालात् गतवर्षाणि सौराणि यानि तानि॥ तानि च

Dr. BHAU DAJI

बार्हस्पत्यान्यानीयंते॥ कथमुच्यंते। पृथक्स्थानि द्वाविंशत्या संगुण्य शरागाष्टंद्रभिर्विभज्य लब्धं वर्षाणि तएव राज्याय:
वे॰ सं॰ कल्याः॥ शेषाः स्त्रिवाद्द्वादिगुणकारगुणिताः शाकविभक्तासमंशादिकं वर्षाणां मध्यः स्थापयेत्॥ तच्चवर्षादि
फलं तत्रैव शककाले संयोज्य बार्हस्पत्येन मानेन वर्षाणि भवंति॥ एवं स्थिते सति तत्र शककालात माकृगतस्य यत्प्र
६८ व्दस्य छेदपरिगणितं शेषमस्ति॥ वेदनंद्य माध्यय: माधो: ४२९४३॥ एतान्यत्र योज्यानि भवंति॥ तदर्थं सव
र्णीक्रियंते। सप्तदैर्ना द्विकेन गुणयित्वा पंच संयोज्याज्ञाता राशिर्न वा बष्ट पंचाष्टग्याः॥ एवं क्षेपे सवर्णिते स
ति गुणकार भाजकावपि सवर्णीकृतौ यतस्तावेवात्र गुणकार भागाहारौ गुणकारश्चतुश्चत्वारिंशत्कोज्ञातः।
भागाहार: शून्यशरागरामाख्याः। कल्पेन फलेन शककालं संयुक्तं कृत्वा बार्हस्पत्येन मानेनाब्दगणो भवति।
तस्य षष्ट्याभागे हृते लीताः षष्ट्यब्दा भवंति। शेषस्य पंचभिर्भागे हृते युगानि कल्प्यंते। यतः पंचवार्षि
कं युगं तेन बाहुल्ता अब्दा नक्षत्रपादा भवंति। राश्यात्मकत्वात्। तत्र द्वादशक्रमेण एकैकानक्षत्रपादो
दीयते पृथक्स्थाद्वात्समगृह्यष्टतस्तत्र वर्षं द्वादशकेन नक्षत्रे पादमंतरं भवति। चतुर्भिर्भागे हृते नक्ष
त्राणि सविकलानि कल्प्यंते। तेषां धनिष्ठादिका गणनागणना यतो धनिष्ठादेयुगे शेषस्यब्दस्य प्रवृत्तिः। य
तो वक्ष्यत्याद्यं धनिष्ठांशमित्यादर्थाद्देवशेषं भाव्यं॥ नक्षत्रपादाभुक्ता भवंति। ॥अधुना द्वादश
नां षष्ट्यब्दा बलितानां नामान्याह॥ ॥विष्णुः सुरेज्यो बलभित् हुताशनस्त्वष्टोत्तरप्रोष्ठपदाधिपाश्च॥ क्र
मादुगेशाः पितृविश्वसोमशक्रानलाख्याश्विभगाः प्रदिष्टाः॥ २३॥ विष्णुर्नारायणः प्रथमयुगं॥ सुरे
ज्योबृहस्पतिर्द्वितीयं॥ बलभिदिंद्रस्तृतीयं॥ हुताशोग्निश्चतुर्थं॥ त्वष्टानाम प्रजापतिः पंचमं॥ उत्तर
प्रोष्ठपदाधिपोऽहिर्बुध्न्यः षष्ठं॥ पितरः सप्तमं॥ विश्वेऽष्टमं॥ सोमो नवमं॥ शक्रानलं इंद्राग्नि दश
मं॥ अश्विसंज्ञं एकादशं॥ भगो द्वादशं॥ एते देवविशेषाः द्वादशयुगक्रमात्॥ आनुपूर्व्येण युगस्वामिनः ६८
प्रदिष्टा उक्ताः॥ तथा च समाससंहितायां॥ विष्णुर्गुरुः शक्रहुतभुक्त्वष्टाहिर्बुध्न्य पितरो विश्वानि सोम्यमथे
द्राग्न्याख्यं त्वाश्विनमपि भाग्यसंज्ञं च॥ अत्र युगे युगे पंच पंच वर्षाणि भवंति॥ तेषां नामदैवत्यं प्र

त्येकस्याह॥ ॥संवत्सरोग्निः परिवत्सरोर्क इदादिकः शीतमयूखमाली॥ प्रजापतिश्चाप्यनुवत्सरस्यादिद्वत्सर
: शैलसुतापतिश्च॥ २४॥ संवत्सरेदावत्सरोनुवत्सर इद्वत्सराख्यानि पंच वर्षाणि भवंति॥ तत्र यः संवत्सरो
नाम सोब्दः साग्निदैवत्यः। यः परिवत्सरो द्वितीयः सोर्कदैवत्यः। यश्चेदादिकः इदात्राब्द आद्योयस्य स इदावत्स
रः पंचमः॥ तृतीयः शीतमयूखमाली चंद्रः। यो नुवत्सरश्चतुर्थः। सप्रजापतिर्ब्रह्मा स्यात् भवेत्॥ य इद्वत्स
रः पंचमः॥ शैलसुतापतिरुमापतिरुद्र इति॥ अत्र दैवत्यकथनेन किं प्रयोजनमुच्यते। यथा युगानामधि
पतय उक्ताः। तथा वर्षाणामपि॥ तस्मिन्वर्षे तस्या वर्षदेवताया यागं संपत्यर्थः। वेदपक्षे तेन स्वर्थं दैवत्यकथ
नमिति॥ अथैतेषां फलान्याह॥ ॥वृष्टिः समा घिप्रमुखा द्वितीये प्रभूततोया कथिता तृतीये। पश्चाज्ज
लं मुंचति यश्चतुर्थः स्वल्पोदकं पंचमवर्षमुक्तं॥ २५॥ संवत्सराख्ये वर्षे समावृष्टिर्भवति॥ नचातिबह्वी न चाल्प
ल्पा॥ श्रावणभाद्रपदाश्वयुज्यकार्तिकमासेषु चतुर्ष्वपि तुल्या भवति॥ इत्यर्थः॥ द्वितीये परिवत्सरे प्रमुखा प्रथ
मभागे आद्यावेव वृष्टिर्भवति॥ न पश्चात्॥ श्रावणभाद्रपदयोर्भवति॥ नाश्वयुक्कार्तिकयोरित्यर्थः॥ तृती
य इदावत्सरे प्रभूततोया बहुला वृष्टिर्भवति। चतुर्ष्वपि मासेषु यश्चतुर्थं वर्षमनुवत्सराख्यं तत्र पश्चादंते ज
लं पानीयं मुंचति॥ न प्रथमं आश्वयुक्कार्तिकश्रावणभाद्रपदयोरित्यर्थः॥ यत्पंचमं वर्षं इद्वत्सराख्यं॥
तत्र स्वल्पोदकमल्पजलमुक्तं॥ कथितं च तुर्ष्वपि मासेषु॥ ॥अधुना युगान्युत्तममध्यमाधमान्याह॥ चत्वा
रि मुख्यानि युगान्यथैषां विष्ण्विंद्रजीवानलदैवतानि॥ चत्वारि मध्यानि च मध्यमानि चत्वारि चान्यानि
अधमानि विंद्यात्॥ २६॥ ॥एषां द्वादशानां युगानां मध्याच्चत्वारि युगानि श्रेष्ठानीत्यर्थः॥ अथ तान्यवः
पादपूरणे चार्थे च॥ कानि विष्ण्विंद्रजीवानलदैवतानि विष्णुदैवत्यं प्रथमं॥ इंद्रदैवत्यं द्वितीयं॥ जीवो बृहस्प
तिस्तद्दैवत्यं तृतीयं॥ अग्निदैवत्यं च तुर्थं॥ एतानि मुख्यानि मध्यानि चत्वारि युगानि॥ मध्यमान्येव मध्य
मफलानि॥ अशुभं चाप्यशुभफलं प्रयच्छति॥ कानि च तानि॥ त्वष्टाहिर्बुध्न्यपितृवैश्वदेवानि॥ तथा चान्यानि
चत्वारि॥ सोमेंद्राग्निभगानि॥ एतान्यधमानि॥ दुष्टफलानि विद्यात् जानीयात्॥ तथा च समाससंहितायां॥

चत्वारि युगान्यादौ शुभानि मध्यानि मध्यमफलानि॥ चत्वार्यन्त्यानि अशोभनानीति॥ वर्षविशेषार्थं॥ अधुनाप
ष्ट्यब्दपूर्वस्य प्रभवाख्यस्याब्दस्य प्रवृत्तिकालमाह॥ ॥आद्यं धनिष्ठांशमभिप्रपन्नो माघे यदायात्युदयं सुरेज्यः
॥षष्ट्यब्दपूर्वः प्रभवः स नाम्ना प्रपद्यते भूतहितस्तदाब्दः॥२७॥ सुरेज्यो बृहस्पतिः। आद्यं प्रथमं धनिष्ठांशं
धनिष्ठाप्रथमपादमभिप्रपन्नः॥ तत्र स्थितः॥ माघमासे यदा यस्मिन्काले उदयं याति सूर्यमण्डलात् उद्ग
च्छति तदा तस्मिन्काले षष्ट्यब्दः षष्ट्यब्दस्य प्रथमोऽब्दः संवत्सरः प्रभवनामा प्रवर्तते तस्य प्रारंभो भवतीत्य
र्थः॥ ॥एवं चान्द्रेण मानेन यो माघस्तत्र संभवति। न सौरेण॥ यतः रुतदृकमोदयो गुरुर्यदा राशिचक्रात्
भागत्रयो विंशतिलिप्ताश्चत्वारिंशल्लेरवा कृ भवति॥ तदैव तत्संभवति। नान्यत्रेति। कीदृशोऽब्दः भूतहितः भू
तानां सत्त्वानां हितोऽनुकूल इति॥ तस्य च स्वरूपमाह॥ ॥क्वचित्त्ववृष्टिः पवनाग्निकोपः सन्तीतयः श्लेष्मकृताः
श्च रोगाः॥ संवत्सरेस्मिन्प्रभवे प्रवृत्ते न दुःखमाप्नोति जनस्तथापि॥२८॥ ॥अस्मिन्प्रभवे प्रभवाख्ये संव
त्सरे वर्षे प्रतिपन्ने सति क्वचिदनावृष्टिरवर्षणं भवति॥ न सर्वत्र॥ तथा पवनाग्निकोपः॥ पवनो वायुः। अग्निर्हु
ताशनः॥ वायुप्रकोपाग्निप्रकोपश्च क्वचित् क्वचित् भवति॥ सन्ति भवन्त्यतिवृष्ट्यादय ईतयः षडुपद्रवाः॥ श्लेष्म
कृताः कफोत्पन्नाः रोगाः गदाः क्वचिद्भवन्ति। तथापि जनो लोको न दुःखं कष्टमाप्नोति न लभते॥ अथान्येष्व
ब्देषु नामानि फलं चाह॥ तस्माद्द्वितीयो विभवः प्रदिष्टः शुक्लस्तृतीयः परतः प्रमोदः॥ प्रजापतिश्चेति यथो
त्तराणि शस्तानि वर्षाणि फलान्यमीषां महर्षिभिर्नैव मयाहृतानि॥ २९॥ निष्पन्नशालीक्षुयवादिसस्यां भयै
र्विमुक्तामुपशांतवैरां॥ संहृष्टलोकां कलिदोषमुक्तां क्षत्रं तदा शास्ति च भूतधात्रीं॥३०॥ ॥तस्माद्द्वितीय इ
ति॥ तस्मात्प्रभवाद्द्वितीयो विभवनामा प्रदिष्ट उक्तः॥ तृतीयः शुक्लः परतोऽनन्तरं चतुर्थः प्रमोदः॥ प्रजापतिः पंचमश्चे
ति॥ इतिशब्दः प्रकाराय॥ एतानि वर्षाणि यथोत्तराणि उत्तरोत्तराणि प्रशस्तानि शोभनानि॥ अथानंतरमेते ६९
षां वर्षाणां फलानि भवंति॥ निष्पन्नेत्यादि॥ तदा तस्मिन् युगे क्षत्रं राजन्यकं भूतधात्रीं मेदिनीमेवंविधां शा
स्ति पालयति॥ किंभूतानां॥ निष्पन्नशालीक्षुयवादिसस्यां निष्पन्नाः निष्पत्तिं प्राप्ताः शालयः इक्षवः य

वादयः सस्यानि॥ आदिग्रहणात् गोधूममसूरचणकमाषा गृह्यंते॥ तथा भयैरीतिभिर्विमुक्तां वर्जितां॥ उपशांतवै
रां नष्टद्वेषां संहृष्टलोकां प्रहृष्टजनां॥ कलिदोषमुक्तां कलियुगस्य दोषाः अधर्मव्याधिदारिद्र्यशोकाः कालमृत्युप्रभृ
तयस्तैर्मुक्तां रहितां॥ ॥अथ कलिः कलहदोषाः परराष्ट्रोपतापकाः॥ ॥०॥ अथ द्वितीययुगस्याह॥ आद्यं
गिराः श्रीमुखभावसंज्ञो युवाप्य धातेति युगे द्वितीये॥ वर्षाणि पंचैव यथाक्रमेण त्रीण्यत्र शस्तानि समे प
रे द्वे॥३१॥ त्रिष्वाद्यवर्षेषु निकामवर्षी देवो निरातंकभयः स लोकः॥ अब्दद्वयेऽथ तिसमानवृष्टिः किंत्वत्र
रोगाः समरागमश्च॥३२॥ आद्यांगिरा इति॥ द्वितीये बार्हस्पत्ये युगे आद्यः प्रथमोऽब्दोंगिराः॥ द्विती
यः श्रीमुखः॥ तृतीयो भावसाह्वः॥ भव इत्यन्याह्वा संज्ञा यस्य॥ चतुर्थो युवा॥ पंचमो धाता॥ एतानि पंच
वर्षाणि यथाक्रमेण परिपाट्या स्थितानि॥ त्रीण्यत्र शस्तानि॥ अत्रास्मिन्युगे त्रीणि प्रथमानि वर्षाणि शो
भनानि शस्तानि॥ शोभनानि॥ अपरे पश्चिमे चतुर्थपंचमे द्वे समे न शुभेनाशुभे इति॥ त्रिष्वाद्यवर्षे
ष्विति॥ आद्ये प्रथमेषु त्रिषु वर्षेषु अंगिराः श्रीमुखभावाख्येषु देव इंद्रो निकामवर्षी निकामं पर्याप्तं वर्षति॥
लोको जनः निरातंकोऽभयः॥ आतंक उपद्रवो॥ भयं भीतिः निर्गता विद्यमाना यस्य॥ तथा पश्चिमयोर्द्वयोर्व
र्षयोः समवृष्टिः शोभना वृष्टिः॥ समा तुल्या भवति॥ नातिबह्वी नाल्पा॥ यथाकालं यथायोग्या च॥ किंतु
अत्रास्मिन्वर्षद्वये रोगा गदा भवंति॥ तथा च समरागमश्च॥ समरः संग्रामः। तदागमः प्राप्तिः॥ अथ तृती
ययुगस्याह॥ ॥शाक्रे युगे पूर्वमथेश्वराख्यं वर्षं द्वितीयं बहुधान्यमाहुः॥ प्रमाथिनं विक्रममप्यतोन्यद्वृषं च वि
द्याद्गुरुचारयोगात्॥३३॥ आद्यं द्वितीयं च शुभे च वर्षे कृतानुकारं कुरुतः प्रजानां॥ पापः प्रमाथी वृषवि
क्रमौ तु सुभिक्षदौ रोगभयप्रदौ च॥३४॥ ॥शाक्रे युग इति॥ शाक्रे ऐंद्रे युगे प्रथमं पूर्वं वर्षमीश्वराख्यं ई
श्वरसंज्ञं॥ अथशब्दः पादपूरणे॥ द्वितीयं वर्षं बहुधान्यसंज्ञमाहुरुक्तवंतः॥ प्रमाथिनं तृतीयं॥ विक्रमं
चतुर्थं॥ अथशब्दश्चार्थे॥ अथशब्द आनंतर्ये॥ अन्यत् पंचमं वृषं नाम॥ गुरुचारयोगात् बृहस्पतिचार
संयोगात् विद्यात् जानीयात्॥ यतो बार्हस्पत्येनैव मानेन तानि वर्षाणि भवंति॥ यस्मिन्काले गुरुरादित्य

मं दृष्ट्वा दृष्टेति नष्टमिन्नेन कालेन प्रवृत्तिः॥ अतः अंगिरसचारयोगादिति॥ आद्यं द्वितीयं चेति॥ आद्यं च वर्षं द्वितीयं च॥
व॰सं॰ एते द्वे वर्षे प्रशस्तकालफले प्रजानां लोकानां कृतानुकारं कुरुतः॥ कृतयुगस्यानुकारस्य धर्मानुष्ठानात् तस्मादृश्य
मित्यर्थः॥ धर्मरताः सुखिनो दीर्घजीविन्यः प्रजा भवंतीति॥ धातेति॥ प्रमाथी नाम तृतीयोऽब्दः सपापो निष्फ
७० लः॥ विषविक्रमौ तु द्वावब्दौ सुभिक्षदौ सुभिक्षं ददतः॥ किंतु रोगभयप्रदौ रोगभयं कुरुतः॥ ॥अथ चतुर्थ
युगस्याह॥ श्रेष्ठं चतुर्थं तु युगस्य पूर्वं यश्चित्रभानुं कथयंति वर्षं॥ मध्यं द्वितीयं तु सुभानुसंज्ञं रोगप्रदं मृत्युकरं मतं
च॥३५॥ तारुणं तदनु भूरिवारिदं सस्यवृद्धिमुदितातिपार्थिवं॥ पंचमं स्यात् प्रशंति शोभनं मन्मथप्रबलमुत्सवा
कुलं॥३६॥ ॥श्रेष्ठमिति॥ चतुर्थस्य युगस्य हुताशाख्यस्य पूर्वं प्रथमं वर्षं यच्चित्रभानुसंज्ञं तच्छ्रेष्ठं शुभं कथयंति
प्रवदंति॥ तस्य च द्वितीयं सुभानुसंज्ञं तत्तु मध्यमं मध्यमफलं तृतीयं यं नाम तच्च रोगप्रदं रोगान् ददाति॥ मृत्युकरं
च मृत्युं करोति॥ तदनु तस्य तृतीयवर्षस्य पश्चात् चतुर्थं वर्षं तारुणं नाम॥ तच्च भूरिवारिदं भूरि बहु वारि जलं ददा
ति॥ तथा सस्यानां वृद्धिदं॥ मुदितातिपार्थिवं॥ मुदितो हृष्टो तीव अत्यर्थं पार्थिवो राजपुत्रः॥ तथा पंचमं चैत्र
यसंज्ञं तच्च शोभनं श्रेष्ठमुशंति कथयंति॥ मन्मथप्रबलं मन्मथः कामः प्रबलो द्धतो यस्मिन् वर्षे॥ तथोत्सवैर्वि
वाहादिभिराकुलं संघमं॥ ॥अथ पंचमयुगस्याह॥ त्वाष्ट्रे युगे सर्वजिदाद्ययुक्तः संवत्सरोन्यः खलु सर्वधा
री॥ तस्माद्विरोधी विकृतः खरश्च शस्तो द्वितीयोऽत्र भयाय शेषा॥३७॥ त्वाष्ट्रयुगे आद्यः प्रथमः संवत्सरो
ऽब्दः सर्वजिन्नामकः कथितः॥ अन्यो द्वितीयः सर्वधारी खलु शब्दो वा - - - - - आगमद्योतनार्थो वा॥ त
स्मात् द्वितीयात्परतः तृतीयो विरोधी नाम॥ चतुर्थो विकृतः पंचमः खरः॥ शस्तो द्वितीयोऽत्र भयाय शेषा
इति॥ अत्रास्मिन् युगे द्वितीयोऽब्दः शस्तः शुभः॥ शेषाः प्रथमतृतीयचतुर्थपंचमा भयाय भवंति॥ भ
यं कुर्वंत्यनिष्टफलदा इत्यर्थः॥ ॥अथ षष्ठयुगस्याह॥ नंदनोथ विजयो जयस्तथा मन्मथोस्य परतश्च ७०
दुर्मुखः॥ कांतमत्र युगआदितः त्रयो मन्मथः समफलोऽधमोपरः॥३८॥ आदित्ये प्रथमोऽब्दो नंदन
ः॥ अथानंतरं द्वितीयो विजयः॥ तथा तेनैव प्रकारेण तृतीयो जयः॥ चतुर्थो मन्मथः॥ अस्य चतुर्थस्य परतो

ऽनंतरं दुर्मुखः पंचमः॥ अत्रास्मिन् युगे आदित आदौ प्रथमं वर्षत्रयं कांतं शुभमित्यर्थः॥ किंचित् कांतयुग
मत्र आदितस्त्रय इति पठंति॥ अत्रास्मिन् युगे आदित आदौ प्रथमं वर्षत्रयं कांतं मन्मथः समफलः न शुभो
नाप्यशुभः॥ अपरश्च दुर्मुखोऽधमफलः॥ अशुभफल इत्यर्थः॥ ॥अथ सप्तमयुगमाह॥ हेमलंब इति सप्त
मे युगे स्याद्विलंबपरतो विकारि च॥ शार्वरी तदनु च प्लवः स्मृतो वत्सरो गुरुवशेन पंचमः॥३९॥ इति प्राक्प्र
चुर पवनाः वृष्टिरन्ये तु पूर्वे मंदसस्यं न बहुसलिलं वत्सरे तो द्वितीयो भत्युपद्रवः प्रचुरं सलिलं स्यात् तृतीयः
श्च तुर्यो दुर्भिक्षाय प्लव इति ततः शोभनो भूरितोयः॥४०॥ ॥हेमलंब इति॥ सप्तमे पत्ये युगे हेमलंब
इति प्रथमो वत्सरः स्यात्॥ विलंब इति द्वितीयः॥ परतोऽनंतरं तृतीयो विकारिः॥ चशब्दः समुच्चये शार्वरी
ति चतुर्थः॥ तदनु तत्पश्चात् पंचमो वत्सरोऽब्दः प्लव इति स्मृतः॥ उक्तो गुरुवशेन बृहस्पतिचारयोगवशात् इति
प्रायेति॥ पूर्वेऽब्दे प्रथमे वर्षे प्रायः ईतिः स्याद् उपद्रवबहुलो बहुलवाताः वृष्टिर्भवतीत्यर्थः॥ अतोऽस्मात् द्वि
तीये वत्सरे मंदसस्यं न बहुसलिलं प्रभूतजलं न भवति॥ तृतीये वत्सरे उद्वेगकरः प्रभूतदोषदः॥ तथा प्रचु
रसलिलं प्रभूतजलं स्याद्भवेत्॥ चतुर्थो दुर्भिक्षाय भवति॥ ततोऽनंतरं प्लव इति॥ पंचमः शोभनः श्रेष्ठः॥ स
च भूरितोयो न बहुसलिलश्च भवति॥ ॥अथाष्टमयुगस्याह॥ वैश्वयुगे शोभकृदित्यस्तथाद्यः संवत्सरो
न्यः शुभकृत् द्वितीयः॥ क्रोधी तृतीयः परतः क्रमेण विश्वावसुश्चेति पराभवश्च॥४१॥ पूर्वापरौ प्रीतिकरौ
जनानां एषां तृतीयो बहुदोषदोऽब्दः॥ अन्त्यौ समौ किंतु पराभवोग्निशस्त्रामयार्तिद्विजगोभयं च॥४२॥
॥ ॥वैश्वयुग इति॥ वैश्वे अष्टमे युगे आद्यः प्रथमवत्सरोऽब्दः शोभकृदिति॥ केचित् शोभकृदिति पठंति॥ शो
भं करोतीति छिनत्ति इति शोभकृत्॥ तस्मात् शोभकृदिति न संदेहः पाठे॥ अन्यो द्वितीयः शुभकृत्॥ तृतीयः क्रो
धी परतोऽनंतरं क्रमेण विश्वावसुश्चेति चतुर्थः॥ इतिशब्दः प्रकारे॥ पराभवश्च पंचमः॥ पूर्वापराविति॥
पूर्वापरौ प्रथमद्वितीयौ वब्दौ प्रजानां प्रीतिकरौ एषां सर्वेषां पंचानां मध्याद्यः तृतीयोऽब्दः स बहुदोषदः॥
बहून् दोषान् अशुभान् ददाति॥ अंत्यौ पश्चिमौ चतुर्थपंचमौ समौ समफलौ न शुभौ नाप्यशुभौ॥ किंतु

वर्षं दुर्येनैः परा भवंति भयं भवति॥ तथा राज्ञां मयर्तिः॥ शस्त्रेणामर्षेश्च रोगे रार्तिः पीडा भवति॥ तथा चाह
नागो भयं च॥ द्विजानां ब्राह्मणानां गवां च भयं भवति॥ ॥अथ नवम माह॥ आद्य पूर्वातो नवमे युगेब्दः स्यात्का
लकोन्यः परतश्च सौम्यः॥ साधारणो रोध कृदित्यथैवं शुभप्रदो कालकसौम्य संज्ञौ॥ ४३॥ कृष्टः पूर्वं गोवद्रुश
ः प्रजानां साधारणेल्पां जलमीतयश्च॥ यः पंचमो रोधकृदित्यथाब्दश्चित्रं जलं तत्र च सस्यसंपत॥ ४४॥ आद्यं
पूर्वं गइति॥ नवमे युगे सौम्य आद्यः प्रथमोब्दः पूर्वं ग सौम्यः ज्ञेः स्यात भवेत॥ अथान्द्वितीयः कालकः॥ परतस्तृ
तीयः सौम्यः॥ साधारणश्चतुर्थः॥ रोधकृत्पंचमः॥ इत्येवं प्रकाराः॥ अथ शुभश्च आनंतर्यो तत्र कालकसौम्य सं
ज्ञौ द्वावब्दो शुभप्रदौ शोभनौ॥ पूर्वंग संज्ञः प्रजानां च दुर्गा बहुप्रकारं कृष्टोः शुभः॥ साधारणेब्दे अल्पं जलं स्वल्पमु
दकं॥ ईतयोऽवश्यादयउपद्रवा भवंति॥ अथानंतरंयः पंचमोब्दो रोधकृदिति तत्र तस्मिन्नब्दे चित्रं नानाप्रका
रं जलं कचित्कचिद्वर्षति। तथा सस्यानां संपच्च भवति॥ ॥अथ दशममाह॥ इंद्राग्निदैवं दशमं युगं तत्तत्राद्य
मब्दं परिधाविसंज्ञं॥ प्रमाथिनं विक्रममप्यतोन्यत्स्याद्राक्षसं चानलसंज्ञितं च॥ ४५॥ ॥परिधाविमध्यमदेशनाशो
नृपहानिर्जलमल्पमग्निकोपः॥ अलसस्तु जनः प्रमाथिसंज्ञे डमरं रक्तकपुष्पबीजनाशः॥ ४६॥ विक्रमः सकल
लोकनंदनो राक्षसः क्षयकरोनलस्तथा॥ ग्रीष्मधान्यजननो त्र राक्षसो वह्निकोपमरकप्रदोनलः॥ ४७॥ ॥
इंद्राग्निदैवमिति॥ दशमं युगमिंद्राग्निदैवं यत्तत्र तस्मिन्नाद्यं वर्षं प्रथमं परिधाविसंज्ञं॥ प्रमाथिनं द्वितीयं अ
तोस्मान्नतृतीयं विक्रमं स्याद्भवेत॥ राक्षसं चतुर्थं॥ नलसंज्ञं पंचमं॥ चशब्दः सर्वत्र समुच्चये॥ परिधाविनीति॥
परिधाविनि वर्षे मध्यदेशनाशो भवति॥ तत्रैव नृपहानिः राज्ञो मरणं जलमुदकमल्पं स्तोकं अग्निकोपाव
न्हिभयं॥ प्रमाथिसंज्ञे जनो लोको यः सालसो भवति॥ तथा डमरं कलहः सशस्त्रः॥ रक्तपुष्पाणां येषां लो
हितं पुष्पं भवति। तथा रक्तकंदं बबीजानां नाशः॥ विक्रमइति॥ विक्रमः सकललोकानां नंदनोब्दः समस्तज
नसमृद्धिकरः॥ राक्षसः सकललोकानामेव क्षयकरः विनाशकरः॥ नलस्तथानेन प्रकारेण क्षयकरएव॥ ७१
अत्रास्मिन्युगे राक्षसोब्दो ग्रीष्मधान्यानां गोधूमयवानां जननः संपत्करः॥ नलः वन्हिकोपमरकप्रदः

अग्निकोपं मरकं च ददाति॥ ॥अथैकादशमाह॥ एकादशेपिंगलकालयुक्तः सिद्धार्थरौद्रः खलुदुर्मतिश्च
॥आद्येनुवृष्टिर्महती सचौरा श्वासो हनुकंपयुतश्च कासः॥ ४८॥ यत्कालयुक्तं तदनेकदोषं सिद्धार्थसंज्ञे ब
हवो गुणाश्च॥ रौद्रोतिरौद्रः क्षयकृच्च पूर्वो यो दुर्मतिर्मध्यमवृष्टिकृत्सः॥ ४९॥ ॥एकादशइति॥ एकाद
शे अश्वियुगे प्रथमाब्दः पिंगलः॥ द्वितीयः कालयुक्तः॥ तृतीयः सिद्धार्थकः॥ चतुर्थी रौद्रः॥ पंचमो दुर्मतिः॥ ख
लुशब्दः॥ आगमद्योतनार्थं॥ आद्ये प्रथमे वर्षे महती वृष्टिर्भवति॥ सा च चौरसंयुक्ता सतस्करा भवतीत्य
र्थः॥ तथा श्वासो भवति॥ जनानां हनुकंपयुतश्च कासः कासपीडा भूतानां च भवति॥ यत्कालयुक्तं तद्
यमब्दं कालयुक्तं तमनेकदोषं बहुदोषप्रदं॥ सिद्धार्थसंज्ञे बहवः प्रभूता गुणाः - - सस्यसंपदादयः॥ यो
रौद्रः सोतिरौद्रः॥ अतिदुष्टफलं॥ तथा क्षयकृत्प्रजानां क्षयकरः॥ प्रदिष्टउक्तः॥ सो दुर्मतिः स मध्यवृष्टि
कृत मध्यमां वृष्टिं करोति॥ ॥अथ द्वादशेमाह॥ भाग्ये युगे दुंदुभिसंज्ञमाद्यं सस्यस्य वृद्धिं महतीं करोति॥
अंगारसंज्ञोतदनुक्षयाय नरेश्वराणां विषमा च वृष्टिः॥ ५०॥ ॥रक्ताक्षसंज्ञं कथितं तृतीयं तस्मिन्भयं दंष्ट्रि
कृतं गदाश्च॥ क्रोधं बहु क्रोधकृदंचतुर्थं राष्ट्राणि शून्यानि तथा विरोधैः॥ ५१॥ भाग्ये युगइति॥ भाग्य सं
ज्ञे द्वादशे युगे आद्यं प्रथमं वर्षं दुंदुभिसंज्ञं नाम॥ तच्च महतीं अतिवृद्धिं सस्य वृद्धिं करोति॥ तदनु तत्पश्च॥
द्वितीयं अंगारसंज्ञं तच्च नरेश्वराणां राज्ञां क्षयाय नाशाय भवति॥ वृष्टिश्च विषमा अतुल्या तत्र जायते भ
वति॥ दंष्ट्रिणः शूकरादयः तदनुकृता भवंति। तथा गदाश्च रोगा भवंति॥ चतुर्थं क्रोधं क्रोधसंज्ञं च
बहुक्रोधकरं बहुप्रकारं लोकानां क्रोधं करोति॥ तथा राष्ट्राणि विरोधैः कुलहैः शून्यानि कुरुते॥ अशून्या
नि शून्यानि कुरुते उद्वासयतीत्यर्थः॥ ॥अथ पंचमवर्षस्य फलं॥ षष्ठ्य लक्षणं मया संक्षेपतः कृतमुपेत
माह॥ क्षयमिति युगस्यांत्यं स्यादंत्यं च बहुक्षयकारकं जनयति॥ भयं॥ तद्विप्राणां कृषीवलवृद्धिदं॥ उ
पचयकरं विट्शूद्राणां परस्व हृतं॥ तथा कथितमखिलषष्ट्यब्दं यत्तद्त्र समासतः॥ अंत्यस्य युगस्य
द्वादशस्य स्यात्पंचमं वर्षं क्षयमिति क्षयसंज्ञं तच्च बहुक्षयकारकं॥ बहुविधं जनानां क्षयं करोति॥

बृ॰सं॰ विप्राणांब्राह्मणानांभयंभीतिंजनयति॥ उत्पादयति॥ नृपाःराज्ञांवैश्यानांच शूद्राणांचोपचयकरं॥ तद्रूपरस्य हेतापरधनदत्तणांमध्यपचयकरं॥ अखिलंनिःशेषंयथाभगवान्मार्कंडेयर्षिकृतः गर्गादिमहर्षयः
७२ स्यपोषध्रुवसमाधेनयुगस्वप्नपंचमकस्यहकालदानांनिबाधतइत्यस्मिनशास्त्रेयत्कथितमुक्तंतस्त्रास्मिनबृहस्पतिचारेसर्वसमासतः॥१॥ संक्षेपतःकथितमुक्तं॥ तद्वासमासंहितायां॥ पंद्रहतायमगभंद्धितायज्ञानिपंचमेतु युगे॥ विद्येयुगंद्धितायंचतुर्थमविपापदंवर्षं॥ विश्वस्तायमगभंशुभदान्युक्तानिसत्पुरोयाणि॥ सौम्यद्वितीयवर्षेशुभावदूयनत्ततीयंतु॥२॥ प्रथमंशुभंमंद्रांतेयतीयवर्षेतथापिवंद्वितीये भागप्रथमंवर्षंस्य स्यवसंक्षेपः॥३॥ ॥अथवर्णलक्षणमाह॥ अकलुषांशुर्जटिलःपृथुमूर्तिःकुमुदकुंदकुसुमस्फटिकाभः॥ ग्रहहतानयदिसत्पथवर्ती हितकृतःमरगुरुर्मनुजानां॥४२॥ एवंविधामरगुरुर्मनुजानांमनुष्याणांहितकरः शिवप्रदः॥ अकलुषांशुःनिर्मलरश्मिःजटिलःसमंततारश्मिभिर्व्याप्तः॥ पृथुमूर्तिर्विस्तीर्णदेहः॥ तथाकुमुदपुष्पस्यकुंदकुसुमस्यच॥ स्फटिकमणेःसदृशाःआभाकांतिर्यस्यअतिस्निग्धःश्वेतवर्णइत्यर्थः॥ यदिग्रहहतानभवति॥ ग्रहयुद्धेनान्येनग्रहेणाविजितोनभवति॥ तथासत्पथवर्तीग्रहनक्षत्राणामुत्तरमार्गगोवक्रितश्चेति॥ ॥इतिश्रीभट्टोत्पलविरचितायांसंहिताविवृतौबृहस्पतिचारोनामाध्यायोऽष्टमःसमाप्तः॥ ८ ॥
॥ ॥अथशुक्रचारोव्याख्यायते॥ तस्यचनववीथयःस्युर्यामार्गास्त्रयमध्येदक्षिणाख्यातोवैश्वानरात्रयोमार्गभेदःषण्मंडलानिभवंति॥ तत्रादावेवपरमतेनवीथीनांलक्षणमाह॥ नागगजैरावतवृषभगोजरद्गवाम् गाजदहनाख्याः॥ अश्विन्याद्याःकृत्तिकाद्विभाक्रमाद्वीथयःकथिताः॥१॥ कृत्तिकाद्याश्चैवप्रभृतिभिरश्विन्याद्यात्रिभात्रिभात्रिभिःत्रिभिर्भैरेकैकाभवति॥ तथाश्विनीभरणीकृत्तिकानागवीथिः॥ रोहिणीमृगशिरआर्द्रागजवीथी॥ एवंक्रमेणत्रिभिःत्रिभिर्भैरश्विन्याद्याविहितायाःएताःक्रमात्पारिभाषिकावीथयःकथिताउक्ताः॥ तथाचदेवलः॥ अश्विन्यादित्रिभं॥ सर्वानागाख्यावइतिश्रुतंगनः॥ नागवीथीतिमाख्यातात्रथमाख्यातवीथिः॥ रोहिण्यादिगजाद्यात्याद्यैरावतास्मृता॥ मघाद्याऋषभाद्यातस्तायागोप्रवर्तिताः॥ जारद्गवीविशिखाद्यामृगाद्या ७२
मृगवीथिकाः॥ अजवीथीविस्मृताषाढाद्यातुदहनास्मृता॥ ॥अथस्वमतेनवीथीनांप्रविभागमाह॥ नागातु पवनायाम्यानलानिपैतामहात्त्रिभास्तिस्रः॥ गोवीथ्यामश्विन्यःपौष्णंद्वेचाभिभद्रपदाः॥२॥ जरद्गवाश्रवणात्त्रिमृगाख्यात्रिभंचमैत्राद्यं॥ हस्तविशाखात्वाष्ट्राण्यजाख्यषाढाद्वयंदहनाख्यातेति॥ पवनःस्वातिःयाम्यंभरणिःअनलःकृत्तिका॥ एतानित्रीणिनक्षत्राणि नागवीथ्यांपैतामहात्त्रिभागस्तिस्रः॥ पैतामहंरोहिणी॥ ततआरभ्यत्रिभिर्भैर्गोस्त्रिभिर्नक्षत्रैस्तिस्रोवीथयोभवंति॥ तद्यथा॥ रोहिणीमृगशिरआर्द्रागजवीथी॥ पुनर्वसुपुष्याश्लेषाऐरावती॥ मघापूर्वफाल्गुनीउत्तराफाल्गुनीवृषभा॥ गावीथ्यामिति॥ अश्विन्यः पौष्णंरेवतीद्वेभद्रपदे॥ पूर्वभद्रपदोत्तरभद्रपदे॥ एतानिचत्वारिनक्षत्राणिगोवीथी॥ जरद्गव्यामिति॥ श्रवणात्प्रभृतित्रिभंनक्षत्रत्रितयं॥ श्रवणधनिष्ठाशतभिषक्इतिजरद्गवी॥ मृगाख्यात्रिभंतुमैत्राद्यं॥ मैत्रमनुराधातदाद्यंत्रिभंनक्षत्रत्रितयंअनुराधाज्येष्ठामूलमिति॥ मृगाख्या हस्तविशाखात्वाष्ट्राणीति॥ हस्तविशाखात्वाष्ट्रंचित्राएतानिनक्षत्राण्यजा॥ अजवीथी॥ तुशब्दःपादपूरणे॥ आषाढाद्वयं॥ पूर्वाषाढोत्तराषाढेति॥ दहनावीथी॥ तथातासांमार्गप्रविभागमाह॥ ॥तिस्रस्तिस्रस्तासांक्रमादुदङ्मध्ययाम्यमार्गस्थाः॥ तासामप्युत्तरमध्यमदक्षिणास्थितैकैका॥३॥ तासांनागाख्यानांनवानांवीथीनांक्रमात्परिपाट्यातिस्रस्तिस्रोवीथयः उदक्मध्ययाम्यमार्गस्थाउत्तरेमध्येयाम्येदक्षिणेचास्थिताः॥ तद्यथा॥ नागगजैरावत्यउत्तरमार्गस्थाः॥ तासामपिवीथीनामुत्तरमध्ययाम्यमार्गस्थानान्युत्तरमध्यमदक्षिणेनएकैकास्थिता॥ तद्यथा॥ नागाउत्तरोत्तरा॥ गजाउत्तरमध्यमा॥ ऐरावताउत्तरदक्षिणा॥ तथाचऋषभाख्यामध्यमोत्तरा॥ मध्यममध्याजारद्गवीमध्यदक्षिणातथामृगादक्षिणोत्तरा॥ अजादक्षिणमध्या॥ दहनादक्षिणदक्षिणेति॥ तथाचपराशरः॥ अथमार्गास्त्रयोभवंत्युत्तरमध्यमदक्षिणाः॥ पुनरेकैकशस्त्रिधानववीथयःइत्यभ्यक्षते॥ तत्रोत्तरेनागगजैरावत्यः॥ मध्येआर्षभगोजरद्गव्यो॥ दक्षिणेमृगाजादहनाः॥ तासांनागाग्नेययाम्यवायव्यानि॥ गजवीथीरोहिण्यादित्रीणि॥ त्रीणि॥ परमैरावत्यार्षभा॥ गोवीथीप्राक्प्रोष्ठपदानिचत्वारिधनिष्ठावारुणानि॥ जारद्

वीमृगवीथी मैत्रं ज्येष्ठमूलानि ॥ हस्तविशाखात्वाष्ट्राण्यजवीथी ॥ फाल्गुन्यौ वैश्वानरस्तेवेष्वंति ॥ अत्र वराहमिहिरे
बृ· सं· ण सह बहुभेदः ॥ तथा च गर्गः ॥ कृत्तिकाभरणी स्वाती नागवीथी प्रकीर्तिता ॥ रोहिण्याद्यास्तिस्रश्च भागते गजवीं
ऋषभाः ॥ अजाद्वितीये पौष्णाश्विगोवीथी प्रकीर्तिता ॥ श्रवणात्त्रितयात्तेया वीथी जारद्गवीति सा ॥ मैत्रात्त्रिभं मृ
७३ गाख्या स्याद्धस्तचित्राविशाखिका ॥ अजवीथी तु हस्ताः षाढायुग्ममिति स्मृता ॥ पूर्वोत्तरे नागवीथ्या गजवीथी
तदुत्तरा ॥ ऐरावती तृतीया स्यात् एतास्तूत्तरतः स्थिताः ॥ आर्षभी तु चतुर्थी स्यात् गोवीथी पंचमी स्मृता ॥ षष्ठी जा
रद्गवीति याति स्रता मध्यमाश्रिताः ॥ सप्तमी मृगवीथी स्यात् अजवीथी तथाष्टमी ॥ दहना नवमी त्वा दक्षिणमा
र्गमाश्रिता ॥ तथा च समाससंहितायां ॥ वीथ्यो यानागनाम्नी स्वाति भरणी कृत्तिकान्वित ॥ स्वायं भु याम्याभाः सु
र्गजाख्यैरावती क्षभा ॥ एकपादादि चतुर्थं गोजारद्गवी श्रुतित्रयात ॥ मैत्रात्त्रय मृगाख्या चित्रादिस्त्रौ विशाखः ॥
दहना षाढाद्वंद्वं सौम्यास्तिस्रः शुभाश्चान्याः ॥ मध्यामध्यास्तिस्रो याम्याः पापा मृगाद्यास्ताः ॥ अत्रैव मतांतरमाह
॥ वीथीमार्गानपरे कथयंति यथा स्थितान् ॥ मार्गस्य नक्षत्राणां ताराः याम्योत्तरमध्यमा इति ॥ अपरे आचार्या
भमार्गस्य नक्षत्रपथो यथा स्थितान् अनेन प्रकारेण च नक्षत्राणां तारा याम्योत्तरमध्यमास्थिताः ॥ याम्यास्ता
रा दक्षिणो मार्गः ॥ अथ नक्षत्रा दक्षिणभागस्था दक्षिण दक्षिणमार्गगाः ॥ उत्तरा भागस्था उत्तरमार्गगाः ॥ नक्ष
त्र मध्यस्थो मध्यमार्गगः ॥ तथा च काश्यपः ॥ नक्षत्राणां त्रयो मार्गा दक्षिणोत्तरमध्यमाः ॥ उदक्कृष्ठाः तारका
सौम्या मध्यमा मध्यमाः स्मृताः ॥ दक्षिणा दक्षिणे मार्गे नक्षत्रेषु प्रकीर्तिताः ॥ नक्षत्रात् सौम्यगः सौम्यमार्गस्था
ग्रह उच्यते ॥ दक्षिणे दक्षिणो मार्गो मध्ये मध्य इति स्मृतः ॥ पुनरपि मतांतरमाह ॥ उत्तरमार्गो याम्यादि इति गदि
तो मध्यमस्तु भाग्याद्याः ॥ दक्षिणमार्गो षाढाद्ये केश्चिदेवं कृता मार्गाः ॥ ६ ॥ केश्चिदाचार्यै एवं प्रकारेण मार्गाः
कृताः ॥ ते च गर्गाद्यः ॥ याम्याभरणीत आद्दकोनव नक्षत्रांत उत्तरो मार्गो निगदितः ॥ उक्तः तद्यथा ॥ भरणी ७३
कृत्तिका रोहिणी मृगशिर आर्द्रा पुनर्वसु पुष्याश्लेषा मघा उत्तरो मार्गः ॥ मध्यमस्तु भाग्याद्यः ॥ भाग्यं पूर्वाफा
ल्गुनीत आद्यो नव नक्षत्रांतो मध्यममार्गः ॥ तद्यथा पूर्वाफाल्गुन्युत्तराफाल्गुनी हस्त चित्रा स्वाति विशाखानुरा

धा मूलमिति मध्यमो मार्गः ॥ तद्यथा ॥ पूर्वाषाढोत्तराषाढाश्रवणधनिष्ठा शतभिषक् पूर्वभद्रपदोत्तरभद्रपदारे
वत्यश्विन्यो दक्षिणो मार्गः ॥ तथा चाचार्यः ॥ अश्वयुग्योगपर्यन्ते आषाढादौ नवके गणे वर्तमानः सदा क्रूरो दक्षिणप
थि वर्तते ॥ १ ॥ शुक्रो नैर्ऋतपर्यंते भाग्यादौ नवके गणे ॥ वर्तमानेन मध्यस्थो मध्यमे पथि वर्तते ॥ २ ॥ भरण्यादि
मघांते च तृतीये नवके गणे ॥ वर्तमानः शुभोत्तेयः उत्तरे पथि वर्तते ॥ ३ ॥ ननु संग्रहकर्ता यत्सारं तदेव वक्तव्यं किं म
तांतरैः प्रयोजनमित्येतदाशंक्याह ॥ ज्योतिषमार्गमशास्त्रविप्रतिपत्तौ न योग्यमस्माकं स्वयमेव विकल्पयितुं कि
बहूनां मतं तं वक्ष्ये ॥ ज्योतिषिन् सूर्यग्रहादीनि तान्यधिकृत्य शास्त्रं ज्योतिःशास्त्रं ॥ तच्चागमशास्त्रं ॥ आगमेनावि
ज्ञानतां यते ॥ अस्माकं विप्रतिपत्तौ विषमे स्वयमेवात्मना विकल्पयितुं न योग्यं ॥ न न्याय्यं ॥ इदं शोभनमशोभ
नमिति ॥ यतः सर्व एव मुनयः त्रिकालदर्शिनः नत्वायंत ॥ कस्य मुनेः कीदृशागमः ॥ तस्मादस्माकं विकल्पयितुं न न्या
य्यं ॥ किंतु बहूनां प्रभूतानां मुनीनां मतं वक्ष्ये ॥ कथयिष्ये ॥ अधुना वीथीनां फलमाह ॥ उत्तरवीथिषु शुक्रः सुभिक्ष
शुभकृतो स्तमुदयं वा ॥ मध्यासु मध्यफलदः कष्टफलो दक्षिणस्थासु ॥ ८ ॥ शुक्र उत्तरवीथीनागगजैरावताख्या
सु स्थितो यदर्कमंडले स्तमयं गतः ॥ तस्मादेवोदयं वा गतः ॥ तदा सुभिक्षशिवकृत ॥ सुभिक्षं शिवं श्रेयश्च क
रोति ॥ एवं मध्यासु मध्यवीथीषु वृषभजरद्गवाख्यासु मध्यमफलदः ॥ न शुभं नाशुभं करोति ॥ तथा दक्षिणस्था
सु वीथिषु मृगाजदहनाख्यासु कष्टफलो ऽनिष्टफल इति ॥ तथा च गर्गः ॥ उदयास्तमयं कुर्यात् मार्गमुत्तरमाश्रित
ः ॥ सुभिक्षं च सुवृष्टिं च योगक्षेमं विनिर्दिशेत् ॥ उदयास्तमयं कुर्यात् मध्यमं मार्गमाश्रितः ॥ मध्यमं सर्वसस्यं
च योगक्षेमं विनिर्दिशेत् ॥ २ ॥ उदयास्तमयं कुर्यात् दक्षिणं मार्गमाश्रितः ॥ धान्यस्य संग्रहं कुर्यात् केदारेषु त
दा न वपेत् ॥ ९ ॥ तथा च पराशरः ॥ तत्र नागवीथीगतो भार्गवो नागाश्रितांश्च पीडयेत् ॥ महाकुलानि गजवी
थ्यामैरावत्यां नृपति विरोधः ॥ आर्षभ्यां च वृष्टि वित्त दानं बलाधिकं सस्यपीडा श्लेष्माव्याधेः प्रादुर्भावश्च ॥
गोवीथ्यां सस्यगोमतां हानिः ॥ जरद्गवीथ्यां तु गास्त्रविदां मृगवीथ्यां मृगव्याध सस्य तपस्विनां ॥ पिनंगो
द्वयश्चाद्ययां ॥ सस्यवर्षं ब्रह्मचारिणामाधिक्यं ॥ दहनायां सस्यमेघ विकृत्यनमग्निपितव्याधि संभवश्च ॥ ॥

व·सं· अथासामपि विशेषफलमाह ॥ अत्युत्तमोत्तमोत्तसममध्यन्यूनमध्यमकष्टफलं । कष्टफलं सौम्याद्यासु वीथि-
षु यथाक्रममनुयाद्याफलमिति क्रयात ॥ वदेत । तद्यथा ॥ नागाख्यामत्युत्तमं अतिशुभं फलं । गजवीथ्यामुत्त-
मं शुभं किंचिदूनं पूर्वापेक्षया ॥ किंचित शुभे मैरावत्यां ॥ समं मध्यमफलं वृषभवीथ्यां कष्टं शुभागजवीथ्यां ।
७४ कष्टतममतिकष्टं दहनाख्यायां ॥ ॥अथ शुक्रस्य षण्मंडलानि भवंति । तेषां लक्षणं च फलमाह ॥ भरणी-
पूर्वं मंडलमृक्षचतुष्कं ॥ सुभिक्षकरमाद्यं ॥ वंगांगमहिषबाल्हिककलिंगदेशेषु भयजननं ॥ १० ॥ अत्रोदित-
मारोहेत ग्रहोऽपरोऽस्मिन्सितं ततो हन्यात् ॥ भद्राश्वसूरसेनकयौधेयककोटिवर्षनृपान् ॥ ११ ॥ भरणीपू-
र्वामिति ॥ आद्यं प्रथमं मंडलं भरणीपूर्वमृक्षचतुष्कं भरणी पूर्वा प्रथमा यस्य ऋक्षचतुष्कस्य तद्भरणीपूर्वं ॥
भरणीकृत्तिकारोहिणीमृगशिरश्चेति । तच्च सुभिक्षकरं सुभिक्षं करोति । तथा वंगाजनाः ॥ अंगाः । महिषाः ।
कलिंगाः ॥ एषां देशानां तेषु देशेषु भयजननं ॥ भीतिजननमुत्पादयति ॥ अत्रोदितमिति ॥ अत्रास्मि-
न्मंडले सितं शुक्रमुदितं सूर्यमंडलात् उद्गतं यस्य परोन्योग्रह आरोहेदुपरि निपतेत् ॥ अग्रनस्तिखलत्यर्थः
तथा भद्राश्वजनाः सूरसेनकाः ॥ यौधेयकाः कोटिवर्षेति सर्व एव जनाः यदा एते षड्देशेषु नृपा राजानः तानहन्या-
त नाशयेत् ॥ ॥अथ द्वितीयमंडलस्य फलमाह ॥ भचतुष्टयमार्द्राद्यं द्वितीयममितांबुसस्यसंपत्त्यै ः विप्राणामशु-
भकरं विशेषतः क्रूरचेष्टानां ॥ १२ ॥ अन्येनाक्रांते म्लेच्छाटविकान् श्वजीविगोमंतान् ॥ गोनर्दनीचशूद्रान्वैदेहा-
श्चानयः स्पृशति ॥ १३ ॥ भचतुष्टयमिति ॥ आर्द्राद्यमार्द्रा प्रथमं चतुष्टयं नक्षत्रचतुष्कं द्वितीयं मंडलं तच्चामि-
तांबुसस्यसंपत्त्यै भवति ॥ अमितमपरिमितं जलं सस्यानां संपदं करोति ॥ विप्राणां ब्राह्मणानां अशुभफलदमनिष्ट-
करं ॥ क्रूरचेष्टानां विपिनिनश्च भावानां विशेषतो न शुभकरं ॥ अन्येनाक्रांत इति ॥ अत्रास्मिन्मंडले अन्येनापरे-
ण ग्रहेणाक्रांते रुधः शुक्रो म्लेच्छजना आटविका अरण्यवासिनः ॥ श्वजीविनः श्वभिर्ये जीवंति ॥ गोमंताः वि- ७४
धमानगावाः ॥ गोनर्दा जनानीचा अधमकर्मकराः शूद्राः वैदेहजनाः एतान्सर्वान् अनयः स्पृशति ॥ सोपद्रवा भ-
वंतीत्यर्थः ॥ ॥अथ तृतीयमंडलस्य फलमाह ॥ विचरन्मघादिपंचकमुदितः सस्यप्रणाशकृच्छुक्रः ॥ सु-

तस्करभयजननो नीचोन्नतिसंकरकरस्य ॥ १४ ॥ पित्र्याद्ये वक्रस्थो हंत्यन्येनाविकान् शबरशूद्रान् ॥ पुंड्रापरां-
त्यशूलिकवनवासिद्रविडसामुद्रान् ॥ १५ ॥ ॥ विचरन्निति ॥ तृतीयं मंडलं मघादिपंचकं ॥ मघा आद्यं यस्य ऋक्ष-
पंचकस्य तत् ॥ तत्र उदितः शुक्रः सूर्यमंडलात् उद्गतो विचरन् तिष्ठन् ॥ सस्यप्रणाशकृत ॥ सस्यानां प्रभूतं नाशम-
ति नाशं करोति ॥ तथा दुर्भिक्षं तस्कराश्चौराः तेभ्यो भयं जनयत्युत्पादयति ॥ तथा नीचानामुन्नतिं प्राधान्यं करोति
संकरकरश्च वर्णसंकरं करोति ॥ पित्र्याद्ये वक्रस्थ इति ॥ पित्र्याद्ये मघाद्ये मंडले अन्येनापरेण ग्रहेण वक्रस्थो रु-
द्धो यदि भवति ॥ तदा आविकान् पिभृतान् शबरान् जनान् शूद्रान् ॥ पुंड्रान् परांत्याः शूलिकजना वनवासिनो
वनेचराः ॥ द्राविडजनाः । सामुद्राः समुद्रतीरवासिन एतान् हंति ॥ घातयति ॥ ॥अथ चतुर्थमंडलस्य फलमा-
ह ॥ स्वात्याद्यं भत्रितयं मंडलमेतच्चतुर्थमभयकरं ॥ ब्रह्मक्षत्रसुभिक्षाभिवृद्धये मित्रभेदाय ॥ १६ ॥ अ-
त्राक्रांते मृत्युः किरातभर्तुः पिनष्टि चेक्ष्वाकुं ॥ प्रत्यंतावंत्यपुलिंदगणान् सूरसेनांश्च ॥ १७ ॥ ॥स्वात्याद्यमिति ॥
स्वात्याद्यं स्वातिपूर्वकं भत्रितयं ॥ स्वातीविशाखानुराधाख्यं चतुर्थमंडलं एतदभयकरं भयं न करोति ॥
पाध्याद्युत्तां भीतिं नोत्पादयति ॥ तथा ब्राह्मणानां क्षत्रियाणां सुभिक्षस्य चाभिवृद्धये भवति ॥ एतेषां वृ-
द्धिं करोति ॥ तथा मित्रभेदाय च भवति ॥ मित्राणां सुहृदां परस्परं भेदः ॥ अप्रीतिं जनयति । अत्राक्रांत इति ॥
अत्रास्मिन्मंडले अन्येन ग्रहेणाक्रांते शुक्रे किरातभर्तुः किराताधिपस्य पिनष्टि संचूर्णयति ॥ तथा चेक्ष्वाकु-
नृजनान् पिनष्टि च ॥ प्रत्यंता गन्हरवासिनः ॥ आवंता जनाः ॥ पुलिंदाः नदी गणाः शूरसेनाः । एतांश्च पिनष्टि-
न ॥ ॥अथ पंचममंडलस्य फलमाह ॥ ज्येष्ठाद्यं पंचर्क्षं क्षुत्तस्कररोगदं प्रबाधयति ॥ काश्मीराश्मकम-
त्स्यान् सचारुदेवीनवंतीश्च ॥ १८ ॥ अत्रारोहे द्रविडाभीरांबष्ठत्रिगर्तसौराष्ट्रान्नाशयति ॥ सिंधुसौवीरकां-
श्च काशीश्वरवधः ॥ १९ ॥ ॥ ज्येष्ठाद्यमिति । ज्येष्ठाद्यं ज्येष्ठापूर्वकं पंचर्क्षं पंचनक्षत्रं ॥ ज्येष्ठामूलपूर्वाषाढोत्तरा-
षाढाश्रवणाख्यं पंचमं मंडलं ॥ तच्च क्षुत तस्कररोगदं ॥ क्षुत् दुर्भिक्षं । तस्कराश्चौराः । रोगा गदाः एतान् ददाति ।
तथा काश्मीरजनान् अश्मकान् मत्स्यान् जनान् सचारुदेवान् चारुदेवीनदीतीरवासिन इत्यर्थः । सचारुदेवीः

बृ॰सं॰ नखारदेव्याभट्टितानवनीन॥एतान्बाधतेउपतापयति॥अत्रारोहेति॥अत्रास्मिन्मंडलेयद्यपरोग्रहः सित
७५ मारोहेततदाद्रविडजनानआभीरानअंबष्ठानत्रिगर्तानसौराष्ट्रानएतान्नाशयति॥तथासिंधुसौवीरकानज
नान्नाशयत्येव॥काशीश्वरस्यकाशीराजस्यवधोमरणंभवति॥ ॥अथषष्ठमंडलंतस्यफलमाह॥षष्ठं
षण्णक्षत्रंशुभमेतत्मंडलंधनिष्ठाद्यं॥भूरिधनगोकुलाकुलमनल्पधान्यंक्वचित्सभयं॥२०॥अत्रारो
हेशूलिकगांधारावंतयः प्रपीड्यते॥वैदेहवधप्रत्यंतयवनशकदासपरिवृद्धिः॥२१॥ ॥षष्ठंषण्णक्षत्रमि
ति। धनिष्ठाद्यंधनिष्ठापूर्वकंषड्नक्षत्रं॥धनिष्ठाशतभिषक्पूर्वाभद्रपदोत्तरभद्रपदारेवत्यश्विन्यंतं॥ए
तत्षष्ठंमंडलं॥तच्छुभंशुभफलप्रदंभूरिधनगोकुलाकुलं॥भूरिबहुधनंवित्तं॥गोकुलानिगोवाटाएतैराकुलंसं
घातं॥अनल्पधान्यं॥प्रभूतशालिसंयुक्तं॥क्वचित्सभयंभीत्यासंयुक्तं॥नसर्वत्र॥अत्रारोहेदिति॥अत्रास्मि
न्मंडलेयद्यपरोग्रहः।सितमारोहयेत॥तदाशूलिकाजनाः गांधारा अवंतयःएतेजनाः प्रपीड्यंतेउपताप्यंते।
तथाचवैदेहजनानांवधोमरणं॥प्रत्यंतागव्हरवासिनः शकायवनादासाः कर्मकराएतेषांवृद्धिर्भवति॥अ
थैतेषांमंडलानामेवविशेषमाह॥अपरस्यांस्वात्याद्यंज्येष्ठाद्यंचापिमंडलंशुभदं॥पित्र्याद्यंपूर्वस्यांशेषाणि
यथोक्तफलदानि॥२२॥अपरस्यांपश्चिमायांदिशिस्वात्याद्यंमंडलंज्येष्ठाद्यंमंडलंतत्शुभदं॥एतदुक्तंभ
वति॥अस्मिन्मंडलद्वयेशुक्रउदितः पश्चिमायांशुभप्रदः॥एवंपित्र्याद्यंमघाद्यंमंडलंपूर्वस्यांदिशिशुभदं॥
शेषाण्यन्यानिमंडलानियथोक्तफलदानियथाप्रागुक्तंतदेवभवति॥तथाचपराशरः॥अथारोहितदारुण
विरोचनाः थदंडताक्ष्णंतानिषण्मंडलानि॥तत्रभरण्यादीनिचत्वारिचतुर्नक्षत्राणि।ज्येष्ठाद्येवनक्षत्रे॥
आद्यमेवमंडलं॥वातमार्गमाद्रुतीक्ष्णंध्यानमार्गप्रवर्दंडावैश्वानरमेतेश्रवणाल॥अथमंडलप्रविचार
नक्रमातयोत्रखलचारिणस्तत्रयः मुहुर्मुहुःपालप्रजानामुपतापयति॥तेष्वेवोदयास्तमयौकुर्वन्प्रथमेमंडलेवि ७५
कभिद्यय॥अंगवंगकलिंगशबरान्मयेः स्पृशत्यत्रेवान्यग्रहारूढमौर्गिगुरुपादसूरसेनपदचरण
च्यागारोभावाय॥द्वितीयेनसंपत्र्दा॥अवंत्यसमकमालवपाड्यमालवकैकयोपद्रवाय॥तत्तायेड्ढक

सौराष्ट्रनृपाय॥अन्यग्रहारूढ॥काश्मीरयवनक्षुद्रकमालवकिरातशांकुनामानोः नयेनयुनक्ति॥चतुर्थेसुवर्णस्य
क्षेमाणिविधत्ते॥अन्यग्रहारूढः॥सुभगानांचक्षतानचोपतापयति॥पंचमेमंमध्यश्रद्रानोधानायैः सह
शस्यंचग्रहारूढोव्याधिभयशस्त्रदुर्भिक्षाः सर्वाणानिविसृजति॥विशेषतस्तुकुरुपांचालमाल्वेयसूरसेनपदच
रस्तारभूतयोभिपीड्यंते॥षष्ठेबालगर्भात्।बालान्श्रृंगिश्चहिनस्ति॥तथाचसमाससंहितायां॥भरणीत्रि
दृभघानिलशक्रधनिष्ठादिसंज्ञेषु॥चरतस्यः शुभोमंडलेष्विदिवेप्राग्विपापे॥अथादिवादृष्टस्यशुक्रस्यवि
शेषफलमाह॥ ॥दृष्टोनष्टगतेर्केभयकृत्क्षुद्रोगकृत्समस्तमहः॥अर्धदिवसेंदुर्नृपपुरबलभेदकृत्शुक्र
ः॥तथाचसमस्तमहः सकलंदिवसंदृष्टः शुक्रोभार्गवेअनस्तमितेअर्केसूर्येदृष्टोविलोकितोभयकृत्भयं
करोति॥तथाक्षुत्रोगकृत॥क्षुत्दुर्भिक्षं॥रोगांश्चगदान्करोति॥अर्धदिवसदति॥तथाअर्धदिवसेमध्या
न्हकालेसेंदुः सचंद्रःशुक्रोदृष्टोनृपभयपुरबलभेदकृत॥नृपस्यराज्ञोबलस्यसेनायाः॥पुरस्यनगरस्यचभे
दंपृथक्भावंकरोति॥तथाचपराशरः॥अह्नः सर्वेयदाशुक्रोदृश्यतेचमहाग्रहः॥तदालागंतुभियोमावध्यं
तेनगरोणच॥अथनक्षत्राणांभेदात्फलमाह॥भिंदन्गतोऽनलर्क्षंकूलातिक्रांतवारिवाहाभिः॥अव्यक्ततुं
गनिम्नासमासरिद्भिर्भवतिधात्री॥२५॥अनलर्क्षंकृतिकांभिंदन्भित्वायदिशुक्रोगतः।तदासरिद्भि
र्नदीभिः कूलाक्रांतावारिवाहाभिः।कूलान्यतिक्रांतवारिजलंवहंतीति॥याः आत्मीयंप्रवाहमतिक्रम्यप्रभ
तंजलंवहंतीत्यर्थः॥तथाभूताभिर्धात्रीभूरव्यक्तंतुंगनिम्नासमाभवति॥नव्यक्तमव्यक्तं॥तुंगमुच्चंनीचं।
नव्यक्तंतुंगनिम्नंयस्याः अलक्षितनीचोच्चप्रदेशेत्यर्थः॥अथरोहिण्याःशकटभेदफलमाह॥प्राजाप
त्येशकटेभिन्नेकृत्वेवपातकंवसुधा॥केशास्थिशकलशबलाकापालमिवव्रतंधत्ते॥२६॥प्राजापत्येरोहि
ण्याः शकटेभिन्नेशकटभेदलक्षणंगणितकारोक्तं॥तथाचब्रह्मसिद्धांते॥विंशपोडशगतादधिकोवृषभ
स्यसप्तदशभागे॥यस्यग्रहस्ययाम्योभिन्नात्तिशकटंसरोहिण्याः॥तथाचभानुभट्टः॥वृषभस्यांशेसप्त
दशेविक्षेपोदक्षिणोयदा॥अंशाद्द्व्याधिकोभिंद्यात्रोहिण्याःशकटंसततु॥एवंरोहिण्याःशुक्रेणशकटभि

वा॰ सं॰ नेव स्कंधाः भूः पातकं शल्यहत्यामेवं कृत्वा केशोमूर्धजैः रक्तिशकलैः रक्तसंदैः न्याबद्धामिश्रितः श्मश्रुजालं भवति।
अतः कापालिकं व्रतमिव धत्ते धारयति। किल ब्रह्महत्यायाः कापालं प्रायश्चित्तं॥ कापालिकश्च केशास्थिशक
लैः शबलो भवति॥ अथ मृगशिरार्द्रयोराह॥ ॥ सौम्योपगमो रसस्य संक्षयायोशनासमुद्दिष्टः॥ आर्द्रागत
७६ स्तु कोशलकलिंगहा सलिलनिकरकरः॥ २६॥ उशनाशुक्रः। सौम्योपगतो मृगशिरःप्राप्तो रसानां मधुरादीनां
सस्यानां संक्षयाय विनाशाय समुद्दिष्टः कथितः आर्द्रागतस्तु कोशलकलिंगहा॥ कोशलान् कलिंगान् हन्तीति
हन्तीति॥ सलिलनिकरकरः। सलिलं जलं तन्निकरो निवहस्तं करोति॥ अतिवृष्टिं करोतीत्यर्थः॥ ॥ अथ पुनर्वसु
पुष्ययोराह॥ अश्मकवैदर्भाणां पुनर्वसुस्थिते सिते महाननयः॥ पुष्ये पुष्टा वृष्टिर्विद्याधरगणविमर्दश्च॥
२७॥ पुनर्वसुस्थिते सिते शुक्रे महाननयः॥ अश्मकानां जनानां वैदर्भाणां च महाननयो भवति॥ अनय उप
द्रवः॥ तथा पुष्ये पुष्यस्थिते शुक्रे पुष्टा बह्वी वृष्टिर्भवति॥ तथा विद्याधराणां देवयोनीनां रणे संग्रामे विमर्दो
भवति॥ तथाश्लेषामघयोराह॥ आश्लेषासु भुजंगमदारुणपीडा रुजश्चरन् शुक्रः॥ भिंदन्मघां महामात्र
दोषकृत् भूरिवृष्टिकरः॥ २८॥ ॥ शुक्रः आश्लेषासु चरन् तिष्ठन् भुजंगमेभ्यः सर्पेभ्यो लोकानां दारुणां तीव्रां पी
डामावहति। करोति॥ मघां भिंदन् विदारयन्॥ महामात्राणां हस्तिसाधनपतीनां दोषकृत् दोषं करोति॥ के
चित् महामात्राः प्रधानाः अमात्या इति॥ भूरिवृष्टिकरो बहुवृष्टिकरः॥ भेदलक्षणं गणितकारैरुक्तं॥ आदित्य
तियोगताराज्ञाने ह्यौनाधिका द्रविक्षेपात्॥ स्फुटविक्षेपादस्याधिकोनको भवति॥ समलिप्तिकः। विक्षेपो
त्यसौम्यत्ताया ताराभिनत्ति॥ पित्र्यस्यं दुर्भिनत्ति॥ पुष्यं पौष्णं वारुणमचिन्त्यमिति॥ ॥ अथ पूर्वोत्तर
फाल्गुन्योराह॥ भाग्ये शबरपुलिंदप्रध्वंसकरोऽम्बुनिवहमोक्षाय॥ आर्यम्णे कुरुजांगलपांचालघ्नः सलि
लदायी॥ २९॥ भाग्ये पूर्वफाल्गुन्यां शबराणां पुलिंदानां च प्रध्वंसकरो नाशकरः॥ अंबुनिवह ७६
मोक्षाय॥ अंबुनो जलस्य निवहस्तं मुंचति॥ बहुजलं वर्षतीत्यर्थः॥ आर्यम्णे उत्तराफाल्गुन्यां कुरुजांगला
न्॥ स्वल्पोदककाननं जांगलं॥ तत्र ये निवसंति प्राणिनः पांचालान् जनान् हन्ति॥ सलिलदायी सलिलं जलं

ददातीत्यर्थः॥ ॥ अथ हस्तचित्रयोराह॥ कौरवचित्रकराणां हस्ते पीडा जलस्य च निरोधः॥ कूपकृदंडजपीडा चि
त्रास्थे शोभना वृष्टिः॥ ३०॥ हस्तस्थे शुक्रे कौरवा जनाः चित्रकराश्चित्रज्ञाः॥ शिल्पिनः एषां पीडा भवति॥ जलस्यो
दकस्य निरोधोऽवर्षणं॥ चित्रास्थे शुक्रे कूपकाराणां अंडजानां पक्षिणां च पीडा भवति॥ वृष्टिश्च शोभना कालो
पयोग्या भवति॥ ॥ अथ स्वातिविशाखयोराह॥ स्वातौ प्रभूतवृष्टिः दूतवणिङ्नाविकान् स्पृशत्यनयः॥ ऐन्द्रा
ग्ने च स्फुटवृष्टिर्वणिजां च भयं विजानीयात्॥ ३१॥ स्वात्यां स्थिते शुक्रे प्रभूता बह्वी वृष्टिर्भवति॥ दूता गमागामि
नः वणिजः क्रयविक्रयज्ञाः नाविका नौकर्णधाराः एतान् अनयः स्पृशति॥ सोपद्रवा भवन्तीत्यर्थः॥ ऐन्द्राग्ने वि
शाखायां सुवृष्टिः शोभना वृष्टिर्भवति॥ तथा वणिजां किरातानां भयं भीतिं विजानीयात्॥ विंद्यात्॥ अथानु
राधाज्येष्ठामूलेष्वाह॥ मैत्रे क्षत्रविरोधो ज्येष्ठायां क्षत्रमुख्यसंतापः॥ मौलिकभिषजां मूले त्रिष्वपि चैतेषु च ना
वृष्टिः॥ ३२॥ मैत्रे अनुराधायां क्षत्रविरोधः क्षत्रियाणामुपद्रवः॥ ज्येष्ठायां स्थिते शुक्रे क्षत्रमुख्यानां क्षत्रिय
प्रधानानां संतापः उपद्रवः॥ मूले मौलिकानां मूलद्रव्यविक्रयिणां भिषजां वैद्यानां च संतापः॥ एतेषु त्रि
ष्वनुराधाज्येष्ठामूले॥ अनावृष्टिरवर्षणं भवति॥ ॥ अथ पूर्वाषाढोत्तराषाढाश्रवणधनिष्ठास्वाह॥ आप्ये
सलिलपीडा विश्वेशे व्याधयः प्रकुप्यंति॥ श्रवणे श्रवणव्याधिः पाखंडिभयं धनिष्ठासु॥ ३३॥ आप्ये पूर्वाषा
ढायां सलिलैः जलोद्भवैः प्राणिभिः द्रव्यैश्च प्राणिनां पीडा भवति॥ सलिलजानां पीडेति केचित्॥ विश्वेशे उत्त
राषाढायां स्थिते शुक्रे व्याधयो रोगाः प्रकुप्यंति॥ बाहुल्येन भवंति॥ श्रवणे श्रवणव्याधिः कर्णरोगो भवति॥ ध
निष्ठास्थिते पाखंडिभयं॥ पाखंडिनो वेदबाह्यास्तेषु भयं भवति॥ शतभिषजि शौण्डिकानां अजैकपादे द्यूतजी
विनां पीडा। कुरुपांचालानामपि करोति चास्मिन् सितः सलिलं॥ ३४॥ सितः शुक्रः। शतभिषजि स्थितः शौं
डिकानां मद्यपानप्रसक्तानां मद्यपानप्रसक्तानां पीडाकरः॥ अस्मिन् अजैकपादे भद्रपदायां स्थिते द्यूतेन ये जीवं
ति तेषां पीडाकरः॥ कुरवः पांचालाश्च जनास्तेषामपि पीडां करोति॥ अपिशब्दोऽत्र चार्थे अस्मिन् नक्षत्रे स्थितः
सितः शुक्रः सलिलं करोति॥ अथोत्तरभद्रपदरेवत्यश्विनीभरणीष्वाह॥ ॥ अहिर्बुध्न्ये फलमूलतापकृतया

यिनां नरेवल्यां॥ अश्विन्यां दूयवानां याम्येतु किरातयवनानां॥ ३५॥ अहिर्बुध्न्ये उत्तरभद्रपदायां फलानां मूलानां
नतापकृत्॥ पीडाकरः॥ रेवत्यां यायिनां पथिकानां च पीडाकरः॥ अश्विन्यां स्थितो दूयवानां अश्ववतानां ताप
कृत्॥ याम्ये भरण्यां किरातानां यवनानां जनानां च तापकृत्॥ तथा च कश्यपः॥ भेदयेत कृत्तिकां शुक्रो बहुतोयं
विमुंचति॥ रोहिण्यां मरणं घोरं रुधाकुलभयाकुलं॥ मृगे तु सर्वसस्यानां क्षयं कुर्यात् भृगुसुतः॥ आर्द्रामुच
कलिंगानां कोशलानां भयावहः॥ पुनर्वसौ विदर्भाणां पीडयत्यर्तिनाकिला॥ पुष्ये पुष्टिं समायांति जनाः स
स्याति वृष्टयः॥ आश्लेषास्तु ज्ञानां भेदात पीडयेत भुजगैः स्तताः॥ मघाभेदकरः शुक्रो महामात्रांश्च पीडयेत॥
हस्ते चित्रकराणां तु पीडा वृष्टिक्षयो भवेत॥ सुवृष्टिं च कृत पीडां चित्राभेदं यथा व्रजेत॥ स्वातौ भेदस्तु वृष्टिं
वणिक् नाविक भीतिदः॥ विशाखायां सुवृष्टिश्च मैत्रे मैत्रं विरुध्यते॥ ऐंद्रे पौरविरोधस्यात मूले तु भिषजां भयं
॥ अथ वैरवेन्याधि भयं वै श्रवणे कर्णवेदना॥ धनिष्ठासु कुकर्मस्थान वारुणे शौंडिकक्षयः॥ प्रोष्ठपदे बलस
नाना द्विर्बुध्ने बलक्षयः॥ यायिनां सत्वपाणां च पौष्णे दोषं मतं स्मृतं॥ अश्विन्यां दूयपीडा कृत भरण्यां कृष्टि
हा विनर्गमिति॥ तथा च पराशरः॥ भाग्यर्यमणिकेंद्रश्रोत्रपदरोहिण्या स्वाति॥ व्यगतः स्निग्धरश्मिवर्षिकरः॥ तत्रस्था
नापत्यबहुं द्राग्नमैत्राणा मुदग्मध्यं दक्षिणेन व्रजेत॥ क्षेमसस्यवृष्टीनां प्रकृष्टमध्यान्नतफलो भवति॥ पित्र्या
ग्नेय योरग्म पगलः प्रजाहितायः॥ एवमेषावादोदित्य रोहिणी पम ध्यगः पुरोधाय च॥ ॥ अथ शुक्रस्याति
थेश्च अस्तमय फलमाह॥ चतुर्दशी पंचदशी ममाष्टमीतमिस्रपक्षस्य तिथिं भृगोः सुतः॥ यदा व्रजेत दर्शन
मस्तमेव वा नदा मही वारिमयी व लक्ष्यते॥ ३६॥ भृगोः सुतः शुक्रः तमिस्रपक्षस्य कृष्णपक्षस्य चतुर्दशीं तिथिं
पंचदशीममावास्यामष्टमीं वा समाश्रित्य यदा दर्शनमुदयं व्रजेत॥ सूर्यमंडलात उद्गच्छति॥ अथवा स्तमयं व्र
जेत॥ तत्रैवादर्शनमायाति॥ तदा मही भूर्वारिमयी जलमयी लक्ष्यते दृश्यते अतिवृष्टिर्भवतीत्यर्थः॥ तथा ७१
च कश्यपः॥ कृष्णपक्षे ह्यमावास्या चतुर्दश्यष्टमी पुनः॥ उदयं भार्गवः कुर्यात तदा वृष्टिं प्रमुंचति॥ पराशरः
श्चात्रविशेषमाह॥ कार्तिके तु यदा सितकृते स्तमयोदयौ॥ तदा न्वंतं न वतिपूर्णा देवो भविन वर्षति॥ वर्त

मानेयदा शुक्रे कृत्तिकासु बृहस्पतिः॥ उदेति नु तदा देवस्तां समां वर्षति समं॥ अस्तमयं शुक्रस्य यदि चंद्र द्विवाकरो॥ आ
वृत्य मार्गं कुर्वंते तदा वर्षति भार्गवः॥ अवार्षिके भेनिचरन यदि वर्षति भार्गवः॥ वार्षिके हर्षगतो यत्र तं घोरशार्दूलं नि
र्षति॥ अथ गुरुशुक्रयोरन्योन्यं समसमथयोः फलमाह॥ ॥ गुरुर्भृगुश्चापरपूर्वकाष्ठयोः परस्परं सप्तमराशिगौय
दा॥ तदा प्रजा रुक्भय शोकपीडिता न वारि पश्यंति पुरंदरोज्झितं॥ ३७॥ गुरुर्जीवो भृगुः शुक्रो एतावेव परपूर्वका
ष्ठयोः॥ अपरा पश्चिमा॥ पूर्वा प्राची॥ काष्ठा दिक्॥ पश्चिमपूर्वयोः काष्ठयोर्दिशयोः परस्परं अन्योन्यं यदि सप्तम
राशिगौ भवतः॥ कदाचित् पूर्वकाष्ठागतः शुक्रः॥ अपरकाष्ठागतो गुरुः॥ अपरकाष्ठागतः शुक्रः॥ नन्वत्रापरपू
र्वकाष्ठयोरित्यनेनैव सिद्धे सप्तमराशिग्रहणं किमर्थमुच्यते॥ यदि सप्तमराशिग्रहणं न क्रियते॥ तदा पूर्व
स्थावन्येनापि प्रकारेण भावः॥ एकः प्राक्कपालस्थितोऽपरोऽपरकपालस्थः तदा परपूर्वकाष्ठयोर्भवतः॥ इत्य
तः सप्तमराशिग्रहणं कृतं॥ तेनैतज्ञापयति॥ यथा उदयास्तमययो रेखासंनयोः संयोगेन प्राप्तेन॥ नान्यथा॥ ए
वं परस्परं सप्तमराशिगौ यदा यस्मिन् काले भवतः॥ तदा तस्मिन् काले प्रजा रुक्शोकभयपीडिताः॥ रोगो भये
न च दुःखेन च पीडिताः उपद्रुताः॥ पुरंदरोज्झितामिंद्रविसृष्टं वारिजलं न पश्यति॥ नावलोकयति॥ अवृष्टि
र्भवतीत्यर्थः॥ नन्वत्र यथा संख्येनैवापरकाष्ठगो गुरुर्भृगुः पूर्वदा भवतः॥ तदायं योगो भवति॥ किंतु म
नियमेन भवति॥ यतः पराशरेण यथा तथा भृगुर्गुरुश्चेति॥ अनयापत्र प्रतिपत्या वा यथा संख्येनैव
कस्मात योगो न भवति॥ कथमनियमेन भवति॥ यतः पराशरेण गुरुर्भृगुः परकाष्ठस्थावभिहितो॥ त
था च॥ उदयास्तमयस्थो तु यदा शुक्रबृहस्पतिः॥ पूर्वसंध्यागतौ स्यातां जनयेतां तदा भयं॥ अपि पुत्रेण
च भृगुगुरु अपर पूर्वकाष्ठस्थावभिहितौ॥ तथा च॥ उदस्तस्त जनायत्र पुरस्ताच्च बृहस्पतिः॥ न कश्चि
श्चंद्रमसौ मध्ये तु धावाप्यथ दृश्यते॥ एकमार्गसमासन्नौ प्रेक्षमाणौ परस्परं॥ ते दिशौ पीडितौ विद्यात
नीत्यक्षानभियाज्ञयेत॥ अत उभयदर्शनान्निश्चीयते॥ यथा कर्षाणामेकवाक्यता नास्त्येव॥ स्वस्वमत
मेवांगीकृतं॥ ते रीति॥ वयं त्वत्र क्रमः॥ उदयदर्शनात भृगुगुरुभ्यामनियमाः आचार्यस्याभिप्रेतः॥ तथा

बृहस्पतिज्ञानकोपि प्रयोगः कृत एव ॥ अथ रश्मिप्योतिषमवधकेषु सहशुक्राद्यागमिकोवार्योगान्तरं विशेषयते
ध्यानपूर्वं शक्तेश्चित्पत्राणि यमव्याख्या यथातथाकृतेनं ॥ अत्रापि यथातथाग्रहयोगे योरप्यपरपूर्वकाण्ड
यत्रियनियमव्याख्यापरयायमी ॥ सतिवानि यमेषाठविप्रतिपत्ति चोदने कर्तव्यानि ॥ तथाच भद्रबाहोरपि
मते ॥ प्रत्यूषेभाकास्थितः शुक्रः पृष्ठतस्तु बृहस्पतिः ॥ यदान्योन्यं निरीक्षेते तदा चक्रं प्रवर्तते ॥ धर्मार्थकामालुप्यं
न संभवो वर्णसंकरः ॥ रत्नानां समनर्घाणां यतो शुक्रजलोऽजयः ॥ अवृष्टिश्च भयं रोगाद्दुर्भिक्षं च तदा भवेत् ॥ आ
दकेन तु धान्यस्य स्याद्रकश्चित्तदाप्रियः ॥ यदा चाग्रगतः शुक्रः पुरतश्च बृहस्पतिः ॥ यदा चैकोदये ताणतेरेव ककुभ
वेत ॥ तथाच गर्गः ॥ अन्योन्यमस्तमं संस्थायदि शुक्रबृहस्पतिः ॥ पूर्वसंध्यागतो घोरं तत्र न दृश्यते नाम हृदयं ॥ तथा
सा धृतमंशुक्रपृष्ठतः पुरतो भवेत् ॥ अथ सर्वग्रहैः शुक्रस्याग्रवर्तिनः फलमाह ॥ ॥ यद्यास्थिता जीवबुधार
सूर्यजाः सितस्य सर्वेपि पश्चानुवर्तिनः ॥ नागविद्याधरसंगराः तदा भवंति चाताश्च समुच्छ्रितानतकाः ॥ ३८
॥ ॥ नमित्रभावे सुहृदोपि वस्थिताः क्रियाः सुसम्यकुर्वते द्विजातयः ॥ न चाल्पमप्यंबुददाति वासवो
भिनत्ति वज्रेण गिरांसि भूभृतां ॥ ३९ ॥ यद्यास्थिता इति ॥ यदायस्मिन्काले जीवबुधारः सूर्यजाः ॥ जीवो
बृहस्पतिः ॥ बुधः सौम्यः ॥ आरो भौमः ॥ सूर्यजः शनैश्चरः ॥ सर्वएव सितस्य शुक्रस्य अग्रपश्चानुवर्ति
नः ॥ पुरः सरा भवंतीत्यर्थः ॥ तदास्मिन्काले नृणां मनुष्याणां नागानां पन्नगानां विद्याधराणां देवयो
नीनां संगराः संग्रामा भवंतीत्यर्थः ॥ तथा वाता वायवः ॥ समुच्छ्रितानां पर्वतवृक्षादीनां अंतकाः ध्वंसा
यपातिनो भवंति ॥ नमित्रभावइति ॥ तथा द्विजा लया ब्राह्मणाः सम्यक् यथा वेदविहिता सुक्रिया अग्नि
होत्राद्याः सुनिरताः सक्ता न भवंति ॥ तथा वासवेंद्रो अल्पं स्तोकं अपि अंबुजलं न ददाति ॥ न प्रयच्छति ॥ भूमि
दुर्षतीत्यर्थः ॥ भूभृतानां पर्वतानां वज्रेणोल्कया शिरांसि मस्तकानि भिनत्ति विदारयतीत्यर्थः ॥ एवं सर्व
फलं साधुनेकेकाग्रतस्थस्य वक्तुकामः ॥ शनैश्चरस्य तावदाह ॥ शनैश्चरे केकिविडालकुंजराः खरामहिष्या ७८
सितधान्यशूकराः ॥ पुलिंदशूद्राश्च सदक्षिणापथाः क्षयं व्रजंत्यक्षिमरुद्भवै ॥ ४० ॥ शनैश्चरेग्र

कस्याग्रतः स्थिते केकिमयूराः ॥ विडाला मार्जाराः ॥ कुंजरा गजाः ॥ खरा गर्दभाः ॥ महिष्यः प्रसिद्धाः ॥ असितधान्यं
कृष्णधान्यं ॥ शूकरा वराहाः ॥ पुलिंदा निषादजनाः ॥ शूद्रा जनाः ॥ ते च दक्षिणापथाः दक्षिणदिक्वासिभिर्ज
नैः सहिता ॥ एते सर्वएव क्षयं विनाशं व्रजंति ॥ कैः अक्षिमरुद्भवैः ॥ अक्षिषु नेत्रेषु ये गदा ॥ मरुता वायुना
च ये गदा रोगास्तदुद्भवैः तदुत्पन्नैः ॥ दोषैरिति ॥ अथ भौमाग्रतः स्थितफलमाह ॥ ॥ निहंति शुक्रः क्षिति
जोग्रतः प्रजा हुताशशस्त्रक्षुदवृष्टितस्करैः ॥ चराचरं व्यक्तमथोत्तरापथं दिशोग्निविद्युद्रजसा च पीडयेत्
॥ ४१ ॥ शुक्रो भार्गवः क्षितिजे भौमे ॥ अग्रतः पुरतः स्थिते सति प्रजाः लोकान्हंति ॥ नाशयति ॥ कैः क्षुदवृ
ष्टितस्करैः ॥ हुताशोग्निः ॥ शस्त्रमायुधं संग्राम इत्यर्थः ॥ क्षुत् दुर्भिक्षं ॥ अवृष्टिरवर्षणं ॥ तस्कराश्चौराः ॥
एते ॥ तथोत्तरापथं उत्तरांदिशं ॥ चराचरं व्यक्तं ॥ चरं जंगमाख्यं ॥ अचरं स्थावराख्यं ॥ व्यक्तं निःशेषं हंति ॥
तथा दिश आशाः विद्युद्रजसा च पीडयेत् ॥ अग्निना हुताशनेन ॥ विद्युता तडिता ॥ रजसा पांशुना एते पी
डयेत् ॥ उपतापयेत् ॥ अथ बृहस्पतिचाग्रतः स्थितफलमाह ॥ ॥ बृहस्पतौ हंति पुरःस्थितः सितः सितं सम
स्तान्द्विजगोसुरालयान् ॥ दिशं च पूर्वां करकासृजोंबुदा गलेगदा भूरिभवेच्च शारदं ॥ ४२ ॥ सितः शुक्रो बृह
स्पतौ जीवे पुरतः स्थिते अग्रवर्तिनि सति समस्तान् निःशेषं यातो चलं सितं शुक्लवर्णं तथा द्विजगोसुराल
यान् ॥ द्विजान्ब्राह्मणान् गोगावः ॥ सुरादेवाः ॥ एषामालयस्थानानि हंति ॥ नाशयति ॥ तथा दिशामाशां
पूर्वामैंद्रीं निहंति ॥ अंबुदा मेघाः करकासृजः करकाश्चाश्मशानि सृजंति मुंचंति ॥ लोकानां गलेकंठे गदा
रोगा भवंति ॥ शारदं च सस्यं बहुभवेत् ॥ अथ बुधाग्रतः स्थितः फलमाह ॥ ॥ सौम्यास्तोदययोः पुरोस्य गुरु
तः स्याच्च स्थिते तोयकृत् रोगानवितरकामलांश्च कुरुते पुष्णाति च क्रोधमकान् ॥ हन्यात्प्रव्रजिताग्निहोत्रिक
भिषग्रंगोपजीव्यान्हयान्वैश्यान्गाः सह वाहनैर्नरपतीन् पीतानि पश्चाद्दिशं ॥ ४३ ॥ सौम्यो बुधो भृगु
सुतस्य पुरोग्रतोस्तोदययोरस्तमितः सूर्यमंडलोस्थितः ॥ उदितस्तन्निर्गतो थ यथाच स्थितः ॥ संस्थितस्तोयकृत्
भवति ॥ तोयं जलं करोति ॥ तथा रोगानज्वरादीन्कुरुते ॥ पित्तकामलांश्च पित्तज्ञो रोगोः सहिता कामलाः पित्तकाम

कुः तांश्च करोति॥ ग्रैष्मिकान्ग्रीष्मजान् सस्यादीन् पुष्णाति प्रवर्धयति॥ तथा प्रजातानानावनस्थान्॥ अग्नि
बृ॰सं॰ होत्रिणः अग्निहोत्रभक्तान्॥ भिषजो वैद्यान्॥ गोपजीव्यान् सद्गुणान्॥ हयान् अश्वान्॥ वैश्यान् वैश्य
जातीयान्॥ गा गावः॥ तथा वाहनेरथ्यादिभिश्च सद्भुनरपर्वतान्स्थान्॥ पीतानि पीतवर्णानि सर्वाणि द्रव्या
५० णि॥ पश्चाद्दिशं अपरां प्रतीच्यां दिशं तत्राशयेत्॥ ॥ अथ वर्णलक्षणमाह॥ शिखिभयमनलाभे शस्त्र
कोपश्च रक्ते कनकनिकषगौरे व्याधयो दैत्यपूज्ये। हरितकपिलरूपे श्वासकासप्रकोपाः पतति न सलि
लं खात् भस्मरूक्षासिताभे॥ ४४॥ दैत्यपूज्ये शुक्रे अनलाभे अग्निसदृशकांतौ शिखिभयमग्निभीतिर्भवति
। रक्ते लोहितवर्णे शस्त्रकोपः संग्रामा भवंति। कनकनिकषगौरे कनकस्य सुवर्णस्य काषाणिकषलेखा तद्वत् गौरे
गौरवर्णे व्याधयो रोगा भवंति॥ हरितरूपे रक्ताभे॥ कपिलवर्णे पिंगलवर्णे च श्वासप्रकोपा भवंति॥ श्वासेन
कासेन च जनानां कोपानां पीडा भवति॥ भस्माभे भस्मवर्णे रूक्षस्निग्धरहिते॥ असिताभे कृष्णकांतौ। खा
त् आकाशात् सलिलं जलं न पतति॥ देवो न वर्षतीत्यर्थः॥ ॥ अन्यदप्याह॥ दधिकुमुदशशांककांतिभृत्स्फु
टविकसत्किरणो बृहत्तनुः॥ सुगतिरविकृतो जयान्वितः कृतयुगरूपकरः सितोदयः॥ ४५॥ ईदृग्रूपः
सितोदयः सितनामा शुक्रः कृतयुगरूपकरः कृतयुगस्य रूपं करोति॥ तद्वर्णानुप्रयुनक्ति जना व्याधिदारि
द्र्यशोकवर्जिता भवंतीत्यर्थः॥ कीदृशः॥ दधिकुमुदशशांककांतिभृत्॥ दध्नः क्षीरविकारस्य॥ कुमुदस्य पुष्पवि
शेषस्य॥ शशांकस्य चंद्रस्य सदृशीं कांतिं आभां धारयति॥ स्फुटविकसत्किरणाः स्फुटाः स्पष्टाः विकसि
ताः किरणा रश्मयो यस्य स तथा बृहत्तनुः विस्तीर्णदेहः सुगतिः शोभनगतिः अविकृतो ग्रहदक्षिणोत्तर
भागगतो विकृतो विकारवर्जित उत्पातरहितः॥ जयान्वितो जययुक्तः॥ तथा च पराशरः॥ हिमकरकररजत
कशांखस्फटिकवैडूर्यमुक्तामधूकृतं मंडलमेषां स समः पुरस्तात् स्निग्धदीप्तकांतिप्रकाशः॥ प्रसन्नार्चिरनणु ५०
रचनिपतितहितः प्रशांतवीरः॥ सुभिक्षारोग्यवृष्टिकरश्च॥ श्यावनीलरूक्षकपिलरक्तध्वस्तदीप्तिरल्पको
हसंनिभः शस्त्रचौरव्याध्यवग्रहान्क्षयकरः॥ तथा कृष्णगारनिभः स्निग्धो मार्गस्थिरजातप्रभः भार्गवो

विलंबार्थश्च प्रजाभावकरः स्मृतः उक्तः॥ ॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ शुक्रचारो नामा
ध्यायो नवमः॥ ९॥ ७॥ ॥ अथातः शनैश्चरचारो व्याख्यायते॥ तत्रादावेव शनैश्चरस्य नक्षत्रावस्थितव
शेन फलमाह॥ श्रवणानिलहस्तार्द्राभरणीभाग्योपगः सुतोऽर्कस्य॥ प्रचुरसलिलोपगूढां धात्रीं करोति य
दि स्निग्धः॥ १॥ अहिवरुणपुरंदरदैवतेषु क्षेमकृन्न चातिजलः॥ झषकृच्छ्राग्निकरो मूले प्रत्येकमपि वक्ष्ये॥ २॥
श्रवणानिलेति॥ श्रवणं प्रसिद्धं॥ अनिलः स्वातिः॥ हस्तः॥ आर्द्रा भरणी॥ भाग्यं पूर्वाफाल्गुनी॥ एतेषु नक्षत्रेषु
अर्कस्य सुतः शनैश्चर उपगतः प्राप्तः स्थित इत्यर्थः॥ तत्र स्निग्धो विपुलमूर्तिर्भवति॥ तदा धात्रीं भूमिं प्रचुरस
लिलोपगूढां प्रचुरेण सलिलेन प्रभूतोदकेन पानीयेनोपगूढां छन्नां करोति॥ तथा च गर्गः॥ स्वात्यां वायव्यः
सावित्रे तद्वच्छ्रवणसंस्थितः॥ भवेत्स्निग्धवपुः सौरे भाग्ये चैवातिवृष्टिदः॥ अहिवरुणेति॥ अहिदैवतमा
श्लेषा॥ वरुणदैवतं शतभिषक्॥ पुरंदर इंद्रस्तद्दैवत्यं ज्येष्ठा॥ एतेष्ववस्थितः सौरः सुक्षेमकृत् शोभनं क्षेमं
च करोति॥ न चातिजलमतिप्रभूतं जलमुदकं न करोति॥ झषकृच्छ्राग्निकरो मूले॥ मूलस्थितो दुर्भिक्षं शस्त्र
संग्रामः अग्निरग्निभयं एतान् करोति॥ प्रत्येकमपि वक्ष्ये॥ एकमेकं प्रतिप्रत्येकं॥ इदानीं प्रत्येकं नक्षत्रम
धिकृत्य वक्ष्ये। कथयिष्ये॥ तथा च गर्गः॥ सार्पमाहेंद्रवारुणनक्षत्रेषु संस्थितः॥ स्निग्धः सुक्षेमकृत्सौरो ना
तिवृष्टिं प्रमुंचति॥ झषकृच्छ्राग्निदो मूले सूर्यपुत्रसमाश्रितः॥ अथाश्विनीभरण्योः समवस्थितस्य फलमा
ह॥ ॥ तुरगतुरगोपचारककविवैद्यामात्यहार्कजोऽश्विगतः॥ याम्ये नर्तकवादकगेयज्ञक्षुद्रनैकृतिकान्हंति॥
॥ ३॥ अर्कजः सौरः अश्विगतः अश्विन्यामवस्थितः तुरगाणामश्वानां तुरगोपचारकाणां ये उपचारकास्तेषां
तथा कवीनां काव्यकुशलानां वैद्यानां कायचिकित्सकानां आमात्यानां मंत्रिणां च एतान् हंति॥ नाशयति
वादनं शिल्पमसौ वादकः। गेयज्ञान् गीतज्ञान्। क्षुद्रान् न्यायवर्जितान्। नैकृतिकान् शठान्। एतान्हंति नाश
यति॥ ॥ अथ कृत्तिकारोहिण्योः फलमाह॥ बहुलास्थे पीड्यंते सौरेऽग्न्युपजीविनश्चमूनाथाः॥ रोहिण्यां
कोशलमद्रकाशिपांचालशाकटिकाः॥ ५॥ सौरे शनैश्चरे बहुलास्थे कृत्तिकास्थिते अग्न्युपजीविनश्चमूनाथाः॥

र्ताः कुवर्णकास्कोहकारायस्कारप्रभृतयः। नमनाथास्तेनापतयः। एते पीड्यंते॥ रोहिण्यामिति॥ रोहिण्यांस्थिते
बा॰सं॰ सौरे शनैश्चरे। कोशलकजनाः। मद्राः काशयः पंचालाः सर्वेपि जनाः। शाकटिकाः शकटोपजीविनः। एते पीड्य
ंते॥ ॥अथ मृगशिरआर्द्रयोराह॥ मृगशिरसि वत्सयाजकयजमानार्यजनमध्यदेशाश्च॥ रौद्रस्थे पारतरमठ
८० तैलिकरजकचौराश्च॥ मृगशिरःस्थिते सौरे वत्सा जनाः याजका याजयंति ते याजकाः। जनिनः। यजमाना
याज्ञिकाः। आर्यजनाः प्रधानजनाः। मध्यदेशप्रसिद्धः। रजकाः वस्त्ररागकृतः। चौरास्तस्कराः। एते पीड्यंते॥
॥अथ पुनर्वसुतिष्ययोराह॥ आदित्ये पंचनदप्रत्यंतसुराष्ट्रसिंधुसौवीराः। पुष्ये घांटिकघोषिकयवनवणिक्
कितवकुसुमानि॥ ६॥ आदित्ये पुनर्वसौ। पंचनदजनाः। प्रत्यंतगव्हरवासिनः। सुराष्ट्रदेशाः सिंधवाः सौवी
रजनाः। एवं पीड्यंते॥ पुष्यस्थिते सौरे घांटिकाः घंटावादनाजीवा ये यांते घांटिकाः॥ श्वानकादृत्यर्थः। अथवा
घोषगव्हरेष्वनेन संति घोषिकाः॥ यवनाजनाः। वणिजः। कितवाः। कितवद्यूतकाराः। कुसुमानि पुष्पाणि। ए
ते पीड्यंते॥ ॥अथाश्लेषामघयोराह॥ सार्पे जलरुहसर्पाः पित्र्ये बाल्हीकचीनगांधाराः॥ शूलिकपारतवै
श्याः कोष्ठागाराणि वणिजश्च॥ ७॥ ॥ सार्पे आश्लेषायां। जलरुहा जलोद्भवाः प्राणिनः॥ सर्पा पन्नगाश्च
पीड्यंते। तथा च गर्गः॥ भुजंगकच्छपग्राहनागमत्स्यसरीसृपान्॥ हन्याद्दर्शमतस्तिष्यं नक्षत्रं सर्प
दैवते॥ पित्र्ये मघायां बाल्हीकाः चीनाः गांधाराः शूलिकाः॥ पारताः सर्वेपि जनाः॥ वैश्यास्तृतीयवर्णा
ः। कोष्ठागाराण्यन्नस्य धामानि॥ वणिजः कितवाश्च पीड्यंते॥ इति सर्वत्र योज्यं॥ अथ पूर्वफाल्गुन्युत्तरफाल्गु
न्योराह॥ ॥भाग्ये रसविक्रयिणः पण्यस्त्रीकन्यका महाराष्ट्राः॥ आर्यम्णे नृपगुडलवणभिक्षुकांबूनि तक्षशिला
॥ ८॥ भाग्ये पूर्वफल्गुन्यां। रसविक्रयिणः रसाः षट्। मधुराम्लकटुतिक्तकषायः। एषां विक्रयकारि
णः। पण्यस्त्रियो वेश्याः। कन्यकाः कुमार्यः। महाराष्ट्रदेशे ये निवसंति ते जनाः॥ ते सर्वएव पीड्यंते। आर्यम्णे उत्तरा ८०
फाल्गुन्यां नृपा राजानः। गुडमिक्षुविकाराः॥ लवणं प्रसिद्धं॥ भिक्षवो यतयः॥ अंबु पानीयं॥ एतानि तक्षशि
लानगरी॥ एते सर्वे पीड्यंते॥ ॥अथ हस्तचित्रस्याह॥ हस्ते नापितचाक्रिकचौरभिषक्सूचिकद्विपग्राहाः॥

DR. BHAU DAJI MEMORIAL

बंधक्यः कौशलका मालाकाराश्च पीड्यंते॥ ९॥ हस्तस्थिते सौरे नापिताः श्मश्रुकर्मविदः। शिल्पिनः। चाक्रिकाश्च
क्रेण चरंति चाक्रिकाः॥ कुंभकारतैलिकप्रभृतयः। चौरास्तस्कराः। भिषजो वैद्याः। सूचिकाः प्रसिद्धाः शिल्पिनः
द्विपा हस्तिनः। तेषां ग्राहकाः स्मृताः॥ बंधक्यो वेश्याः। कौशलकजनाः। मालाकाराः पुष्पप्रदायकाः। एते स
र्वे पीड्यंते॥ ॥अथ चित्रास्वात्योराह॥ चित्रास्थे प्रमदाजनलेखकचित्रज्ञचित्रभांडानि॥ स्वातौ मागधचरदूत
सूतपोतप्लवनटाद्याः॥ चित्रास्थे सौरे प्रमदाजनः स्त्रीलोकः। लेखकाः। लिपिज्ञाः॥ चित्रज्ञाः चित्रकर्मविदः
विचित्रः भांडानि विचित्राणि नानावर्णानि बहुवर्णानीत्यर्थः। एतानि पीड्यंते॥ स्वातिस्थे सौरे मगधानामश्रा
वकाः जनाः वा मगधदेशनिवासिनः। चराः गूढपुरुषाः॥ दूताः गमागमकारिणः॥ सूताः सारथयः। कथाश्रावका
वा॥ पोतः समुद्रो येन तीर्यते तत्र ये प्लवंते॥ पोतेन यांतीत्यर्थः। नटाः नृत्यकाः आदिग्रहणात् अन्येपि ये
नटवाद्यज्ञाः। ते सर्वे पीड्यंते॥ ॥अथ विशाखास्थितआह॥ ऐंद्राग्न्याख्ये त्रैगर्तचीनरकौलूतकुंकुमलाक्षा॥
सस्यान्यथ मांजिष्ठं कौसुंभं च क्षयं याति॥ ११॥ ऐंद्राग्न्याख्ये विशाखायां स्थिते सौरे त्रैगर्तजनाः चीनाः
कौलूताः कुलूतनिवासिनः। कुंकुमं काश्मीरं॥ लाक्षा जतु। सस्यानि प्रसिद्धानि॥ अथ मांजिष्ठं अथ शब्दश्चा
र्थे। मंजिष्ठया रक्तं मांजिष्ठं। कुसुंभेन रक्तं कौसुंभं॥ एतत्सर्वं नाशमायाति। नश्यतीत्यर्थः॥ ॥अथानु
राधायामाह॥ मैत्रे कुलूतकुंगणकखसकाश्मीराः। समंत्रिचक्रचराः। उपतापं यांति च घांटिकाश्च भेदं मित्रा
णां॥ १२॥ मैत्रेऽनुराधास्थे सौरे कुलूतकाः देशास्तत्रत्या ये जनाः। तङ्गणाजनाः खसाः पर्वतवासिनः। काश्मीरा
जनाः। किंभूताः समंत्रिचक्रचराः। मंत्रिभिः सचिवैः चक्रचरैः कुंभकारप्रभृतिभिः सहिताः एते सर्वे उपतापं
यांति। उपद्रवं प्राप्नुवंति॥ तथा घांटिका घंटावादिनः तान्युपतापयाति॥ तथा मित्राणां सुहृदां परस्पर
विभेदो विद्वेषो भवति॥ ॥अथ ज्येष्ठामूलयोराह॥ ज्येष्ठासु नृपपुरोहितनृपसत्कृतशूरगणकुलश्रेण्य
॥ मूले तु काशिकोशलपांचालफलौषधियोधाः॥ १३॥ ज्येष्ठास्थिते सौरे नृपा राजानः। पुरोहिताः तद्वा
चार्याः। नृपसत्कृताः राजपूजिताः। शूराः संग्रामधीराः। गणाः समूहाः मठप्रायाः। कुलानि प्रधानकुला
नि।

श्रेणी बहूनां सजातीयानां संघः। एते सर्वएव उपताप्यंते॥ मूले स्थिते सौरे काशाद्या जनाः। कोशलाः पांचालाः॥
बृ॰ सं॰ फलान्यौषधानि॥ औषधयः प्रसिद्धाः। योधाः संग्रामकुशलाः एतान् पीडयति॥ ॥अथ पूर्वाषाढायामाह॥
अंगाः वंगाः कोशलगिरिव्रजा मगधपुंड्रमिथिलाश्च। उपतापं यांति जना वसंति ये ताम्रलिप्त्यां च॥ १५॥ अ
८१ थ पूर्वाषाढायां स्थिते सौरे अंगजना वंगाः कोशलाः। गिरिव्रजा कर्मो जनाः एव। मगधाः पुंड्राः मिथिलाश्च॥ ए
ते सर्वएव उपतापं यांति॥ उपद्रवं प्राप्नुवंति। ये जनाः ताम्रलिप्तायां नगर्यां वसंति॥ ते च उपताप्यंते॥ अथो
त्तराषाढायामाह॥ विश्वेश्वरे चरन् सूर्यपुत्रः दशार्णान् निहंति यवनांश्च॥ उज्जयिनीशबरान् पारियात्रि
कान् कुंतिभोजांश्च॥ १६॥ विश्वेश्वरे उत्तराषाढायां शनैश्चरन् तिष्ठन् दशार्णान् जनान् यवनांश्च निहंति॥
नाशयति। चशब्दः समुच्चये॥ उज्जयनीदेशोद्भवान् शबरान् जनान्॥ पारियात्रगिरौ ये निवसंति। कुंतिभोजान्
जनान् एतांश्च निहंति॥ ॥अथ श्रवणधनिष्ठयोराह॥ श्रवणे राज्ञाधिकृतान् राज्ञा नृपेणाधिकारे स्थापिता
न्नियोगिन इत्यर्थः॥ विप्राग्र्यान् ब्राह्मणप्रधानान् भिषजो वैद्यान्॥ पुरोहिता आचार्याः कलिंगजना
एतांश्च निहंति। वसुभे धनिष्ठायां स्थिते सौरे मगधेशस्य मगधाधिपतेः जयः। तथा धने अधिकृतानां वि
नरक्षणनियुक्तानां वृद्धिर्भवति॥ ॥अथ शतभिषक्पूर्वभद्रोत्तराभद्रपदास्वाह॥ शातभिषजि भिष
क्कविशौंडिकपण्यनीतिवृत्तानां॥ आहिर्बुध्न्ये नद्यो यानकराः स्त्रीहिरण्यं च॥ १७॥ शतभिषजि आजैकपदे भ
द्रपदासहिते स्थिते सौरे॥ भिषजो वैद्याः। कवयः काव्यकुशलाः॥ शौंडिकाः मद्यक्रयविक्रयजीविनः॥ पण्य
वृत्तयो वणिजः। नीतिवृत्तयो नीतिशास्त्रज्ञाः॥ एतेषां पीडा भवति॥ आहिर्बुध्ने उत्तरभद्रपदायां नद्यः सरि
तः नदीतीरे ये निवसंति॥ तथा यानकराः शिल्पिनः। तक्षाणः॥ स्त्रियो योषितः। हिरण्यं सुवर्णं एतद्भवति॥ अ
थ रेवत्यामाह॥ रेवत्यां राजभृतः क्रौंचद्वीपाश्रिताः शरत्सस्यं॥ शबराश्च निपीड्यंते यवनाश्च शनैश्चरे चरति॥ ८१
१८॥ रेवत्यां शनैश्चरे चरति स्थिते सति राजभृतो राज्ञा पोषणीया ये पोषिता भृताः॥ तथा क्रौंचद्वीपे आश्रि
ताः स्थिताः। शरत्सस्यं॥ शरत्काले उत्पद्यंते यानि तानि धान्यानि॥ शबरजनाः। यवनाश्च निपीड्यंते॥ ए

तान् निपीडयंते उपताप्यंते। तथा च पराशरः। आग्नेये प्रविचरन् अग्निजकसूरसेनाहिताग्निकोद्दकाधात्वाकरांगना
शौंडिकान्युपजीविन उपतापयति। प्राजापत्ये मद्रपांचालकौशलकांगजाकलिंगकन्यकाश्चोपताप्यंते॥ सौम्ये यव
मानाय्याजकआर्यजनमध्यदेशवर्तिजनपदान्। रौद्रे परेतनमनुजतैलिकरजकदस्यून्। आदित्ये कुणगुसंधुसौ
वीरपंचनदेनप्रत्यंतानविधवांश्च॥ पुष्ये पुष्यमानचनघोषिघोषिकपोतयांत्रिकयवनवणिकमतान्॥ आश्लेषा
सु सर्पान्सलिलजांश्च॥ मघासु शौल्किकबाल्हिकतैलिकगांधारवैश्यपारदगविशालिकाश्रमाणि। भाग्ये रस
विक्रयिकपण्यस्त्रीकन्यकामहाराष्ट्रान्॥ आर्यम्णे नृपत्यवार्तास्नातिकवणिग्गुडभक्षकपकूलधरतक्षशि
लादिग्रामनिवासिनः। हस्ते हस्तिग्राहकरानिभयकुजनमधिकलापितमालाकारबंधकीकांचलकान्॥ त्वाष्ट्रे भूषाविलेखक
चित्रकरचित्रभांडानि॥ स्वातौ दूतचरसूतमागधपत्रावकनटनर्तकगायकवादकनौयात्रिकान्॥ ऐंद्राग्ने त्रैगर्तची
नकुलूतशौंडाक्षाकुंकुमकुसुंभमंजिष्ठापीतकुसुमसस्यानि। विग्रहकामांश्च॥ अनुराधासु रक्तकुलूतका
श्मीरसरमात्रसार्थकानामित्रभेदंचरश्चान्॥ ऐंद्रे जातिगणकुलश्रेणीश्रेष्ठान् पसत्कृतपुरोहितान्॥ मूले काशिको
शलपंचालफलमूलौषधियोधान्॥ पूर्वाषाढासु अंगवंगमगधपुलिंदकौशलमिथिलागिरिव्रजताम्रलिप्ति
वासिनः। उत्तरासु चेतिशबरकुंतिभोजदशार्णयवनपारियात्रिकान्॥ श्रविष्ठा मगधाधिपविजययायविविध
सुनिचयतदधिकृतार्थांश्च पीडयति। शतभिषजि शतभिषक्मद्यकरासवविक्रयवणितापजीविदस्यूपा
खंडनिवासिनः। प्राक्प्रोष्ठपदायां द्रविडयवनबाह्लीकचौडपांड्यसिंहलमाहिंद्रमगधानिवासिनः। उत्तरायां स्त्रीः
हिरण्यनिचयतस्करग्रामीधान्यनदनदीयानयुग्मकारान्॥ रेवत्यां शरत्सस्यराजभृतनाविकवनवासिक्रौंच
द्वीपनिवासिनः। अश्विन्यामश्वारोहाश्वपालकाश्च वैद्यान् मात्यकविनायकान्। भरण्यां वादकगायननर्तक
क्षुद्रनैकृतिकानपीडयतीति॥ अथ शनैश्चरस्य गुरोरस्तकालस्य सौरस्य च स्थानयोरेकर्क्षगतयो
फलमाह॥ ॥यदि विशाखासु महेंद्रमंत्री सुतश्च भानोर्दहनर्क्षयातः। तदा प्रजानामनयोतिघोरः पुरप्र
भेदो गतयोर्भमेकम्॥ १९॥ यदा सौम्ये महेंद्रमंत्री बृहस्पतिर्विशाखासु स्थितः प्राप्तः। तदा भानो

बा. सं. गदित्यस्य सुतः पुत्रः सौरो दहनर्क्षे कृत्तिकायां स्थितः। तदा तस्मिन् काले प्रजानां लोकानां मनस्तापो दुर्नयः। अतिपीडाभ
यावद्भवति॥ पुरभेदो नगरयोर्भेदः मितो। तयोर्नगरयोरग्न्योर्भेदश्च नगरयोः पुरस्य नगरस्य प्रभेदो भ
वति। तथा च पराशरः॥ कृत्तिकास्थाने शनैश्चारी चिरगतस्तदा दस्यवः॥ तिस्रो दारुणा घोराः प्रजानामनयो भवेत्॥
८२ अथ वर्णस्य रूपमाह॥ ॥अंडजहा रविजो यदि चित्रः क्षुद्भयकृद्यदि पीतमयूखः॥ शस्त्रभयाय च रक्तसवर्णो
भस्मनिभो बहुवैरकरश्च॥२०॥ रविजः शनैश्चरो यदि चित्रवर्णो नानाकारो दृश्यते। तदा अंडजान् पक्षि
णो हन्ति। यदि पीतमयूखः पीतरश्मिर्दृश्यते तदा क्षुद्भयं दुर्भिक्षं करोति॥ रक्तसवर्णो रक्ताभः शस्त्रभयाय संग्रा
मभयाय भवति॥ भस्मनिभो भस्मसदृशः कान्तिः बहुवैरकरः प्रजानां भवति। तथा च पराशरः॥ नीलः पीतः
कृष्णो रक्तो भस्मसन्निभवर्णः। नृपवैरं दुग्राभिहन्ता॥ अथान्यद्वर्णलक्षणमाह॥ ॥वैदूर्यकान्तिरमलः शुभकृत्प्रजा
नां बाणातसीकुसुमवर्णनिभश्च शस्तः॥ यं चापि वर्णमुपगच्छति तत्सवर्णान् सूर्यात्मजः क्षपयतीति मुनि
प्रवादः॥२१॥ सूर्यात्मजः सौरो वैदूर्यकान्तिरमलो वैदूर्यस्य मणेरिव कान्तिः। प्रभा अमलो निर्मलो यस्य तथा भ
तः प्रजानां लोकानां शुभकृत् शुभं श्रेयः करोति॥ तथा च बाणपुष्पाणामतिकृष्णवर्णानां अतसीकुसुमानां चातिनील
वर्णानां वर्णनिभः शस्तः दृष्टा कान्तिः॥ शस्तः प्रशस्तः। यं चापि वर्णमुपगच्छति याति द्विजवर्णं सितपीतरक्तकृष्णमुप
गच्छति समाश्रयति तत्सवर्णान् द्विजादीन् क्षपयति नाशयति। यथा श्वेतवर्णो ब्राह्मणान् नाशयति। रक्त
वर्णः क्षत्रियान्। पीतो वैश्यान्। कृष्णः शूद्रान् नाशयति॥ इत्येवं प्रकारो मुनीनां गर्गादीनां प्रवादो वचनमित्य
र्थः। तथा च गर्गः॥ भवत्यर्कात्मजे रूक्षे श्यामपीतारुणप्रभे। तदात्मकानां भावानां क्षयः स्यान्मासिकं भयं॥
पराशरश्च॥ पाण्डुस्निग्धः सलक्ष्मा मोक्षिवस्तारार्चिः शनैश्चरः॥ मार्गस्थश्च प्रसन्नश्च नक्षत्राद्धितयद्युतः॥
॥ ॥इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ शनैश्चरचारो नाम दशमोऽध्यायः॥१०॥ ७ ७॥ ८२
अथातः केतुचारो व्याख्यायते। तत्रादावेवागमप्रदर्शनार्थमाह॥ गार्गीयं शिखिचारं पाराशरमसितदेव
लकृतं च। अन्यांश्च बहून् दृष्ट्वा क्रियतेऽयमनाकुलश्चारः॥१॥ गार्गीयं गार्गीप्रोक्तं। शिखिचारं केतुचारं

तथा पाराशरं पराशरकृतं॥ असितकृतं असितनामाचार्यकृतं। देवलकृतं देवलर्षिरचितं॥ एतान् केतुचा
रान् दृष्ट्वा वलोक्य तथा अन्यानपि काश्यपऋषिपुत्रनारदवृद्धगर्गादिविरचितान् बहून् प्रभूतान् दृष्ट्वा मयाय
मनाकुलो निःसन्देहः केतुचारः क्रियते विरच्यत इति॥ ॥अथोदयास्तमयलक्षणमाह॥ दर्शनमस्तमयो वा न ग
णितविधिनास्य शक्यते ज्ञातुं॥ दिव्यान्तरिक्षभौमास्त्रिविधाः स्युः केतवो यस्मात्॥२॥ अस्य केतोर्दर्शनमुद
यः दर्शनमस्तमयं वा गणितविधिना गणितविधानेन ज्ञातुं वेदितुं न शक्यते॥ यस्मात्केतवः त्रिविधास्त्रिप्रका
रा दिव्यान्तरिक्षभौमाः दिवि आकाशे भवा दिव्याः। अन्तरिक्षे भवा आन्तरिक्षाः ग्रहनक्षत्रस्थानं विहाय यत्राका
शे दृश्यन्ते ते आन्तरिक्षाः॥ भूमौ भवा भौमाः॥ इति केतोरत्यन्तरूपत्वात्॥ एषामुदयास्तमयौ न ज्ञायेते॥
इति केतूनां दिव्यान्तरिक्षाणामन्येषां स्वरूपमाह॥ अहुताशेऽनलरूपं यस्मिंस्तत्केतुरूपमेवोक्तं॥ खद्योतपिशा
चालयमणिरत्नादीन् परित्यज्य॥३॥ अहुताशोऽग्निवर्जितो यस्मिन् देशे अनलरूपमग्निरूपं दृश्यते तदेव
केतुरूपमुक्तं॥ कथितं॥ किं तु खद्योतं इङ्गोपः॥ कृमिविशेषः॥ पिशाचालयाः श्मशानं॥ मणयश्चन्द्रकान्तप्रभृ
तयः। रत्नानि मरकतप्रभृतीनि। आदिग्रहणादन्यान्यपि काष्ठप्रभृतीनि तेजोरूपाणि। एतान् परित्यज्य अन्य
दनलरूपं अहुताशे दृश्यते। तत्केतुरूपमिति। अथ दिव्यान्तरिक्षभौमानां केतुलक्षणमाह॥ ध्वजशस्त्र
भवनतोरणतरुतुरगकुञ्जराद्युपमास्त्वान्तरिक्षास्ते दिव्या नक्षत्रस्थाः॥ भौमाः स्युरतोऽन्यथा शिखिनः॥४॥ ध्वजश्चि
ह्नं॥ शस्त्रमायुधादि॥ भवनं गृहं॥ तरुर्वृक्षः। तुरगोऽश्वः। कुञ्जरो हस्ती। आदिग्रहणादन्येषु चतुष्पदादिषु
दृश्यन्ते॥ अनलरूपास्ते केतव आन्तरिक्षाः॥ तथा नक्षत्राणां ताराणां च मध्ये ये केतवो दृश्यन्ते ते दिव्या ना
क्षत्राः॥ अतोऽस्मात् ये अन्ये अन्यथा भूमौ दृश्यन्ते ते भौमाः शिखिनः केतव इति॥ ॥अथ केतूनां संख्या
मतं तेषामाह॥ शतमेकाधिकमेके सहस्रमपरे वदन्ति केतूनां॥ बहुरूपमेकमेव प्राह मुनिर्नारदः केतुं॥५॥
एके मुनयः पराशरादयः एकाधिकं शतं केतूनां वदन्ति। तथा च पराशरः॥ तद्यथा॥ शतमेकोत्तरं केतूनां भ
वति। तेषां षोडश मृत्युभिः सुताः॥ द्वादशादित्यसंभवाः॥ दश मरुद्वालकेयरुद्रजो ध्वजाः॥ सप्तपितामह
जाः॥

बा. सं.

८३

पंचदशावैर्यौद्दालकेः पुत्राः॥ सप्तदशमरीचीकाश्यपकजाः॥ पंचप्रजापतिजाः॥ त्रयोविभावसुजाः॥
धूमकेतुश्चैकः॥ चतुर्दशामथ्यमानात्पयोधेरमृतेन सह संभूताः॥ एकः कमलजन्मनः पुत्रः॥ सहस्रमपरे त्वेगर्गादयः
केतूनां वदंति॥ तथा च गर्गः॥ अनित्योदयचाराणामशुभानां च दर्शने॥ आगंतूनां सहस्रं स्यात् ग्रहाणां संनिवे
धते॥ बहुरूपमेकमेव तु॥ नारदाख्यो मुनिरेकमेव केतुं बहुरूपं प्राह्नोक्तवान्॥ तन्मते एक एव केतुः॥ तस्य च बहु
रूपाणि सप्तवद्दिव्यांतरिक्षभौमा इत्यर्थः॥ तथा च नारदः॥ दिव्यांतरिक्षभौमाख्य एक एव केतुः प्रकीर्तितः॥ शुभा
शुभफलं लोके ददात्यस्तमयोदये॥ इत्येवं मतांतराण्युक्त्वा स्वसिद्धांतमाह॥ यद्येको यदि च बहवः किमनेन फलं
तु सर्वथा वाच्यं॥ उदयास्तमये स्थानैः स्पर्शेनाधूमनेन वर्णैः॥ ६॥ यदि एक एव केतुः नारदीयाद्वा बहवः त्वभ
ताः किं तव स्तदनेन किं कारणं सर्वथा उदयास्तमये स्थानैः स्पर्शेनाधूमनेन वर्णैः फलं शुभाशुभं वाच्यं॥
वक्तव्यं॥ केतुः कस्यां दिशि उदितः कस्यामस्तमितः॥ स्थानं तथा कस्मिन् आकाशभागे कस्य ग्रहस्य वा समी
पनक्षत्रस्य उदितेस्तमितश्च स्पर्शनं केतुना ग्रहेन नक्षत्रं वा स्पृश्यं॥ आधूमनं काशस्य या भिधूमितः॥ वर्णः
सितरक्तपीतकृष्णादिक एवमादिभिः तत्फलं वाच्यं॥ तस्मादेको वहवो भवंतु न चिंतितिः॥ अथ केतुचारो येषां
केतूनां निर्दिष्टं कियंतं कालं यावत् फलकालो भविष्यति॥ तेषां फलकालनियमार्थमाह॥ ॥ यावंत्यहानि दृ
श्यो मासास्तावंत एव फलपाकः॥ मासैरब्दांश्च वदेत् प्रथमात् पक्षत्रयात् परतः॥ ७॥ अथवा यावंत्यहानि
दृश्यः फलपाकस्तस्य तावतो मासान् मासैर्वर्षाणि वदेत्॥ प्रथमात्पक्षत्रयात् परतः॥ यावंत्यहानि यावंति दि
नानि दृश्यादर्शनपथं गतः॥ केतुरिति संबध्यते॥ फलस्य पाकः फलपाकः स तस्य तावतो मासान् तस्य केतोस्ता
वतो मासान् दशाहिनतुल्यं तावत्संख्यान् मासान् दृश्यो भवति॥ तावत्संख्यानि वर्षाणि तस्य पाकं वदेत्॥ तस्मा
त्कालात्प्रभृतिभिरित्यत आह॥ प्रथमात्पक्षत्रयात् परतः॥ सर्वेषां केतूनां तिरिदं सामान्यं यावंति दिनानि दृश्यः ८३
केतुः तस्माद्दर्शनादूर्ध्वं प्रथमं पक्षत्रयं पंचचत्वारिंशतद्दिनानि यावत् फलानि तस्मात्पक्षत्रयात्परतः ता
वतो मासान् फलपाकः॥ अथ मासान् दृश्यते तदा तत्संख्यैर्दर्शनात् परतः पक्षत्रयमतिक्रम्य मासतुल्यवर्षा

णि वदेत् ब्रूयात्॥ यावत्संख्यान् मासान् दृश्यो भवति तावत्संख्यानि वर्षाणि तस्य पाकं वदेत्॥ कस्मात्काला
त्प्रभृतिभिरित्यत आह॥ प्रथमात्पक्षत्रयात् परतः सर्वेषां केतूनां त्विदं सामान्यं यावंति दिनानि दृश्यः केतुस्त
स्मात् दर्शनादूर्ध्वं पक्षत्रयं यावंति फलं ददाति॥ अथ केचिन्न्याख्या प्रतिपादितं दर्शयंति॥ यदुक्तं मासैरब्दांश्च
वदेत्॥ प्रथमात्पक्षत्रयात्परतः तत्र पक्षत्रयं यावत् दिनसंख्या गृह्यते पक्षत्रयादूर्ध्वं यदा दृश्यते केतुस्त
दा मासं संख्यानि तुल्यानि वर्षाणि वदेत्॥ अत्र संदेहव्युदासार्थं गर्गोक्तेन या मया किमभिलिख्यते॥ तथा च गर्गः
॥ यावंत्यहानि दृश्यः स्यात्तावन्मासान् फलं वदेत्॥ मासांस्तु यावत् दृश्येत तावतोब्दांश्च वै क्रमात्॥ त्रिपक्षात्
परतः कर्म पच्यते ह्यशुभाशुभं॥ सद्यस्कमुदिते केतौ फलं नेष्टादिशेत् बुधः॥ तथा च वृद्धगर्गः॥ यावंतो दि
वसांस्तिष्ठेत् तावन्मासान् विनिर्दिशेत्॥ त्रिपक्षात्परतश्चापि कर्म केतोः प्रपद्यते॥ तस्मात् कालात्परं ब्रूयात् फल
मप्यशुभाशुभं॥ सद्यस्कमुदये केतोः फलं नेष्टादिशेत् बुधः॥ अत्र यत् तदादितो व्याख्यानमत्र घटते॥ न यं संख्या
ख्यानं संख्यायदति॥ यथा प्रथमात्पक्षात्त्रयात्परतः फलपाकस्य कालसंख्या प्रवर्तते॥ यस्मादुक्तं॥ सद्यस्कमुदये
केतोः फलं नेष्टादिशेत् बुधः॥ तत्रोक्तं॥ मासैरब्दांश्च वदेत्॥ तदेकदेशेनापि मासप्रतिमासमेकादुत्यादिदिनस्य दर्शने
नापि माससंख्या लभ्यते॥ एवं सर्वथाविमनेनास्माकं असमाद्विकल्पेन॥ दिवसैः पक्षत्रयात्परतो मासान् वदेत्॥
मासैस्तस्मादेव पक्षत्रयात्परतो वर्षान् वदेत्॥ मासात्परतो विना धिकदृष्टो नुत्पातवशात् वक्तव्यं॥ यथा यदि द्वि
त्रिंशता वर्षैः लभ्यंते॥ तद्दिग्दर्शनोक्तामिति॥ तथा च समाससंहितायां॥ केचित्केतुसहस्रमाहुरपरे त्वेकं वदंत्येको
नारदमतमेकोयं त्रिस्थानसमुद्भवो विविधरूपः॥ दिव्यास्त्वहृष्टतारास्तीव्रफलाः॥ मंदफलकरा भौमाः॥ प्राणिध्व
जादिषु रंगेषु नांतरिक्षाः न चान्यशुभाः॥ उदयास्तमया धूपनसंयोगात् कारमार्गादिवर्णेभ्यः फलं निर्दिशे
द्दिवसैर्मासान्मासैस्तु वर्षाणि॥ अथ शुभस्य केतोर्लक्षणमाह॥ ॥ ह्रस्वतनुः प्रसन्नः स्निग्धस्त्वृजुरचिरसंस्थि
तः शुक्लः॥ उदितो वाभिवृष्टः सुभिक्षसौख्यावहः केतुः॥ ८॥ एवंविधः केतुर्दृष्टः सुभिक्षसौख्यावहः॥ सुभि
क्षसौख्यमावहति॥ करोति॥ कीदृशः॥ ह्रस्वः अदीर्घतनुः॥ स्फुटः प्रसन्नो निर्मलः॥ स्निग्धः सस्नेहः॥ ऋजुः

स्पष्टः॥ अकुटिल इत्यर्थः॥ अचिरसंस्थितः॥ शीघ्रमेवाऽदर्शनं यातिः॥ शुक्लः श्वेतवर्णः॥ अथ चोदित एवाभिवृष्टिः तस्मि
न उदितमात्रे वृष्टिरभिर्भवति॥ अथाऽशुभस्य केतोर्लक्षणमाह॥ उक्तविपरीतयोनशुभकरो धूमकेतुरुत्पन्नः॥
इंद्रायुधानुकारी विशेषतो द्वित्रिचूलो वा॥ ९॥ ॥उक्तविपरीत इति॥ ह्रस्वतनुः प्रसन्न इति॥ अस्मादुक्ताद्यो विपरी
तकेतुः रुत्पन्नः स धूमकेतुर्नशुभकरः अशुभं फलं करोति॥ पापं करोतीत्यर्थः॥ तथेंद्रायुधानुकारी इंद्रायुधं इंद्रधनुः
तदनुकारी तत्सदृशो नशुभकर एव॥ तथा द्वित्रिचूलः॥ द्विचूलः॥ त्रिचूलो वा द्विशिखस्त्रिशिखस्त्र विशेषेणानशुभं
करोत्येव॥ तथा च समास संहितायां॥ रुचिरः स्थिताभिवृष्टः केतुः सितः स्निग्धमूर्तिरुदग्दिग्तः॥ ह्रस्वतनुः प्रसन्नः
केतुर्लोकस्य भावाय॥ नशुभोविपरीतो विशेषतः शक्रचाप संकाशः॥ द्वित्रिचतुश्चूलो वा दक्षिणसंस्थश्च मृत्युक
रः॥ अधुना केतुसदृशलक्षणं फलं विवक्षुस्तत्रादावेव रविजाः पंचविंशति केतवो भवंति ते षां लक्षणमाह॥ ॥
हारमणिहेमरूपाः किरणाख्याः पंचविंशतिः सशिखाः॥ प्रागपरदिशोर्दृश्या नृपतिविरोधवहा रविजाः॥१०॥ हार
मुक्ताहारः॥ मणयश्चंद्रकांतप्रभृतयः॥ हेमं कनकं॥ एतेषां सदृशाः रूपाः समानवर्णाः ये केतवस्ते किरणाख्याः किर
णसंज्ञाः॥ सशिखाः सचूलाः तेच पंचविंशति रविजाः सूर्यसुताः॥ प्रागपरदिशोर्दृश्याः॥ प्राक्पूर्वस्यां॥ अपर
स्यां पश्चिमायां दिशि दृश्यंते॥ एषां मध्य एक एव दृश्यते॥ न सर्वे युगपत् इति॥ सर्वत्रेय परिभाषा॥ ते च नृप
विरोधावहाः नृपतिराज्ञो विरोधावहाः विरोधप्रदाः अनिष्टा इत्यर्थः॥ तथा च गर्गः॥ शंखस्फटिकसंकाशा मृणा
लरजतप्रभाः॥ मुक्ताहारसवर्णाभाः सशिखाः पंचविंशतिः॥ किरणाख्याः रवेः पुत्राः दृश्यंते प्रागपरदिशि स्थिताः
॥ तथा चापरभागस्थाः नृपतेर्भयदाः स्मृताः॥ अथाग्निपुत्रानाह॥ शुकदहन बंधुजीवकलाक्षाक्षतज
सदृशा हुताशसुताः॥ आग्नेय्यां दृश्यंते तावंतस्तेपि शिखिभयदाः॥११॥ शुकः पक्षिविशेषः नीलपीतवर्णः॥ ८४
दहनोऽग्निः॥ बंधुजीवकः पुष्पविशेषः अतिलोहितः॥ लाक्षा वृक्षनिर्यासः॥ क्षतजं रक्तं॥ तदुपमास्तत्तुल्यवर्णास्ते
च तावंतः पंचविंशतिः॥ आग्नेय्यां पूर्वदक्षिणस्यां दिशि दृश्यंते॥ ते च हुताशसुताः अग्निपुत्राश्च ते दृष्टाः शिखि
भयदाः अग्निभयदा इत्यर्थः॥ तथा च गर्गः॥ नानावर्णाग्निसंकाशा दीप्तिमंतोऽतिमोलिनः॥ सूक्ष्मा ज्वलनसंकाशा

शान सर्वे ज्योतिषनाशनाः॥ तेऽग्निपुत्राः प्रदृश्यंते याम्ये केऽग्निभयावहाः॥ आग्नेय्यां दिशि दृश्यंते पंचविंशति कीर्ति
ताः॥ अथ मृत्युसुतांस्तावत फलमेवाह॥ ॥वक्रशिखा मृत्युसुताः रूक्षाः कृष्णा असिताश्च तेपि तावंत एव पंच
विंशतिस्ते च मृत्युसुताः॥ मृत्योः पुत्रा याम्यायां दक्षिणस्यां दिशि दृश्यंते अवलोक्यंते ते च तेन मरकावेदिनः ज
नानां मरकं आवेदयंति॥ कथयंति॥ तथा च गर्गः॥ रूक्षाः कृष्णा वक्रशिखा दृश्यंते याम्यदिक्स्थिताः॥ पंचविंशतिमृ
त्युसुताः प्रजाक्षयकराः स्मृताः॥ ॥अथ भूपुत्रा द्वाविंशतिरेवाह॥ दर्पणवृत्ताकारा विशिखाः किरणान्विता धरा
तनयाः॥ क्षुद्भयदा द्वाविंशतिरैशान्यामंबुतैलनिभाः॥ दर्पणवत्वृत्तं परिवर्तुलं आकारो येषां ते दर्पणवृत्ताका
राः विशिखा विचूला किरणान्विता रश्मिसंयुक्ता धरातनया भूमिपुत्राः॥ ते च द्वाविंशतिरैशान्यां उत्तरापूर्व
स्यां दिशि दृश्यंते॥ अंबुतैलनिभाः अंबुजलं तैलं प्रसिद्धं॥ तन्निभा जलस्य तैलस्य वा कांतयः॥ एते दृष्टाः
क्षुद्भयदाः क्षुद्भयं दुर्भिक्षं च ददाति॥ तथा च गर्गः॥ समवृत्ता विशिखा वा रश्मिभिः परिवारिताः॥ अंबुतै
लप्रतीकाशा द्वाविंशति भूसुताः स्मृताः॥ ऐशान्यां दिशि दृश्यंते दुर्भिक्षभयदाः मुने॥ ॥अथ चंद्रसुतान्
यस्थानाह॥ शशिकिरणरजतहिमकुमुदकुंदकुसुमोपमाः सुताः शशिनः॥ उत्तरतो दृश्यंते त्रयः सुभिक्षाव
हाः शिखिनः॥ ॥शशिकिरणाश्चंद्ररश्मयः॥ रजतं रूप्यं॥ हिमं तुषारं॥ कुमुदकुंदकुसुम पुष्पविशेषः॥
शुक्लवर्णाः तदुपमास्तत्तुल्या वर्णा स्त्रयः शिखिनः केतवः॥ चंद्रस्य सुताः॥ उत्तरतः सौम्यायां दिशि दृश्यंते अवलो
क्यंते॥ ते च सुभिक्षावहाः॥ सुभिक्षमावहंति कुर्वंतीत्यर्थः॥ तथा च गर्गः॥ चंद्ररश्मिसवर्णाभा हिमकुंदसमप्र
भाः॥ यत्र ते शशिनः पुत्राः सौम्यावस्थाः शुभावहाः॥ ॥अथ ब्रह्मदंडाख्यस्य लक्षणमाह॥ ब्रह्मसुत एक एव
त्रिशिखवर्णैस्त्रिभिर्युगांतकरः॥ अनियतदिक्संप्रभवो विज्ञेयो ब्रह्मदंडाख्यः॥ ॥ब्रह्मसुतो ब्रह्मपुत्र
एक एव स च त्रिशिखस्त्रिचूलः॥ वर्णैः सितादिरूपलक्षितः॥ त्रिशिखः स तु ब्रह्मदंडाख्यो ब्रह्मदंडसंज्ञो युगांत
कः॥ अनियतदिक्संप्रभवः॥ अनियतायां अनिश्चितायां दिशि संप्रभवति उत्पद्यते॥ सर्वासु दिक्षु दृश्य
त इत्यर्थः॥ तथा च गर्गः॥ एकस्तु ब्रह्मसुतः क्रूरः त्रिवर्णस्त्रिशिखान्वितः॥ सर्वासामाशु दृश्यः स्यात् ब्रह्मदंडः

क्षयावहः॥ एकाधिकं शतं कथितं। अन्यानि च शतानि एकोनानि कथयामीत्याह॥ शतमभिहितमेकं समेतं केनः
वा॰ सं॰ विरहितान्यस्मात्॥ कथयिष्ये केतूनां तानि नवलक्षणैः स्पष्टैः॥ एकशतं शतमेकेनाधिकं केतूनां शतमभिहित
मुक्तं॥ अस्मात् एकाधिकात् शतात् परतः एकेन विरहितानि एकोनानि केतूनां नवशतानि स्पष्टैः स्फुटैर्लक्षणैश्चि
८५ ह्नैः कथयिष्ये वक्ष्ये॥ ॥अथ शुक्रपुत्रांश्चतुरशीतिसंख्यानाह॥ सौम्यैशानयोरुदयं शुक्रसुता यांति चतुरशी
त्याख्याः॥ विपुलसिततारकास्ते स्निग्धाश्च भवंति तीव्रफलाः॥ शुक्रसुता भार्गवपुत्राः चतुरशीत्याख्या चतुर
शीति संख्याश्च सौम्यैशानयोरुदयं यांति॥ सौम्योत्तराण्यैशानी॥ पूर्वोत्तरा तयोरुदयं दर्शनं यांति गच्छंति। ते
च विपुलसिततारकाः विपुला विस्तीर्णाः सिताः शुक्लाः तारका येषां॥ स्निग्धा निर्मलदेहाः याम्याश्रिता दक्षिण
स्यां दिशि दृश्यंते॥ ते तीव्रफलाः अनिष्टफला इत्यर्थः॥ तथा च गर्गः॥ स्थूलैकतारकाः श्वेताः स्नेहवंतश्च सप्र
भाः॥ आर्चिष्मंतः प्रसन्नाश्च तीक्ष्णवपुषान्विताः॥ एते विसर्पका नाम शुक्रपुत्राः प्रकीर्तिताः॥ अशीतिश्चतुरश्चैव
लोकक्षयकराः स्मृताः॥ अथ षष्टिं शनैश्चरपुत्रानाह॥ ॥स्निग्धाः प्रभासमेतास्तु द्विशिखाः षष्टिः शनैश्चरांग
रुहाः॥ अतिकष्टफला दृश्याः सर्वत्रैते कनकसंज्ञाः॥ स्निग्धा निर्मलाः प्रभासमेताः कांत्यन्विताः द्विशिखाः द्वि
शिखा द्विचूडाः ते च षष्टिसंख्याः शनैश्चरांगरुहाः॥ शनैश्चरपुत्राः एते कनकसंज्ञाः कनककेतवः सर्वत्र सर्वासु दि
क्षु दृश्याश्चातिकष्टफला अत्यशुभफलाश्चेति। तथा च गर्गः॥ सुस्निग्धा रश्मिसंयुक्ता द्विशिखाः सिततारका
॥ षष्टिस्ते कनका घोराः शनैश्चरसुताः स्मृताः॥ ॥अथ गुरुसुतान् पंचषष्टिमाह॥ विकचा नाम गुरुसुताः सि
ततारा शिखापरित्यक्ताः॥ षष्टिः पंचभिरधिकाः स्निग्धाः याम्याश्रिताः पापाः॥ ॥षष्टिः पंचभिरधिकाः पं
चषष्टिः केतवो विकचनामा विकचसंज्ञाः गुरुसुता बृहस्पतेः पुत्राः॥ ते च सिततारकाः सितः श्वेत एकस्तारको येषां
॥ शिखापरित्यक्ताः चूडारहिताः ते च याम्याश्रिताः दक्षिणस्यां दिशि दृश्यंते॥ पापाः पापफला अनिष्टफला ८५
इत्यर्थः॥ तथा च गर्गः॥ शुक्लाः स्निग्धाः प्रसन्नाश्च महारूपाः प्रभान्विताः॥ एकतारा वपुष्मंतो विशिखाश्चार
श्मिवर्जिताः॥ एते बृहस्पतेः पुत्राः प्रायशो दक्षिणाश्रयाः॥ नामतो विकचा घोराः पंचषष्टिर्भयावहाः॥ ॥

अथैकपंचाशतं बुधपुत्रानाह॥ ॥नातिव्यक्ताः सूक्ष्मा दीर्घाः शुक्लाः यथेष्टदिक्प्रभवाः॥ बुधजास्तस्करसंज्ञाः पाप
फलास्त्वेकपंचाशत्॥ तस्करसंज्ञास्तस्करनामानः एकपंचाशत्केतवो बुधजाः सौम्यपुत्राः॥ नातिव्यक्ता नातिस्फु
टाः॥ सूक्ष्मा अनल्पदेहाः दीर्घा आयामिनः॥ शुक्लाः श्वेतवर्णाः॥ यथेष्टदिक्प्रभवाः॥ यथेष्टायां दिशि प्रभवं उ
त्पत्तिर्येषां॥ सर्वासु दिक्षु दृश्यंत इत्यर्थः॥ ते च पापफलाः अनिष्टफलाः॥ तथा च गर्गः॥ ह्रस्वाः स्थितास्समाः के
चिदव्यक्ततारकाः॥ सपांडुवर्णाः श्वेताभाः सूक्ष्मरश्मिभिरावृताः॥ एते बुधात्मजा ज्ञेयास्तस्कराख्या भयावहाः
॥ एकाधिकास्ते पंचाशद्दृश्यान्यत्र चराग्रहाः॥ ॥अथ षष्टिं भौमपुत्रानाह॥ क्षतजानलानुरूपाः त्रिचूलताराः
कुजात्मजाः षष्टिः॥ नाम्ना च कौंकुमास्ते सौम्याशासंस्थिताः पापाः॥ कौंकुमनामानः षष्टिकेतवः कुजात्मजाः अं
गारकपुत्राः॥ क्षतजानलरूपाः॥ क्षतजं रक्तं॥ अनलोऽग्निः तदनुरूपास्तत्सदृशा आलोहिता इत्यर्थः॥ त्रि
चूलताराः त्रिचूलास्त्रिशिखास्तारका येषां ते सौम्याशासंस्थिताः उत्तरस्यां दिशि दृश्यंते॥ पापाः पापफला इत्यर्थः॥
तथा च गर्गः॥ त्रिशिखाश्च त्रितारास्च रक्ता लोहितरश्मयः॥ प्रायशस्तूत्तरामाशां सेवंते नित्यमेव ते॥ लोहि
तांगात्मजा ज्ञेयाः षष्टिः समासतः॥ नामतः कौंकुमा ज्ञेया राज्ञां संग्रामकारकाः॥ ॥अथ त्रयस्त्रिंशतं
राहुपुत्रानाह॥ त्रयस्त्रिंशत्यधिका राहोस्ते तामसकीलक इति ख्याताः॥ रविशशिगा दृश्यंते तेषां फलमर्कचा
रोक्तं॥ ॥त्रिंशत्यधिकास्त्रयस्त्रिंशत्॥ केतवो राहोः सुताः स्वर्भानुपुत्राः॥ ते नामतस्तामसकीलक इति
ख्याताः प्रसिद्धाः॥ ते च रविशशिगाः॥ अर्कचंद्रमंडलस्थाः दृश्यंते अवलोक्यंते॥ तेषां फलं शुभाशुभं च
तदर्कचारोक्तं सूर्यचारे कथितं॥ तामसकीलकसंज्ञा राहुसुताः केतव इति॥ तथा च गर्गः॥ सूक्ष्माभाः सूक्ष्म
पर्यंताः संकुलाः सूक्ष्मरश्मयः॥ राहुपुत्रास्त्रयस्त्रिंशत्कीलकाश्चातिदारुणाः॥ रविमंडलमाश्रित्य दृश्यं
ते चंद्रगास्तथा॥ तथा च पराशरः॥ पर्वण्येवाह्नि दृश्यंते ह्यंगिरःकालकीलकाः॥ रवेरेवांगिरा मध्ये स्थूभ्या
ः कालकीलकौ॥ अंगिराः सरथाध्वजो दृश्यते पुरुषाकृतिः॥ कालकीलकस्तिर्घारितरश्मिकोणे नाथ्यालक्ष्यते॥
मंडलं कालकाम ध्ये मंडलस्यासितो ग्रहः॥ महान् रूपावरोधाय यस्य दर्शनस्य मत्स्यवत्॥ ॥अथाग्नेः त्र्यधि
कं

ज्ञातमग्निपुत्राणामाह॥ ॥विंशत्यधिकमन्यच्छतमग्नेर्विश्वरूपसंज्ञानां॥तीव्रानलभयदानांज्वालामालाकुलतनू
नां॥ अन्यदपरंशतंविंशत्यधिकंकेतूनांअग्नेःसुतानांअग्निपुत्राणांविश्वरूपसंज्ञानांविश्वरूपनाम्नां॥कीदृशानां
॥ज्वालामालाकुलतनूनां॥ज्वालामालाभिराकुलाव्याप्ताः।तनवोमूर्तयोयेषांतथातीव्रानलभयंअग्निभीतिं
ददाति॥ तथाचगर्गः॥नानावर्णहुताशाभादीप्तिमंतोतिमालिनः॥ सज्ञंत्याग्निनिभाकाशे सर्वथ्यातिर्विनाशना
॥तेऽग्निपुत्राग्रहास्तेषांलोकेग्निभयवेदिनः॥विंशाग्रशतंताघोरंविश्वरूपेतिनामतः॥ ॥अथसप्तसप्त
तिवायुपुत्रानाह॥श्यामारुणाविताराश्चामररूपाःविकीर्णदीधितयः॥अरुणाख्यावाय्योःसप्तसप्ततिपा
पदाःपरुषाः॥अरुणाख्याअरुणसंज्ञासप्तसप्ततिकेतवोवाय्योःपुत्राः॥अनिलसुताः।श्यामारुणाःश्या
मलोहितवर्णाः।विताराताराहीनाःवर्जिताःचामररूपावालव्यजनाकृतयः॥विकीर्णदीधितयोव्याप्तरश्म
यः॥परुषारूक्षास्तेचपापदाःदुष्टफलदाः॥अत्रयेषांदिक्नियमोनास्तितेअनियतदर्शनाः॥सर्वास्वपि
दिक्षुदृश्यंते॥तथाचगर्गः॥तारकारूपप्रतिमाधूमाधूम्रसवर्णिनः॥वातरूपाश्चाभांतिरूक्षाविस्ती
र्णरश्मयः॥सप्तसप्ततिचैवाण्यवायोःपुत्रान्प्रचक्षते॥लोकविध्वंसनारूक्षानामतस्तकराग्रहाः॥
॥अथाष्टौप्रजापतेर्द्विशतेचतुरधिकेब्रह्मणःपुत्रानाह॥ ॥तारापुंजनिकाशागणकानामप्रजापतेरष्टौ
॥द्विचशतेचतुरधिकेचतुरस्राब्रह्मसंतानाम॥ अष्टौकेतवोगणनामप्रजापतेः॥सुतास्तेचतारापुंजनि
काशाःतारकाणांनक्षत्राणांपुंजःसमूहस्तदाकारास्तेचपापफलदाः॥थिनः॥तथाचद्विशतेचतुरधिकेकेतू
नां॥तेचतुरस्राःचतुरस्रसंज्ञाचतुरस्राकृतयस्तेचब्रह्मसंतानाःब्रह्मणःपुत्राःपापफलाएवतेषां॥तेचनि
यतादिक्प्रभवाः॥तथाचगर्गः॥तारापुंजप्रतीकाशातारामंडलसंस्थिताः॥प्राजापत्याग्रहाश्चाष्टौगणका
भयवेदिनः॥ब्रह्माश्चतुरस्रावासनिराश्वेतरश्मयः॥द्विशतेश्चतुरश्चैवब्रह्मजाभयदाश्चते॥ ॥
अथद्वात्रिंशतंवरुणपुत्रानाह॥कंकानामवरुणजाद्वात्रिंशतकेतवःप्रोक्ताः॥कंकनामानस्तेचवरुण
जाःप्रादसांपतेःपुत्रावंशगुल्मसंस्थानाः॥वंशगुल्मवतसंस्थानंआकृतिर्येषां॥गुल्मएकमूलसंनोलताम

मूहः॥शशियतत्वंद्रवत्प्रभायाकांत्यासमेतासंयुक्ताः॥तेचतीव्रफलाःकष्टफलाःप्रोक्ताःकथिताः॥तेचाऽनियतादि
क्संप्रभवाः॥तथाचगर्गः॥वंशगुल्मप्रतीताःमहांतःपूर्णरश्मयः॥काकमंदनिभश्चापिरश्मिभिःकीचिदावृ
ताः॥मयूखानप्रसृजंतीवस्निग्धात्वात्सौम्यदर्शनाः॥एतेःकष्टफलाःकंकाद्वात्रिंशतवरुणात्मजाः॥अथषण्णव
तिःकालपुत्रानाह॥षण्णवतिःकालसुताःकबंधसंज्ञाकबंधनामानः॥षण्णवतिकेतवस्तेकबंधसंस्थानाः।कबंध
संछिन्नशिराः॥पुरुषस्तद्वत्संस्थानमाकृतिर्येषांतेचाविरूपताराविरूपाअस्पष्टास्तारकायेषांतेऽशिवनःकेतवःपु
द्राभयप्रदाः॥तेचअनियतादिक्संप्रभवाः॥तथाचगर्गः॥तारापुंजाविरूपाश्चकबंधाकृतिसंस्थिताः॥लोकेमृत्यु
करघोरापुंड्रानामभयप्रदाः॥ ॥अथनवविदिक्पुत्राःसर्वेषांचसंख्यामन्येषांचत्रिंशेषंवक्ष्यामीत्या
ह॥ ॥शुक्लविपुलैकतारानवविदिशांतरालानां॥केतवःसमुत्पन्नाःविदिक्पुत्राःइत्यर्थः॥ किंभूताःशुक्ल
पुलैकतारकाः।शुक्लःश्वेतवर्णाविपुलाविस्तीर्णाएकतारकायेषांतेविदिक्ष्वेवदृश्यंते॥दृष्टाश्चपापफलाः॥तथा
चगर्गः॥शुक्लैकतारविपुलाविदिक्पुत्रानवग्रहाः॥विदिक्षुसंस्थितायेचदृश्यंतेभयदायकाः॥एवंकेतुसह
स्रमिति॥एवंकेतूनांसहस्रंकथितं॥अतोनंतरमेषामेवकेतूनांविशेषंविशेषलक्षणंवक्ष्ये॥कथयिष्ये
॥एषांमध्येकेचिद्दृश्यंतेनसर्वत्रएवसर्वे॥तत्रयेदृश्यंतेतेषांलक्षणंवसुकामस्तद्वावचमावलोकलक्षणमा
ह॥ ॥उदगायतोमहान्स्निग्धमूर्तिःपश्चाद्वसाकेतुः॥ सद्यःकरोतिमरकंसुभिक्षमप्युत्तमंकुरुते॥उदगायतउत्तर
स्यांदिशिआयतोदीर्घः॥महान्अतिस्थूलः।स्निग्धमूर्तिःस्निग्धतनुः॥अपरोदयत्पश्चिमायांदिशिउदयंयाति॥सः
वसानाम्नावसाकेतुर्दृष्टः।सएवतस्मिन्नेवाह्निमरकंकरोति॥उत्तममपिप्रधानंसुभिक्षंकुरुते॥ ॥अथास्थिकेतोः
शस्त्राख्यस्यलक्षणमाह॥ तल्लक्षणोऽस्थिकेतुःसतुरूक्षःक्षुद्भयावहःप्रोक्तः॥स्निग्धःस्तादृक्प्राच्यांशस्त्राख्योडम
रमरकाय॥ ताद्यपनेनवसाकेतोःपरमार्थः॥अस्थिकेतुर्नामकेतुः॥सच्चतल्लक्षस्तल्लक्षणोवसाकेतोर्लक्षणैर्युक्तः॥
उदगायतोमहान्स्निग्धमूर्तिरपरोदयीकिंत्वयंविशेषः॥सतुरूक्षोभवति॥सैदविरस्थितादृष्टः॥क्षुद्भयावहः॥
दुर्भिक्षभयप्रदःप्रोक्तःकथितः॥स्निग्धःस्तादृक्इति॥तादृक्वसाकेतुसदृशोऽन्यःस्निग्धोनिर्मलःदृष्टः॥प्राच्यांदि

Dr. BHAU DAJI MEMORIAL

बा॰ सं॰ शिरःस्थं तेन तु शस्त्राख्यः शस्त्रकेतुः स्मृतः ॥ स तु दृष्टो मरमरकोपं भवति ॥ दुर्भिक्षं शस्त्रकलहं ॥ मरकं च करोति ॥ तथा च प
राशरः ॥ एभ्यः षड्विंशति रुद्रेभ्यः फलमावेदयति ॥ तं नामतोऽस्तु नः फलकालौ ऽभिधास्यामः ॥ तत्र मर्त्येव त्रयमुदयेया
८७ ति ॥ एकैकेनोव माति शस्त्रकेतुर्यत्र त्र न मा केतुः स्निग्धोमदानु दशा यन्ता शिखश्विशत वर्षशतं प्रोष्य संपले युगे प
श्चिमान्तोदितः स धोमरकफलः ॥ सोऽभिक्षकरश्च ॥ रश्मिशिकेतुः सोऽभिक्षकफलः यत्र वा स कालपूर्वेणालिग्धः एतु
॥ शस्त्रकेत रजकेतरजनिरोधः मरकफलः समः ॥ अथ कपालकेतोर्लक्षणमाह ॥ ॥ दृश्योमावास्यायां कपाल
केतुः स च धूम्ररश्मिशिरः ॥ प्राकूनभसोर्ध्वविचारी क्षुन्मरकरोगवृष्टिकरः ॥ कपालनामकेतुः स त्वमावास्यायां
दृश्यपंचदश्यां प्राक्पूर्वस्यां दिशि दृश्य उदयं याति ॥ किंभूतः ॥ स धूम्ररश्मिशिरः ॥ स धूम्राश्मिः शिखा यस्य
॥ किरणकांतिः ॥ धूम्रवर्णेत्यर्थः ॥ नभसोर्ध्वविचारी ॥ नभसं आकाशस्य ऊर्ध्वं यावत् विचरति गच्छति ॥ स तु क्षुन्म
रकावृष्टिकरः ॥ क्षुत् दुर्भिक्षं ॥ मरकं जनक्षयः ॥ अवृष्टिं रोगांश्च करोति ॥ तथा च पराशरः ॥ अथादित्यजानां कपा
लकेतुरुदयते ॥ अमावास्यायां पूर्वस्यां दिशि धूम्रार्चिशिखो नभसोऽभ्युदयो दृश्यते ॥ पंचविंशद्वर्षशतं प्रोष्य
श्रीश्वपक्षान् सत्तजनमस्य कुमुदकेतोश्चारतो ॥ स दृष्टश्च दुर्भिक्षाः नावृष्टिव्याधिभयं करोति ॥ सत्य पदृकालस्र
जाति ॥ जगति यावंतो दिवसान् यावत् दृश्यं ते तावन्मासान् मासैः संवत्सरान् पंचप्रकं मारधान्यस्यार्घहलाप्रताः
नामेकमुपभुंक्ते ॥ ॥ अथ रौद्रकेतोराह ॥ प्राक् वैश्वानरमार्गे शूलाग्रः श्यावरूक्षताम्रार्चिः ॥ नभसः त्रिभा
गगामी रौद्र इति ॥ कपालतुल्यफलः ॥ रौद्रनामा केतुः ॥ प्राक् पूर्वस्यां दिशि अमावास्यायां वैश्वानरमार्गे दृश्यते वा
थ्या दृश्यते ॥ वैश्वानरसंज्ञितमार्गे वीथ्यां दानराधादयोः समीप इत्यर्थः ॥ कीदृशः शूलाग्रः ॥ शूलाकारेतरग्रं य
स्य केतोः स शूलाग्रः त्रिशिखश्च इत्यर्थः ॥ तस्यैव वर्णः ॥ श्यावरूक्षं अग्निरूपं ॥ आर्चिः तेजः श्यावं रूक्षं ताम्रं ना ८७
र्चिलेजोयस्य स श्यावरूक्षताम्रार्चिः ॥ नभसस्त्रिभागगामी ॥ नभसः आकाशस्य त्रिभागगमनशीलः स च क
पालतुल्यफलः कपालकेतोः समानफलः ॥ एतदुक्तं भवति ॥ क्षुन्मरकावृष्टिरोगकरः इति ॥ आचार्येण शुक्राचार
वैश्वानरमार्गोद्दिष्ट एव ॥ आषाढद्वयं दहनेति ॥ तथा च पराशरः ॥ अथ दक्षयते रुद्रक्रोधात् भवतः त्रिलक

तुल्यानि वर्षशतानि न वचमासान् त्रिशोदयते ॥ पूर्वेण वैश्वानरपथे दास्तत्रं तेन त्रस्यमाये केतोश्चारन्ति श्याव रूक्षता
म्रारुणशूलाकारः स दृशः त्रिशिखान् नभसः त्रिभागचारी स शस्त्रभयरोग दुर्भिक्षानावृष्टिमारकैर्यावत मा
सान दृश्यते तावद्वर्षाणि त्रिभाग शेषां प्रजां करोति धर्मे च सारधान्यस्यादकमसंप्रजाति ॥ तथा च वृद्धगर्ग आह ॥
ऽपेश्चमूलमनुराधायां त्रिभागं नभसो गत्वा ततो गच्छत्यदर्शनं ॥ यावंतो दिवसांस्तिष्ठेत् तस्ताव द्वर्षाणि तद्भयं ॥ श
स्त्राग्निभयरोगैश्च दुर्भिक्षमरकैः हताः ॥ चूर्णमानाः प्रजाः सर्वाः विद्रवंति दिशो दश ॥ ॥ अथ चलकेतोर्लक्ष
णमाह ॥ ॥ अपरस्यां चलः केतुः शिखया याम्याग्रयांगुलोच्छ्रितया ॥ गच्छेद् यथा यथोदकं तथा दैर्घ्यमायाति ॥
सप्तमुनीन् संस्पृश्य ध्रुवमभिजितमेव प्रतिनिवृत्तः ॥ नभसोऽर्धमात्रमित्वा याम्येनास्तमुपयाति ॥ हन्यात्प्रयागकू
लाद्यावदवंतीं च पुष्करारण्यं ॥ उदगपि च देविकामपि भूयिष्ठं मध्यदेशाख्यं ॥ अन्यानपि च देशान् क्वचिद्रोति
रोगदुर्भिक्षैः ॥ दशमासान्फलकालोस्य केचिदष्टादशप्रोक्ताः ॥ ॥ अपरस्यामिति ॥ अपरस्यां पश्चिमायां दि
शि चलकेतुर्नामकेतुर्दृश्यते ॥ स च कीदृशः ॥ शिखया याम्याग्रयांगुलोच्छ्रितया उपलक्षितः ॥ शिखया कृतया याम्याग्रया
याम्यायां दक्षिणस्यां दिशि अग्रं यस्याः ॥ तथांगुलोच्छ्रितया अंगुलप्रमाणोच्छ्रया ॥ यथा येन प्रकारेण उदगुत्तरां
दिशं व्रजेत ॥ याति ॥ तथा तथा तेन प्रकारेण दैर्घ्यं दीर्घतामायाति प्राप्नोति ॥ सप्तमुनीन् इति ॥ वसिष्ठादीन् संस्पृश्य
तथा ध्रुवं ध्रुवतारकं अभिजितं च नक्षत्रं संस्पृश्य तनुः प्रतिनिवृत्तः प्रत्यागतः ॥ नभसस्य आकाशस्यार्धमात्र
मित्वा गत्वा प्राप्य याम्ये दक्षिणस्यां दिशि अस्तं याति अदर्शनं गच्छति ॥ अहन्यात् प्रयागकूलादिति ॥ सोऽपि चलके
तुः प्रयागकूलाद् आरभ्य यावदवंतीं उज्जयनीं ॥ तथा पुष्करारण्यं नाम स्थानं तावत् हन्यात् ॥ उदगपि च उत्तरस्यां
दिश्यपि च यावत् देविकां यावत् हन्यात् ॥ मध्यदेशाख्यं मध्यदेशाभिधानं भूयिष्ठं प्रायेण हन्यात् ॥ अन्यानपि देशान
ति ॥ स चलकेतुः अन्यानपरान् देशानपि रोगदुर्भिक्षैः क्वचित्क्वचित् नाशयति ॥ सर्वत्र ॥ अस्य केतो दशमासान्
यावत् ॥ अन्ये गर्गादयः अष्टादशमासान् यावत् फलपाकः प्रोक्तः कथितः ॥ तथा च पराशरः ॥ अथ श्वेताम्रऋषिक
केतुः पंचदशवर्षशतं प्रोष्योदितः पश्चिमेनांगुलमात्रां शिखां दक्षिणाभिनतां रलाजलकेतोश्चारीनेनभस

स्त्रिभागमनुचरन् यथोत्तरेण व्रजति। तथा श्वेताख्यः कचः शिखावान् दर्शयन्नात्मानं सप्तर्षीनुपगच्छति॥ नमुसद्भ्य आ
मनाध्रुवमृक्षराशिं सप्तर्षीन्स्पृशन्नभोऽर्धमात्रं दक्षिणमनुपरिक्रम्य अस्तं व्रजति॥ स स्वर्गं दारुणकः सस्वर्ग
ग्रासत्वादिवचात्यत्लमभिहिन्नस्ति॥ कौङ्कमक्लिन्नभूमिकश्यायित्वा दशमासान्मध्यदेशे भयिष्ठजनपदमवशे
षं कुरुते श्वापिनं क्वचिच्छन्नं दुर्भिक्षव्याधिमरकभयैः क्लिश्नाति॥ अष्टादशमासानिति॥ तथाच गर्गः॥ शुक्लरूपम
रकव्याधिभयैः संपीडयेत्प्रजाः मासान्दशतथाष्टौ च चलकेतुः सुदारुणः॥ ॥अथ श्वेतकेतुकालककेतोर्लक्षण
माह॥ प्रागर्धरात्रदृश्यो याम्याग्रः श्वेतकेतुः सुदारुणः॥ अन्यश्चक इति युगाकृतिरिति॥ अपरयुगवन्नाम प्रादिनदः
श्येयायाम्यः॥ स्निग्धौ सुभिक्षसुखदौ तथाधिकं दृश्यते कनामाख्य॥ दशचवर्षाणि पतापेन नयति शस्त्रकोपे
कृतं॥ प्रागर्धरात्रदृश्य इति॥ श्वेतकेतुर्नामकेतुः प्राक्पूर्वस्यां दिशि अर्धरात्रे दृश्यार्धकाले दृश्यते याम्याग्रो द
क्षिणदिक्शिखः॥ अन्यश्च द्वितीयः कइतिनामकेतुरपरस्यां पश्चिमायां दिशि दृश्यते॥ युगाकृतिर्युगस्थानाकारः
तौ द्वावपि॥ युगपत्तुल्यं कालं समाहिना दृश्यौ स्निग्धौ सुभिक्षशिवदौ तथाधिकं दृश्यते॥ कनामाख्यः सप्त
दिवसान्दृश्येते॥ तौ च द्वावपि स्निग्धौ अतिनिर्मलौ दृष्टौ च सुभिक्षशिवदौ॥ सुभिक्षं शिवं श्रेयश्च दत्तः॥
अथ यः कनामा सप्तदिवसमभ्यधिकं सभ्यधिकं दृश्यते॥ तदा शस्त्रप्रकोपकृत्॥ संग्रामकृत् उपतापं जनय
ति॥ तथाच पराशरः॥ ॥अथौद्दालकः श्वेतकेतुः दशोत्तरं वर्षशतं प्रोष्य भवकेतोश्चापरान्ते पूर्वस्यां दि
शि दक्षिणाभिनतः शिखोर्धकाले दृश्यते तेनैव सह द्वितीयः कः प्रजापतिपुत्रः॥ पश्चिमेनयस्तुकेतु प्रवसंस्था
यौ युगपत् दृश्यते॥ तावुभौ सप्तरात्रं दृश्यौ दशवर्षाणि प्रजाः पीडयेत॥ कः प्रजापतिपुत्रोथाधिकं दृ
श्यते तदा दारुणं शस्त्रकोपं कुर्यात्॥ तथैव स्निग्धवर्णौ शुक्लौ क्षेममारोग्यसुभिक्षकरौ भवतः॥ ॥ ८८
अथ श्वेतस्य लक्षणमाह॥ श्वेत इति जटाकारो रूक्षश्यावो वियत्त्रिभागगतः॥ विनिवर्ततेऽपसव्यं त्रि
भागशेषाः प्रजाः कुरुते॥ श्वेत इति॥ श्वेतनामा केतुर्जटाकारो जटासदृशाकृतिः रूक्षश्यावः परुषः कृष्णवर्णः॥
वियत्त्रिभागगतः वियति आकाशे त्रिभागं यावत् गच्छति॥ ततोऽपसव्यं प्रदक्षिणं वामभागेन वर्तते॥

निवर्तते स कुरुते त्रिभागशेषास्तत्र्यंशावशेषाः प्रजाः कुरुते द्वौ भागौ क्षयं नयतीत्यर्थः॥ तथाच पराशरः॥ श्वेतकेतु
पंचदशवर्षशतं प्रोष्य ऐन्द्रां सोमसदृशस्य पद्मकेतोश्चान्ते श्यावरूक्षो नभस्त्रिभागमाक्रम्य अपसव्यं निवर्तयं
जटाकारशिखः यावत्यनमासान्दृश्यते तावद्वर्षाणि सुभिक्षमावहति॥ मध्यदेशमाचार्यगणानामाद्यानामौ
दीच्यांश्च भूयिष्ठं सत्रिभागशेषं प्रजामवशेषयति॥ ॥अथ रश्मिकेतोर्लक्षणमाह॥ आधूम्रया शिखया दर्श
नमायाति कृत्तिकासंस्थः॥ ज्ञेयः स रश्मिकेतुः श्वेतसमानं फलं धत्ते॥ यः केतुराधूम्रवर्णया शिखया उपलक्षित
ः तथा कृत्तिकासंस्थः कृत्तिकाणां समीपे दर्शनमुदयं याति गच्छति स रश्मिकेतुर्नाम केतुर्ज्ञातव्यः॥ स च श्वेतस
मानं श्वेतकेतुसदृशं फलं धत्ते ददाति॥ त्रिभागशेषाः प्रजाः कुरुत इत्यर्थः॥ तथाच पराशरः॥ अथ रश्मिकेतुर्वि
भावसुतः पंचवर्षशतं आवर्तकेतोरुदितचारान्ते कृत्तिकासु धूम्रशिखः श्वेतकेतोः सदृशः फलः॥ ॥अथ
ध्रुवकेतोर्लक्षणमाह॥ ध्रुवकेतुरनियतगतिः प्रमाणवर्णाकृतिर्भवति विष्वक्दिव्यान्तरिक्षभौमो भवत्ययं
स्निग्धं इष्टफलः॥ सेनांगेषु नृपाणां गृहतरुशैलेषु चापि देशानां गृहिणामुपस्करेषु च विनाशिनां दर्शनं भव
ति॥ ॥ध्रुवकेतुरिति॥ ध्रुवकेतुर्नामकेतुः स त्वनियतगतिः नियतवर्णप्रमाणाकृतिः॥ अनियता अनिश्चिता गतिर्ग
मनं॥ प्रमाणं स्थूलसूक्ष्ममध्यभावं आकृतिराकारो यस्य स तथाभूतः स च विष्वक् अनंततो भवति॥ सर्वासु दि
क्षित्यर्थः॥ स च दिव्यान्तरिक्षभौमस्त्रिप्रकारो भवति। कचित्त्रिविधो नामा प्रकारो भवतीत्येवामि कान्ति॥ स च
स्निग्धो निर्मलशरीरः इष्टफलः शुभफलो भवति॥ एष एवं विधानां विनाशिनां मुमूर्षूणां दर्शनमुपयातीउद
यं गच्छति॥ देशानां विनाशिनां मृत्युवेशास॥ तरुषु वृक्षेषु॥ शैलेषु पर्वतेषु दृश्यते॥ तथा गृहिणां गृहस्था
नामुपस्करेषु उपस्करभांडेषु दर्वीशिर्पमार्जन्यादिषु विनाशिनामेव दर्शनं याति॥ तथाच पराशरः॥ अथानि
यतदिक्कालरूपवर्णप्रमाणस्थानः ध्रुवकेतुः पराभविष्यतां देशानां राज्ञां जनपदानां च॥ वृक्षपुरपर्वतवेश्म
ध्वजपताकाशस्त्रचर्मायुधावरणरथनागाश्वगोपुरुषशयनासनभांडेषु धार्येषु दृश्यते॥ स एव दीप्तिस्नि
ग्धो विमलः प्रदक्षिणशिखो गोगजाश्वनागवीथ्यां चान्तरेण नगरजनसुभिक्षक्षेममारोग्यमावहति॥ दशौकावि

वारा०सं० ८९

शांतिं दृष्ट्वान्नधान्यादर्शनमिच्छंति॥ मृत्यो धूमकेतोरस्य च प्राग्दृश्यानि मितानि॥ अतनिन कनमग्नेः प्रभासां धूम्रध्वमनांदृशां ज्ञातो स्याविपर्ययो निरूक्षवायुः संभवश्च॥ ॥अथ कुमुदकेतोर्लक्षणमाह॥ कुमुद इति कुमुदकांतिर्वारुण्यां प्राक्शिखो निशामेकां॥ दृष्टः सुभिक्षमतुलं दश किल वर्षाणि स करोति॥ ॥कुमुदो नाम केतुः स तु कुमुदकांतिः कुमुदाभः विश्वेतवर्ण इत्यर्थः॥ स तु वारुण्यां पश्चिमायां दिशि प्राक्शिखः पूर्वशिखो निशां रात्रिमेकामेव दृश्यते॥ कुलत्यागमसत्वेन स तु दृष्टो दश वर्षाणि अतुलमसमं सुभिक्षं करोति॥ तथा च पराशरः॥ अथामृतजाः कुमुदो मणिर्जलोद्भवः पद्म आवर्त कूर्मिः शंखो हिमोक्षः कुक्षिकपोल विसर्पणः शीतश्चेति॥ तत्र कुमुदकेतोर्वसार्वसां केतोश्चारसमानो वारुण्यां दर्शनमुपैति॥ गोक्षीरविमलस्निग्धप्रभां पूर्वेणाभिमतां शिखां कृत्वे वरात्रिं चरः॥ स दृष्ट एवं सुभिक्षमुत्पादयति॥ द्वा दश वर्षाणि प्रजानां अविरोधं च॥ प्रतीच्यांश्च सर्वरोगाः शोचकप्रतिश्यायपांडुरोगावर्जैः प्रजाबाधत इति॥ ॥अथ मणिकेतोर्लक्षणमाह॥ सकृदेकयामदृश्यः सूक्ष्मतारोऽपरेण मणिकेतुः॥ ऋज्वी शिखास्य शुक्ला स्तनोद्गता क्षीरधारेव॥ उदयन्नेव सुभिक्षं चतुरो मासान्करोत्यर्धमासाधिकान्॥ प्रादुर्भावं प्रायः करोति च क्षुद्रजंतूनां॥ सकृदेकयाम दृश्यत इति॥ मणिकेतुर्नाम केतुः स अपरेण पश्चिमायां दिशि सूक्ष्मतारोऽल्पतारकः॥ सकृदेकवारं एकयामदृश्यः यामशब्देन रात्रिचतुर्भाग उच्यते॥ अस्य केतोर्ऋज्वी स्पष्टा शिखा च्छटा शुक्लवर्णा दृश्यते॥ कीदृशी स्तनोद्गता क्षीरधारेव॥ स्तनात्कुचात् उद्गता निसृता क्षीरधारा यथा दृश्यते॥ तद्वत् शिखा उदयान्नेवाति॥ अतो केतुरुदयन्नेवोदितमात्र एव॥ चतुरः सार्धमासान् क्षेमसुभिक्षमुत्पादयति॥ करोति॥ प्रायो बाहुल्येन क्षुद्रजंतूनां नकुलादीनां प्रादुर्भावमुत्पत्तिं करोति॥ तथा च पराशरः॥ मणिकेतुरपि कपालकेतोश्चारावसाने प्रतीच्यामुदयमुपयाति॥ सूक्ष्मारंध्रातितारकामात्रः क्षीरप्रसेकाभावात्॥ नवाभिनतया स्निग्धया शिखया शार्वयामिकमात्रमदृश्य॥ स उदयात्प्रभृति अर्धपंचमासान् क्षेमसुभिक्षमुत्पादयति॥ क्षुद्रजंतूनां प्रादुर्भावं करोति॥ अतिमात्रकालदृष्टः॥ ॥अथ जलकेतोर्लक्षणमाह॥ जलकेतुरपि च पश्चात् स्निग्धः शिखयापरेण चोन्नतया॥ नव मासांश्च सुभिक्षं करोति शांतिं च

लोकस्य॥ ॥जलकेतुर्नाम केतुः सोऽपि पश्चात् पश्चिमायां दिशि दृश्यते॥ स्निग्धो निर्मलदेहः॥ अपरेण पश्चिमेनोन्नतयोच्चया शिखया चूडया युक्तः स च दृष्टो नव मासान् सुभिक्षं करोति॥ लोकस्य जनपदस्य च शांतिं श्रेयः करोति॥ तथा च पराशरः॥ ॥अथ केतोः पितामहस्य च केतोर्नवमासावशिष्टेकमणिरूतं प्रवर्तयति॥ पश्चिमेनोदितः स्निग्धः सजातो नु पश्चिमाभिनतशिखः स च नव मासांतराक्षेमारोग्यसुभिक्षाणि प्रजाभ्यो धत्ते॥ अन्यत्र दूरतानां च शुभानां च व्याघातयति॥ ॥अथ भावकेतोर्लक्षणमाह॥ भावकेतुरेकरात्रं दृश्यः प्राक् सूक्ष्मतारकः स्निग्धः॥ हरिलांगूलोपमया प्रदक्षिणावर्तया शिखया यावंत एव मुहूर्तान् दर्शनमायाति तावन्निर्दिशेत् मासान् तावदतुलं सुभिक्षं रूक्षे प्राणांतिकान् रोगान्॥ ॥भावकेतुरिति॥ भावकेतुर्नाम केतुः स च प्राक् पूर्वस्यां दिशि एकरात्रमेकां रात्रिं दृश्यः॥ स सूक्ष्मतारः सूक्ष्मोऽल्पतारको यस्य स्निग्धो निर्मलदेहः॥ अन्यच्च शिखया उपलक्षितः॥ कीदृश्या हरिलांगूलोपमया प्रदक्षिणावर्तया॥ हरिः सिंहः तस्य लांगूलं पुच्छं तदुपमया तदाकारया प्रदक्षिण आवर्तो यस्याः सा तथाभूतया॥ स च यावत एव मुहूर्तान् यावत्संख्यान् दर्शनमायाति दृश्यते तावन्मासान्॥ अतुलं असमं सुभिक्षं निर्दिशेत् वदेत्॥ यदि स्निग्धः॥ रूक्षे तु पुनः प्राणांतिकान् वदेत्॥ ॥ तथा च पराशरः॥ जलकेतोः कूर्मसमासांकूर्मोदयः॥ कीर्तितावधेः प्रादुर्भवति॥ तत्रयोदशाचतुर्दशाष्टादशवर्षांतरिता दृश्यंते॥ स्निग्धाः सुभिक्षक्षेम्याय पर्यया विपरीताः॥ क्षुद्रजंतूनां च वधायेत यामशानांकर्मण्यतीति भावकेतुर्दृश्यते॥ पूर्वेण क्रौंच्याकृतिना मणिना माल्पराप्रमाणतया स्निग्धो न दृश्यते तावन्मासान भवत्यतीव सुभिक्षाय रूक्षः प्राणहरणं च रोगाणां प्रादुर्भावायेति॥ ॥अथ पद्मकेतोर्लक्षणमाह॥ अपरेण पद्मकेतुर्मृणालगौरो भवेन्निशामेकां॥ स सप्त करोति सुभिक्षं वर्षाण्यतिहर्षयुक्तानि॥ ॥पद्मकेतुर्नाम केतुरपरेण पश्चिमायां दिशि निशां रात्रिमेकां दृश्यते॥ कीदृशः मृणालगौरः मृणालवत् गौरो मृणालगौरः मृणालं बिसं तद्वत् गौरः श्वेत इत्यर्थः॥ स तु दृष्टः सप्त वर्षाणि अतिहर्षयुक्तानि सुभिक्षं करोति॥ तथा च पराशरः॥ अथ पद्मकेतुः श्वेतकेतुफलसमाप्तौ पश्चिमेनोदयन्निव मृणालकुमुदाभया शिखयैकरात्रिं चरः॥

सप्तवर्षाणि उपद्रुतं सर्वमेव स्त्रीजगतः॥ ॥अथावर्तकेतोर्लक्षणमाह॥ आवर्तक निशार्धसव्यशिखोऽरुणनिभोऽपरे
स्निग्धः॥ यावत्क्षणान्स दृश्यस्तावन्मासान्सुभिक्षकरः॥ ॥आवर्तनामेतिपः केतुः स निशार्धे रात्र्यर्धे परे पश्चि-
मायां दिशि सव्यशिखो दक्षिणादिगाश्रितशिखः स्निग्धो निर्मलवपुर्दृश्यते॥ स तु यावत्क्षणान्यावत्संख्याका-
न्मुहूर्तान्दृश्यते तावदेव मासान्सुभिक्षं करोति॥ तथा च पराशरः॥ अथावर्तकेतुः स्वामिकेतोः कर्मण्यतीते पर-
स्यार्धरात्रे शोषोद्द्राताऽरुणाभया प्रदक्षिणानना ग्रयाशिखयोदितः स यावन्मुहूर्तान्दृश्यते तावन्मासानभ-
व्येव सुभिक्षं नित्ययतोत्सवं जगत॥ ॥अथ संवर्तककेतोर्लक्षणमाह॥ पश्चात्संध्याकाले संवर्तो नाम धूमताम्र-
शिखः॥ आक्रम्य वियत्त्र्यंशं शूलाग्रावस्थितो रौद्रः॥ यावत एव मुहूर्तान्दृश्यो वर्षाणि हंति तावंति भूपाञ्छस्त्रनिपा-
तैः उदयर्क्षं चापीडयति॥ पश्चात्संध्याकाल इति॥ पश्चात्पश्चिमायां दिशि संध्याकाले संध्यासमये संवर्तो नामके-
तुः॥ स च कीदृशः स धूम्रताम्रशिखः॥ स धूम्रताम्रशिखो यस्य वियत आकाशस्य त्र्यंशं तृतीयभागं आक्रम्य प्रा-
प्य दृश्यते॥ शूलाग्रावस्थितः॥ शूलान् अग्रशिरसि अवस्थितं यस्य त्रिशूल इत्यर्थः॥ स च रौद्रो भयावहः॥ यावंत ए-
व मुहूर्तानीति स च केतुर्यावन्मुहूर्तान्दृश्यो भवति तावंति तत्संख्यावर्षाणि हंति नाशयत्यशुभफलप्रदो भवती-
त्यर्थः॥ तथा भूपान्नृपान् शस्त्रनिपातैः संग्रामैर्हंति॥ नाशयति॥ तथोदयर्क्षं यस्मिन्नक्षत्रे उदितो दृश्यते
तत्पीडयत्युपतापयति॥ तथा च पराशरः॥ अथ संवर्तको वर्षसहस्रे अष्टोत्तरे पश्चिमेनास्तं गते सवितरि सं-
ध्यायां दृश्यते॥ तन्वीताम्ररूक्षांशुशूलाभां धूम्रं विमुंचती दारुणाशिखां कृत्वा नभसस्त्रिभागमाक्रम्य स यावं-
न्मुहूर्तान्निशि तिष्ठति तावद्वर्षाणि परस्परं शस्त्रैर्घ्नंति पार्थिवान्॥ यानि नक्षत्राणि धूमयति॥ यत्र चोदितस्ता-
नि दारुणतरं पीडयति॥ तदाश्रितांश्च देशानिति॥ तथा च॥ येषां नक्षत्रविषये रूक्षः सकलकोद्धतः दृश्यते च दु-
र्मूर्तिस्तेषां विघातमुत्कटं॥ अवश्यं शस्त्रकोपं च व्याधिदुर्भिक्षमेव च॥ कुर्यात्नृपाणां पादांश्च स्वचक्रपरचक्रजः॥ ९०
यतोऽतिष्ठतिनक्षत्रे प्रवासं यत्र गच्छति॥ धूमयेद्वा स्पृशेद्वापि हन्याद्देशांस्तदाश्रितान्॥ यस्याभिषेकनक्षत्रं
जन्मभं कर्मभं तथा॥ देशर्क्षं पीडयेद्वापि स शांतिपरमो भवेत्॥ स्निग्धः प्रसन्नो विमलः प्रदक्षिणशिखस्तथा॥

दृश्यते येषु देशेषु शिवं तेषु प्रजानां दिशंति॥ इति॥ अथ अशुभान केतून् वर्जयित्वा॥ अशुभानां नक्षत्रस्पर्शने धूमनमा
निष्फलं वक्ष्यामीत्याह॥ ॥प्रशस्तान्तान्हित्वा केतुभिराधूमितेऽथवा स्पृष्टे॥ नक्षत्रे भवति वधो येषां राज्ञां प्रव-
क्ष्ये तान्॥ यः केतवः शस्ताः प्रशस्तफलास्तान् हित्वा अन्यैः केतुभिः शिखिभिर्नक्षत्रे यस्मिन् आधूमिते
अथवा स्पृष्टे येषां राज्ञां नृपाणां वधो मरणं भवति॥ तान् नृपान्वक्ष्ये कथयिष्ये॥ तांश्चाधुनाह॥ अश्विन्याम-
श्मकपं भरणीषु किरातपार्थिवं हन्यात्॥ बहुलासु कलिंगेशं रोहिण्यां शूरसेनपतिं॥ ॥अश्विन्यामभिधूमि-
तायां स्पृष्टायां केतुनाश्मकपं अश्मकानां जनानामधिपं राजानं हन्यात्॥ एवं भरणीषु किरातपतिं हन्यात्॥
बहुलासु कृत्तिकासु कलिंगेशं कलिंगाधिपतिं॥ रोहिण्यामभिधूमितायां शूरसेनाधिपतिं॥ अन्येष्वाह॥
उशीनरमपि सौम्ये जलजाजीवाधिपं तथार्द्रासु॥ आदित्येऽश्मकनाथं पुष्ये मगधाधिपं हंति॥ सौम्ये मृगशिरसि
केतुनाभिधूमिते स्पृष्टे वोशीनर उशीनराधिपं हन्यात्॥ तथार्द्रासु जलजाजीवाधिपं जलजा मत्स्यादयस्तैर्जीवंति
॥ये जलजाजीवाः प्राग्देशवासिन इत्यर्थः॥ तेषामधिपतिं नृपं हन्यात्॥ आदित्ये पुनर्वस्वोरश्मकपानामश्मका-
धिपतिं पुष्ये मगधाधिपतिं मगधेश्वरं हंति॥ अन्येष्वाह॥ असिकेशं भुजगे पित्र्येऽङ्गं पांड्यनाथमपि भाग्ये॥
औज्जयिनिकमार्यम्णे सावित्रे दंडकाधिपतिं॥ भोजंगे आश्लेषायां असिकेशं असिकाजनानामधिपतिं हं-
ति॥ पित्र्ये मघायां अंगाधिपतिं॥ सावित्रे हस्ते दंडकाधिपतिं दंडकारण्यनाथं हंति॥ अन्येष्वाह॥ चित्रासु कुरु-
क्षेत्राधिपस्य मरणं समादिशेत्तद्वत्॥ काश्मीरकांबोजनृपौ प्राभंजने न स्तः॥ चित्रासु केतुनाभिधूमिता-
सु स्पृष्टासु वा कुरुक्षेत्राधिपस्य मरणं॥ तद्वत् केतुरूपतः॥ समादिशेत् वदेत्॥ प्राभंजने स्वाती काश्मीरकां-
बोजनृपौ राजानौ न स्तः॥ न भवतः॥ अन्येष्वाह॥ इक्ष्वाकुरलकानाथश्च हन्यते यदि विशाखासु॥ मै-
त्रे पौंड्राधिपतिं ज्येष्ठे सार्वभौमवधः॥ विशाखासु यदि केतूपघातोऽपि भवति॥ ते इक्ष्वाकुनाथोऽलका-
नाथश्च हन्यात्॥ इक्ष्वाकवो जना अलकनगरी तन्नाथो राजा मैत्रे अनुराधायां पुंड्राधिपतिर्हन्यते॥ ज्येष्ठायां सार्वभौ-
मस्य कन्यकुब्जाधिपतेर्मरणं भवति॥ अन्येष्वाह॥ मूले च मद्रपतीन् जलदेवे काशिपामरणं॥ पतियोधेय कार्जुनाः

वारा० सं० मनश्चार्थे विधानवैश्वदेवेषु॥ मूले केतुनाभिधूमिते दूने नाशं ब्रजपति भद्रकपति इति॥ तत्केदेवे पूर्वाषाढायां काशि
पः काशिपतिर्मरणं प्राप्नोति॥ वैश्वदेवे उत्तराषाढायां यौधेयकअर्जुनायनशिबिचैद्यान् हंति॥ अथान्ये आह॥
हन्यात्केकयनाथं पांचनदं सिंहलाधिपं वांगं॥ नैमिषनृपं किरातं श्रवणादिषु षट्स्वयमानुक्रमशः॥ क्रमशस्त्वनुः
९१ श्रवणादिषु नक्षत्रेषु दृष्टेषु षट्सु मानवानुक्रमशः क्रमेण हन्यात्॥ तद्यथा॥ श्रवणे दृष्टे केकयनाथं केकयाधिपं
हन्यात्॥ धनिष्ठायां पांचनदं पंचनदाधिपं॥ शतभिषजि सिंहलाधिपतिं। पूर्वभद्रपदायां वांगं वंगाधिपं॥ उत्त
रासु नैमिषं नृपं नैमिषारण्याधिपतिं॥ रेवत्यां किरातं किराताधिपतिं हन्यात्॥ इति॥ अथ केतोर्विशेषमाह॥ ॥
उल्काभिताडितशिखः शिखी शिवः शिवतरोऽभिवृष्टश्च॥ अशुभः स एव चोलावगाणसितहूणचीनानां॥ उल्का
भिताडितशिखः॥ उल्कयाभिमुख्येन ताडिता हता॥ शिखा चूडा यस्य॥ स शिवः श्रेयस्करः॥ योऽभिवृष्टः वृष्टि
मात्रः स दृष्ट एव शिवतरः अतिशयेन शुभप्रदः॥ स एव केतुरेवंविधः॥ चोलानाम॥ अवगाणानां सितानां हूणानां ची
नानां चाशुभोऽश्रेयस्करः॥ चोलाद्याः सर्व एव जनाः॥ अन्यत्तद्विशेषमाह॥ नप्रायतः शिखिशिखाभिहतोऽभिसृ
तो यतो वा कृक्षं च यः स्पृशति तत्कथितांश्च देशान्॥ दिव्यप्रभावविहतान् स यथा गरुत्मान् भुंक्ते गतान् रपतिः प
देशभोगान्॥ यतो यस्यां दिशि शिखिनः केतोः शिखा नमार्चकास्तिखिनः शिखाशिखिशिखाकेतवा अभिसृता
वा यस्यां दिशि गंतुं प्रवृत्तः॥ अथवा यहक्षं यन्नक्षत्रं स्पृशति आश्रयति॥ तत्कथितांश्च देशान्॥ यस्यां दिशि शि
खिशिखा नमा तत्र ये देशा यस्यां वा गंतुं प्रवृत्तः॥ यत्र देशाः येन क्षत्रं स्पृशति यस्य नक्षत्रस्य च देशवस्यमाणाः
तान्कथितान् तदुक्तान्देशान्नरपतिर्नृपः राजा गतो भुंक्ते॥ स्वीकरोति॥ कीदृशान् देशान्॥ दिव्यप्रभावनिहतान् दु
र्गोन्निर्गतान्॥ कीदृशान्परिभोगिभोगान् परैरन्यैर्भोगिभिर्भुज्यंते ये भोगग्रामास्तान् स राजा भुंक्ते॥ यथा
गरुत्मान् गरुडो दिव्यप्रभावनिहतान् परभोगिभोगान् भुंक्ते परादुत्खाद्य भोगिनः सर्पाः तेषां भोगाः शरीरा ९१
ण्यंगानि चांतः॥ यथा येन प्रकारेण तथा तेन प्रकारेणेति॥ तथा च पराशरः॥ यस्यां दिशि समुत्तिष्ठेत्तां दिशं ना
भियोजयेत्॥ यतः शिखा यतो धूमः ततो यायान्नराधिपः॥ प्रतिलोमायनः केतुर्यायार्थं यातिपार्थिवः॥ सामान्य

वाहनबलः स नाशमधिगच्छति॥ ॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ केतुचारो नामैकादशोऽध्या
यः॥ ११॥ अथागस्तिचारो व्याख्यायते॥ ॥ तत्रादावेव भगवतोऽगस्त्यमुनेः प्राधान्यद्वारेण समुद्रशोभाम
भिवर्णयितुमाह॥ समुद्रांतर्जलैर्मकरनखरोत्खातशिखरैः कृतस्तोयोच्छित्यास परिसुतरंयेन रुचिरः॥ पतन्न
मुक्तामिश्रैः प्रवरमणिरत्नांबुनिवहैः॥ सुरान्प्रत्यादेष्टुं भितमुकुटरत्नानि वपुरा॥ ॥येन भगवताऽगस्त्यमुनि
ना॥ पुराप्रवर्तितोच्छ्रित्यात्तत्कापहरणेन संपादितक्षणमेव समुद्रः सुतरामतिशयेन रम्यः कृतः संपादितः तस्य मुनेरु
दयः श्रूयतां वक्ष्यमाणेन संबंधः॥ कैः रम्यः कृतः॥ अंतः कोलैः अंतर्मध्ये ये स्थिता मैनाकप्रभृतयः शैलाः पर्वता
ः तैः किल इंद्रभयात्तत्र प्रविष्टाः॥ पूर्वकीदृशैः॥ मकरनखरोत्खातशिखरैः मकरा जलप्राणिविशेषास्तेषां नखाः
कुटिलत्वात्त एव नखराः तैः मकरनखरैः उत्खातानि शिखराणि येषां तैः किल तैः कंदपमनं तुं परुषत्वान् उत्खनंति
॥ तथायं समुद्रः सुरान्देवान् प्रत्यादेष्टुं प्रत्याख्यातुं अभिभवितुमिव दर्शयितुं कर्तुमिव॥ कीदृशान् सुरान् मुकुटर
त्नानमितानि परिमितानि मुकुटेषु मौलिषु रत्नानि येषां तान् तथाभूतान् कैः प्रत्यादेष्टुमिव॥ पतन्मुक्तामिश्रैः पत
तिभिर्मुक्ताभिर्मिश्राः पतन्मुक्तामिश्राः तैः तथा प्रवराणि विकसानि चलानि मणिरत्नानि प्रधानरत्नानि॥ प्रवर
मणिरत्नानि चांबुनिवहाश्च प्रवरमणिरत्नांबुनिवहाः॥ तैः॥ अन्यदप्याह॥ येन चांबुहरणाद्विद्रुमैः भूधरैः स
मणिरत्नविद्रुमैः॥ निर्गतैः सदुरंगैश्च राजितः सागरोऽधिकतरं विराजितः॥ येन भगवता अंबुहरणे जलापहारे
पिहतेन राति सागरः समुद्रोऽधिकतरमतिशयेन विराजितः शोभितः॥ कैः भूधरैः पर्वतैः॥ कीदृशैः विद्रुमैः विग
तद्रुमा वृक्षा येभ्यः तैः तथा शरद्रितैः मणिरत्नैः प्रधानरत्नैः तथा विद्रुमैर्विद्रुमलताप्रवालैः समुत्वितैः एतैर्निर्गतैः
सदुरंगैश्च विराजितः॥ तदिति भूधराणां परामर्शः सदुरंगैः तेभ्यः पर्वतेभ्यो ये उरगाः॥ सर्पा निर्गताः तेभ्
यश्च तैर्निर्गताः राजितः पंक्तितस्तैः तथा रतैः॥ ॥ अथान्यत्॥ स्फुरत्तिमिनक्रभांति चलगः शिसानिकरो महोदधि
ः॥ आपदं पदगतो विधापितो येन पीतसलिलो महर्षिणा यं॥ येन महोदधिः समुद्रः आपद्गतोऽपि आपदं खानं
प्रापितोऽपि पीतसलिलोऽप्यमहर्षिणा यं दैवकक्षीयापितः प्रापितः॥ कीदृशः॥ स्फुरत्तिमिनक्रभांति चलगः॥ स्फुरंतश्चलं

तः तिमयो मत्स्याः जले जलदूस्विनो क्लिन्नगाः सर्पाः यस्मिन्निस्पंकुरंडकं गच्छतीति स्निग्धाग्रे प्राणिनो जलाभावात्।
वारा·सं· स्फुरति॥ तथाक्षिप्तरत्ननिकरः क्षिप्तः परिक्षिप्तो रत्नानां मणीनां निकरः समूहो यस्मिंस्तथा मकरलोकः स्फुरन्निमिलितो
९२ भक्षितस्निग्धाः॥ स्फुरंतश्चलंतो ये सुराः तिमितले भक्षितस्निग्धाः तिमिगाः मत्स्यवाहना केचित्। यथाविनस्तानदी॥ केचि
तन्तुलगाः पानीयस्थाः॥ यथा समुद्रे भगवान्नारायणः॥ केचिद् भगाः दूरितगनाः। यथं दुर्गराजन्तरः। केचित्तीक्ष्ण
कुटिलं गच्छतीति जिह्मगाः कुटिलगतयः। यथा भौमादयो ग्रहाः वक्राः स्तथाक्षिप्तरत्ननिकरा रतिषि॥ तथान्यत॥
॥ प्रचलत्तिमिशुक्तिजशंखचितः सलिलेष्वतेपि पतिः सरितां॥ सतरंगसितोत्पलहंसभृतः सरसः शरदीवबि
भर्ति रुचं॥ सरितां नदीनां पतिः प्रभुः समुद्रः सलिलेजलेषु हतेपि सति शरदि शरत्काले सरसो मत्स्योदकाधार
स्य संबंधिनीं दीप्तिं बिभर्ति धारयति॥ कीदृशस्य सरसः सतरंगः॥ सितोत्पलहंसभृतः॥ सतरंगानि तरंगेण वीची
समूहेन सहितानि सितोत्पलानि श्वेतकुवलयानि पुष्पविशेषाणि हंसाः पक्षिविशेषाः बिभर्ति धारयति यत्सरः॥ स
मुद्रः कीदृशः। प्रचलत्तिमिशुक्तिजशंखचितः प्रचलद्भिस्तिमिभिर्मत्स्यैः शुक्तिजैः प्राणिभिः शंखैः खचितो व्याप्तः॥
प्रचलंतो मत्स्याः एते एव तरंगाः शुक्तिजाः सितोत्पलानि शंखा हंसा इति॥ अथान्यत॥ तिमिसितांबुधरं मणितारकं
स्फटिकचंद्रमनंबुशरत्क्षतिः॥ फणिफणोपलरश्मितडिद्ग्रहं कुटिलगेशो — वियतचकार यः॥ यः कुटिलगेशः
समुद्रो वियदाकाशं चकार कृतवान॥ कुटिलं यथा स्यात्तथा गच्छतीति कुटिलगाः नद्यः। तासामीशः स्वामिनं॥ तिमयो मत्स्याः ते
एव शुक्लासिताः॥ शुक्लांबुधरा मेघा यस्मिन्। तथाभूता मणयो रत्नानि तान्येव दीप्तिमत्त्वात्तारकाः यस्मिन्॥ स्फटिकम
णिविशेषः। स एव स्वच्छत्वात्। चंद्रः शशी यस्मिन् अनंबुता जलाभावः॥ शरत्क्षतिः शरत्कांतिः अतिव्यक्तता यस्
मिन्। फणिफणोपलरश्मितडिद्ग्रहं॥ फणिनः सर्पाः तेषां फणा सुमध्यस्थान्युज्ज्वलरत्नानि चंद्रकांतसूर्यकांतप्र
भृतीनि तेषु ये रश्मयः॥ तएव नत्सदृशत्वात्॥ तडिद्ग्रहाः कृतवो यस्मिन् आकाशे एत एव संभवंतीति॥ ॥अथस ९२
मुद्रवर्णनानंतरं विंध्यवर्णनमाह॥ ॥दिनकररथमार्गविच्छित्तये भ्युद्यतं यं चलच्छृंगसंलग्नविद्याधरासंर्वस-
नियात्यग्रदत्तोः करेहल्लकं बांकुराभ्युच्छ्रितं दूयमानध्वजैः शोभितं॥ किं करिकटमदामिश्ररक्तावलेहानुवासानमा

रुद्दरेकावलीनोत्तमांगैः॥ कृतबाणपुष्पैरचनं सका धारयाद्विमां मृगेंद्रैः सनाथीकृतांतः तदीशानशृंगैर्गगनतलमिवाश्रु
रवितंप्ररूढं गंजाः कृष्णकुद्रुमत्रासविभ्रांतमत्तद्विरेफालसंहृष्टमंद्रस्वनैः नीलकूटैरत रश्याशार्दूलजातस्यामृगा व्या
सितैः रक्षसिमदासितुयारेवयाकांतयेवोपगदं सकराध्मासितावानमंभोजानानतमृगाप्निकाद्धरविप्राप्यितंविंध्य
मल्लंभयदाश्र॥ तस्योदयश्चश्रूयतां॥ एवंविधं विंध्यपर्वतं योऽगस्त्यमुनिरस्तंभयत स्तंभितवान्॥ तस्योदयोद्यांतं
श्रूयतां आकर्णयत॥ कीदृशं विंध्यं दिनकररथमार्गविच्छित्तये उदितं। दिनकरस्य आदित्यस्य यो सौ रथः स्यंदनस्तस्य
मार्गः पंथास्तद्विच्छित्तये तन्निवारणाय अभ्युद्यतं आभिमुख्येन उद्यतं सोद्यमं॥ यत अतएव अभ्युद्गतवान॥ चलत्शृंग
चलितानि कंपमानानि शृंगाणि शिखराणि यस्य तएतेषु शृंगेषु ये स्थिता विद्याधरा देवयोनयः तेतु भ्रांता भ्रांति
मार्पना स्तेषां ये सादः स्कंधाः तेषु अंसेषु या अवसक्ताः संलग्नाः प्रिया वल्लभाः स्त्रियः ताभिर्व्याप्ताभिः सोद्यमा
भिर्दत्ता कन्यरता अंकेषु उत्संगेषु विद्याधराणां ये देहाः शरीराणि तेषु अवलंबने॥ अंबराणि वस्त्राणि तान्युद्धि
तानि अतिशयेनोद्धूतानि उद्धृतराणि तानि वीज्यमानानि कंपमानानि तान्येव ध्वजाः सादृश्यात् ध्वजरूपाः तैः शो
भितं भूषितं॥ करिकरटमदामिश्रितेति॥ मृगेंद्रैः सिंहैः सनाथीकृतमधिष्ठितं॥ अंतर्मध्ये यादृशीं गुहां तामुप
निर्झरं झरनिस्रवतीति निर्झरं॥ गुहाप्रदेशे प्रपा पानीयं यस्मिन् विंध्ये॥ तन्नथाभूतं॥ कीदृशैः सिंहैः करिणोद्ध
तैनः तेषां ये करटा गंडाः तेषु ये मदा दानांबु तेनाभिमिश्रा संयुक्ता यदुतं असृक् तस्य यो वलेहः आस्वादस्तेन योनु
वासः सौरभ्यं तदनुसारिणस्तदन्वेषणपरा ये द्विरेफा भ्रमराः तैः वल्गनाः संलग्नाः उत्तमांगेषु शिरःसु येषां तै
: सिंहैः बाणपुष्पैर्बाणकुसुमैः कृतवान् रचितवान्॥ उत्तंसान् शिरोमालाधारयद्भिरेव॥ गगनतलमिति॥ नी
लकूटैः पर्वतशृंगैः गगनतलमाकाशतलं उल्लिखंतमिव॥ कीदृशैः नीलकूटैः प्ररूढैर्दीर्घमाद्रूर्गैः स्तंसितिभिः आक्र
ष्टा आकर्षिताः कुटाः कुशाः मिताये दुर्गाद्वृक्षास्तैः यस्त्रासः कंपः। असातत्ये भ्रांता भ्रांतिमार्पना मता॥ द्विरेफा
भ्रमरास्तेषामावलिर्यापंक्तिस्तस्यां संहृष्टा यांत्ये मंद्रा मधुराः स्वनाः शब्दाः तो विघंते येषां तैस्तथाभूतैः नील
कूटैः॥ अभ्रभ्रमरसंक्रियतथारक्षाभिघंनाचित्रकैः एभिर्वृक्षैर्वानरैः प्राणिविशेषैः शार्दूलैः सिंहजाति
भिः

Dr. BHAU DAJI

शाखामृगैः मर्कटैः अध्यासितानि सेवितानि येषां कुटारस्तैर् दसनानि। कीदृशं विंध्यं दृसि निर्जने मदसि कयारेनयाम चारा॰सं॰
दन सकया कामनिषण्णया कांतया वल्लभया कामिन्या चोपगूढं परिष्वक्तं रेवान मंदाक्रांत आलंत्रे नव दुग्धा गतान्वम
दन मका मदन यक्षायतनाश्रिति। मर्कटैः देवैर् अध्यासितानि सेवितानि उद्यानानि उपवनानि यस्मिन। तथोः भोगा
९३ नर्जिताद्वारैः अनंतैर् नागद्वारैः मृणालद्वारैः मृणभक्षैः। अनिलद्वारैर् वायुभक्षैश्च निर्भिन्नाः पर्णैर् मुनिभिरन्वितं
संयुक्तं विंध्यं॥ ॥अथागस्त्याद्यत्र भावमाह॥ उदयेन मुनेरगस्त्यनाम्नः कुसमायोगमलप्रदूषितानि। हृदयानिस
तानि स्वभावात् पुनरेव निर्भवंति निर्मलानि॥ ॥अगस्त्यनाम्नोऽगस्त्याख्यस्य मुनेरुदये उद्गमे पुनर्भूयोः भूमिपाना
यानि स्वभावात् प्रकृत्येव निर्मलानि प्रसन्नानि भवंति॥ कीदृशानि॥ कुसमायोगमलप्रदूषितानि। कोऽर्थः स्याः समयो
गः संश्लेषः कुसमायोगः तस्मात् कुसमायोगात् तया मलपंकलेन दूषितानि दुष्टानि तान्यगस्त्यस्य दर्शनान्निर्मलानि
यांति। वर्षासु कुसमायोगास्तेषां। यथा मता मातृनां उदये दर्शने हृदयानि दुष्टानि। तान्यगस्त्यस्य दर्शनान्निर्म
लतां यांति। वर्षासु कुसुमायोगास्तेषां यथा मतामाधुनां उदये दर्शने हृदयानि पुनर्निर्मलतां यांति॥ कीदृशानि
कुसमायोगमलप्रदूषितानि॥ कुत्सितेजने योऽसौ समायोगस्तस्य यन्मलं पापं तेन दूषितानि प्रदुष्टानि पुनस्व
भावादेव निर्मलानि भवंति॥ साधुदर्शनात् पापक्षय इत्यध्यत इतियावत्॥ अथ शिववर्णनादनंतरं सरिद्वर्ण
नमाह॥ ॥पार्श्वद्वयाधिष्ठितचक्रवाका मापृच्छमाना सखनं हंसपंक्तिं॥ तांबूलरक्तोल्लसिताग्रदंती विभाति
योषेव सरित् सहासा॥ ॥ सरित् सहासा हास्ययुक्ता योषित् स्त्रीव भाति शोभते॥ कीदृशा योषित् तांबूल
रक्तोल्लसिताग्रदंती॥ तांबूलेन रक्ता रंजिता दंतास्तेषामग्रवर्तिनो दंताः पुरोदंतास्तैरुल्लसिता उद्धर्षिता याय यास्तथाभू
ता स्त्रीव॥ सरित् कीदृशी॥ पार्श्वद्वयाधिष्ठितचक्रवाका मापृच्छमाना सखनं हंसपंक्तिं॥ पार्श्वद्वयमधिष्ठितं संयुक्तं
नक्रवाकैः पक्षिविशेषैः। कोऽर्थस्तावर्णास्त्रियाः हंसपंक्तिः तामापृच्छमाना मापृच्छमाना नदीनां प्रत्यहं ज्वलत्यत्र तत् ९३
पुलिनानि व्यक्तानि भवंति॥ तानि च हंसैः सेव्यंत इति॥ अत एवोपलक्ष्यते॥ तांबूलरक्तोल्लसिताग्रदंतीयोषा
सहासेव॥ अन्यदप्याह॥ इंदीवरासन्नसितोत्पलान्विता ररतभ्रमत षट्पदपंक्तिभूषिताः सुभ्रूलता

क्षेपकटाक्षवीक्षणा विदग्धयोषेव विभाति मत्तगा॥ ॥ ररतराम्भरासका माविदग्धयोषा प्रौढांगनेव विभाति शो
भते॥ कीदृशी विदग्धयोषा॥ सुभ्रूलताक्षेपकटाक्षवीक्षणा भ्रूलताया याव क्षेपश्चलनं तेन यः कटाक्षो नय
नविभ्रमः तेन सहितं अवलोकनं यस्याः ररत्नकादृशी। इंदीवरासन्नसितोत्पलान्विता॥ इंदीवरं नीलोत्पलं तः
स्यासन्ने उभयपार्श्वस्थे सितोत्पलैस्तथाभूतेनेंदीवरेणान्विता संयुता॥ अनेनैव सादृश्यमुक्तम्॥ यतो नेत्रमध्य
भागात् कृष्णमुभयपार्श्वयोः सितं भवति॥ तथाभ्रमंतश्चलंतो द्विषट्पदा भ्रमरास्तेषां यां पंक्तिरावलीस्तः
याभूषिता संयुक्ता॥ अनेन भ्रूसादृश्यमुक्तं॥ यतो नयनस्योर्ध्वभागे भ्रूलता भवति अत एवोत्प्रेक्ष्यते॥ सुभ्रू
लताक्षेपकटाक्षवीक्षणा विदग्धयोषा वारसरितसारेव॥ अथान्यत्॥ इंदोः पयोदक्षिगमोपहितां विभाति द्रष्टुं
तरंगवलयाकुमुदं निशासु॥ उन्मीलयत्यलिनिलीनदलं मुपक्ष्मबाधाविलोचनमिवाऽसिततारकाणाम्॥ ॥
इंदोः चंद्रमसः पयोदानां मेघानां विगमाद्धि नाशात् योगान् याऽपहृता वता गमनान् दुनाचंद्रेणभूतिः कांतिः तां द्रष्टुं
अवलोकयितुं वापान्दिलनीन शामुरात्रिषु कुमुदं कैरवं॥ नयनं नेत्रं॥ इवोन्मीलयति विकाशयति॥ कीदृशीवा
पि॥ तरंगवलयात रंगऽर्मिइस मृदूलत्ववलया प्रकोष्ठभूषणं यस्याः॥ कादृशं कुमुदं॥ अलिनिलीनदलं॥ अ
लिभ्रमरः सलीनः सत्कार्ये लेषपत्रेषु यस्मिन् सपक्ष्मशोभनपत्रं तद्देव असितं कृष्णतारकं मंतर्मध्ये अस्मि
न्नेवोपलक्ष्यते नयनमिव यतो नयनं सपक्ष्मभवति॥ शोभनानि अक्षिलोमानि यस्य तत् तथा असिततारकं
तं कृष्णतारकमध्यं नायकाभिरदर्शनात्॥ वलभस्य सोल्कंठं द्रक्ष्यत इति॥ ॥अथभमेः शोभामुपवर्णयि
तुमाह॥ ॥नानाविचित्रांबुजकोकहंसः कारंडवाकर्णित रागहृताः॥ रत्नैः प्रभूतैः कुसुमैः फलैश्च॥
नानाप्रकाराविचित्रा येऽम्बुजाः जलजादयः पद्मादयस्तथा हंसकोककारंडवाः पक्षिविशेषास्तैर्वानि अपूर्णा
नितदागानि तान्येव हस्ताग्रस्थितैर् र्घ्ययतीव॥ रत्नैः प्रभूतैः कुसुमैः फलैश्चानि॥ यतो भगवतो रत्नादिभिरर्घ्यंदी
यत इति॥ ॥अथ भगवतः प्राधान्यमाह॥ सलिलमसमरपादायोद्धितं यत चनपार्श्वोक्षितमूर्तिभिर्भु
जंगैः। फणिजनितविषाग्निसंप्रदुष्टं भवतात्ताग्रावंतदगस्त्यदर्शनेन॥ असमरपदं द्रुतस्यात यात्सलिलंऽद्धृतं

वा॰ सं॰ उत्सृष्टं भुजंगैः सर्पैः कीदृशैः घनपरिवेष्टितमूर्तिभिः घनैः मेघैः परिवेष्टितामूर्तयो येषां तैः। कीदृशं तलं। फणि
जनितविषाग्निसंप्रदुष्टं॥ फणिनः सर्पास्तेभ्यो जनितं उत्पादितं यद्विषं तदेवाग्निर्वह्निः तेन प्रदुष्टं सस्यक् दूषितं तत्
९४ दगस्त्यदर्शनेनाऽगस्त्यपुनरवलोकनेन तद्दर्शनात् शिवं श्रेयस्करं भवति॥ तस्मरणादपि पापमपाकुरुते॥ कि
मुत स्तुतिभिर्वरुणांगरुहः मुनिभिः कथितोपि यथार्घविधिः॥ कथयामि तथैव नरेंद्रहितं॥ वरुणस्यांगरुहः पुत्रो व
रुणांगरुहः अगस्त्यमुनेः स्मरणात् स्मरणमात्रादपि नामकीर्तनमात्रात् पापं नरः अपाकुरुते निवर्तयति॥
किमुत किंपुनः स्तुतिभिः स्तोत्रैः मुनिभिर्गर्गादिभिर्यथा येन प्रकारेणार्घविधिः कथितउक्तः तथानेनैव प्रकारे
ण नरेंद्रस्य राज्ञो हितं कथयामि वच्मि॥ तथा च समाससंहितायां॥ भानोर्वर्त्मविघातवृद्धशिखरो विं
ध्याचलस्तंभितो वातापीमुनिकुक्षिभित् सुररिपुर्जीर्णश्च येनासुरः॥ पीतश्चांबुनिधिः तपोंबुनिधिना याम्या
च दिग्भूषिता तस्यागस्त्यमुनेः पयोद्युतिकृतश्चारः समासाद्यतां॥ ॥अथास्योदयलक्षणमाह॥ संख्या
विधानात्प्रतिदेशमस्य विज्ञाय संदर्शनमादिशेज्ज्ञः॥ तच्चोज्जयिन्यामगतस्य कन्यां भानोः स्वराख्यैः स्फुटभा
स्करस्य॥ अस्यागस्त्यस्य मुनेः संख्याविधानं गणितविधानं तेन प्रतिदेशं देशं प्रति संदर्शनमुदयं विज्ञाय ज्ञः
ज्ञाता आदिशेत्॥ ज्ञः पंडितः॥ तच्च दर्शनमुज्जयिन्यां स्फुटभास्करस्य स्फुटादित्यस्य॥ कन्यां कुमारीं स्वराख्यैः भा
गैः सप्तभिरंशैरगतस्य अप्राप्तस्य भवति॥ सिंहस्य भागत्रयोविंशति भुक्तादित्यर्थः॥ तथा च समाससंहि
तायां॥ सप्तभिरंशैः कन्यामप्राप्ते गमकेतुदिवसकरे दृश्योगस्त्योऽवंत्यां तत्सम पूर्वापरे पेतां॥ अथास्यो
दानलक्षणमाह॥ ईषत्प्रभिन्नेऽरुणरश्मिजालैर्नैशेंधकारे दिशि दक्षिणस्यां॥ सांवत्सरावेदितदिग्विभा
गो भूपोऽर्घमस्मै प्रयतः प्रयच्छेत्॥ दद्यात्॥ कस्मिन्काले अरुणरश्मिजालैः अरुणकरनिकरैः नैशे रात्रि
भवेंधकारे तमसि ईषत् किंचित्प्रभिन्ने नष्टे कस्यां दिशि अर्घं दद्यात्॥ दक्षिणस्यां याम्यायां दिशि आशायां ९४
॥ कीदृशो राजा॥ सांवत्सरावेदितदिग्विभागः सांवत्सरेण कालविदा आवेदितः प्रदर्शितो दिग्विभागो
यस्य स तथाभूतः॥ यथेयं दक्षिणादिक् अस्यां भगवतो दर्शनमिति॥ कैः र्घप्रयच्छेदित्याह॥ कालो

द्भवैः सुरभिभिः कुसुमैः फलैश्च रत्नैश्च सागरभवैः कनकांबरैश्च॥ धेन्वावृषेण परमान्नयुतैश्च भक्ष्यैः दध्यक्ष
तैः सुरभिधूपविलेपनैश्च॥ ॥ कालोद्भवैः निजकालजातैः सुरभिभिः सुगंधैः पुष्पैः कुसुमैः फलैश्च जा
तिफलादिभिः कुसुमैः फलैश्च॥ सागरभवैः समुद्रजातैः कनकेन सुवर्णेन अंबरैर्वस्त्रैश्च॥ तथा धेन्वा पय
स्विन्या गवा॥ वृषेण दांतेन॥ परमान्नेन पायसेन युतैश्च भक्ष्यैः पूपादिभिः॥ तथा दध्ना क्षीरविकारेण॥
अक्षतैर्यवैः सुरभिभिर्धूपैः विलेपनैः सुगंधैश्च॥ ॥अथार्घदानस्य फलमाह॥ नरपतिरिममर्घं
श्रद्दधानो ददानः प्रविगतगददोषो निर्जितारातिपक्षः॥ भवति च यदि दद्यात् सप्त वर्षाणि सम्यग् जलनिधिर
सनायाः स्वामितां याति भूमेः॥ ॥ नरपतिराजा श्रद्दधानः श्रद्धावान् इमम् अर्घं ददानः प्रयच्छमानः सविनयस
प्तवर्षाणि दद्यात्॥ तत् जलनिधिरसनायाभूमेः समुद्रमेखलायाउर्व्याः स्वामित्वं प्रभुत्वं यातिगच्छति॥ ॥
अथ ब्राह्मणविट्शूद्राश्च गा भूरिधनं॥ शूद्रो रोगक्षयं॥ धर्मफलं च॥ सर्वो द्विजो ब्राह्मणो यथालाभं यथा
संभवं॥ उपहृतार्घो दत्तार्घः॥ प्राप्नोति लभते॥ वेदान्प्रमदांस्त्रियः पुत्रान् अपत्यानि॥ तथा वैश्यो यथा
लाभं उपहृतार्घो गा लभते॥ शूद्रो भूरिधनं वित्तं प्राप्नोति॥ सर्वे ब्राह्मणवैश्यशूद्रा रोगक्षयं गदोपशमं
धर्मफलं च प्राप्नुवंति॥ ॥अथोदितस्य लक्षणमाह॥ रोगान्करोति परुषः कपिलः स्वल्पवृष्टिं धूम्रो गवाम
शुभकृत् स्फुरणो भयाय॥ मांजिष्ठरागसदृशः क्षुधमाहवांश्च कुर्यादणुश्च पुररोधमगस्त्यनामा॥ ॥अग
स्त्यनामा मुनिः परुषो रूक्षो रोगान्करोति। कपिलः कपिलवर्णोऽल्पवृष्टिं करोति॥ धूम्रो धूम्रवर्णो गवामशुभकृत् अ
निष्टफलं करोति॥ स्फुरणश्चलनो भयाय भवति॥ मांजिष्ठरागसदृशो मांजिष्ठवर्णः क्षुधं दुर्भिक्षं आहवान्सं
ग्रामांश्च करोति॥ अणुः सूक्ष्मः पुररोधनं नगरवेष्टनं करोति॥ ॥अथ वर्णलक्षणमाह॥ शातकुंभसदृ
शः स्फटिकाभस्तर्पयन्निव महीं किरणाग्रैः॥ दृश्यते यदि तदा प्रचुरान्ना भूर्भवत्यभयरोगजनाढ्या॥ ॥
यदि शातकुंभसदृशस्ताम्रसदृशो दृश्यते॥ शातकुंभशब्दः सुवर्णरजतयोरीश्वरोपि वाचकः॥ अत्र वर्णस्य
वाचकः॥ अथवा स्फटिकाभः स्फटिककांतिः महीं भूमिं किरणाग्रैः रश्मिप्रांतैः तर्पयन्निव॥ आप्याययन्नि
व॥

केचित्किरणैर्घोरैस्तपंति। किरणैर्घोरैरभ्रसमूहैः स्तराभ मेदीप्रनुगन्ताप्रभूतसस्याः॥ तथाअभयोगा
ज्जनादया॥ अभये भयरहितेः अरोगो विगतरोगे जनैर्गतुभिरद्या बहुलाभवति॥ तथा च गर्गः॥ शंख
कुंदगोक्षीरमृणालरजतप्रभः॥ दृश्यते यद्यगस्त्यः स्यात्सुभिक्षक्षेमकारकः॥ वैश्वानरार्चिःप्रतिमां
सशोणितकर्दमैः॥ रणैर्भयश्चाविविधैः क्लिश्यंते पश्यते प्रजाः॥ ॥ अथार्घदानसमयलक्षणमाह॥
उन्कयावानि दूतोभितापितः अखिनाववेकतुनाविनिदूतस्तदा अद्भुयमरकर्तं भयंच करोति॥ यत्तेदर्शितं
कुलैत्यागमसूचनं॥ भोगस्त्यमुनिः॥ हस्तगते केहस्तस्थे सूर्ये दृश्यते उदयं याति॥ तथा च रोहिणीमुपग
ते रोहिण्यां संस्थिते केअस्तामुपैति॥ अदर्शनं याति॥ यत्तत्रगणितसाम्यं भवति॥ तथा चार्येणप्रव
शास्त्वेन कृतं॥ तथा च पंचसिद्धांतिकायां॥ विषुवच्छायार्धगुणा पंचकृतिस्तकालास्तमस्यायं॥ छाया
त्रिसप्तकयुतं दृग्भिर्गणितं विधास्ताः॥ ताभिः कृतं राशा घलवांतागृशेर सूर्ये स्थितेऽस्त याम्याशा चिततामुख
विशोषयति भकोमुनिरगस्त्यः॥ एवं सर्वशास्त्रेष्वगस्त्याचार्यैर्णोक्तं॥ तथा च पराशरः॥ हस्तस्थसवितरि
उदेति रोहिणी संस्थे च सति॥ तथास्याघ्निविधश्चारो द्रयकालो दृश्यः॥ आश्वयुगबहुलाष्टमीपंचदश्योः
कार्तिकामृस्यां चान्त्राश्वयुगबहुलादितः प्रकृष्टिश्चैमाप्नसंपक्वरोवर्णश्चैव दृश्यते॥ अत्रार्ध्यविधिस्थप्र
श्लाभोरोगायकापल्डार्घशीनग्रस्य धूपाभोगा चामभानायमानिकः क्षत्स्थदीर्नालोनिदं पाघलंचलः
पुरोधायस्यंदनोभयाया॥ अपि च दृत्याद्युक्तायदागस्त्यं केतुर्वाप्युपधूमयेत॥ दुर्भिक्षं जनमारकं ध्वनत्स
जगतिशायति॥ मूलिग्धवर्णश्वेतश्च शातकुंभसमप्रभः॥ मुनिः क्षेमकृदभिक्षाय प्रजानामभयाय
च॥ ॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ अगस्त्यचारो नाम द्वादशोऽध्यायः॥ १२ ७॥
॥ ॥ अथ सप्तर्षिचारो व्याख्यायते। तत्रादावेव च मुनीनां दिक्संस्थानलक्षणमाह॥ सैकावलीव ९५
राजति॥ ससितोत्पलमालिनी॥ सनाथेव नाथवती च यादिक्कौबेरी॥ सप्तभिर्मुनिभिः कौबेर्येन
दिक्सनाथवतीव विराजते शोभते॥ यथा नाथवती प्रभुणा युक्ता नायका विराजते॥ तद्वत्कौबेरीति॥

नाथवती कादृशी भवति। सैकावलीव सह एकावल्या वर्तते या सा सैकावलीव यथा या भरणविशेषसंज्ञा एवं स
सितोत्पलमालिनी॥ सह सितोत्पलमालया वर्तते॥ सहासेव च मानवती कः॥ अकुटिलत्वात्। एतानि वि
शेषणानि उत्प्रेक्ष्यंते॥ उक्तं॥ ध्रुवनर्तनभ्रमद्भिर्नरादिगेव विधालक्ष्यते॥ तेषां चारं वक्ष्यामीत्याह
॥ ध्रुवनायकोपदेशान्नरीनर्तीवोत्तरा भ्रमद्भिश्च॥ यैश्चारमहं तेषां कथयिष्ये वृद्धगर्गमतात्॥ यैर्मु
निभिर्भ्रमद्भिरुत्तरा कौबेरी दिक् नरीनर्तीव अत्यर्थं नृत्यति॥ नटी नर्तकी॥ केयं ध्रुवनायकोपदेशात॥ ध्रु
व एव नायको ध्रुवनायकस्तदुपदेशात॥ नर्तनं तस्या उपदेशको नायक आचार्यो भवति॥ तस्या ध्रुवना
यकोपदेशो यस्मात्॥ सकलज्योतिश्चक्रस्य ध्रुव एको नामकः॥ तथा च भट्टब्रह्मगुप्तः॥ ध्रुवयोर्बद्धं सव्य
गममराणां क्षितिजसंस्थमुडुचक्रं॥ अपसव्यगमसुराणां भ्रमति प्रवहानिलाक्षिप्तमिति॥ तेषां मुनी
नां चारमहं वृद्धगर्गमतात् कथयिष्ये॥ वृद्धगर्गो नाम मुनिस्तन्मतात्॥ तत्ज्ञानात् शास्त्रादिति॥ अथ
तेषां चारं नक्षत्रामयनामाह॥ ॥ आसन्मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ॥ षड्द्विकपं
चद्वियुतः शककालस्तस्य राज्ञश्च॥ ॥ मुनयो मरीच्यादयः सप्तर्षयो युधिष्ठिरे पांडुतनये नृपतौ
राज्ञि पृथ्वीं महीं शासति पालयति सति मघासु मघानक्षत्रे आसन् अध्यासन्॥ तथा च वृद्धगर्गः॥ कलिद्वापरसं
धौ तु स्थितास्ते पितृदैवतं॥ मुनयो धर्मनिरताः प्रजानां पालने रताः॥ तस्य च युधिष्ठिरराज्ञः षड्द्विकपंचद्वियुतः
सहस्रद्वयेन पंचभिः शतैः षड्विंशत्यधिकैः शककालोयुतः कार्यः॥ एवं कृते यावद्भवति तावद्वर्षवृत्तं
मानकाले यावद्गतं तस्य राज्ञो ततो भागमपहृत्य यदवाप्यते तानि मघादीनि नक्षत्राणि भुक्तानि यच्छेषं तानि वर्षाणि
॥ भुज्यमाने नक्षत्रे तेषां प्रविष्टानां गतानि तानि गतानि वर्षाणि शेषैः तद्वर्जिष्यंते तावंत्येव च वर्षाणि तस्मिन्
नक्षत्रे स्थितानीति॥ कथं नक्षत्राणामपि सप्तविंशत्या भागमपहृत्य अवशेषांक समं मघादिन क्षत्रे भुक्त
मिति वाच्यं॥ अथ तेषां नक्षत्रभोगप्रमाणकालं नक्षत्रचारस्थितं चाह॥ ॥ एकैकस्मिन्नृक्षे शतं शतं ते चरं
ति वर्षाणां॥ प्राग्घुतरतश्चैते सदोदयंते ससाध्वीकाः॥ ते मुनयः एकैकस्मिन् नक्षत्रे शतं शतं वर्षाणां चरंति
॥

तथा च काश्यपः ॥ शतं शतं च वर्षाणामेकैकस्मिन् महर्षयः । नक्षत्रे निवसन्त्येते समाप्ताः कामदा नृपाः ॥ प्रागुद्य इति ॥
अविरागानि नगरं प्रागुदयतः प्राक् पूर्वस्यां दिशि उदयतो येन नक्षत्रे चाक्रिकस्य तस्य एतानि सप्तर्षिमण्डलानि भवति ॥ तत्र
तस्मिन्नक्षत्रे न संयुक्ताः स्थिताः इत्येतदुक्तं भवति ॥ तस्य नक्षत्रस्य प्रागुदयतः सप्तर्षिपङ्क्तिः स्पष्टा भवति ॥
तस्मिन्नेव स्थिता इति किञ्चित् ॥ प्राग्गतरत एते सन्दृश्यन्ते ॥ समाप्तकाल इति पठन्ति ॥ तेषु प्राग्गततः ऐशान्यां
दिशि सार्वकालं समस्ताः सार्द्धध्रुवकाः दृश्यन्ते ॥ ॥ अथ संस्थानलक्षणमाह ॥ पूर्वे भागे भगवान् मरीचिर
परस्थितो वसिष्ठोऽस्मात् ॥ तस्याङ्गिरास्ततोऽत्रिस्तस्यासन्नः पुलस्त्यश्च ॥ पुलहः क्रतुरिति भगवानासन्नानुक्र
मेण पूर्वाद्याः ॥ तत्र वसिष्ठं मुनिवरमुपाश्रितारुन्धती साध्वी ॥ ॥ पूर्वभाग इति ॥ पूर्वभागे पूर्वस्यां दिशि भगवान्
मरीचिर्नाम महर्षिः स्थितः ॥ अस्मान्मरीचेः अपरे पश्चिमभागे वसिष्ठः स्थितः ॥ तस्याङ्गिराः तस्य वसिष्ठस्यापरः
अङ्गिराः स्थितः । ततोऽत्रिः ततः तस्मात् अङ्गिरसोऽत्रिर्व्यवस्थितः । तस्मादत्रेरासन्नो निकटः पुलस्त्यश्च ॥ ततः पुलहः
क्रतुरिति भगवान् अनुक्रमेण परिपाट्या पूर्वाद्याः पूर्वादितः आसन्ना निकटाः स्थिताः ॥ तत्र तन्मध्ये अरुन्धती सा
ध्वी साध्वी मुनिवरं मुनिप्रधानं वसिष्ठमुपाश्रिता संश्रितेत्यर्थः ॥ अथैतेषां शुभाशुभमाह ॥ ॥ उल्काशनि
धूमाद्यैर्हता विवर्णा विरश्मयो ह्रस्वाः ॥ हन्युः स्वं स्वं वर्गं विपुलाः स्निग्धाश्च तद्वृद्ध्यै ॥ एते मुनयः उल्कया
अशन्या धूमेन वा आदिग्रहणात् दारुणैः स्पर्शैरभिहताः विवर्णाः कलुषाः ॥ विरश्मयो विगतकिरणाः ॥ ह्रस्वाः स्व
ल्पबिम्बाः ॥ स्वं स्वं आत्मीयं वर्गं वक्ष्यमाणं हन्युर्नाशयेयुः ॥ तथा विपुला विस्तीर्णाः स्निग्धा निर्मलाश्च तद्वृद्ध्यै
स्ववर्गवृद्ध्यै भवन्ति ॥ तथा च वृद्धगर्गः ॥ उल्कयाशनिना वापि धूमेन रजसापि वा ॥ हता विवर्णाः स्वल्पाः कि
रणैः परिवर्जिताः ॥ स्वं स्वं वर्गं तदा हन्युर्मुनयः सर्व एव ते ॥ विपुलाः स्निग्धवर्णाश्च स्ववर्गपरिपालकाः ॥ अ
थैषां स्ववर्गमाह ॥ ॥ गन्धर्वदेवदानवमन्त्रौषधिसिद्धयक्षनागानाम् ॥ पीडाकरो मरीचिर्ज्ञेयो विद्याधराणां
च ॥ शकयवनदरदपारदकाम्बोजांस्तापसान्वनोपेतान् ॥ हन्ति वसिष्ठोऽभिहतो विवृद्धिदो रश्मिसम्पन्नः ॥
अङ्गिरसो ज्ञानयुता धीमन्तो ब्राह्मणाश्च निर्दिष्टाः ॥ अत्रेः कान्तारभवा जलजान्यम्भोनिधिः सरितः ॥ रक्षःपि

शाचदानवदैत्यभुजङ्गाः स्मृताः पुलस्त्यस्य ॥ पुलहस्य तु मूलफलं क्रतोस्तु यज्ञाः सयज्ञभृतः ॥ ॥ गन्धर्वदेवदानवे
ति ॥ गन्धर्वा अश्वमुखा नरदेवयोनयः ॥ देवाः सुराः ॥ दानवा दनुपुत्राः ॥ मन्त्रा ओषधयः ॥ यक्षा नागाः एते
षां सर्वेषां तथा विद्याधराणां देवयोनीनां मरीचिरेव तत्पीडाकरः ॥ वनयोपेतान् वनस्थानेतान् वसिष्ठोऽभि
हत उपतप्तो हन्ति ॥ रश्मिसंपन्नो निरुपद्रुतो विवृद्धिदो वृद्धिप्रदः ॥ अङ्गिरसो ज्ञानिनो दृष्टाः कथिताः ॥ अत्रेरिति ॥
कान्तारं महदवी तत्र भवो जन्म येषां ते कान्तारभवाः ॥ जलजानि जलोत्थानि द्रव्याणि जायन्ते ॥ अम्भोनिधिः समु
द्रः ॥ सरितो नद्यः एतेऽत्रेः ॥ रक्षःपिशाचेति ॥ राक्षसाः पिशाचा दानवा दैत्याः भुजङ्गाः सर्पाः ॥ एते स्मृताः
कथिताः ॥ पुलस्त्यस्य मूलफलं यत्किञ्चित् ॥ पुलहस्य यज्ञा यज्ञभृतो यज्ञकर्तारश्च सहयोगाः क्रतोरिति
॥ तथा च वृद्धगर्गः ॥ देवदानवगन्धर्वाः सिद्धपन्नगराक्षसाः ॥ नागा विद्याधराः सर्वे मरीचेः परिकीर्तिताः ॥
यवनाः पारताश्चैव काम्बोजा दरदाः शकाः ॥ वसिष्ठस्य विनिर्दिष्टास्तापसा वनमाश्रिताः ॥ धीमन्तो ब्राह्मणा
श्चैव ज्ञानविज्ञानपारगाः ॥ लावण्यरूपसंयुक्ता मुनेरङ्गिरसः स्मृताः ॥ कान्तारजास्तथाम्भोजा अत्रेर्ये समुपा
श्रिताः ॥ पिशाचा दानवा दैत्या भुजङ्गा राक्षसास्तथा ॥ पुलस्त्यस्य विनिर्दिष्टाः पुष्पमूलफलं च यत् ॥ तत्स
र्वं पुलहस्योक्तं यज्ञा यज्ञभृतश्च ये ॥ क्रतोरेवानुनिर्दिष्टा देवता ब्राह्मणास्तथा ॥ ॥ श्री ॥ इति श्रीभट्टोत्पल
विरचितायां संहिताविवृतौ सप्तर्षिचारो नाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ छ ॥ ॥ वराहमिहिराचार्य
ग्रहचारो दधोद्धृत ॥ अर्थितामल्पकश्चक्रे स्पष्टां यो विवृतिं स्फुटं ॥ इति ग्रहचारः समाप्तः ॥ ॥ अथ कूर्मा
ध्यायो व्याख्यायते ॥ तत्रादावेव तत्त्वविभागमाह ॥ ॥ नक्षत्रत्रयवर्गैराग्नेयाद्यैर्व्यवस्थितैर्नवधा ॥ भारत
वर्षे मध्यात् प्रागादिविभाजिता देशाः ॥ नक्षत्रत्रयस्य भवर्गः तैर्नक्षत्रत्रयवर्गैः आग्नेयाद्यैः कृत्तिकादिभिर्नव
धा नवभिः प्रकारैर्व्यवस्थितैः भारतवर्षं मेरोर्दक्षिणभागो भारतवर्षं ॥ तत्र व्यवस्थिताः ॥ तत्र मध्यभागादि
क्रमाद्विभाजिताः देशाः मध्यदेशो मध्यभागो भारतवर्षस्य देशाः प्रागादेः पूर्वादेः क्रमेण विभाजिता नवभागे
न कल्पिताः वक्ष्यमाणविधानेनेति ॥ तथा च गर्गः ॥ कृत्तिकाद्यैस्त्रिनक्षत्रैर्भवर्गैर्नवभिः स्थितैः ॥ कल्पिता

भा॰ सं॰

९९

मध्यदेशोऽस्थितःकाशीगोदाहिकोदंति॥ पूर्वांसापार्श्वाः पूर्वदक्षिणं॥ आर्यण्यासातथाबाम्यांस्यात्याबाहुर्दक्षिणे
परा॥ऽधेयाधःपश्चिमामाशांवेश्याप्रश्चापरोभगं॥ वारुणाबाहुंतिसौम्यांपाम्यामाद्यःश्मतिनादिशामिति॥ अथ
देशेदेशेनविभागमाह॥ भद्रारमेदपांड्यशाल्वनीपोज्जिहानसंख्यानाः॥ मरुवत्सघोषयामुनसारस्व
तमध्यमिका॥ माथुरकोपाज्योतिषधर्मारण्यानिसरसेनाश्च॥ गौरग्रीवादेहिकपांडुगुडाश्वत्थपांचालाः॥ सा
केतकंककुरुकालकोटिकुकुराश्चपारियात्रनगाः॥ उदुंबरकापिष्ठलवज्जिह्वयाश्चेतिमध्यमिदं॥ एतेदेशा
मध्यदेशाःप्रधानाःपरिगणिताःसर्वेषुकृत्तिकादिनक्षत्रत्रितयं॥ तद्यथा॥ देशांतेषुजनपदोभद्राअ
रिमेदामांडव्याः॥ शाल्वनीपाउज्जिहानाःसंख्याताःमरुभूःवत्साघोषादेशविशेषाः॥ यामुनाःसारस्व
ताःमत्स्यमध्यमिकामाथुराउपज्योतिषाधर्मारण्यंपुण्यक्षेत्रंसूरसेनागौरग्रीवाउद्देहिकाःपांडुगुडाः॥ अश्व
त्थाःपांचालाःसाकेतोदेशःकंकाःकुरवःकालकोटिकुकुराश्च॥ पारियात्रोनगःपर्वतः॥ उदुंबराःकापिष्ठलाग
जाह्वयोहस्तिनपुरं॥ इत्येवंप्रकारेणमध्यमिदंमध्यदेशविभागइत्यर्थः॥ तथाचभगवान्पराशरः॥ चत्वा
रिंशत्सहस्रयोजनसहस्रंजंबुद्वीपः॥ तत्रपूर्वापरपश्चिमार्णवमवगाढाः॥ षण्महागिरयः हिमवान्हेमकूटो
निषधोनीलःश्वेतःश्रृंगवांश्च॥ शतसहस्राणामितरेषांषष्टिसहस्राणिकांचनमयानांगिरीणांचत्वा
रिंशन्महांतःचत्वारउदधयः॥ कुनदीनांषट्सहस्राणिग्रामसहस्राणांचमनुष्याविकर्षंति॥ एकनवतीराज्यानांएको
नशतंकुराजानां॥ दशलक्षंगव्यानिमरुतोष्णविंशतिकुठास्तावंतिएवद्वीपाः॥ पंचजनपदसहस्राणितत्रवृ
त्तिकादीनित्रीणिमध्यदेशोऽस्मिन्वर्षेभवंति॥ आर्द्रादीनित्रीणिवर्ज्यं॥ क्रमात्पूर्वादिषुअष्टासुदिक्षुनक्ष
त्रेषुउपसृष्टेषुजनपदादीनांउपद्रवानामुपतापोभवति॥ विशेषतःसूरसेनमगधकलिंगावंतिसौवी
रसैंधवभारभूतिमद्रकुणिंदाधिपतीनां॥ अतःपरंदिक्जनपदांस्तुव्याख्यास्यामः॥ अथमध्यदेशोआ
र्यावर्तइतिचआख्यायतेतत्रजनपदाः॥ सूरसेनोद्देहिकगुडाःअश्वत्थपकांचनकौलतमात्यौतिभद्रारि
मेदमध्यमिकसाल्वसाकेतमत्स्यकपिष्ठलउज्जिहानमांडव्यपांडुनगरगौरग्रीवपारियात्रकुकुरयामुनचस्या ९९

मुनगजाह्वकोज्जिहानकालकोटिमाथुरोनरदक्षिणपांचालकुरुक्षेत्रधर्मारण्यसारस्वताः॥ ॥ अथपूर्वस्यांदि
शिदेशान्जनपदानाह॥ तत्रअंजनवृषभध्वजपद्ममाल्यवानगिरयः॥ व्याघ्रमुखसुह्मकर्वटचांद्र
पुराःसूर्पकर्णाश्च॥ खसमगधसंसविरगिरिमिथिलासमतटौंड्राश्ववदनदंतुरकाः प्राक्ज्योतिषलौहित्य
क्षीरोदसमुद्रःपुरुषादः॥ उदयगिरिभद्रगौरकपौंड्रोत्कलकाशिमेकलाम्बष्ठएकपदताम्रलिप्तककौशल
कावर्धमानाश्च॥ अथानंतरंपूर्वस्यांदिशिदेशप्रविभागः॥ तद्यथाअंजनवृषभध्वजपद्ममाल्यवानएते
सर्वएवगिरयःपर्वताः॥ तथाव्याघ्रमुखाजनाःसुह्माःकर्वटाः॥ चंद्रपुरंपत्तनंतत्रभवाश्चांद्रपुराः॥ सूर्पक
र्णाजनाः॥ खसामगधश्चदेशाःशिबिरगिरिपर्वतः॥ मिथिलादेशाःसमतटोदेशःऔंड्राजनाः॥ अश्ववदना
दंतुरकाः॥ प्राक्ज्योतिषालौहित्योनदःक्षीरोदःसमुद्रः॥ पुरुषादाःपुरुषभक्षाःजनाः॥ उदयगिरिःपर्वतः॥
भद्राजनाःगौडकाःपौंड्राः॥ उत्कलाःकाशयःमेकलाःअंबष्ठाःएकपदाः॥ ताम्रलिप्ताःकौसलकावर्धमाना
श्चेति॥ एतेआर्द्रादिकेनक्षत्रत्रयेदेशाः॥ तथाचपराशरः॥ अथपूर्वस्यांमाल्यवान्शिबिरजनपदावृ
षभध्वजोदयगिरिदंतुरास्यां॥ काशिकौशलमिथिलमेकलोत्कलपुण्ड्रकवंगसमतटौड्रगौडकभद्रद्रविणसु
ह्मताम्रलिप्तप्राग्ज्योतिषवर्धमाननागिमुखांवृषपुरुषादकलिकोशानृशोणाव्याघ्रमुखकौहितइति॥ ॥
आग्नेय्यांदिशिदेशान्जनपदांश्चाह॥ आग्नेय्यांदिशिकोशलकलिंगवंगोपवंगजठरांगाः॥ शौलिकविदर्भ
वत्सान्ध्रचेदिकाश्चोर्ध्वकंठाश्च॥ वृषनालिकेरचर्मद्वीपाविंध्यांतवासिनःत्रिपुरीश्मश्रुधरहेमकूटव्या
लग्रीवाः॥ किष्किंधकंटकस्थलनिषादराष्ट्राणिपुरिकादशार्णाः॥ सहनग्नपर्णशबरैराश्लेषाद्येत्रिकेदेशाः
:॥ ॥ प्राग्दक्षिणस्यामाग्नेय्यांदिशिदेशविभागः॥ तद्यथा॥ कोशलजनाः॥ कलिंगवंगोपवंगाजठरांगा
:॥ शौलिकाविदर्भावत्साअंध्राश्चेदिकाश्च॥ ऊर्ध्वकंठाःनालिकेराः॥ चर्मद्वीपाः॥ विंध्यांतवासिनः॥ विंध्यपर्व
तेयेनिवसंति॥ त्रिपुरीनगरी॥ श्मश्रुधराजनाः॥ हेमकूटःपर्वतः॥ व्यालग्रीवाजनाःमहाग्रीवाः॥ किष्किंधोदेशा
:॥ कंटकस्थलंनिषादराष्ट्रं॥ पुरिकादशार्णाः॥ नग्नशबराःपर्णशबराः॥ एतेनागकाःसहनग्नपर्णशबरैः॥

वा॰ सं॰

९८

०नदेशा आश्लेषाद्यं नक्षत्रत्रिकं क्लेश्याः॥ तथा च पराशरः॥ अथ प्राग्दक्षिणस्यां विंध्यांतवासिनः। चेदिवत्सदशार्णो
द्रवंगाः प्लवंगकलिंगजठरपुंड्रचूलिकविदर्भनग्नपर्णशबरकाश्मीरकुपेपुरपुरिकंदकमलकन्यर्बुरपकोशलकोहल
केशात्रनर्मद्वीपः तकोंककाठकूमकुट्यालाकशीचमहाग्रीवअश्युधरनालिकेरद्वीपाकूष्मांडधातुवासिनः॥ ॥
अथ दक्षिणस्यां दिशि देशान्जनपदप्रविभागमाह॥ अथ दक्षिणेन लंकाकालाजिनसौरिकीर्णतालिकटगिरि
नगरमलयदर्दुरमहेंद्रमालिन्यभरुकच्छाः॥ कंकटकंकणवनवासिशिबिकफणिकारकोंकणाभीराः॥ आकरवेणा
वंतकदशपुरगोनर्दकेरलकाः॥ कर्णाटमहाटविचित्रकूटनासिक्यकोल्लगिरिचोलाः॥ क्रौंचद्वीपजटाधरकावेर्यो
रिष्यमूकश्च॥ वैदूर्यशंखमुक्ताअत्रिवारिचरधर्मपट्टनद्वीपाः॥ गणराज्यकृष्णवैदूर्यपिशिकशूर्पाद्रिकुसुमनगाः॥
तुंबवनकार्मणेयकयाम्योदधितापसाश्रमा ऋषिकाः॥ कांचीमरुचीपट्टनचेर्यार्यकसिंहला ऋषभाः॥ बलदेवपट्टनं
दंडकावनतिमिंगिलाशनाभद्राः॥ कच्छोथ कुंजरदरी सताम्रपर्णीति विज्ञेयाः॥ ॥अथानंतरं दक्षिणेन याम्यां
दिशि देशाः॥ तद्यथा॥ लंका कालाजिनं सौरिकीर्णा तालिकटाः दंडकावनवासिनः शिबिकाफणिकाराः॥ कोंक
णा आभीराः॥ आकरवेणा॥ यत्र सर्वद्रव्याणां परिस्थितिः क्रियते॥ वेणानदी॥ अवंतकाः दशपुरं॥ गो
नर्दाः। केरलकाः कर्णाटाः महाटविकाः। चित्रकूटपर्वतः वैदूर्यशंखमुक्तायत्रोत्पद्यंते अत्रिराश्रमस्थानं भग
वतोः वारिचराः॥ धर्मपट्टनं॥ द्वीपराणाराज्यं॥ कृष्णवेल्लूरजनाः॥ पिशिकाः॥ सूर्याद्रिः पर्वतः। कुसुमन
गः पर्वतः। तुंबवनं॥ कार्मणेयकाः सिंहलाऋषभाः बलदेवपट्टनं। दंडकावनं तिमिंगिलासनाः भद्राः कच्छः॥ अ
थानंतरं कुंजरदरी हस्तिपदा। सा च सताम्रपर्णी ताम्रपर्ण्यौन ग्रासह्लिता इत्येवं प्रकारा देशाः॥ उत्तरफाल्गुना
द्यंत्रिकंविज्ञेयास्तानव्याः॥ तथा च पराशरः॥ अथ दक्षिणस्यां विंध्यकुसुमापादर्दुरमहेंद्रसह्यचंदनमलयमा
लिन्याभवंति॥ गणमचतिदशपुरे ककच्छविवनवासीपर्गारिभद्रागिरिनगरदंडकगणराष्ट्रत्रिराज्यकं ९८
टकवनतित्रिकूसाटरकूष्यमकतापसाश्रमपंपाश्रमशंखमुक्ताप्रवालवैदूर्यकरोलककांचिवारिचराणं
वचोलकाकावारकावेरिकपासिकधर्मपट्टनतालीकटसौरिकीर्णहूकाजिनांतरतुंबवनवेषक्रालजनद्वी

Dr. BHAU DAJI MEMORIAL

पिकर्णिकारशाबिकोंकणचित्रकूटकर्णाटमहाटविकालकोल्लगिरिनासिक्यकामणियावर्धरुवोर्मिनकंवलदेव
पत्तनं क्रौंचद्वीपसिंहलपरमचोटदनमलयमरीचाचित्रकूटशंखलंकारसूर्यपर्वतऋषभकुंजरदरीमंभोगवति कृष्ण
गिरिमाल्यमाः॥ ॥अथ नैर्ऋत्यां दिशि देशाः॥ पल्हवकांबोजसिंधुसौवीराः। वडवामुखारवांबष्ठकपिलनारीमुखा
नर्ताः॥ फेनगिरियवनमार्गरकर्णप्रावेयपारशवशूद्राः॥ बर्बरकिरातखंडक्रव्यास्याभीरचंचूकाः॥ हेमगिरिसिंधुका
लकरैवतकसुराष्ट्रबादरद्रविडाः॥ स्वात्याद्ये भत्रये स्याच्च महार्णवोत्रैव॥ ॥नैर्ऋत्यां दक्षिणपश्चिमायां दिशि दे
शाः॥ तद्यथा॥ पल्हवाः कांबोजाः सिंधुसौवीरा वडवामुखं आरवाअंबष्ठाः कपिलनारीमुखा आनर्ताः॥ फेनगि
रियवनाः मार्गराः॥ कर्णप्रावेयाः। पारशवाः। शूद्राः बर्बराः किराताः। खंडाः क्रव्यास्याः आभीराः चंचूकाः। हेम
गिरि सिंधुनदः। कालकारैवतकाः। सुराष्ट्राः बादरद्रविडाः॥ अत्र च नैर्ऋत्यां दिशि महार्णवो ज्ञेयः॥ एते स्वात्याद्य
त्रिके स्वातिपूर्वके नक्षत्रत्रये विज्ञेयाः॥ तथा च पराशरः॥ अथ प्रत्यग्दक्षिणस्यां मरुभ्रमहारकसिंधुसौवी
रशूद्राभीराद्रविडकैतखंडसिंधुकाभिकवीताः॥ गिरिरैवतकनैनकपद्मयवनपल्हवमागधारांतरश्रुत्यांबष्ठ
कालाद्रकणप्रवरः॥ गिरिनिवासिन्यांतः परंमहार्णवे यत्रार्वकौ पत्रोगिनिवडवामुखइति॥ ॥अथ पश्चिमायां
दिशि देशान्जनपदांश्चाह॥ अपरस्यां मणिमान्मेघवान्वनौघः क्षुरार्पणोस्तगिरिः अपरांतकशांतिक
हैहयप्रशस्ताद्रिवोक्कणाः॥ पंचनदरमठपारततारक्षुतिजृंगवैश्यकनकशकाः॥ निर्मर्यादा म्लेच्छा ये पश्चिम
दिशि स्थितास्ते च॥ ॥अपरस्यां पश्चिमायां दिशि देशाः॥ तद्यथा॥ मणिमान्पर्वतः। मेघवान्। वनौघः क्षुरार्प
णः। अस्तगिरिः अपरांतकाः शांतिकाः हैहयाः प्रशस्ताद्रिः वोक्कणाः पंचनदाः। रमठाः पारताः तारक्षुतिजृं
भगाः। वैश्याः। कनकाः शकाः। अन्ये च ये म्लेच्छा निर्मर्यादा मर्यादरहिताः॥ पश्चिमादिक्स्थाः पश्चिमायां दिशि
वासिनः सर्वे एते त्र्यंशाद्येन क्षत्रेणालभ्याः॥ तथा च पराशरः॥ ॥अथ पश्चिमायां मणिमान्क्षुरार्पणो महावह
तायवत्रवादस्तगिरिप्रशस्तमांडव्यांपंचनदकाभिप्लवमानितारक्षुतिपारतशंखकासेव्यरमठशांगिबा
र्णवाः॥ शागुरवासिवहैहयासिंहगताकटुनपार्श्ववेतकोवाक्कणाअन्यचगिरिवनवासिनः॥ यत्त धर्मदेडम

यौधेयाः॥ लिंगकलानयः॥ अथ वायव्यां दिशि देशानाह॥ ॥दिशि पश्चिमोत्तरस्यां मांडव्यतुषारतालहलमद्रा अश्मककुलूतकलहदराज्य॥ नृसिंहवनखस्थाः॥ वेणुमती नदी फल्गुलुकगुरुहमरुवच्छचर्मरंगाख्याः॥ एकविलोचनाः शूलिकदीर्घग्रीवास्यादीर्घकेशाः॥ एते उत्तरपश्चिमे देशाः॥ तथा च पराशरः॥ अथ पश्चिमोत्तरस्यां गिरिमांद्रि वेणुमति मरुमति फल्गुलुक मांडव्यगणकनेत्रमरुकच्छतुषारतालमद्रकहलकाननचूलिकानविलोचनदीर्घकेशग्रीवास्य गाश्च रंगाविषारवशूलिकगुरुहाकुलुहा परमताः स्त्रीराज्यमिति॥ ॥अथोत्तरस्यां दिशि देशविभागमाह॥ उत्तरतः कैलासो हिमवान् वसुमान् गिरिर्धनुष्मांश्च॥ क्रौंचो मेरुः कुरवः तथोत्तराः कुरवः क्षुद्रमीनाश्च॥ कैकयवसातियामुनाभोगप्रस्थार्जुनायनाग्नीध्राः॥ आदर्शान्तर्द्वीपित्रिगर्ततुरगाननाश्वमुखाः॥ केशधरचिपिटनासिकदासेरकवाटधानशरधानाः॥ तक्षशिलःपुष्कलावतकैलावतकंठधानाश्च॥ अंबरमद्रकमालवपौरवकच्छारदंडपिंगलाः॥ माणहलहूणकोहलशातकमांडव्यभूतपुराः॥ गांधारयशोवतिहेमतालराजन्यखचरगव्यानि॥ यौधेयदासमेयाः॥ श्यामकाः क्षेमधूर्ताश्च॥ उत्तरस्यामुत्तरस्यां दिशि देशाः॥ तद्यथा॥ कैलासपर्वतः॥ हिमवान वसातयः॥ यामुनाभोगप्रस्थाः॥ केशधराश्चिपिटनासाः॥ दासेरकावाटधानाः॥ तक्षशिलाः॥ नगरी पुष्कलावति कैलावति॥ कंठधानाअंधराजनाः॥ मद्रकामालवाः पौरवाः॥ कच्छाः दंडपिंगलकाः॥ माणहलाः॥ हूणाः॥ कोहलाः शातकाः मांडव्याः॥ भूतपुराः गांधाराः॥ यशोवती नगरी॥ हेमताला राजन्याः खचराः गव्याः॥ यौधेयाः दासमेयाः॥ श्यामकाः॥ क्षेमधूर्ताः॥ एतेशतभिषगाद्येनक्षत्रत्रये देशाः॥ तथा च पराशरः॥ ॥अथोत्तरस्यां हिमवान्क्रौंचमधुमान् कैलासो वसुमान् उत्तरोत्तरायामनुत्तरायां॥ मद्रपौरवयौधेयमालवसुरसेनराजन्यार्जुनायनत्रिगर्तकैकयक्षुद्रमांडव्यकमरुवसातिदर्भफलांधलप्रस्थाः॥ क्षेमधूर्तशकलहदासधानदन्यशरदंडमध्यशरधानादासेरकधामांतर्द्वीपगांधारवाटधानुलक्षशिलाल्पवनतिपुष्कलावतियशोवतिभूतिमतश्यामकखचरकोहलजनरसरभूतिपुरकिरातकाः॥ देशांतराद्रर्शपिंगलमांडव्यपापुनेयमालहलहूणाः॥ हिमवान्क्रौंचमुखद्विमवनवसुमंतकैलासकौंजानपरमजनमिति॥ ॥अथैशान्यां सविभागमाह॥ ऐशान्यां मेरुकनष्टराज्यपशुपाल

कीरकाश्मीराः॥ अभिसारदरदतंगणकुलूतसैरिंध्यवनराष्ट्राः॥ ब्रह्मपुरदार्वडामरवनराज्यकिरातचीनकौणिंदाः॥ भल्लपलोलजटासुरकुनटखसघोषकुचिकाख्याः॥ एकचरणानुविश्वासुवर्णभूवसुधराद्यं पशुपालाः॥ कीराः काश्मीराः॥ अभिसाराः॥ दरदाः॥ तंगणाः कुलूताः॥ सैरिंध्राः॥ वनराष्ट्राः ब्रह्मपुरं दार्वाडाः॥ डामरवनराज्यं॥ किराताः चीनाः॥ कौणिंदाः॥ भल्लपलोलाः जटासुराः॥ कुनटाः खसाः घोषाः॥ कुचिकाख्याः॥ एकचरणाः अनुविश्वाः॥ सुवर्णभूः॥ वसुधनं॥ दिविष्ठाश्च॥ पौरवाः चीरवासाः॥ निवसनाः॥ त्रिनेत्राः॥ मुंजाद्रिः॥ गांधर्वाः॥ एते रेवत्याद्यास्त्रिके देशाः॥ तथा च पराशरः॥ अथ प्रागुत्तरस्यां कौलूतब्रह्मपुरकुणिंददरदाभिसारमांडवनपराज्यवनराष्ट्रकेमंडकेदभल्लसिंहपुरचामरतंगणसार्पकपार्वतककाश्मीरदरददाभिसारकुटामुरपलोलकीरघकुचित्रमकिरातपशुपालचीनसुवर्णभूमिदेशाळ्लंदेश्यानि॥ एतेषां चार्येण समाससंहितायां स्पष्टतरमुक्तं॥ तथा च तत्र यमाग्नेयाद्यं मध्यं प्राक्प्रभृति च दक्षिणतः कथयामि प्रविभागं प्रागादिदेशानां॥ मध्यमदेशः पाञ्चालं गायगानं तरं क्षेत्रं॥ उदगपि चेपारत्याश्रामरुमत्स्याख्योध्यामथुराश्च॥ सारस्वतयामुनाचागमवद्योषप्रसंख्यानानीपमांडव्याः॥ मद्रादिमध्ये नैमिषशाल्वोपज्योतिषास्वस्थाः॥ ॥उदुंबरोम्यककुरागलिज्ञानगजसाव्हकंकणंन्हगदाः॥ मध्यमो देहिककालकोटिकापिष्टलास्सीति॥ मध्ये प्रविभागः शेषक्षोणि यथादिशं देशान्॥ आख्यातदेशांमध्यानन्यांश्चैवाभिदास्यामि॥ आद्रीदिकाद्रिक्रोसलमिथिलोत्कलवर्धमानपौंड्रधाः॥ कौहूयमगधसमतरमेकलकांबश्ताम्रलिप्ताख्याः॥ आश्लेषाद्येत्रिपुरानिषादराष्ट्राणि वदकदशार्णाः॥ शूलिकविंध्यातळीवत्सांबुविदर्भकालिंगाः॥ आर्यम्णाद्ये चेदिककोंकणवनवासिकर्णगिरिमलयाः॥ उज्जयिनीमरुकच्छेशाग्याम्याणंवोयावत॥ स्वात्यादौ सिंधुसौवीरकौंकणवनिताम्यमार्गरानर्ताः॥ बर्बरयवनसुराष्ट्राःकांबोजद्रविडेवनकाः॥ निमर्यादाः म्लेच्छाः शांतिकाश्चाक्षाणवेघाश्च॥ विश्वेश्वरादि शूलिकतालखारएकनेत्रमांडव्याः॥ स्त्रीराज्यचर्मरंगाश्मककुरुहराहूरकफल्गुलुकाः॥ शतभिषगाद्ये केकयगांधारदर्शग्रामुन्नीयाः॥ दासेयचिपिटनासार्जुनायनमद्रपिंगलकाः॥ बाबाधेकाशेनरदरदाभिसारचीनखसमानं॥ गणकिरातकाराब्रह्मपुरज्ञपुराश्चेति

॥ तत्फलमाह ॥ वर्गैराग्नेयाद्यैः क्रूरग्रहपीडितैः क्रमेण नृपाः ॥ पांचालो मागधः कालिंगश्च क्षयं यांति ॥ आवंतोऽथान
र्तो मृत्युं चायांति सिंधुसौवीरः ॥ राजा च हारहौरो मद्रेशोऽन्यश्च कौणिंदः ॥ आग्नेयाद्यैः कोणैः वर्गैः क्रूरग्रहपीडितै
ः ॥ क्रूरैरादित्यांगारकशनैश्चरैः ॥ पीडितैः क्रमेण पश्चिमाद्याः ॥ एते नृपा राजानः क्षयं नाशं यांति गच्छंति ॥ तद्यथा ॥
शालिकादिर्वर्गः पांचालाः ॥ आर्द्राद्ये मिथुमार्दागि मरणं यांति आनर्ताः ॥ उत्तराषाढाद्ये राजा हारहौराः ॥ शतभिष
गाद्ये मद्रेशेन मद्राधिपतिः ॥ रेवत्याद्ये न्यश्चान्यः परः कौणिंद इति ॥ ॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृ
तौ कूर्मविभागो नाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ ॥ अथ नक्षत्रव्यूहो व्याख्यायते ॥ कस्मिन्नक्षत्रे क
पदार्था आश्रिताः ॥ इत्येतद्यत्र निरूप्यते स नक्षत्रव्यूहः ॥ तत्रादावेव कृत्तिकायामाह ॥ आग्नेये सितकुसुमानि आहि
ताग्निः ॥

आहिताग्निर्येन अग्नित्रयोपचारकः मंत्रज्ञाः मंत्रविदः ॥ एवं सूत्रज्ञाः यज्ञशास्त्रविदः ॥ भाष्यज्ञाः आकरः अर्थो
त्पत्तिस्थानं ॥ तत्र नियुक्ता आकरिकाः ॥ नापितः श्मश्रुकर्मकरः ॥ द्विजा ब्राह्मणाः । घटकारः । कुंभकारः ॥ पुरोहितः पु
रोधाः ॥ अब्दज्ञो ज्योतिषिकः ॥ एते आग्नेये कृत्तिकायां समाश्रिताः ॥ ॥ अथ रोहिण्यामाह ॥ रोहिण्यां सुव्रतपण्य
भूधरनियोगयुक्तशाकटिकाः ॥ गोवृषजलचरकर्षकशिलोच्चयैश्वर्यसंपन्नाः ॥ ॥ सुव्रताः सुपथ्येव्रतयः ॥ भूपा
राजानः । धनिनः । योगयुक्ता योगरताः ॥ शाकटिकाः शकटाजीविनः । गावः वृषा दांताः । जलचरा प्राणिनः । कर्षका
ः कृषिकराः । शिलोच्चयाः पर्वताः ॥ ऐश्वर्यसंपन्ना ऐश्वर्ययुक्ताः ॥ एते रोहिण्यां ॥ ॥ अथ मृगशिरस्याह ॥
मृगशिरसि वस्त्राब्जकुसुमफलरत्नवनचरविहंगाः ॥ मृगसोमपायिगांधर्वकामुकालेखहाराश्च ॥ ॥ सुरभीणि
गंधद्रव्याणि । वस्त्राण्यंबराणि । अब्जं यत्किंचित्जलोद्भवं ॥ कुसुमानि पुष्पाणि । फलानि सुप्रसिद्धानि आम्रा
दीनि । रत्नानि इंद्रनीलप्रभृतीनि ॥ वनचराः । वनवासिनः । विहंगाः पक्षिणः । मृगा आरण्यप्राणिनः ॥ सोमपी
थिनः सोमपाः ॥ गांधर्वा गेयज्ञाः ॥ कामुकाः कामिनः । लेखहारा लेखवाहकाः ॥ एते सर्वे मृगशिरसि ॥ ॥ अथा
र्द्रायामाह ॥ रौद्रे वधबंधानृतपरदारस्तेयशाठ्यभेदरताः । तुषधान्यतीक्ष्णमंत्राभिचारवेतालकर्मज्ञाः ॥ ११०

वधरता ये प्राणिनां वधं कुर्वंति ॥ शठः परकार्यविमुखः । तथा चोक्तं ॥ मनसान्यद्वचसान्यत् यश्चान्यद्यते कार्यं तत्परः ॥ क
र्मणा विपरीतश्च स शठः सद्भिरुच्यते ॥ तस्य भावः शाठ्यं तत्र ये रताः ॥ अनृतरता असत्यभाषिणः । परदाररताः
परस्त्रीसक्ताः । स्तेयरताश्चौराः । एकीभूतानां पदार्थानां पृथक्करणं भेदः तत्र ये रताः । तुषधान्यं शालयः ॥ ती
क्ष्णाः क्रूराः । मंत्रज्ञा मंत्रविदः । अभिचारज्ञाः वशीकरणादिकर्मविदः । वेतालकर्मज्ञाः । वेतालोत्थापनविद्याभि
भिज्ञाः ॥ एते सर्वे रौद्रे आर्द्रायां ॥ ॥ अथ पुनर्वस्वाह ॥ आदित्ये सत्यौदार्यशौचकुलरूपधीयशोऽर्थयुताः ॥ उत्तम
धान्यानि वणिजः सेवाभिरताः सशिल्पिजनाः ॥ सत्ययुताः सत्यभाषिणः । औदार्ययुता दानशीलाः ॥ शौचरताः शु
द्धाः परधनादिष्वलुब्धाः ॥ कुलयुक्ताः कुलीनाः । रूपयुताः सुरूपाः । धीयुता बुद्धिमंतः । यशोयुता यशस्विनः ॥ उ
त्तमधान्यादि कलमशाल्यादि ॥ वणिजः किराटाः । सेवाभिरताः सेवकाः । तच्छिल्पिजनाः शिल्पि कुंभकारशिल्पि
भिः सहिताः ॥ एते सर्वेऽपि आदित्ये पुनर्वसौ ॥ ॥ अथ पुष्ये त्वाह ॥ पुष्ये यवगोधूमाः शालीक्षुवनानि मंत्रि
णो भूपाः ॥ सलिलोपजीविनः साधवश्च यज्ञेष्टिसक्ताश्च ॥ यवगोधूमाः । शालयो धान्यानि ॥ इक्षवः । वनानि
अरण्यानि ॥ मंत्रिणः सचिवाः । भूपा राजानः । सलिलोपजीविनः ॥ सलिलं जलं ये उपजीवंति ॥ तेने यार्जनं ये कु
र्वंति । धीवरप्रायाः । साधवश्च सज्जनाः ॥ यज्ञसक्ताः यागेष्वनुरताः ॥ इष्टयः पुत्रकाम्यादयः ॥ तासु ये सक्तानि
रताः । एते सर्वे एव पुष्ये ॥ ॥ अथाश्लेषायामाह ॥ अहिदैवे कृत्रिमद्रव्याणि यानि मुक्ता क्रियंते ॥ यन्मूलमेव बीजं स
कंदकः ॥ केचिदभिनवांकुरमित्याहुः ॥ ॥ मूलानि प्रसिद्धान्येव ॥ कीटाः कृमिजातयः । पन्नगाः सर्पाः ॥ विषं प्रसिद्धं
॥ परधनहरणे ये निरताः सक्ताः । तुषधान्यं शालयः ॥ सर्वभिषजो निःशेषाः कायचिकित्सकाः ॥ शालाक्य
शालाकिकाः ॥ कायचिकित्सादयः ॥ एते सर्वेऽहिदैवे आश्लेषायां ॥ ॥ अथ मघायामाह ॥ पित्र्ये धनधान्या
ढ्या विजशालिबहुलाः ॥ कोष्ठागाराण्यावलंबि ग्रामाः पर्वताश्रयिणः ॥ पर्वतवासिनः । पितृभक्ताः पितॄणां प्र
ज्ञाने रताः ॥ वणिजः क्रयविक्रये निरताः ॥ शूराः संग्रामप्रियाः । क्रव्यादा मांसाशिनः पक्वमपक्वं मांसं भक्षं
ति ॥ स्त्रीद्वेष्या ये मनुजा मनुष्याः ते सर्वे एव पित्र्ये मघायां ॥ ॥ अथ पूर्वफाल्गुन्यामाह ॥ प्राक्फाल्गुनीषु

नरवयुवतिसुभगगांधर्वशिल्पिपण्यानि। कार्पासलवणमाक्षिकतैलानि कुमारकाश्चापि॥ ॥नरा येन्द्रयंति॥
वा. सं. युवतयः स्त्रियः। सुभगाः सर्वजनवल्लभाः। गांधर्वा गेयज्ञाः। शिल्पिनः चित्रपुस्तकरप्रभृतयः। पण्यं यत्किंचित्क
यद्रव्यं। कार्पासः प्रसिद्धः। लवणं सैंधवं। माक्षिकं क्षौद्रं। तैलं तिलतैलं। एतानि। तथा कुमारकाः बालकाः। एते स
१०१ र्वएव पूर्वफाल्गुन्यां॥ ॥अथोत्तरफल्गुन्यामाह॥ आर्यवमार्दवशौचविनयपाखंडिदानशास्त्ररताः। शोभ
नधान्यमहाधनकर्मानुरताः समनुजेंद्राः॥ ॥मार्दवरताः मृदुस्वभावसमेताः। शौचरताः शुद्धाः। परधनादि
लुब्धाः। विनयरताः। विनयवंतः। नीतिज्ञाः। पाखंडिनो वेदबाह्याः। तेषु ये रताः सक्ताः। दानरता दानसक्ताः। शा
स्त्ररताश्च। शोभनं धान्यं कलमशाल्यादि। महाधनं अतिधनाः। कर्मानुरताः कर्मसु अतिसक्ताः। तेच समनुजें
द्राः। मनुजेंद्रैः नृपैः सहिताः। एते सर्वएव आर्यम्णो उत्तराफाल्गुन्यां॥ ॥अथहस्तेप्याह॥ हस्ते तस्करकुंज
ररथिकमहामात्रशिल्पिपण्यानि। तुषधान्यंश्रुतयुक्तावणिजस्तेजोयुताश्चात्र॥ ॥तस्कराः चौराः। कुंजराः हस्तिनः
रथिकाः रथेन गंत्र्यादिना ये गच्छंति। महामात्रा हस्तिसाधनपतयः। शिल्पिनश्चित्रकरप्रभृतयः। पण्यं यत्किंचि
द्विक्रेयं। तुषधान्यं शालयः। श्रुतयुक्ताः श्रुताभिरताः। वणिजः क्रयविक्रयाभिरताः। तेजोयुक्ताः तेजस्विनः। अत्रा
स्मिन् हस्ते सर्वएव एते॥ ॥अथ चित्रायामाह॥ त्वाष्ट्रे भूषणमणिरागलेख्यगांधर्वगंधयुक्तिज्ञाः। गणितपटु
तंतुवायाः शालाक्या राजधान्यानि॥ भूषणानि अलंकरणादीनि। कुशलाः मणिलक्षणज्ञाः। बहुभिर्मिश्रितैः। विस्त
तं सुगंधिद्रव्यं येउत्पादयंति। गणितपराः गणितदक्षाः। तंतुवायाः कोलिकाः। शालाक्या अक्षिरोगचिकित्स
काः। राजधान्यं राजयोग्यं यद्धान्यं षष्टिकादि। एतत्सर्वं त्वाष्ट्रे चित्रायां॥ ॥अथ स्वात्यामाह॥ स्वातौ खगमृग
तुरगवणिग्धान्यानि वातबहुलानि। अस्थिरसौहृदलघुसत्वतापसाः पण्यकुशलाश्च॥ खगाः पक्षिणः। मृ
गा आरण्यप्राणिनः। तुरगा अश्वाः। वणिजः क्रयविक्रयाभिरताः। धान्यानि शालयः। वातबहुलानि चणक १०१
प्रभृतीनि। अस्थिरमित्राः लघुसत्वा अल्पसत्वाः। तापसास्तपोनिरताः। पण्येकुशलाः। केचित् वन्यकुशलाः इति प
ठंति। वने भवा वन्यास्तेषु कुशलाः। एते सर्वएव स्वातौ॥ ॥अथ विशाखायामाह॥ ऐंद्राग्निदैवते रक्तपुष्प

फलशाखिनः। सतिलमुद्गकार्पासमाषचणकाः। पुरंदरहुताशभक्ताश्च॥ रक्तान्वितकुसुमा रक्तफलाश्च ये
शाखिनो वृक्षाश्च ते। सतिलमुद्गाः तिलैर्मुद्गैः सहिताः। कार्पासाः प्रसिद्धाः। माषाश्चणकाः प्रसिद्धा एव। ये पुरंद
रस्येंद्रस्य हुताशनस्याग्नेर्भक्ता अनुरक्ताः। एते सर्वएव ऐंद्राग्न्यां विशाखायां॥ ॥अथानुराधामाह॥
मैत्रे शौर्यसमेता गणनायकसाधुगोष्ठियानरताः। ये साधवश्च लोके सर्वं च शरत्समुत्पन्नं॥ शौर्यसमेता
बलसमेता बलसंयुक्ताः। गणनायकाः गणप्रधानाः। साधूनां ये रताः। गोष्ठीरता नर्मसक्ता हास्यरताः। यान
सक्ताः गमनसक्ताः। ये च लोके जनपदे साधवः सज्जनाः। शरत्समुत्पन्नं शारदं सर्वं सस्यं यत्किंचित् धान्यादि
एतन्मैत्रे अनुराधायां॥ ॥अथज्येष्ठायामाह॥ पौरंदरे तिशूराः कुलवित्तयशोन्विताः परस्वहृतः। विजिगी
षवो नरेंद्राः सेनानां चापि नेतारः॥ अतिशूराः अतिसंग्रामधीराः॥ कुलेन अभिजनेन वित्तेन धनेन यशसा
कीर्त्या चये अन्विताः। सहिताः परस्वहृताः परधनहर्तारः। सेनापतयः। ते सर्वएव पौरंदरे ज्येष्ठायां॥ अथ
मूलेप्याह॥ मूले भेषजभिषग्गणमुख्याः कुसुममूलफलवार्ताः। बीजान्यतिधनयुक्ताः॥ ॥फलकुसुमै
र्येचवर्तंते॥ भेषजं औषधं। भिषजो वैद्याः। गणमुख्याः गणसमूहप्रधानाः। कुसुममूलफलवार्ताः॥ ॥
कुसुमानि पुष्पाणि मूलानि फलानि वार्ता वृत्तिर्येषां। बीजानि सर्वाणि यानि उप्यंते। ये चातिधनयुक्ताः प्रभूतवित्त
समन्विताः। ये च फलकुसुमैर्वर्तंते जीवंति। ते सर्व एव मूले॥ ॥अथ पूर्वाषाढायामाह॥ आप्ये मृदवो जलमार्गगा
मिनः सत्यशौचधनयुक्ताः। सेतुकरवारिजीवकफलकुसुमान्यंबुजानि॥ मृदवो मार्दवज्ञाः। जलमार्गगामिनः जलमा
र्गेण ये गच्छंति। ते जलमार्गिणः। धाराजलप्राणिनश्च। सत्ययुक्ताः सत्यभाषिणः। शौचयुक्ताः परधनादिषु
अलुब्धाः। धनयुक्ता ईश्वराः। सेतुकराः सेतुं ये कुर्वंति। वारिजीवकाः वारिणा जलेन ये जीवंति। तेन चार्थार्जनं
कुर्वंति। यानि चांबुजानि जलसंभूतानि फलानि कुसुमानि च। ते सर्वएव आप्ये पूर्वाषाढायां॥ अथोत्तराषाढ
यामाह॥ विश्वेश्वरे महामात्रमल्लकरितुरगदेवसक्ताः। स्थावरयोधा भोगान्वितश्च। ये चौजसा युक्ताश्च
महामात्राः हस्तिसाधनपतयः॥ ॥मल्लाः बाहुयुद्धज्ञाः। करिणो हस्तिनः। तुरगा अश्वाः। देवतासक्ताः स्थावरा

दक्षादयः॥ योधायुधकुशलाः। भोगान्विता भोगसमेताः॥ येनरानार्इर्ससायुताः॥ तेजस्विनः। ते सर्वएव वैश्वे उत्तरा
बा॰ संहि॰ षाढायां॥ ॥अथश्रवणआह॥ श्रवणे मायापटवो नित्योद्युक्ताश्च कर्मसु समर्थाः॥ उत्साहिनः सधर्मा भागवताः सत्य
धर्माश्च॥ मायापटवो मायाविनः। प्रपंचकुशला नित्योद्युक्ताः॥ सर्वकालं सोद्यमाः॥ सर्वव्यापारादिषु उत्सुकाः समर्थाः
१०२ उत्साहिनः सोत्साहाः॥ सधर्माधर्मसंयुक्ताः॥ भागवता भगवद्भक्ताः॥ सत्यवचनाः सत्यभाषिणः॥ एते सर्व एव श्र
वणे॥ ॥अथधनिष्ठायामाह॥ वसुभे मानोन्मुक्ताः क्लीबाश्चलसौहृदाः स्त्रियां द्वेष्याः॥ दानाभिरता बहुवित्तसं
युताः शमपराश्च नराः॥ मानोन्मुक्ता मानवर्जिताः॥ निरहंकाराः। क्लीबाः। चलाश्चलसौहृदाः॥ अस्थिरचित्ताः। स्त्रि
यां द्वेष्याः॥ स्त्रीणामप्रियाः॥ दानाभिरताः दानशीलाः॥ बहुवित्तसंयुताः प्रभूतधनान्विताः॥ येच नरा मनुष्याः॥
एते सर्वएव वसुभे धनिष्ठायां॥ ॥अथशतभिषजआह॥ वरुणेशे पाशिकमत्स्यबंधजलजानि। जलचराजी
वाः सौकरिकरजकशौण्डिकशाकुनिकाश्चापि वरुणेशे॥ पाशैर्ये जीवान् बध्नंति ते पाशिकाः॥ मत्स्यबंधजानि मत्स्या
नां मीनानां च घातिनः॥ जलजानि जलोद्भवानि सर्वाणि द्रव्याणि मुक्तापुष्पादीनि॥ जलजीवाः जलचरैः जीवंति मत्स्यादिभि
र्ये जीवंति ते॥ सौकरिकाः सूकराणां ये बध्नंति॥ रजकाः वस्त्ररागकर्तारः॥ शौण्डिकाः पानासक्ताः॥ शाकुनिकाः शकु
नान् घ्नंति शाकुनिकाः पक्षिघातकाः॥ एते सर्वएवास्मिन् वर्गे वरुणेशे शतभिषजि॥ ॥अथपूर्वभद्रपदाया
माह॥ आजे तस्करपशुपालहिंस्रकीनाशनीचशठचेष्टाः॥ धर्मव्रतैर्विरहिता नियुद्धकुशलाश्च ये मनुजाः॥ तस्क
राश्चौराः। पशुपालाश्छागादिपशुरक्षितारः॥ हिंस्राः क्रूराः। कीनाशाः कृपणाः॥ नीचा अधर्मकर्मरताः। शठचे
ष्टाः शठः परकार्यविमुखः॥ शठस्येव चेष्टा येषां ते शाठ्यशीलाः बाहुयुद्धज्ञाः दुश्चेष्टाः॥ धर्मव्रतैर्विरहिताः॥ व्र
तैः कृच्छ्रचान्द्रायणादिभिर्वर्जिताः॥ ये मनुजा मनुष्याः नियुद्धकुशलाः बाहुयुद्धज्ञाः॥ एते सर्वएवाजपूर्व
भद्रपदायां॥ ॥अथोत्तरभद्रपदायामाह॥ अहिर्बुध्न्ये विप्राः क्रतुदानतपोयुता ------ १०२
क्रतुर्यज्ञः। दानं सत्पात्रेषु॥ अर्थापादानां॥ तपो व्रतानुसेवनं॥ एते युताः॥ महाविभवाः अत्यैश्वर्ययुताः॥ आश्र
मिणः। चतुर्थाश्रमिणः। पाखंडा वेदबाह्याः॥ नरेश्वरा राजानः॥ सारधान्यं श्रेष्ठान्नं शालयः॥ एतत्सर्वमहिर्बुध्न्ये उत्त

रभद्रपदायां॥ ॥अथरेवत्यामाह॥ पौष्णे सलिलजफलकुसुमलवणमणिशंखमौक्तिकाब्जानि। सुरभिकु
सुमानि गंधा वणिजो नौकर्णधाराश्च॥ ॥सलिलजानि जलोद्भवानि यानि द्रव्याणि मृणालादीनि यानि च फलानि।
तथा कुसुमानि पुष्पाणि। लवणं सैंधवं। मणयो रत्नानि॥ शंखाः प्रसिद्धाः मौक्तिकं मुक्ताफलानि॥ अब्जानि पद्म
जातयः। सुरभिगंधद्रव्यं॥ कुसुमानि पुष्पाणि॥ अथ सुरभीणि सुगंधीनि पुष्पाणि। गंधाः सुगंधिद्रव्याणि॥ व
णिजः क्रयविक्रयिणः। नौकर्णधारा नाविकाः। एते सर्वएव पौष्णे रेवत्यां॥ ॥अथाश्विन्यामाह॥ अश्विन्या
मश्वहराः सेनापतिवैद्यसेवकास्तुरगाः॥ तुरगारोहाश्च वणिजो रूपोपेतास्तुरगरक्षाः॥ ॥अश्वहराः अश्वग्रा
हकाः॥ सेनापतयश्चमूनाथाः॥ वैद्याः कायचिकित्सकाः॥ वणिजः किराटाः क्रयविक्रयनिरताः। रूपोपेताः सु
रूपाः॥ तुरगरक्षाः तुरगपतयः। एते सर्वएव अश्विन्यां॥ ॥अथभरण्याह॥ याम्ये सृक्पिशितभुजः क्रूरव
धबंधताडनासक्ताः॥ तुषधान्यं नीचकुलोद्भवा विहीनाश्च सत्वेन॥ असृक् रक्तं। पिशितं मांसं॥ भुंजते सृक्पि
शितभुजः॥ रक्तमांसादाः। क्रूरा उग्राः॥ वधबंधताडनासक्ताः॥ वधो बंधः ताडनं मारणं कुट्टनं ये आसक्ता र
ताः॥ तुषधान्यं शालयः॥ नीचकुलोद्भवाः निःकृष्टवंशजाताः॥ ये च सत्वेन शौर्येण विहीना रहिताः॥ एते
सर्वएव भरण्यां॥ ॥अधुनाग्नेयनक्षत्राण्याह॥ ॥पूर्वात्रयं सानलमग्रजानां राज्ञां तु पुष्येण सहोत्तराणि॥
सपौष्णमैत्रं पितृदैवतं च प्रजापतेर्भं च कृषीवलानां॥ आदित्यहस्ताभिजिदाश्विनानि वणिग्जनानां प्रवदं
ति भानि॥ मूलत्रिनेत्रानिलवारुणानि भान्युग्रजातेः प्रभविष्णुतायाः॥ सौम्यैन्द्रचित्रावसुदैवतानि सेवाज
नस्वाम्यमुपागतानि॥ सार्पं विशाखा श्रवणं भरण्यश्चंडालजातेरभिनिर्दिशंति॥ ॥पूर्वात्रयं पूर्वाफाल्गुनी
पूर्वाषाढा पूर्वाभद्रपदेति। एतच्च सानलं। अनलेन कृत्तिकया सहितं॥ एतन्नक्षत्रचतुष्टयं अग्रजन्मनां ब्राह्म
णानां॥ पुष्येण सहोत्तराणि राज्ञां॥ पुष्यं उत्तरात्रयं। उत्तराफाल्गुनी उत्तराषाढा उत्तराभद्रपदेति। एतन्न
क्षत्रं क्षत्रियाणां नक्षत्रचतुष्टयं॥ मैत्रं पितृदैवतं चेति॥ मैत्रमनुराधा सपौष्णं पौष्णेन रेवत्या सहितं॥ पितृ
दैवतं मघा। प्रजापतेर्भं च॥ प्राजापत्यं नक्षत्रं रोहिणी॥ चशब्दः समुच्चये॥ एतत् कृषीवलानां वैश्यानां च

बा॰ सं॰ नुग्रयंनक्षत्राणां॥ आदित्यदैवेति। आदित्यं पुनर्वसुः। दस्रः। अभिजित्। आश्विनं अश्विनी। एतानि नक्षत्राणि वणि
क्जनानां प्रवदंति कथयंति॥ मूलं त्रिनेत्रं। आर्द्रा। अनिलं स्वाति। वारुणं शतभिषक्। एतानि नक्षत्राणि चत्वारि प्रभ
१०३ विस्मृतायाः प्रभवनशीलायाः॥ उग्रजातं क्रूरजनस्य॥ सौम्यदैवेति॥ सौम्यं मृगशिरः। ऐंद्रं ज्येष्ठा॥ चित्रा। वसुदै
वतं धनिष्ठा। एतानि चत्वारि नक्षत्राणि॥ सेवाजनस्य सेवाभिरतस्य स्वाम्यं प्रभुत्वं अगतानि अप्राप्तानि॥ सार्पम
श्लेषा॥ विशाखा श्रवणं भरणी॥ एतानि चत्वारि नक्षत्राणि नां शाठजातेः चं शाठजानामतिनिर्दिष्टानि कथयंति।
॥ ॥ उक्तव्यूहप्रयोजनमाह॥ रविरविसुतभोगमागतं क्षितिसुतभेदनवक्रदूषितं॥ ग्रहणगतमथोल्कयाहतं नि
यत मुषाकृत्पीडितं च यत॥ तदुपहतमितिप्रचक्षते॥ प्रकृतिविपर्यययात मथवा॥ निगदितपरिवर्गदूषणं कथि
तविपर्ययगतं समृद्धये॥ ॥ रविरविसुतभोगमागतमिति॥ रविरादित्यः॥ रविसुतः शनैश्चरः॥ अनयोर्कस्य
यन्नक्षत्रं भोगमागतं भोगप्राप्तं॥ क्षितिसुतो भौमः॥ तद्भेदान्मध्यगमनेनाच्छादनेन वा तद्वक्रेण वा दूषितं॥ दु
ष्टं ग्रहणगतं॥ यन्नक्षत्रस्थितः शशी द्रो वा राहुणा ग्रस्यते॥ तत् ग्रहणगतं उल्कयाहतं॥ अथोल्कानिपातितान
यतं सर्वकालं दुषाकरेण चंद्रेण यत पीडितं यस्य नक्षत्रस्य योगतारकाभेदनमाच्छादनमध्यगतं दक्षिणभाग
गमनं वा करोति॥ तदुषाकृत्पीडितं च तदुपहतमिति॥ प्रचक्षते॥ एवंविधं नक्षत्रं तदुपहतमिति॥ प्रचक्षते कथयं
ति मुनयः॥ अथवा प्रकृतेः शुभाद्वा विपर्ययं विपरीतं यातं प्राप्तं तदप्युपहतं॥ एवंविधं नक्षत्रं निगदितस्य क
थितस्य परिवर्गस्य प्रागुक्तस्य दूषणं दृष्टं तां विनाशं करोति॥ कथितविपर्ययं गतं समृद्धये रविसुतभोगमागत
मित्यादि॥ ॥ यदुक्तं तद्विपरीतं यन्नक्षत्रं तत्कथितस्यास्य परिवर्गस्य समृद्धये भवति पुष्टिमतीत्यर्थः॥ ॥
तथा च पराशरः॥ शनैश्चरस्य सूर्यस्य यदृक्षं भोगमागतं॥ धरित्र्यात्मजयेनापि भिन्नं वक्रप्रदूषितं॥ चंद्र
पीडितं ग्रहप्रकृतेरन्यथा स्थितं॥ तच्चोपहतकं विद्यान्नक्षत्रं दूतिसर्वदा॥ स्ववर्गमन्यथा नित्यं पुष्णाति १०३
निरुपद्रवं॥ ॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ नक्षत्रव्यूहो नाम पंचदशोऽध्यायः॥ १५॥
समाप्तः॥ ७ ७ ७॥ ॥ अथ ग्रहभक्तियोगा व्याख्यायते। कस्मिन्देशे केषां जनानां को

ग्रहोऽधिपतिरिति॥ एतदत्र निरूप्यते॥ तत्रादित्यस्याह॥ प्रागनर्मदार्धशोणोड्रवंगसुह्माः कलिंगबाह्लिकाः शकयवन
मगधशबरप्राग्ज्योतिषचीनकांबोजमेकलकिरातविटकाबहिरंतःशैलजाः पुलिंदाश्च॥ द्रविडानां प्रागर्धं दक्षिण
कूलं च यमुनायाः। चंपोदुंबरकौशांबीचेदिविंध्याटवीकलिंगाश्च॥ पुंड्रगोलांगूलश्रीपर्वतवर्धमानानि॥ इक्षुम
तीत्यथ तस्करपारतकांतारगोपबीजानां॥ तुषधान्यकटुकतरुकनकदहनविषसमरशूराणां॥ भेषजभिषक्चतुः
ष्पदकृषिकरनृपहिंस्रयायिचौराणां॥ व्यालारण्ययशोयुततीक्ष्णानां भास्करः स्वामी॥ ॥ प्रागनर्मदार्धमिति॥ न
र्मदानाम्नी नदी तस्याः प्रागर्धं पूर्वविभागः शोणो नदः। उड्राजनाः। वंगाः सुह्माः। कलिंगाः। बाह्लिकाः शकाः
यवनाः। मगधः शबराः। प्राग्ज्योतिषाः चीनाः। कांबोजाः मेकलाः किराताः। विटकाः बहिरंतः। शैलजाः शैलप
र्वतमध्ये ये बहिर्वा सुभागे जाताः समवस्थिताः अंतःपर्वतमध्ये जाताः। चशब्दः सर्वत्र समुच्चये॥ ॥ तथा द्रविडानां
जनानां प्रागर्धं पूर्वार्धं यमुना नदी कालिंदी॥ तस्या दक्षिणकूलं तस्या उद्देशः॥ उदुंबरः कौशांबी नाम नगरी चेदयो जन
ना॥ विंध्याटव्याः प्रकारः॥ अथानंतरं तस्करा दस्यवः। जनोवा॥ पारताजनाः। कांतारमटवी। गोपाः गोपालकाः॥ बी
जानि प्रसिद्धानि॥ ओषध्यः ये शालयः। कटुद्रव्यं मरीचादि॥ तरवो वृक्षाः कनकं सुवर्णं॥ दहनोऽग्निः॥ विषं मद्रौष
धं॥ समरश्शूराः संग्रामप्रवीराः। भेषजमौषधं॥ भिषजो वैद्याः॥ चतुष्पदाः पशवः। कृषिकराः कर्षकाः। उप
राजानः। हिंस्राः पापाः। यायिनो विजिगीषवः॥ चौरास्तेरस्कराः। व्यालाः सर्पाः। अरण्यं निर्जना देशाः॥ यशोयु
ता यशस्विनः। तीक्ष्णानि चादि॥ तीक्ष्णा वाजनाः॥ एषां सर्वेषां भास्कर आदित्यः स्वामी॥ प्रभुरिति॥ तथा च का
श्यपः॥ प्रागर्धं नर्मदायाश्च शोणं शबरमागधान्॥ उड्रान् कलिंगांश्च बाह्लीकान् शकान् कांबोजान्मेकलान् सुह्मा
न् प्राग्ज्योतिषकिरातकान् सर्वान् शैलेयान् पर्वतान्तर्बहिःस्थान्॥ यमुनायाम्यकूलं कौशांब्यादुदुंबराणि च॥ विं
ध्याटवीत पुंड्रांश्च वर्धमानं च पर्वतं॥ श्रीपर्वतं कंचोति पुरं गोलांगूलमेव च॥ इक्षुमध्याश्रिता ये च जनाः श्मशान
द्राविडाः। कांतारमथ गोपांश्च कंदरांस्तस्करांस्तथा॥ समरे विषमान् शूरान् तस्करान् कंटकानपि॥ चतुष्पदांभे
षजं च धान्यं च भिषजस्तथा॥ आरण्ययायि व्यालांश्च कृषकान् स्तेनकांस्तथा॥ गोरं यशः प्राकृजल्कं पुंसां यन्नं

वा॰ संहि॰ नवः॥ सर्वेषां भास्करः स्वामी तेजस्तेजस्विनामपि॥ अथ चंद्रस्याह॥ ॥गिरिसलिलदुर्गकोशलभरुकच्छसमुद्ररो
मकतुषाराः॥ वनवासितंगणहलस्त्रीराज्यमहार्णवद्वीपाः॥ मधुररसकुसुमफलसलिललवणमणिशंखमौक्तिका
१०४ जानां॥ शालियवौषधिगोधूमसोमपाक्रंदविप्राणां॥ सितसुभगतुरगरतिकरयुवतिचमूनाथभोज्यवस्त्राणां॥
शृंगिनिशाचरकार्षकयज्ञविदां चाधिपश्चंद्रः॥ गिरिसलिलदुर्गेति॥ गिरिदुर्गं। पर्वतदुर्गं। सलिलदुर्गं॥ कोशलजना
ः भरुकच्छाः। सागराः। रोमकाः तुषाराः। वनवासिनः तंगणाः। हलाः। स्त्रीराज्यं॥ महार्णवः वडवामुखः। द्वीपाः। मधुर
रसं॥ यत्किंचित्। कुसुमानि पुष्पाणि॥ फलानि सर्वाणि सलिलं जलं॥ लवणं सैंधवं। मणयः शंखाः। मौक्तिकं अब्ज
जलसंभवाः। पद्मप्रभृतयः। शालयो धान्यानि॥ यवाः। ओषधयः। गोधूमाः। सोमपाः। याज्ञिकाः। आक्रंद
पार्ष्णिग्राहांतरितो राजा॥ विप्रा ब्राह्मणाः। श्वेतवर्णं यत्किंचित्॥ सुभगाः सर्वजनप्रियाः॥ तुरगाः अश्वाः रति
कराः कामिनः। युवतयः स्त्रियः। चमूनाथः सेनापतिः। भोज्यं प्रसिद्धं॥ वस्त्राणि अंबराणि। शृंगिणः प्रसिद्धाः
प्राणिनः। निशाचरा रात्रिचराः॥ कर्षकाः कृषिकराः॥ यज्ञविदो यज्ञज्ञाः। एतेषां चाधिपः प्रभुः शशी चंद्रः॥
तथा च काश्यपः॥ ॥पर्वतान् जलदुर्गांश्च कोशलान् भरुकच्छकान्। स्त्रीराज्यं मरुकच्छांश्च तुषारान् वनवासि
नः। मौक्तिकं मणिशंखांश्च मोषध्यः कुसुमं फलं॥ द्वीपान् महार्णवान् यच्च मधुरं लवणादयः। गोधूमाः शालयः शृं
गिकर्षकान् यवनानपि। सोमपान् ब्राह्मणांश्च यज्ञान् रतिमासनं॥ स्त्रीसौभाग्यसमेतांश्च दास्यकास्यक्षिता
निच॥ निशाचराधिपश्चंद्रो ह्येषां चापि प्रकीर्तितः॥ ॥अथ भौमस्याह॥ शोणस्य नर्मदायाः भीमरथायाश्च प
श्चिमार्धस्थाः॥ निर्विंध्या वेत्रवती सिप्रा गोदावरी वेण्णा॥ मंदाकिनी पयोष्णी महानदी सिंधु मालती पाराः॥ उत्तर
पांड्यमहेंद्राद्रिविंध्यमलयोपगाश्चोलाः॥ द्रविडविदेहांध्राश्मकभासापरकौंकणाः समंत्रिषिकाः॥ कुंतलकेर
लदंडककांतिपुरम्लेच्छसंकरिणः॥ नागरकृषिकरपारतहुताशजीविशस्त्रवार्तानां॥ आटविकदुर्गखर्वटवधक १०४
नृशंसावलिप्तानां॥ नरपतिकुमारकुंजरदांभिकडिंभाभिघातपशुपानां॥ रक्तफलकुसुमविद्रुमचमूपगुडमद्य
तीक्ष्णानां॥ कोशभवनाग्निहोत्रधात्वाकरशाक्यभिक्षुचौराणां॥ शठदीर्घवैरबह्वाशिनां च वसुधासुतो

गारकोऽधिपतिः स्वामी॥ ॥तथा च काश्यपः॥ महेंद्रमलयौ विंध्यं सिप्रां वेणां महानदीं॥ गोदावरीं नर्मदायाः भीमा
याः पश्चिमार्धगाः॥ वेदिकां कौंकणं दुर्गं द्रविडां वेत्रवतीं नदीं॥ मंदाकिनीं पयोष्णीं च मालतीं सिंधुपारगाः॥ पां
ड्यांश्चोत्तरदेशस्थान् महेंद्राध्राश्मकांस्तथा॥ भासापाराः कुंतलाश्च केरला दंडकास्तथा॥ नागराः पारताश्चैव क
र्षकाः शस्त्रवृत्तयः॥ हुताशनजीविनोऽथ कुंजराः पाशुपास्तथा॥ संग्रामिका नृशंसाश्च संकराश्चोपघातकाः
कुमारा भूमिपस्यौका - - मंदकास्तथा॥ ॥अथ बुधस्याह॥ लौहित्यः सिंधुनदः सरयूर्गंभीरिका रथा
ख्या च॥ गंगाकौशिक्याद्याः सरितो वैदेहकांबोजाः॥ मथुरायाः पूर्वार्धं हिमवद्गोमंतचित्रकूटस्थाः॥ सौराष्ट्रसेतु
जलमार्गपण्यबिलपर्वताश्रयिणः॥ उदपानयंत्रगांधर्वलेख्यमणिरागगंधयुक्तिविदः॥ आलेख्यशब्दगणि
तप्रसाधकाः पुष्यशिल्पज्ञाः॥ चरपुरुषकुहकजीविकशिशुकाव्यशठसूचकाभिचाररताः॥ दूतनपुंसकहास्य
भूततंत्रेंद्रजालज्ञाः॥ आरक्षकनटनर्तकघृततैलस्नेहबीजतिक्तानि॥ व्रतचारिरसायनकुशलवेसराश्चंद्रपुत्र
स्य॥ ॥लौहित्य इत्यादि॥ लौहित्यो नदः। सिंधुनदः। सरयूनदी। गंभीरिका रथस्या च॥ गंगा जाह्नवी॥
कौशिकी आदिग्रहणाद्विपाशा॥ सरस्वती चंद्रभागा च ज्ञेया॥ एताः सरितो नद्यः वैदेहजनाः। कांबोजजना
ः॥ मथुरायाः पूर्वार्धं हिमवान् पर्वतः। गोमंतो गोमंतः पर्वतः। चित्रकूटः पर्वतः। एतेषु ये स्थिता जनाः॥ सौ
राष्ट्रजनाः॥ सेतुगामिनो जलमार्गगामिनो जलमार्गेण पयो गच्छंति॥ पण्यं क्रय्यं। बिलाश्रयिणो बिलवा
सिनः। पर्वताश्रयिणः पर्वतवासिनः। उदपानं कूपवापीतडागादि। यंत्रज्ञा यंत्रविदः। गांधर्वगीतज्ञाः लेख्य
विदो लेख्यज्ञाः। रागो रंजनं तेषु युक्तिज्ञाः॥ गंधयुक्तिज्ञाः॥ आलेख्यं चित्रकर्म॥ तद्विदः। शब्दज्ञाः॥ वैयाकरणि
काः। गणितज्ञाः। एषां प्रसाधिकर्मनिरताः॥ आयुष्यं दीर्घमायुष्यं॥ रसायनं वाजिकरणादि शिल्पज्ञाः। तत्काले
पकरकुंभकारयष्कारकर्मविदः। चरपुरुषाः। गूढार्थवेदिनः। कुहकजीविनः। कुहकेन अयुक्तेन परसेनादिदर्शनेन
जीवंति॥ शिशुबालिः। काव्यकर्तारः कवयः। शठः परकार्यविमुखः। सूचकः पिशुनः। अभिचारः वश्याद्य[illegible]
विद्वेषणमारणादिशिल्पज्ञाः॥ तत्र ये रताः। दूताः मार्गगामिनः। नपुंसकाः क्लीबाः। हास्यज्ञाः उपहास्यकुशलाः

DR. BHAU DAJI MEMORIAL

भरतं च ताः । इंद्रजालज्ञाः । आरक्षकाः रक्षाधिकृताः प्रसिद्धाः । नर्तकाः नर्तनं शिल्पमस्य । घृतमाल्यं तैलं । प्रसिद्धं । स्नेह
बा० सं० आश्रिता इति । बीजानि प्रसिद्धानि । तिक्तानि द्रव्याणि । व्रतचारिणो ब्रह्मचारिप्रभृतयः । रसायनकुशलाः रसायनसाधने
कुशलाः । तुरगाः । वेसराः अश्वविशेषाः । एते सर्वे चंद्रपुत्रस्य बुधस्य ॥ ॥ तथा च काश्यपः ॥ चित्रकृद्गीररथ्याद्रि
१०५. मथनं कौशिकं तथा ॥ मथुरायाश्च पूर्वार्धे लौहित्यः सिंधुरेव च ॥ गंभीरकाथसरयूरथ्यायां दंडकानदी ॥ गंधर्वा
लेखवाग्दाशाश्च कृत्रिमविद्विदः सर्वेज्ञकज्ञाः काम्बोजाश्च मृगा नक्राः । गंधयुक्तिज्ञदेशे च सौगंधिकरले पकाः ॥ सुवर्ण
रजतं रत्नं ॥ मातंगतुरंगं च यत्त पारजनपदाः सौम्याः सौमपुत्रवशे स्थिताः ॥ ॥ अथ गुरोराह ॥ सिंधुनद्याः पूर्वभा
गा मथुरायाश्चार्धे सिंधुसौवीराः ॥ श्रुतौ दीव्यादि पाठश्चात्र आरक्षतद्रुमवृक्षाल्वाः । त्रिगर्ता रावीप्रदेशे पराप्रतावाद
ध्यानयोधेयाः ॥ सारस्वतार्जुनायनमत्स्यार्धग्रामराष्ट्राणि ॥ हस्त्यश्वपुरोहितनृपमंत्रिमंगल्यपौष्टिकासक्ताः ।
कारुण्यसत्यशौचव्रतविद्यादानधर्मरताः ॥ पौरमहाधनशब्दार्थवेदविदुषोभिचारनीतिज्ञाः ॥ मनुजेश्वरोप
करणं छत्रध्वजचामराद्यं च ॥ शैलेयकमांसीतगरकुष्ठरससैंधवानि वल्लीजं ॥ मधुररसमधूच्छिष्टानि चोरकश्चेति जी
वस्य सिंधुनद्याः पूर्वभाग इति । सिंधुनद्याः पूर्वभागो मथुरायाः पश्चिमार्धं भारता जनाः तद्विषयात्रामराष्ट्रं ह
स्ती ॥ ॥ अश्वतुरगाः । पुरोहिता नृपाचार्याः ॥ भूपा राजा ॥ मंत्रीसचिवः । मांगल्यकार्येषु विवाहोपनयनादिषु पौष्टि
केषु ये आसक्ताः रताः ॥ कारुण्ययुताः अनुकंपाशीलाः । सत्यरताः सत्यभाषिणः । शौचयुक्ताः परधने षु अलुब्धाः ।
व्रतयुक्तास्तपस्विनः ॥ विद्यायुता धर्मयुताः पौराः पुरे भवाः ॥ महाधना ईश्वराः ॥ शब्दतत्त्वज्ञाः वैयाकरणिकाः । अ
र्थज्ञाः पंडिताः ॥ वेदविदुषो वेदज्ञाः ॥ नीतिज्ञाः नीतिशास्त्रविदः । मनुजेश्वरोपकरणं ॥ मनुजेश्वरो राजा तदुपकरणं
॥ आयुधं सन्नाहादि ॥ छत्रमातपत्रं ध्वजं द्रुपध्वजं निर्मितो राजचिन्हं ॥ चामरं व्यालव्यजनं ॥ आदिग्रहणाच्च
कृताद्यं । शैलेयकं सुगंधिद्रव्यं ॥ मांसी तगरं । रसं वालं ॥ सैंधवं लवणं ॥ वल्लीजं मुद्गादि ॥ मधुरा ये रसाः ॥ मधूच्छि
ष्टं सिक्थकं ॥ चोरकं सुगंधिद्रव्यं ॥ एते सर्व एव जीवस्य गुरोः ॥ ॥ तथा च काश्यपः ॥ त्रिगर्तासिंधुसौवीरं ज्ञातं द्रंमथु १०५
रामपि ॥ अर्धं सार्धं त्यादिवपाज्ञपापारर्तज्वब्रकं तथा ॥ राजपुरोहितो मंत्री मंगलं पौष्टिकं नयत ॥ कारुण्यकर्मसिद्धानां

विद्याशौचतपस्विनं ॥ मत्स्यांश्च वारिधानांश्च योधेयांश्चार्जुनायनान् ॥ ॥ तथा कांश्चरमठानदुत्सश्च छत्रचामराणि
शब्दार्थविदुषः पौरान्नीतिज्ञान् शीलसंयुतान् ॥ मांसीकुष्ठं च शैलेयं लवणं रसं ॥ मधुरस्वादु वल्लीजं विप्राणां चा
धिपो गुरुः ॥ ॥ अथ शुक्रस्याह ॥ तक्षशिलमार्तिकावतबहुगिरिगांधारपुष्कलावतकाः ॥ प्रस्थलमालवकैकयदा
शार्णोशीनराः शिबयः ॥ ये च पिबंति वितस्तामिरावतीं चंद्रभागसरितं च ॥ रथरजताकरकुंजरतुरगमहामात्रधन
युक्ताः ॥ सुरभिकुसुमानुलेपनमणिवज्रभूषणांबुरुहशय्याः ॥ वरतरुणयुवतिकामोपकरणदृष्टान्नमधुरभु
जाः ॥ उद्यानसलिलकामुकयशःसुखौदार्यरूपसंपन्नाः ॥ विद्वदमात्यवणिग्जनघटकृतचित्रांडजाः ॥ त्रिफलाः
कौशेयपट्टकंबलपत्रौर्णिकरोध्रपत्रचोचानि ॥ जातीफलागुरुवचापिप्पल्यश्चंदनं भृगोः ॥ तक्षशिलेति
तक्षशिला नगरी ॥ मार्तिकावतको देशः ॥ बहुगिरिगांधारजनाः ॥ पुष्कलावतकादेशाः प्रस्थलाः मालवाः कैकयादशा
र्णाः । उशीनराः । शिबयः । ये च पिबंति रथा गंत्र्यः रजतं रूप्यं ॥ आकरमथोत्पत्तिस्थानं ॥ कुंजरा हस्तिनः ॥ तुरगा अ
श्वाः ॥ महामात्रा हस्त्यधिपतयः ॥ धनयुक्ता ईश्वराः । सुरभिसुगंधिद्रव्यं ॥ कुसुमानि पुष्पाणि ॥ अनुलेपनं स
मालंभनं ॥ मणयः पद्मरागप्रभृतयः । वज्रं हीरकं ॥ भूषणान्यलंकरणानि ॥ अंबुरुहं पद्मं ॥ शय्या आस्तरणं ॥
वराः प्रधानाः । तरुणा यौवनोपेताः । युवतयः स्त्रियः । कामोपकरणं ॥ मन्मथोपयोग्यं तद्रक्तपुष्पधूपानुलेप
नादि ॥ तथा दृष्टान्नभुजो ये नराः ॥ मधुरभुजश्च ॥ उद्यानमुपवनं ॥ सलिलं जलं ॥ कामुकाः कामिनः ॥ यशः
सासंपन्ना यशस्विनः ॥ सुखसंपन्नाः सुखिनः । उदार्यसंपन्ना दातारः ॥ विद्वांसः पाठकाः । अमात्या मंत्रिणः ॥
त्रिफला फलत्रयं । एलालवंगबाह्लीकाख्या जाति ॥ कौशेयपट्टो कोकेनेत्रपट्टजाति प्रसिद्धः कंबलः । और्णिकः पत्रो
र्णधौतकौशेयं । रोध्रं प्रसिद्धं । अगरु सुगंधिद्रव्यं ॥ वचा प्रसिद्धा । पिप्पल्यः कणाः । चंदनं मलयजं ॥ एतत्स
र्गाः शुक्रस्य ॥ ॥ तथा च काश्यपः ॥ चंद्रभागां वितस्तां चैरावतीं वापि वितियं ॥ पुष्कलानकैकयान गांधारप्र
स्थलांस्तथा ॥ दशार्णान्मालवांस्तक्षशिलां मार्तिकमेव च ॥ धनाढ्यान् कुंजरान्गांश्च प्रस्थलं चानुलेपनं ॥ सु
रत्नसुभगोद्यानकामुकान्कामचारिणः ॥ कुसुमानमधुरान्नद्यान सलिलशय्यैर्जाविनः ॥ तरुणान्यौवि
तः

क्रीडां विदुषो जनगोष्ठिकान्। अवांडजाश्वकौडीयपत्तोर्णकामिकोशलान्। पिप्पल्यश्चंदनं जातीफलमामलकांस्तथा॥ गंध
वा॰ संहि॰ पत्रस्य शोधस्य धृकश्चाधिपतिस्मृतः॥ ॥अथ सौरस्याह॥ आनर्तार्बुदपुष्करसौराष्ट्राभीरशूद्ररैवतकाः॥ नष्टा यस्मि
न्देशे सरस्वती पश्चिमो देशः॥ कुरुभूमिजाः प्रभासं विदिशा वेदस्मृती महीतटजाः॥ खलमलिननीचतैलिकविहीनस
त्त्वोपहतपुंस्काः॥ बंधकशाकुनिकाशुचिकैवर्तविरूपवृद्धसौकरिकाः॥ गणपूज्यस्खलितव्रतशबरपुलिंदार्थपरिहीना
१०६ :॥ कटुतिक्तरसायनविधवायोषिद्भुजंगतस्करमहिष्यः॥ खरकरभचणकवातलनिष्पावाश्चार्कपुत्रस्य॥ आ
नर्तेति॥ आनर्तजनाः। अर्बुदाः पुष्कराः॥ सुराष्ट्राः आभीराः शूद्राः रैवतकाः॥ यस्मिन्देशे सरस्वती नष्टा अदर्शनं गता प
श्चिमो देशः॥ कुरुभूमिजाः कुरुजनाः॥ स्थाण्वीश्वरं यत्र निवसंति प्रभासं स्थानं विदिशा नदी॥ वेदस्मृता नदी॥ महीतटजनाः
खला दुर्जनाः॥ मलिना मलोपेताः। अधमाः कुत्सिताः। तैलिकाः प्रसिद्धाः॥ विहीनसत्त्वा निःसत्त्वाः॥ उपहतपुंस्काः। उपह
तो नष्टः पुंभावो येषां॥ शंढप्राया इत्यर्थः॥ बंधनपाला बंधनीस्थाश्च शाकुनिकाः पक्षिघातकाः॥ अशुचिरताः कैवर्ताः
नाविका धीवराश्च॥ विरूपाश्च दुराकृतयः। वृद्धाः स्थविराः। सौकरिकाः। सूकरबंधकाः। गणपूज्याः। गणप्रधानाः। स्ख
लितव्रताश्चलितनियमाः॥ शबरा वनजाः॥ पुलिंदाश्च। अर्थपरिहीना दरिद्राः॥ कटुद्रव्याणि निंबादीनि॥ तिक्तं मरिचादि॥ रसाय
नं प्रसिद्धं॥ विधवा योषितो भर्तृहीनाः स्त्रियः। भुजंगाः सर्पाः। तस्कराश्चौराः॥ महिष्यः प्रसिद्धाः॥ खरा गर्दभाः। कर
भा उष्ट्राः। चणकाः। वातला राजमाषप्रभृतयः। निष्पावाः। श्यामकाः। एते सर्व एवार्कपुत्रस्य शनैश्चरस्य॥ ॥तथा च
काश्यपः॥ अर्बुदं च विधुतागिरिं सौराष्ट्राभीरकांस्तथा॥ सरस्वतीपश्चिमाशां प्रभासं कुरुजांगलं॥ आनर्तशूद्रान्द्विजान्
खलांस्तैलिकनैकृतिकान्॥ वेदस्मृतीं सौकरिकां महिषांश्च महीतटं॥ दुःशीलशाकुनान्नीचान्पशुपान्बंधकांस्तथा
॥ पाखंडिनश्च वैतंडान् निर्गंधान्यवनान्खलान्॥ विरूपान्कुटिलांश्चैव रसायनविषादिनः॥ पाखंडांस्तस्करान्सर्पा
न्महिष्याद्यान्खरानश्वान्॥ काकूलधृश्शृगालानां बकानां च प्रभुः शनिः॥ ॥अथ राहोराह॥ गिरिशिखरकंदरदरी १०६
विनिविष्टा म्लेच्छजातयः शूद्राः॥ गोमायुभक्षशूलिकयायानीचा उपहतदांभिकराक्षसनिद्राबहुलाश्चजंतवः॥ सर्वेध
र्मेण च संत्यक्ता माषतिलाश्चार्कशशिशत्रोः॥ गिरिशिखरेति। गिरिशिखरेषु ये निविष्टाः स्थिताः। कंदरेषु गुहासु

दरीषु नदीस्थानेषु ये निविष्टा ये चान्ये म्लेच्छजातयः एते वर्णाः शूद्राः। गोमायुभक्षाः शृगालादाः। शूलिकाजनाः। बोक्काणा
श्वमुख्याः। विकलांगा अंगहीनाः। कुलपांसनाः कुलकलंककारिणः। हिंस्राः क्रूराः। कृतघ्ना अनुपकारज्ञाः। चोरा
स्तस्कराः। निःसत्याः सत्यरहिताः। निःशौचाः शौचरहिताः। निर्दानाः कदर्याः। खरा गर्दभाः। चराश्चरपुरुषाः। नियु
द्धविदो बाहुयुद्धज्ञाः। तीव्ररोषाः। गर्भाशया गर्भस्थाः। नीचा अधमकर्मरताः। उपहताः कुत्सिताः। दांभिका मिथ्या
धर्मिणः। राक्षसा रक्षोजातयः। ये च निद्राबहुलाः। सर्व एव जंतवः धर्मेण संत्यक्ता रहिताः। तथा माषतिलाः। ए
ते सर्व एव अर्कशशिशत्रो राहोः॥ ॥तथा च काश्यपः॥ बुभुक्षिता म्लेच्छवर्णा विभिन्नाः कुलपांसनाः॥ नीचा म्लेच्छा
नास्तिका गर्भस्थाः पारदारिकाः॥ मलधर्मविहीनाश्च शृगालादा महाशनाः॥ दंष्ट्रिणः सतिर्यग्नित्यं गह्वरस्थाश्च भीश्वर
:॥ ॥अथ केतोराह॥ गिरिदुर्गपल्हवश्वेतहूणचोलावकाणमरुचीनाः॥ प्रत्यंतधनिमहेच्छव्यवसायपराक्रमो
पेताः॥ परदारविवादरताः पररंध्रकुतूहला मदोत्सिक्ताः॥ मूर्खाधार्मिकविजिगीषवश्च केतोः समाख्याताः॥ गिरि
दुर्गाः पर्वतदुर्गाः। पल्हवा दुर्गाः श्वेतहूणाः पालाः॥ आवगानाः। मरुचीनाः। प्रत्यंतगह्वरवासिनः। धनिनः
ईश्वराः॥ महेच्छा विपुलाशयाः। व्यवसायाः निपुणाः। पराक्रमोपेताः बलिनः। परदाररताः। विवादरताः।
पररंध्रकुतूहलाः। परकुतूहलो विस्मयो येषां ते॥ मदोत्सिक्ता मत्ताः। मूर्खाः अधार्मिकाः। धर्मरहिताः। वि
जिगीषवो जेतुमिच्छवः। एते सर्व एव केतोः शिखिनः समाख्याताः॥ ॥तथा च काश्यपः॥ नाकाराभ्युक्तिनश्चंग
गिरिस्थान्गह्वरांश्च॥ प्रत्यंतवासाभिरताः परछिद्रविशारदाः॥ मूर्खान्विहीनदीनांश्च केतोरेतान्विनिर्दिशेत्॥
तथा च समाससंहितायां॥ भानोरंगकलिंगवंगयमुनार्श्वापर्वतः पारताचारांकोल्कटशोणमगधाः प्राक्
नर्मदार्धाद्रिकाः॥ कौशांबीशबराष्ट्रपौंड्रयवनायाम्याश्रिता मेकलानीचांदुंबरवर्धमानकिराता येन्ये श्रमणा
न्विताः॥ जलपर्वतदुर्गकाशालावानिरताराष्ट्रतुषारटंकणाः। वनवासदलसरस्वतीजीतांशोर्भरुकच्छकोशलाः॥
क्षितिजस्यं महानदीपयोष्णीवेणीचित्रवतीचमालती॥ मलयद्रविडांध्रकाश्मचोलाभीमार्थलपरेवायसिता
श्च॥ परविंध्यः पश्चिमः शोणभागो गोदावर्याः कूलमद्रिर्महेंद्रः क्षिप्रासिंधुर्भूमिश्चेतिदृशोध्वविदेहाख्याः

॥ ॥ अथैषां प्रयोजनमाह ॥ उदयसमये यः स्निग्धांशुः महान्प्रकृतिस्थितो यदि च न हतो निर्घातोल्काखोग्रहमर्दनैः
वरा॰सं॰ । स्वभवनगतः स्वोच्चप्राप्तः शुभग्रहवीक्षितः स भवति यदा तेषां येषां प्रभुः परिकीर्तितः ॥ यो ग्रह उदयसमये क्षि
तिजान प्रत्यहं उद्गमकाले स्निग्धांशुर्निर्मलरश्मिर्दृश्यते ॥ महान्विस्तीर्णबिंबः प्रकृतिस्थः स्वभावस्थो यदि च न निर्घा
१०२ तेन हतो न चोल्कया न रजसा न ग्रहमर्दनेन ग्रहयुद्धेन न हतः ॥ यथा यश्च स्वभवने स्वराशिं गतः ॥ स्वोच्चे आत्मीय
उच्चराशिं च प्राप्तः ॥ शुभग्रहैः सौम्यग्रहैर्बुधशुक्रजीवानामन्यतमेन वीक्षितो दृष्टः ॥ स ग्रहो येषां प्रभुः स्वामी प
रिकीर्तितः ॥ तेषां शिवः श्रेयस्करो भवति ॥ अन्यदप्याह ॥ अभिहितविपरीतलक्षणः क्षयमुपगच्छति तत्परिग्रहः ॥
डमरगदभयातुरा जना नरपतयश्च भवन्ति दुःखिताः ॥ यदि न रिपुकृतं भयं नृपाणां स्वसुतकृतं नियमादमात्यजं वा ॥
भवति जनपदस्य चाथ वृष्ट्यागमनहृतं पुराद्रिनिम्नगासु ॥ उदयसमये यः स्निग्धांशुरित्यनेन यत्लक्षणमभिहि
तमुक्तं ॥ तस्मिन्विपरीतलक्षणे दृष्टे सति तत्परिग्रहः तस्य ग्रहस्य यः परिग्रह उक्तः ॥ तत्क्षयमुपगच्छति विनाशं
प्राप्नोति ॥ तथा जना लोका डमरगदभयातुराः ॥ डमरः शस्त्रकलहो गदो रोगो भयं भीतिः ॥ एतैरातुराः पीडिता भ
वंति ॥ तथा नरपतयो राजानो दुःखिताश्च भवंति ॥ यदि रिपुकृतं भयं न भवति ॥ स्वसुतकृतमात्मीयपुत्रकृतं वा नि
यमान्निश्चयादमात्यजं मंत्रिकृतं वा राज्ञां भयं भवति ॥ यदि तस्मिन्ग्रहोत्पाते दृष्टे एतत्त्रयोपसर्गान्नृपाणामाशंक्यते
॥ एषां मध्याद्यद्यन्यतमो न भवति ॥ तदा जनपदस्य लोकस्यापि यथात भयं भवति ॥ तदा अवृष्ट्या अवर्षणेन पु
रेषु नगरेषु अद्रिषु पर्वतेषु निम्नगासु नदीषु अप्रवेगमनं भवति ॥ तत्र न कदाचित् जनपदो गमनं गच्छ
ति ॥ अवृष्ट्या सर्वमुत्पाद्यते ॥ रोहते । वृक्षादिकं जनाश्चेत्तना पूर्वपुराद्रिनिम्नगामुपगच्छति ॥ तत्र न कदाचिदपि
न गालरति ॥ तथा च गर्गः ॥ स्निग्धरश्मिर्विशालश्च प्रकृतिश्च न यो ग्रहः ॥ ग्रहयुद्धरजोधूमनिर्घातोल्काभिरा १०२
हतः ॥ नयप्रस्वोच्चराशिस्थो मित्रभे स्वगृहेपि च ॥ स्थितः शुभग्रहैर्दृष्टः सपुष्णाति परिग्रहं ॥ अन्यथा दोषतानिः
ध्वंसजननाशं करोति च ॥ नृपाणां भयदः प्रोक्तः अवृष्ट्यापि कारकः ॥ ॥ इति श्रीभट्टोत्पलविरचितायां सं
हितावृत्तौ ग्रहभक्तियोगो नाम षोडशोऽध्यायः ॥ १६ ॥ ॥ ७ ॥ ॥ ७ ७ ७ ७ ७ ॥

अथ युद्धाध्यायो व्याख्यायते ॥ ॥ तत्रादावेवोपोद्घातमाह ॥ युद्धं यदा यथा भविष्यदादिश्यते त्रिकालज्ञैः ॥ तद्विज्ञा
नं मया करणे मयारचितं सूर्यसिद्धांते ॥ यदा यस्मिन्काले यथा येन प्रकारेण ताराग्रहाणां युद्धं परस्परं त्रिकालज्ञै
स्त्रिकालविद्भिः अतीतवर्तमानानागतकालज्ञैर्भविष्यं भाति आदिश्यते कथ्यते ॥ तद्विज्ञानं तस्य ग्रहयुद्धस्य प
रिज्ञानं कृतमिति सूर्यसिद्धांतकाः पठंति ॥ सूर्यसिद्धांतात ॥ ताराचंद्रपरिप्रणीतादित्यनीयकृतमिति ॥ ॥
अथ कारणमाह ॥ वियति चरतां ग्रहाणामुपर्युपर्यात्ममार्गसंस्थानां ॥ अतिदूराद्दृग्विषये समतामिव संप्रयाता
नां ॥ आसन्नक्रमयोगात् भेदोल्लेखांशुमर्दनासव्यैः ॥ युद्धं चतुःप्रकारं पराशराद्यैर्मुनिभिरुक्तं ॥ वियति चरता
मिति ॥ ग्रहाणां भौमादीनां वियत्याकाशे चरतां गच्छतां उपर्युपरि ऊर्ध्वाधःस्थिता आत्ममार्गस्थचक्रांनि प्रति
मंडलचक्रेण संस्थितानां दूराद्विषये दृष्टिगोचरे अतिदूरात अतिसंनिकृष्टतात् समतां तुल्यतामिव संप्रयाता
नां आसन्नक्रमयोगात् आसन्नोतिनिकटः क्रमो नु परिपाटीयोगः ॥ आसन्नक्रमात्संयोगः तस्मात्युद्धं भवति ॥
तद्युद्धं पराशराद्यैर्मुनिभिः पराशरगर्गकश्यपवज्राद्यैभिः ॥ चतुःप्रकारं चतुर्विधमुक्तं कैः ॥ भेदोल्लेखांशुमर्दना
सव्यैः ॥ भेदेनोल्लेखांशुनांशुमर्दनेन अपसव्येन यत्र ग्रहद्वयमपि एकत्र लक्ष्यते ॥ स भेदो धः ॥ नोर्ध्वस्थः
श्चाधस्तात् ॥ यावत्स्पस्य ग्रहस्य ग्रहेणांबिंबपरिधिः संस्पृश्यते क्रियते ॥ स उल्लेखः ॥ अंशुरश्मयः ॥ तेषां संश्लेषः
परस्परमर्दनं भेदोल्लेखांत ॥ व्यतिकरेण आसन्नयोर्ग्रहयोः परस्परं रश्मयः संघट्टितानिवृत्यमाना इव लक्ष्यंते
न ईशुमर्दनं अपसव्यं प्रदक्षिण उच्यते ॥ समंकृत्यादक्षिणेन उत्तरेखलानमपसव्यमुच्यते ॥ आचार्येण चंद्र
ग्रहसमागमे अपसव्यलक्षणं कृतं ॥ शशिफलमुदक्कोठयत ग्रहस्यापादृष्टं भवति ॥ तदपसव्यं सर्वमेव प्रो
यमिति ॥ एतदुक्तं भवति ॥ ग्रहस्योत्तरदिक्कुले शशिनि यत्फलमपसव्ये दक्षिणदिक्कुले तदेव फलं विपरीतं ॥ अस्य
मेवार्थं ऋषिपुत्र आह ॥ ॥ दक्षिणेनापसव्यं स्यादुत्तरेण प्रदक्षिणं ॥ ग्रहाणां चंद्रमा देयो नक्षत्राणां तथैव च ॥
॥ अन्यत्र ग्रहाणां नक्षत्राणां च चंद्रमाः प्रदक्षिणश्च अपसव्यश्च परितो न परस्परं ग्रहाणामपसव्ये दक्षिणश्च
अपसव्यतां प्रदक्षिणतां च ॥ अत्र वृद्धगर्ग आह ॥ ग्रहाणां विज्ञेयं भंगेन नक्षत्राणां च संश्रये ॥ कथं प्रदक्षिणं

द्येयमपसव्यं तथैव च ॥ नक्षत्राणां ग्रहाणां वा यदा उत्तरतः शशी ॥ तत्र दक्षिणमित्याहुर्भवेत्क्षेममुखं तथा ॥ नक्षत्र
बा॰सं॰ ग्रहाणां वा यदा दक्षिणतो व्रजेत् ॥ अपसव्यं स विज्ञेयस्तथा द्विभयलक्षणं ॥ सामान्यमपसव्यलक्षणं अपसव्ये वायं
न भवति ॥ अपसव्यार्थे वर्तते ॥ यदेतदेवापसव्यं ॥ तद्वैव सव्यमिति ॥ भेदश्चोल्लेखः ॥ अंशुमर्दनं अपसव्यश्च ॥ भेदो
१०८ ल्लेखांशुमर्दनासव्याः ॥ तैश्चतुर्भिर्गतिविशेषैर्ग्रहाणां चतुःप्रकारमेव युद्धं ॥ पराशराद्यैर्मुनिभिरुक्तं ॥ पराशरगर्ग
काश्यपवज्रप्रभृतिभिः अभिहितं पराशरादिभिरित्यनेन मुनीनां वचनभेदं प्रदर्शयति ॥ यथा कृपिपुत्रादिभिर्युद्धं पं
चदशप्रकारमुक्तं ॥ पराशरादीनामेव यन्मतं तत्राचार्यस्यापि स्वमतिः क्षांतेयेन ख्यातं स्यात् ॥ गर्गपराशरमतमेतदिति ॥
तथा च पराशरः ॥ तद्यथा ॥ भेदनमार्गेणमुक्तेल्लेखनं रश्मिसंमर्दश्चेति ॥ ग्रहयुद्धं चतुर्विधं आचक्षते कुशलाः ॥
तेषां पूर्वः पूर्वो गरीयान् ॥ तथा च गर्गः ॥ भेदनं लेखनं चैव रश्म्यामर्दस्तथैव च ॥ अपसव्यं ग्रहाणां तु चतुर्धा युद्धमु
च्यते ॥ तथा च काश्यपः ॥ सर्वग्रहेभ्यः शीघ्रो हि तस्मात्सर्वे च चान्मजः ॥ भार्गवो रविभौमौ च सौम्यजीवौ मंदः शनैश्च
रः ॥ शीघ्रगा मंदगाश्चैव एते कालेन केशगामिनः ॥ नतो योगो भवेदेषां यद्योक्तं लेकमाश्रितः ॥ इत्युपरि संस्थाने
दृश्यंते युगपत्स्थिताः ॥ भेदोल्लेखांशुमर्दश्च अपसव्यस्तथापरः ॥ चतुःप्रकारसंयोगे युद्धं तु द्विविकारिणामिति
॥ एवमन्योपेक्षया अपसव्य उच्यते ॥ अथ चतुःप्रकारस्य युद्धस्य फलचतुष्टयमाह ॥ ॥ भेदे वृष्टिविनाशो भे
दः सुहृदां महाकुलानां च ॥ उल्लेखे शस्त्रभयं मंत्रिविरोधः प्रियान्नत्वं ॥ अंशुविरोधे युद्धानि भूभृतां शस्त्ररुक्क्षु
दवमर्दाः ॥ युद्धं चाप्यपसव्ये भवंति युद्धानि भूपानां ॥ भेदे वृष्टिविनाशो भेदसंज्ञिते युद्धे वृष्टिविनाशो अवर्षणं
भवति ॥ सुहृदां मित्राणां महाकुलानां च प्रकाशानां परस्परं भेदो भवति ॥ उल्लेखे उल्लेखसंज्ञिते युद्धे शस्त्रभयं मं
त्रिविरोधः सचिवविरोधः ॥ प्रियान्नत्वं ॥ प्रियान्नता ॥ दुर्भिक्षभयमिति ॥ अंशुविरोधः ॥ अंशुविरोधसंज्ञि
ते युद्धे भूभृतां राज्ञां युद्धानि भवंति ॥ तथा च शस्त्ररुक्क्षुदवमर्दाः ॥ अवमर्दशब्दः प्रत्येकमभिसंबध्यते ॥ श १०८
स्त्रेण रोगैश्च क्षुधा च अवमर्दाः संभवंति ॥ एते जनानुपतापयंति ॥ अवमर्दनं मर्दनं पीडनमित्यर्थः ॥ युद्धं चाप्य
पसव्य इति ॥ न केवलं अंशुविरोधे ॥ युद्धानि भूभृतां भवंति ॥ यावदपसव्ये ग्रहयुद्धे भूपानां युद्धान्येव भवं
ति ॥

नन्वपसव्यसंज्ञितं युद्धं यत्र इति किमुच्यते ॥ यस्माद्भेदोल्लेखयोरन्यतमं दंशमर्दनं भेदोल्लेखांशुमर्दनान्येव तत्रापि
विशेषाः अवगम्यंते ॥ तस्मात्त्रय एव युद्धभेदा वक्तव्या इति उच्यते ॥ ग्रहान्तरग्रहस्य दक्षिणदिक्स्थितता परुषता
कंपनं विवर्णता विकृतिता विरूक्षता सूक्ष्मता पराजितलक्षणं पराभवलिंगानि ॥ उत्तरदिक्स्थिता स्निग्धता विपुलत्वादीनि
लिंगानि ॥ दक्षिणदिक्स्थितोऽपि यदा विपुलस्निग्धतादिभिर्विजयलिंगैर्युक्तो भवति ॥ तदा दक्षिणदिक्स्थो भवति
तदापि क्रमजतरा दक्षिणग्रहो जेता इत्युक्तं शुक्रे च दृश्या तथा यदि खर्वा विनाशमुपयाति ॥ एवमादिकं देवफलं तत्तद्ग्र
हसमागमाध्याये नाशितफलमुदक्स्थग्रहस्यापि दृष्टं भवति ॥ तदपसव्यमर्वमेव प्रतीपं यस्यैवनार्थसंबंधात् ग्र
हस्यापि तस्यैतद्विपरीतं न्यायेन फलं वैपरीत्येन कल्प्यते ॥ ॥ इति आचार्याय भट्टोपनिबद्धापसव्यसंस्थाने वा ग्र
हयुद्धस्य अपसव्यसंज्ञितस्य फलं कल्प्यत इति ॥ आचार्यभट्टेन प्राग्दक्षिणापरोत्तरानुक्रमेण दुष्टग्रहाणां प्रदि
मौयः सोऽपसव्यमाह ॥ ॥ देवाः पश्यंति भूगोलार्धं पुरमेरुसंस्थिता सव्यं अपसव्यं तदर्धं दक्षिणवडवामुखस्थ
ता इति ॥ एतेनेकाकारे गन्धर्वाणां दर्शने मंदधियां जिज्ञास्यार्थं गृहीतचित्राणां विकल्पनाविकल्पमाशं
क्याः ॥ पराशरादिभिर्बहुभिरुक्तं ॥ समनाभ्यायदेवाने वक्षितग्रहजेतारि फलं दक्षिणदिक्स्थितस्यापसव्यसं
ज्ञितग्रहजेतारि तद्देव फलं विमत्राप्येवं मन्यसे यथापसव्यमाचार्येण नियमेन वाभिहितं ॥ ॥ तथा चाह ॥
गंधर्वनगरमुत्थितमापांडुरमशनिपातकरं ॥ दीप्तेंद्रसूर्यामेविभयं तदाय सव्यं ॥ केचित् वामपार्श्वेय
सव्यमुच्यते ॥ तथा च भगवान् व्यास आह ॥ शुद्धांतः पराक्रमस्य समुत्पन्नो मध्यमागतः ॥ अपसव्येन च
प्रदक्षिणं तथा मे दक्षिणं भवान् ॥ तथा च बादरायणः ॥ यथा रोहणदक्षिणमर्कः शशिसव्यं ग्रहदर्शाणां ॥ अन्य
था ततोऽर्वाग्दिशं गच्छतां ययामतां उत्तरदिक्स्थः शुक्रः प्राचीं दिशमाच्छादयन् दक्षिणमार्गेण यः स प्रदक्षि
ण इत्युच्यते ॥ सव्यश्च प्रदक्षिणं ॥ सव्यापसव्ययोर्भेदः ॥ ॥ आचार्य आह ॥ एतं दानवाः दृशो मध्यभागाभिषु
ष्ववस्थिताः ॥ कोणाद्युपस्थानकारिण्यां वितपोयुक्तः प्रदक्षिणा इति ॥ आचार्यभट्टेन सव्यापसव्यं गतानां सत्वा
नां इत मतः कस्मात् ग्रहदर्शनाय इत अपत्युच्यते ॥ मरुमूर्ध्ननिवासानि यानि सत्वानि तानि भि धुनांत गंडेपर्कक्षिति

ग्रहे इत्यासंनयद्ग्रहसमागमे योगीरत्य आचार्यभद्रोक्तं॥ सर्व एव ग्रहाः कुजाद्या यान्तु वामपार्श्वेन गमनं यत्तदपसव्यं॥ वामेऽ
बा॰सं॰ भियंता यः सव्येन दुक्तं प्रदक्षिणेनेत्यर्थं॥ आचार्येणेदं प्रदक्षिणं प्रदर्शितमेव यात्रायां जयदं नेष्टमन्यथेति॥ सव्याप
सव्यदन्यतद्वामं विपरीतं॥ वामेऽभियमिति॥ ग्रहाणां सव्यापसव्यता॥ उत्तरदिक्कक्षः प्राग्दक्षिणो दक्षिणदिक्कक्षा
१०० ज्ञेता यदा तदा सव्यापसव्यमिति॥ यत्तदुक्तं कथमेव गम्यते॥ इदमत्रोच्यते॥ उक्तमेवेदं यत्तोनुलोमेन वा सगत्या
भेदेन ग्रहाणां फलं॥ प्रतिभेदं तत्प्रदर्शितं॥ तत्र एकमेव फलं॥ तथा चानुलोमगः॥ प्रतिलोमगो वा दक्षिणेनो
त्तरेण वा उक्तं रवर्त्तं करोति॥ तत्राप्येकमेव फलं॥ तथांशुमर्दनस्यापि अनुलोमेन प्रतिलोमेन वा फलस्य भेदः॥
एवं संस्थानत्रयं चेतत्॥ यदंशुमर्दनस्य फलमपसव्यसंज्ञितस्य तदेव फलं॥ एतदुक्तं भवति॥ यस्य ग्रहस्यान्तराद्
उल्कस्य यत्फलमभिहितं॥ तस्य ग्रहस्य दक्षिणदिक्स्थस्यापि अपसव्यसंज्ञितस्य तस्य संयुक्तस्य तदेव फलं॥ त
स्मादपसव्यनिर्देशो यः स नातिरिच्यते। इति॥ अथ कुजाद्ग्रहाणां यायिना माक्रंदसंज्ञामाह॥ ॥रविराक्रंदो मध्ये
पौरः प्रकीर्तितो याय्यास्य॥ पौरग्रहबुधगुरुसूर्यसुता नित्यं शीतांशुराक्रंदः॥ केतुकुजराहुशुक्रा यायिन एते ग्रहा घ्नन्ति
॥ आक्रंदयायिपौरान्नक्षायिनो नायदाः स्ववर्गस्य रविराक्रंदो मध्य इति॥ रविस्सूर्यो मध्याह्ने मध्याह्नकाले आक्रं
दसंज्ञो भवति॥ यानुःपश्चाल्लितः पार्श्वग्राहस्तस्य पश्चाल्लितः॥ आक्रंदः पौरः स एव पूर्वं पूर्वाह्णादनस्यप
श्चमविभागे रविः पौरो नित्यं सौम्यजीवसौराः पूर्वकाले पौरा नागराः शीतांशुश्चन्द्रः सर्वकालमाक्रंदः॥ केतुकु
जराहुशुक्रा यायिनः॥ केतुः शिखी॥ कुजोऽङ्गारकः॥ राहुः सैंहिकेयः॥ शुक्रो भार्गवः॥ एते ग्रहा यायिनः॥ एते
ग्रहा घ्नन्ति॥ आक्रंदयायिपौरान्॥ आक्रंदयायिपौराह्वाः पराजिता एतान् घ्नन्ति नाशयंति॥ एतच्च विज्ञायि
नं स्ववर्गस्य आत्मीयवर्गस्य जयदा भवंति॥ अत्रैव विशेषमाह॥ पौरे पौरेण हते पौराः पौरान्नृपान्विनिघ्नं
ति॥ एवं यायाक्रंदनागरयायिग्रहाश्चैव॥ पौरेण नागरेण पौरे ग्रहे हते विजिते सति पौरा नगरनृपान् विनिघ्नंति॥ १००
नाशयंति॥ एवमनेन प्रकारेण याय्याक्रंदाः परं विनिघ्नंति॥ तथा च पराशरः॥ तेषां तत्तद्यायिकृता योगाद्यायिभ्यो
न्यभेदात्॥ भेदः साम्यात्साम्यमिति॥ ॥अथ जितलक्षणमाह॥ दक्षिणदिक्कक्षः परुषो वेपथुरप्राप्य संनिवृ

त्तोऽणुः॥ अधिरूढो विकृतो निःप्रभो विवर्णश्च यः स जित इति॥ योग्रहो दक्षिणदिक्कक्षो याम्याशास्थः परुषो रूक्षो नि
स्नेहः। वेपथुः सकंपः। अन्यं ग्रहं प्राप्य संनिवृत्तः। निवर्तितः। विपरीतां गतिमापन्नः॥ अणुः सूक्ष्मः अधिरूढः॥ अ
न्येन ग्रहेणाक्रांतः विकृतो विकारं गतः॥ निःप्रभो दीप्तिरहितः॥ विवर्णो विगतवर्णः। स जित इति। तथा च पराशरः
॥ दक्षिणाभिर्दक्षिणे ग्रहे जितं विद्यात्॥ विवर्णः परुषः सूक्ष्मो याम्याशामार्गसंस्थोऽधिरूढो निःप्रभो विकृतो जिताभि
हतो प्राप्यनिवृत्तो वेपनश्चान्यथा विजयी॥ तथा च गर्गः॥ अरश्मिर्जितो ग्रहः॥ श्यामः परुषः सूक्ष्म एव च॥ अपसव्य
गतो याम्यदिक्क्रांतः पतितः तथा च हतः॥ ज्वालाहतो यः प्रतिलब्धकार्थ एव च॥ निःप्रभो विकृतश्चापि ज्ञेयोऽनाभिहतश्च
यः॥ अप्राप्य वा निवर्तेत वेपनः सूक्ष्म एव च॥ लक्षणैः समस्तैरभिग्रहं विद्यात्पराजितं॥ ॥अथ जयिनो लक्ष
णमाह॥ उक्तविपरीतलक्षणसंपन्नो जययुतो विनिर्दिष्टः॥ विपुलः स्निग्धो द्युतिमान् दक्षिणदिक्कक्षोऽपि जययुक्तः
॥ दक्षिणदिक्कक्षः परुषद्युत्यादिना यदर्थेन ग्रहलक्षणमुक्तं॥ तस्माद्विपरीतलक्षणं। संपन्नो यथा॥ उत्तरदिक्क
क्षः स्निग्धः वेपथुः सम्यक्प्रासः विपुलोऽपराक्रान्तः॥ अविकृतस्तेजस्वी॥ स जयी इति॥ तथा च गर्गः॥ द्युतिमान्
रश्मिसंपन्नाः प्रसन्नो रक्तनिष्प्रभः॥ कृष्णः पृथुः रश्मिवयः समस्तो ग्रहो भवेत्॥ प्रभावर्णाधिकोपश्च ग्रहमाक्रम्य
तिष्ठति॥ ईदृशं जयिनं विद्यात् ग्रहं ग्रहसमागमे॥ एवंविधो ग्रहो जययुतो विनिर्दिष्टो याम्यतोऽपि॥ तथा योगिवृ
त्ताकृतविदः॥ स्निग्धो निर्मलो द्युतिमान् कांतियुक्तः स दक्षिणस्यां दिश्याश्रितोऽपि जययुक्त इति॥ एतच्च शुक्रस्य
प्रायः संभवति॥ तथा च पुलिशाचार्यः॥ सर्वत्र जयिन उदक्स्था दक्षिणदिक्स्थो जयी शुक्र इति॥ अन्यदप्याह॥
द्वावपि मयूखयुक्तौ रश्मिज्वालेन महता संयुक्तौ विपुलौ विस्तीर्णौ स्निग्धौ निर्मलौ यदि समागमे संयोगे भवतः॥
तत्र तस्मिन्समागमे संयोगे अन्योन्यं परस्परं प्रीतिः॥ तौ ग्रहौ यथा युक्तौ॥ रविराक्रंदो मध्य इत्यनेन तेषां मैत्री भ
वति॥ तावेव ग्रहौ विपरीतौ॥ रश्मिरहितौ अल्पौ रूक्षौ यदि समागमे भवतः॥ तदात्मीयपक्षघ्नौ स्वपक्षहतः॥
अत्रापि विशेषमाह॥ युद्धं समागमो वा यद्यव्यक्तौ तु लक्षणैर्भवतः॥ भुवि भूभृतामपि तथा फलमव्यक्तं विनि
र्दिष्टं॥ युद्धं नाम ग्रहाणां। भौमादीनां परस्परं समागमस्तत्र संयोगमात्रात् युद्धं समागमो वा यदि लक्षणै

बा॰ सं॰ श्रुश्च समागमोक्तिः अल्पकाः स्वल्पश्चैव भवन्ति। समागमोक्तं पापरानृपत्वरहितमित्यर्थः॥ यथाहेत्वपि मयूखर्ययोगेऽपि
पुलोमितमोत्तिविपर्यां तलक्षणोक्तो वातव्रनजायते। कोऽसौ इतः कथ्यते विजयी संग्रामग्रहाणां चंद्रेण ग्रहाद्युत्तरगतेन।
दक्षिणादृग्गतेनाप्य शुभाशुभफलमुक्तं॥ तत्र यदि अल्पकः समागमो भवति। एतदुक्तं भवति। ग्रहश्चेंद्रेणोत्त
११० रेणच दक्षिणेन वा याति। मध्येन गमनं करोति॥ तदा तत्र भेदफलं वक्तव्यं॥ न समागमोक्तफलं॥ तदृश्यतत्वं समा
गमस्य॥ तथा तेनैव प्रकारेण भुवि पृथिव्यां प्रभूतं राज्ञां अल्पकमलक्ष्यमेव फलं निर्दिश्यं॥ यकेनायं सति अल्प
केनायं आदृश्यः॥ पराजयेनाय ॥ एवं चंद्रस्योत्तरगमनेन शुभफलं वक्तव्यं। दक्षिणेनाशुभं। मध्येन मध्यमि
ति। अथ भौमस्य सर्वग्रहजितस्य फलमाह॥ ॥ गुरुणा जिते वनिमुं तद्वाल्हीकायायिनोऽग्निवार्ताश्च॥ शशि
जेन सूरसेनाः कलिंगमालवाश्च पीड्यंते॥ सौरेणांगारविजिते जयं पौराः प्रजाश्च सीदंति। कोष्ठागारम्लेच्छ क्षत्रिय
ताप श्च शुक्रजितः वनिमुं तः। अर्थनिमुंतः गारके गुरुणा बृहस्पतिना विजिते पर्याजिते पराभूते वाल्हीकाजनायाः
यिनोऽग्निगमिषवः। अग्निवार्ताः सुवर्णकारप्रभृतयश्चैव पीड्यंते। उपताप्यंते। शशिजेन बुधेनाजिते भौमे सूर
सेनाः कलिंगाः शाल्वाश्च पीड्यंते। सौरेण शनैश्चरेण अंगारके विजिते पौरा नागरा जयं यांति॥ विजयं प्राप्नुवंति। प
जाश्च सीदंति। अवसादयंति। शुक्रजिते भौमे कोष्ठागाराणां अविलंबग्रामाणां म्लेच्छानां क्षत्रियाणां चैताप्य
: संतापो भवति॥ ॥ अथ बुधस्य सर्वग्रहजितस्य फलमाह॥ भौमेन हते शशिजे वृक्षसरितापसान्नपनृपांस्त्रा
:। उत्तरदिक्स्थाः क्रतुदीक्षिताश्च संतापमायांति॥ गुरुणा बुधजिते म्लेच्छश्च द्रचौरा धनयुक्ताः पौरजनाः त्रैगर्तपार्वती
याः पीड्यंते कंपते च मही॥ रविजेन बुधे स्वरितेनाविकयोधा जलस धनगर्भिण्यः॥ भृगुणाजितेः निकोपः सस्या
बुदयायिविध्वंसः॥ भौमेनजिते शशिजइति। शशिबुधे भौमेनांगारकेन विजिते वृक्षाः तरवः सरितो नद्य
स्तापसाः तपस्विनः॥ अश्मकाजनानरेंद्रा राजानः॥ उत्तरदिक्स्थाः सौम्याशानिवासिनो जनाः क्रतुदीक्षिता ११०
यज्ञयाजिनः एते सर्वे संतापं पीडामायांति॥ प्राप्नुवंति। गुरुणा बृहस्पतिना जिते बुधे म्लेच्छजनाः शूद्राः शू
द्रजातीयाः चौरास्तस्कराः अर्थयुक्ताः सधनाः पौरजनाः पुरवासिनः त्रैगर्तजनाः पार्वतीयाः पर्वतवासिनः
॥

एते सर्वे एव पीड्यंते। उपताप्यंते। महीभूश्च कंपेन चलति। रविजेन शनैश्चरेण बुधे ध्वस्ते विजिते नाविकाः कैव
र्ता योधाः शस्त्रवृत्तयः। अब्जाः जलजाः सधनाईश्वरा गर्भिण्यः सगर्भाः स्त्रियः। एते सर्वे एव पीड्यंते॥ भृगुणा
शुक्रेण जिते बुधे अग्निकोपो वन्हिकोपः सस्यानां धान्यादीनां अंबुदानां मेघानां यायिनां विध्वंसो विनाशो
भवति॥ ॥ अथ जीवस्य सर्वग्रहजितस्य फलमाह॥ ॥ जीवे शुक्राभिहते कुलूतगांधारकैकया मद्राः। शाल्वा
वंगा वत्सा गावः सस्यानि च नश्यंति॥ भौमेन हते जीवे मध्यदेशो नरेश्वरा गावः। सौरेण चार्जुनायनवसा
तियौधेयाः शिवविप्राः। शशितनयेनाभिजिते बृहस्पतौ म्लेच्छमन्यशस्त्रभृतः। उपयाति मध्यदेशश्च संक्षयं य
च्च भक्तिफलं। जीवे शुक्राभिहतइति। जीवे बृहस्पतौ शुक्राभिहते शुक्रेण विजिते कुलूतजना गांधाराः कैकया
मद्राः शाल्वा वत्सा वंगा गावो धेनवः। सस्यानि धान्यादीनि नश्यंति। सौरेण शनैश्चरेण निहते जीवे अर्जुनायना
जना वसातयो यौधेयाः शिवयोजना विप्रा ब्राह्मणाः एते सर्वे एव पीड्यंते। शशितनयेनापि बुधेनाभिजि
ते बृहस्पतौ जीवे अपि पराभूते म्लेच्छजनाः सत्यभृतः सत्यवादिनः। शस्त्रभृतः शस्त्रवृत्तयः। मध्यदेशश्च
एते सर्वे एव क्षयं विनाशं यांति॥ अन्यच्च गुरोर्भक्तिफलं यत्र गतं तच्चापि संक्षयं यांति॥ ॥ अथ शुक्रस्य सर्वग्र
हजितस्य फलमाह॥ ॥ शुक्रे बृहस्पतिजिते यायीश्रेष्ठो विनाशमुपयाति। ब्रह्मक्षत्रविरोधः सलिलं च न
वासवस्त्यजति। कोशलकलिंगवंगा वत्सा मत्स्याश्च मध्यदेशयुताः। महतीं प्राप्नुवंति पीडां नपुंसकाः सूरसे
नाश्च॥ कुजविजिते भृगुतनये बलमुख्यवधो नरेंद्रसंग्रामाः। सौम्येन पार्वतीयाः क्षीरविनाशोऽल्पवृष्टिश्च
॥ रविजेनासितविजिते गणमुख्याः शस्त्रजीविनश्च॥ क्षत्रं जलजाश्च पीड्यंते। सामान्यं भक्तिफलमन्यत॥
शुक्रे बृहस्पतीत्यादि॥ बृहस्पतिजिते शुक्रे यायी श्रेष्ठो यायीप्रधानो नायकः विनाशं क्षयमुपयाति॥ प्राप्नोति।
तथात्र ब्रह्मक्षत्रस्य ब्राह्मणानां क्षत्रियाणां विरोध उपद्रवः। वासवइंद्रः सलिलं जलं च न त्यजति। न वर्षतीत्यर्थ
:। तथा कोशलाजनाः कलिंगा वंगा वत्सा मत्स्याश्च एत एव मध्यदेशयुता मध्यदेशसमन्विता महतीं पीडां प्रा
प्नुवंति। कुजविजितइति। भृगुतनये शुक्रे कुजविजिते भौमहते बलमुख्यः सेनापतिस्तस्य वधो मरणं भवति॥

Dr. Bhau Daji Memorial

नरेन्द्राणां तदा शुभानि भवन्ति। सौम्येन बुधेन जिते शुक्रे पार्वतीयाः पर्वतनिवासिनो नाशमुपयान्ति। गर्भान्तरना
बा॰सं॰ शो भवति। वृष्टिश्चाल्पा भवत्येव॥ रविजेन शनैश्चरेण विजिते शुक्रे गणमुख्या गणप्रधानाः शस्त्रोपजीविनः
शस्त्रजीवनयः। क्षत्रं क्षत्रवर्गः जलजाश्च जलोद्भवा निपीड्यन्ते॥ पीडामुपयान्ति॥ तद्दृष्टफलं सामान्यं॥ भक्ति
१११ फलमन्यत्॥ अन्यदपरं यत्स्वभक्तिफलमुक्तं तदपि स्यात्। ।अथ सौम्यस्य सर्वग्रहजितस्य फलमाह॥ ॥असितेम
तेन निहते धर्मवृद्धिर्विहगमानिनां पीडा॥ क्षितिजेन निहते गणाध्यक्षकाशिबाह्लीकदेशानां॥ सौम्येन नगरभेतम
दंशगवणिकविहंगपशुनागाः॥ संताप्यन्ते गुरुणा स्त्रीनाहूतामहिषकशाकश्च॥ असितेन सितेन निहते उति॥ असि
ते सौरे सितेन शुक्रेण निहते विजिते धर्मवृद्धिर्भवति॥ सर्वद्रव्याणां मूल्यभङ्गं॥ अद्दानां सर्पाणां विहंगानां पक्षि
णां मानिनां मानयुक्तानां चक्रनानां पीडा भवति॥ क्षितिजेन अंगारकेण सौरे विजिते गणाजनाश्चान्ध्रा नंद्राः का
श्यबाह्लिकाएषां जनानां ये रथाः तेषां पीडा भवति॥ सौम्येन बुधेन पराभूते विजिते मंदशनैश्चरे अंगाजनाव
णिजः कृषिविक्रयजीविनः॥ विहंगाः पक्षिणः। पशवः चतुष्पदाः॥ नागा हस्तिनः। एते संताप्यन्ते। अत्रैव वि
शेषः। अयं विशेषोऽभिहितो हतानां कुजज्ञवागीशसितासितानां फलं च वाच्यं ग्रहभक्तितोन्यद्यथा तथा घ्नंति
हताः सभक्ताः॥ कुजः आरः। ज्ञो बुधः। वागीशो बृहस्पतिः॥ सितः शुक्रः॥ असितानामयं विशेषः॥ अभिहितः
उक्तः। अन्यदपरं यत्फलं तद्ग्रहभक्तितो वाच्यं॥ यथा येन प्रकारेण व्यक्तेनाऽव्यक्तेन हताः पराजिताः॥ तथा तेनैव
प्रकारेण व्यक्तमव्यक्तं वा स्वस्वभक्तीर्घ्नंति विनाशयंतीत्यर्थः॥ तथा च पराशरः॥ ग्रहस्य योयस्य हतस्य
देशाः पीडाः समृध्यन्ति त एव तस्य॥ संग्रामवर्यायजयिनः समृद्धा भवंति सस्यार्घचतुष्पदाद्याः॥ ॥७
इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ ग्रहयुद्धं नाम सप्तदशोऽध्यायः॥ १७॥ ७ ७ ७ ॥
प्रथम समागमाध्यायो व्याख्यायते॥ ॥तत्रादावेव चंद्रमसो लक्षणमाह॥ भानां यथासंभवमुत्तरेण यातो यदा १११
णां यदि वा शशांकः॥ प्रदक्षिणं तत्र शुभं नृपाणां याम्येन यातो न शिवः शशांकः॥ शशांकश्चंद्रो भानां नक्षत्राणां यथा
संभवमुत्तरेण गतो यातः॥ यथासंभवमिति निकटवर्तिनां प्रदर्शयति॥ येषां चंद्रविक्षेपाद्योगविक्षेपस्तुल्योऽति

षांप्रयाणे संभव इति॥ यथा कृत्तिकारोहिणीपुष्यमघाचित्राविशाखाअनुराधाज्येष्ठाशतभिषग्रेवतीसंभव इति॥
अन्येषां वक्रादित्संभवति॥ दूरवर्तिनां उत्तरेण तस्य गमनं संभवति॥ यथा स्वातिश्रवणधनिष्ठादिषु॥ स्वातेः सप्तत्रिं
शद्भागा उत्तरो विक्षेपः॥ चंद्रस्य सार्धचत्वारः॥ तस्य सर्वकालं प्रदक्षिणेन याति चंद्रः॥ एवं भौमादीनामपि यथा
संभवं योज्यं॥ भौमादीनां ग्रहाणां चोत्तरेण यातं प्रदक्षिणं तत्वात् तत्प्रदक्षिणगमनं नृपाणां राज्ञां शुभदं॥ श्रे
यस्करं॥ याम्येन दक्षिणेन यातो न शिवो न शुभप्रद इत्यर्थः॥ ग्रहाणामपि यथासंभवं योज्यं॥ तथा च ऋषिपुत्रः॥
दक्षिणेनापसव्यं स्यादुत्तरेण प्रदक्षिणं॥ ग्रहाणां चंद्रमादित्यो नक्षत्राणां तथैव च॥ तथा च वृद्धगर्गः॥ नक्षत्राणां
ग्रहाणां वा यदा दक्षिणतो व्रजेत॥ अपसव्यं तदैवं स्याद्वृष्टिभयलक्षणं॥ अथ कुजस्योत्तरगते चंद्रे फलमाह
॥ ॥चंद्रमा यदि कुजस्य यात्युदक्पार्वतीयबलशालिनां जयः॥ क्षत्रियाः प्रमुदिताः सयायिनो भूरिधान्यमुदि
ता वसुंधरा॥२॥ कुजस्यांगारकस्य चंद्रमाः शशी यदि उत्तरेण याति गच्छति॥ तदा पार्वतीयानां पर्वतनिवासिनां ब
लशालिनां बलेन ये श्लाघ्यंते॥ तेषां जयो भवति॥ तथा सयायिनः यायिभिः सह क्षत्रियाः प्रमुदिता हृष्टा भवंति॥
तथा च वसुंधरा भूमिर्भूरिधान्येन मुदिता हृष्टा भवति॥ ॥अथ बुधस्याह॥ उत्तरतः स्वसुतस्य शशांकः पौरजना
य सुभिक्षकरश्च॥ सस्यचयं कुरुतेऽज्ञनदार्ढ्यं कोशचयं च नराधिपतीनां॥ शशांकश्चंद्रः स्वसुतस्यात्मीयपुत्रस्य बु
धस्योत्तरतो यदा उत्तरेण याति॥ गच्छति॥ तदा पौराणां नृपाणां जयदायी भवति॥ सुभिक्षं च करोति॥ तथा च स
स्यानां चयमुपचयं जनानां लोकानां दार्ढ्यं तु भृं नराधिपानां राज्ञां कोशचयं भंडागारवृद्धिं करोति॥ ॥अथ गु
रोराह॥ बृहस्पतेरुत्तरगे शशांके पौरद्विजक्षत्रियपंडितानां॥ धर्मस्य देशस्य च मध्यमस्य॥ सस्यस्य वृद्धिर्मुदि
ताः प्रजाश्च॥ शशांके चंद्रे उत्तरगे उत्तरस्थे दीव्य-- तेषां पौराणां जनानां द्विजानां ब्राह्मणानां क्षत्रियाणां राज्ञ
न्यानां पंडितानां विदुषां तथा धर्मस्य मध्यस्य देशस्य मध्यदेशाख्यस्य वृद्धिर्भवति॥ सुभिक्षं च करोति॥ प्रजाः
सर्वाः प्रमुदिता हृष्टा भवंति॥ ॥अथ शुक्रस्याह॥ भार्गवस्य यदि यात्युदक्शशी शशिकोशयुतगजवाजिरथैः
।यायिनां चाविजयो धनुष्मतां सस्यसंपदपि चोत्तमा तदा॥ भार्गवस्य शुक्रस्य यदि शशी चंद्र उदक् उत्तरेण या
ति॥

तदार्कोद्वायुक्तानां संचारिभांडागाराणां गजानां हस्तिनां वाजिनामश्वानां च वृद्धिप्रदो भवति ॥ तथा यायिनां जिगमिषू
बा॰सं॰ णां धनुष्मतां धनुर्धराणां च विजयो भवति ॥ तदा सस्यानामपि उत्तमा संपद्भवति ॥ अपिशब्दात्तौवार्थः ॥ ॥ अथ सौ
रस्याह ॥ रविजस्य शनेरपि दक्षिणं कुरुते चेत्पुरभूभृतां जयः ॥ शकबाह्लिकसिंधुपह्लवा मुदमायांति यवनैः समन्विताः ॥
११२ रविजस्य शनैश्चरस्य शशी चंद्रश्चेद्यदि प्रदक्षिणं उत्तरगमनं कुरुते ॥ तदा पुरभूभृतां पुरनिवासिनां भूभृतां राज्ञां
जयं भवेत् ॥ तथा शकास्तना बाह्लीकाः सैंधवाः पह्लवा मुदं भाजो मुदं हर्षं भजंति ॥ सेवंते ॥ तद्दृष्टा भवंतीत्यर्थः ॥
॥ ॥ अत्रैव विशेषफलमाह ॥ येषामुदक् गच्छति भग्रहाणां प्रालेयरश्मिर्निरुपद्रवश्च ॥ तद्द्रव्यपौरेतरभक्तिदेशा
न् पुष्णाति याम्येन निहंति तानि ॥ येषां भानां नक्षत्राणां तारकाणां ग्रहाणां भौमादीनां प्रालेयरश्मिश्चंद्र उदगुत्त
रेण निरुपद्रवः उत्पातरहितः सन् गच्छति ॥ तद्द्रव्याणि तेषां भग्रहाणां द्रव्याणि यान्युक्तानि भग्रहभक्तिः नक्षत्र
हितत्वाग्रहाणां मध्यात् ॥ ये पौरा गतो गतो येऽत्र गदिताख्यिनस्तान् भक्तिदेशान् तेषां ग्रहाणां भक्तिदेशाज्ञ कांश्च पु
ष्णाति ॥ पुष्टिं नयति ॥ याम्येन दक्षिणगः तान्येव द्रव्यादीनि निहंति ॥ विनाशयति ॥ अत्रैव पुनरपि विशेषफ
लमाह ॥ ॥ शशिनि फलमुदक्स्थे यद्ग्रहस्योपदिष्टं भवति ॥ तदपसव्ये सर्वमेव प्रतीपं ॥ इति शशिनि चंद्रे ग्रह
स्य उदक् उत्तरस्थिते दृष्टे यत्फलमुपदिष्टमुक्तं ॥ चंद्रमा यदि कुजस्य यान्युदक् उत्पादिकं ॥ तत्सर्वमपि नः
शिष अपसव्येन दक्षिणदिक्स्थे चंद्रे प्रतीपं विपरीतं भवति ॥ इत्येवं प्रकारेण भग्रहाणां भानां ग्रहाणां नक्षत्राणां
च शशिसमागमयोगाश्चंद्रसमायोगाः कीर्तिता उक्ताः ॥ न खलु खलितयं ग्रहाधीनिश्चयार्थे ॥ इंदोश्चंद्रस्य ग्रहैर्भौ
मादिभिर्ऋक्षैर्नक्षत्रैः ॥ सार्द्धं सहयुक्तं न भवतीति ॥ किं तत्स यस्य ग्रहैः सह समागमास्तु समयः शशेवाच्यः ॥ चं
द्रेण सह समागमशब्दो वाच्यः ॥ भौमादीनां परस्परं युद्धशब्दो वाच्यः ॥ इत्यर्थः अस्मिन्सिद्धांतशास्त्रे ॥ तथा च
वाचार्यविष्णुचंद्रः ॥ दिवसकृता सह समयः समागमः शीतरश्मिसहितानां ॥ कुसुतादीनां युद्धं निगद्यते ज्यो ११२
ल्यायुक्तानां ॥ येऽप्युक्ता आदित्यस्य ग्रहस्य परतयः स्वर्गालेक बासनो बाह्या ॥ ॥ इति श्रीभट्टोत्पलविरचितायां
बृहत्संहिताविवृतौ ग्रहसमागमो नाम अष्टादशोऽध्यायः समाप्तः ॥ १८ ॥ ० ॥ ० ॥ ॥ श्री

॥ ॥ अथ वर्षफलाध्यायो व्याख्यायते ॥ कस्य ग्रहस्य कस्मिन्वर्षे कीदृशानि शुभाशुभफलानि ॥ भवंतीति ॥ यत आ
चार्येण पूर्वमेव प्रतिज्ञातमासीत् ॥ वर्षेश्वरस्य फलं ॥ मासेश्वमुनिप्रणीतमालोक्य ॥ तदुक्तेश्च स्पष्टं दृष्टो गर्गतंत्रात्
रविधाने ॥ १ ॥ तत्रादावेवादित्यस्य फलमाह ॥ ॥ सर्वत्र भूर्विरलसस्ययुता वनानि देवाद्विभक्षयिषु दंष्ट्रिस
मावृतानि ॥ नद्यश्च नैव विपयः प्रचुरं स्रवंति रुग्भेषजानि न तथातिबलान्वितानि ॥ १ ॥ तीक्ष्णं तपत्यदितिजः
शिशिरेऽपि काले नात्यंबुदा जलमुचोऽचलसंनिकाशाः ॥ नष्टप्रभर्क्षगणशीतकरं नभश्च सीदंति तापसकुलानि सगो
कुलानि ॥ २ ॥ हस्त्यश्वपत्तिमदसह्यबलैरुपेता बाणासितासिमुसलाश्च रंति ॥ घ्नंतो नृपा युधि नृपाननुचरैश्च दे
शान् संवत्सरे दिनकरस्य दिनेऽथ मासे ॥ ३ ॥ दिनकरस्य आदित्यस्य संवत्सरे वर्षे दिने तद्वासरे वा अमावास्ये इत्थानि
फलानि भवंति ॥ तथा च यवनेश्वरः ॥ एवं वर्षजं फलं मासदिनसदृशं स्वपिबोध्यं ॥ तत्र रविवर्षमासदिनवारको
दृशानि फलानि ॥ सर्वत्र भूर्विरलसस्ययुता ॥ सर्वत्र सर्वस्मिन्देशे भूर्धरवानिः विरलैस्तनुभिः स्वल्पैः सस्यैर्धान्यादिभि
ः युता ॥ संयुक्ता भवति ॥ सस्यानि क्वचित्भवंति क्वचिन्न भवंतीत्यर्थः ॥ तथा वनान्यरण्यानि दंष्ट्रिभिः सर्पसूक
रादिभिः समावृतानि संयुक्तानि भवंति ॥ कीदृशैः दंष्ट्रिभिः ॥ देवाद्दैवाद्दुर्तायाद्विभक्षयितुमिच्छुः तथाभूते
ः ॥ दैवशब्देन प्राक्कर्माभिधीयते ॥ प्रागजन्मानि कृतं शुभं यदि वाशुभं ॥ दैवशब्देनोना दृष्टमिह जन्मनि तद्बुधैः ॥ तस्मात्
वनानि दैवात् विभक्षयिषु दंष्ट्रिसमावृतानि भवंति ॥ नद्यः प्रभूतं प्रचुरं पयो जलं नैव स्रवंति ॥ औषधानि रोगोपश
मनं सम्यक् यथार्थविधानेन न कुर्वंतीत्यर्थः ॥ तथा आदितिज आदित्यः शिशिरेऽपि काले माघफाल्गुनसमयेऽपि
तत्कालेऽपि तीक्ष्णं अतिप्रचंडं तपति ॥ संतापयति ॥ अंबुदा मेघा अचलसंनिकाशाः पर्वताकारा अपि नातिजलमु
चा भवंति ॥ न प्रभूतं जलं मुंचंति ॥ तथा च नभ आकाशं कीदृशं ॥ नष्टप्रभर्क्षगणशीतकरं ॥ नष्टप्रभो विगतकांत
ः ऋक्षगणो नक्षत्रसमूहः शीतकरश्चंद्रमाः यत्र तत्तथा ॥ तापसकुलानि तपस्विनां वंशाः सगोकुलानि गोयुक्तानि
सीदंति ॥ अवसादं यांति ॥ तथा नृपा राजानो युधि संग्रामे नृपाननुचरैः सचिवैर्लोकप्रायैः सह सार्द्धं देशान् विषया
न् घ्नंतो निघ्नंतो विचरंति ॥ कीदृशा नृपाः हस्त्यश्वपत्तिमदसह्यबलैः उपेताः ॥ हस्तिनो गजाः हस्यास्तुरगाः ॥

पत्तयोविघ्नंतेअष्टबलेयुतानितथाभूतेर्द्रव्यश्चपतिमाङ्क॥असत्विःअनभिभवनीयैः।रङ्गै यैर्नत्कैः सेनाभिरुपेता
युक्ता॥तथान्चबाणासनानिमुशलानितन्याः।अमुद्रोपणंबाणंअस्यंतेक्षिप्यंतेयेनतत्बाणासनं धनुः॥अभिस
दं मुशलमायुधविशेषः।मुशलाकारएवतं घातिन्यांयल्लोयेषांतेतथाभूताः॥तथाचयवनेश्वरः॥द्विवाकरोब्दा
रणाविग्रहोग्रकीर्तिर्मिरस्तीव्रविषानलाग्निः॥अनुपशक्तद्रुमगुप्तसस्यः प्रचंडवन्ध्यग्रहविषाक्षिरोगः॥तथाच॥
समाससंहितायांतीक्ष्णांशुः स्वल्पसस्या होतेगोमंघातितस्करः॥ बहूरगव्याधिगणोभास्करोब्दोरणाकुलः॥ ॥
अथचंद्रस्यफलमाह॥ ॥ व्याप्तंसमभःप्रचलिताचलसंनिकाशैर्व्यालांजनालिबलसच्छविभिः पयोदैः॥ गांप्र
यद्भिः॥ रखिलाममलाभिरद्भिर्स्तंकदनेगुरुणाध्वनितेमचा॰॥ ४॥ तोयानिसस्य कुमुदोत्पलवंत्यतीवफुल्ल
मान्युपवनानिफलार्पितानि॥गावः प्रभूतपयसोनयनाभिरामा रंतिरविरतंमयंतिरामान॥ ५॥ गोधूमशालियवधा
न्यवरेक्षुवाटीभूपाल्यतेनृपतिभिर्नगराकगद्या॥चित्यंकितक्रतुवरोष्ट्रिविपुष्पमाना संवत्सरेशिशिरगौभरभि
संप्रवृत्ते॥ ६॥ शिशिरगोः।शीतरश्मेःचंद्रमसः संवत्सरेवर्षेभिसंप्रवृत्तेप्रवर्तमानेईदृशानिफलानिफलानिभवं
ति॥ व्याप्तंनभ उतिपयोदैर्मेघैः नभआकाशंव्याप्तमाच्छादितंभवति॥कीदृशैः पयोदैः प्रचलिताचलसंनिका
शैः॥प्रचलिताःप्रस्थिताःअचलाः पर्वताः तत्संनिकाशैस्तत्सदृशैः॥ पुनःकथंभूतैः व्यालांजनालिगवलच्छवि
भिः॥व्यालःसर्पःअंजनंकज्जलंअलिर्भ्रमरः गवलंमाहिषंशृंगंतद्वच्छविःकांतिर्येषांतेः॥तैः किंकुर्वद्भिः॥गांभू
मिं अखिलांनिशेषांअद्भिर्जलैः प्रयच्छद्भिःअमलाभिःनिर्मलाभिः।तथाध्वनितेनगर्जितेनगुरुणागंभीरेणयुते
न॥ दुःसहेनेत्यर्थः।तोयानीति॥ तोयानिजलानिअतीवात्यर्थंपद्मकुमुदोत्पलवंति॥पद्मानिदिवाविकाशीनिकम
लानि।कुमुदोत्पलानिरात्रिविकाशिविकाशीनिविद्यंतेयेषुजलेषुतथाभूतानि॥फलशब्दानि। गावोधेनवःप्रभूतपयसो
बहुक्षीराः।रामाः।स्त्रियोविरतंसततंरतैःसंभोगैःक्रीडितैःरामानरमणान्अभीष्टान्प्रियभर्तॄन्कामिनःपुरुषान्र
मयंति।विलासयंति।कथंभूताः नयनाभिरामाः नयनाभ्यांनेत्राभ्यांअभिमुख्येनरम्यंतेयास्ताः।गोधूमेति॥
भूरवनिः नृपतिभिराजभिः परिपाल्यतेअभिरक्ष्यते।कीदृशीभूः॥ गोधूमैः शालिभिर्यवैः धान्यवरैः

धान्यश्रेष्ठैः कलमशालिप्रभृतिभिः इक्षुवाटैश्चसंयुक्ता॥ तथाचनगराकराद्यानगरैःपत्तनैःआकरैरर्थोत्पत्तिस्थाने
राढ्यानिराढ्यासंपन्ना॥ बहुलाचित्यांकिताःचितिश्चयनमग्निस्थानंताभिरंकिताचिन्हिता॥क्रतुवरैर्ष्टाविघुष्टनाद॥क्र
तुवरायज्ञश्रेष्ठा॥इष्टयःपुत्रकाम्याद्यश्चतेषुसंघोषणंनादोवेदध्वनिस्तेनयुता॥तथाचयवनेश्वरः॥संपन्नसस्यक्षु
पतिगुल्मशालिःप्रगूढगुल्मोबहुवर्षवारिः॥रसौषधिःस्निग्धनदःप्रसिक्तश्चंद्रोरतिस्त्रीमुखवर्धनोब्दः॥कामिताभीष्ट
श्चित्यंकितमहीतलः॥तथाचसमासंहितायां॥ बहुवर्षोतिसस्याढ्योगवांक्षीरप्रदायकः॥ चंद्राब्दःकामिताभिष्टः
श्चित्यंकितमहीतलः॥ ॥अथभौमवर्षफलमाह॥ वातोद्धतश्चरतिवह्निरतिप्रचंडोग्रामानवनानिनगराणिचसं
दिधक्षुः॥ हाहेतिदस्युगणपातहतारटंतिनिःस्वीकृताविपशवोभुविमर्त्यसंघाः॥ ७॥अभ्युन्नतावियतिसंहतमू
र्तयोपिमुंचंतिकुत्रचिदप - - - पयोदाः॥ सीम्निप्रजातमपिसस्यमुपैतिनाशंनिष्पन्नमप्यविनयादपरेहरंति॥ ८॥
॥ ॥भूपानसम्यगभिपालममतीविनोपिनोत्थिरुकूप्रचुरताभुजगप्रकोपाः॥एवंविधैरुपहताभवतिप्रजेयं
संवत्सरेवनिसुतस्यविपन्नसस्या॥ ९॥ ॥अवनिसुतस्याङ्गारकस्यसंवत्सरेमासदिवसेवाईदृशानिफलानिभ
वंति॥ कीदृशानि॥ वातोद्धतश्चरतिवह्निरतिप्रचंडः॥वह्निरग्निर्मारुतेनउद्धतः उल्कटःसंचार्यमाणाअतिप्र
चंडोदुःसहश्चरति॥ किंकुर्वन्निच्छुःग्रामानवनानिनगराणिचसंदिधक्षुः॥ग्रामाःप्रसिद्धाः।वनान्यरण्यानि॥न
गराणिपत्तनानि॥ संदिधक्षुःसंदग्धमिच्छुः।तथाभुविभूमौमर्त्यसंघामनुष्यसंघाः॥मनुष्यसमूहाःदस्यु
गणपातहतारटंति॥ दस्यूनांचोराणांयेगणाःसमूहाःतेषांसंनिपातैःहताःपीडिताःसंतोहाहेतिरटंति
हाहाशब्दंकुर्वंति॥कीदृशाः।निःस्वीकृतानिर्धनीकृताः॥ विपशवोविगताःपशवश्चतुष्पादयोयेभ्यस्ते
विपशवः। अभ्युन्नताइति॥ पयोदामेघाःवियतआकाशेअभ्युन्नताआभिमुख्येनोन्नताः॥ संहतमूर्तयो
घनदेहाअपिकुत्रचिदल्पजलंप्रचुरंबहुमुंचंति॥ त्यजंति॥ नसर्वत्र॥तथासीम्निजलप्रवृत्तामार्गोपान्निहृता
तमपिकेचित्यजंति॥निम्नेनाचरंतिप्रजातमुत्पन्नं॥ सस्यंधान्यादिकंशोषलंरुजत्वमुपैति॥प्राप्नोति॥निष्प
न्नमपिजातमपिसस्यं॥अपरेन्येशत्रवउत्पाताअविनयादनित्याअन्यायेनपातादिनाहरंतिउति॥अपनयंति

तथाभूपा राजानः॥ सम्यक्प्रयथा धर्मेण अभिपालने रक्षणे सक्तचित्ता भवंति॥ तथा पित्तोत्थानां पित्तजातानां रोगाणां
बृ० सं० प्रचुरता बहुलता भवति॥ भुजंगेभ्यः सर्पेभ्यः प्रकोपो लोकानां पीडां करोति॥ एवंविधे राद्धे द्वौ पौष्ये प्रजानां समृद्
उपद्रुता पीडिता भवति॥ वि- - सस्या नष्टसस्या च॥ तथा च यवनेश्वरः॥ रणः प्रचंडः क्षितिपान् प्रयस्य विश्रुतकन्या
११४ रिडुमसस्यबोरता॥ अंगारकाब्दः प्रचुरोगयासिगतंकचौर्यप्रदः शिरोर्दृष्टः॥ ॥तथा च समाससंहितायां॥ अग्नि
नरेन्द्ररोगा बोन्नपा विग्रहश्चायकः॥ गतसस्या बहुव्याला भीमा माघे बालहा भवा॥ अथ बृहस्पत्याह॥ ॥मायेंद्रजालकु
हकाकरनागराणां गांधर्वलेख्यगणितास्त्रविदां च वृद्धिः॥ प्रेक्षा पयान्नपतयो क्षतदर्शनानि हृष्टानि दातुमिच्छंतनानि पर
स्परेभ्यः॥ १०॥ वार्ताजगत्यविकला त्रयी च सम्यक्चरत्यपि मनोरिव दंडनीतिः॥ अध्यक्षरं स्वभिनिविष्टधि
योऽपि केचिदान्वीक्षिकीषु च परं पदमुद्गमानाः॥ ११॥ हास्यदूतकविबालनपुंसकानां युक्तिज्ञसेतुजलपर्वतवासिनां
च॥ हार्दिं करोति मृगलांछनजः स्वकेऽब्दे मासेऽह्नि प्रचुरता भुवि चौषधीनां॥ १२॥ ॥मृगलांछनः चंद्रः तस्माज्जा २
तो बुधः॥ स च स्वके आत्मीये अब्दे वर्षे दिने मासे वा ईदृशानि फलानि करोति॥ कीदृशानि॥ मायेंद्रजालकुहकाकरना
गराणामिति॥ मायाविनां प्रपंचकुशलानां इंद्रजालिकानां विस्मयदर्शिनां कुहकविदां दांभिकानां आश्चर्यप्रदर्शका
नां आकरे अर्थोत्पत्तिस्थाने कुशलानां नागराणां नगरनिवासिनां गांधर्वविदां गेयज्ञानां लेख्यविदां चित्रज्ञानां॥ गणि
तविदां गणितप्रवीणानां॥ अस्त्रविदां आयुधज्ञानां च तद्वर्षे वृद्धिर्भवति॥ नृपतयो राजानः पिप्रीषया परितोष
इच्छया परस्परस्य द्रव्योत्पादनेन अन्यदद्भुतदर्शनानि परस्परेभ्यो अन्योन्यं दातुमिच्छंति॥ कीदृशानि ज्ञानानां दृष्टान्या
दृकानि॥ वर्तनं वार्ता॥ कृषिः पशुपाल्यं वाणिज्यं चेति॥ वार्ता जगति लोके अविकला सत्यस्वरूपा सफला भवंति॥
तद्वृत्तयः प्रभृतत्वाभावं नातीति॥ यावत त्रयी ऋक्यजुः सामलक्षणा एषा चाप्यविकला संपूर्णा भवति॥ लोके
अन्यर्थे वेदाः प्रसंति॥ सम्यक् यथागमं शास्त्रविहिता दंडनीतिः मनोरिव विचरति॥ प्रजारक्षणं दंडनीतिः मनुना ११४
मराजा भूतत तत प्रणीता दंडनीतिः सम्यक्चरति येन प्रजारक्षणं कृतं तथा नृद्धेऽपि राजा करोति॥ उक्तं च॥ गोरक्षा
कृषिवाणिज्यं सेवा नं सपरिग्रहं॥ वर्तनं जीवनं वा तज्जीवानुं जीवनं स्मृतं॥ त्रयो यजूंषि सामानि एता त्रय्यभिधी
यते॥

त्रयी धर्माधर्मौ दंडनीत्या च रक्षणं॥ अध्यक्षरं स्वभिनिविष्टधियोऽपि केचित्॥ इति केचित अन्ये अध्यक्षरं स्व
भिनिविष्टधियो अक्षरं परमात्मानं अधिकृत्य कृतं शास्त्रं अध्यक्षरं तत्र स्वभिनिविष्टा अभियुक्ता धीर्येषां ते तथाभू
ताः केचिदप्यध्यात्मविद्यासु योगशास्त्रेषु सक्ता लब्धयः इत्यर्थः॥ केचिदध्यक्षरास्वभिनिविष्टधियोऽपि केचित्संति
॥ तथा आन्वीक्षिकीषु त्रयीविद्यासु परं पदं प्रकृष्टं स्थानं मोक्षाख्यं रूढमानावां प्राकुर्वाणाः॥ तर्कनिरता भवंति॥ तथा
हास्यज्ञानां उपहास्यविदां। विदग्धानां दूतानां गमागमिकानां॥ कवीनां पंडितानां काव्यज्ञानां। बालानां शिशूनां। नपुं
सकानां क्लीबानां युक्तिज्ञानां युक्तिविदां प्रयोगज्ञानां॥ सेतुवासिनां पुलवासिनां ये तो येनि व संति॥ जलवासिनां जलस
मीपस्थितानां। पर्वतवासिनां च॥ हार्दिं च करोति॥ चित्ततुष्टिं विधत्ते॥ यथा औषधीनां भुवि भूमौ प्रचुरता बाहुल्यं
भवति॥ ॥तथा च यवनः॥ संधानदानः प्रयतः शिताग्रः स्वाध्यायनार्थाश्च रतिर्विनीतः॥ निराधिरुक्मध्यसम
स्यवर्षो बोधः स्वदूते प्रविधनीव्दः॥ तथा च समाससंहितायां॥ ब्रह्मक्षत्रस्य सम्यानां नानां च कलाविदां। च
द्विजरोऽब्दो बोधस्य भसमाम्यकराक्षितौ। ॥अथ गुरोर्वर्षमाह॥ ध्वनिरध्वरितोऽध्वरद्युगामी विपुलो यत्र मखाम
नांसि भिंदन्॥ विचरत्यनिशं द्विजोत्तमानां हृदयानंदकरोऽध्वरांगभाजां॥ १३॥ क्षितिरुत्तमसस्यवत्यनेकद्विपपत्य
श्वधनासगोकुलाढ्या॥ क्षितिपैरतिपालनप्रवृद्धा द्युचरस्पर्शिजनानदानि भाति॥ १४॥ विविधैर्विबुधैर्दुर्नेतःप
योदैः घनमुर्वीपयसाभितपयद्भिः॥ सुरराजगुरोः शुभं तु वर्षं बहुसस्या क्षितिरुत्तमर्धियुक्ता॥ १५॥ ॥सुररा
जइंद्रस्य गुरुर्जीवः तस्य सुरराजगुरोः शुभं शोभनं तु वर्षं मासे दिने वा फलानि एतानि भवंति॥ अत्र सर्वग्रहाणां व
र्षफलस्य केऽरोद्रसंज्ञानि वर्षाणि॥ अशुभफलान्युक्तानि॥ तदेतेषु गुरोर्वर्षपतित्वेन एतान्यपरिपूर्णानि भवं
ति॥ अत उक्तं॥ शुभं तु वर्षं कीदृशानि फलानि ध्वनिरध्वरित इति॥ द्विजोत्तमानां ब्राह्मणानां ध्वरध्वनिः अध्वः॥
उच्चारितत्वात् ऽयं विपुलो विस्तीर्णोऽध्वरोऽनिशं रात्रिवर्जितं॥ द्युगामी स्वर्गगामी विचरति॥ कीदृशो ध्वनिः॥ यज्ञ
मुखं यत्र तानि यो रक्षणां राक्षसानां मनांसि चेतांसि भिंदन् विदारयन्॥ तथा ध्वरांगभाजां यज्ञभागिनां इंद्रादी
नां हृदयेन नस्यानंदकरः॥ ॥क्षितिभूः क्षितिपैः भूस्पर्धिपराजभिमुख्येन सम्यक्पालनेन रक्षणेन प्रवृद्धा

वृक्षिं गताविभातिशोभते। तस्मिन्वर्षे कीदृशी उत्तमसस्यवति॥ उत्तमानि प्रधानानि धान्यानि विद्यंते यस्यां सा॥ अने
वा० सं० कैर्बहुभिर्द्विपैः गजैः। वाजिभिः पदातिभिः। अन्यैस्तुरंगैः। धनैर्वित्तैर्गुरुभिः विस्तीर्णा गोकुलैः गोनादैः राजाः समृ
द्धा भवति। तथाप्युचरस्पर्धिश्चराः देवाः तेषां स्पर्धिनः सदृशा जनाः यस्यां सा विविधैर्विविधप्रकारैर्यज्ञैर्मे
११५ धैः विविधैर्नानाप्रकारैः रत्नैः उत्सवैः युतं स्यात्। विकुर्वद्भिः देवभूमौ पयसा जलेन अभिरामरूपेण विशेषेण
नर्मयद्भिः प्राणयद्भिः। अनुचरणात् कालानुवर्षाणां॥ तथा क्षितिभृद्वृहस्पतेः प्रभूतधान्यात् अथवा उत्तम यात्रिका
प्रधानया समृद्धा युक्ता भवंति। तथा च यवनेश्वरः॥ सुवर्णयज्ञोत्सव संप्रदायैर्नाराकुल्य धर्मपरा वनेरा
॥ स्फीतान्नपाना बहुसस्यकर्मा गुरोः स्वधर्मप्रयतः प्रजाश्च॥ ॥ तथा च समाससंहितायां॥ बहुयज्ञोतिम
स्यक्षणा मतात्युद्धितस्तथा। पुरंदरगुरोरब्दो बहुसस्यप्रदः शिवः॥ ॥ अथ शुक्रस्याह॥ शालीक्षुमत्यपि धरा
धरणीधराभधारा धरोज्झितपयः परिपूर्णवप्रा। श्रीमत्सरोरुहतडागतटावकीर्णा योषेव भात्यभिनवा
भरणोज्वलांगी॥२६॥ क्षत्रं क्षितौ क्षपति भार्गवलोपि क्षमः धुष्टैः कृतयज्ञध्वनिराजिनाशं। संहृष्टशिष्टजन
दुष्टविनष्टवर्गां पालयंति वनिपा रणगात्र जाती॥२७॥ पेपीयते मधु मधौ सह कामिनीभिः जेगीयते श्रवण
हारि सवेणुवीणं। वोभुज्यते तिथि सदृत्सजनैः सहान्नम् अब्दे सितस्य मदनस्य जयाय घोषः॥२८॥ ॥ सितस्य
शुक्रस्य अब्दे वर्षे मासि दिवसे वा ईदृशानि फलानि भवंति॥ कीदृशानि॥ शालीक्षुमत्यपि धरा भूरि नवाभरणो
ज्वलांगी योषा स्त्रीव भाति शोभते। अभिनवैर्नूतनैराभरणैरुज्वलानि उपशोभितानि अंगानि अवयवा य
स्याः सा कीदृशी धरा शालीक्षुमत्यपि। शालयो धान्यादीनि इक्षवो विद्यंते यस्याः सा तथाभूतापि सती। धरणी
धराणां पर्वतानां सदृशी तुल्या आभा आभा तया शोभिता तथाभूता धराधरा मेघाः तैः उज्झितं त्यक्तं पयो जलं तेन
परिपूर्णा वप्रा क्षेत्राः यस्याः श्रीर्विद्यते येषां सरोजानां पद्मानां तानि श्रीमन्ति। तैः श्रीमत्सरोरुहैः॥ तथा तत्र तत्
विस्तीर्णं यदंबु तत्र ये षां तडागानां तैः कीर्णा संयुक्ता॥ अत एवाविचित्रवर्णत्वात्॥ योषेव भाति। अभिनवाभर ११५
णोज्वलांगी॥ योषा धरा साम्येनोपमानं॥ तथा क्षत्रे राजधर्मं क्षितौ भूमौ कादंबभवति॥ क्षपितकरिबला

रिपक्षोच्छ्रितं विनाशितं॥ भूरिबलं प्रभूतवीर्यं। अपक्षं शत्रुवर्गं येन॥ तथा योसौ उत धुष्टइत यो पितानेकविधात्र
द्वेनकारा याजयज्ञाब्दः तेन विराजिताः कृतशब्दा आशा दिशो यस्य ततस्तथाभूता तथा गां भूमिं अवनिपालजनाः॥
पालयंति रक्षयंतीत्यर्थः॥ कीदृशीं गां॥ संहृष्टशिष्टजनदुष्टविनष्टवर्गां॥ संहृष्टः प्रहर्षितः शिष्टजनः साधुलोको
यस्यां॥ तथा विशेषेण नष्टो विगतो दुष्टानां असाधूनां वर्गः समूहो यस्यां॥ तथा नरैः पत्तनैः आकरैः यायि
तिकोनैः आसन्नं समृद्धां। पेपीयत इति मधौ च सर्वे मधु मद्यं पानविशेषं कामिनीभिः सह पेपीयते। अत्यर्थं पु
नःपुनर्वा पीयते। अतिथिभिः अभ्यागतैः सुहृद्भिर्मित्रैः स्वजनैर्बंधुजनैः सह साकं अन्नं वा भुज्यते। अत्यर्थं पुनः
पुनर्वा भुज्यते॥ यत मदनस्य कामस्य जयाय घोषो जयशब्दः तावका मासक्ताः प्रजा भवंति। उत्घोष इत्यर्थः॥
तथा च यवनेश्वरः॥ नर्यासमीप्यः स्फुरमेघसस्य प्रभूत वह्नी वनजाद्य पुष्पः॥ कामप्रकामद्युति योमुदाप्यः कोश्या
गनाद्र्षेत्तसुप्रहृष्टः॥ तथा च॥ सस्याढ्यो धर्मबहुलो गतातंको बहूदकः॥ कामिनी कामदः कामं सिताब्दः शुभं
सदा। ॥ अथ सौरस्याह॥ उद्धृतदस्युगणभमिरणाकुलानि राष्ट्राण्यनेकपशुवित्तविनाकृतानि॥ रोरुद्यमाण
हतबंधुजनैर्विनैश्च रोगोत्तमाकुलकुलानि बुभुक्षया च॥२९॥ यातोन्नतांबुधरवर्जितमंतरिक्षमारुतैनेकविद
वंच धरातलं घोः॥ नष्टार्कचंद्रकिरणानि रजोचनस्था तोयान्नितप्तकाः सरितो गलितल्पयः॥३०॥ ज्ञातानि कुज्ञानद
तोयतयो विनाशमकांति पुष्टिम पराणि जनोपि शतानि॥ सस्यानि मंदमभिवर्षति वृत्रशत्रुर्वर्षे दिवाकरसुत
स्य सदा प्रवृत्ते॥३१॥ ॥ दिवाकरसुतस्य सौरस्य वर्षेब्दे प्रवृत्ते प्रवर्तमाने मासे दिवसे वा सदा सर्वकालं एतानि
फलानि॥ कीदृशानि॥ उद्धृतदस्युगणभमिरणाकुलानि राष्ट्राणि उद्धृत उद्धतो यो सौ दस्यूनां गणः॥ चौराणां समू
हस्तेन तथा बहुतकारारणाः॥ तैराकुलानि संक्षुभ्यमानि राष्ट्राणि जनपदकुलानि भवंति॥ तथा नेकाः प्रभूताः
पशवश्चतुष्पदाः॥ वित्तानि धनानि तैश्च विनाकृतानि विवर्जितानि राष्ट्राणि॥ संग्रामे हताः बंधुजना येषां
ते॥ रोरुद्यमाणाः अत्यर्थं रुदमानाश्च ते हतबंधुजनाः तैः तथा भग्नैः आकुलानि संक्षोभमानि॥ कुलानि
वंशाः॥ तथा रोगोत्तमैः गदप्रधानैर्बुभुक्षया वा आकुलानि भवंति॥ तथा तत्रां आकाशं यातो श्च तांबु

धरवार्जितं वाननरुद्धनाश्च्युताः येऽम्बुधाराः मेघाः तैः वर्जितं रहितं। धरातलं भूतलं। आरआरण्यकुलिदं वा आ
रमणाः भग्ना येन काव्यद्रुमकाराः विटपाश्च यानि चयाः यत्र धरातलेन तथाभूतं। धीरा कारांतं प्राकृतं द्विकरणाः
नष्टा अदर्शनं गताः कुंचितद्रुमाः सूर्यशशिनोः किरणाः रश्मयो यस्य। अतिरजसा मंततेन पांसुना। अवनद्धाः छ
गिताः स्थगिताः। तथार्ता यातिशयाजलधाराः वार्ताकृपतद्रावाद्यो विविधकादाकरहिताः। सलिलानिधः तथाल्प
जलाश्च भवंति। एवंद्राघुरिंद्रो मंदस्सल्यमभिवर्षति मति। कुत्रचित् जातानि उत्पन्नानि सस्यानि अतो यत्र कुत्रचिना
शमयंति। अपराण्यनानि जलौघक्षितानि उदकासिक्तानि पुष्पिकक्षिणं क्षांत॥ ॥तथाच यवनेश्वरः॥ दुष्टाश्च
वं प्रवलानिलाग्निर्वपनं सस्यस्य क्वचिक्षिता ग्राः॥ मृत्युः क्षुदातंकभयोपसृष्टः शनेश्चरोऽब्दः पशुदुष्टरोगः
॥ तथाच समाससंहितायां॥ दुर्भिक्षामकरकेकरोगानकुशलि पवनां रथार्द्रनेश्चरोऽब्दा दुर्भिक्षविग्रहांश्च
वत्रभुतं॥ संवत्सरेकेऽन्मवत्सरतु मासाधिपस्य दर्शनार्थमाह॥ ॥अणुरपि दुमत्पतीनामीनयोर्गान्तोदासमक
लफलदाता पुष्टिलोकः शेषः यथायः॥ यद्शुभमशुभं वा मासज्ञान स्य वृद्धिः शुभफलमतिचेत्याप्यमीनान्य
तायां॥ २३॥ योग्रहोऽणुः सूक्ष्मो न भासितस्यते। अपरुषमंत्रः॥ अस्फुटरश्मिः॥ नीचगो नीचराशिस्थितः
अन्यैर्ग्रहैर्युद्धस्येनितः। पराजितः सग्रहः॥ सकलानामिः शेषाणां॥ अशुभानां फलानां दाता न भवति
॥ अशुभानां परिपूर्णानां दाता भवति। एतदुक्तं भवति। विस्तीर्णं॥ अशुभग्रहस्य वर्षे अशुभस्यैव ग्रहस्य
मासाधिपत्यं यदा भवति। तदा तस्मिन्मासे अतिविशुभं मयदात् दातिशुभफलमपि चैवम्॥ मासाद्ब्द
योः शुभयोरेकस्य शुभत्वेऽन्यस्याशुभत्वे याप्यं स्वल्पं फलं वाच्यं॥ तथाच देवलः॥ बलीवर्षपतिः पूर्णफलं
यच्छति॥ शोभनं नैवबलस्थतथानिष्टं च वर्षमासादिनासकं॥ ॥इतिश्रीभट्टोत्पलविरचितायां बृहत्संहितायां वर्षफलना
म एकोनविंशोऽध्यायः॥ १९॥ ॥७॥ अथ ग्रहशृंगाटकं व्याख्यास्यामः॥ तत्रादावेवाखिलफलनिष्पादनार्थमा ११९
ह॥ यस्यां दिशि दृश्यंते दिशि ताराग्रहाः सर्वे॥ भवति भयं दिशितस्यां आयुधकोपक्षुधातंकैः॥ १॥ यस्यां दि
शि यत्राशायां सर्वे तारा ग्रहाः॥ भौमबुधगुरुसितसौराः दृश्यंते। लोके रवलोक्यते। रविआदित्यं यस्यां दिशा

श्रविशंनः अस्तमयं यातः। तस्यां दिशि भयं भवति। कैः आयुधकोपक्षुधातंकैः। आयुधकोपेन शस्त्रकोपेन। क्षु
धा दुर्भिक्षेण। आतंकैः उपद्रवैः। तथाच काश्यपः॥ ॥भूमिपुत्रादयः सर्वे यस्यामस्तमिते रवौ। दुर्भिक्षं शस्त्रका
पं च जनानां मरको भवेत॥ अन्योन्यं भूमिपाः सर्वे विनिघ्नंति मिथः सदा॥ ॥अधुना एषामेव ग्रहाणां संस्थानप्रदर्श
नार्थमाह॥ ॥चक्रधनुःशृंगाटकदंडपुरःप्रासवज्रसंस्थानाः। क्षुत अनावृष्टिकृतो लोके समरायच नानवेंद्राणां॥
चक्रं चक्राकारं। धनुः चापं। शृंगाटकं त्रिकोणं। दंडं दंडाकारं। पुरं पुराकारमेव। प्रासं सदृशं। प्रासं आयुधवि
शेषं कुंताकारं। मध्ये क्षामं। उभयाग्रविस्तीर्णं एवं चक्रादिना संस्थानाग्रहाः संस्थानं आकृतिः सवंजनपदेषु
दृश्यकराः॥ क्षुत दुर्भिक्षं मदृष्टिमपि कुर्वंति। तथाच मानवेंद्राणां राज्ञां समराय संग्रामाय भवंति। अथा दृष्टेव उ
क्तानविधिना। तथा तथा स्थितानां शुभफलं कुर्वंति। तथाच काश्यपः॥ विहायोचैश्च संस्थानं दृश्यंते विग्रहाय
॥ तदा तु तत्फलं ब्रूयात लोके नाशुभदाय्यते॥ अथांतरिक्षप्रविभागेन शुभफलमाह॥३॥ यस्मिन्नाशे दृश्या ग्रह
मालादिनकरतिर्नातिगते। तत्रान्यो भवति॥ स्वपरचक्रोपद्रवश्च महान॥ दिनकरे सर्योस्तमिते। नातिगताद्वस
स्य पर्यंतं प्राप्यंते तं अस्तमितेत्यर्थः॥ ॥यस्मिन्नखांशे यत्राकाशभागे ग्रहमाला ग्रहपंक्तिः दृश्या भवति॥
तत्र तस्मिन्नेव नभभागे अन्यो द्वितीयो राजा भवति। तथा महान्नतीव परचक्रोपद्रवश्च भवति अपरस्य मद
स्ता त्रभवतीत्यर्थः॥ अथ ग्रहाणां नक्षत्रस्थितानां फलमाह॥ ॥यस्मिन्नृक्षे कुर्युः समागमं तज्जनान् ग्रहा हन्युः
अभिवेदिभिः परस्परममलमयूखाः शिवांतं यां॥ ५॥ यस्मिन्नृक्षे यत्र नक्षत्रे ग्रहाः समागमं संप्रयोगं कु
र्युः॥ तस्य नक्षत्रस्य ये जनाः नक्षत्रकूर्मे नक्षत्रव्यूहे कथिताः नाशयेयुः॥ तथैव ग्रहाः परस्परमन्योन्यं अभिवे
दिनः आच्छाद्य च्छादकभावेनास्थिताः॥ अमलमयूखाः निर्मलरश्मयः तेषामेव जनानां शिवाश्च यस्करा भवंति॥
तथाच॥ म संवेद्य शर्दिनकरं प्राविड्योतितारा ग्रहास्तदा पीडां॥ क्षुत उग्रैः भयानकैः परैश्च परस्परघातैः॥
मन्यार्चिषः प्रसन्नाः संभृतांकुरणाः प्रदक्षिणावर्ताः॥ सुस्निग्धा मलतनवः क्षेमसुभिक्षावहाः स्युः॥ ॥
अथ योगाष्टकस्य नामान्याह॥ ग्रहसंवर्तसमागमसंमोहसमाज संनिपातारव्याः॥ कोशाद्युत्येषामभिधा

[library stamp]

वा॰ सं॰ स्य लक्षणं सफलं॥ ॥ग्रहयोगाः षट्प्रकारा अभिसंबध्यते॥ ग्रहसंवर्त एकः॥१॥ ग्रहसमागमो द्वितीयः २ ग्रहसंमोहस्तृ-
तीयः ३ ग्रहसमाजश्चतुर्थः ४ ग्रहसंनिपातः पंचमः ५ ग्रहकोशः षष्ठः ६ ॥ इत्येवं प्रकाराः षड्योगाः। एतेषां सफ-
११२ लं फलेनसहितं लक्षणमभिधास्ये॥ ॥तल्लक्षणं सफलमाह॥ एकर्क्षे चत्वारः सहपौरेण यायिना यदि वा पंच॥ संवर्तो
नाम भवेत॥ शिखिराहुयुतः ससंमोहः॥ ६॥ ॥पौरः पौरः सामंता यायी सहयायिना समाजाख्याः॥ यमसंख्यसंग-
ताय यदा गच्छेत्तत्कोशाः॥ ७॥ उदितः पश्चादेकः प्राक्चान्यो यदि स संनिपाताख्यः॥ अविकृततनवः स्निग्धा विपु-
लाश्च समागमे धन्याः॥ ८॥ एकर्क्षमिति॥ एकस्मिन्नृक्षे नक्षत्रे चत्वारो ग्रहाः स्थिता भवंति। अथवा पंचैते यदि
यायिनः पौरश्च सह समागतं भवति तदा संवर्तो नाम योगः॥ तत्रैव शिखिकेतुर्यदा वा राहुर्भवति तदा समाजाख्यो
योगः॥ समाजस्याख्या यस्य॥ यमः सौरोऽङ्गारको गुरुः सप्तसंगमे संयोगः पुनः कश्चित् ग्रहश्च आगच्छेत॥ तदा कोशा-
ख्यो योगः॥ ॥उदितः पश्चादिति एकोग्रहः पश्चात्पश्चिमायां दिशि अभ्युदितः आदित्यमंडलान्निर्गतः॥ अन्यो
द्वितीयः प्राक्पूर्वस्यां दिशि अभ्युदितः अर्कमंडलाद्विनिर्गतः॥ एतेषां पंचानां एकस्मिन् स्थाने द्वितीयः पश्चाद्रा-
श्यंतरे यात्वा तौ द्वावेकर्क्षगौ भवतः तदा संनिपाताख्यो योगः॥ एतेषां पंचानां संस्थानाभावे यो ग्रहसंयोगः स-
मागत इति ज्ञेयः॥ तत्र समागमे सर्वग्रहा यदि अविकृततनवो निर्विकारशरीराः स्निग्धा निर्मलाः विपुला विस्तीर्णाश्च
समागमे धन्याः शुभाः अन्यथा अशुभाः॥ तथाच समाससंहितायां॥ ग्रहकोशसंनिपातौ संवर्तसमागमौ स-
माजश्च॥ ससंमोहश्चेतेषां लक्षणमस्मात्समादेश्यं॥ सूर्यसंयोगाद्दृश्यं कालपरः समागच्छेत् सहभवति॥ के-
तुसंज्ञो दुर्भिक्षभयावहो लोके॥ एवमुदितः प्रतीच्यां ग्रहो यदि च अन्योन्यमस्तोऽभिनिर्गतेन॥ स संनिपाता-
ख्यः॥ सह पौरेण च यायी सह यायिनश्च दृश्येत॥ यदि समायुतः समाजाख्यः समयदृशः अथवा यायिना
गताश्चत्वारः पंच वा सह भवेयुः॥ एकर्क्षे संवर्तः शिखिराहुयुतः ससंमोहः अन्यथा समागमो यतः पूर्वमेवोक्तं॥ ११२
प्रत्यर्चिषः प्रसन्नाः संभृतकिरणाः प्रदक्षिणावर्ताः॥ स्निग्धाः सकलतनवः क्षेममनुभिक्षाय ददसि स्युः॥ ॥अथैतेषां
फलान्याह॥ संवर्तसमागमाख्यौ संमोहकोशौ भयदौ जनानां॥ समाजसंज्ञेषु समप्रविष्टौ वैरप्रको-

पो खलु संनिपाते॥ ९॥ संवर्तसमाख्यौ योगौ सौम्यौ न शुभं नाप्यशुभं फलं कुरुत इत्यर्थः॥ यादृशा भावाः पूर्वमभव-
न् तादृशा एव संवर्तसमागमयोरिति॥ संमोहकोशौ प्रजानां लोकानां भयदौ भयं ददत॥ समाजसंज्ञेषु समा-
जाख्येषु समाः शोभनाः प्रजाः समृद्धिप्रदाः॥ यादृशाः पूर्वमभवन् तदा लोकानां भवंतीत्यर्थः॥ संनिपा-
ते वैरप्रकोपाः लोकानां परस्परं वैरं भवति॥ खलु शब्द आगमद्योतनार्थः॥ तथाच काश्यपः॥ संवर्ते संगमा-
मध्यौ संमोहो भयदः स्मृतः॥ कोशाख्यो निष्फलदः समाजाख्यस्तु मध्यमः॥ संनिपाते महद्वैरमन्योन्यमु-
पजायते॥ तथाच समाससंहितायां॥ संवर्तसमागमयोः साम्यं मोहभयानि कोशेख्याम् समासमालसंज्ञेषु वैरा-
णि संनिपातेष्वन्यथाचाचार्यविशेषः॥ समाससंहितायां॥ दुर्भिक्षं तस्करभयं स्वार्थं विरुद्धं ग्रहाः कुर्युः॥ आतंक-
र्व्यांतयोः आजवाख्यौ तौ पापग्रहाणि॥ शस्त्रभयं सागराख्यौ ताः द्व्याक्षुधं च रोगाश्च॥ पशुनाश्य गोवीथ्यां
मृगभाख्यायां च गोपीडा॥ काभिक्षा मितावल्यां गजवीथ्यां च वृत्तसमा मोदा॥ अतिरिक्तमोदं कुर्युः नागाख्या-
यां तु सर्वेषु॥ ग्रहोदयप्रवासैश्च सौम्यसर्वग्रहैस्तथा॥ विचार्य चार्यं मार्गाश्च लोके कर्यात शुभाशुभं॥ ॥७
इति श्रीभट्टोत्पलविरचितायां बृहत्संहिताविवृतौ ग्रहशृंगाटकं नाम विंशतितमोऽध्यायः॥ २० ॥ ॥ ॥
॥ अथ गर्भलक्षणाध्यायो व्याख्यायते॥ ॥तत्रादावेव प्रयोजनप्रदर्शनार्थमाह॥ ॥अन्नं जगतः प्राणाः
प्रावृट्कालस्य चान्नमायत्तं॥ यस्मादतः परीक्ष्यः प्रावृट्कालः प्रयत्नेन॥ १॥ जगतो विश्वस्य अन्नं प्राणा अ-
सवः। यतः प्राणिनां अन्नं विना प्राणा न वर्तंते॥ तच्चान्नं प्रावृट्कालस्य चायत्तं॥ आधीनं यस्मादेवं अतो
स्माद्धेतोः प्रयत्नेनातिशयेन प्रावृट्कालः परीक्ष्यो विचार्य इत्यर्थः॥ अथ तल्लक्षणानि वक्ष्यामीत्याह॥ ॥
तल्लक्षणानि मुनिभिर्यानि निबद्धानि तानीह चेत॥ क्रियते गर्गपराशरकाश्यपवज्रादिरचितानि॥ २॥
तल्लक्षणानि तस्य प्रावृट्कालस्य यानि लक्षणानि चिह्नानि यानि मुनिभिर्वसिष्ठादिभिरारचितानि नानाप्र-
कारैर्निबद्धानि तानि दृष्ट्वा कालप्य॥ तथा गर्गपराशरकाश्यपवज्रादिभिः यानि निबद्धानि रचितानि आदिग्रहणा-
त् बादरायणादिभिः रचितानि तानि सर्वाणि दृष्ट्वा मयेदं प्रावृट्कालस्य लक्षणं क्रियते॥ ॥अथ गर्भल-

वा० सं० क्षणस्य दैवविदः प्रशंसार्थमाह ॥ ॥ दैवविदविहितचिन्तो ध्यानतो योगाभिलक्षणं भवति ॥ तस्य मुनेरिव वाणी न भवतीति
थ्यावृनिर्दिष्टा ॥ ३ ॥ यो दैववित् कालज्ञः विहितचिन्तो नान्यमनाः तत्परः इत्यर्थः ॥ केचिदविहित इति पठन्ति ॥ अविक्षि
प्तचित्तः ॥ मुनि अत्रेर्गात्रेयो गर्भलक्षणं भवति तस्य वागनिर्दिष्टा ऋषिकल्पस्य मुनेः कल्पस्य वाणी वाक् मिथ्या न कदाचन
११८ भवति ॥ ॥ अथ शास्त्रप्रशंसार्थमाह ॥ किंतानः पर मन्यत शास्त्रं यथार्थं हि तत्त्वं ॥ प्रध्वंसिन्यपि काले त्रिका
लदर्शि कृत्स्नं भवति ॥ ४ ॥ अतोस्मात् गर्भलक्षणाख्यात् ज्योतिःशास्त्रात् अन्यत् परं शास्त्रं प्रवरतरं किंचास्ति
किं विद्यते ॥ यच्छास्त्रं ग्रंथं विदित्वा ज्ञात्वा कलियुग प्रध्वंसिन्यपि सर्वशास्त्रविनाशकर्तरि तस्मिन्नपि सर्वशास्त्राणां
लोपिन्यादिनंत्वं सत्यपि विनाशो न विद्यते ॥ तथाभूतमपि त्रिकालदर्शि भूतभविष्यवर्तमानकालस्य वेत्ता भवति ॥
अत्रैव परं स्वमतं चाह ॥ केचिदितिकार्तिकान्मतान्यगर्भादिमासाः स्युः ॥ न तु तन्मतं बहूनां गर्गादीनां मतं स्वस्य ॥ ५ ॥
केचिदाचार्याः सिद्धसेनप्रभृतयः कार्तिकमासस्य शुक्लांतशुक्लपक्षावसानं पूर्णिमांतं समतीत्य अतिक्रम्य गर्भादि
मासाः भवेयुः ॥ इति वदंति कथयंति ॥ तथा च सिद्धसेनः ॥ शुक्लपक्षमतिक्रम्य कार्तिकस्य विचारयेत् ॥ गर्भाणां संभ
वं सम्यक् सस्यनिष्पत्तिकारणं ॥ न तु तन्मतं ॥ बहूनामित्यनेन प्रागुक्तं ॥ कार्तिकं कार्तिकशुक्लांतमतीत्य गर्भदिवसा
स्युरिति ॥ तच्च बहूनां मुनीनां न मतं ॥ तस्माद्गर्गादीनां गर्गप्रभृतिवसिष्ठपराशरऋषिपुत्रकश्यपानां मतं वक्ष्ये ॥
कथयिष्ये ॥ तदाह ॥ मार्गशिरसितपक्षप्रतिपत्प्रभृति क्षपाकर आषाढां पूर्वां समुपगते गर्भाणां लक्षणं ज्ञे
यं ॥ मार्गशीर्षमासस्य प्रतिपत्प्रभृति शुक्लपक्षप्रतिपत् आरभ्य क्षपाकरे चंद्रे आषाढां पूर्वां समुपगते पूर्वाषा
ढां प्राप्ते च शब्दोत्रवार्थे मार्गशीर्षशुक्लपक्षे यत्र पूर्वाषाढास्थश्चंद्रमा भवति ॥ तदारभ्य गर्भाणां लक्षणं ज्ञेयं ज्ञातव्यं ॥
तथा च गर्गः ॥ ॥ शुक्लादौ मार्गशीर्षस्य पूर्वाषाढाव्यवस्थिते ॥ निशाकरे तु गर्भाणां तज्ज्ञा लक्षणं वदेत् ॥ काश्यपः
सिताद्ये मार्गशीर्षस्य प्रतिपत्प्रदिवसे तथा ॥ पूर्वाषाढागते चंद्रे गर्भाणां धारणं वदेत् ॥ अथ धृतस्य गर्भस्य प्रसव ११८
कालमाह ॥ यन्नक्षत्रमुपगते गर्भश्चंद्रे भवेत ॥ स गर्भश्चंद्रवशात् ॥ पंचनवतिशतदिवसे तत्रैव प्रसवमायाति ॥
॥ ७ ॥ यो गर्भो यन्नक्षत्रमुपगते चंद्रे यस्मिन्नक्षत्रव्यवस्थिते चंद्रे भवेत संभवति ॥ स चंद्रवशात् ॥ स गर्भश्चंद्र

कवशात् ॥ प्रसवमायाति ॥ कियता कालेनेत्याह ॥ पंचनवतिशतदिवसे इति ॥ पंचनवतिशतदिवसे अतिक्रांते सार्धैः षड्भि
र्मासैः गते तत्रैव तस्मिन्नेव नक्षत्रे प्रसवमायाति प्रसूयते एतदुक्तं भवति ॥ यन्नक्षत्रमुपगते चंद्रे गर्भः संभूतः तस्मा
त्पंचनवतिशतदिने अतीते तन्नक्षत्रस्थे चंद्रे गर्भः ॥ संभूतः तत्रैव मासनमासवशात् तन्नक्षत्रस्थे प्रसवं याति ॥ नक्ष
त्रचंद्रवशादुक्तं ॥ कथं सावनमवगम्यते इत्युच्यते तत्रैव प्रसवमायातीति वचनात् युगपत् दिवसेषु गर्भदिवसा
त्पंचनवतिशतस्थयुक्तेः प्रदक्षिणे तत्तन्नक्षत्रगतश्चंद्रमा भवति ॥ अन्यथा पंचनवतिशतदिने चंद्रयुतं गर्भनक्ष
त्रे न भवत्येव ॥ तस्मान्निश्चीयते ॥ स चंद्रवशात् चंद्रयुतगर्भलक्षणवशात् तत्र व्यवस्थिते चंद्रे गर्भः प्रसवं या
ति ॥ सावनं मानं प्राक् अस्माभिर्विशेषेण प्रदर्शितं ॥ संख्यातिरिक्तानि तानि सावनमानेन आदित्याख्यानानि ॥ मान
न वा आचार्येण प्रदर्शितानि ॥ युगवर्षमासदिनं रविमानं साधिमासकं चांद्रं इत्यादि ॥ तथा चान्याचार्येण समास
संहितायां स्पष्टतरमुक्तं ॥ पौषादिसितपक्षाद्यः आश्वयुक्शुक्लस्यान्तनिर्दिष्टाः ॥ सार्धैः षड्भिर्मासैः गर्भविपा
कः स्वनक्षत्रे ॥ तस्माद्व्यवस्थितं सावनमानवशात् गर्भप्रसव इति ॥ पुनरपि धृतानां गर्भाणां प्रसवकालमाह ॥
सितपक्षभवाः कृष्णे शुक्ले कृष्णा द्युसंभवा रात्रौ ॥ नक्तं प्रभवाश्चाह्नि संध्याजाताश्च संध्यायां ॥ ८ ॥ सि
तपक्षभवाः शुक्लपक्षसंभूताः परतः पंचनवतिशतदिने गते कृष्णपक्षे प्रसवमायाति ॥ एवं कृष्णपक्षोद्भवाः
शुक्लपक्षेषु संभवा रात्रौ प्रसवमायाति ॥ नक्तं रात्रौ संभवाश्च अह्नि दिवसे प्रसवमायाति ॥ संध्याजाताश्च सं
ध्यायामिति ॥ संध्याजाताः संध्यायामेव प्रसूयंते ॥ प्राक्संध्यासंभूताः अपरसंध्यायां संभूताः
प्राक्संध्यायामिति ॥ तथा च गर्गः ॥ दिवा भवति यो गर्भो स रात्रौ पच्यते सदा ॥ शुक्लपक्षसमुद्भूतः कृष्ण
पक्षे च वर्षति ॥ पूर्णमास्यामथोत्पन्नाः सोमावास्यां प्रवर्षति ॥ अमावास्यासमुद्भूतः पूर्णमास्यां प्रवर्ष
ति ॥ पूर्वसंध्यासमुद्भूतः पश्चिमायां प्रवर्षति ॥ पश्चिमायां समुत्पन्नः पूर्वस्यां च प्रवर्षति ॥ पूर्वाह्णे च सम
त्पन्नः पश्चाद्रात्रौ प्रवर्षति ॥ निशायां पश्चिमे यस्य स पूर्वाह्णे प्रसूयते ॥ दिनार्धे यः समुत्पन्नः स निशार्धे
प्रसूयते ॥ ॥ अथ गर्भाणां विशेषलक्षणं कालनिर्देशं चाह ॥ मार्गशीर्षाद्या गर्भाः मंदफलाः पौषशुक्ल

बा॰ सं॰ जाताश्च॥ पौषस्य कृष्णपक्षेण निर्दिष्टं तैश्श्रावणस्यासितं॥ ९॥ माघसितोत्था गर्भाः श्रावणकृष्णप्रसूतिमायांति॥
माघस्य कृष्णपक्षेण निर्दिष्टो भाद्रपदशुक्लः॥ २०॥ फाल्गुनशुक्लसमुत्था भाद्रपदस्यासिते विनिर्देश्याः॥ तस्यैव कृ
ष्णपक्षोद्भवास्तु येते आश्वयुजे शुक्ले॥ २१॥ चैत्रसितपक्षजाताः कृष्णेश्वयुजि वारिदा गर्भाः॥ चैत्रासितसंभूताः
११० कार्तिकशुक्लेऽभिवर्षंति॥ २२॥ ॥ मृगशीर्षाद्या गर्भा इति॥ मृगशीर्षमासः तत्र जाताः तत्प्रथमपक्षे जाताः
गर्भाः मंदफलाः स्वल्पवर्षदा भवंति॥ प्रथमपक्षः शुक्लः तत्र जाताः संभूताः तथा पौषशुक्लजाताश्च मंदफलाः॥
अस्मिन्गर्भलक्षणे चैत्रसिताद्या मासा निर्देश्याः॥ यथा चैत्रस्य शुक्लपक्षोत्पन्नस्य गर्भस्य कृष्णपक्षे दत्ते पंचमे मा
सि॥ एवमन्येषामपि मासानां परिकल्पना कार्या॥ एवमेतत् चांद्रमानं॥ पौषस्य कृष्णपक्षेणेति॥ श्रावणस्यासि
तं शुक्लपक्षं विनिर्दिशेत्॥ एतदुक्तं भवति॥ पौषस्य कृष्णपक्षसंभूतो गर्भः श्रावणशुक्लपक्षे प्रसवति॥ एवं मा
घसितोत्था माघशुक्लपक्षसंभूताः श्रावणस्य शुक्लपक्षे प्रसूतिमायांति॥ प्राप्नुवंति॥ तथा माघकृष्णपक्षेण
भाद्रपदशुक्लपक्षो विनिर्देश्यो वक्तव्यः॥ तस्यैव फाल्गुनस्य ये कृष्णपक्षोद्भवास्ते आश्वयुक्शुक्लपक्षेऽभिवर्षंति॥
चैत्रसितपक्षजाताः चैत्रशुक्लपक्षसंभूताः ये गर्भाः ते आश्वयुजः कृष्णपक्षे वारिदाः वर्षंति॥ चैत्रासि
तसंभूताः चैत्रकृष्णोद्भवाः कार्तिकशुक्लपक्षेऽभिवर्षंति॥ तथा च गर्गः॥ माघेन श्रावणं विद्यान्नभस्यं फा
ल्गुनेन तु॥ चैत्रेणाश्वयुजं प्राहुर्वैशाखेण तु कार्तिकं॥ शुक्लपक्षेण कृष्णं च कृष्णपक्षेण चेतरं॥ गर्भदिनानि
पर्यंता कार्यं काले विनिश्चितं॥ पराशरस्याप्येवमतं॥ ॥ अथ मेघानां वायोश्च लक्षणमाह॥ पूर्वोद्भूता
: पश्चादपरोत्थाः प्राग्भवंतीति तेनाः॥ शेषास्वपि दिक्ष्वेवं विपर्ययो भवति वायोश्च॥ २३॥ वायोरनि
लस्याप्येवमेव विपर्ययो विपरीतो वाच्यः॥ यथा मेघानां दिङ्नियमस्य उक्तस्तथा वायोरपि वाच्यः॥ यथा पू
र्वोद्भूताः पश्चात् तथा पूर्वोद्भूतो गर्भकाले वायुः प्रवृद्धः पश्चिमायां दिशि भवति॥ एवं सर्वत्र योज्यः॥ तथा च १११
पराशरः॥ माघेन श्रावणं फाल्गुनेन भाद्रपदं चैत्रेणाश्वयुजं वैशाखेन तु कार्तिकं॥ शुक्लेन कृष्णं कृष्णेन शुक्लमिव
सेन रात्रिः सन्ध्या दिव संगर्भाः प्रवर्षंति॥ ॥ अधुना गर्भसंभवलक्षणान्याह॥ आल्हादिमृदुदक्शिवश

क्रादिकभवो मारुतो वियद्विमलं॥ स्निग्धाः सितपरिवेषवृत्तकपरिवृतो हिममयूखार्कौ॥ १४॥ पृथुबहुलस्नि
ग्धघनसूचीक्षुरकलोहिताभ्रयुतं॥ काकांडमेचकाभं वियद्विशुद्धेंदुनक्षत्रं॥ १५॥ सुरचापमंद्रगर्जि
तविद्युत्प्रतिसूर्यकाः शुभा संध्या॥ शशिशिवशक्राशास्थाः शांतरवाः पक्षिमृगसंघाः॥ १६॥ विपुलाः
प्रदक्षिणचराः स्निग्धमयूखाः ग्रहा निरुपसर्गाः॥ तरवश्च निरुपसृष्टांकुरा नरचतुष्पदा हृष्टाः॥ १७॥ गर्भा
णां पुष्टिकराः सर्वेषामेव येऽत्र विशेषाः॥ स्वर्तुस्वभावजनिता गर्भविवृद्ध्यै तमभिधास्ये॥ १८॥ ॥ आल्हादि
मृदुशिवेति गर्भप्रसूतकाले लक्षणानि शुभानि॥ तद्यथा॥ मारुतो वायुः आल्हादि आल्हादकरः मृदुः मृ
दुस्पर्शः॥ उदकशिवशक्रदिक्भवः॥ उदक् उत्तरा॥ शिवा दिक् ऐशानी॥ शक्रदिक्पूर्वा॥ आसामन्यतमसं
भूतः॥ तथा वियदाकाशं विमलं निर्मलं॥ हिममयूखश्चंद्रः अर्क आदित्यः एतौ स्निग्धेन अरूक्षेण सितेन
शुक्लेन बहुलेन घनेन परिवेषेण परिवृतौ व्याप्तौ॥ पृथुबहुलस्निग्धघनमिति॥ यदाकाशं पृथुबहुलस्निग्ध
घनं पृथवो विस्तीर्णा॥ बहुलाः स्निग्धाः अरूक्षाः घना मेघा यस्मिन्॥ तथा घनसूची मेघस्तत्सूच्याकारः॥
क्षुरकः क्षुराकारो मेघः॥ लोहितवर्णो मेघाः॥ तत्संयुक्तं वियदाकाशं काकांडमेचकाभं॥ काकांडं वायसांडः॥
मेचकं बर्हिकंठः समानवर्णः काकांडमेचकवत् आभा कांतिर्यस्य॥ विशुद्धेंदुनक्षत्रं॥ विशुद्धो निर्मलः इंदुश्चं
द्रमाः नक्षत्राणि च भानि यस्मिन्॥ सुरचापमिति॥ तथा संध्याकालो यत्र सुरचापेन इंद्रधनुषा मंद्रेण
मधुरेण गर्जितेन च॥ गर्जितं मेघशब्दः विद्युत् तडित् प्रतिसूर्यो दृष्टायां कः॥ एते युक्ताः शुभा प्रशस्ताः॥ त
था पक्षिणां विहंगानां मृगाणां अरण्यपशूनां संघाः समूहाः॥ शशिशिवशक्राशास्थाः॥ शशी आशा
उत्तरा दिक्॥ शिवा ऐशानी॥ शक्राशा पूर्वा दिक्॥ एतासु आशासु स्थिताः॥ तेन शांतरवाः॥ मधुरस्वना
: अनर्कामिमुखाश्च विपुलाः प्रदक्षिणचरा इति॥ ग्रहा विपुला विस्तीर्णबिंबाः प्रदक्षिणचरान्नक्षत्रा
णामुत्तरमार्गेण चरंति॥ एतत् पूर्वमेवोक्तं॥ भानां यथासंभवमुत्तरेण यतो ग्रहाणां दिवाउत्त
कः प्रदक्षिणं तदिति॥ अतः प्रदक्षिणचराः स्निग्धमयूखाः निर्मलरश्मयः॥ निरुपसर्गा निरुत्पाताः

यथा तरोरङ्कुराणि स्फुटप्रांकुराः॥ इति च मार्गशीर्षप्रतिपत्तिन चन्द्रे पूर्वाषाढासमुदिताः गर्भाणामिति। एवं मनेन प्रका
बारा॰ सं॰ रेणागुरूणादकाः। तेषामेव गर्भाणां पुष्टिकराः। एते च मार्गशीर्षसितपक्षप्रभृति ये शास्त्रेषु यावत्पौष्याः। अ
श्रीमन गर्भलक्ष्ये योन्योविशेषः। सर्वतः स्वभावजनितः विनाभावीयेन कृतु स्वभावेन जनित उत्पादितः। तथा ग
१२० र्भविरुद्धे गर्भाणां च श्रेयविशेषं समभिधास्ये। कथयिष्ये। तथा च वराहः॥ ॥अथ गर्भसंक्रामकमाद्या
दिषु चतुर्षु मासेषु याग्या धारणा॥ न भानभस्यावरुद्धः। तस्यानुबंधा न वा घ्वे ष प्रसवति। तत्र यान्यपि घृतः
स्तनयित्नुवर्षणि गर्भाः॥ तान्लक्षयन्। प्रशस्तान्य। प्रशस्ततयास्य यस्मिन्काले संवेदनशब्दानां स्याप्यभाणां
वर्षलिङ्गानां प्रादुर्भावः। पंचरूपा गर्भाणां धारणा। मासेन स्फुटीभवति॥ अधुनातल्लक्षणमाह। पौषे समार्ग
शीर्षे संध्यारागाः सपरिवेषाः॥ नात्यर्थं मार्गशीर्षे पौषे शीतं चातिहिमपातः॥ १९॥ माघे प्रबलो वायुः तुषारकलु
षद्युती रविशशांकौ॥ अतिशीतं सघनस्य च भानोरस्तोदयौ धन्यौ॥ २०॥ फाल्गुनमासे रूक्षश्चण्डः पवनो
भ्रसंप्लवाः स्निग्धाः॥ परिवेषाश्चासकलाः कपिलस्ताम्रो रविश्च शुभः॥ २१॥ पवनघनवृष्टियुक्ताश्चैत्रे गर्भाः
शुभाः सपरिवेषाः॥ घनपवनसलिलविद्युत्स्तनितैश्च हिताय वैशाखे॥ २२॥ पौषे समार्गशीर्षे इति। पौष
मासे समार्गशीर्षे मार्गशीर्षसहिते। संध्यारागाः संध्ययो रक्तता। अम्बुदा मेघाः सपरिवेषाः परिवेषसंयु
ताः। तथा मार्गशीर्षमासि नात्यर्थं बहुशीतं पौषे नातिहिमपातः शुभः। माघ इति। माघमासि प्रबलः प्रचण्डो
वायुः तथा रविशशांकौ अर्कचन्द्रौ तुषारकलुषद्युती। तुषारद्युतिर्हिमकान्तिः सूर्यः कलुषद्युतिरनिर्मलकान्ति
चंद्र इत्यर्थः। फाल्गुनमास इति। फाल्गुनमासे पवनो वायुः रूक्षः परुषः चण्डस्तीव्रवेगः॥ अभ्राणां मेघानां सं
प्लवाः उद्गमाः स्निग्धाः सूर्यचन्द्रमसोः परिवेषाः सकलश्चन्द्राश्चासकलाविराजिताः कपिलवर्णाः। ताम्रस्ताम्रवर्णः
शुभः प्रशस्तः। पवनघनवृष्टियुक्ता इति। चैत्रमासि गर्भाः पवनेन वायुना। घनैर्मेघैः वृष्ट्या वर्षेण युताः १२०
सपरिवेषाः परिवेषसहिताः शुभाः। वैशाखमासि घनैर्मेघैः पवनेन वायुना सलिलेन जलेन विद्युता त
डिता स्तनितेन गर्जितेन रहिता गर्भा हिताय भवन्ति। तथा च कश्यपः॥ शीतमभ्रं तथा वायुश्चंद्रार्कौ सतुषा
रा।

माघे मासि प्रशस्यतश्चावर्णः प्रभृता इति॥ फाल्गुनेनात्यर्थं घनाः स्निग्धानि मेघा च॥ पुरोवाताश्च चैत्रे मासि भा
द्रपदे शुभं॥ बहुपुष्पफलाः शाखा वाताः कुर्वन्ति गर्जितं॥ ईरितं वर्षं तथाभ्राणि चैत्रेण संयुक्तं तत॥ वहन्ति मरुतो
वाताः पुरःशीघ्रं प्रदक्षिणाः॥ वैशाखे तानि सर्वाणि कार्तिके मासि वर्धते॥ ४॥ तथा च वराहसंहितायां॥ शरत्कालम
गान् मासान् शीतं हिमं वायुमेघवर्जितान्॥ तानि तानि मारुत घनेन आपो तेन वैशाखे॥ शुक्लं पक्षः सितेन
कृष्णानि शारदीनोष्णेन॥ संध्यायां संध्यादिश्चैव प्राक्सृ॥ ॥अथ गर्भकाले सघनानां लक्षणमाह॥ ॥
मुक्तारजतनिकाशास्तमालनीलोत्पलाञ्जनाभासः॥ जलचरसत्त्वाकारा गर्भेषु घनाः प्रभूतजलाः॥ २३॥ तीव्रदिवाकर
किरणाभितापिता मन्दमारुता जलदाः॥ रुषिता इव धाराभिर्विसृजन्त्यंभः प्रसवकाले॥ २४॥ मुक्तारजतनिकाश
इति। अथ यानि मालनीलोत्पलरूकाभासाः॥ तमालवृक्षस्य नीलोत्पलस्य अंजनस्य च सदृशवर्णाः। अतिकृष्ण
वर्णा इत्यर्थः॥ जलचरसत्त्वाकाराः जलचराः प्राणिनः मत्स्यकूर्मनक्रशिशुमारास्तेषां सदृशाः॥ एवंविधा गर्भेषु
दृष्टाः प्रभूतजलाः बहूदकप्रदाः॥ तीव्रदिवाकरकिरणाभितापिता इति। ये मेघाः तीव्रैः प्रचण्डैर्दिवाकरकिरणैर्र
श्मिभिः अभितापिता दग्धदेहाः संतापिताः मंदमारुताः स्वल्पपवना मेघाः एवंविधा ये गर्भकाले दृश्यन्ते।
ते प्रसवकाले पंच न तेनगर्जितेन पानीयं रुषिता रुष्टाः कुद्धा इव धाराभिर्विसृजन्ति उत्सृजन्ति। अतिवृ
ष्टिदा भवंति॥ ॥तथा च समासंहितायां॥ पृथुघनबहुलजलदा सत्त्वान्विताः शुभा गर्भाः॥ स्निग्धाः
सितबहुलपरिवेषपरीता हिमकरोष्णकरौ॥ सर्वाण्येव मार्गशिरादीनि रूपदृष्टान्तराणि विपदपल्लं च त
॥ तदा सुगर्भा स्निग्धा प्रतिसूर्यकमत्स्याः धनुः प्रथमाः परमं शीतरसा मनुष्याः शिर
दिक्समुत्तरश्च॥ अधुना गर्भोपघातलक्षणमाह॥ ॥ गर्भोपघातलिंगानि उल्काशनिपांशुपातदिग्दाहाः॥
क्षितिकम्पखपुरकीलककेतुग्रहयुद्धनिर्घाताः॥ २५॥ रुधिरादिवृष्टिवैकृतपरिघेन्द्रधनूंषि दर्शनं राहोः॥ इत्युत्पा
तैरेतैस्त्रिविधैश्चान्यैर्हतो गर्भः॥ २६॥ गर्भोपघातलिंगानीति। इमानि वक्ष्यमाणानि गर्भाणामुपघातलिं
गानि विनाशचिह्नानि। एते गर्भोपहता विनष्टाः॥ तद्यथा। उल्कापाताः अशनिर्विद्युत् पांशुपातः रजोवर्षणं

वृष्टिः दिक्दाहो दिग्दाहः॥ क्षितिकंपो भूमिचलनं॥ गंधर्वपुरं गंधर्वनगरं॥ कीलकाः तामसकीलकाः केतुः शिखी॥ ग्रह
भा॰रा॰सं॰ युद्धं निर्घातशब्दः॥ तथा रुधिरवर्षणं रुधिरादिवैकृतं विकारः॥ एतैः मांसवसाघृततैलादिवर्षणं॥ परिघलक्षणं वक्
ष्यति॥ परिघ इति॥ मेघालिः स्यात् तिर्यगभा स्फुटोदयअस्तकाले॥ तस्य परिघसंज्ञा॥ धनुषः सुरचापस्य दर्शनं॥ चंद्रार्कग्रह
१२३ णं॥ इत्येवंप्रकारैः उत्पातैः स्वैः स्वैः त्रिविधैः दिव्यांतरिक्षभौमैः मेरुत्पातैः गर्भोपहतो न संभवत्येव॥ एतदुक्तं भवति॥ गर्भस्थि
ते यदि पश्चात् उल्कादीनामुत्पातानामन्यतमो भवति॥ तदा गर्भहतः॥ यस्य मासस्यांतरे पश्चात् उत्पातसंभवो न्यायः॥ त
था च गर्गः॥ अश्मवर्षैः मांसवर्षैः सशोणितवर्षणैः॥ उल्कानिर्घातकंपैश्च वज्रपातस्तथैव च॥ आनर्तैः पुष्पफलं
धारणी यैश्च वर्षणं॥ ग्रहयुद्धेषु घोरेषु हतान् गर्भान् विनिर्दिशेत्॥ ॥तथा च पराशरः॥ तेषु यदा मुहुः स्वाशयोल्का
निपाताः अशनिनिर्घातगंधर्वनगरदिक्दाहश्मवर्षविकारभूचलनपादुर्भावाच्च वर्षति न वर्षेत्॥ पुनरपि विशेष
कमाह॥ ॥स्वर्तुस्वभावजनितैः सामान्यैश्च यैर्लक्षणैर्वृद्धिः॥ गर्भाणां विपरीतैः तैरेव विपर्ययो भवति॥२०॥ ॥
पौषे समार्गशीर्षे संध्यारागोंबुदाः सपरिवेषाः॥ इत्यादिभिर्गुणैः पुष्टः प्रवर्षणे बहुतोयदो भवति॥ अन्यदाह॥ भद्रप
दाद्यविश्वांबुदैवपैतामहेष्वथर्क्षेषु सर्वेषु ऋतुषु विवृद्धो गर्भो बहुतोयदो भवति॥२१॥ भद्रपदाद्यं पूर्वभद्रपदो
त्तरभद्रपदे॥ विश्वदेवतं उत्तराषाढा॥ अंबुदैवतं पूर्वाषाढा॥ पैतामहं रोहिणी॥ एतेषु पंचसु नक्षत्रेषु सर्वेष्वपि
॥ऋतुषु विवृद्धो गर्भः॥ यो पि समार्गशीर्षे संध्यारागोंबुदा इत्यादिभिर्गुणैः पुष्टः प्रवर्षणे बहुतोयदो भवति॥ अ
भूतवृष्टिदः॥ सांप्रतं येषु नक्षत्रेषु गर्भः संभूतो बहून् दिवसान् वर्षति॥ तदाह॥ ॥शतभिषगाश्लेषार्द्रास्वाति
मघासंयुतः शुभो गर्भः॥ पुष्णाति बहून् दिवसान् हंत्युत्पातैर्हतस्त्रिविधैः॥२२॥ शतभिषक् आश्लेषा आर्द्रा स्वा
ति मघा एभ्यः॥ शतभिषगादिभ्यः संभूतो गर्भः॥ एतेषां मध्यात् एकतमेन नक्षत्रेण संभूतः शुभफलदो भ
वति॥ स च बहून् दिवसान् पुष्णाति॥ प्रभूतान्यहानि वृष्टिं नयति॥ पुरुषनिमित्तान्यभिहितानि॥ आह्लादि सप्तद १२३
गिति॥ हंत्युत्पातैः इति हंति त्रिविधैः एभिः न नक्षत्रे विरुद्धो गर्भो पि त्रिविधैः दिव्यांतरिक्षभौमैर्हंतीति
नष्टआत्मानं हंति॥ आपो ददाति॥ एतदुक्तं च॥ हतस्तावत् यैर्बहुदिनानि वर्षति गर्भोपघातलिंगानि॥ उल्काः

शनिपांशुपातदिग्दाह इत्याद्युक्तानि त्रिविधमुत्पातलक्षणं॥ आचार्येण समाससंहितायामप्युक्तं॥ ॥
दिव्यं ग्रहर्क्षजातं भौमं स्थिरचरोद्भवं॥ यतद्भिः द्वा गगनाकारं न परिवेषाद्यं त्रियत्प्रभवं॥ न क्षत्र दश कं चैन तथ
दृश्यात ग्रह दूषितं॥ न गर्भाः संपद्यंते वा सवर्षश्च न वर्षंति॥ ॥अधुनानंतरमकाले वर्षदिवससंख्यानि॥ यम
कं करोति॥ मृगमासादिष्वष्टौ षट् षोडश विंशतिचतुर्युताः॥ विंशतिरथ दिवसत्रयमेकनक्षत्रेण पंचभ्यः॥२३॥
मृगशीर्षमास आद्यो येषां मासानां ते मृगमासादयो मासाः तेषु मृगमासादिषु मासेषु प्राक् पठितानां पंचाना
मन्यतमेन नक्षत्रेण मार्गशीर्षेण मासेन गर्भसंभूतस्तदा पंचनवतिशतदिने अतिक्रांते अष्टौ दिवसान् वर्षति दिव
सः॥ एवं पौषे षट् माघे षोडश फाल्गुने चतुर्युता विंशतिश्चतुर्विंशतिः चैत्रे विंशतिः॥ वैशाखे दिवसत्रयमिति॥ ए
वं शतभिषगादिभ्यः पंचभ्यो मध्यादेकतमनक्षत्रेण रूढिप्रमाणं॥ अमुमेवार्थं ऋषिपुत्र आह॥ मघाः षोडश सं
ख्या मृगशीर्षान्ते फाल्गुने॥ विंशतिश्चैत्रमासेषु त्रयश्चैव माधवे तथा॥ अष्टौ सौम्ये तु षट् पौषे संख्यातास्तु च वर्षति॥
एवमेतावद्दिनानि॥ पंचनवतिशतादिनानि अतिक्रांते न पतंत्यर्थः॥ गर्भो बहुतोयदो भवति॥ अनेनैवार्थादयं यथा
कथंचित्तावर्ताः पानीयसंख्या॥ अधरसंख्यार्थेन समाससंहितायां उक्तं॥ पंचानिमित्तः शतयोजनं तदर्धा
र्धमेकहान्यात॥ वर्षति पंचनिमित्तैः रूपैः कैन यो गर्भः॥ निमित्तानि यानि पंच नायोविशत्याख्यानि॥ पवनसलिलविद्युत्
द्विद्युत गर्जिताभ्रान्वितो यः स भवति बहुतोयः पंचरूपात्मकैः तैः निमित्तान्येकानि परिदृश्यमानाः गर्भमासा
दिषु पंचपंचकानि॥ पौषसमार्गशीर्षे इत्यादि॥ मृगशीर्षाद्या गर्भा मंदफलाः पौषशुक्लजाताश्च॥ नानां
गर्भाणां पौषशुक्लजातानां च मंदफलतोक्ता॥ ततः परादमाह॥ सर्वेषु ऋक्षेषु विवृद्धो बहुतोयदो भवति॥
तदाह॥ पंचनिमित्तैः शतयोजनं तदर्धार्धमेकहान्यतः वर्षति पंचसमंतात॥ रूपैः कैन यो गर्भः॥२४॥
पंचभिर्निमित्तैः संयुक्तो गर्भः आसमंतात् योजनं शतं वर्षति॥ तदर्धतादृश्यनेनैतस्य च योजनशतस्यापरा
मर्शं करोति॥ पंचानांनामत्ानामेकैकनाम तद्दानिसामान्येन अष्टिविधिक्रमेण अर्धमत्र योजनीयं॥ चतु
र्निमित्तः तदर्धं पंचाविंशतियोजनानि वर्षति॥ त्रिनिमित्तो गर्भः तदर्धं पंचविंशतियोजनानि वर्षति॥ द्विनिमित्त

वा॰ सं॰

१२२ स्तद्धैमार्धानि द्वादश योजनानि वर्षति॥ समंताद्रूपेणैकेन यो गर्भः पंचानां निमित्तानामन्यतमेन रूपेणैकेन संयु
क्तो गर्भः स समंतात्पंच योजनानि वर्षति॥ पंचसंख्याग्रहणं पूर्वोक्तानां पवनादीनां वायुद्दासार्थं मतिः॥ अन्ये तु कानीति
न संयुक्तानां गर्भाणां पानीयसंख्यामाह॥ द्रोणः पंचनिमित्ते गर्भे त्रीण्याढकानि पवनेन॥ षड्विद्युता नवाभ्रैः स्त
नितेन द्वादश प्रसवः॥ ३२॥ द्रोणाढकप्रमाणपरिज्ञानपरतयाह॥ आढकाश्चतुरो द्रोणः तेषां विद्यात्प्रमाण
तः॥ धनुःप्रमाणं मेदिन्यां विद्याद्द्रोणाभिवर्षणं॥ मासा विंशांगुलान्याह॥ कुडवस्तु कुमुदाकृति भांडे वर्षति संप्र
णीतोयमाढकवर्षणं॥ तथा चाचार्यः॥ हस्तविशालं कुंडमधिकृत्यांबुप्रमाणनिर्देशः॥ पंचाशत्पलमाढकमानं
मिनुयाज्जलं पतितं॥ द्रोणः पंचनिमित्तेनेति॥ पंचनिमित्तसंयुक्ते द्रोणं गर्भः प्रवर्षति॥ त्रीण्याढकानि पवनेना
नेन वर्षति॥ षड्विद्युता॥ आढकान्यनुवर्तते विद्युता॥ विद्युतासंयुक्तो गर्भ आढकानि षड् वर्षति॥ नवाभ्रैः अभ्रैर्मेघैः
संपृक्तो गर्भो नवाढकानि वर्षति॥ स्तनितद्वादशप्रसवः॥ स्तनितेन गर्जितेन द्वादश आढकानि वर्षति॥ प्रसवकालोऽपि
दिष्ट एव पंचनवतिशतदिने तत्रैव प्रसवमायाति॥ अमुमेवार्थं स्पष्टतरमाह॥ क्रूरग्रहसंयुक्ते करकाशनिमत्स्य
वर्षदा गर्भाः॥ शशिनि रवौ वाशुभसंयुते भे स्निग्धेऽपि कृताः॥ ३३॥ गर्भनक्षत्रे क्रूरग्रहसंयुक्ते पापग्रहाधिष्ठि
ते गर्भाः करकाशनिमत्स्यवर्षदाः॥ करकाः उपलवृष्टिः॥ अशनिर्विद्युत॥ मत्स्या मीनाः तैः संयुक्तं वर्षं ददति॥ शशि
नि चंद्रे रवौ सूर्ये वा तत्र गर्भे स्थिते शुभं॥ गर्भसमयेऽतिवृष्टिर्गर्भाभावाय निर्निमित्तकृता॥ द्रोणाष्टांशेऽभ्यधिके वृष्टे
गर्भः स्रुतो भवति॥ ३४॥ गर्भसमये गर्भप्रसवकालेऽनिमित्तता दृष्टिः॥ निमित्तं कारणं विना यथाप्राप्ता वृष्टा
णामदृष्टकालसमागमे भेदे च॥ पक्षक्षये तीव्रकराय नां गर्भे वृष्टिमतेऽनियमेन चाद्रोणं निमित्त
विहितानि वृष्टिगर्भाभावाय गर्भविनाशाय भवति॥ द्रोणः पलशतद्वयं॥ तस्याष्टांशाः पलानां पंचविंशतिः॥ तदभ्य
धिके वृष्टे गर्भः स्रुतो भवति॥ न तत्प्रसरः इत्यर्थः॥ ॥ आत्मीयगर्भसमये करकामिश्रं ददात्यंभः॥ ३५॥ १२२
पोषाभावी गर्भः प्रसूतकाले पुष्टः प्रसवकाले पंचनवति दिनैः ग्रहोपघातादिभिः उत्पातैः ग्रहोपघातः
कृश्चित प्रसूतकालेऽप्यप्रसूतो भवति॥ यथाभौमः॥ प्राजापत्येऽश्रवणाद इति॥ आदित्यप्रसूनाति दूषितानिष्टं

भौमैरुत्पातैर्दिनश्चपिः॥ स चात्मीयगर्भः समयः पुरस्तादुक्तो यो गर्भः प्रसूतकाले अंभः पानीयं करकामिश्रं उपलसं
युक्तं ददाति॥ अत्रैव दृष्टांतमाह॥ कालेऽन्यं याति यथा चिरकालधृतं पयः॥ पयस्विन्याः कालातीतेन इत्तसलिलं गर्भ
न्यमायाति॥ ३६॥ यथा पयस्विन्याः सक्षीरायाः धेनोः पयः क्षीरं चिरकालधृतं कालेऽन्यं कठिनतां याति गच्छति तद्
तत् कालातीतं सलिलं तल्लं कठिनतामायाति॥ सलिलं उपलतां प्रतिपद्यते॥ अथ गर्भलक्षणं पुष्टिकरमाह॥ पवन
सलिलविद्युद्गर्जिताभ्रान्वितो यः इति पूर्वोक्तं पांचलक्षणं प्रभूतवर्षकरमित्यर्थः॥ ॥३७॥ इति श्रीभट्टोत्पलवि
रचितायां विवृतौ गर्भलक्षणं एकविंशतिमोऽध्यायः॥ २१॥ ॥ ७ ॥ ॥ अथ गर्भधारणाध्यायो व्या
ख्यायते॥ ॥तत्रादावेव तासां लक्षणान्याह॥ ज्येष्ठसितेऽष्टम्याद्याश्चत्वारो वायुधारणादिवसाः॥ मृदुशुभपवना
ऽऽस्ताः स्निग्धा घनस्थगितगगनाश्च॥ १॥ ज्येष्ठसिते शुक्लपक्षे अष्टम्या आद्याश्चत्वारो ये दिवसाः ते वायुधारणादि
वसाः॥ वायुधारणा येषां ते दिवसाः वायुना धार्यते येष्विति येषां संज्ञा न भवति॥ ते च दिवसाः मृदुशुभपवना
ऽऽस्ताः पवनो वायुः मृदुः सुखस्पर्शः शुभः तदुदकशब्दात्कृदिक्भवः॥ स्निग्धः घनस्थगितगगनाः॥ स्निग्धा
रूक्षा घनैर्मेघैः स्थगितं संछिन्नं गगनमाकाशं येषां दिवसेषु॥ अथ तमेव विशेषमाह॥ ॥ तत्रैव स्वात्याद्य
ष्टभचतुष्टयक्रमान्मासाः॥ श्रावणपूर्वा ज्ञेयाः परिस्रुता धारणास्तास्तु॥ २॥ तत्रैव तेष्वेव ज्येष्ठसितेऽष्टम्या
दिस्वातिप्रभृतिकं भचतुष्टयेन नक्षत्रचतुष्केण स्वातिविशाखानुराधाज्येष्ठाख्येन क्रमात् परिपाट्या श्रावणपूर्वकाः
श्चत्वारो मासा ज्ञेयाः॥ श्रावणभाद्रपदाश्वयुक्कार्तिकाख्यास्ताश्च धारणाः परिस्रुताः स्युर्भवेयुः॥ न च वर्जिता
भवंति॥ एतदुक्तं भवति॥ स्वात्यां यद्यां श्रावणे वृष्टिः॥ विशाखायां भाद्रपदे॥ अनुराधायामश्वयुजि॥
ज्येष्ठायां कार्तिके॥ तथा च कश्यपः॥ ज्येष्ठस्य शुक्लाष्टम्यां नक्षत्रे भगवद्दैवते॥ धारणाश्चतुरः प्रोक्ताः स्व
चालसमीरिताः॥ नीलांजननिभैर्मेघैर्विद्युत्स्तनितमारुतैः॥ विस्फुलिंगरजोधूमोऽश्रन्यज्ञादिवाकराः॥
एकरूपाः शुभा ज्ञेयाः अशुभाः संतताः स्मृताः॥ अनार्येस्तनैस्तथा रेः पांडुश्च समीरिते॥ ततस्माल्या
दिनरात्रैः श्रुतिभिः श्रावणाद्यः॥ पारिपूर्णाः शुभास्तास्तु सौम्याः शिवसुभिक्षदाः॥ स्वातौ श्रावणं तुल्या

Dr. BHAU DAJI MEMORIAL

बा॰ सं॰ नक्षत्रं दृग्निर्देशंतं॥ भाद्रपदे तु वृष्टिस्थाने मैत्रे चाश्वयुजि स्मृताः॥ ऐंद्रे तु कार्तिके चैव श्रेयः संप्रवृत्तिरिति च॥ एतेषु पृ
थिव्यां वृष्टिर्जलदाशेभिश्च लक्षणं॥ ॥पुनरपि विशेषमाह॥ युदिता स्फटिकरूपाः शुभास्तनः सितरश्मिनशिवाय
॥ तस्करभयदाः श्रोताः श्लोकाध्याय्य त्र्यामिश्राः॥ धारणाय यक्करूपाः श्चतुर्धापि दिव सेवसरुत्संयुः भवेयुः॥ त
१२३ नः शुभाः सांतयः सविशेषाश्च सदृशाः नश्चेयसे भवंति॥ ताश्च तस्करभयदाः श्रोताः प्रभातिताः कथिताः श्रोताः॥ अत्रा
र्थे चाभिहिताः श्लोकाः॥ वसिष्ठेन परार्थेणाऽऽक्ता॥ कथिता लिख्यंते॥ अथ तानाह॥ सविद्युतः सपृषतः सपांशु
करमारुताः॥ अर्कचंद्रपरिक्लिन्ना धारणाः शुभधारणाः॥४॥ यदानुविद्युतः श्चेत्संताः शुभाश्च प्रत्युपस्थिताः॥ त
दा सर्वसस्यानां वृद्धिश्रेयांस्तुत्व श्रेणा॥५॥ सपांशुवर्षं स्वं सस्यशुनां बालक्रियापिचा॥ पक्षिणां च स्वनाचाचः
क्रीडापांशुजलादिषु॥६॥ रविचंद्रपरीवेषाः स्निग्धानात्यंतदूषिताः॥ वृष्टिस्तदाथ निर्मला सर्वसस्यार्थसाध
काः॥ ७॥ मेघाः स्निग्धा संहताश्च प्रदक्षिणगतक्रियाः॥ तदा स्यात्संहताद्वृष्टिः सर्वसस्याभिवृद्धये॥८॥ सविद्युत
इति॥ एवंविधा धारणाः॥ शुभधारणा भवंति॥ कीदृशाः सविद्युतः तडिता सहिताः॥ सपृषतः सजलकणाः
सपांशुकरेण॥ वायुसमूहेन योमारुतो वायुर्वर्ततेतेन सहिताः॥ सदाकेंद्राभ्यां परिक्लिन्नास्तेन॥ संघाच्छादिता
तदा च चंद्राच्छादितोयासक यदानुसविद्युतइति॥ यदाश्विन्ना शोभनाश्च ग्रुता भवंति॥ ताश्च शुभाशाः प्रत्युपस्थि
ताः शुभायाः आरावदिशाः॥ शुस्निग्धाभ्राः दिशाः ताभ्यः प्रत्युपस्थिताः प्रत्युपस्थिताः तदा निवनशणः पतितस
स्यानां निःशेषशान्यानां वृद्धिसंपत्तिः स्यात्॥ सपांशुवर्षा इति॥ सपांशुवर्षाः प्रचूर्णपांशुवर्षेण वर्तंते॥ याता
: सपांशुवर्षाः सापः अद्भिः सहिताः॥ अथ चाबालानां शुश्रूनां शुभाः क्रियाः शोभना चेष्टाः॥ शुभेन कर्मणा
नगरभयदेन क्रीडनं॥ पक्षिणां पतंत्रिणां सुस्वनाः शोभनशब्दाः॥ वाचो मधुरवाक्संभाषणं॥ तथा पांशुजला
दिक्रीडनं॥ पांशुना रजसा जलेन वा॥ आदिग्रहणात् शोभनकर्मादिना॥ रविचंद्राभ्यां सूर्यचंद्राभ्यां परिवेषाः १२३
स्निग्धाः अरूक्षाः नात्यंत दूषिताविरताः॥ तदापि सर्वसस्यार्थसाधका वृष्टिर्भवति॥ तया वृष्ट्या सर्वसस्याना
मर्थसिद्धिर्भवति॥ सर्वाणि सस्यानि निष्पद्यंते॥ मेघाः स्निग्धा इति॥ यदा एवंविधाः घनाः मेघाः दृश्यंते तदा सर्व

सस्यानां वृद्धयोगः शेषसस्यानामभिवर्धनाय महतांय भूतां वृष्टिः स्यात् भवेत्॥ कीदृशाः मेघाः स्निग्धाः अरू
क्षाः संहता घनाः प्रदक्षिणगतक्रियाः प्रादक्षिण्येन गतिक्रिया येषां ते पूर्वस्यां स्थिता दक्षिणां व्रजंति॥ दक्षिणस्याः
पश्चिमायां पश्चिमायाः स्थिताः उत्तरस्यां व्रजंति॥ उत्तरस्याः पूर्वस्यामिति॥ ॥ इति श्रीभट्टोत्पलविरचितायां बृ
हत्संहिताविवृतौ धारणायोगो नाम द्वाविंशोऽध्यायः॥२२॥ ॥ श्री॥ ॥ अथ प्रवर्षणाध्यायो व्याख्यायते॥ ॥
तत्रादावेव लक्षणमाह॥ ॥ ज्येष्ठायां समतीतायां पूर्वाषाढादिसंप्रवृष्टेन शुभाशुभं वा वाच्यं॥ परिमाणं चांभसां तज्ज्ञैः॥
ज्येष्ठमासस्य पूर्णिमाऽतीतस्यां समतीतायां अतिक्रांतायां पूर्वाषाढादिसंप्रवृष्टेन प्रवर्षितेन तज्ज्ञैः पंडितैः अंभ
सो जलस्य परिमाणं शुभमशुभं वा वक्तव्यं॥ तथा च गर्गः॥ ज्येष्ठमूलमतिक्रम्य मासि प्रतिपदं ततः॥ वर्षामुखेष्ट:
तानार्थी निमित्तान्युपलक्षयेत॥ अधुनाढकप्रमाणार्थमाह॥ हस्तविशालं कुंडकमधिकृत्यांबुप्रमाणनिर्देशः
॥ पंचाशत्पलमाढकमनेन मिनुयाज्जलं पतितं॥ ॥ हस्तविशालं कुंडमधिकृत्य परिवर्तुलं जलांबुप्रमाणनिर्दे
शो जलप्रमाणं कथनं कार्यं॥ पंचाशत्पलमाढकमनेन प्रमाणेन पतितं जलं मिनुयात् मानयेत्॥ एतदुक्तं भ
वति॥ हस्तविशालं कुंडकं तथांत॥ द्वे संस्थाप्य तत्र यत् जलं पतितं तन्मानयेत्॥ तद्यदि पंचाशत्पलं पतितं भवति
तदाढकोऽयं वृष्टः॥ यत उक्तं॥ पंचाशत्पलमाढकं चतुर्भिराढकैर्द्रोणः॥ तथा च समाससंहितायां॥ ज्येष्ठायां समती
तायां पूर्वाषाढादिसंप्रवृष्टेन॥ शुभमशुभं वाच्यं परिमाणं चांभसा तज्ज्ञैः॥ तत्र वर्षणप्रमाणमाह॥ ॥ येन धार
त्री मुद्रा जनिता बिंदवः तृणाग्रेषु॥ दृष्टेन तेन वाच्यं परिमाणं वारिणः प्रथमं॥ येन वृष्टेन धात्री मुद्रा मुद्राव
गत धूलि जाता॥ ॥ अथवा तृणानामग्रेषु प्रांतेषु बिंदवो जलकणाः दृश्यंते तेन वृष्टेन पूर्वाषाढादौ प्रथमं येन न
क्षत्रेण वर्षणं भवति॥ तेनैव जलप्रमाणं कल्पनीयं॥ नापरेण नक्षत्रेण वर्षणोपि सति॥ भवत्स्वपि गर्भेषु
कारणं स्यापि मतां श्रयादिव र्षण कालेनवर्षति तदा प्रसवकाले वृष्टिर्न स्यात्॥ अतएव मुच्यते॥ परिमाणं चां
भसः कालेनवाच्यं॥ अन्ये च मतांतरमाहुः॥ केचिद्यथाभिवृष्टं दश योजनमंडलं वदंत्यन्ये॥ गर्गवसिष्ठपराशरम
तद्वादशयोजनपरं॥ ४॥ केचिन्मुनयः कश्यपप्रभृतयो यथाभिवृष्टं वदंति॥ प्रकर्षेण कालेयोजन दशकं वृष्टेनर्षा

कालेः शुक्रस्थनं ना स्मान दृनमिति॥ तथा च देवलः॥ प्रवर्षणस्य द्वादशदशयोजनमंडलं॥ वर्षाकाले समासाद्य ना सर्वोत्र
बा॰ सं॰ दृश्यते॥ गर्गवसिष्ठपराशराणामनमेतत॥ यथाह द्वादश योजनानि प्रवर्षणकाले समंताद्द्वादश योजनं मंडले
वृष्टे वर्षाकालेः शुक्रस्थनं न सर्वं॥ ना स्मादृनामिति॥ तथा च गर्गः॥ आषाढादिपूर्वाषु योजन द्वादशात्मके प्रदेशे
१२४ शोभनं वर्षेत् वर्षाकालं न चानिर्दिशेत॥ पुनरपि विशेषमाह॥ येषु च भेषु भिषक्षं भूयस्तु सैव वर्षति॥ सा न वर्षति नास्या
दृषु स्वर्थसंवत्सरत द्वाल नारंभिः॥ येषु च पूर्वाषाढादिषु भेषु नक्षत्रेषु कृतिबिन्दुः प्रवर्षकाले भूयस्तेष्वेव नक्षत्रेषु प्रायो वा
हल्पेन वाभिवर्षति॥ प्रसवकाले आप्यादिषु वर्षा द्वादशिष्वन क्षत्रेषु यदि न वृष्टं तदा ल नाल्पं॥ प्रसवकाले नभवे
तीति॥ अधुना नक्षत्राणां वृष्टिप्रमाणमाह॥ ॥ हस्ताप्यसौम्यचित्रापौष्णधनिष्ठासु षोडश द्रोणाः॥ शतभिषगैन्द्रस्वा
तिषु चत्वारः कृत्तिकासु दश॥ ५॥ श्रवणे मघानुराधाभरणीमूलेषु दश चतुर्युताः॥ फाल्गुन्यां पंचकृतिः पुनर्वसौ विं
शति द्रोणाः॥ ६॥ ऐन्द्राग्न्याख्ये वैश्वे च विंशतिः सार्पे दश अधिकाः॥ अहिर्बुध्न्यार्यम्णप्राजापत्येषु पंचकृतिः॥ ७॥
पंच दशाजैकपादे कथिता वाजिनि दश द्वौ च॥ रौद्रेऽष्टादश कथिता द्रोणा निरुपद्रवेष्वेषु॥ ८॥ ॥ हस्ते तथा आ
प्ये पूर्वाषाढायां सौम्ये मृगशिरसि चित्रायां पौष्णे रेवत्यां धनिष्ठायामेतेषु नक्षत्रेषु षोडश द्रोणा वाच्याः॥
शतभिषजि ऐन्द्र्यां ज्येष्ठायां स्वातौ चत्वारो द्रोणाः। कृत्तिकायां दश द्रोणाः॥ श्रवणे मघायामनुराधायां भरण्यां मूले
एतेषु चतुर्दश द्रोणाः॥ ऐन्द्राग्न्ये विशाखायां वैश्वे उत्तराषाढायां विंशति द्रोणाः॥ सार्पे आश्लेषायां दश
अधिकाः त्रयोदश द्रोणाः॥ अहिर्बुध्न्ये उत्तरभाद्रपदायां आर्यम्णे उत्तराफाल्गुन्यां प्राजापत्ये रोहिण्यां एतेषु पंचकृति
पंचविंशति द्रोणाः॥ अजैकपादे पूर्वभाद्रपदायां पंच च पंचदश द्रोणाः॥ एते प्रवर्षणकाले द्रोणा नक्षत्रेषु कीर्तिताः॥
वाजिनि अश्विन्यां दश द्वौ च द्वादश द्रोणाः॥ रौद्रे आर्द्रायां अष्टादश द्रोणाः॥ य एते प्रवर्षणकाले द्रोणा नक्षत्रेषु ताः॥
ते यदि निरुपद्रवेषु उपद्रवरहितेषु वाच्याः॥ तथा च समाससंहितायां॥ ॥ हस्ताप्यसौम्यचित्रासु तिथिरसा शक्र १२५
सितिहितानलरसयुक्ताः षड्नाश्वे विषयसमजलातिथिभिः॥ तिथिरसरसैश्च विश्व दश भुताः षड्विंशनाश्च
॥ जलेष्वाह दश कसहितानलरसयुतः षड्नाश्च॥ विषयतिथिषट्सहिताश्चाश्विन्यादिषु जले द्रोणाः॥ ॥

॥ अत्रैवानिष्टयमाह॥ रविरविसुतकेतुपीडिते भे क्षितितनयत्रिविधाद्भुताहते च। भवति हि न शिवं न चापि वृष्टिः
शुभसहिते निरुपद्रवे शिवं च॥ रविरादित्यः॥ रविसुतः शनैश्चरः॥ केतुः शिखी॥ केतुग्रहणेन राहुरपि॥ एवम
न्यतमेन भेन नक्षत्रे पीडिते उपहते॥ तत्र पीडितेनेत्यर्थः॥ तथा क्षितितनयेन अंगारकेण आहते ताडिते अभि
हाते॥ वक्रगतिवक्रमध्यमध्यगमनयोगतारकाभेदनामन्यतमेन त्रिविधेनाद्भुतेन उत्पातेन दिव्यान्तरिक्ष
भौमेन वाहतेन संयुक्ते निरुपद्रवे उत्पातरहिते प्रवर्षणं स्थैर्यश्च भवति॥ ॥ तथा च गर्गः॥ सूर्यसौराहतेनार्के
नक्षत्रे भौमघातिते॥ उत्पातैस्त्रिविधैर्वापि शिवं हन्यात् केतुना पि वा॥ अवृष्टिमशुभं विद्यात् विपरीते शुभं वदेत॥
॥ ॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ प्रवर्षणं नाम त्रयोविंशोऽध्यायः॥ २३ ॥ ॥ ॥ ॥
अथ रोहिणीयोगाध्यायः॥ ॥ तत्रादावेव प्रदर्शनार्थमाह॥ कनकशिलाचयविवरतरुजकुसुमासंगमधुकरानु
रुते। बहुविहगकलकलरवयुततीर्णजलमंद्रवनोपवने॥ १॥ सुरनिलयाग्रशिखरिशिखरे हिमवति नारदाय यथाना
ह॥ गर्गपराशरकाश्यपमयाश्च शिष्यसंघेभ्यः॥ २॥ तानवलोक्य यथावत्प्राजापत्येंदुसंप्रयोगार्थानि॥ अल्प
ग्रंथेनाहं तानि वाभ्युद्यतेऽवतुं॥ ३॥ कनकशिलाचय इत्यादि॥ प्राजापत्येंदुसंप्रयोगार्थानि॥ प्राजापत्यं
रोहिणी॥ तस्यां इन्दुनाचंद्रेण सह संप्रयोगः समागमः तत्र यान्यर्थानि फलानि शुभाशुभानि तदाह॥ नारदो महामु
निः तस्मै प्रोक्तवान् कस्मिन् स्थाने॥ सुरालयशिखरिशिखरे मेरुपर्वतशृंगे॥ किं विशिष्टे उपवने उद्याने तत्र
कीदृशे। उपवने॥ कनकशिलाचयविवरजेति॥ कनकशिलाः॥ सुवर्णपाषाणाः॥ तासां निचयः संचयः तत्र या
नि यानि विवराणि छिद्राणि तेषु ये जाता तरवो वृक्षाः तेषु यानि कुसुमानि पुष्पाणि तेषु मधुकराणां भ्रमरा
णां य आसंग आसक्तिः श्लेषः। तेषां अनुरुतं शब्दो यस्मिन्नुपवने॥ तथा बहुविहगानां नानाप्रकाराणां पक्षि
णां॥ तेषां कलकलः आलापः तेन कलरवयुते तस्मिन् विद्याधर्यस्तासां गायमानानां योऽसौ मंद्रो मधुरः स्वरः शब्दः स यत्
त्रोपवने तस्मिन्॥ तथा गर्गपराशरकाश्यपाश्च शिष्यसंघेभ्यः समृद्ध्यै योगानाहुः कृतवंतः। तान् सर्वा
न् अवलोक्य यथावत् स्फुटं अल्पग्रंथेनाह॥ प्राजापत्येंदुसंयोगात् तत्कुं गदितुं अभ्युद्यतोऽस्मीति॥ ॥

अथरोहिणीयोगः॥ कस्मिन्कालेऽतिपर्ययः संचार्यते॥ तदाह॥ प्रतिसमाषाढतमिस्रपक्षे क्षितिपाकरेणोपगतेसमी
वा॰ सं॰ क्ष्य॥ वक्तव्यमिष्टं तु गतीशवं भवाशा लोपदं॥ तत्प्रवृत्तिलक्षणं॥४॥ योगोयथानागतएवचान्यः संक्षिप्तयोगः त्व
णोमयोक्तः॥ चंद्रप्रमाणद्युतिवर्णमार्गैरुत्पातवातैश्चफलानिगाह्यं॥५॥ आषाढमासस्यतमिस्रपक्षेप्रतिरोहि
१२५ हिणी॥ क्षितिपाकरेणचंद्रेणोपगतेसंयुतेदृष्ट्वा द्रष्टव्यद्रष्टुःदेवज्ञेनशास्त्रोपदेशात ग्रंथागमात सप्ततीत्र
नस्यदृष्टंशुभमशुभमनिष्टंवाच्यंकथनीयं॥ योगोयथेति॥ यथायेनप्रकारेणयोगोरोहिणीयोगोऽना
गतोभावीएववाच्यः॥ कथनीयः॥ असंक्षिप्तायोगानक्षत्रयोगोमयाकरणेनसिद्धांतकाख्येमयाकथितः॥
बुध्वा॥ इत्थंविशेषंकालाताराशशांकविवरंनसमंदृष्टनवतत्वं॥ पश्चात्ताराशमयोगः इत्यादिग्रंथेनेति॥
तथाचब्रह्मसिद्धांते॥ ध्रुवकादूनःपश्चात् अधिकंप्राकृतःस्यथायोगः॥ अन्यग्रहमेकत्वनचंद्रप्रमाण
मिति॥ चंद्रस्यप्रमाणेनद्युत्याकांत्यामित्येनसिताद्विकेनमार्गेणपवांसिकअहमुदिशसंक्षिप्तेनकथयेति:
नकालंजानेरुत्पातश्चाभिचारितराखिलेश्चशुभाशुभंफलंनिगादीवाच्यं॥ ॥ अथतत्रविधानमाह॥पुरा
दुदक्प्रागुत्तरस्तापिवाडकंस्यद्विपितस्तत्रहुताशनतत्परः॥ ग्रहानसनक्षत्रगणान्समान्तिस्वतसधूपपुष्पबलि
भिश्चपूजयेत॥६॥ सरत्नतोयौषधिभिश्चतुर्दिशंसमन्वितान्पादितैःसुपल्लवैः॥ अकालमूलैःकलशैरलं
कृतंकुशास्तृतंवेदिकमत्रसंस्थितः॥७॥ पुरान्नगरात् उदक्उत्तरस्यांदिशिप्रायनरकंभूमिभागःतस्मिन्ध्विजः
तोप्राग्लग्नापश्चदीपितोद्विजचयंक्रियात्पुरोहितःस्सहुताशनतत्परः अग्निहवनतत्परः॥ तथाचगर्गः॥ नगरा
दुत्तरस्यांदिशिप्रागुत्तरस्यांदिशि॥ विविक्तेस्थलेशोभनेदेवतायतनेतथा॥ ग्रहान्नक्षत्रेदेवताःकलशोपचारिकैः
द्विजः॥ निमित्तकुशलोधीरःशुक्लांबरसमाहितः॥ २॥ उपवासमथारोहिण्यांसंयतव्रतः॥ नतोद्दयस्य
यस्मिन्दिनेसंयुज्यते ग्रहो॥ प्राक्प्रत्यावसंनचततोनामितान्युपकल्पयेत॥ ग्रहानसनक्षत्रगणान्सम्यक्रसस
हितान्समर्चयेत॥ सम्यक् अर्चयेत॥ आदित्यस्यपुष्पधूपैः पुष्पधूपसहितैःउपहारैःपूजयेद्देवेग
त॥ वर्थंवेदिकांस्थंडिलमावसेत॥ सरत्नतोयौषधिभिरिति॥ रत्नमणिभितोयैर्जलैरौषधीभिःसुगंधद्रव्यैः १२५

सहदूर्वेवर्तेते॥ इदंकुंभाश्चतुर्दिशंअलंकृतंशोभितंअन्यत॥ कुंभैर्भृतैः तरुप्रवालोपाद्वितैः तरूणांवृक्षाणांये
प्रवालाःपल्लवाः तैःसमंतात्प्रियादिताःआच्छादिताः॥ तथासुपल्लवैःशोभनंकृत्वा चंदनादिभिश्चर्चितैः॥ अका
लमूलैः अकालानिमृन्मयानियेषां॥ अग्निपाकेनकृष्णवर्णाभासोःधायेषांनमीत॥ कीदृशं स्थंडिलं॥ कुशास्त
तंदर्भैराच्छादितं॥ ततस्तत्राकिंकुर्यादित्याह॥ आलभ्यमंत्रेणमहाव्रतेनबीजानिसर्वाणिनिधायकुंभे॥ स्था
प्यानिचामीकरदर्भतोयैर्होमामरुतवारुणसौम्यमंत्रैः॥८॥ ततःसर्वाणिबीजानिमहाव्रतेनमहाव्रतनाम्ना
मंत्रेणालभ्यअभिमंत्र्यकुंभेघटेनिधायनिक्षिप्यआप्लाव्यानिनिमज्जनीयानि॥ कैःतोयैःजलैःकीदृशैः
चामीकरैःदर्भतोयैः॥ चामीकरंसुवर्णं॥ दर्भाःकुशास्तैश्चविवर्धितैर्युक्तैः॥ तथाहोमोऽग्निहोमः॥ मरुत्वारुणसौम्यमं
त्रैः॥ मरुद्वायुःवरुणोयादसांपतिः॥ सोमश्चंद्रः॥ एतेषांमंत्रैर्होमःकार्यः॥ केषांचत्वाद्वः॥ होमाश्चवारुणैःसौम्यमंत्रैः
नरकालो॥ वायव्यवारुणसौम्यमंत्रैर्होमःप्रदातव्यः॥ ततःकिंकुर्यादित्यत आह॥ सुश्लक्ष्णपताकांमसितांविदध्यात्दं
डप्रमाणं॥ त्रिगुणांशिकृतांच॥ आदौकृतेनदृश्यद्दूणेनभस्मानयाद्यः तथायोगगतेनशशांके॥९॥ सुश्लक्ष्णामसृणांनुग्र
तांपताकांध्वजंसितांश्वेतवर्णांविदध्यात्कुर्यात्॥ तांचदंडप्रमाणांचतुर्हस्तसंमितांचतुर्हस्तोदंडः॥ तथाच
पुराणे॥ चतुर्हस्तंधनुःस्मृतं॥ चतुर्हस्तायुगमात्रेतुल्यान्येतानिचांगुलानित॥ एवंचतुर्हस्तांपताकांत्रिगुणांकृ
तां॥ त्रिदंडप्रमाणांद्वादशहस्तांकृतामित्यर्थः॥ एतदुक्तंभवति॥ द्वादशहस्तांकाष्ठेतांनिबद्ध्रीयात॥ आदौप्रथ
मंदिक्प्रदूणेकुसाधनेवृतेनयापताकयानभस्वान्वायुःशशांकेचंद्रेरोहिणीयोगंगतेप्राह्यपरीक्षितव्यः॥
कस्यांदिशिवहतीति॥ नचास्यसाधनंआचार्येणपंचसिद्धांतिकायामुक्तं॥ तद्यथाशंकुचतुर्विंशतिरचितमध्य
देशेशंकुंदद्यात॥ ततःपूर्वकपालेसवितारस्तस्यशंकोश्छायांतत्रतपरिधायत्रनिर्गमनंकरोतितत्राबिंदुंदद्यात॥
संध्याप्यबांदकंभवति॥ एवंछायाप्रवेशनिर्गमादपरेद्यासिद्धिःततःस्तस्यांतदोःमस्तकात्मात्संत्रप्र
सार्यरेखांकुर्यात॥ साचप्राचीअपरेरेखाभवति॥ यवाज्ञयाम्योत्तरसाध्येयाम्योत्तरदक्षिणोत्तरेचयाव
तसाध्यतेयत्वस्यसाधनंप्रदृश्यतेतंत्रेकोबिंदुंकृत्वातुल्यंविंदुपादयताम्मत्रेणचतमात्रुत्वेत॥ एवयत

दूरस्य परस्परानुप्रवेशात मध्ये यथा कारउ लक्षणं तस्य मध्यगतो रसाकार्थी साच साधनं कृत्वा पूर्वदिक्प्रदूर्णितमध्य
बा॰ सं॰ पताकानि धारयेत॥ तया रोहिण्या योगं गते आषाढे चन्द्रे वायुर्ग्राह्यः॥ कस्याद्दिश उद्भूतः कस्यां यातीति॥ ॥अथवा
तेन शुभाशुभमाह॥ तत्रार्थमासाः प्रदूरे विकल्प्याः वर्षाणामितोद्दिवमासदैर्ग्यः॥ सव्येन गच्छन् शुभदः संदेव यस्मिन्
१२६ प्रतिष्ठा बलवान् स वायुः॥१०॥ तत्र तस्मिन् रोहिणीयोगे प्रदूरे रूपा प्राग्भागे रर्धमासाः पक्षाः विकल्प्याश्चिन्त
नीयाः॥ किमर्थं च यानि मितं च यानि समयतानार्थं॥ एतदुक्तं भवति। यस्मिन् प्रदूरो गोत्रे रोहिण्यामरूपं द्रमायुः यतनक्रम
वर्द्दिश्यात प्रथमं प्रदूरं यावत्‌ शोभनो वातो भवति तदा श्रावणस्य प्रथमं पक्षं देवो वर्षति। अशुभेन वातेन अनावृष्टिः
कल्या॥ तत्रैवं निर्धं द्वितीये प्रदूरे शोभनो वातो भवति तदा श्रावणस्य द्वितीयं पक्षं वर्षति॥ ॥ तृतीये भाद्रपदस्य प्रथमं
पक्षं वर्षति॥ चतुर्थे भाद्रपदस्य द्वितीयं पक्षं वर्षति। गत्रेऽप्रथमप्रदूरे शोभने वाते अश्वयुजः प्रथमं पक्षं वर्षति॥ द्विती
ये द्वितीयं॥ तृतीये प्रदूरे कार्तिकप्रथमपक्षं चतुर्थे द्वितीयं पक्षं वर्षति॥ अशुभे वाते अनावृष्टिः॥ एवं यथा संभवं बोध्यो
दिवसास्त दैर्ध्यगतेः॥ तदैवं प्रदूरांशैः दिवसावाप्याः॥ प्रदूरेणानयदिवसं॥ तद्दैर्घ्येन माधर्मस प्तदिवसानि प्रदूरचतुर्थ
भागेन पादोनानि चत्वार्येव मासादिकेचित॥ ते चात्र मासाः प्रदूरे विकल्प्याः इति पठंति। तेनानंतरोक्तेन न भवंति त्रिया
मप्रदूरे मास विकल्प्याः॥ निश्चयाः कर्तव्या इत्यर्थः॥ वर्षाणि मितं वर्षसमयानि मितं दिवसास्त दैर्घ्यस्य प्रदूरांशैः
त्रिभागैर्दिवसा विकल्प्याः॥ प्रदूरस्य त्रिंशत्तमो भागो दिवस इति। यद्दिवसांश्च सूर्योदयात प्रभृति प्रदूरं यावत शोभ
नो वातो वहति तद्दिवस श्रावणमाससमग्रं वर्षतीति॥ एवं द्वितीयप्रदूरे भाद्रपदं॥ तृतीये श्वयुजं॥ चतुर्थे कार्तिकं॥
एवमशोभनेन वातेन अनावृष्टिः॥ तदंशैर्दिवसावाप्याः॥ एतदेव व्याख्यानं शोभनं॥ तस्मादनंतरमुक्तमाचार्येण ग
र्गपराशरमतं च स्थिताः। गर्गादीनां च मतं॥ ॥तेनात्र मासाः प्रदूरे विकल्प्याः नार्धप्रदूरे॥ तद्दूनाद्या दृष्टं चतुः
र्धा दूनविभज्य च॥ द्वितादितार्थमासानां चतुर्णामुपलक्षयेत॥ आचार्येण रोहिण्याम् नक्षत्रयोगे नैव॥ आषाढ्या १२६
मस्यात दशउक्तः॥ गर्गोक्तेवात चक्रप्रदूरे मासाः॥ तथा च गर्गः॥ सकलप्रयानाहू॥ द्विनार्धमथवाप्यायुर्धामा
सोत वर्षति॥ चतुर्भागेन मासस्तु शक्रोऽत्यर्थं प्रवर्षति॥ १॥ पूर्वे चेदार्धदिवसे पूर्वौ मासौ तु वर्षति॥ अन्त्यस्तु

पश्चिमे भागे पश्चिमौ द्वौ तु वर्षति॥ २॥ अथ पर्वं स्पतिकस्य भागं यत पश्चिमं ततो मध्यान्हे वाति चेन्नवायो मध्यमौ मासौ तु
वर्षति॥ ३॥ भाद्रपदश्वयुजौ च मासौ द्वौ तु मध्यमौ॥ एतयोः परिनिर्दिष्टं तावर्षा चान्नस्य संपदः॥ तथा च ऋषिपुत्रः॥
दिनार्धवाति नैऋत्य वायुर्यदि वाति मूलक्षणः॥ मासास्तु श्रावणाद्याये ते वां संपाद्दुनार्द्रं ज्ञेत॥ तस्मात्तेनात्र मासा इति शोभ
नः पातः॥ सव्येन गच्छन् शुभदः संदेवसव्येन प्रादक्षिण्येन गच्छन् व्रजन् सदा सर्वकालं शुभदः॥ यथा पूर्वस्याद्दिश्या
आग्नेय्यां याति॥ ततो दक्षिणगतो नैरृतां ततः पश्चिमां॥ अनेन क्रमेण॥ अर्थाद्देवअप सव्येन गच्छन् शुभदः॥ य
स्मिन्प्रतिष्ठा बलवान् स वायुः॥ इति॥ यस्मिन् प्रतिष्ठा बलवान् तेन शुभाशुभं वदेत॥ कुनिर्दयं या वक्षते॥ आदित्या
सन येन वायुः संप्रति विभ्रंश शोभनं॥ तथा च ऋषिपुत्रः॥ यं वान्मारुतं चापि वश्याद्वायुः प्रतिवायति॥ तत्र यो बलवान् वा
युः तस्यैव फलमादिशेत॥ अन्यत शुभाशुभतानमाह॥ ॥कृतेतु योगे कुंभितानि यानि संतोदबीजानि धृतानि कुंभे॥
ये षां हि योगे कृशितस्तदेषां मयानुवृद्धिं समुपैति न्यासः॥ ११॥ कृतेतु योगे ततो रोहिण्यास दृशा योगे यानि बीजा
नि कुंभे प्राक्स्थापितानि तेषां तु यानि अंकुरितानि॥ इद्दासिन्नेवर्षं संति भवंति॥ द्वियस्मात तेषां कुंभाश्रितानां यो सोभा
गोंकुरितः स्तदंशभागः तमेव वृद्धिं समुपैति प्राप्नोति॥ नान्य इति॥ ॥अथ रोहिणीयोगे यद्भवतड़ास्यते तदाह॥
शांतपक्षि मृगरावितादृशोतोऽभि मंडं विपदो नादितानर्मलः॥ गम्यते रोहिणी रोहिणीगते मघयारु तपकानिक
म्यतः॥१२॥ गोशिनश्चंद्रे रोहिणीयोगं गते इदमुदं गम्यते॥ शांतैरनाभिमुखैर्भैरवैः स्वनैश्च॥ पक्षिभिर्विहंगैः
मृगैः अरण्यपशुभिर्वृद्धाः आशा॥ विरावितः नाद्यैः कारिताः॥ वियदाकाशं निर्मलं विरजस्कं॥ अनिलो वायुः अ
निंदितः अकुत्सितः॥ तथा च गर्गः॥ योगे ह्यनुक्षतो वातान्हादयंतः सुखप्रदाः॥ प्रदक्षिणाः श्लक्ष्णतमाः पुवंपवंति
गतरागाः॥ तत्तो सात्वनंतरं मेघानां अभ्राणां मारुतस्य वायोः॥ फलानि च संपद्यतां च तथ्याम्यदं॥ अधुना तान्येवाह॥
बहिरसित सितैः सितैः बहिश्चबहिरसित भुतंगारिवांबुनादैः॥ स्वातिलतावरस्पृश्यमात्र इंधे स्फुरितादिदृसन चत
विशालैः॥ १३॥ विकसितकमलोदराचदाति गरुणकरद्युतिरंजित ~~[illegible]~~ ॥ सलिलसमुदकस्वपां
समृद्धं॥ मुंचति जगत्‌स्यदाति॥ सो शांति श्वसौ सलिलदावलंद दाता त्यर्थः॥ अथ एवं विधान सलिलदां मेघः भूमी

तमेघसमूहं भिन्नांजनसंनिभमिति योजनीयं॥ कीदृशस्तं॥ शिखी मयूरः। चातकः सारंगः। दर्दुरो मंडूकः। तेषां निस्वनाः शब्दा
वरा॰सं॰ स्तैः व्याप्ताः श्रिताः संयुताः। मंद्रा मधुराः। पटवश्चतुराः शब्दा येषां तथाविधा मेघाः। खं आकाशं। अवतत्य व्याप्य समा
यांति गतविलंबिनः। दिगंतेषु आकाशप्रदेशेषु यांति विलंबिनस्तथाविधाः। अन्यत् चाह॥ ॥निगाश्रितरूपंजलधर
१२७ डालेकूपदमवरुद्धं द्वारूमथवाह॥ यच्छिवियदं वं भवति म॥ भिक्षं मुदितजनं च प्रचुरजलाभः॥ २०॥ वियदाकाशं
निरादितरूपैः कथितकक्षणैः जलधराणां मेघानां जालैः वृंदैः। व्याप्तदिनत्रयं अवरुद्धं रुद्धमितं॥ दिनद्वयं वा। अ
द्यः दिनमेवं॥ अनेन प्रकारेण अभिक्षं भवति॥ तथाभूः अवनिमुदितजनाः प्रहृष्टलोकाः॥ प्रचुरजलाभः प्रचुरतोयाभवति॥
तथा वेगर्भाः दधिरत्ववाः मकरक्रौंचभासाभरणसंनिभाः॥ शक्रकौशेयमांजिष्ठातपत्रीय समप्रभाः॥ उच्छिन्नमल्लः
सुस्निग्धाः पर्वताकारसंनिभाः। घना घनाः प्रशस्यंते विद्युतस्तनितसंकुलाः॥ २१॥ तथा च पराशरः॥ गोदुग्धाया
गपनः प्रदक्षिणामृदुमरुतः स्निग्धानि चाभ्राणि॥ विद्युतद्रायुधचापालंकृतानि॥ स्वादुरसरश्मिविमलाशद्धरताय
स्थिः श्वाभसंक्षेमसुभिक्षाय॥ यावंतोऽह्नि सर्गानां मनप्रादुर्भावान् बंधस्तावद्भवांतिशो मसकाभक्षं॥ आसमरा
त्रात्तावल्लवासिनां विलंध्यागतः क्रमणं स्त्रीपुरुषबालानां प्रमोदः॥ वासिणां क्षीरवृक्षपुष्पसंवर्तरुणामुक्त
द्धपुष्पतासकरपौशरद्भताय॥ तथा च समाससंहितायां॥ आषाढबहुलपक्षे शशिकुरूके गोशुक्लीस्समासुतंक॥
यदि गगनममलमस्यस्यर्तीक्ष्णरश्मिः मरूत्तांशुः॥ सलिलगुरुलघपरलध्वरः तडिद्लतालोलरंजितादिगंतः॥ असित
गलमेचकचातककाद्रंबविमिश्रमाकाशं॥ शशितनयरवितनूतः स्फटिकनिभः नंद्रमा निरुत्पात॥ मरुतश्च
दिश्रयोऽन्नराः शांतमृगद्विजगणाः॥ तैः प्रयांति॥ कान्तामिवायत घनोत्याच्छितमं कुमुकरकुंकुमाकुंतुकुम्नदांते॥ २४॥
कचित्दसितसितेशिति॥ वियतं आकाशं॥ अंबुवाहैः मेघैः॥ विशालैः विस्तीर्णैः तं व्याप्तं॥ कीदृशैः अंबुवाहैः॥ रतं
भुजगैः सर्पैरिव॥ किंभूतैः सर्पैः। वलितजठरपृष्ठमात्रदृश्यैः॥ वलितानां वक्राकायपार्श्वस्थिताव यवानां जठरमा १२७
त्रंदृश्यं॥ येषां भुजगानां वक्रीकृतजठरेकदेशं वंचितपृष्ठैकदेशं दृश्यमितासितमात्रोपमानं॥ सर्पाणामुदरांश
वर्णोभवति॥ पृष्ठं कृष्णवर्णं॥ अतः कचित्दसितासितैः शुक्लनीलमिश्रवर्णैः कचिच्चासितैः कृष्णवर्णैः नि

यन्मेघैर्वृतं॥ तडितोऽपि पुनः तान् समकुर्वत्यस्थलक्तोरमनालिन्हा येषां तैः॥ विकसितकमलोदरावदातैः॥ विकसितं प्र
स्फुटं कमलं पद्मं तस्योदरं गर्भस्तद्वत् अवदाताः शुद्धाः तैः॥ तथा अरुणकरद्युतिरंजितापकंदैः॥ अरुणकराणां सू
र्यरश्मीनां या द्युतिः कांतिः तया रंजितानि मनागाऽरुणानि पर्यंतानि येषां तैः॥ अरुणकरणाविचित्रितं नानावर्णैः घ
नैर्मेघैर्यदाकाशं वृतं गतमिव॥ किंभूतैः॥ मधुकरकुलमकिंशुककवदातैः॥ मधुकराः भ्रमराः। कुंकुमं प्रसिद्धं॥
किंशुकः स्निग्धवक्तः तद्वत् अवदातैः शुद्धैः तद्वर्णैरिति॥ अन्यच्चाह॥ असितघननिरुद्धमथवा चलितडित्सुरचाप
विचित्रितं॥ द्विपमहिषकुलाकुलाकृतवनमिव दावपरीतमंबरं॥ २५॥ अथवा अंबरं आकाशं वनं अरण्यमिव दाव
परीतं दावाग्निना परीतं व्याप्तमिव॥ पत्तोरसितैः कृष्णवर्णैः मेघैर्निरुद्धं स्थगितं॥ तथा च॥ चलिताभि स्फुरद्भिः
स्फुरद्विद्युद्भिः सुरचापेन इंद्रधनुषा विचित्रितं नानावर्णतामुपागतं॥ कीदृशं अंबरं॥ तत् द्विपमहिषकुलाकुला
कृतं वनमिव मेघानां तत्सादृश्यात॥ द्विपकुंजरो हस्ती महिषः। महिषकुलैश्चाकुलाकृतं संघर्षैः संयुक्तं॥ अतोदा
वपरीतं वनमिवोत्प्रेक्ष्यते॥ ॥अन्यदप्याह॥ अथ नीलांजनशैलशिलानिचयप्रतिरूपधरैः स्थगितं गगनं हिममालि
कशंखमृणालकरद्युतिहारिभिः अंबुधरैरथवा॥ ॥२६॥ अथ नीलांजनशैलस्य अंजनपर्वतस्य शिलानां पाषाणानां
यानि चयाः समूहास्तत्प्रतिरूपधरैः सादृश्यैः अंबुधरैर्मेघैः स्थगितं आच्छादितं॥ गगनं आकाशं हिमः शीत
ककराणां चंद्ररश्मीनां द्युतिं कांतिं हारयद्भिः चोरयद्भिः॥ अंबुधरैर्मेघैः श्वेतवर्णैः स्थगितमाकाशमिव॥ अन्यत
चाह॥ तडितद्रुमकक्षैः वलाकाग्रदंतैः स्रवतवारिदानैश्चलध्यातरूतैः॥ विचित्रेंद्रचापध्वजैः छायाशोभित
मातंगलीलैर्वृतं वाज्ञनागैः॥ २७॥ अब्दाः मेघाः॥ तएव नागाः हस्तिनः तैर्वियत् व्याप्तं॥ तडितो विद्युतस्ता एव
हेमकक्षाः हेमसवर्णकक्षामध्यवंधनानि येषां॥ वलाकाः पक्षिविशेषाः ताएवाग्रदंताः पुरोवर्तिनो रदाः
शुक्लत्वात॥ स्रवद्वारिवर्षं तदेव दानं मदजलं येषां॥ चलंति येषां ध्यात्यानि प्रदंतानि तान्येवरूतानकराः॥
विचित्रं नानावर्णं इंद्रचापमेव धनुः तदेव ध्वजः तेन छायाः शोभा येषां॥ उच्छ्रितं अपारध्वजं नगजानां भवति॥ त
मालवृक्षः कृष्णवर्णः॥ अतिभ्रमरः तद्वत् नीलत्वं येषां तैः॥ तथाभूतैः॥ अन्यत् मेघवर्णनमाह॥ ॥संध्या

वा० सं० गुरुतेन भमिलिता नानींदीवरश्यामतनुं घनानां। इंद्रानिपातांबरवेष्टितस्य कांतिं दधात्यस्य तां घटानां॥१८॥ घनानां
मेघानां नभसि आकाशे संध्यागमे संजातकांतिर्लिता नामतिपृता। कीदृशानां। इंदीवरश्यामरुचां॥ इंदीवरं नील
उत्पलं तद्वत् श्यामा रुक् येषां तथाभूतानां। इंद्रानिलसदृशः॥ अतन्वान्वेक्षितं। इंद्रभगवतानामायुधस्य पीतांबरं नाथि
१२८ तस्य पीतवस्त्रप्रावृतशरीरस्य कांतिं दधाति बिभ्रत्यतं मुग्मतां। यद्यस्मिन्न नभसि॥ ॥अन्यत्र मेघवर्णनमाह॥ सवि
त्यि चातकदर्दुरनिस्वनैर्यो शस्त्रुमिश्रित मंदपटुस्वना॥ स्वमवतत्याद्यंतविलंबिनः सलिलदाः सलिलौघमुचाश्चिरा॥
१९॥ एवंविधा सलिलौघमुचो मेघाः। सलिलस्य उदकस्य ईजं समूहं। मुंचंति परित्यजंति। चिरेण भूमौ सलिल
दानं ल दत्तास्त्यर्थः॥ अथ एवंविधाः सलिलदा मेघाः भूमौ जलौघमुत्सृजंति॥ इति योजनायां॥ कीदृशास्ते अ
त्यामपूरः। चातकः सारंगः। दर्दुरो मंडूकः। तेषां निस्वनाः शब्दास्तैः शब्दैर्मिश्रिताः संयुक्ताः। मंद्रा मधुराः पटवः
श्चतुराः शब्दा येषां तथाविधा मेघाः। संभ्राकाशं॥ अवतत्य व्याप्ता। यदि दिगंतविलंबिनः। दिगंतेषु आकाशपर्यंते
षु ये विलंबंते ते तथाविधाः॥ अन्यच्चाह॥ निगदितरूपजलंभरजालैः सदृशमवरुद्धं द्रुतमथवाहः॥ अशिशिरदं वं
भवति स्फुटिशं मुदितजनं च मनुरक्ताभः॥२०॥ विगदाकाशं। निगदितरूपः कथितलक्षणैर्जलधराणां मेघानां
जालैः वृंदैः। यदि दिनत्रयं अवरुद्धं संछादितं दिनद्वयं वा॥ अदः दिनमेकं॥ अनेन प्रकारेण सुभिक्षं भवति॥ तथा
भः अवनिमुदितजनाः पृथुकलोकाः प्रचुरजलाभ्युपेता भवति॥ तथाचगर्गः॥ दधिरूप्याः सकलकांतभासा
अरुणसंनिभा॥ शुक्रकौशेयसंनिभ्रांतपनीयसमप्रभा॥ अस्निग्धमूलाः स्निग्धाः पर्वताकारसंनिभाः॥
घना घनाः प्रशस्यंते विद्युतस्तनितसंकुलाः॥२१॥ ॥तथाच पराशरः॥ तेषूर्णा योगे पुनः प्रदक्षिणा मधुमरुतः
स्निग्धतिला प्राणि॥ विद्युतशक्राचापकंधराणि॥ स्वादुमधुरभिवमनोऽशनिरताभ्रमिश्राभ्रसां शेम सुभिक्षाय॥
यावतोऽहि वसानिम तत्रादृश्यंतानुबंधस्तावद्वर्षाणि शोभनसुभिक्षं॥ आसप्तरात्रात्बिलबासिनां बिलस्थानिः १२८
क्रमणं स्त्रीपुरुष बालानां प्रमोदः। पक्षिणां शिरःश्रवणम सेवनेन तृणाग्रे मधुपूयता सुरपौरादृतास्य॥ त
थाचसमासंहितायां॥ ॥आषाढ्यां शुक्लपक्षे शिशिरकरे तोरणो समासन्ने॥ यदिगगनमसलमत्यर्थंता

शगतिः मदुस्निग्धः सलिलगुरुलघकलुषरःतदितातंतिलतिता दिगंतः। असितगलमेचकातकवादंबाविमिश्रमा
कारां॥ क्षितितन यदिचित्रगंधतः स्फटिकनिभः चंद्रमा निरस्ताः। मरकतश्च पूर्वपूर्वोत्तरा शांतमृगाविहगाः॥ अथशु
भाशुभानां मेघानां लक्षणमाह॥ रूपेरस्य मारितोक्षिप्तदंद्र रूक्षध्वांक्षप्रेतशरावमृगाभैः॥ अन्यैश्चाचानिता
नां च रूपैर्मेकृशांबुद्रिः नो कुर्वंनापिवृष्टिः॥ २२ ॥ एवंविधैर्मेघैर्नोद्भिन्नैस्थैर्वा॥ नापिवृष्टिर्वर्षणं भवति॥ कीदृ
शैः रूक्षै रस्निग्धैः अल्पैः। लघुभिः मारुतेन वायुनाक्षिप्ताः प्रेरिताः। दृष्टाः उष्ट्राणि ये वांतेः। कीदृशैः। उष्ट्रः क्र
मभः। ध्वांक्षः काकः प्रेतः शवः। शाखामृगो मर्कटः। एतेषां सदृशाभाः सादृश्यं आकृतयो येषां तैः। अन्यथा
म परेषां गर्हितानां। अल्पमार्जारराक्षसरूपैः सदृशैः शृंगैःनिःशब्दैः। तथाच गर्गः। छिन्नमूलास्त्रिरूक्षाश्चा
स्निग्धाश्चाप्याः कृत्स्नाकृताः॥ पापसत्वानुकारास्त्र मेघाः पापफलप्रदाः॥ ॥अन्यत्र शुभलक्षणमाह॥ विगतघनेवापिय
तिवचस्वान सदृमयुखः। सलिलकंटवंसरइव कुल्लोनद्विकुसुमाम्भसमुद्राक्षशुद्धं यदिदृक्शुद्धैः॥२३॥ अथवापि
वस्वान आदित्यो विमति आकाशे विगतघनेमेघरहितअसदृमयूखः वंशरश्मिर्भवति। तदेवमनेन प्रकारेण सलि
लवत्संकारोति॥ तथाच लम्भमाकाशानि शिरास्त्रोद्रद्वि शुद्धानमंकन कश्रं॥ कुमुदोत्पल मलवद्रकसरवत्र
पुलविकसितं यदि दृश्यते तदा सरश्मिः शोभन वृष्टिर्भवति॥ अथ दिग्विभागेन फलान्याह॥ पूर्वोद्धृतः सर्वा
प्यतिरलैः राग्नेयामासं भवेदग्निकोपः। याम्यैः सस्यं शीयते नैर्ऋते ध्वंपश्चात् प्राप्तैः शोभना वृष्टिरिंद्रः २३
वायव्ये स्तोकवृष्टिः कचित्प्रपुष्ट्या वृष्टिः सौम्यकाशामयुक्ते। पुष्टं सस्यलक्षणदिक्समयुक्ते। प्रवलोवायुश्चेत्व
शुश्यतेफलानि॥ २४॥ अन्येर्मेघैः पूर्वोद्धृतैः पूर्वस्यादिशासंभवैः सस्यानां निष्पत्तिः संपन्नर्भवति॥ एवमा
ग्नेयाशासंभवैरग्निकोणदिक्संभवैः अग्निकोपो वह्निकोपः सौम्यैर्दक्षिणादिक्संभवैः सस्यं क्षीयते॥ नैर्ऋते
ताशुद्धैः सस्यं क्षीयते॥ अर्धं वा निष्पत्तिर्भवति॥ पश्चात्प्राप्तैः पश्चिमाशादिक्संभवैः अभ्रमेघैः शोभनावृ
ष्टिर्भवति॥ वायव्यैस्तु मारुतदिक्संभवैः वातवृष्टिर्वातसंयुता वृष्टिर्भवति॥ साच क्वचिन्न सर्वत्र॥ सौम्यकाशास
मुत्थैः उत्तरादिक्संभवैः पुष्टा परिपूर्णा वृष्टिर्भवति॥ ईशानदिक्स्थाने तैः संवर्धैः तदुत्पन्नैः पुष्टं सस्यम
वति॥

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक संग्रहालय

एवमनेन प्रकारेण मेघाः शुभाशुभफलप्रदा उक्ताः। तथैव वायुफलानि दर्शितानि॥ एतदुक्तं भवति। यथा पूर्वोदितैः
बृ॰ सं॰ समस्तनिष्पत्तिर्भवति॥ इत्यादि यदुक्तं। तथान्येषामुत्पातानामभिनिर्देशार्थमाह॥ ॥उल्कानिपातास्तडितोऽथ
दिक्दाहनिर्घातमहीप्रकंपाः॥ नादा मृगाणां सपत्रिणां च ग्राह्या यथैवांबुधरास्तथैव॥२५॥ उल्कानिपाताः तडि
१२९. तो विद्युत्प्रपाताः॥ अशनिपाताः। आसां लक्षणानि पुरस्तात् आचार्य एव वक्ष्यति॥ दिक्दाहो दिशां दाहः॥ निर्घातान
भःस्वनः। महीप्रकंपो भूमिकंपः। मृगाणां अरण्यप्राणिनां नादाः शब्दाः सपतत्रिणां पक्षिसहितानां॥ यथा येन प्रका
रेणांबुधरा मेघाः तथैवैतेनैव प्रकारेण वाता ग्राह्याः गृहीतव्याः॥ पूर्वोदितैः समस्तनिष्पत्तिरिति॥ तायंते॥ अथ प्र
वर्षे चतस्रः प्रादेशकुंभाः संस्थिताः तैः शुभाशुभज्ञानमाह॥ ॥नामांकितैस्तैरुदगादिकुंभैः प्रदक्षिणं श्रावणमा
सपूर्वैः। पूर्णैः समासः सलिलस्य ज्ञाताः श्रुतैरवृष्टिः परिकल्प्यमानैः॥२६॥ ॥तैः कुंभैरुदगादिस्थितैरुत्तराद्यासु
दिक्षु प्रदक्षिणं प्रादक्षिण्येन स्थितैः॥ तैश्च श्रावणमासः परिकल्प्यः निश्चयीतव्यः॥ प्राक् भाद्रपदः॥ दक्षिण
आश्वयुजः। पश्चिमः कार्तिकः परिकल्प्य इति॥ पूर्णैः समासः। पूर्णा इति तेषां चतुर्णां मध्यात् यः पूर्णस्तत्र परिपू
र्णा वृष्टिः। सर्वेषु परिपूर्णेषु कुंभेषु चतुर्ष्वपि मासेषु पूर्णा वृष्टिर्वक्तव्या॥ इयं मासयोजना॥ तैः स्वपरिश्रुतैरर्द्धाभ
तेऽर्द्धवृष्टिः। अवर्षणं स्रवणैरिति स्वबुध्या परिकल्पनीयं॥ अर्द्धश्रुतैर्मध्यमा वृष्टिः॥ अंतरेऽनुपातात् वाच्यं॥ त
था च गर्गः॥ तोयस्य श्रावणं विद्यात् पूर्वे भाद्रपदं वदेत्॥ दक्षिणे अश्वयुजं पश्चिमे कार्तिकं वदेत्॥ सर्वे कुंभाः
संपूर्णाः स्युरभग्नाः क्रांतिसंयुताः॥ चतुरो वार्षिकान् मासान् सर्वान्वर्षति वासवः॥२॥ सर्वैः स्रुतैरवृष्टिः स्यात्
अर्धैरर्धं च वर्षणं। ऊनैरूनं तथा विद्यात् विवर्जं तत्यालक्षमानतः॥३॥ अन्यदप्याह॥ अन्यैश्च कुंभैर्नृपनामधेय
नृदेशांकितैश्चाप्यपरैस्तथैव॥ भग्नैः स्रुतैर्न्यूनजलैः सुपूर्णैर्भाग्यानि वाच्यानि यथानुरूपं॥२७॥ अन्यै
रपरैरपि कुंभैर्नृपनामांकितैर्नृपाणां राज्ञां नाम्ना संज्ञया चिह्नितैरुपलक्षितैः तथा चैतेनैव प्रकारेण परैरन्यैः १२९.
देशांकितैर्देशांकितैर्देशनाम्ना चिह्नितैः॥ एतदुक्तं भवति॥ तत्र बहवः कुंभा नृपदिग्देशाचातुर्वर्ण्याचिह्निताः
शुभाशुभज्ञानार्थं स्थाप्याः। तैश्च भग्नैः श्रुतैर्न्यूनैः सुसंपूर्णैः यथानुरूपं यथासादृश्यं भाग्यानि शुभाशु

भानि वक्तव्यानि॥ एतदुक्तं भवति॥ तैः परिपूर्णैरतिशुभं। भग्नैर्नाशः। श्रुतैरुपद्रवः। ऊनैर्न्यूनैर्मध्यमं मध्यमं
फलं॥ तथा च काश्यपः॥ अन्यदेशांकिताः कुंभाः स्थाप्यास्तेन च मंत्रवित्॥ बंधद्रव्यान्विता याश्च तैर्भिर्याद्यानुरूपव
॥॥ ॥अथ रोहिण्या चंद्रस्य योगेन शुभाशुभफलमाह॥ दृष्टोऽनिकटगो यदा तु दक्षिणे पथि यथा तथा
स्थिताः॥ रोहिणीं यदि युनक्ति सर्वथा कष्टमेव जगतो विनाशदं॥२८॥ शशांके चंद्रो यथा येन प्रकारेण दृष्टो
निकटोऽनिकटगः समीपवर्ती दक्षिणे पथि दक्षिणस्यां पथि रोहिणीं प्राजापत्यं युनक्ति। संयोगं याति। तदा ज
गतो जनपदस्य कष्टमशुभं दुर्भिक्षमरकादिकं विनाशदं ज्ञेयं॥ अन्यदप्याह॥ स्पृशन्नुदक् यदि तु शशांकः
तदा सकृच्छ्रबहूनोपसर्गाः॥ असंस्पृशन् योगमुदक् समेतः करोति वृष्टिं विपुलां शिवं च॥२९॥ रोहिण्याः स्पृ
शन्नेव दक्षिणेन स्पर्शनं कृत्वा यदि उदक् उत्तरेण याति तदा बहुलोपसर्गाः प्रभूता उपद्रवाः बहुभिर्दोषैर्युक्ता
सुवृष्टिर्भवति। लोकानामुपद्रवा भवंति। यथाकालोपनीता वृष्टिर्भवति॥ ॥अथ रोहिण्या योगः॥ असं
स्पृशन् स्पृष्ट्वा दोषकृत् शकटमध्यं समेत उत्तरेण गतस्तदा सुवृष्टिं विपुलां निर्दोषां च श्रेयसे पथ्य भवंति॥ ॥अथ
रोहिण्याः शकटमध्यस्थिते चंद्रे फलमाह॥ ॥रोहिण्याः शकटमध्यसंस्थिते चंद्रमस्यशरणीकृताः प्रजाः क्वापि यां
ति कृताभ्युद्यताचलाशनाः सूर्यतप्तसंबुपायिनः॥३०॥ शकटभेदलक्षणं गणितेऽभ्युक्तं॥ तथा च ब्रह्मसिद्धांते॥ वृष
भेंऽशाधिकयाम्यो व्यभसप्तदशभागे। यस्य ग्रहस्य याम्योऽभिभवति॥ शकटं स रोहिण्याः॥ चंद्रमसि रोहि
ण्याः शकटमध्यस्थिते नानाकीर्णाः अशरणीकृताः निःशरणीभूताः क्वापि यांति। कुत्रापि गच्छंति॥ केचित्प्रजा
इति पठंति॥ प्रजाः क्वापि यांति॥ कीदृश्यः। अभ्युद्यताचलाशनाः भिक्षामटनं मटनं याचमानाः
आर्थमानाः। पुनः कीदृश्यः। सूर्यतप्तविदुरंबुपायिनः। सूर्येणादित्येन यदंबु पानीयं पिबंति उष्णं भांडे॥
तमपरितापितं तत्पानशीलाः। अनेनाऽकाले भाव्यं तत्र बहुतापकत्वात्। रोहिण्याः शकटसमये॥ अथ रोहि
ण्याः पश्चिमस्थितफलमाह॥ ॥उदितं यदि दृश्यते दधितं प्रथमं प्रसृतं पश्चाद्रोहिणी॥ शुभमत्र चंद्रमसानुगा
ः प्रदाः कामवशेन संस्थिताः॥३१॥ उदितं दृश्यते चंद्रमसः प्रथममादौ यदि उदितं अभ्युदितं॥ तस्य पृष्ठतः पश्चा
त

बृ॰ सं॰

रोहिणीं रतिं आगच्छति॥ ममुद्रित॥ तदाशुभं लोके शोभनं॥ लोके प्रमदाः स्त्रियः। मदनातुराः कामार्ताः। कामेन जीच
संहिताः। कामुकानां वशंतियो भवंति॥ ॥अथ रोहिण्याः पूर्वस्यां दिशि गच्छति चंद्रे फलमाह॥ अनुगच्छति पृष्ठतः शशी
यदि कामिव वनितामिवात्मजां। मकरध्वजबाणपीडिताः प्रमदानां वशगास्तदा नराः॥ शशी चंद्रो रोहिण्या यदि पृष्ठ
१३० तः पश्चात् अनुगच्छति॥ इवेति प्रियां वल्लभां वनितां स्त्रियं कामुको यथा पश्चात् अनुगच्छति तदा प्रमदानां स्त्रीणां
दातस्मिन्वर्षे नराः पुरुषाः। मकरध्वजबाणपीडिताः कामशरपीडिताः वशगा भवंति॥ ॥अथ रोहिण्याः शेषा
सु दिक्षु स्थिते चंद्रे फलमाह॥ आग्नेय्यां दिशि चंद्रमा यदि भवेत् शस्योपसर्गो महान् नैर्ऋत्यां समुपद्रुतानि निधनं
सस्यानि यांतीतिभिः॥ प्राजेशानिलयोः स्थिते हिमकरे सस्यस्य मध्यस्थयाम्ये तारा णा दिशं गुणाः स्युर्ध्रुवः सस्य
र्थं स्थादयः ११॥ प्रजेशो ब्रह्मा॥ प्रजेशस्य इदं प्राजेशं रोहिणी॥ तस्या आग्नेय्यां पूर्वदक्षिणस्यां चंद्रमा भवे
त्॥ तस्मिन्वर्षे महान् अतीव उपसर्गो भवेत्॥ नैर्ऋत्यां दिशि चंद्रमा सि सस्यानि तिभिर भिरूद्र्यातिभिरुप
द्रुतैरुपद्रुतानि इष्टता प्राजनि धनं नाशं यांति॥ प्राजु वांति॥ हिमकरे चंद्रे अनिलो वायुकोणे स्थिते वायव्यां समस्यादर्था
न्याये मध्यमं सघटनं भवति॥ तथा सौम्यदिशि ऐशान्यां दिग्नायाति प्राप्ते चंद्रे सकलदेवः कन भता गुणा भवंति
॥ केते सस्यार्थरूस्यादयः॥ आदिग्रहणात् योगक्षेमनीरोगता गृहीतव्या॥ तथा च समाससंहितायां॥
उदगपि च तुहिनकिरणः पूर्वोत्तरतोथवाप्राच्या। यदि भवति तदा च सस्याभवति निरुद्धास्त्वजनाः।
॥१॥ उपसर्गो निलदिवकयाम्या शाम संस्थितशकटे च॥ किंकष्टे रोहकैः ये श्रुतमात्रेः कर्ता भवति॥२.
क्रोमशुकशल्यभादिभयं नैर्ऋत्यां तानि पुष्टिरपरेण॥ वायव्यास्य संस्थेम मध्यम सस्यं कुमुदनाथे॥३॥
अथ योगताराप ताप च्छादने च फलमाह॥ ॥ताडयत्यथ यदि योगतारकां मारुणाति वपुषाथवापि वा।
ताडने भयमुशंति दारुणं छादने न्यवधींगनाकृतः॥४॥ योगतारकं प्रधानतारकं॥ तथा चोक्तम्॥ १३०
स्वतारागणनां मध्ये या तारा दीप्तिमत्तरा। योगतारेति सा प्रोक्ता नक्षत्राणां पुरातनैः॥१॥ तं च यदि यो
गतारां ताडयेत॥ भिंद्यात॥ शृंगकोटेभिस्पृशति इत्यर्थः॥ अथवा वपुषा शरीरेणावृणोति॥ आछादयति॥

ताडने दारुणं तीव्रं भयमुशंति। कथयंति। तथाच्छादने अंगनाकृतः स्त्रीकृतो न्यवस्य वधो मरणमुशंति॥
रोहिण्याः शकटमर्कनंदनो यदि भिनत्ति रुधिरोथवा शशी॥ किं वदामि यदनिष्टसागरे जगदशेषमुपयाति सं
क्षयं॥ ३५॥ अन्यदपि शुभाशुभफलमाह॥ गोप्रवेशसमये वृषोग्रतः कृष्णवर्णपशुरेव वा परः। भूरिवा
रि शबले तु मध्यमं नो सिते तु परिकल्पना परैः॥३६॥ गोप्रवेशसमये गवामरण्यादागतानां प्रवेशका
ले पश्चिमसंध्यायां यद्यग्रतो वृषो बलीवर्दो भवति॥ परहूरिरथवा पुरोग्रतः सितश्यामः कृष्णपशुर्भवति
॥ तदा तद्वर्षे भूरि वारि बहुलं जलं॥ शबले तु मध्यमं॥ तस्मिन्वर्णाधिके भूरि वारि॥ शेषेषु पर्वे नन्तु सिते॥
श्वेतवर्णेन किंचित् अंबु वर्षति॥ अपरे वर्णैः किंचित् किंचित् भवतीत्यर्थः॥ प्राकृपवेशोध्य पृथस्य पुरतो
वृषभो यदा प्रवेशे कृष्णवर्णो वा पशुर्बहुजलप्रदः॥१॥ कृष्णा गौश्च सुभिक्षाय क्षेमारोग्याय बोध्यते॥
गौर्यामथ च नीलायां मध्यमे सस्यसंपदः॥२॥ अनावृष्टिकरी श्वेता वातायकपिला स्मृता॥ पाटला स
स्यनाशाय रोगाय कबरा स्मृता॥३॥ एकवृष्टाय शबला चित्रा चित्रा सुवर्षति॥ पांडुरा मध्यमा॥ वायी
स्म धान्यविवर्धनी॥४॥ कपिला पश्चिमं वर्षं शोणा न्यग्रे प्रवर्षति॥ तथाच पराशरः॥ अस्तमयाविलायां
पुरद्वारमुपगम्यानिमितान्युपलक्षयेत॥ तत्र गोगजाश्वरथप्रवेशो पुरविजये॥ नरखरोष्ट्रनकुलमार्जा
रश्वप्रवेशोग्निद्रवोन्नेत्रां गादीन् पशून् भयामित॥ ॥अथात्र दर्शनेच्चंद्रमसः फलमाह॥ दृश्यते न यदि रो
हिणीयुतश्चंद्रमा नभसि तोयदावृतः। रुक्भयं महदुपस्थितं तदा भूश्च भूरिजलसस्यसंयुता॥३७॥ यदि न
भसि आकाशे तोयदावृतो मेघछन्नश्चंद्रमा रोहिण्या युतो न दृश्यते॥ लोके तत्र वर्षे महद्दुलां वरुग्भयं रो
गभीतिरुपस्थिता प्राप्तांवदेत॥ भूर्भूरिजलसस्यसंयुता बहुभिस्तोयैः सस्यैश्च संयुक्ता भवति॥ दुर्भिक्षक्षी
रकोशशोषिणः स्थंद्रोमतोदाक्षिणेश्च गार्गीं रोहिणीशास्त्रकास्य विषमार्तानां च पीडाम स्तत॥ भिन्ने रोहिण्या म
स्तके पि शाकटदेशस्य नाशो ध्रुवं द्वादशाब्दं मन्ये तन्नाव सुमताभिन्नाय दीनगछति॥ ॥ इति श्रीभट्टोत्पल
विरचितायां संहिताविवृतौ रोहिणीयोगाध्यायश्चतुर्विंशः॥ २४॥ ७ ॥ ७ ७ ७

॥ अथ स्वातियोगाध्यायो व्याख्यायते ॥ ॥ तत्रादावेव रोहिणीयोगो तस्य फलं स्वातिद्वयं कालानैर्दिष्टं चाह ॥ यत
वृ० सं० रोहिणीयोगफलं तदेव स्वातौ च षाढासहिते च चंद्रे ॥ आषाढशुक्ले निखिलं विचिंत्य यो ऽस्मिन्विशेषस्तमहं प्र
वक्ष्ये ॥ १ ॥ रोहिणीसहिते चंद्रे यत्योगफलमुक्तं तदेव स्वातिसहिते चंद्रे आषाढायुते उत्तराषाढासहिते च फ
३३२ लं निःशेषं विचिंत्य विचारणीयं ॥ किं तु आषाढशुक्लपक्षे शुक्लपक्षे एतद्योगद्वयं विचार्यं ॥ एतदुक्तं भवति ॥
मेघानां वायोरुत्पातानां यत्फलं रोहिणीयोगे उक्तं तत्स्वात्याषाढयोश्चंद्रे ज्ञातव्यं ॥ तथा च ॥ दुरितनिकरनाथवा
उर्षौ त्वाह्रिय्यथासंभवं समागमफलं यदुक्तं तत्सर्वमत्रैव वेदितव्यं ॥ गोप्रवेशसमय यदुक्तं दृष्टं तत्सर्वमपि वेदित
व्यं ॥ तथा च पराशरः ॥ सर्वमेव योगमाषाढादिभवति ॥ तान्दिव्यः प्रातःशुचिरूपधारयेत ॥ स्वातिसंयुक्ते ज्ञा
शनि घनस्निग्धाताभ्रमालादृष्टं भांति नभसोनच्छादनं ॥ सुभिक्षक्षेमायतत्सर्वं वातप्रादुर्भावः ॥ उल्कानिर्घा
तभूकंपघातिरजहतविपर्ययः ॥ अस्मिन्विशेषस्तमहं वक्ष्ये ॥ कथयिष्ये ॥ अथ तत्र रात्र्यादिविभवेन शुभा
शुभफलमाह ॥ ॥ स्वातौ निशांशे प्रथमे ऽभिवृष्टे सस्यानि सर्वाण्युपयांति वृद्धिं ॥ भागे द्वितीये तिलमुद्ग
माषा ग्रैष्मं तथा नास्ति न शारदानि ॥ २ ॥ वृष्टेन्हि भागे प्रथमे सुवृष्टिस्तद्वद्द्वितीये तु सकीटसर्पाः ॥ वृष्टिस्तु म
ध्यापरभागवृष्टे निश्छिद्रवृष्टिर्द्युनिशं प्रवृष्टे ॥ ३ ॥ स्वातौ निशांशेति ॥ अत्र मलप्रवृत्तौ कृत्स्नमात्रं नहि शर
तसस्यानि भवंति ॥ वृष्टेन्हीति ॥ अह्नि दिवसे आद्ये त्रिभागे वृष्टे शोभना वृष्टिः ॥ द्वितीये त्रिभागे वृष्टे
तद्वत्सुवृष्टिः ॥ किंतु ॥ सकीटसर्पाः ॥ कीटैः कृमिभिर्भुजंगैः सर्पैः सहिताः ॥ अपरभागे दिनतृतीयभागे वृष्टे
मध्यमा वृष्टिर्भवति ॥ नातिवृद्धा नाल्पा ॥ द्युनिशं प्रवृष्टे सुवृष्टिः ॥ निश्छिद्रा छिद्ररहिता निरंतरा सर्वत्र कालेऽपि
तं वर्षति ॥ ॥ अथ अपांवत्सानिकटे स्थिते चंद्रे शुभाशुभफलज्ञानमाह ॥ ॥ समभुत्तरेण तारा चित्राया यः कीर्तितो ऽ
पांवत्सः ॥ तस्यासन्ने चंद्रे स्वातौ योगः शुभो भवति ॥ चित्रायाः समभुत्तरेण समभागपंक्त्या उत्तरेण तत्र यः ३३२
तारा सा पांवत्स इति कीर्त्यते ॥ तस्याः पांवत्सस्यासन्ने निकटस्थे चंद्रे स्वातौ योगः शिवः श्रेयस्करो भवति ॥ अथ स्वा
तियोगस्य कालयोगमाह ॥ स सम्यक् स्वातियोगे यदि षष्ठितिथिमाघमासांधकारे वायुर्बलिंद्रवेगः सजलजल

धरो वर्षणं वाच्यमत्र ॥ विद्युन्मालाकुलं वाप्यदिश्यते नभोन शुभं च दर्शनं तारं विशेषाग्रहे यामुदितनपदा सर्वसस्य
पिता ॥ ४ ॥ माघमासस्यांधकारे कृष्णपक्षे सप्तम्यां स्वातिनक्षत्रसंयुते चंद्रे हिमं तुहिनं यदि पतति ॥ वायुर्मारुत
श्चंडवेगः परुषश्चनो भवति ॥ जलेन पानीयेन संयुतः सजलः जलधरो मेघो ऽत्रास्मिन्नवरतं वा गर्जितं कुर्वन्नगति
॥ अथ नभ आकाशं विद्युन्मालाभिराकुलं मेघारामनापंक्तिव्याप्तं ॥ नष्टचंद्रार्कतारं ॥ नष्टानि चंद्रनक्षत्राणि यत्र
तं मेघच्छन्नमित्यर्थः ॥ तदैषा प्रावृट्कालेन बहुजलो ऽप्यसर्वधान्यैरुतेतासंयुक्ता भवति ज्ञातव्या ॥ अन्यदपि शुभाशु
भज्ञानमाह ॥ ॥ तद्वत्फाल्गुनचैत्रवैशाखमासस्याः सितेपि ॥ स्वातियोगविज्ञानीयात आषाढेतु विशेषतः ॥ आषा
ढस्यपि स्वातियोगः तं विचारयेदित्यर्थः ॥ ॥ इति श्रीभट्टोत्पलविरचितायां स्वातियोगो नामाध्यायः पंचविंश
ः ॥ २५ ॥ ॥ अथ आषाढीयोगाध्यायो व्याख्यायते ॥ तत्र तावत् रोहिणीयोगफलं यदुक्तं तत्स
र्वमुत्तराषाढायुते चंद्रे समस्तं ज्ञातव्यं ॥ तत्राषाढपूर्णमास्यां विचारयेत ॥ तथा च पराशरः ॥ ततोनंतरमाषाढासं
युक्ते शशिनि आदानावृत्तिसमागते भागेषु नामतो निमाशु आद्यंतमध्येषु फलानि भवंति ॥ तत्र पुरभिरनुकूलः स्य
दीवानमारुतः पूर्वः प्रवर्तितो ऽतिवर्षकरः सर्वसस्यकरो ॥ नैर्ऋत्याग्नेययाम्यवारुणवायव्याः सस्यकराः
विपर्यये वेदं परीत्यम ॥ वेद्यं रजतमधूलीद्र प्रभासं ध्याग्निधाव्रसप्रादुर्भावश्च ॥ प्रावृड्विषयः ॥ प्राक्मध्ये
पश्चात भागे आषाढानां योगः शशिनो वर्षासु तत्कालेन वर्षाय ॥ वैश्वदेवादुत्तरतः शशी तद्वक्रेण दक्षि
णतः ॥ निर्घातोल्काशनिभूचलनदिग्दाहैः परिवेषनतस्य च वधो भवति ॥ तथा च ॥ सोदकं सातपं साभ्रं नि
युतलानितसंगतं ॥ प्रवातं च निवातं न प्रशस्तं तदृक्षः स्मृतं ॥ १ ॥ आषाढीयोगेष्वकर्तव्यं तदाह ॥ तथा च ॥
आषाढ्यां समतुलितान्धिवासितानामन्येद्युर्दाधरतामुपेति बीजं ॥ तत वृद्धिर्भवति न तत्र यद्यूनं मंत्रो ऽस्मि
न भवति तु लाभि मंत्रणाय ॥ ॥ आषाढस्येयं पूर्णमासी आषाढी ॥ इतरषाढ्याद्युक्तेत्यर्थः ॥ तथा च ग
र्गः ॥ वायव्यं वैश्वदेवान्यां प्राजापत्यस्य चोपरि ॥ एवामण्यधिकन्यापि रोहिणीनामुपस्थिते ॥ तस्या माषाढ्यां
सर्वबीजानां समतुलितान्धिवासितानां ॥ अधिवासं संज्ञा ॥ इत्यर्थिकं अशी बीजानि तुलितानि तु स्या

परिछिन्नानि तेषामधिवासितानां अधिवासनमनूत्रतेन मंत्रेणाभिमंत्र्य गात्रमेकामृ यो च तानि ततो नेच्छुरत्यमि
न अहुनि द्वितीयादिवसेयत्नबद्धांजलितं अधिकृता गृंपति ॥ आभिम्यंगाच छिन्नादिसत्यात्तत्या अन्य दादिशु
भाःशुभदानमाहा ॥ तितनरद्दिक्षस्यपान्यादःतम्मिन्वर्षरधिभर्वति ॥ यदुनंतेनदायतेनतोन्यदाते ॥ तत्र
अभिमंत्रणाय अयंमत्रो भवतित्येनन अभिमंत्रणाया इत्यर्थः ॥ तथा च समासंसोहितायां ॥ तुलाधिवासितानां
मन्ये युगर्धिवंलीजं भवति ॥ आषाढपूर्णमास्यां ततऋद्धिः ॥ तत्रमंत्रोयं ॥ अथतदेवमंत्रमार्यमाह ॥ सोति
त्यामंत्रयोगेनसत्याद्रेलोकस्तता ॥ दर्शयिष्यसियतसत्यं सत्यसत्यव्रताश्रमि ॥ २ ॥ येनसत्येनचंद्रार्कौ ग्रहा
ज्योतिर्गणास्तथा ॥ उत्तिष्ठंतीह पूर्वेणपश्चादस्तंव्रजंतिच ॥ ३ ॥ यत्सत्यं सर्ववेदेषु यत्सत्यंब्रह्मवादिषु ॥ यत
सत्यंत्रिषुलोकेषु तत्साम्यमिहदृश्यतां ॥ ४ ॥ ब्रह्मणोदुहितासित्वं आदित्येति प्रकीर्तिता ॥ काश्यपी गोत्रतश्चैव
नामतो विश्रुता तुला ॥ ५ ॥ मातुलाःतेनयोगमंत्रेणसहस्तनरोया ॥ सत्यासत्यस्यासरस्वतादर्श ॥ हेसत्य
हे सत्यरूपे सत्यंपरमार्थंदर्शयिष्यासि ॥ यस्मात्त्वसितंसत्यव्रतीसत्यमेवव्रतं यस्याः ॥ चंद्रार्कौग्राग्रासयोः ॥
ग्रहाभौमादयः ॥ तथा ज्योतिर्गणाः ॥ ज्योतिषाणांतारकाणांगणाःसमूहाः ॥ येन सत्येन पूर्वस्यां दिशि उत्तिष्ठं
ति ॥ उदयंति ॥ इहास्मिंल्लोके ॥ तथा पश्चात्पश्चिमायां दिशि अस्तंव्रजंति ॥ अस्तमयंयाति ॥ यत्सत्यं सर्व
वेदेषु यत्सत्यंब्रह्मवादिषु ॥ सत्यंब्रह्मवादिषु सत्यंपरंब्रह्मध्येयंद्रंतिपरंत्रिषुलोकेषु ॥ भूर्भुवःस्वर्लोकेषु यत
त्सत्यं तदिहतुलाकर्मणि दृश्यतां ॥ त्वंब्रह्मणःकमलजस्य दुहिता तनयासि भवसि ॥ आदित्या अदि
तिरपत्या ॥ इत्येवंप्रकाराकीर्तिता कथिता ॥ गोत्रतःकाश्यपः ॥ गोत्रानामतः संज्ञयातुलाइति विश्रुताआ
ख्याता ॥ ॥ अथतुलालक्षणमाह ॥ क्षौमंचतुःसूत्रकसंनिबद्धं षडंगुलंशक्य – – – वस्त्रमस्याः ॥ सूत्रप्रमाणंचद
शांगुलानि षट्वक्त्रेःभयशक्यमथ्ये ॥ ३ ॥ अस्यास्तुलायाःशाक्यवस्त्रंक्षौमंकार्यं ॥ तत्रक्षितानिद्रव्याणि पारछिद्यंते ॥
तत शक्यवस्त्रं ॥ ततचतुःसूत्रकसंनिबद्धं चतुर्भिःसूत्रैः संनिबद्धं ॥ सहलंकार्यं ॥ तच्चतच्छक्यवस्त्रंषडंगुलप्रमाणम ॥
येः सूत्रैः स्तनबध्यते तेषांप्रमाणं ॥ उभयशक्यमध्ये शक्यद्वयस्यान्तः कक्षासूत्रंषडंगुलंकार्यं ॥ कक्षाशब्देनय

दूणसूत्रमुच्यते ॥ कथं ॥ तत्रद्रव्याणि परिछिद्यानीत्याह ॥ ॥ याम्येशक्ये कांचनं संनिवेश्यं शेषद्रव्याण्युत्तरस्मिंश्चैव ॥
तानां मन्वक्ष्मप्रमाणं शरीरं येषां ॥ तथाविधास्तथा गंभीरमधुरा निर्घोषवंतः शब्दो येषां ॥ तडिद्वंतो विद्यु
तो विद्युतो विद्यंते येषु ॥ गवलं माहिषं शृंगं ॥ अलिकुलं भ्रमरकुलं ॥ अहयः सर्पाः तत्संनिभास्तत्सदृशाः
तथा च गर्गः ॥ निशार्धेन यदा पूर्वं उल्कानिर्घातसंकुलाः ॥ मैत्रेंद्रवैश्ववरुणाभिजिद्ब्राह्मवासवाः ॥ स्या
दिंद्रसंभवाः कंपा लक्षणानि तु मे शृणु ॥ वर्षंति च ध्वांतमेघाश्च राहुमाहिषवासमाः ॥ ध्वनंतो मधुरा वान
निघ्नन्ति स्नितभूतलाः ॥ सप्तमे ह्नि संप्राप्ते कंपस्यादिंद्रसंभवः ॥ ऐंद्रमित्यादि ॥ ऐंद्रकंप स्तुततकुलजानि
स्तुत रत्नातिसंयुतप्रधानकुलं येषां ॥ जातिर्जन्म ॥ तथा च ये कीर्तियुक्ता अवनिपा राजानाः ॥ गणपाः समूह
तयः एतान्विध्वंसिनाशकरं ॥ अतिसारगलग्रहकं रोगा ॥ वदनरोगमुखरोगाः एतान्करोति ॥ तथा छर्दि
कोपाय भवति ॥ छर्दिकोपं करोति ॥ काश्या द्योतनाः काश्यः ॥ युगंधराः पौरवाः किराताः कीराः ॥ अ
भिसाराः हलाः मद्राः अच्युताः सुराष्ट्राः मालवाः एषां पीडाकरं ॥ तथेष्टवृष्टिकरं ॥ इष्टां अभिमतां
वृष्टिं करोति ॥ अत्रापि पराशरः ॥ ऐंद्रवैश्वदेववैष्णवप्राजापत्यसौम्यादित्यमैत्रेषु ॥ सुरपतिरिवाभिवला
यप्रचंडाः भौदयत्ता धर्मात्मपानोत्सवा यान्यप्रथितकुलाधिपतिवास्तन्नांच्च काश्मीराभिसारप्राच्यवाल्कीर
तपौरवाच्युतवर्णविमालवहूणदंडककांचिकाकर्पकंकुलासमद्रुकहूचनहानाम्पतापयोर्हति ॥ ॥ अथ
वारुणमंडलस्य लक्षणं परिकीर्तितानि फलं चाह ॥ पौष्णाप्याद्रश्लेषामूलाहिर्बुध्न्यवरुणदैवानि ॥ मंडल
मेतद्वारुणमस्यापि भवंति रूपाणि ॥ ३० ॥ नीलोत्पलालिभिन्नांजनत्विषो मधुरराविणो बहुला ॥ तडि

वा॰ सं॰ ह्रासिता॥ सता दृढाधारो कुरुते निर्वर्णो जलदः॥२१॥ वारुणमर्णवसरिदाश्रितघ्नमतिवृष्टिदं विगतवैरं॥ गोनर्दचेदि
कुकुरान्किरातवैदेहिकान्हंति॥ २२॥ पौष्णाप्याद्राश्लेषेति॥ पौष्णं रेवती॥ आप्यं पूर्वाषाढा॥ आर्द्रा आश्ले॰
षा मूलं॥ अहिर्बुध्न्यं उत्तराभद्रपदा॥ वरुणदैवतं शतभिषक्॥ एतानि सप्त नक्षत्राणि वारुणं मंडलं॥ अस्या
१४६ पि सप्ताहात्पूर्वरूपाणि चिह्नानि भवंतीति॥ नीलोत्पलालिभिन्नांजनत्विषः॥ नीलोत्पलं कुवलयं॥ अलिर्भ्र
मरः॥ भिन्नांजनं अतिनीलकज्जलं॥ एषां सदृशा त्विट् कांतिर्येषां॥ मधुरराविणो मधुरारावः शब्दो येषां जल
दलाः प्रभूताः तडिदुद्भासितदेहाः॥ तडितो विद्युत उद्भासिताः प्रकटीकृता देहाः शरीराणि येषां॥ तथा
च गर्गः॥ निशायां पश्चिमे भागे निर्घातोल्का महीचलाः॥ पौष्णाप्याग्निरमामूलाहिर्बुध्न्यं वारुणं तथा॥ कूपा
वारुण एभिः स्यात् शृणु तस्यैव लक्षणं॥ वर्षंति जलदास्तत्र नीलांजनचयोपमाः॥ विद्युद्भासितदेहाश्च मधुरस्व
रपूरिताः॥ सप्तमे दिनसंप्राप्ते कंपः स्यात् वारुणस्तदा॥ फलान्याह॥ वारुणमर्णवसरिदाश्रितघ्नमिति॥ वा
रुणो भूकंपः अर्णवसरिदाश्रितघ्नः॥ अर्णवः समुद्रः॥ सरितो नद्यः॥ तत्र ये आश्रिताः तान्हंति॥ अतिवृष्टिं
ददाति॥ विगतवैरं नष्टद्वेषं॥ गोनर्दजनपदाः॥ चेदयः कुकुराः एतांस्तथा किरातान् वैदेहिकान् किरातान्वैदेहि
कांश्च हंति॥ नाशयति॥ अत्रापि पराशरः॥ वारुणाहिर्बुध्न्यपूर्वभद्रजलभुजंगेन्दुकृतेषु देवकेषु कंपो व्युपति
ष्ठते॥ प्रततजलधरधाराभिन्नकेदारपर्वतारण्यशैलतरुतलकंपावसथस्य मालीमारविकाक्षिरोगवृ
ष्टिविशेषतः॥ किरातकाश्मीरपार्वतककुकुरसौराष्ट्रकवाटधानगसंधुवाटकयान्विकादधिकं दनदीसंश्रि
तास्या शादनपर्हं॥ अधुना फलपाकनियमार्थमाह॥ ॥ षड्भिर्मासैः कंपो द्वाभ्यां पाकं च याति निर्घातः॥ अ
न्यानप्युत्पातान् जगुरन्ये मंडलैरेतैः॥२३॥ ॥ कंपो भूकंपः षड्भिर्मासैः फलं ददाति॥ निर्घातो द्वाभ्यां मासा
भ्यां पाकं याति॥ अन्ये मुनयो गर्गादयोऽन्यानप्युत्पातान् ग्रहणनिर्घातोल्कादीनेवं तेभ्यः कंपोक्तैरेव मंडलैर्ज
गुरुक्तवंतः॥ तथा च गर्गः॥ निर्घातोल्कामहीकंपाः स्निग्धगंभीरनिःस्वनाः॥ मेघस्तनितशब्दश्च सूर्येंदुग्रह
णं तथा॥ मंडलैरेवबोद्धव्याः शुभाशुभफलप्रदाः॥ तथा च समाससंहितायां आचार्येणोक्तं॥ आग्नेयपूर्व १४६

कं भचतुष्टयं च शशांकमादित्यमथाश्विनं च॥ वायव्यमेतत्पवनोत्थ कंपो मासद्वयेनाशुभदः प्रजानां॥ अनेन
पारं बहुलाभरण्याभाग्यं विशाखागुरुभं तथा च॥ शुद्धाग्निरश्म्याः सप्तकोपकारापदीप्तिभिर्मंडलमग्निसंज्ञं
॥ प्राजापत्यं वैष्णवं मैत्रमैंद्रं विश्वेशं त्वाष्ट्रं वासवं चाभिजिच्च॥ ऐंद्रं हीनमंडलं संप्रयाति कुर्यात्तोयं दृष्टलो
कप्रशांतं॥ अहिर्बुध्न्यं वारुणं मूलमाप्यं पौष्णं सार्पं मन्मथारीश्वरक्षं॥ मघाः पाकं वारुणं नाशमत्र तोय
प्रायं प्रह्लाकप्रशांतं॥ उल्कापातश्चेंद्रपुरं चाश्वानि घातभूकंपकंपकुलदाहः॥ वातोऽतितिक्तोऽग्रहणं रवीदोर्न
क्षत्रताराग्रहवैकृतानि॥ अभ्रे वृष्टिर्वैकृतं वात वृष्टिर्धूमोनाग्निर्विस्फुलिंगार्चिषो वा॥ वन्यं सलं ग्रामम
ध्येनिशो द्वारात्रेश्चिंद्रे कार्मुकादृश्यते वा॥ संध्याविकाराः परिवेषखंडनं घनार्तापादवितर्यतोदः अन्य
या दृश्यात प्रकृतेः प्रतापं तन्मंडलैरेव निगाद्यमिति॥ ॥ अथ वेलामंडलदर्शनकंपानां निष्फलत्वमाह॥
द्रुतं द्रों वायव्यं वायव्यश्चाश्वाग्नेयं द्रुमन्योन्यं॥ वारुणहुतभुजावपि वेलानक्षत्रजाः कंपाः॥२४॥ ॥ ऐंद्रः कंपो
वायव्यं हंति॥ एवं वायव्यश्चाग्नेयमैंद्रं हंति॥ एवमनेन प्रकारेण अन्योन्यं परस्परं॥ वारुणहुतभुजावपि वारुणमंड
लमग्निं हंति॥ वेलाजातान क्षत्रजाताः कंपाः परस्परं नाशयतीत्यर्थः॥ न स्थानं फलप्रदाने लामंडलयोर्भिन्नत्व
अथ भेदं वेतिफलदः॥ यथा वायव्यमंडले वायव्यायां वेलायां कंपः स च पूर्णफलं ददाति॥ एवमन्येऽपि बोद्धव्याः॥
अथ वेलामंडलदर्शनकंपानां फलविशेषमाह॥ प्रथितनरेश्वरमरणव्यसनान्याग्नेयवायुमंडलयोः॥ क्षुद्भय
मरकावृष्टिः दुपतापं तज्जनाश्चापि॥ आग्नेयवायुमंडलयोः आग्नेये मंडले वायव्यायां वेलायां॥ अथवा
वायव्यमंडले आग्नेयवेलायां यो भूमिकंपः तस्मिन्प्रथितनरेश्वरमरणव्यसनानि भवंति॥ मृत्युर्दुःखं
च भवतीत्यर्थः॥ तथा जनान्लोकाः क्षुद्भयं मरकावृष्टिभिरुपताप्यंते॥ क्षुद्भयं दुर्भिक्षभयं॥ मरकः॥ अ
वृष्टिः॥ एतैरुपताप्यंते॥ पुनरप्याह॥ वारुणपौरंदरयोः सुभिक्षशिवावृष्टिहार्दयो लोके॥ गावोऽतिभूरि
पयसो निवृत्तवैराश्च भूपालाः॥ वारुणवरुणकृतपौरंदरेंद्रकृतेवारुणपौरंदरयोर्विनामंडलयोः
सुभिक्षशिवं श्रेयो वृष्टिर्वर्षणं॥ हार्दिः चित्ततुष्टिः॥ एते लोके भवंति॥ तथा च॥ गावोऽतिभूरिपयसो बहुक्षी॰

Bhau Daji Memorial

तथाच भूपालगणानां नितरां वैरेण युद्धं प्रभवति। तथाच काश्यपः। ऐन्द्रश्चानिलजो हौतो वारुणश्चापि शक्रजः॥
बृ॰सं॰ आग्नेयो हौतभुग्जो हौतिरन्द्रो वारुणसंभवः॥ वायव्याग्निमाश्रितायश्च वैलामंडलसंभवः। दुर्भिक्षव्याधिशोकश्च
वाडुपं तेन तत्रजं तवः। माहेन्द्रवारुणाश्चव वैलामंडलसंभवः। दुर्भिक्षक्षेमधर्माणां तत्र वृष्टिः प्रतिष्ठिता॥ एतमु
१४७ क्तं विशेषाणां क्षेत्रे पृथक् फलं नास्ति। यगाशर्तं त्रैविशेषतरं प्रोक्तं। तथाच॥ यस्मिन्न क्षेत्रे आगच्छः स्यात्तत्र भ
यदो भवति॥ सम्भवयामि श्रस्तं नगदतानिबोध॥ कुरुमालुमथ्यनेषधपुंड्रान कलिंगावंध्यपादस्कानवासा
नेयः। कंपःसानलजीवानतु इति॥ मेत्राम्राष्यशाप्यशकलानिषत्तयोधेयपश्चियप्यवानः। रसदंडकमगधवंध
कविनाशिनः शकवाययः आवंतकाः पुलिंदाः विरेदकाश्मीराः दरदवासवताः। हस्ताश्रितास्ववायव्यवारुणप्रा
नयुःपीडां॥ इक्ष्वाकवोश्मकरस्थापटञ्जगः भीरच्चीनमरुकुरुवान। ऐन्द्रासंयःकंपोनिहंति गदश्वमगदाणान
।सस्तिसरः समुद्राश्रितांश्च॥ गानर्दमंगनाशंयं क्षत्रियगणांश्च हन्यात॥ कंपोवरुणाग्निदंवस्यः कास्यभिमास्ति
स्युनकृच्छ्रपार्थ रशत्ताःपुरुषाः। गणपूजिताः कुलास्यान्प्रार्थेव रुणेंद्रनिर्धास्युपति॥ अधुनाकंपस्याप
रितानामन्येषामुत्पातानां न कुत्रचित्कालनियमः कृतः॥ तदीनियमार्थमाह॥ ॥अर्द्धैश्चतुर्भिरनिलाग्नि
रग्निर्दैवराडस्सताद्दत॥ सद्यःफलतिच वरुणावक्षनकालोद्भवःफकः॥ गपुत्र तपुदेदस्येदनापदकामय
पकालःसमयोनाक्षेन्नक्षीयतः। तयथानिलवायव्यमंडलेभवंति। तदाचतुर्भिः पक्षैर्मासद्वयेनफलंभवति
ततमाग्नेयस्त्रिभिः पक्षैः। ऐन्द्रराड्ढ्रः सप्ताहात्सप्ताभिर्दिनैः॥ वरुणः सद्यस्तस्मिन्नेवाह्निफलंददा
ति॥ ॥अथयेनमंडलेनयानियोजनानिचकंतितत्प्रदर्शनार्थमाह॥ चलतिपवनः शतद्वयं शमनलोद
शयोजनान्वितं॥ सलिलपतिरशीतिसंयुतंकुलिशधरोभ्यधिकंचषष्टिनः॥२८॥ ॥पवनोवायुर्व्यलना
नां शतद्वयं चलति। एतदुक्तंभवति। वायव्ये मंडले भूकंपोयो भवति। सयोजनानांशतद्वयंकंपयति॥ १४७
एवमनलोग्निः दशयोजनाधिकंयोजनशतद्वयंचलति। तथाच कुलिशंवज्रं धारयति॥ कुलिशधरइंद्र
षष्टिताभ्यधिकंयोजनानां शतं चलयति। तथाच काश्यपः॥ वायव्ये मंडलेनित्यं योजनानां शतद्वयं॥

दशाधिकं शतं वह्नेरैन्द्रं षष्ट्यधिकं शतं॥ शतं वाशीतिसंयुक्तं वारुणे मंडले वदंति॥ अथ यदि भूकंपेन नितरां पु
नर्यदि भूकंप आसन्नोभवति॥ तत्प्रदर्शनार्थमाह॥ ॥त्रिचतुर्थसप्तमदिने मासे पक्षेऽथवापि वत्सरे॥ यदि
भवति भूमिकंपः प्रधाननृपनाशनो भवति॥ भूमिकंपे वृत्ते ततः पुनर्यदि तत्तद्दिवसे चतुर्थे वा सप्तमे वा दिने मासे
त्रिंशद्दिनेपक्षे पंचदशाहदिने पंचचलारिंशतभूकंपोभवति। तदा प्रधाननृपाणां प्रतिष्ठितराज्ञां नाशः
क्षयो वधो भवति॥ तथाच गर्गः॥ अर्धमासे चतुर्थे च तृतीये चाथ सप्तमे॥ कंपात्पुनर्यदा कंपो मासे मार्धयथा
पिवा॥ उत्पन्ने तत्र नृपतौ तत्रास्मिन्धानमहद्भयं॥ तथाच पराशरः॥ स्निग्धस्वराः प्रदक्षिणमुपयान्तो नु कुथरः
धराभिषेकः। सर्वसुमर्त्यएवप्रशस्यंते॥ तीक्ष्णंब दृष्टावानाश्रयापिच ग्रामयंत्या समाहूत॥ कंपादिवृत्तनिमित्तः
माश्ववे॥ अभिअभिवर्षणोपवासव्रतदीक्षा जाप्यहवनानि॥ ॥इति श्रीभट्टोत्पलविरचितायां बृहत्संहि
तायां विवृतौ भूकंपलक्षणो नाम त्रयस्त्रिंशोऽध्यायः॥३३॥ ॥छ॥ ॥अथोल्काध्यायलक्षणं व्या
ख्यायते। तत्रादावेवस्वरूपलक्षणार्थमाह॥ ॥दिविभुक्तशुभफलानां पततां रूपाणि यानि तान्युल्का धिष्ण्या
उल्काअशनिविद्युत्तारा इति पंचधा भिन्ना॥१॥ दिविस्वर्गे भुक्तशुभाशुभफलानां भुक्तानि शुभानि फलानि यैः स्वर्गो
लोके तेषां पततां यानि रूपाणि तान्युल्का इत्युच्यन्ते। गर्गादिभिः पुनरन्यथा कथितं। यथा लोकपालोकानां शुभाशु
भफलं संसूचनाय कथयितुं अस्त्राणि लोकपाला भावायज्ञालिन्युत्सृजंति॥ तान्येवोल्काः। तथाच गर्गः॥ अ
स्त्राणि सृत्यजंते तेन शुभाशुभनिवेदिनः॥ लोकपाला महात्मानो लोकानां ज्वलिताक्रिये॥ आचार्येण च संहि
तायामेवोक्तं॥ अस्त्राणि लोकपाला लोकाभावाय संत्यजंत्युल्काः। केषांचित् पुण्यकृतां ताश्चोल्काः विच्युतिः
स्वर्गादिति॥ तथा चोल्काः पंचधा पंचभिः प्रकारैः भिन्ना भिद्यन्ते। तथा धिष्ण्या। उल्का। अशनि। विद्युत।
तारा इति पंचभिः प्रकारैः भिन्नाः॥ अथ फलकालनिर्णयार्थमाह॥ ॥उल्का पक्षेण फलं तद्वत् धिष्ण्याशनि
स्त्रिभिः पक्षैः। विद्युदहोभिः षड्भिस्तद्वत्तारा विपाचयति॥ संपादयतीत्यर्थः। तथाच समाससंहितायां॥ उ
ल्काथ पंचरूपा धिष्ण्योल्का विद्युदशनिः तारा॥ धिष्ण्योल्का पक्षफला त्रिगुणा अशनिः। षड्भिरहोभिः फल

पादकरी तारा फलार्धदात्री प्रकीर्तिता धिष्ण्या॥ तिस्रः संपूर्णफलदा विद्युदुल्काशनिश्चेति॥ तारा फलपादकरी॥
बृ॰ सं॰ फलात्पादं चतुर्थभागं करोतीत्यर्थः। धिष्ण्या फलार्धदात्री प्रकीर्तिता कथितफलान्नदर्धं ददाति। तिस्रः सं
पूर्णफलदा इति। विद्युत्। उल्का। अशनिः। एतास्तिस्रः संपूर्णं यथाप्रतिनं फलं प्रयच्छति॥ अथाशन्यादीनां ल
१४८ क्षणमाह॥ ॥अशनिः स्वनेन महता नृगजाश्वमृगाश्मवेश्मतरुपशुषु॥ निपतति विदारयंती धरातलं
चक्रसंस्थाना॥२॥ अशनिर्महता स्वनेन संयुता निपतति॥ नृगजाश्वमृगाश्म वेश्मतरुपशुषु॥ नरो मनुष्यः। गजो
हस्ती। अश्वस्तुरगः। मृगः आरण्यप्राणी। अश्मा दृषत्॥ तरुर्वृक्षः। पशुर्गवादिः। एतेषु अशनिः पतति। तथा धरा
तलं चक्रसंस्थाना चक्रवद्भ्रमंती विदारयंती निपतति॥ तथा च समाससंहितायां॥ अशनिः प्राणिषु निपतति विदा
रयति धरातलं बहुलशब्दः॥ अथ विद्युल्लक्षणमाह॥ विद्युत्सत्वं त्रासं जनयंती तटतटस्वना महता॥ कुटिलविशा
लनिपतति जीवेंधनराशिषु ज्वलिता॥ ॥विद्युत्सत्वानां प्राणिनां त्रासं भयं जनयंति उत्पादयंती तटतटेति शब्द
कुर्वाणा॥ अन्यत्तटशब्देति यावत्॥ तथा कुटिला विस्तीर्णा जीवेंधनराशिषु। जीवेषु प्राणिषु। इंधनेषु काष्ठनि
चयेषु ज्वलिता मज्वाला॥ महतास्फोटेन निपतति॥ तथा च विद्युत्तटनदात्रासज्वालामाला कुला पतिता॥
अथ धिष्ण्यालक्षणमाह॥ धिष्ण्या कृशाल्पपुच्छा धनूंषि दश दृश्यते तरुम्यधिकं॥ ज्वलितांगारनिकाशा हो
हस्तौ साप्रमाणेन॥ धिष्ण्या कृशा दुर्बला॥ अल्पपुच्छा अल्पलांगूला॥ ज्वलितांगारनिकाशा ज्वलितांगारस
दृशा॥ सा च हौ हस्तौ प्रमाणेन दीर्घायत उत्पन्ना॥ आरभ्य दशधनूंष्यंतरम ध्यमधिकं दृश्यते॥ चतारिंशत्
हस्ता॥ सा च हौ हस्तौ प्रमाणेन दीर्घा यत उत्पन्ना॥ आरभ्य दश धनूंषि दशद्दू॥ अथ तारालक्षणमाह
न दूरात् स्फुटतरा दृश्यते॥ तथा च। धिष्ण्या सिता हस्ता धनूंषि दश यांति दशदस्रू॥ अथ तारालक्षणमाह
तारा हस्तं दीर्घा शुक्ला ताम्राब्जतंतुरूपा वा॥ तिर्यगधश्चोर्ध्वं याति वियन्मुह्यमानेव॥ तारा हस्तं हस्तप्रमाणा
दीर्घा शुक्ला॥ श्वेतवर्णा॥ ताम्रा वा लोहिता वा सा अब्जतंतुरूपा॥ पद्मसूत्रसदृशी अतिसूक्ष्मेत्यर्थः॥ सा च वि १४८
यत्याकाशे उह्यमानेव आकृष्यमाणेव तिर्यगूर्ध्वमधो याति गच्छति॥ तथा च॥ तारा च हस्तमात्रा याति तिर्यगूर्ध्वमध
सिताताम्रा॥ अथोल्कालक्षणमाह॥ उल्का शिरसि विशाला निपतंती वर्धते प्रतनुपुच्छा। दीर्घा च भवति पुरुष

भेदा बहवो भवंत्यस्याः॥ उल्का शिरसि मूर्ध्नि विशाला विस्तीर्णा निपतंती वर्धते। यथा यथा निपतति तथा तथा
वृद्धिं यातीत्यर्थः॥ प्रतनुपुच्छा सूक्ष्मलांगूला॥ दीर्घा आयामिनी॥ पुरुषप्रमाणा भवति॥ इतस्त्रयसार्धमित्य
र्थः॥ भेदा बहवो भवंत्यस्याः। अस्या उल्कायाः बहवः प्रभूता भेदा भवंति॥ तथा च। उल्कायतो विशाला बहुप्र
कारा पुरुषमात्रा च॥ अथ प्रेतभेदानाह॥ प्रेतः प्रहरणखरकरभनक्रकपिदंष्ट्रिलांगलमृगाभाः गोधाहि
धूम्ररूपा पापा या चोभयशिरस्का॥९॥ ॥प्रेतः शवः। प्रहरणं खड्गादि। खरो गर्दभः। करभ उष्ट्रः। नक्रो जल
प्राणी। एतदाभाः एषां सदृशाः॥ तथा गोधा प्राणिविशेषः। अहिः सर्पः। धूमः प्रसिद्धः। एतेषां सदृशरूपाः॥
एताः सर्वाः पापा अनिष्टफलदा इत्यर्थः। या च उभयशिरस्का द्विशीर्षा॥ सापि पापा॥ पुनरन्यानाह॥ ध्वजझषक
रिकुमुदकुरंगसंततसंज्ञतम हंसाभाः। श्रीवृक्षवज्रशंखस्वस्तिकरूपाः शिवसुभिक्षाः॥ शिवं श्रेयः सुभिक्षं च
कुर्वंति॥ कीदृश्यः ध्वजः पताका वृक्षरूपा हस्तिवाहनः। झषो मीनः। गिरिः पर्वतः। करी हस्ती। कमलं पद्मं॥ इंदुश्चंद्रः।
तुरगो अश्वः। संततरजतं गलितरूप्यं॥ हंसः पक्षीविशेषः। एतदाभा येषां॥ श्रीवृक्षः प्रसिद्धः। वज्रं हीरकं
वज्रमायुधं वा॥ शंखः प्रसिद्धः। स्वस्तिकसंस्थाना विन्यासः। एवंविधाश्चाशिवमुभिक्षाः शिवाः॥ तथा च काश्यपः॥
नभरेभतुरंगेणाब्जवृक्षगोपुपतेन्मदा॥ ज्वलंती चक्रवत् दृश्याः तदानि राजमंगला॥ विद्युद्दामकरीभाश्च
ध्वायंती तदा॥ बहुलशोषांतिसूक्ष्मांगोजीवेषु निपतेत् सदा॥ धनूंषि दश यावद् दृश्या सूक्ष्मा दृश्या प्रकीर्तिता
॥ ज्वलितांगारसदृशी द्वौ हस्तौ सा प्रमाणतः॥ पद्मपत्राकृतिश्चैव हस्तमात्रायता मता॥ तिर्यगूर्ध्वमधो या
ति सौम्यमानेव तारकाः॥ उल्का सूक्ष्मा निविस्तीर्णा तु पापाख्या विज्ञेया यातु मध्यमा॥ ध्वजपद्मेभ हंसाभा
पर्वताश्च समप्रभा॥ श्रीवृक्षशंखसदृशी या चोल्का सा शुभप्रदा॥ ॥अन्यदपि लक्षणमाह॥ अंबरमध्या
द्बहवो निपतंत्यो राजराष्ट्रनाशाय। बंभ्रमती गगनोपरि विभ्रममाख्याति लोकस्य॥ ॥अंबरमध्या
न्नभसो बहवः प्रभूताः पतंत्यः समानाः एतानि पस्य राष्ट्रस्य जनपदस्य च नाशाय भवंति। तथा च गर्गः॥ नो
पर्याकाशे लोकाद् भ्रमति अत्यर्थं भ्रमति॥ सा लोकस्य जनपदस्य च विभ्रमं संभ्रममाख्याति। कथयति।
अन्यदप्याह॥ संस्पृशंती चंद्रार्कौ। या उल्का चंद्रार्कौ। शशिसूर्यौ संस्पृशति। तयोः संस्पर्शं याति। तद्धस्ता

वाताभ्यां विनिःसृता विनिर्गता सभ्रप्रकंपा च॥ भ्रप्रकंपसहिता॥ तस्याः पतमानाया भूकंपउपक्षेपे॥ सा चनथा
बृ॰ सं॰ भूतापरचक्रागमं परचक्रस्यागमनेन भयं राजभयं॥ दुर्भिक्षभयं अनावृष्टिभयं च जनयत्युत्पादयति॥ ॥
अन्यदप्याह॥ पौरेतरघ्नमुल्कापसव्यकरणं दिवाकरहिमांश्वोः। उल्का शुभदा पुरतो दिवाकरविनिःसृता यातु
१४० ॥२३॥ दिवाकरहिमांश्वोः सूर्याचंद्रमसोः उल्कापसव्यकरणं पौरेतरघ्नं यो रेखाकारापसव्येन प्रदक्षिणेन गमनं करो
ति॥ तत्पौरघ्नं। पौराननागरान् लोकान् घ्नंति॥ हिमांशोरुल्कापसव्यकरणमितरघ्नं॥ इतरान्यायिनः हन्
ति॥ या च दिवाकराद्विनिःसृता सूर्याद्विनिर्गता सा यातुर्जिगमिषोः पुरतोऽग्रतः पतिता शुभदा शुभं ददाति॥ अन्य
दप्याह॥ शुक्लारक्तपीताकृष्णाचोल्का द्विजातिवर्णघ्नाः॥ क्रमशश्चैतान्हन्युर्मूर्धोरःपार्श्वपुच्छस्थाः॥ उल्का
ह्युत्तराः क्रमेण परिपाट्या द्विजातिवर्णघ्नाः॥ द्विजाद्यान्ब्राह्मणादीन्चतुरो वर्णान् घ्नंति। घातयंति॥ तद्य
था॥ शुक्ला ब्राह्मणान् हंति॥ रक्ता क्षत्रियान्। पीता वैश्यान्। कृष्णा शूद्रानिति॥ तथा मूर्धोरःपार्श्वपुच्छ
स्था॥ उल्का एता हंति। मूर्ध्नि तिष्ठतीति मूर्धस्था शिरसा या पतति॥ सा ब्राह्मणान् हंति॥ एवं उरसि तिष्ठति
उरस्थः वक्षसा या पतति सा क्षत्रियान् हंति। पार्श्वाभ्यां तिष्ठति पार्श्वस्था सा वैश्यान् हंति॥ पुच्छेन तिष्ठतीति
पुच्छस्था सा शूद्रान् हंति॥ अन्यदप्याह॥ उत्तरदिगादिपतिता विप्रादीनामनिष्टदा रूक्षा॥ ऋज्वीस्निग्धाखंडा
नीचोपगता च तद्वृद्ध्यै॥ उत्तरदिगादिपतिता रूक्षा विप्रादीनां ब्राह्मणादीनां वर्णानामनिष्टदा॥ अशुभप्र
दा॥ या उत्तरस्यां पतिता सा ब्राह्मणानां॥ पूर्वस्यां क्षत्रियाणां॥ दक्षिणस्यां वैश्यानां। पश्चिमायां शूद्राणा
मिति॥ तथा ऋज्वी अवक्रा स्निग्धा निर्मला॥ अखंडा सकला॥ नीचोपगता नभसोऽधोगामिनी॥ सा तद्वृद्ध्यै॥ तेषां
ब्राह्मणादीनां उत्तरादिगादिपतिता वृद्ध्यै वृद्धये भवति॥ अन्यदप्याह॥ श्यामारुणा च नीलासृग्दहना
सितभस्मसंनिभा रूक्षा॥ संध्यादिनजा वक्रा दलिता च परागमभयाय॥ श्यामा च सा रुणा च श्यामारुणा १४०
॥ नीला नीलवर्णा॥ असृक् रुधिरं तद्वर्णा॥ दहनसंनिभा॥ असितवर्णा। असिता कृष्णवर्णा भस्मनिभा
भस्मवर्णा। रूक्षा अनिर्मला॥ संध्यादिनजा संध्यायां दिने च जाता॥ वक्रा कुटिला॥ दलिता खंडा॥ एवंविधा प

रागमभयाय भवति॥ परेषां शत्रूणां यदागमनं भयं तत्करोति॥ अन्यदप्याह॥ नक्षत्रग्रहघाते तद्भक्तानां क्ष
यायानिर्दिष्टा॥ उदये घ्नंती रवींद्वोः पौरेतरमृत्यवे स्निग्धा॥ २७॥ ॥ नक्षत्रोपघाते ग्रहोपघाते च तद्भक्तानां नक्षत्र
ग्रहाणां च ये भक्ता ये उक्तास्तेषां क्षयाय विनाशायानिर्दिष्टा उक्ता॥ तथा लोकानां संगराय च॥ तथा च समास सं
हितायां॥ दृगादिषु विप्रादीनां सतर्कोल्काहता क्रमवर्णिष्विः॥ ग्रहतिग्रहर्क्षघातैः तद्भक्तानां च नाशाय॥ उदये घ्नंति
रवींद्वोः सूर्यचंद्रमसोरुदयसमये अस्तमये वा घ्नंती पौरेतराणां मृत्युर्भवति॥ पौरा नागराः॥ इतरायायिन
ः॥ आदित्ये पौराणां चंद्रे च इतरेयायिनामिति॥ ॥अथ नक्षत्रोपतापेनफलमाह॥ भाग्यादित्यधनिष्ठामू
लेषूल्काहतेषु युवतीनां॥ विप्रक्षत्रियपीडा पुष्यानिलविष्णुदैवेषु॥ २८॥ ध्रुवसौम्येषु नृपाणामुग्रेषु सदारुणेषु
नरविक्रधनिष्ठामूलेषु एतेषु नक्षत्रेषु उल्काहतेषु उल्कया ताडितेषु एषां योगतारका यदि उल्काहता भवंति। तदा
युवतीनां स्त्रीणां पीडा भवति॥ यदा पुष्यः। अनिलः स्वातिः विष्णुदैवतं श्रवणं॥ एतेषूल्काहतेषु विप्राणां
ब्राह्मणानां क्षत्रियाणां च पीडा भवति। ध्रुवसौम्येष्विति॥ रोहिणी। उत्तरात्रयं। ध्रुवाणि। मृगशिरश्चित्रा
नुराधा रेवती सौम्यानि मृदूनीत्यर्थः॥ एषूल्काहतेषु नृपाणां राज्ञां पीडा भवति॥ पूर्वात्रयं भरणी मघा चोग्रा
णि। आर्द्राश्लेषा ज्येष्ठा मूला अनलं दारुणानि॥ एषूल्काहतेषु चौराणां तस्कराणां पीडा भवति॥ अश्विनी
पुष्य हस्ताभिजित इति क्षिप्राणि॥ कृत्तिका विशाखा साधारणे॥ एषूल्काहतेषु कुलानि द्वंद्वकुलानि च ये त्वन्य
चित्रवाद्येषु ये पीडितास्तेषां पीडा भवति॥ अन्यदप्याह॥ कुर्वंत्येताः पतिताः देवप्रतिमासु राजराष्ट्रभयं।
शक्रोपरि नृपतीनां गृहेषु तत्स्वामिनां पीडा॥ ३०॥ आशाग्रहोपघाते तद्देशख्यातकृषिरतानां॥ चैत्यतरौ
संपतिता सत्कृत्पीडां करोत्युल्का॥ ३१॥ द्वारि पुरस्य पुरक्षयमथेंद्रकीलेऽजनक्षयोऽभिहितः॥ ब्रह्मायतने विप्रा
न्निहन्याद्गोमिनो गोष्ठे॥ ३२॥ कुर्वंत्येता इति॥ एता उल्का देवप्रतिमासु पतिता राजभयं राष्ट्रभयं जन
पदभयं च कुर्वंति। शक्रे इंद्रस्योपरि पतिता नृपतीनां राज्ञां भयं करोति॥ गृहेषु च समुपतिता गृहस्वामिनां गृ
हपतीनां पीडां करोति॥ आशाग्रहोपघात इति॥ आशा दिशः॥ ग्रहाः सूर्यादयः॥ आशाग्रहादिकृपतयोग्रहा
स्तेन॥

ग्राणाद्यावश्यकोऽदितमः सारेंद्रानसूर्यस्य पुनरपि यांपुपाते नतं दृश्यमानां दृष्टानिवामिनंतस्यां दिग्दाघ
व० सं० टी० निवसंतितेषां पीडांकुर्वंति॥ अथवा आशा दृश्यतामामुपघातेन दृश्यमानां तत दिक्षु नवासिनां जनानां॥ यदुपादि
त्या दृश्यतेषामुपघातेन दृश्यानां ग्रहदेशानिवासिनां सकल पत्तीविनां पीडांकुर्वंति॥ वेश्यतरूप्रधानवक्षः तत्रपति
१५० तोल्कासमन्तग्रतानांपी डांकरोति॥ द्वारिपुरस्यति॥ पुरस्यनगरस्य द्वारिपतिता पुरक्षयंपुरविनाशंकरोति॥ अंबे
द्रकीलेद्वारार्गलायांपतितातदातद्द्वजनानांक्षयोऽभिहितः॥ जननाशो भवति॥ ब्रह्मायतने॥ ब्रह्माख्याम
देयत्रंदेवतात्रपतितानिप्राज्ञब्राह्मणानिहन्यात्॥ घातयेत॥ ॥ अथान्यदपिशेषफलक्षणमाह॥ स्पष्टं स्फो
टितवा स्तर्गतोऽल्पसुस्यनाभे वंति यदा॥ उल्कानिपातसमये भयाय राष्ट्रस्य सनृपस्य॥ २३ ॥ स्पष्टं रास्फोटि
तं। आस्फोटितं करास्फोटः॥ नक्षत्रकलरवबाल्होहर्षैतायद्गतताडनं करास्फोटः॥ वादितंवाद्यशब्दः॥ गीतं प्रगि
दं॥ एवामन्यप्युतबोधिनः स्वनाः शब्दाय दाभवंति। तदाउल्कानिपातसमये उल्कापातकाले भवंतितदारा
ष्ट्रस्य सनृपस्य नृपसहितस्य भयाय भवति॥ ॥ अन्यदप्याह॥ यस्याश्चिरंतिष्ठतिखेऽनुषंगो दंडाकृतिः सा
नृपतेर्भयाय॥ याचोह्यते तंतुधृतेव खे स्याच्चायाथवामर्द इंद्रध्वजतुल्यरूपा॥ २४॥ यस्याउल्कायाः खेनभसिचि
रं चिरकालं अनुषंग आसक्तिस्तिष्ठति॥ तथा दंडाकृतिः॥ दंडाकारा च या दृश्यते सा नृपते राज्ञो भयाय भव
ति॥ याचोल्का खे स्याकाशेस्थितातंतुनाध्रियमाणेवोह्यते धार्यते सापि नृपतेर्भयाय भवति॥ याचाम
हेंद्रध्वजस्य इंद्रध्वजाद्विन्द्रस्य तुल्यरूपा तदाकारा सापि नृपतेर्भयाय भवति॥ अन्यदप्याह॥ श्रेष्ठिनः प्र
तीपगा तिर्यगगा नृपांगनानां पुच्छेन वह्नेरुत्पतत्यस्य आतपाणां वा धर्मिणां॥ वाहुल्युछरूपिणी लोक
संक्षयावहा॥ ॥ सर्पवत्प्रसर्पितायापिता नामनिष्टदा॥ इतिमंडलप्रांतपुरोहितंवंशगुल्मव
तस्थितारास्वदोषकारिणी॥ व्यालसूकरोपमाविस्फुलिंगमालिनी दृश्यंतेऽथवा गता सा स्वना च पापदा॥ १५०
॥ २६ ॥ श्रेष्ठिनइति। याप्रतीपगाप्रगता आगतानंतरं च गता॥ साश्रेष्ठिनो हंति॥ तिर्यग्गागता तिर्यक्
वा या गता सा नृपांगनानां नृपतिस्त्रियो हंति॥ अधोमुखी अवाकृवदना नृपान् गजान् हंति॥ ऊर्ध्वगा

मिना ब्राह्मणान् हंति॥ याचोल्का बर्हिपुच्छरूपिणी मयूरपुच्छाकारा सा लोकसंक्षयावहा॥ लोकानां जनानां संक्षयं
विनाशमावहति॥ याचसर्पवत्प्रसर्पति॥ इतश्चेतश्च गच्छतीसा यापि वा स्त्रीणां अनिष्टदा अशुभदा॥ मंडला
पुरमिति॥ याचपतिता मंडलाकारा भवति सा पुरं हंति॥ नाशयति॥ या छत्रवत् छत्राकारा सा पुरोहितमा
नाययति॥ याचवंशगुल्मवत् स्थिता वंशगुल्माकारा सा राष्ट्रस्य दोषकारिणी भवति॥ व्यालसूकरोपमा
व्यालः सर्पः॥ सूकरो वराहः॥ तद्रूपमा तत्सदृशी॥ तथा विस्फुलिंगा अग्निकणानां माल्या विद्यते यस्याः
अग्निकणैर्व्यासिता यः॥ अथवा खं इशोगता बहुविधा विवर्तिता॥ ससना सशब्दा याच पापदा॥ अशुभप्र
दा भवतीति॥ अन्यदप्याह॥ सुरपतिचापप्रतिमा राज्यं नभसि विलीना जलदान् हंति॥ पवनो विलोमा कुटि
ला याति भवति न शस्ता विनिवृत्ता वा॥ याचोल्का सुरपतिचापप्रतिमा इंद्रधनुःसदृशी सा च राज्यं हंति॥ ना
शयति॥ या नभस्याकाशेऽपि विलीना सती तत्रैवादर्शनं गता सा च जलदान्मेघान् हंति॥ याच पवनो विलोमा
गच्छति॥ या नभस्याकाशेन पवनो विलोमा सती तत्रैवादर्शनं गता सा च जलदान्मेघान् हंति॥ विनिवृत्ता वा उत्पन्ना सत्यधोगता सापि न शु
सन्मुखा वा ना कुटिला याता वक्रं कृत्वा गता सा न शस्ता भवति॥ विनिवृत्ता वा उत्पन्ना सत्यधोगता सापि न शु
भेत्यर्थः॥ ॥ अन्यापि विशेषफलमाह॥ अभिभवति यतः पुरं बलं वा भवति भयं तत एव पार्थिवस्य॥ नि
पतति च यया यया दिशा प्रदीप्ता जयति रिपून् अचिरात्तया प्रयातः॥ २८॥ यतो यस्यां पुरं बलं अभिभवति परा
भवति॥ तत एव तस्या मेवादिशः पार्थिवस्य राज्ञो भयं भवति॥ ययाच दिशा प्रदीप्ता सा प्रज्वलिता निपतति
तया प्रयातो गतो राजा न चिरात् शीघ्रमेव रिपून् शत्रून् जयति॥ तथा च काश्यपः॥ पार्थिवं प्रति दीप्ता पत
त्युल्का महास्वना। तां दिशं सिध्यते सस्य चित्तं फलं भवेन्निरात॥ अत्र तात्कालिक ग्रहयोग शकुनं कृत्स्नं च
शुल्कामहास्वना॥ तां दिशं सिध्यते तस्य चित्तं फलं भवेत्॥ अत्र तात्कालिकग्रहयोगशकुनं कृत्स्नं च
णि च फलं समं॥ समाससंहितायां॥ क्रूरग्रहदर्शन नक्षत्रतिथिकरणप्रभंजने दीप्ता॥ दीप्तादिजावरे तानि च
मिनाक्षितिविमर्दिन्यः॥ ॥ इति श्री भट्टोत्पलविरचितायां संहिताविवृतौ उल्कालक्षणं नाम चतुस्त्रिंशो
ध्यायः॥ ३४॥ ॥ ७ ॥ अथ परिवेषलक्षणं व्याख्यायते॥ तत्रादावेव स्वरूपदर्शनार्थमाह॥ संमूर्छि
ता रवींदोः किरणाः पवनेन मंडलीभूताः। नानावर्णाकृतयः स्तन्वभ्रेव्योम्नि परिवेषाः॥ १॥ रवीदुपरिकिरद्रम
सा:

संमूर्छिताः प्रतिफलिता नानावर्णाकृतयो दृश्यंते। नानाप्रकारो विचित्रवर्णो नानाप्रकाराकृतिः संछन्नं येषां ते प
रिवेषा उच्यंते॥ अथ तेषां संज्ञां नराण्याह॥ ते रक्तनीलपांडुरकपोताभ्राभकदूरिता सिताः॥ इंद्रयमवरु
णनैर्ऋतश्वसनेशपितामहाग्निकृताः॥२॥ ते परिवेषा रक्तवर्णा यथासंख्यं इंद्रादिकृता भवंति। तद्यथा
रक्तवर्णः परिवेष इंद्रकृतः। नीलवर्णो यमकृतः। पांडुरः पीतश्शुक्लो वरुणकृतः। कपोतः कपोतवर्णो नैर्ऋतकृ
तः॥ कृष्णश्वेत इत्यर्थः। अभ्राभो मेघाभः कृष्णवर्णः श्वसनकृतो वायुनोत्पादितः। शबलः कृष्णः श्वेतः
महेशानकृतः शंभुकृतः। हरितो नीलः पितामहकृतो ब्रह्मकृतः॥ शुक्लश्वेतवर्णो अग्निकृतः। सोपि वरुणकृत
एव॥ अन्यदप्याह॥ धनदः करोति मेचकमन्योन्यगुणाश्रयेण चाप्यन्ये। प्रविलीयते मुहुर्मुहुरल्पफलः
सोपि वायुकृतः॥ ॥धनदश्चेश्रवणो मेचकं मयूरकंठसदृशवर्णं परिवेषं करोति। अन्योन्यगुणाश्रये
ण चाप्यन्ये ति। अन्ये इंद्रादयोन्योन्यगुणाश्रयेण॥ रक्तादयो गुणा उक्ता तेषां गुणानामन्योन्यं परस्परं गु
णाश्रयं कुर्वंति। अतो मिश्रवर्णता दृश्यते। यः पुनः मुहुर्मुहुः प्रदक्षिणं विलीयते नश्यति सोपि परिवे
षो वायुकृतः। निष्पादितः अल्पफलदः। तथा च काश्यपः॥ सितपीतं द्रनीलाभा रक्तपीतनिभाश्च ये। श
बलाश्च सुवर्णाश्च विज्ञेया स्तेषु भावदा॥ ऐंद्र्या याम्याथ नैर्ऋत्या वारुणाः सौम्यवाह्निजाः। दृश्यंते न भवंति भा
वेनवायव्यः सोप्यनिष्टदः॥ अथ तु षड्वर्णवशेन शुभाशुभफलमाह॥ ॥चाषशिखिरजततैलक्षीर
जलाभः स्वकालसंभूतः। अविकलवृत्तः स्निग्धः परिवेषः शुभः सुभिक्षकरः॥ चाषः पक्षी। शिखी मा
यूरः। रजतं रूप्यं। तैलं तिलतैलं। क्षीरं दुग्धं॥ जलं पानीयं। एताभिः सदृशी आभा कांतिर्यस्य सः स्वकाल
संभूतः। स्वकाले स्वशिशिरादिऋतुषट्कसंभवत्वेन। क्रमेण तुल्यवर्णः। अविकलवृत्तः संपूर्णः। स्नि १५२
ग्धो निर्मलः सस्नेहः परिवेषः। शिवः शुभः क्षेमकः। शिवं श्रेयः सुभिक्षं करोति। एतदुक्तं भवति। चाषवर्णो
नीलाभः परिवेषः शिशिरऋतौ शोभनः। मयूरवर्णो विचित्रवर्णो वसंते। रूप्यवर्णः शुक्लवर्णो ग्रीष्मे।
तैलवर्णो वर्षासु॥ क्षीरवर्णः शरदि। जलाभो हेमंते॥ तथा च काश्यपः। शिशिरे चाषवर्णश्च वसंते शि

खिसंनिभः॥ ग्रीष्मे रजतसंकाशः प्रावृट्तैलसमप्रभः॥ गोक्षीरसदृशः शरत्परिवेषः शरत्स्मृतः॥ ॥
अन्यदप्याह॥ सकलगगनानुकारी नैकाभः क्षतजसंनिभो रूक्षः॥ असकलशकटचापशृंगाटकवत् स्थि
तः पापः॥५॥ सकलं समस्तं गगनमाकाशमनुचरति अनुगच्छति। सकलगगनानुसारी सकोपं युवराजस्य
भयं नगरस्य च रोषं वेश्मनं करोति। तथा च गर्गः॥ द्विमंडलः परिवेषः सेनापतिवधंकरः। युद्धं सदारुणं कुर्या
त दृश्यते मंडलैस्त्रिभिः॥ अन्यतविशेषमाह॥ ग्रहरूक्षेण मासेन विग्रहो वा ग्रहेंदुजः॥ निरोधो ग्रहगणाना
धिपयोर्जन्मर्क्षं चेत् भारतः॥ ग्रहेंदुनिरोधं। ग्रहा भौमादयः। इंदुश्चंद्रः भानि नक्षत्राणि। एषां निरोधे
परिवेषे। एतदुक्तं भवति। चंद्रपरिवेषमध्यगते ग्रहनक्षत्रे भवतः। तदा पक्षेण ग्रहनक्षत्रयोर्वृष्टिर्भव
ति। मासेन त्रिंशद्रात्रेण वा विग्रहः कलहो भवति। तथा च गर्गः॥ त्रीणि यत्रापरुध्यंते नक्षत्रं चंद्रमा ग्रहः
पक्षेण वर्षति तत्र स्थितः सकलगगनानुचारी। उदयात् प्रभृत्यस्तं यावत् तिष्ठतीत्यर्थः॥ नैकाभोऽनेकाभेदः वि
विधकांतिः। क्षतजसंनिभो लोहितवर्णः। रूक्षो निःस्नेहः॥ असकलः खंडः॥ शकटशरासनशृंगाटकवत् श
कटं प्रसिद्धं। शरासनं चापं॥ शृंगाटकं चतुष्पथं तद्वत् स्थितः तदाकारः पापो निष्फलः॥ अन्यदप्याह॥ शि
खिगलसमोतिवर्षं बहुवर्णो नृपवधो भयं धूम्रे॥ हरिचापनिभो युद्धान्यशोककुसुमप्रभे चापि॥ ॥
शिखिगलसमो मयूरकंठतुल्ये परिवेषे अतिवर्षं प्रभूतवृष्टिर्भवति। बहुवर्णे नानारूपे नृपस्य राज्ञो वधः
धूम्रे धूम्रवर्णे कृष्णश्यावे भयं भीतिर्भवति। हरिचापनिभे इंद्रधनुःसदृशे युद्धानि भवंति॥ अशोक
कुसुमप्रभे अशोकपुष्पकांतौ अतिलोहिते च युद्धानि एव भवति। अन्यदप्याह॥ वर्णेनैकेन यदा
बहुलः स्निग्धः सस्नेहः क्षुराकीर्णो रविर्ग्रहो व्याप्ता। तथाभूतः स्नातो आत्मीयकेतोर्दृष्टः सद्यस्त
स्मिन्नेवाह्नि वर्षं करोति। एतदुक्तं भवति। चाषादिसदृशवर्णः शिशिरादिषु ऋतुषु संभूतः एकवर्णः
क्षुरकाभः कीर्णः सद्यो वर्षं करोति। यः परिवेषः पीतः पीतवर्णो दीप्तरविरश्मिभिः सूर्यस्य स्मिन्सोपि
चान्द्रात सद्यो वर्षं करोति॥ ॥अन्यदप्याह॥ दीप्तविहंगमृगरुतः कलुषः संध्यात्रयोत्थितोतिमहा
न्

बृ॰ सं॰ भयकृत्ततरितरुल्काघातैर्हतान्नृपं हंति शस्त्रेण। दीप्तसूर्याभिमुखैर्विहंगैः पक्षिभिः। मृगैरारण्यैः। तत्र रुतः शब्दः॥
कलुषानिर्मलः संध्यात्रयोत्थितो। दिनस्य प्राक्मध्यांतसंधिषु संध्याः। उदयमध्यान्हास्तमयेषु दृश्यते इत्यर्थः। अति
महान्त्यतिविस्तीर्णः। तथाभूतो भयकृत भयं करोति॥ तथा च गर्गः॥ उदयास्तमयोर्मध्ये मध्यर्कचंद्रमसोर्यदि
१५२ परिवेषः प्रदृश्येत तद्राष्ट्रमवसीदति॥ तडिदुल्काघातैर्हतान्नृपं शस्त्रेण हंति॥ तडित् विद्युत्॥ उल्का प्रसिद्धा॥ आ
दित्यग्रहणात्तदिव्यांतरिक्षभौमिकोत्पातैर्हतान्नृपं राज्यं न शस्त्रेण हंति॥ घातयति॥ अन्यदप्याह॥ प्रतिदिनम
र्कहिमांश्वोराहुर्निशं रक्तयोर्नरेंद्रवधः॥ परिवेष्टितयोरभीक्ष्णं लग्नास्तमयसंध्ययोरक्तयोः॥ ९॥ अर्क आदि
त्यः। हिमांशुश्चंद्रः एतयोः प्रतिदिनं प्रतिदिनं संरक्तयोः परिवेष्टितयोः राहुर्निशं नित्यं नरेंद्रवधः॥ नरेंद्रस्य राज्ञो
वधं मरणं। एतयोरेवाभीक्ष्णं असकृत् तथैव लग्नास्तमयसंध्ययोर्लग्नं तनुस्थानं॥ अस्तमयं सप्तमं॥ तयो
परिवेष्टितयोः परिवेषयुक्तयो रक्तयोर्नरेंद्रवधः॥ तथाद्वित्रिसंध्यावात्रिसंध्यमभ्युत्थितोयदर्कादिपरिवेषः
पापफलप्रदो नोथाहंति तदूर्क्षः स्निग्धो मधुघृततैलनिभः चापपत्रनीलोत्पलाब्दरक्ततनिभः। क्षेमसुभि
क्षाय भवेत् परिवेषोर्कस्य शशिनो वा॥ अन्यदप्याह॥ सेनापतेर्भयकरो द्विमंडलो नातिशस्त्रकोपकरः॥
त्रिप्रभृति शस्त्रकोपं युवराजभयं नगररोधं॥ १०॥ द्विमंडलो यस्यासौ द्विमंडलः॥ परिवेषः सेनापतेश्च म
नाथस्य भयं भीतिं करोति॥ नातिशस्त्रकोपकरः॥ अतिशस्त्रकोपं न करोति॥ ईषत्कोपकरो भवतीत्य
र्थः॥ त्रिप्रभृति शस्त्रकोपमिति॥ त्रिप्रभृतीनां मंडलानि चत्वारि पंच वा शस्त्रकोपं युवराजन्माधिपयो
राधिपो जन्माधिपतिः। जन्माधिपो राश्यधिपतिः। तयोः तथा जन्मर्क्षे जन्मनक्षत्रे चरन्हे सति राज्ञोऽन्य
स्याशुभदः॥ ॥ अथ ग्रहाणां परिवेषगतानां फलमाह॥ परिवेषमंडलगतो रवितनयः क्षुद्रधान्य
नाशकरः। जनयति च वातवृष्टिं स्थावरकृषिकृतनिहंता च॥ ११ ॥ भौमे कुमारबलपतिसैन्यानां विद्रवोऽग्नि १५२
शस्त्रभयं। जीवे परिवेषगते पुरोहितामात्यनृपपीडा॥ १३ ॥ मंत्रिस्थावरलेखकपरिवृद्धिश्चंद्रजे सुवृष्टि
श्च॥ शुक्रे यायिक्षत्रियराज्ञां पीडा प्रियं चान्नं॥ १४॥ क्षुदनलमृत्युनराधिपशस्त्रभ्यो जनयति भयं केतुः॥

Dr BHAU DAJI MEMORIAL

परिवेषगर्भभयं सद्यो व्याधिरूपभयं च॥ १५॥ ॥ परिवेषमंडलगत इति॥ रवितनयः सौरः परिवेषमंडलग
तः। क्षुद्रधान्यानां प्रियंगवादीनां नाशकरः। तथा च वातवृष्टिं वातयुक्तां वृष्टिं जनयत्युत्पादयति। स्थावराणां
वृक्षादीनां कृषिकराणां च निहंता नाशं करोति॥ भौमे परिवेषगते कुमाराणां बलपतीनां भृत्यानां सैन्या
नां च विद्रवः स्यात् व्याकुलता॥ अग्निभयं शस्त्रभयं च भवति॥ जीवे बृहस्पतौ परिवेषगते पुरोहितस्याचार्य
स्य॥ अमात्यानां मंत्रिणां सचिवानां स्थावराणां वृक्षादीनां॥ लेखकानां लिपिकराणां च विवर्धनं॥ सुवृ
ष्टिः शोभना वृष्टिश्च भवति॥ शुक्रे परिवेषगते यायिनां जिगमिषूणां क्षत्रियजातीनां राज्ञां च महत्पी
डा भवति॥ प्रियं चान्नं च दुर्भिक्षं भवतीत्यर्थः॥ क्षुदनलेति॥ केतौ परिवेषगते दुर्भिक्षं॥ अनलोऽग्निः मृ
त्युर्मरणं परिवेषमंडलमध्यगते गर्भाणां भयं राज्ञो भयं भवति॥ तथा च समाससंहितायां॥ चपल
पुरोहितनरपतिकोपकृत् पीडाक्रमेण परिवेषे॥ कुजगुरुसितार्कपुत्रैः सौम्येन च मंत्रिपरिवृद्धिः॥ केतोः
शस्त्राघातरोगाः परिवेषेण न रोगार्यं॥ युद्धं क्षुदुद्भयनाशं च व्याधिभिः क्रमशः॥ अथ द्व्यादिग्रहपरि
वेषमध्यगतफलमाह॥ ॥ युद्धानि विजानीयात् परिवेषाभ्यंतरे द्वयोर्ग्रहयोः। दिवसकृतः शशिनो
वा क्षुदवृष्टिभयं त्रिषु प्रोक्तं॥ याति चतुर्षु नरेंद्रः सामात्यपुरोहितो वशं मृत्योः प्रलयमिव विद्धि जगतः पं
चादिषु मंडलस्थेषु॥ १७ ॥ युद्धानि विजानीयादिति॥ दिवसकृतः सूर्यस्य शशिनश्चंद्रस्य वा द्वयोस्तारा
ग्रहयोः परिवेषाभ्यंतरस्थयोः परिवेषमध्यगतयोः युद्धानि संग्रामान् विजानीयात्॥ त्रिषु ग्रहेषु परि
वेषमंडलमध्यगतेषु क्षुद्दुर्भिक्षमवृष्टिभयं प्रोक्तं॥ याति याति॥ चतुर्षु ताराग्रहेषु परिवेषमंडलस्थेषु न
रेंद्रो राजा सामात्यपुरोहितः तैः सहितो मृत्योर्वशं याति। म्रियते इत्यर्थः॥ पंचादिषु पंचसु षट्सु वा
परिवेषमंडलमध्यवर्तिषु ग्रहेषु जगतो विश्वस्य प्रलयं संहारमिव विद्धि जानीहि॥ अथ ताराग्रहाणां
नक्षत्राणां चापृथक् परिवेषितानां फलमाह॥ ॥ ताराग्रहस्य कुर्यात् पृथक् समुत्थितो नरेंद्र
वधं॥ नक्षत्राणामथवा याप्यद्विजलोकनाशो भवति॥ १८॥ यदि पृथक् ताराग्रहस्य भौमादेर्नक्षत्राणां

मश्विन्यादीनां चापरिवेषः समुत्थितस्तदेतेनान्द्रस्य राज्ञो वधं मरणं कुर्यात॥ नाविकल्पेन यदि कैतारस्थानं भवति
वरा॰सं॰ तदेवं केतुदर्शनापि पुनस्तत्फलमेव ताराप रिवेषयद्वाहरतं॥ तथा च काश्यपः॥ परिवेषाभ्यंतरगो दृष्टो ऽद्रौद्रोयदि
नागरेः॥ युद्धं भवति क्षिप्रं घोरं रुधिरकर्दमं॥ अनावृष्टिश्च दुर्भिक्षं तु परिवेषगतो ग्रहैः अतुर्भिः॥ परिविष्टैः
१५३ नृपाणां तु मरणं भवेत॥ मंडलांतर्गताः पंचग्रहाः संक्षयावहाः॥ पृथक्ताराग्रहस्थेन नक्षत्राणामथापि वा
॥ परिवेषो यदा दृश्यस्तदा नरपतेर्वधः॥ यदि कृत्तिकास्थानं स्यात्तथा तद्वत्फलं॥ अधुना तिथिक्रमेण परिवे
षफलमाह॥ विप्रक्षत्रियविट्शूद्रहा भवेत प्रतिपदादि क्रमशः॥ श्रेणीपुरकोशानां पंचम्यादिरशुभ
कारी॥ १९॥ ॥ युवराजस्याष्टम्यां परतस्त्रिषु पार्थिवस्य दोषकरः॥ पुररोधो द्वादश्यां सैन्यक्षोभस्त्रयोदश्यां
॥ २०॥ विप्रक्षत्रियस्येति॥ क्रमशः क्रमेण प्रतिपदादिषु चतुर्थ्यंतेषु परिवेषो दृष्टो विप्रक्षत्रियविट्शूद्रहा
भवति॥ तद्यथा॥ प्रतिपत्सु दृष्टो ब्राह्मणान् हंति॥ द्वितीयायां च क्षत्रियान॥ तृतीयायां वैश्यान॥ चतुर्थ्यां शू
द्रानिति॥ श्रेणीपुरकोशानामिति॥ बहूनां समानजातीयानां संघः श्रेणी॥ पंचम्यां दृष्टः श्रेण्या अशुभका
री॥ षष्ठ्यां पुरस्य नगरस्य॥ सप्तम्यां कोशस्य राज्ञो दोषकरः॥ न शुभदः॥ द्वादश्यां पुररोधो नगरवेष्टनं॥ त्र
योदश्यां सैन्यक्षोभ आकुलता॥ नरपतिपत्न्यादि॥ चतुर्दश्यामभ्युत्थितस्त्वयं परिवेषो राज्ञः पत्न्याः पीडां क
रोति॥ पंचदश्यां मनुजाधिपस्याज्ञोपपीडां करोति॥ अधुना परिवेषरेखावर्णेन शुभाशुभफलमाह॥ ॥
नागरकाणामभ्यंतरस्थिता यायिनां च बाह्यस्था॥ परिवेषरेखा कृता याकंदसाराणां॥ २२॥ रक्ता श्यामा
रूक्षा च भवति तेषां पराजयः॥ तेषां स्निग्धः श्वेतो द्युतिमान भगाजय इति वा॥ २३॥ नागरकाणामिति
॥ परिवेषवर्णत्रयेण रेखात्रयं दृश्यते॥ द्वैरेखस्य त्रिर्त्यातिक्रमा याक्षिता॥ सा नागरकाणां नृपाणां शु
भकारिणी॥ बाह्यस्थरेखा यायिनां ग्रामीपुणां या रेखा मध्यगता रेखा आक्रंदसाराणां शुभाशुभका
रिणी वक्तव्या॥ कथमित्याह॥ रक्ता श्यामा रूक्षेति॥ येषां नागरकादीनां भागा रक्ता लोहितवर्णा श्यामा कृ १५३॥
ष्णवर्णा रूक्षा निर्मलाः॥ तेषां जयो भवति॥ ॥ इति श्रीभ॰ संहिताविवृ॰ परिवेषलक्षणं नाम पंचत्रिंशोऽध्यायः॥ ३५॥

अथेंद्रचापलक्षणं व्याख्यायते॥ तत्रादावेव तत्संप्रदर्शनार्थमाह॥ सूर्यस्य विविधवर्णाः पवनेन विघट्टिताः कराः॥
साभ्रे वियति धनुःसंस्थाना ये दृश्यंते तदिंद्रधनुः॥ १॥ सूर्यस्य आदित्यस्य कराः रश्मयः साभ्रे समेघे वियत्याकाशे प
वनेन वायुना विघट्टिताः अवरुद्धास्ते धनुःसंस्थानाः चापाकारा विविधवर्णा नानारूपा ये दृश्यंते॥ तदिंद्रधनुरिति
लोके दृश्यते॥ अत्रैव परमतं शुभाशुभमाह॥ ॥ केचिदनंतकुलोद्भवनिःश्वासोद्भूतमाचार्याः॥ तत्र यायिनां नृपा
णां अभिमुखमजयावहं भवति॥ केचिदाचार्याः काश्यपाद्याः अनंतनागराजस्य कुले वंशे ये जाता उरगाः सर्पाः
तेषां निश्वाससमुच्छ्वसनेन तदुत्पन्नमाहुः कथितवंतः॥ तथा च काश्यपः॥ अनंतकुलजाता ये पन्नगाः कामरूपिणः॥ ते
षां निःश्वाससंभूतमिंद्रचापं प्रचक्षते॥ तत इंद्रधनुः यायिनां नृपाणां राज्ञां अभिमुखं संमुखं अजयावहं पराज
यकरं भवति॥ अन्यदप्याह॥ अच्छिन्नमवनीगाढं द्युतिमत्स्निग्धं घनं विविधवर्णं॥ द्विरुदितमनुलोमं च प्र
शस्तमंभः प्रयच्छति च॥ अच्छिन्नं अखंडं॥ अवनिगाढं भूमिलग्नं भूमिलंबमानं॥ उत्थितमित्यर्थः॥ द्युतिम
त् अत्युज्वलं॥ स्निग्धमरूक्षं सुकांतं॥ घनमविरलं विविधवर्णं नानाप्रकारं रक्तपीतनीलसितादिवर्णयुक्तम॥
द्विरुदितं द्विरवलिखितं॥ अनुलोमं च॥ पश्चादवलिखितं॥ रश्म्यनुलोममित्येतत्तत् ज्ञायते॥ यायिनां नृपाणामि
त्यनंतरगतमत्र यत्तदाह संबध्यते॥ यात्यनुलोमं॥ पश्चात्प्रवलिखितं॥ विविधं प्रकारं तदिष्टफलमत्र चकं अंभः प्रय
च्छति॥ पानीयं ददाति॥ केचिदाचार्याः चापस्यैवानुलोमता वर्णयंति॥ यथैकदा क्षणादेकलौ परेत्योत्तरदिक्संबंध
र्वार्थदा प्रतिलोमता द्वाद्वीत्यस्याः निष्फलदं॥ यदा एकदिक् अवस्थितं तदा अनुलोमता॥ तत्रेष्टफलमिति॥
तथा च ऋषिपुत्रः॥ द्विरुत्तरमवच्छिन्नं स्निग्धमिंद्रायुधं महत॥ वृष्टिं विज्ञापयत्याशु छिन्नपर्जन्यं नतु॥ तथा
च नंदी आह॥ बहुवर्णमविच्छिन्नं द्विगुणं स्निग्धमायतं॥ पृष्ठतः पार्श्वयोर्वापि जयायेंद्रधनुर्भवेत॥ तथा च
वृद्धगर्गः॥ पूर्वस्यां दिशि संग्रामे भवेदिंद्रधनुर्यदा॥ पश्चिमेन प्रयातानां जयस्तत्र न संशयः॥ येषां प्रवृ
त्ते संग्रामे पश्चादिंद्रधनुर्भवेत॥ पूर्वेण तु प्रयातानां जयस्तत्र न संशयः॥ येषां प्रवृत्ते संग्रामे वामपार्श्वेऽथ
वा तः॥ धनुः प्रादुर्भवेद्दृष्टं जयस्तेषां न संशयः॥ येषां प्रवृत्ते संग्रामे पुरतो दक्षिणेन वा॥ धनुः प्रादुर्भव

इंद्रं वधस्तोयानसंत्रायः ॥ पश्चिमेनु दिशोभागे भवतींद्रधनुर्यदि ॥ समेघं गगनं स्निग्धं वैदूर्यविमलाकृति ॥ वि
द्युत्सु निर्मला भाति सर्ववायुर्यदा भवेत ॥ सप्तरात्रेत दा वर्षो नादैवात दैवचिंतकः ॥ तदेवैतन्नहितार्थं व्याख्या
नेन शोभनं ॥ पूर्वमेव व्याख्यातः पश्चात्स्थितमनुलोममिति ॥ अन्यदप्याह ॥ विदिक्कुद्भूतं दिक्स्वामिनं व्यक्तं
मरककारि ॥ विगतमेघे व्यभ्रेन भस्याकाशे यदृश्यते तन्मरकाकारि ॥ मृत्युं करोति ॥ पाटलोवर्णः कुसुमलोहि
तः पीतकः पीतवर्णः ॥ नीलो नीलवर्णः ॥ एतैर्वर्णैर्यदि युक्तं इंद्रधनुर्भवति ॥ तदा यथासंख्यं शस्त्राग्निक्षुत्कृ
ता दोषा भवंति ॥ पाटलवर्णे शस्त्रकृतदोषः ॥ पीतवर्णे अग्निकृतः ॥ नीले क्षुत्कृतो दुर्भिक्षा भवति ॥ अन्य
दप्याह ॥ जलमध्येनवृष्टिर्भुवि सस्यवधस्तरौ स्थिते व्याधिः ॥ वल्मीके शस्त्रभयं निशासु सचिववधाय धनु
रैंद्रं ॥ ॥ ऐंद्रं धनुर्यदि चापं जलमध्ये यदि दृश्यते तदा अनावृष्टिरवर्षणं भवति ॥ भुवि भूमौ यदि दृश्यते तत्
दा सस्यानां वधो नाशो भवति ॥ तरौ वृक्षे स्थिते इंद्रचापे व्याधिपीडा भवति ॥ वल्मीके तु शस्त्रभयं भवति ॥
निशायां रात्रौ इंद्रधनुः सचिवस्य मंत्रिणो नाशाय भवति ॥ ॥ अथ दिक्वशेन फलमाह ॥ वृष्टिं करोत्यवृष्ट्यां
वृष्ट्यां वृष्टिं निवारयत्यैंद्रं ॥ पश्चात् सदैव वृष्टिं कुलिशभृतश्चापमाचष्टे ॥ कुलिशभृत इंद्रस्य चापं धनुः ॥ ऐं
द्रां पूर्वस्यां दिशि अवृष्टिमवृष्ट्यां अनावृष्ट्यां वृष्टिं वर्षणं आचष्टे कथयति ॥ ॥ अन्यदप्याह ॥ चापं मघोन
कुरुते निशायामाखंडलाशायां दिशि भूपपीडां ॥ याम्यापरोदक्प्रभवं निहन्यात् सेनापतिं नायकमंत्रिणौ च ॥ मघो
नः इंद्रस्य चापं धनुराखंडलायां पूर्वस्यां निशि रात्रौ दृष्टं भूपस्य राज्ञः पीडां कुरुते ॥ याम्यायां दक्षिणस्यां यत
द्रधनुः सेनापतिं निहन्यात ॥ अपरस्यां पश्चिमायां दिशि नायकं प्रधानपुरुषं हंति ॥ उदक् उत्तरस्यां दिशि मंत्रि
णं सचिवं हंति ॥ तथा च काश्यपः ॥ अवृष्टौ वर्षणं कुर्यात् ऐंद्रीं दिशमुपाश्रितं ॥ पश्चिमायां मदतन पाकशासनी
द्रधनुः सदा ॥ स्निग्धवर्णैर्घनैः शुभ्रैः वारुण्यां दिशि दृश्यते ॥ वृद्धं तु सुभिक्षं च नाशं सस्य प्रदर्शिता ॥ तत्रोचे १५४
दृश्यते पूर्वभयं नरपतेर्भवेत ॥ याम्यायां बलमुख्यस्य विनाशमभिप्रच्छति ॥ पश्चिमायां प्रधानस्य सौ
म्यायां मंत्रिणो वधः ॥ अन्यदप्याह ॥ निशि सुरचापं सितवर्णाद्यं जनयति पीडां द्विजपूर्वाणां ॥ भवति यस्यां

दिशि तद्दिशं नरपतिमुख्यान्निहन्यात ॥ ३५ ॥ निशि रात्रौ सुरचापं इंद्रधनुः सितादीः सितरक्तपीतकृष्णादि
तं पूर्वाणां ब्राह्मणप्रथमानां वर्णानां पीडां जनयत्युत्पादयति ॥ तद्यथा ॥ श्वेतवर्णं ब्राह्मणानां पीडां जनयति
रक्तवर्णं क्षत्रियाणां पीतं वैश्यानां कृष्णं शूद्राणां भवति च ॥ यस्यां दृश्यते ॥ यस्यां दिशि तद्दिशः प्रधानजन
पति विनाशयतीत्यर्थः ॥ ॥ इति श्रीभट्टोत्पलविरचितायां बृहत्संहिताविवृतौ इंद्रचापलक्षणं नाम षट्त्रिंशो
ध्यायः ॥ ३६ ॥ ॥ अथ गंधर्वनगरलक्षणं व्याख्यायते ॥ तत्रादावेव दिग्वशेन तस्य फलप्रदर्शनार्थमा
ह ॥ उदगादिपुरोहितबलपतियुवराजदोषदं भवति ॥ खपुरं सितरक्तपीतकृष्णं विप्रादीनामभावाय ॥ १ ॥
खपुरं गंधर्वनगरं उदगादिषु उत्तरादिषु दिक्षु दृष्टं यथाक्रमेण पुरोहितनृपबलपतियुवराजदोषदं
भवति ॥ उत्तरस्यां दिशि दृष्टं पुरोहितस्याचार्यस्य दोषदं अशुभदं ॥ पूर्वस्यां नृपस्य राज्ञः ॥ दक्षिणस्यां बलपतेश्च
मूनाथस्य ॥ पश्चिमायां युवराजस्य ॥ तथा सितरक्तपीतकृष्णं यथासंख्यं विप्रादीनां अभावाय ब्राह्मणादीनां नाशा
य ॥ श्वेतवर्णं विप्राणां रक्तं क्षत्रियाणां पीतं वैश्यानां कृष्णं शूद्राणां ॥ अन्यदप्याह ॥ नागरनृपतिजयावह
मुदक्प्रागदक्कोणचिवर्णनाशाय ॥ शांताशायां दृष्टं सतोरणं नृपतिविजयाय ॥ २ ॥ उदक उत्तरस्यां दिशि दृ
ष्टं खपुरं नागराणां नृपतीनां जयावहं ॥ यत्र दंशा दिक् कोणा दिक्षु स्थितं विवर्णानां कारकाणां विनाशाय भ
वति ॥ अन्यदप्याह ॥ सर्वदिगुत्थितं सततोत्थितं च भयदं नरेंद्रराष्ट्राणां चौराटविकान् हन्यात् धूमानलश
क्रचापाभं ॥ ३ ॥ सर्वदिगुत्थं सर्वासु दिक्षु समुत्थं सर्वकालं समुत्पन्नं सततदर्शनं ॥ नरेंद्रस्य गता राष्ट्रस्य ज
नपदस्य भयं भीतिं ददाति ॥ धूमानलशक्रचापाभं ॥ धूमस्य अनलस्याग्नेः शक्रचापस्येंद्रधनुषः सदृश
आभा कांतिर्यस्य ॥ तथाभूतं चौरान् तस्करान् आटविकान् अटव्याश्रयसंतितान् हन्या नाशयेत ॥ ॥
अन्यदप्याह ॥ गंधर्वनगरं समुत्थितमापांडुरमशनिपातवातकरं ॥ दीप्ते नरेंद्रमृत्युर्वामेरिभयं जयः सव्ये
॥ ४ ॥ गंधर्वनगरं समुत्थितमुत्पन्नमापांडुरं पांडुरवर्णं अशनिपातं च करोति ॥ दीप्ते दीप्तादिक्स्थिते सति न
रेंद्रस्य राज्ञो मृत्युर्मरणं भवति ॥ दिक्शांतदीप्तादिलक्षणं शकुने वक्ष्यत्याचार्यः ॥ तथा च ॥ मैतत्रासि

बृ० सं० ध्यदर्काभिमुखं दृष्टं तथाविधं॥ अंगारदीप्तधूमानुपरतांश्च शांतास्ततः परा॥ वामोऽभियं सैन्यस्य॥ सैन्यस्य
वामभागे दृष्टं अभियं शत्रुभीतिं करोति॥ मध्यदक्षिणे जयप्रदं॥ अन्यदप्याह॥ अनेकवर्णाकृति संप्रका
२५५ शंतपुरं पताकाध्वजतोरणान्वितं॥ यदा दानागमनुष्यवाजिनां पिबत्यसृक् भूरि रणे वसुंधरा॥ ६॥ यदा
यस्मिन्काले खे आकाशे सपुरं गांधर्वनगरं अनेकवर्णाकृति बहुवर्णा चित्रसंस्थानं प्रकाशमवदृश्यते॥ तच्च प
ताकाध्वजतोरणान्वितं॥ पताका वैजयंती॥ ध्वजाः चिह्नैः बहुदर्शनानि॥ अथवा पताकाध्वजैस्तोरणैरु
न्वितं संयुक्तं॥ तदा तस्मिन्काले नागानां गजानां मनुष्याणां॥ वाजिनां अश्वानां॥ रणे संग्रामे असृक् रुधिरं
वसुंधरा भूमिः पिबति॥ तथा च काश्यपः॥ बहुवर्णपताकाढ्यं गांधर्वनगरं महत्॥ दृष्टं प्रजाक्षयकरं सं
ग्रामे कामरूपिणं॥ ॥ इति श्रीभट्टोत्पलविरचितायां बृहत्संहिताविवृतौ गांधर्वनगरलक्षणं नाम सप्त
त्रिंशोऽध्यायः॥ ३७॥ ७ ॥ अथ प्रतिसूर्यलक्षणं व्याख्यायते॥ तत्रादावेव वर्णलक्षणं शुभाशु
भमाह॥ ॥ प्रतिसूर्यः प्रशस्तो दिवसकृदृतुवर्णसंनिभः स्निग्धः॥ वैदूर्यनिभः स्वच्छः शुक्लश्च क्षेमसौ
भिक्षः॥ १॥ प्रतिसूर्योद्भूतो योऽर्कः स दिवसकृत आदित्यस्य॥ ऋतुवर्णसंनिभः स्निग्धः॥ आदित्यस्य य
ऋतुवर्णो उक्तः॥ कपिलः शिशिरे इत्यादि॥ वैदूर्यनिभः शुक्लः श्वेतवर्णश्च क्षेमसौभिक्षकरः॥ क्षेमं
सुभिक्षं च करोति॥ अन्यदप्याह॥ पीतो व्याधिं जनयत्यशोकरूपश्च शस्त्रकोपाय॥ प्रतिसूर्यकाणां माला
दस्युभयातंकनृपघ्नी॥ २॥ पीतः पीतवर्णः प्रतिसूर्यो व्याधिं जनयति॥ अशोकरूपो अशोकपु
ष्पसदृशो लोहितवर्ण इत्यर्थः॥ तथा रूपः शस्त्रकोपाय भवति॥ शस्त्रकोपं युद्धं करोति॥ प्रतिसूर्य
काणां माला पंक्तिर्यदि दृश्यते तदा दस्यवश्चौरास्तेभ्यो भयं आतंकं उपद्रवान्नृपाणां जनं हंति॥ अन्यद
प्याह॥ दिवसकृतः प्रतिसूर्यो जलकृदुदग्दक्षिणास्थितोऽनिलकृत॥ उभयस्थः सलिलभयं नृपमुपरि २५५
हंत्यधो जनहा॥ ३॥ इयमार्या अर्केणैव व्याख्याता॥ तथा च काश्यपः॥ याम्ये वातप्रदो ज्ञेय उत्तरे वृष्टिदो
भवेत॥ उभयोः पार्श्वयोर्भीतिं सलिलं भूरि यच्छति॥ तथा च पराशरः॥ दीप्ताग्निवर्णः कनकप्रभो

वा संध्यासु चेत भास्करमावृणोति॥ कपिलाभः खात प्रपतेत महोल्कान्पतिर्विनश्येत सहितः प्रजाभिः॥ संध्या
समीपे यदि भास्करस्य दृश्येत माला प्रतिसूर्यकाणां॥ सर्पाभियोगः प्रचुरश्च चौररोगाश्च घोरा विविधः
प्रकाराः॥ प्रत्यर्कमिंद्रायुधदंडमत्स्यसविद्युदुल्कानिपातवर्षाः॥ भवंत्यभीक्ष्णं दिनरात्रिसंध्याभयं
तदा भूमिपतेर्भवेच्च॥ इति प्रतिसूर्यलक्षणं नाम अष्टत्रिंशोऽध्यायः॥ ३८॥ ७ ॥ ॥
अथ निर्घातलक्षणं व्याख्यायते॥ ॥ तत्रादावेव तदुत्पत्तिदर्शनार्थमाह॥ ॥ पवनः पवनाभिहतो
गगनादवनौ यदा समापतति॥ भवति तदा निर्घातो भवतीत्युच्यते॥ तथा च गर्गः॥ यदांतरिक्षात अ
वनौ बलवान मारुतो हतः पतत्यधः स निर्घातो भवेदनिलसंभवः॥ स च पापो दीप्तविहगरुतः॥ स च
निर्घातो दीप्तैः सूर्याभिमुखैः खगैः विहगैः पक्षिभिः रुतः कृतशब्दः पापो भवति॥ दुष्टफलद इत्यर्थः॥
अथ वेलावशेन फलमाह॥ ॥ अर्कोदयेऽधिकरणिकनृपधनियोधांगनावणिग्वेश्याः॥ आप्रहरांशो
नाविकमुपहन्यात् शूद्रपौरांश्च॥ २॥ आमध्याह्नाद्द्विजनृपसेविनो ब्राह्मणांश्च पीडयति॥ वैश्यजल
दांस्तृतीये चौरान् प्रहरे चतुर्थे तु॥ ३॥ अस्तं याते नीचान् प्रथमे यामे निहंति सस्यानि॥ रात्रौ द्वितीययामे
पिशाचसंघान्निपीडयति॥ ४॥ तुरगकरिणस्तृतीये विनिहन्याद्यायिनश्चतुर्थे तु॥ भैरवजर्जरशब्दो
याति यतस्तां दिशं हंति॥ ५॥ ॥ अर्कोदय इति॥ अर्कोदये सूर्योदयकाले यदि निर्घातः स्यात्तदा अ
धिकरणिकाः अधिकरणव्यापारे नियुक्ता अधिकरणिकाः॥ नृपो राजा॥ धनिनः ईश्वराः॥ योधाः युद्धकुश
लाः॥ अंगनाः स्त्रियः॥ वणिजः क्रयविक्रयजीविनः॥ वेश्या बंधुक्यः॥ एतान् सर्वान् उपहन्यात् नाशयेत्
दिनारंभात घटिकाद्वयं यावत सूर्योदयः॥ आप्रहरांशात॥ सूर्योदयादारभ्य प्रहरांशो दिनचतुर्थभागः त
स्मिन्दिवसचतुर्भागे॥ अजा छागाः॥ अविकाः अविप्रकाराः॥ शूद्राः शूद्रजातयः॥ पौराः नागरजनाः
एतान् उपहन्यात्॥ मध्याह्नादिति॥ प्रहरादूर्ध्वं मध्याह्नं यावत् राजोपसेविनो नृपतत्परान् ब्राह्मणान्
पीडयेत उपतापयति॥ तृतीये प्रहरे वैश्यान् जलदान् मेघांश्च पीडयेत॥ चतुर्थे प्रहरे चौरान् तस्करान्

पीड्यति॥ अस्तं यात इति॥ अस्तं याते केन्द्रे यदि निर्याति अपयाति॥ तदानीं चान अधमकर्मरतानां हंति॥ रात्रेः
व॰ रा॰ सं॰ प्रथमे यामे प्रतिहारे सस्यानि हंति॥ नाशयति॥ रात्रेः तृतीये प्रहरे तुरगान् अश्वान् कृष्णपृष्ठान् नीलनिभ
न्यात॥ चतुर्थे यामे यायिनो जिगमिषून् हन्यात्॥ यतो यस्यां दिशि भेरीविरुतो नर्दति भिन्नभाण्डसम
१५८ तसदृशः शब्दो याति गच्छति॥ तां दिशं आशु अरातिनाशयति॥ तथा च समाससंहितायां॥ निर्घातो रात्रे
ण हंति नृपचौरभृत्यराष्ट्राणि॥ तस्कराविप्रांश्चार्कोदयात् दिशं तावयति यस्यां॥ तथा च गर्गः॥ यदा स्त्र
योर्दिशे प्राणिनि घातः श्रूयते यदि॥ क्षत्रिया योधमुख्याश्च पीड्यंते नात्र संशयः॥ प्रहरान्तो तथा वेश्या
न हन्यात् गोजीविनस्तथा॥ पार्श्वतो निर्वेश्यान् अपराह्णे तु दस्यवः॥ नीचानास्तंगते हन्यात् ब्रः सायम
स्तमिते रवौ॥ प्रथमे प्रहरे सस्यान् धरान्तु तुराससान॥ रात्रिश्रिभागे वेश्यांश्च प्रत्यूषे नाहतो भवेत्॥
यां दिशं नाभिगच्छेतान् घातो भेरीस्वनः॥ तद्देशान्हंति देवांश्च सर्वान् इक्ष्वाकव स्तथा॥ ॥ इति निर्घा
तलक्षणं नाम एकोनचत्वारिंशोऽध्यायः॥ ३९॥ ॥छ॥ अथ सस्यजातकं व्याख्यायते॥ तत्रादावेवा
गमप्रदर्शनार्थमाह॥ ॥वृश्चिकवृषप्रवेशे भानोर्यैर्बादरायणेनोक्ताः॥ ग्रैष्मिकशारदसस्यानां सद
सद्योगाः कृतास्त इमे॥ १॥ भानोरादित्यस्य वृश्चिकवृषप्रवेशे यथाक्रमं ग्रैष्मिकशारदसस्यानां॥ वृश्चिकप्रवेशे
ग्रैष्मिकसस्यानां॥ वृषप्रवेशे शारदसस्यानां धान्यादीनां बादरायणेनाचार्येण सदसद्योगाः उक्ताः॥ कथिता
स्त इमे सर्वे मया कृताः॥ एतदुक्तं भवति॥ यत्रादिने रवे वृश्चिकसंक्रमणं भवति॥ तत्र वृश्चिकमे लग्नं परिकल्प्य
वक्ष्यमाणविधिना ग्रैष्मिकसस्यानां निरूपणीयमेव॥ तद्यत्रयोगप्रदर्शनार्थमाह॥ ॥भानोरलिप्रवेशे
केन्द्रैस्तस्मात् शुभग्रहाक्रान्तैः॥ बलवद्भिः सौम्यैर्वा निरीक्ष्यते ग्रैष्मिकवृद्धिः॥ ॥भानोः सवितुः अलिप्रवेशे वृ
श्चिकप्रवेशसमये अयं विचारः॥ केन्द्रैः तस्मात् शुभग्रहाक्रांतैः॥ यो यत्रार्कोऽधिष्ठितो नादृश्यते॥ तस्मात् यानि १५८
केन्द्राणि लग्नचतुर्थसप्तमदशमानि तैः शुभग्रहाक्रांतैः॥ शुभग्रहाः इंदुबुधगुरुसिताः अत्रापि क्षीणेन्दुः वृश्चिकस्थ
केन्द्रेणाक्रान्तं मन्तेनुनादृष्टः॥ एवं तस्मात् आदित्यात् केन्द्रैः शुभग्रहाक्रांतैः सौम्यग्रहयुतैः॥ एतदुक्तं भवति॥ य

दा सवितुर्वृश्चिकप्रवेशे केन्द्रस्थानानि शुभग्रहाक्रांतानि भवंति॥ बलवद्भिः सौम्यैः केन्द्रवर्तिमन्यत्रावस्थितैः॥ भानोर्नि
रीक्ष्यते दृष्टे ग्रैष्मिकस्य वृद्धिर्भवति॥ अथ केन्द्रनिर्देशानंतरं एवं दर्शनशब्दो नादिष्टः॥ तत केन्द्रगतैरपि गृह्यते
ष्यते॥ कस्मात् आचार्येण दर्शनार्थे देशेन च केवलेनानादिष्टमिति॥ अथैवं मन्यते॥ यथा यदि केन्द्रग्रहणं
क्रियते यद्दर्शनं निर्देशेन च केवलेन क्रियते तदा हि यत्केन्द्रावस्थितस्य कथं दर्शनं घटते उपगम्यापि क्रमः॥ यथेवं
तदा एवानादिष्टमतं॥ यथा बलवद्भिः सौम्यैर्दृष्टे भानौ गृह्णाति॥ तस्मात् आचार्यः सूत्रसमासाक्षिप्रियः परिहृ
तो बलवत् सौम्यैर्वा निरीक्षितः साक्षिकल्पात् इदं अवगम्यते॥ यथा सौम्यैर्बलवद्भिर्वा केन्द्रस्थानान्युक्तानि भवं
ति॥ तदा ग्रैष्मिकसस्य वृद्धिर्भवति॥ यदा तु पुनः केन्द्राणि शुभग्रहाः सौम्या बलिनः पश्यंति॥ तदा ग्रैष्मि
कसस्याभिवृद्धिर्भवति॥ मध्यदृष्टिर्न यष्टिता॥ बलहीनेषु मध्यमाना ग्रैष्मिकसस्यानां बलवृद्धिर्भवति॥ तथा च बाद
रायणः॥ वृश्चिकसंस्थे सूर्ये शशिबलभाग्ने गते शशिनि वृद्धिगते॥ तेरवकेंद्रगैर्वा ग्रैष्मिकधान्यस्य निर्दिशेद् वृद्धिं
॥अन्ययोगान्तरमाह॥ अष्टमराशिगते र्के गुरुशशिनोः कुंभसिंहसंस्थितयोः। सिंहघटसंस्थितयोर्वा निष्प
त्तिर्ग्रैष्मिकसस्यस्य॥ अर्केवाष्टमराशिगते वृश्चिकस्थ इत्यर्थः। गुरुशशिनोर्जीवचन्द्रयोर्यथाक्रमं कुंभ
सिंहस्थयोः गुरुः कुंभे। शशी सिंहे॥ अथवा सिंहघटसंस्थितयोः। गुरुः सिंहे शशी घटे॥ कुंभे तदा ग्रैष्मसस्य
स्य निष्पत्तिर्निष्पत्तिः॥ अन्ययोगान्तरमाह॥ अर्कात् सितेंदुस्तौ यस्य बुधः यथा वृगपदेव संस्थितयोः। व्ययगत
योरपि तद्वन्निष्पत्तिरतीव गुरुदृष्ट्या॥ अर्कादिव अलिकालात् सितेंदु द्वितीयस्थानस्थो बुधः॥ अथवा द्वितीय
स्थयोः सितबुधयोर्युगपद्द्वयोरेव द्वितीयस्थयोर्व्ययगतयोरपि तद्वत्तेनैव प्रकारेण व्ययगतयोरा
दित्यात् द्वादशस्थानस्थितयोः शुक्रबुधयोः द्वादशस्थितयोः सस्यानां निष्पत्तिर्भवति॥ तथा च बादरायण
स्य यदि बुधो द्वितीये शुक्रे वा तत्र युगपदेव तयोः व्ययगतयोर्वा निष्पत्तिर्गुरुदृष्टितावा॥ अन्यतयोगा
न्तरमाह॥ शुभमध्ये ऽलिनि सूर्ये गुरुशशिनोः सप्तमे पराः संपत्। अल्पादिसहिते गुरौ द्वितीये धान्य
निष्पत्तिः। अलिनि वृश्चिके शुभमध्यस्थिते वृश्चिकात् सूर्ये युतात् बुधशुक्रयोः केन्द्रा द्वितीयस्थाने भवति॥ अ

त्या द्वादशेन दशुभमध्यगतो भवति॥ तथाभूताद्रादित्यात गुरुशशिनोः सप्तमोष्टमोस्थितयोः परात्र रुक्षसंप
बृ॰ सं॰ तसस्यानां भवति॥ अल्पाद्दृष्टिरिति। सवितरि आदित्ये अल्पाद्दृष्टिके वृश्चिकप्रारंभस्थे शीतगौरीव हीनीयार्धं
१५९ निष्पत्तिः अर्धसस्यं निष्पद्यते॥ अन्यत योगांतरमाह॥ भाद्विकार्थयुते सूर्यादलिगाच्छितं दशार्कमुत्ते॥
सस्यस्य परासंपत्तकर्माणि ज्ञेवि गवां चाप्याः॥ ६॥ सूर्यादलिगात॥ वृश्चिकस्थात सितेंदुअशोपत्रैः श्रुत्वं द्धवेथ
र्थ्याससंस्थे भाद्वेकार्थयुते रेकादशाद्द्वितीयचतुर्थेः तत्रे वेजाते॥ एकादशे शुक्रे॥ चतुर्थे चंद्रे॥ द्वितीयेब
धः सस्यस्य परः प्रकृष्टासंपत्त भवति। अस्मिन्नेव योगे कर्माणि दशमस्थानाच्छितजीवे गुरौन केवलं सस्यस्य परा
संपत्त भवति। यावत गवां अप्याशिषा संपत्त भवति। क्षीरवाहुल्यमित्यर्थः॥ अन्यत योगांतरमाह॥ कुंभगुरौ
ग्राश्रमूर्योलिमुखे कुजार्केजौ मकरे॥ निष्पत्तिरर्धमतोपश्चात्परत्व करतभयंगोगाभयं च भवति॥ अन्यत यो
गांतरमाह॥ मध्ये पापग्रहयोः सूर्यः सस्यं विनाशयत्यलिगः॥ चापः सप्तमराशिगतैः जाते तं विनाशयति॥ ८॥ सू
र्योरविः आलिगो वृश्चिकोस्थितः पापग्रहयोः शनैश्चरांगारकयोर्मध्यस्थितः॥ एको द्वितीये एको द्वादशे स्थितो भवति
तदा सस्यं विनाशयति॥ तथा वृश्चिकान्तःसमराशौस्थितः पापः सौरे भौमो वा सस्यं जातं समुत्पन्नमपि विनाश
यति॥ तथा च बादरायणः॥ क्रूरांतस्थः सूर्यो वृश्चिकसंस्थो विनाशयति॥ अन्यदप्याह॥ अर्थस्थाने क्रूरः सौम्यैर्न
वीक्षितः॥ प्रथमजातसस्यं निहंतिपश्चात कृतं निष्पादयेतप्तं॥ ९॥ वृश्चिकाद्द्वितीयस्थाने द्वितीये क्रूरः सौरो भौ
मो वा स्थितः॥ सौम्यैर्निरीक्षितो दृष्टः॥ प्रथमजातं प्रथमोत्पन्नं सस्यं निहंति पश्चात कृतं यत्नतः समस्तं
निष्पादयेत॥ अन्यत योगांतरमाह॥ जामित्रकेंद्रसंस्थौ क्रूरौ मध्योद्धतौ यो न्यः केंद्रलग्नचतुर्थे उभयमाना
मन्यत में स्थितः॥ तथा विधौ ता सस्यविपत्तिं नाशं कुरुतः॥ तावेव क्रूरौ तत्रस्थौ सौम्यैः शुभग्रहैर्दृष्टौ अवलोकितौ
सर्वत्र सर्वस्मिन्देशे विपत्तिं नाशं कुरुतः॥ न क्वचित क्वचित इत्यर्थः॥ नन्वत्र केंद्रग्रहणेन सप्तमस्थानं दत्तं॥ न
त किमर्थं जामित्रग्रहणमित्युच्यते॥ जामित्रग्रहणेन तत्प्रतिपादितं॥ नन्वत्र यदेकोऽवश्यमेव जामित्रे अन्यो
न्यस्मिन्केंद्रे भवति॥ तदा एष योगः॥ तथा च बादरायणः॥ सूर्यात्ससप्तमसंस्थः पापो न्यः केंद्रगश्चहानि १५९

करो॥ सौम्यग्रहसंस्पर्शेन तथा सर्वत्र निर्दिष्टः॥ अन्यत योगांतरमाह॥ वृश्चिकसंस्थ इति सप्तम एव योगे यत्र
क्रूरौ॥ भवति तदानिष्पत्तिः सस्यानामर्थपरिहानिः॥ ११॥ अर्कोदादित्यात वृश्चिकसंस्थो क्रूरो पापौ भौमसौ
रौ यदा सप्तमस्थौ गतौ॥ एकः सप्तमः पातः पक्षे भवति तदा सस्यानां वृद्धिर्भवति किंत्वर्थपरिहानिः॥ परिहा
निः स्वल्पता॥ बहुमूल्येन अल्पं लभ्यते॥ अथ शारदसस्यानामतिदेशार्थमाह॥ विधिनानेन वरविर्वृषप्रवेशे
शारतसमुत्थानां॥ वितेयः सस्यानां नाशायशिवाय तद्वत॥ १२॥ अनेन चानिर्दिष्टेन विधिना वृश्चिकप्रवेशोक्ते
नरविरादित्यो वृषप्रवेशे वृषसंक्रमणकाले शारतसमुत्थानां सस्यानां नाशाय अभावाय शिवाय निष्पत्तये ततः
यदि तैः सस्यजातकज्ञैः वितेयो ज्ञातव्यः॥ तथा च बादरायणः॥ योगवयोगा अभिहिता वृश्चिकस्थे दिवाकरे॥
वृषेन शारदानां चिंतनीया यथार्थतः॥ अधुना रविचारवशेन ग्रैष्मिकसस्यस्य सामर्थ्यमहर्घतां चाह॥ त्रिषु मेषादिषु सं
सूर्यः सौम्ययुतावीक्षितावा विचरन॥ ग्रैष्मिकधान्यं कुरुते समर्घमभयोपभोग्यं च॥ १३॥ सूर्य आदित्यः त्रिषु राशि
षु मेषादिषु मेषवृषमिथुनेषु सौम्यैः शुभग्रहैः बुधगुरुशुक्रैर्युतः॥ युक्तो वीक्षितो वावलोकितः॥ अथवा उभयोपं
भोग्यं इहलोके परलोके चोपभुज्यते॥ इहलोके धनगम्यं॥ धर्मार्थं परलोके॥ अथ शारदसस्यानाह॥ का
र्मुकमृगघटसंस्थः शारदसस्यस्य तद्वदेव रविः॥ संग्रहकालेऽस्य विपर्ययेन क्रूरदृक्योगात॥ १४॥ रविरादित्य
॥ कार्मुकं धनुः॥ मृगो मकरः॥ घटः कुंभः॥ एतेषु स्थितः शारदसस्यस्य तद्वदेव तथैव वक्तव्यः॥ यथा त्रिषु मेषादि
षु सूर्यः॥ सौम्ययुतावीक्षितो वा विचरन् ग्रैष्मिकधान्यं समर्घमभयोपभोग्यं च॥ तथा च कार्मुकमृगघटसंस्थः
सूर्यः सौम्ययुतावीक्षितो वा विचरन शारदं धान्यं समर्घमभयोपभोग्यं कुरुते॥ संग्रामकाले समये क्रूरयुक्तयो
गाविपर्ययो ज्ञेयः॥ क्रूरग्रहदृष्टलग्न॥ संयोगाच्चाविपर्यया विपरीतो ज्ञेयः॥ क्रूरग्रहाश्च भौमसौरौ॥ एतदुक्तं भ
वति॥ यथा मेषादिषु त्रिषु कार्मुकादिषु त्रिषु वा सूर्यः पापयुतावीक्षितो विचरति॥ तदा विपर्ययो महर्घ
ताम् भयो रोपयोज्यं॥ एतत संग्रहकाले विपरीतः शोभनः विपरीतयोगे सर्वं चिंत्यं॥ कार्यं॥ ॥ इति श्री
भट्टोत्पलविरचितायां संहिताविवृतौ सस्यजातकं नाम चत्वारिंशोऽध्यायः॥ ४०॥ ॥ सं

॥ अथ द्रव्याणिश्रयोव्याख्यायंते॥ ॥ तत्रादावेवागमप्रदर्शनार्थमाह॥ येषांद्रव्याणामधिपतयोगणाय: समुद्दिष्टा
बरा०सं० मुनिभि:शुभाःशुभार्थंनानागमत:प्रवक्ष्यामि॥१॥ येषांद्रव्याणांमेषादयोराशयोमेषाधिपतयोमुनिभि:कश्यपादि
भि: समुद्दिष्टा:कथिता:शुभार्थंशुभाशुभार्थं। समर्घमहर्घज्ञानार्थंतानरागानागमात्प्रवक्ष्यामि॥ कथयिष्या
१५८ मि॥ मेषस्यकानिद्रव्याणीत्येतदाह॥ वस्त्राविकुतपानांमसूरगोधूमरालकयवानां॥ स्थलसंभवौषधीनांकनक
स्यचकीर्तितोमेष:॥२॥ वस्त्राण्यंबराणि॥ आविकंअविनामिदमाविकं॥ कंबलंतत्संभवमित्यर्थ:॥ कुतपंछाग
रोमकृतं॥ नखेनपालं। मसूरगोधूमा: प्रसिद्धा:। रालकाव्रक्षानिर्यास:। यवा:प्रसिद्धा:। एतेषांसर्वेषांतथा
स्थलसंभौषधीनांस्थलेजलरहितायांभूमौ: औषधय: संभवंति॥ तासां। तथाकनकस्यसुवर्णस्यमेषोराशि
रधिपति: कीर्तित:उक्त:॥ तथाचकश्यप:॥ मेषेसवर्णवस्त्राणिगोधूमाजाविकास्तथा॥ ॥अथवृषमिथुन
योराह॥ गविचकुसुमगोधूमशालियवमाहिषसुरभितनया:स्यु:॥ मिथुनेपिधान्यशारदवल्लीआलु
ककार्पासा:॥ वस्त्राणिकुसुमानिपुष्पाणि॥ गोधूमा:शालय:। षष्टिकादय:। यवा:। माहिषा:। सुरभितन
या बलिवर्दा:॥ एतेगविवृषेस्यु: भवेयु:॥ मिथुनेपीति धान्यानिप्रसिद्धानि॥ शारदंशरत्संभवंयत्किंचि
त॥ वल्लीप्रसिद्धा:। द्राक्षावल्यादि॥ शालूकंकमलकंदं॥ कार्पास:। एतत्सर्वंमिथुने॥ तथाचकश्यप:॥ वृषभ
दूषगोवस्त्रशालय:पुष्पसंभवं॥ मिथुनेधान्यशालूकवल्य:कार्पासशारदं॥ ॥अथकर्कसिंहयोराह॥ कर्कि
णिकोद्रवकदलीदूर्वाफलकंदपत्रचोचानि॥ सिंहेतुषधान्यरसा: सिंहादीनांत्वच:सगुडा:॥ कोद्रवाप्रसिद्धा:॥
कदलीरंभा। दूर्वाशाद्वलं॥ फलानिसर्वाणितालीफलप्रभृतीनि। कंदंप्रसिद्धं मूलकंवाजियस्ययत्कंदं॥ पत्रंगंध
पत्रं। चोचंपालेवंलेनालिकेरंवा॥ एतानिसर्वाणिकर्कटे॥ तुषधान्यानिशालय:॥ रसा: षड्मधुरअम्ललव १५८
णकटुतिक्तकषाया:॥ सिंहादीनांप्राणिनांसिंहद्वीपमार्जाराणां॥ त्वचश्चर्माणि॥ व्याघ्रचर्माणिसर्वाणि।
एतेसगुडा:गुडेनसहिता: सर्वएवसिंहे॥ तथाचकश्यप:॥ कर्कटेफलदूर्वाश्चकोद्रवा:कदलीतथा॥ सिंहे
धान्यंसर्वरसा:सिंहादीनांत्वचोगुडा:॥ ॥अथकन्यातुलयोराह॥ षष्ठेतसीकुलाया:कुलत्थगोधूमसमुद्गनिष्पा
वा:

सप्तमराशौमाषायवगोधूमा: सर्षपाश्च॥५॥ अतसीप्रसिद्धा॥ कुलाया:सस्यां। कुलत्था:। गोधूममुद्गएतेसर्वे
वप्रसिद्धा:। अनुक्तानियानिपुनरर्थ्यंते॥ तेनिष्पावा:शालयइतिकेचित्पठंति॥ डिंबिकाधान्यमितिकेचित्पठं
ति॥ एतेकन्यायां॥ माषायवा:गोधूमा:सर्षपा:॥ एतेसप्तमराशौतुलायां॥ तथाचकश्यप:॥ कन्यायांतसीमकुलत्था
नमकुलायकान॥ तुलायांयवगोधूमा:माषा:सिद्धार्थकास्तथा॥ ॥अथवृश्चिकधनुषोराह॥ अष्टमराशाविं
क्ष:संस्यंकाद्यान्यत्राविकंचापि॥ नवमेतुरंगलवणा: वस्त्रास्त्रतिलधान्यमूलानि॥६॥ इक्षु:प्रसिद्ध:। सैक्यंसैका
ष्ठं॥ वल्लीफलानि॥ लोहंआयसं॥ एतानि। नभाअजाछागा:। अवि:प्रसिद्ध:। तज्जातमाविकंकंबलं॥ एतत्सर्वम
ष्टमराशौवृश्चिके॥ तुरंगाअश्वा:। लवणंसैंधवं॥ अंबराणिवस्त्राणि। अस्त्राणिआयुधानि॥ धनु:खड्गादी
नि॥ तिलकंधान्यं। मूलानि॥ एतानिधनुषि॥ तथाचकश्यप:॥ अलिनीक्षुरसा:सैक्यमाज्यंलोहंसकांस्यकं॥ धा
न्यंधनुषिवस्त्राणिलवणंतुरगास्तथा॥ अथमकरकुंभयोराह॥ मकरेतरुगुल्माद्यंसैक्यक्षुसुवर्णवर्णलो
हानि॥ कुंभेसलिलजफलकुसुमरत्नचित्राणिरूपाणि॥ ७॥ तरवोवृक्षा:प्रसिद्धा:॥ गुल्मा:अकांडविटपा
मित्यर्थ:॥ आदिग्रहणाल्लतावल्य:॥ सैक्यंसैकोष्ठं॥ इक्षु:प्रसिद्ध:। सुवर्णं। कृष्णलोहंआयसं॥ एतानि
सर्वाणिमकरे। कुंभेइति॥ सलिलजंयात्किंचित्सलिलसंभवं॥ फलानिकुसुमानि॥ रत्नानिचित्राणि॥ नाना
प्रकाराणि। यथोरूपाणिएतानि कुंभे॥ तथाचकश्यप:॥ मकरेसस्यसैक्यंचसुवर्णंगुडधातुकं॥ कुंभेकुसु
मचित्राणिदूसाश्विजलोद्भवा:॥ अथमीनस्याह॥ मीनेकपालसंभवानिरत्नान्यंबुजानिवज्राणि॥ को
टाश्चनिकरत्वाख्यात्याता मत्स्यजातंच॥८॥ कपालसंभवानिरत्नानिगजकपालोद्भवानिमुक्ताफलानिशुक्ति
संभवानि॥ वज्रंहीरकं। अनेकरूपाचद्रविधा: स्नेहा:तैलादय:। मत्स्यजातंमत्स्योद्भवंमुक्ताफलादि॥ एतेस
र्वेमीनेव्याख्याताउक्ता:॥ तथाचकश्यप:॥ पद्ममुक्तादीनांद्रव्याणांमीनईश्वर:॥ अथेषांद्रव्याणांशुभाशु
भार्थमाह॥ ॥ राशेश्चतुर्दशार्थायसप्तमनवमपंचमाश्रितोजीव:॥ एकादशपंचाष्टमेपञ्चाष्टिकाश्च
श्विकर:॥९॥ षट्सप्तमकोणहानिकृच्छित्रुक: क्रोतिस्रोषिषु॥ उपचयसंस्था:शुभदा:शेषेषुहानिकरा:॥१०

DR BHAU DAJI MEMORIAL

गतोऽथ चतुर्दशार्थायेति॥ यस्य कस्यचिद्गतोऽथ चतुर्थस्थानं दशमं॥ अर्थस्थानं द्वितीयं॥ आयस्थानमेकादशं स
बृ.सं. प्तमपंचमनवमएतेषां स्थानानामन्यतमस्थानस्थो नाथो बृहस्पतिः॥ तत्प्रोक्तद्रव्याणां वृद्धिकरः॥ द्वितीयएकाद
शतृतीयपंचमअष्टमस्थानानामन्यतमस्थितः॥ शशिजो बुधो वृद्धिकरः॥ षट्सप्तदशेति॥ शुक्रो भार्गवः॥ षट्स
१५९ प्तमस्थानगतो हानिं क्षयं करोति॥ शेषेषु प्रथमादिषु स्थितो वृद्धिं करोति॥ क्रूरा आदित्यांगारशनैश्चराः॥ उ
पचयसंस्थाः शुभदाः वृद्धिकराः॥ शेषेषु अन्यस्थानेषु प्रथमद्वितीयादिषु हानिकराः॥ तथा च काश्यपः॥
चतुःपंचद्विसप्तस्थो न वृद्धिनवगो गुरुः॥ यस्य राशेस्तदुक्तानां द्रव्याणां वृद्धिदः स्मृतः॥ शुक्रः षट्सप्तमस्थो वा हा
निकृद्वृद्धिदोऽन्यगः॥ द्व्येकादशदशार्थस्थः संस्थितः शशिजः शुभः॥ पापास्तूपचयस्थाश्च वृद्धिं कुर्वंति नान्यगाः
तत्रैव विशेषमाह॥ ॥ राशौ यस्य क्रूराः पीडास्थाने च संस्थिता बलिनः॥ तत्प्रोक्तद्रव्याणां महर्घता दुर्लभत्वं च॥
यस्य राशेः क्रूराः पापा अतिग्रहा रविभौमशनयः पीडास्थाने अनुपचयस्थाने व्यवस्थिताः॥ ते च बलिनो वीर्यवं
तः॥ ते च मित्रक्षेत्रोच्चस्वनवांशस्थिताः शुभैर्दृष्टाः शुभैरीक्षिताश्च॥ तत्प्रोक्तद्रव्याणां तस्य राशेर्यानि प्रोक्ता
नि द्रव्याणि तेषां कथितद्रव्याणां महर्घता बहुमूल्यं दुर्लभत्वं दुःप्रापत्वं च भवति॥ तथा च काश्यपः॥ राशेरनिष्ट
स्थाने तु पापाश्च सबलाः स्थिताः॥ तद्द्रव्याणां नाशकराः दुर्लभा हि भवंति हि॥ अन्यदप्याह॥ इष्टस्थाने सौम्या बलि
नो येषां भवंति राशीनां॥ तद्द्रव्याणां वृद्धिः सामर्घ्यं सुलभत्वं च॥ येषां राशीनां सौम्याः शुभग्रहाः बुधगुरुशुक्रा
इष्टस्थानस्था इष्टानि स्थानानि यथा॥ जीवश्चतुर्थादिस्थानेषु बुधश्च द्व्यादिषु शुक्रः षट्सप्तरहितेषु एतेषु स्थानेषु
बलिनो येषां राशीनां भवंति॥ तद्द्रव्याणां तेषां राशीनां यानि द्रव्याणि तेषां सामर्घ्यं समर्घता सुलभत्वं सुलभं
च भवति॥ तथा च काश्यपः॥ इष्टस्थानस्थिताः सौम्या बलिनो येषु राशिषु॥ भवंति तद्गतानां च द्रव्याणां शुभ
दाः स्मृताः॥ अन्यदप्याह॥ गोचरपीडायामपि॥ यदि बलिभिः शुभैर्दृष्टः पीडां न करोति तथा क्रूरैः १५९
वेधविपर्यासैः॥ जीवादीनां चतुरादीनि स्थानानि यान्युक्तानि तदतिरिक्तेष्वन्येषु यदि स्थिता भवंति॥ तदा स पी
डां तथा न करोति॥ एतद्दुर्लभं भवति॥ तद्द्रव्याणि तानि सर्वाणि महर्घाणि भवंति॥ क्रूरैर्वेधविपर्यासैः॥ क्रूरैः पा

पग्रहैः बलिभिर्गोचरपीडायां यदि राशिर्दृश्यते न तदा विपर्यासाद्विपरीतता भवति॥ क्रूरैर्वेधे प्राक्प्रोक्तद्रव्याणां
महर्घता दुर्लभत्वं च भवति॥ ॥ इति श्रीभट्टोत्पलकृतौ वाराहसंहितावृतौ द्रव्यनिश्चयो नाम एकचत्वा
रिंशोऽध्यायः॥ ४१॥ ॥ ७ ॥ अथार्घकांडाध्यायो व्याख्यायते॥ तत्रादावेव प्रयोजनप्रदर्शनार्थमाह॥
अतिवृष्ट्युल्कादंड्याद्यपरिवेषग्रहणविधिपूर्वं च॥ दृष्ट्वामावास्यायामुत्पातान्पौर्णमास्यां च॥ १॥ ब्रूयादर्घविशेषान्प्र
तिमासं राशिषु क्रमात्सूर्ये॥ अन्यतिथ्याद्युत्पातान्ये न स्मरति सति सदा॥ २॥ ॥ अतिवृष्ट्युल्कादंडेति॥ अतिवृ
ष्टिः अतिवर्षं॥ उल्का तस्य लक्षणमुक्तं॥ उल्काशिरसा अतिविशाला॥ दंडस्तस्यैव लक्षणमुक्तं॥ रविकिरणजल
दमरुतामिति॥ एतानि तथा परिवेषस्तस्य लक्षणमुक्तं॥ ग्रहणं अर्केंद्वोः॥ पराधिः प्रतिसूर्यः॥ तस्य लक्षणमुक्तं॥
तत्सर्वाद्विग्रहणात् रजोनीहाराद्भूकंपदाहगंधर्वनगरनिर्घातदेवत्यानि॥ एतानुत्पातान् अमावास्यायां पौर्णमा
स्यां दृष्ट्वा विलोक्य॥ अर्घविशेषान् सूर्ये आदित्ये प्रतिमासं राशिषु मेषादिषु क्रमात्परिपाट्या विचरति॥ ब्रूया
त्वदेत॥ अन्यस्मिन् अपि तिथौ अमावास्यायां पूर्णमास्यां च वर्जयित्वापि येऽत्पाता अतिवृष्ट्याद्या भव
ति॥ इमरः शास्त्रकारः॥ तेनार्तिः पीडा भवति॥ तथा च काश्यपः॥ उल्काः तिथिग्रहणे सूर्येंदोः परिवेषणं॥
प्रतिसूर्योदयोऽयन्यपदेशमासांतसंज्ञिते॥ तिथौ निरीक्ष्य चोत्पातान्ब्रूयाल्लोके शुभाशुभं॥ सुभिक्षं दुर्भि
क्षकृतान्विशेषान् रविचारतः॥ प्रतिमासं विधानज्ञो नान्यस्मिन् दिवसे इति॥ अन्यत्रय भवंत्येते तस्यैव
न दोषदाः॥ सत्युत्पाताः मावास्यायां पौर्णमास्यां च मेषवृषभे सूर्ये कुर्यादित्याह॥ मेषोपगते सूर्ये श्री
भ्रद्र धान्यस्य संग्रहं कृत्वा॥ वनमूलफलस्य च चतुर्थमासि तयोः लाभः॥ ३॥ सूर्ये मेषोपगते मेषप्राप्ते
अमावास्यायां पौर्णमास्यां वा कानुत्पातान्दृष्ट्वा ग्रीष्मोत्पन्नस्य धान्यस्य संग्रहं संग्रहणं कृत्वा तथा वृष
भगते कं वनमूलफलस्य वन्यानां मूलफलानां संग्रहं कृत्वा तयोश्चतुर्थमासि विक्रयात् लाभो भवति॥ ॥
अथ मिथुनस्याह॥ मिथुनस्थे कर्कटकोत्पातान् दृष्ट्वा सर्वरसान्मधुरादीन्धान्यानां शालीनां संग्रहं समुत्प
नीय कृत्वा विक्रेतव्यं षष्ठमासि विपुलो बहुविस्तीर्णो लाभः प्राप्नुयात्॥ मिथुने स्थे सर्वरसान्धान्यानां संग्रहं समुत्पन्नी

यथ षष्ठे मासि विपुलं विक्रेता प्राप्नुयाल्लाभं ॥ ४ ॥ अथ कर्कटे आह ॥ कर्किण्यर्के मधुगंधतैलघृतफाणितानि
 निधाय ॥ द्विगुणा तृतीयमासे लब्धिर्हीनाधिके छेदः ॥ ५ ॥ ॥ अर्के आदित्ये कर्किणि कर्कटे मधु माक्षि
कं ॥ गंधाः सुगंधिद्रव्याणि ॥ आज्यं घृतं ॥ फाणितं इक्षुरसक्वाथः खंडः गुडादि ॥ एतानि निधाय सं
 स्थाप्य तृतीयमासि विक्रयात् द्विगुणा लब्धिः ॥ हीने कालेऽधिके वा छेदो भवति ॥ त्रुटिः स्यात् ॥ ॥ अथ सिंह
स्याह ॥ सिंहस्थेर्के सुवर्णमणयः चर्माणि वर्म सन्नाहः ॥ शस्त्राण्यायुधानि ॥ मौक्तिकं मुक्ताफलानि ॥ रजतं रूप्यं
॥ एतानि विनिधाय विक्रेतुः पंचमे मासि विक्रयात् लब्धिर्भवति ॥ अतोऽन्यथा अन्यकाले हीनाधिके छेदो
भवति ॥ ६ ॥ अथ कन्यायामाह ॥ कन्यागते दिनकरे चामरखरकरभवाजिनां क्रेता ॥ षष्ठे मासि द्विगु
णं लाभमवाप्नोति विक्रीणन् ॥ ७ ॥ दिनकरे सूर्ये कन्यागते प्रागुक्तानुत्पातान् दृष्ट्वा ॥ चामरं वालव्यजनं
खरो गर्दभः ॥ करभः उष्ट्रः ॥ वाजी तुरगः ॥ एषां क्रेता षष्ठे मासि विक्रीणानो विक्रेता द्विगुणं लाभमाप्नोति ॥ अथ
तुलागतमाह ॥ तौलिनि तांतवभांडमणिकंबलकाचपीतकुसुमानि ॥ आदद्यात् धान्यानि च वर्षार्धे तद्द्वि
गुणा वृद्धिः ॥ ८ ॥ तौलिनि तुलागतेऽर्के तांतवभांडं तंतुरूपं यत् किंचित् कर्पासादि ॥ मणयः ॥ कंबलं ॥ काचं ॥
पीतकुसुमानि पीतवर्णपुष्पाणि एतानि तथा धान्यानि च आदद्यात् गृह्णीयात् ॥ वर्षार्धेन षण्मासेन द्विगु
णा वृद्धिः ॥ द्विगुणत्वं व्रजंति ॥ द्विगुणो लाभो भवतीत्यर्थः ॥ ॥ अथ वृश्चिके स्याह ॥ वृश्चिकसंस्थे सवितरि फल
मूलकंदविविधानि रत्नानि ॥ वर्षार्धस्थापितानि द्विगुणं लाभं प्रयच्छंति ॥ ९ ॥ सवितरि सूर्ये वृश्चिकसंस्थे फल
कंदमूलं ॥ फलानि ॥ कंदमूलविशेषः मूलान्यन्यानि ॥ सर्वौषधीमूलानि ॥ द्रव्याणि रत्नानि विविधानि नाना
प्रकाराणि ॥ एतानि वर्षार्धं स्थापितानि वर्षार्धं संस्थाप्य लाभं द्विगुणं प्रयच्छंति ॥ ॥ अथ धन्विन्याह ॥ चापग
ते रवौ ग्राह्यं कुंकुमशंखप्रवालकाचानि ॥ मुक्ताफलानि च ततो वर्षार्धाद् द्विगुणतां यांति ॥ १० ॥ चापगते ध १६०
न्विस्थेऽर्के ॥ कुंकुमं काश्मीरं ॥ शंखः ॥ प्रवालं विद्रुमं ॥ काचं मुक्ताफलानि च गृह्णीयात् ॥ तदनंतरं ततः परं ता
नि वर्षार्धात् षण्मासैर्द्विगुणतां यांति ॥ द्विगुणं लाभं ददति ॥ अथ मकरकुंभयोराह ॥ मृगघटसंस्थे सवित

रि गृह्णीयात् लोहभांडधान्यानि स्थितमासं दद्यात् लाभार्थी द्विगुणमाप्नोति ॥ ११ ॥ मृगो मकरः ॥ घटः कुंभः ॥
सवितरि आदित्ये मकरसंस्थे कुंभसंस्थे लोहभांडानि धान्यानि गृह्णीयात् ॥ स्थापयेत् ॥ मासं स्थितं संस्थाप्य ततो दद्यात्
॥ विक्रयं कुर्यात् ॥ लाभार्थी विक्रेता द्विगुणं लाभं प्राप्नोति ॥ अथ मीनस्थ आह ॥ सवितरि झषमुपागते मूलफ
लकंदभांडरत्नानि ॥ संस्थाप्य वत्सरार्धं लाभं कामितं समाप्नोति ॥ १२ ॥ सवितरि रवौ ॥ झषमुपयाते मीनप्राप्ते
मूलानि फलानि ॥ कंदो मूलविशेषः ॥ भांडानि नानाप्रकाराणि ॥ रत्नानि मणयः ॥ एतानि वत्सरार्धं मासषट्कं
संस्थाप्य ॥ इष्टं यथाभिलषितं लाभं समधिगमाप्नोति ॥ पुनरपि विशेषमाह ॥ राशौ यस्मिन् शीतांशुरमयूखः
सहस्रकिरणो वा ॥ युक्तोऽधिमित्रदृष्टस्तत्रार्घो लाभकृद्दृष्टः ॥ १३ ॥ यस्मिन् राशौ मेषादिके शीतांशुः समयूखः
सहस्रकिरणो वा चंद्रः सहस्रकिरणः सूर्यः ॥ अधिमित्रेण तात्कालिकेन दृष्टो वा तात्कालिके मित्रयुक्तश्च भवति ॥
यतः तत्काले दृश्या बंधुसदृशाः स्युः पृथक् तत्र स्थिता भवंति ॥ न युक्ता ता ॥ तेनाधिमित्रयुक्तोऽधिमित्रदृष्टः ॥ तत्र त
स्मिन् राशावर्घो लाभकृत् लाभदः तानान्यत्र योगसंभवात् ॥ यतो मावास्यापौर्णमास्यां विचारयेत् इत्युक्तात् ॥
अतः शीतांशुरमयूखः सहस्रकिरणग्रहणं कृतं ॥ तथा च काश्यपः ॥ राशौ यस्मिन् स्थितः सूर्यः शशी वा मित्रसं
युतः ॥ अधिमित्रेण दृष्टः सन् यथा लाभप्रदः स्मृतः ॥ अत्र च विशेषमाह ॥ सवितृसहितः संपूर्णो वा शुभैर्य
दि वीक्षितः ॥ शशिरविकिरणः संयोगोऽर्थस्यापि वृद्धिकरः स्मृतः ॥ अशुभसहितः संदृष्टो वा हनस्यथवा वि
दृष्टान् भावान् वृद्धिं दत्ते सदसत्फलं ॥ १४ ॥ सवितृसहित इति ॥ शशिरविकिरणश्चंद्रः सवितृसहितः
सूर्येण सह संस्थितो मावास्यां शुभग्रहैः ॥ बुधगुरुशुक्रैः संयुक्तो वीक्षितो वा दृष्टो वा ॥ अथवा संपूर्णः पौ
र्णमास्यां शुभग्रहैर्युतो वीक्षितः स यस्मिन् राशौ तस्य वृद्धिकरः स्मृतः ॥ तथा अशुभसहितो भौम
सौराभ्यां युक्तो दृष्टो वा चंद्रो हानिं विनाशयति ॥ अर्थहानिं करोतीत्यर्थः ॥ अथ रविरादित्यः शुभैर्युक्तो
वीक्षितश्च यत्र राशौ भवति ॥ तत्र स योऽर्थः स्याद्वृद्धिकरः स्मृतः ॥ अशुभसहितः संदृष्टो वा हानिरस्ति ॥
एवं प्रतिप्रदृष्टान् प्रतिराश्यवस्थिताभावात् द्रव्याणि ज्ञात्वा निबध्या ॥ सदसत् शुभमशुभं वा फलं वदेत् ॥

तथाच कश्यपः॥ अथार्कशशिनौ सौम्यसंयुक्तौ वा निरीक्षितौ॥ शुभग्रहाश्च नगतौ मध्ये येष्वविरक्षितौ निप
व॰सं॰ रीतस्थितौ वेतौ पापयुक्तौ निरीक्षितौ॥ अर्धहानिकरौ प्रोक्तौ मिश्रितौ तादृश ध्वजौ॥ ॥ इति श्रीभट्टोत्पल
विरचितायां संहिताविवृतौ अर्धकाण्डनामा द्विचत्वारिंशोऽध्यायः॥ ४२॥ ॥ ॥ ॥ अथेन्द्रध्वजाऽध्या
१६१ यो व्याख्यायते॥ तत्रादावेवतदुत्पत्तिप्रयोजनार्थमाह॥ ॥ ब्रह्माणमूचुरमरा भगवन् शक्ताः स्मनासुरान्
समरे प्रतियोधयितुं भवतस्त्वां शरण्यं शरणं समुपयाताः॥ १॥ अमरा देवाः ब्रह्माणं पितामहं इदं ऊचुः उक्तवन्तः॥ किमित्या
ह॥ हे भगवन् पितामह वयं असुरान् दैत्यान् समरे संग्रामे प्रतियोधयितुं ते सद्य संकर्तुं न शक्ताः न समर्थाः॥ अ
तोऽस्मात् त्वां शरण्यं शरणं साधुः॥ शरण्यः शरणं समुपयाताः प्राप्ताः॥ वयमिति॥ ततोनंतरं किमित्याह॥
देवानुवाच भगवान्क्षीरोदे केशवस्तव रक्षितः॥ केतुं यं दास्यति तं दृष्ट्वा नाजौ स्थास्यंति॥ वो दैत्याः॥ स भगवान् ब्रह्मा वा
च उक्तवान्॥ यो भगवान् केशवो नारायणः क्षीरोदसमुद्रस्थितः॥ स वो युष्मभ्यं केतुं ध्वजं दास्यति॥ तं दृष्ट्वा
वो युष्माकं आजौ संग्रामे दैत्याः न स्थास्यंति॥ न तिष्ठंति॥ पलायनपरा भवंति॥ ततः किमित्याह॥ लब्ध
वराः क्षीरोदं गत्वा ते तुष्टुवुः सुराः सेंद्राः श्रीवत्सांककौस्तुभमणिः किरणोद्भासितोरस्कं॥ ३॥ श्रीपतिमचिंत्य
मसमं समंततः सर्वदेहिनां सूक्ष्मं॥ परमात्मानमनादिं विष्णुमविज्ञातपर्यंतं॥ तैः संस्तुतः स देवः तुतोष ना
रायणो ददौ चैषां॥ ध्वजममरसुरवधूमुखकमलवनतुषारतीक्ष्णांशुं॥ ५॥ लब्धवरा इति॥ ते सेंद्राः इंद्रस
हिताः सुराः देवाः लब्धवरा ये ते क्षीरोदं क्षीरसमुद्रं गत्वा प्राप्य भगवंतं केशवं तुष्टुवुः स्तुतवंतः॥ कीदृशं॥
श्रीवत्सांकं श्रीवत्सो रोमावर्तो अंके चिह्ने यस्य॥ पुनः किंभूतं॥ कौस्तुभो मणिविशेषः॥ तस्य किरणा रश्मयः
तैरुद्भासितं प्रकटीभूतं उरो वक्षो यस्य स तं॥ तथाभूतं॥ श्रीपतिं लक्ष्मीनाथं॥ अचिंत्यं चिंतयितुं अशक्यं॥
असममित्यर्थः॥ असमं अतुल्यं अनौपम्यमित्यर्थः॥ समं सर्वगतत्वात्॥ तुल्यं तस्मात् समंततः समत्वात्॥ सर्व १६१
देहिनां सर्वजंतूनां सूक्ष्मं दुर्विज्ञेयं॥ परमात्मानं परश्च स आत्मा च परमात्मा तं प्राकृतगुणरहितमित्यर्थः॥
अविद्यमाना आदिर्यस्य स अनादिः तं सर्वादिमित्यर्थः॥ विष्णुं व्यापकं॥ अविज्ञातपर्यंतं न विज्ञातः पर्यंतो य

स्य अविज्ञातनिधनः॥ स देवो नारायणः तैः देवैः सेंद्रैः संस्तुतः कृतस्तोत्रः तुतोष प्रीतिमागमत्॥ परितुष्टः एषां दे
वानां ध्वजं ददौ वितीर्णवान्॥ कीदृशं ध्वजं॥ असुरसुरवधूमुखकमलतुषारतीक्ष्णांशुः॥ असुरा दैत्याः ते
षां वधूः स्त्रियः॥ तासां यानि मुखानि तान्येव कमलानि॥ मुखकमलानां वनं समूहः॥ तत्र तुषारांशुः हिमदीधितिः
चंद्रः संकोचनात्॥ सुराणां देवानां यानि वधूनां मुखकमलवनं तीक्ष्णांशुः सूर्यो विकासितत्वात्॥ ततः किमित्या
ह॥ तं विष्णुतेजोभवमष्टचक्रे रथे स्थितं भास्वति रत्नचित्रे॥ देदीप्यमानं शरदीव सूर्यं ध्वजं समासाद्य मुमोद
शक्रः॥ ॥ विष्णुतेजोभवं विष्णुतेजसा भवः उत्पत्तिर्यस्य॥ असौ तं अष्टचक्रे अष्टचक्रसंयुक्ते रथे स्थितम्॥
रत्नचक्रे मणिभिर्विचित्रिते॥ भास्वति तेजोयुक्ते॥ कीदृशं ध्वजं॥ देदीप्यमानं भास्वरं शरदि शरत्काले सूर्यमर्क
मिव॥ एवंविधं ध्वजं शक्र इंद्र आसाद्य प्राप्य मुमोद॥ जहर्ष॥ ततः किमित्याह॥ सकिंकिणीजालपरिष्कृतेन स
छत्रघंटापिटकान्वितेन॥ समुच्छ्रितेनामरराट् ध्वजेन निन्ये विनाशं समरेऽरिसैन्यं॥ ॥ अमरराट् सुरप्रभुः
इंद्रः तेन ध्वजेन उच्छ्रितेन॥ अरिसैन्यं समरे संग्रामे विनाशं निन्ये क्षयं नीतवान्॥ कीदृशेन॥ सकिंकिणीजा
लपरिष्कृतेन॥ किंकिण्यः क्षुद्रघंटिकाः सूक्ष्मघंटाः॥ यासां लोके घर्घरिका इति संज्ञा॥ तासां जालकः समूहः
तेन परिष्कृतेन विभूषितेन॥ सच्छत्रः॥ छत्रं आतपत्रं॥ घंटा प्रसिद्धा॥ पिटकानि विभूषणानि॥ एतैरन्वि
तेन युक्तेन॥ तथा च गर्गः॥ असुरास्ते ध्वजं दृष्ट्वा विष्णुतेजः समाहृताः॥ विसंज्ञाः समरे भग्नाः पराभूताः
प्रदुद्रुवुः॥ तान् वज्रेण सहस्राक्षो मासि भाद्रपदे सुरान्॥ निहत्य शक्रः नययावेकरात्रेण हृतिना॥
त्रिदिवं स्वर्गं प्रययौ तौ सौ ध्वजस्तथा॥ ततः इंद्रः किंकृतवानित्याह॥ उपरिचरस्यामरराड्वसो
र्ददौ चेदिपस्य वेणुमयीं॥ यष्टिं तां स नरेंद्रो विधिवत्संपूजयामास॥ अतोऽमरराट् इंद्रः तं ध्वजं उपरिच
रस्य ऊर्ध्वगामिनो नभश्चरस्य चेदिराजस्य वसोर्वसुनाम्नो वेणुमयीं यष्टिं ददौ॥ चेदीनां जनपदानां राजा
वसुर्भूमिपः स उपरिचरः॥ स्वर्गस्थमेव याति॥ स नरेंद्रः चेदिपो विधिवत् विधिना तां यष्टिं वेणुमयीं
संपूजयामास॥ समर्चितवान्॥ ॥ ततः किमित्याह॥ प्रीतो महेन मघवान् प्राहैवं ये नृपाः करिष्यंति॥

नसुवतवसमंतसौभुविसिधाज्ञाभविष्यंति॥९॥ मुदिताः प्रजाश्च तेषां भयरोगविवर्जिताः प्रभूतान्नाः ध्वजए
वरा॰सं॰ वचाभिधास्यति जगतो निर्मितः फलं सदसत॥१०॥ प्रीत इति॥ मघवान् इंद्रः मदनप्रजया प्रीतः परितुष्टः प्रा
ह कमलजं॥ एवमनेन प्रकारेण वसुमतवसुमताप्यास्वेनपार्थिवाः इंद्रध्वजपूजां करिष्यंति। ते च सुमनः व
१६० सनि धनानि विंदंति येषां ते वसुमंतः॥ भुवि भूमौ सिद्धाज्ञाः अप्रतिहतवच सो भविष्यंति॥ संपत्स्यंते मुदिता
इति॥ तेषां नृपाणां प्रजा मुदिता हृष्टा भविष्यंति॥ भयरोगविवर्जिता रहिताः तथा ध्वजएव जगति लोके
निमित्तं कारणं शुभाशुभसूचकः सदसत् शुभाशुभं फलमभिधास्यति॥ कथयिष्यति॥ अथ त
स्य पूजां वक्ष्यामीत्याह॥ ॥वृत्तान्तस्य नरेंद्रैः बलरक्षितरार्थिभिर्यथा पूर्वं॥ शंकाद्या प्रवृत्तमाग
मतस्तां प्रवक्ष्यामि॥११॥ तस्य इंद्रध्वजस्य नरेंद्रैः राजभिर्बलरक्षिजयार्थिभिः॥ बल ऽ धर्मा वीर्यं कार्येषु
वृद्धिः साधनं कुलानां यः शत्रुपराभवः तेषां ये अर्थिनः साभिलाषाः तैः यथा येन प्रकारेण पूर्वं पुराकृत्वा
यो इंद्रध्वज प्रयुक्तः तां पूजा आगमतः आगमाः मुनिप्रणीतानि शास्त्राणि तद्वक्ष्यामि॥ अथ तस्य वि
धानमाह॥ तस्य विधानं शुभकरणदिवसनक्षत्र मंगलमुहूर्तैः॥ प्रस्थानिकैर्वनमियात् दैवज्ञः सूत्रधारश्च॥
१३॥ तस्येंद्रध्वजस्य विधानं करणं कस्मिन्काले शुभकरणे करणानि बवादीनि तस्मिन् शुभे तथा तिथौ शुभदि
वसे शुभनक्षत्रे दारुणोग्रवर्जिते अन्यस्मिन् मंगलशकुने दध्यक्षतदूर्वांकुसुमादीनां दर्श
ने शुभमुहूर्ते योगलग्नकरणशकुनमंगलानि॥ तथा यात्रायां गार वणिजो विष्टिप्रस्थितानि यात्रास्थानि
॥ करणफलं॥ उदयनयन फलं॥ फलं॥ ॥ सिद्धार्थकादर्शपयोज्ज
नानामितिमंगलानि॥ मित्रे तिथि मुहूर्ताः॥ छत्रं शकुनाः दिनबलमिति
लग्नादिलग्ने गुरुरिति योगाः॥ दैवज्ञः कालवित। सूत्रधारः वर्धकिः॥ वनमियात् वनं गच्छेत्॥ एतत भाद्र १६१
पदसित प्रतिपदि कार्यं॥ तस्मात् भयं॥ तस्मात् भयं प्रोष्ठपद प्रतिपदि ध्वजार्थं कृर्ते तावनंगलादर्शप
राशिन॥ वयः सारगुणान्वितं॥ अधुना वृक्षाणां लक्षणमाह॥ उद्यान देवतालयपितृवनवल्मीकमार्गा

चिताः कुब्जोर्ध्वशुष्ककंटकिवल्लीवंदाकयुताश्च॥१३॥ विहगालयकोटरपवनानलपीडिताश्च ये तरवः। ये च स्युः
स्त्रीसंज्ञितास्ते नशुभाः ध्वजकृतेर्थे॥१४॥ उद्यानेति। एवंविधास्तरवो वृक्षाः शक्रकेत्वर्थे इंद्रध्वजार्थेन शुभाः अश्र
यस्करः। कीदृशाः। उद्यानं उपवनं देवतालयं मंदिरं॥ पितृवनं श्मशानं॥ वल्मीकं वल्मीकव्रततत्त्वपः मार्गः पं
थाः। चितिर्यत्र भूमिः एतेषु जाता उत्पन्नाः। कुब्जा येवाऽस्पष्टाः ऊर्ध्वशुष्काः अग्रतो विरसाः कंटकिनः संकंटकाः
वल्लीभिर्युक्ताः। वंदाकयुताश्च॥ वृक्षोपरि विजाती यो वृक्षो जातो वंदाक उच्यते॥ तेन युताः। विहगालया प्र
भूतानां विहगानां आलया निनीडानि येषु॥ कोटरं छिद्रं॥ पवनेन वायुना। अनलेन अग्निना च ये पीडिताः॥
उपद्रुताः॥ तथा च ये स्त्रीसंज्ञाः स्त्रीनामकाः वृक्षाः स्युर्भवेयुः एते न शुभाः॥ अथ शुभान् वृक्षानाह॥ श्रेष्ठोऽर्जु
नोऽश्वकर्णः प्रियकधवावुदुंबरश्च पंचैते॥ एतेषामन्यतमं प्रशस्तमथवापरं वृक्षं॥१५॥ गोरासितक्षितिभवं
संश्रुत्य यथाविधि द्विजः॥ पूर्वाह्णे नममेष्य रात्रौ स्पृष्ट्वा ब्रूयादिदं मंत्रं॥१६॥ श्रेष्ठ इति। एते अर्जुनादयः पंचतरव
श्रेष्ठाः शुभाः अर्जुनः अश्वकर्णः धवः उदुंबरः एतेषामन्यतमं एकतमं कुर्यात्॥ अथवा अपरं अ
न्यवृक्षं प्रसिद्धं॥ प्रशस्तं शुभलक्षणयुक्तं॥ गौरासितेति। गौरसिता क्षितिभवं क्षितिर्भूमिः तस्यां गौरायां
मसितायां वा उत्पन्नं वृक्षं द्विजो ब्राह्मणः। प्रथममादौ रात्रौ निशि विजने जनरहिते समये समेत्य गत्वा यथा
विधिसंप्रदाय अभ्यर्च्य स्पृष्ट्वा नरः इमं वक्ष्यमाणं मंत्रं ब्रूयात्॥ अधुना तमेवाह॥ यानीह वृक्षे भूतानि तेभ्यः स्व
स्ति नमोस्तु वः॥ उपहारं गृहीत्वेमं क्रियतां वासपर्ययः॥१७॥ पार्थिवस्त्वा वरयते स्वस्ति तेस्तु नगोत्तम॥ ध्व
जार्थं देवराजस्य पूजेयं प्रतिगृह्यतां॥१८॥ यानीहेति। इह अस्मिन् वृक्षे यानि भूतानि॥ समाश्रितानि तेभ्यो
भूतेभ्यः स्वस्ति श्रेयोऽस्तु॥ वो युष्मभ्यं नमोस्तु॥ नमस्कारोस्तु॥ इमं उपनीतमुपहारं गृहीत्वा वासपर्ययः क्रि
यतां अन्यत्र वासं परिकल्पयंत्वित्यर्थः। हे नगोत्तम द्रुमप्रधानवृक्ष ते तव स्वस्त्यस्तु श्रेयो भवतु॥ पार्थिवो राजा देव
राजस्य इंद्रस्य ध्वजार्थं त्वां प्रार्थयते॥ वरयते। तस्मात् इयं पूजा अस्माभिः प्रतिगृह्यतां॥ अथ किं कुर्यादित्यत आह॥
छित्त्वा प्रभातसमये वृक्षमुदङ्मुखं भूत्वा॥ परशोर्जर्जरशब्दो नेष्टः स्निग्धो घनश्च हितः॥१९॥ ततः प्रभातक

व॰सं॰ ऽसमये शाखायमानकाले उदङ्मुखः सौम्याशावदनः प्राङ्मुखः पूर्वाशावदनो भूत्वा छिलावृक्षाच्छेदात् कल्पये
त्। परशोः कुठारस्य तस्ये रशब्दो भिन्नस्वनो न स्यादिति॥ स्निग्धामकंपा घनः संहतश्चाहतः शब्दति॥ अथप
१६३ तनं लक्षणमाह॥ नृपजयदमनध्वं सं पतनमनाकुंचितं च पूर्वोदक अविलग्नं चान्यतरो विपरीतमत स्यज्जेत
पतितं॥२०॥ वृक्षस्य पतनं अविध्वस्तं ध्वंसरहितं अग्रस्य पतनमित्यर्थः। तच्च नृपस्य गजानां जयदं। तथा
न्यतरो अन्यस्मिन् वृक्षे अविलग्नं असंश्लिष्टं पतनं नृपजयदं। तथा च पूर्वोदक् पूर्वस्यां उत्तरस्यां दिशि वा प
तनं नृपजयदं॥ अनाकुंचितं अकुटिलं पतनं नृपजयदमेव॥ अतोस्मात् विपरीतं त्यज्जेन ग्राह्यं। अन्यस्मिन
तरो लग्नं त्यजेत्। ततः किं कुर्यादित्यत आह॥ छित्वाग्रे चतुरंगुलं मूले चाष्टांगुलं क्षिपेत्॥ यष्टिं उत्थप्य
रज्जा कृत्वा नये न्मनुष्यैर्वा॥२१॥ ततस्तस्य वृक्षस्याग्रप्रांते चतुरंगुलं छित्वा कल्पयित्वा मूले अष्टौ अंगुलानि
च्छित्वा तां यष्टिं जले उदक मध्ये क्षिपेत्। ततो जलात् उद्धृत्य उत्क्षिप्य शकटेन गत्या मनुष्यैर्नरैर्वा पुरद्वारं पुरं
नयेत्॥प्रापयेत्॥ ॥अत्र शुभाशुभलक्षणमाह॥ अरभंगे चक्रभेदे नेम्यां नाशो चक्रस्य विज्ञेयः। अर्थं
क्षयो शुभदेनैतथा णिभंगे नृबधः किल॥२२॥ अरस्य चक्रस्य मध्यवर्तिकाष्ठे तस्य भंगस्फोटने चक्रस्य से
नाया भेदो भवति॥ नेमिश्चक्र पर्यंतं तस्य भंगे चक्रस्य नाशः क्षयो विज्ञेयः। अक्षस्थाने दंडस्य भंगे अर्थक्षयो
द्रव्यस्य द्रव्यनाशः। आणिः अक्षाग्रकीलकः तद्भंगे वर्धकिनः तक्षकः क्षयः॥ अथ कस्मिन् काले पुरं दरस्यय
ष्टिं प्रवेशयेदित्यत आह॥ भाद्रपदशुक्लपक्षे अष्टम्यां नागरैर्वृतां राजा॥ दैवज्ञसचिवकंचुकि प्रमुखैः सु
वेषधरैः॥२३॥ अहतांबरसंवीतां यष्टिं पौरैर्द्वारपुरं पौरैः॥ स्रक्गंधधूपयुक्तां प्रवेशयेत्तद्ध्वजतूर्यरवैः
॥२४॥ भाद्रपद इति। भाद्रपदस्य नभस्य मासस्य शुक्लपक्षे अष्टम्यां राजा नागरैः पौरैः जनैर्वृतः। तथा दैव
ज्ञैः सांवत्सरैः सचिवैर्मंत्रिभिः। कंचुकिभिः अंतःपुराधिपतिभिर्नरैः विप्रप्रमुखैः ब्राह्मणप्रमुखैर्यथावलिः १६३
तथा भूतैः सुवेषधरैः सह यष्टिं द्वारीणं द्वाराद्वपुरं नगरं प्रवेशयेत्। कीदृशीं अहतांबरसंवीतां अहतां अ
शतं अभिनवं अंबरं वस्त्रं तेन संवीता माच्छन्नां॥ तथा स्रक्गंधधूपयुक्तां स्रक् माला गंधाः सुगंधद्रव्याणि

धूपो गुग्गुलप्रमुखः एतैर्युक्तां कः प्रवेशयेत्। पौरैः नागरैः तथा ध्वजतूर्यरवैः शंखशब्दैः। तूर्यरवैश्च सार्धं। तथा न
गर्गः। प्राक्पदसितेष्टम्यां ध्वजयष्टि गिरलंकृतां। यष्टिं पौरैर्द्वारीराजा पुरं पौरं प्रवेशयेत्। कीदृशं नगरमित्या
ह॥ रुचिरपताकातोरणवनमालालंकृतं प्रहृष्टजनं। सम्मार्जितांचितपथं सुवेषगणिकाजनाकीर्णं॥२५॥ ॥
अभ्यर्चितापणगृहं प्रभूतपुण्याहवेदनिर्घोषं। नटनर्तकगेयज्ञैराकीर्णचतुःपथं नगरं॥२६॥ रुचिरपताकान्वि
तादृशं नगरं। तां यष्टिं प्रवेशयेत्। रुचिराभिः कांताभिः पताकाभिर्वैजयंतीभिः युक्तं॥ रुचिरैस्तोरणैः वनमाला
भिः पत्रमालाभिः अलंकृतं शोभितं॥ तथा प्रहृष्टेन स्वलंकृतेन गणिकाजनेन वेश्यासमूहेन आकीर्णं व्याप्तं॥ त
था अभ्यर्चितानि पूजितानि आपणगृहाणि पण्यविक्रयगृहाणि यत्र प्रभूतो बहुः पुण्याहानां मंगलशब्दानां
निर्घोषो यत्र नगरे येन त्यंते॥ नर्तनं शिल्पयेषां ते नर्तकाः। गेयज्ञाः गांधर्वविदः। एतैर्नटनर्तकगेयज्ञैः चत्वरैः
चत्वारो यत्र। तच्चतुष्पथं। प्रभूतं नगरं एतैराकीर्णं व्याप्तं॥ अधुना नगरवर्णनमाह॥ यत्र पताकाः श्वेता
भवंति विजयाय रोगदाः पीताः। जयदाश्चित्रवर्णाः रक्ताः शस्त्रप्रकोपाय॥२७॥ तत्र तस्मिन नगरे श्वेताः प
ताकाः विजयाय भवंति। पीताः पीतवर्णाः रोगदा भवंति। विचित्राः नानावर्णाः जयदाः जयं ददाति। रक्तो
हितवर्णाः शस्त्रकोपाय युद्धाय भवंति। अथ प्रवेशे शुभाशुभलक्षणमाह॥ यष्टिं प्रवेश्यमानां निपातयंतो भ
यायनागाद्याः। बालानां तलशब्दे संग्रामः सत्वयुद्धे च॥२८॥ नगरे प्रवेश्यमानां नागाद्याः गजाः आदिग्रहः
णात् अश्वमहिषखरकरभगवादयो गृह्यंते एतैः पातयंतो भयाय भवंति। एषामन्यतमस्तां यष्टिं पातयति
तदा लोके भयं भवंति। तथा बालानां दृष्टानां तलशब्दे हस्ततालवादनेन संग्रामो युद्धं भवति। सत्वानां प्राणिनां
गवादीनां युद्धे वायसानां संग्रामा एव भवंति॥ ततः किं कुर्यादित्यत आह॥ संतक्ष्य पुनस्तक्ष्णा शास्त्रविधिवत्तथ
ष्टिं प्रगाढ यंत्रे॥ नागरमुकोद्दृशानां नरेश्वरः कारयेत्तस्य॥२९॥ सितवस्त्रो स्नीषधरः पुरोहितः ज्यो
तिर्विदर्भवैमंत्रि। जुहुयादग्निं सांवत्सरो निमित्तानि गृह्णीयात्॥३०॥ संतक्ष्य पुनर्यतं तां यष्टिं पुनर्भूयः त
क्ष्णा वर्धकिः संतक्ष्य तनूकृत्य विधिवत् विधानेन यंत्रे प्रारोपयेत्। आसनरुढां निर्विश्यात् यं वारुढां कुर्वि

दासकांख्यापयेत॥ तथाविज्ञातायां प्रकादश्यां नरेश्वरो राजा रात्रौ जागरणं कारयेत। तस्य राज्ञः पुरोहितः आत्मवे
दमवेर्मंत्रैः अग्निं जुहुयात॥ कीदृशः पुरोहितः श्वेतानि सितानि वस्त्राणि दुकूलानि पटविशेषाः यो धारयते सं
वत्सरो दिवसो निमित्तानि लक्षणानि च यो जानाति॥ अथाग्निलक्षणान्याह॥ इष्टद्रव्याकृतिः सुरभिः स्निग्धश्च
नो नवर्चिष्मान्। शुभकृद्वह्निः। नेष्टो यात्रायां विस्तीर्णशिखः॥ अर्चिष्मान् ज्वालायुक्तः। ईदृशो वह्निः
शुभकृत्॥ अतोऽस्मादन्योऽविपरीतः लक्षणयुक्तः। स धूमोऽप्रदक्षिणज्वालोऽन्यमूर्तिश्च॥ स्वरयुक्तभा
नरारूपो दुर्गंधः स्फुलिंगकृन्नेष्टः। नराभदः एतस्मात्सामान्येनोक्तं। यात्रायां योग यात्रायां विस्तीर्णशिखो
नः। तथा च यात्रायां॥ इतोपि स्खलितश्च तनुः कृशानुः ग्रहानुयातं न यत्काशाइति॥ अन्यदप्याह॥ स्वाहावसाने समयेऽस्य
मुज्ज्वलाग्निः स्निग्धः प्रदक्षिणशिखो हुतभुङ्नृपस्य॥ गंगादिवाकरसुताजलचारुहारां धात्रीं समुद्ररसनां वशगां
करोति। ३२॥ संनिहितकांचनः। हुतभुग्वह्निः धात्रीं भूमिं समुद्ररसनां सागरमेखलां वशगां स्वाधीनां तस्य
करोति। कीदृशीं धात्रीं। गंगादिवाकरसुतेति गंगा जाह्नवी। दिवाकरसुता यमुना तयोर्जलं तदेव चारु हारो यस्याः॥ तिसो
हारामकादामयस्याः। तां कीदृशोऽग्निः। स्वाहावसानसमये पूर्णाहुतिदानकाले स्वयमेव आहुत्यन्त स्य
कारेज्वलितो अर्चिर्ज्वाला मकाय स्याग्निः स्निग्धो निर्मलः प्रदक्षिणशिखः। प्रादक्षिण्येन शिखा ज्वाला यस्य
तथाभूतः। अन्यदप्याह॥ चामीकराशोककुरंटकाब्जवैदूर्यनीलोत्पलसंनिभोऽग्निः॥ न ध्वांतमंतर्भवनेवकाशं
करोति रत्नांशुहतं नृपस्य॥ ३३॥ एवंविधोऽग्निः हुताशो नृपस्य राज्ञो ध्वांतमंधकारं। अंतर्भवने गृहमध्ये अवका
शं मलिनतां न करोति। यतो रत्नांशुहतं रत्नानां अंशवो रत्नांशवः मणिकिरणाः तैर्हतं नष्टं अनेन बहुरत्न
लाभ उक्तः। स कीदृशो। अग्नेश्चामीकरं सुवर्णं। अशोकः पुष्पविशेषः अब्जं पद्मं। वैदूर्यं रत्नविशेषः। कुरंटकं
पुष्पविशेषः। नीलोत्पलं इंदीवरं एषां संनिभः सदृशः॥ अन्यदप्याह॥ येषां रथौघार्णवमेघदंतिनां समः स्वना
न्यथोदितो वापि दुंदुभेः॥ तेषां मदांधेभघटावघट्टिता भवंति याने तिमिरोपमा दिशः। येषां राज्ञां रथौघरथसमू
हः। अर्णवः समुद्रः। मेघः। बृहः। दंती हस्ती। एषां समस्वनः तुल्यशब्दः अग्नेर्यो दिवा दुंदुभेः समः स्वनः। दुंदुः

भिर्वाद्यविशेषः। येषां राज्ञां यदिदं भावज्वलनः। तेषां याघटाः समूहाः ताभिरवघट्टिता आच्छादिता दिशो याने गमनकाले
तिमिरोपमा अंधकारसदृशा भवंति। तिमिरोपमा इत्यनेन दंतिबाहुल्यमुक्तं॥ मत्तस्त्राविलादुत्तमाति तिमिरोप
मा दिशो भवंति॥ अन्यदप्याह॥ ध्वजकुंभहयेभभूभृतामनुरूपे वशमेति भूभुजां॥ उदयास्तधराधराउ भीदृ
मवतां विंध्यपयोधरोपमा॥ ३४॥ ध्वजः प्रसिद्धः बहुपराणि मे तिचिन्ह। कुंभो घटः। हयो श्वः। इभो हस्ती॥
भूभृत्पर्वतः। एषामनुरूपसदृशोऽग्निः भूभृतां राज्ञां भूमिर्वशमेति॥ स्वाधीना भवति। कीदृशी धरा। उदया
स्तधराधरं भूमिं धारयतीति। धराधरः पर्वतः। उदयधराधरश्चास्तधराधरश्च॥ उदयास्तधराधरा उद
यास्तमयपर्वतौ इत्यर्थः। तावेवाधरौ स्तनौ यस्याः। पुनः कथंभूताभूः। हिमवत्विंध्यपयोधरा। हिमवांश्च वि
ध्यश्च हिमवत्विंध्यौ। तावेव पयोधरौ स्तनौ यस्याः। अन्यल्लक्षणमाह॥ योग यात्रायां विस्तीर्णशिखतां
त्याह॥ इतोपि स्खलितकृशः कृशानुर्यातव्यकाष्ठाभिमुखानतार्चिः। चामीकरताप्तौ ज्वलति समानभिन्नसांक्य
विलीनमूर्तिः। सिमिसिमायति वा स्य दग्विदुंतं सुरधनुःकदरः कपिशो यथा। रुधिरपीतकनीलसदृष्टिछविः॥
परुषमूर्तिरनिष्टकरोऽनलः॥ अवर्णरूक्षभवान रानुरूपो निगडविभूषणशस्त्ररूपभवेद्धा। अनुरोधरनसामम
धगंधो हुतभुगनिष्टफलः स्फुलिंगकृच्च॥ ३॥ चर्मविपाटनतुल्यनिनादो हृष्टरमंदविरूक्षरवो वा। आकुलयं
श्च पुरोहितसभ्यान् धूमकचैर्नशिवाय हुताशः॥ ४॥ हारकुंदकुमुदेंदुसंनिभः संहतोऽगसखदामहोत्रवः अं
शुकांतपनिवारणोऽतिदूर्यतेस्य तपसां न हव्यभुक्॥ ५॥ स्वाहावसानसमयेस्य समुज्ज्वलाग्निः स्निग्धः प्रद
क्षिणशिखो हुतभुङ्नृपस्य॥ एवंविधो हुतभुक् अग्निः। नृपस्य राज्ञः समुद्ररसनां सागरमेखलां पृथ्वीं व
शगां करोति॥ अन्यदप्याह॥ द्विरदमदमहीसरोजलाजैः घृतमधुना च हुताशने सगंधे। प्रणतनृपतिशि
रोमणिः प्रभाभिः भवति पुरः स्फुरितेव भूर्नृपस्य॥ ॥ द्विरदो हस्ती तस्य मदो दानांबु मही भूः सरोजं पद्मं। ला
जा धान्यस्य धानाः घृतमाज्यं। मधु माक्षिकं। अत्र पक्षे तृतीया॥ एषां गंधसम गंधे सदृशे गंधे तुल्यसु
रभौ हुताशेऽग्नौ नृपस्य राज्ञो। भूरवनिः पुरोग्रतः प्रणतानां नृपाणां शिरोमणयः चूडारत्नानि तत्प्रभा

भिः कांतिभिः स्फुरिताम्रकाशीवृता भवंति॥ ॥अन्यच्छेदैशार्थमाह॥ उदंयदुनि वनिताकंकैतोम्बु भाभ्रुभंसमसमरीचि
ब० सं० रूपैः। तत्तज्जन्मयत्तस्य दृशांतिया भाविवाह्काले यपि चिंतनीयः॥३७॥ शक्रकेतोरिंद्रध्वजे उत्तिष्ठति सति यत्शुभा
शुभं समसमरीचिरूपैः अग्निस्वरूपैः उक्तं तथितं। तत्सर्वं जन्मसमये यत्तथत काले ग्रहणं तां ग्रहप्र ज्ञायां मा जायां
१६५ गमने विवाहकाले पाणिग्रहणं समादिष्वपि काले चिंतनीयं। ईश्ं। यथानुरूपया कुरूपं कुलशीलयत विता
नुसारेण यस्य यद्विचिंतितं तद्वक्तव्यं॥ उक्तं च॥ अग्न्याश्रितं यत्फलमुक्तमस्मिन तज्जातकर्मादिषु पार्थिवेषु॥ यत्तेषु
सर्वेषु च वह्निकार्येष्वेवं वदेत्तस्य यथानुरूपं॥ ॥अथेंद्रध्वजोत्थानमाह॥ गुडपूपपायससाद्यविप्रानभ्यर्च्य दक्षिणा
भिश्च॥ श्रवणेन द्वादश्यामुत्थाप्योऽन्यत्र वाश्रवणाते॥३९॥ गुडइक्षुविकारः। पूपः पिष्टकृतः। पायसं प्रसिद्धं।
आदिग्रहणान्मोदकमुल्लोपिकाप्रभृत्यश्च संते। एतैर्विप्रान् ब्राह्मणान अभ्यर्च्य संपूज्य नकेवल गुडपूपपाय
साद्यैर्दक्षिणाभिर्हिरण्यदानेन चाभ्यर्च्य॥ द्वादश्यांतिथौ श्रवणनक्षत्रे उत्थाप्य उत्थितः कार्यः॥ श्रवणादन्य
त्र वा॥ एतदुक्तं भवति॥ द्वादश्यां श्रवणं भवतु मा भवतु सर्वथोत्थानं कार्यं॥ तथा च गर्गः॥ तत्र श्रवणयोगेन
ध्वजोत्थानं प्रशस्यते॥ द्वादश्यां श्रवणे वाथ मुहूर्ते वा बलैस्तथा॥ ॥अथ शक्रकुमारीणां लक्षणमाह॥
शक्रकुमार्यः कार्याः प्राहमनुः सप्तपंचवानंदाः। नंदोपनंदसंज्ञो पादार्धेन ध्वजोच्छ्रायात्॥३९॥ षोडशभागाभ्यधिके
जयविजये द्वे वसुंधरे चान्ये॥ अधिका शक्रजनित्री मध्ये षोडशेन चैतासां॥४०॥ शक्रकुमार्य इति॥ मनुर्नाम राजा
शक्रकुमार्यः सप्तपंचचरा॥ तदैः शक्रध्वजविधिज्ञैः कार्याः कर्तव्याः॥ इति प्राह्दोक्तवान्। तथा च॥ इंद्रकाष्ठ
कृताः पंच सप्त वा लक्षणान्विताः। इंद्रध्वजस्य शोभार्थं कुमार्यः कारयेद्बुधः। तासां नामानि प्रमाणं चाह॥
नंदोपनंदसंज्ञा इति। एका नंदा। द्वितीया उपनंदा॥ एते द्वे ध्वजोच्छ्रायप्रमाणात् यथासंख्यं पादार्धेन कार्ये एतद
क्तं भवति॥ यावानिंद्रध्वजोच्छ्रायः तत्तान्नंदा चतुर्भागेन कार्या। इंद्रध्वजप्रमाणं समान्येनोक्तं। तथा च। ध्वज १६५
परिमाणं कार्यं पंचाशत्हस्तमुत्तमं॥ ख्यातं॥ द्वात्रिंशतमध्यमं चैव हीनं चातः कनीयसित्वयं। गर्गादिभिर्विशे
षेणोक्तं॥ अष्टाविंशतकरान्ययष्टिरष्टहस्ताततः परा॥ विष्कंभश्चांगुलैस्तस्याः षड्गुणितैःस्मृतः॥ समप्रमनु

र्मीयं तस्य शाकशिखयान्वितं। कुर्यादिंद्रध्वजं शुभं सारदारुमयं शुभं॥ नंदोपनंदसंज्ञाभ्यां समकाशाच्च यथाक्रमं॥
जयविजये द्वे षोडशभागाभ्यधिके कार्ये॥ एका जयाप्रमाणात् षोडशभागाभ्यधिका॥ अन्या विजया प्रमाणात्
षोडशभागाभ्यधिका॥ एतासां षण्णां मध्ये सप्तमा शक्रजनित्री इंद्रमाताख्या अष्टांशेनाभ्यधिका इत्येवं वसुंध
रताः कार्या इति॥ ॥अथ पिटकलक्षणमाह॥ प्रीतैः कृतानि विबुधैर्यानि पुरा भूषणानि सुरकेतोः। तानि क्रमे
ण दद्यात् पिटकानि विचित्ररूपाणि॥४२॥ पुरा पूर्वं सुरकेतोरिंद्रध्वजस्य प्रीतैः परितुष्टैः विबुधैर्देवैः यानि वि
भूषणान्यलंकरणानि कृतानि निर्मितानि तानि क्रमेण परिपाट्या विचित्ररूपाणि नानावर्णानि पिटकानि द
द्यात्। समर्पयेत्॥ अथैषां लक्षणमाह॥ रक्ताशोकनिकाशं चतुरस्रं विश्वकर्मणा प्रथमं॥ रशना द्वितीया स्वयंभु
वा शंकरेण नानेकवर्णधरा॥४३॥ अष्टास्त्रि नीलरक्तं तृतीयमिंद्रेण भूषणं दत्तं॥ असितं यमश्चतुर्थं मसूरकां
तिमद्वै यच्छत॥४४॥ मांजिष्ठाभं वरुणाय उस्थितत पंचमं जलोर्मिनिभं॥ मायूरकेयूरपक्षना युक्तं दत्तं॥४५
वैदूर्यसदृशमिंद्रेन वसंग्रैवेयकं ददावन्यात्। रथचक्राभं दशमं सर्यस्तशाप्रभायुक्तं॥४६॥ एकादशानिवर्ण्य
विश्वेदेवाः सरोजसंकाशं॥ द्वादशमपि चानिसमुनयो नीलोत्पलाभासं॥४७॥ किंचिदधर्द्धिनिर्मितमुपरिवि
शालं त्रयोदशं केतोः॥ शिरसिच्छृष्पतिश्च कोलाक्षारसमंनिभं ददद्गुः॥४८॥ रक्ताशोकाति। रक्ताशोकसदृशं चतु
रस्रं चतुष्कोणं प्रथमं समाद्यं विश्वकर्मणा दत्तं प्रतिपादितं। स्वयंभुवा ब्रह्मणा शंकरेण च अनेकवर्णधरा बहुव
र्णा च सना मेखला द्वितीया आभैदत्ता॥ अष्टं स्त्रीति॥ इंद्रेण तृतीयं भूषणं अष्टास्त्री अष्टकोणं नीलरक्तं दत्तं।
चतुर्थमसितं कृष्णवर्णं मसूरकं मसूराख्यं कांतिमत् यत्पितृपतिर्यमो दत्त। मांजिष्ठाभमिति। वरुणोऽपांप
तिः पंचमाभरणं मांजिष्ठाभं लोहितकांति षडस्त्रि षट्कोणं। जलोर्मिनिभं दकावर्तसदृशमदात्। षष्ठमा
भरणं मायूरं मयूरपत्ररचितं। केयूरं बाहुभूषणं बहुचित्रं बहुप्रकारं चित्रं नाना वर्णसप्तमं ध्वजाय केतवेद
दात्॥ हव्यभुगग्निः। अनलज्वालासंकाशं वह्निशिखासमकांति दत्तं परिवर्तुलमष्टमं सदात्। वैदूर्यं
सदृशमिति। अन्यदपरं ग्रैवेयकं ग्रीवाभरणं वैदूर्यसदृशं नीलपीतकांति नवमं इंद्रा ददौ॥ सूर्योरथने

कांभरथचक्राकारं लक्षणानामार्कः तस्य प्रभा कांतिः तया युक्तं। सूर्यसमद्युतिमित्यर्थः। दशामंदरौ। एकादशामिति।
 भवबाणेन वंशेना मनोज्ञेन लक्षाभासं इंद्रस्य रसदृशकांतिद्वादशा मंदरौ कांचनरचित॥ किंचित ईषत अर्धभा
गनिर्मितं किंचिद्रुर्ध्वभागनिर्मितं उपरि अग्रतो विशालं विस्तीर्णं छत्राकारकं शारसंनिभं अतिकोद्
 तं त्रयोदशं कृतोर्ध्वजस्याकारमिमं धनिवहस्यतिशक्रोदरं। अर्थेषामिन्द्रमदर्शनार्थमाह॥ यद्यन्येननि
निर्मितममरेण निर्मितं ध्वजस्यार्थे॥ तत्ततदेव विद्यावितानं विपश्चिद्भिः॥४८॥ ध्वजस्य इंद्रध्वजस्या
र्थ येन येनामरेण देवेन यद्यद्भूषणं विनिर्मितं तत्तत् भूषणं विनिर्मितं तत्तत् भूषणं तत्तत् देवत्वं
सर्वदैवतानां तस्योति विपश्चिद्भिः शास्त्रदर्शितात्वं। तथारत्नाशोकान काञ्चनवक्रमेणा स्तंतादश्वक॥ मं
देवत्यं॥ रशनास्वयं भवान्ब्रह्मदैवत्यं मंतेति॥ अथ पिटकानां प्रमाणमाह॥ ॥ध्वजपरिमाणत्र्यंशः परि
धिः प्रथमस्य भवति पिटकस्य॥ परतः प्रथमात प्रथमात अष्टांशाष्टांशहीनानि॥ ध्वजपरिमाणं ध्वज
गास्तृतीयोभागः तत्प्रमाणः परिधिः परिमाणं प्रथमपिटकस्य भवति। एतदुक्तं भवति। ध्वजोच्छ्रायप्रमाण
नस्त्रयस्त्रिभागः तावत्प्रमाणपरिधिः त्रिभाग तुल्यो विष्कंभः। तत्प्रमाता पिटकात्परतो नंतरं यान्यन्या
नि पिटकानि तानि यथाक्रमं अष्टांशाष्टांशहीनानि कार्याणि॥ एतदुक्तं भवति॥ प्रथमात पिटकात् द्वितीय
मष्टांशोनं कार्यं द्वितीयात तृतीयमष्टांशोनमिति॥ अन्यस्मिन्नपि पटकैः पूरणमित्येतत दर्शयितुमाह॥ ॥कुर्या
द्दिनचतुर्थे पूरणमिंद्रध्वजस्य शास्त्रदृष्टः॥ मनुनाचागमगीतानमंत्रानेतानपठेत्प्रयतः॥५१॥ शास्त्रदृष्ट इंद्रध्व
जस्याविधानदृष्टश्चतुर्थेदिने अष्टम्याश्चतुर्थेदिवसे एकादश्यामित्यर्थः। इंद्रध्वजस्य पिटकैः पूरणं भरणं कुर्या
प्रयतः प्रकर्षेणायत्नात एतान मंत्रान्पठेत। जपेत। कीदृशान मनुनान्यपि आगमगीतान आगमोक्तान। अंक
नातान मंत्रानाह॥ दूरार्कवैवस्वतशक्र सोमो धर्मो न वर्णो वैश्वानरो नाग्निर्भूः। महर्षिमुख्यैः सद्गिभरोभिः शु २६६
क्रांगिराः स्कंदमरुद्गणैश्च॥५२॥ यथाच मूर्द्धस्करनेकरूपैः समर्चितस्त्वाभरणेकदारैः। तथैव तान्याभरणा
नि देवशुभानि संप्रीतमना गृहाण॥५३॥ अक्षतोऽव्ययः शाश्वतो नैकरूपो विष्णुर्वराहः पुरुषः पुराणः। त्वमंतकः

सर्वहरः कृशानुः सहस्रशीर्षा शतमन्युरीड्यः॥५४॥ कविं सप्तजिह्वं त्रातारमिंद्रमवितारं सुरेशं। ह्वयामि वृत्रहणं सु
षेणमस्माकं वीरा उत्तरे भवंतु॥५५॥ दूरारेति। हरो रुद्रः। अर्कः सूर्यः। वैवस्वतो यमः। शक्रः इंद्रः। एतैस्तथा धनदो
धनदः। वैश्वानरो ग्निः। पाशभृत वरुणः। एतैरपि तथा महर्षिगणैः सह धीरैः इंद्रः। किंभूतैः सद्गिगणैरभिः महर्षिभिः
अप्सरोभिः सह मरुद्भिश्चाभिः। शुक्र उशना। आंगिरा बृहस्पतिः। स्कंदः कुमारः। मरुतगणा मरुतां समूहाः वायवः ए
तैर्देवैर्यथा येन प्रकारेण अनेकरूपैर्नानाप्रकारैः श्रेष्ठाभरणैः समर्चितः पूजितः। तथा तेन प्रकारेण इमा
न्याभरणानि ईश्वरः प्राणदाता तान्येवाभरणानि शुभानि हे देव त्वं तुष्टमनाः परितुष्टान्वितो गृहाण। कीदृशः अ
क्षतोऽक्षयः इति। नक्षयितः त्यक्तः। अव्ययो अक्षयः। शाश्वतो नित्यः। एकरूपोऽबहुरूपः रहितः। विष्णुर्व्यापकः
वराहः आदिपुरुषः। पुरीशेते पुरुषः। चराचरात्मकः। पुराणो चिरंतनः। अनादिः। एवं विधस्त्वं। तथांतकः
यमः। कीदृशः सर्वहरः। सर्वसंहारकः। कृशानुरग्निः। सहस्रशीर्षा सहस्रवदनः। शतमन्युः शतक्रतुः। ईश्वर
त्यः। कविं सप्तमिति॥ कविं आर्यं विद्वांसं। सप्तजिह्वं सप्तानेयं। त्रातारं पालयितारं। इंद्रं परमेश्वरं। अविता
रं रक्षितारं। सुरेशं देवाधिपं॥ ह्वयामि आमंत्रयामि। आह्वयामीत्यर्थः। वृत्रहणं वृत्रहंतारं। सुषेणं शो
भनचमूकं। अस्माकं वीरा बलिन उत्तरे भवंतु जयिनो भवंतु॥ एतत ज्योतिःशास्त्रात् दृष्टात्। उत्तरे भवंतु
उत्तरेषु कोष्ठहूणजयिनो भवंतु कस्मिन काले एतान मंत्रान पठेदित्याह॥ ॥प्रपूरणे चोच्छ्रयणे प्रवेशने स्ना
ने तथा माल्यविधौ विसर्गे॥ पठेदिमां नृपतिः सोपवासो मंत्रानिमान पुरस्कृतस्वकृतः॥५६॥ प्रपूरणे पिट
कपूरणे। चकाराद्यः समुच्चये न केवलं प्रपूरणे उच्छ्रायउत्थापने प्रवेशने गृहप्रवेशे स्नाने स्नपनकाले माल्यविधौ पु
ष्पप्रदानकाले। विसर्गे विसर्जने। एतेषु कालेषु नृपतिराजा सोपवासः उपोषितः पुरस्कृतकेतुः इंद्रध्वजस्य मानुतान
शुभानश्चैव मंत्रान्मंत्रानपठेत्तत् पेत। कीदृशमिंद्रध्वजमुत्थापयेदित्यत आह॥ छत्रध्वजादर्शफलार्धचंद्रविचित्रमा
लाकदलीक्षुदंडः। सव्यालसिंहैः पिटकैर्गवाक्षैरलंकृतं दिक्षु च लोकपालैः॥५७॥ अच्छिन्नरज्जुं दृढकाष्ठमात्रकं सुश्लि
ष्टयंत्रार्गलतोरणं। तथा। उत्थापयेद्रश्मिसमूहचक्षुषः सारद्रुमाभग्नकुमारिकान्वितं॥५८॥ छत्र ध्वजेति। एवं वि

धं सदृसव्रक्षयः इंद्रस्यलक्ष्मउथापयेत। उत्क्षिपेत। कीदृशं छत्रं। आतपत्रं। ध्वजं चिन्हं पताका। आदर्शो दर्पणः॥
बृ॰सं॰ फलं कांगलं केचित्कार्मितिपठंति। अर्धचंद्रः चंद्रः। विचित्रमाल्यः नानाप्रकाराः स्रजः। कदली भाख्या विशेषः।
वृक्षदंडः प्रसिद्धः। एतैः सर्वैः सह। तथा व्यालसिंहपिटकैः। व्यालाव्याल संज्ञाप्राणिनः। सिंहाकृतयः। एतैः संयुतानि
१६१ यानि पिटकानि इंद्रवक्रतभूषणानि॥ तथा च गर्गः। आश्लेंद्रमारिकाः एतैः सदृत्तानि सर्वाणि लघुदारमया
णि शोभार्थमिंद्रध्वजं कारयेत॥ तथा दिक्षु आशासु लोकपालैः इंद्रादिभिरलंकृतं भूषितं। अन्यत कीदृशं। अ
छिन्नरज्जुः अछिन्नारज्जवोयस्य। इंद्रध्वजबंधनार्थं भद्रा मंदिक्षु अष्टौ रज्जवः कार्याः। तथा च गर्गः। यथा
दिशं रज्ज्वो बध्नीयाद्गृहमभूषितः। निग्रहार्थं ध्वजस्यापि निबध्नीयाद्दृढाश्माणि॥ एवं अछिन्नरज्जुं अनुदितदोषं
। दृढकाष्ठमातृकं दृढा काष्ठमातृकायस्य॥ इंद्रध्वजनिधारणार्थं पार्श्वद्वय मातृकाद्वितयं कार्यं तद्दृढकाष्ठमयसु
श्लिष्टयंत्रार्गलपादतोरणं॥ तत्र श्लिष्टयंत्रार्गलं एतद्दृढं भवति॥ पादमूल यतोरणं तद्यानि मातृकाणि श्लथ्य
कृतानि स्थानानि काष्ठानि तासां मातृकाणां तिर्यक्कृतायबंधाःकृताः तेषु तिर्यग्गेनयानि काष्ठानि निक्षिप्यंते ता
नि अर्गलाग्रदूणेनोच्यंते॥ अर्गलाः सश्लिष्टाः सयोजिताः यंत्रकुमारिकाः उत कुमार्यः। सारद्रुमोत्थाः सारच
शेत तोयाअभंग्नाअस्फुटिताः कुमारिकाः ताभिरन्वितां संयुतं॥ अन्यच्च कीदृशं केतुमुत्थापयेदित्याह॥ ॥
अविरतजनराव मंगलाशीः प्रणामैः पटुपटहमृदंगैः शंखभेर्यादिभिश्च॥ श्रुतिविहितवचोभिः पाठयद्भि
श्च विप्रैः अशुभविहतशब्दं केतुमुत्थापयेत्॥ ४१॥ एवंविधं केतुं इंद्रध्वजं उत्थापयेत। कीदृशं। अविरतजनरा
वं मंगलैः शुभशब्दैः आशीर्भिः प्रशस्तवाग्भिः प्रणामैः नमस्कारशब्दैः अविरतैः विछिन्नैः जनानां लोकानां
रावः शब्दोयस्य। तत्रथाभूतं। पटवः शुभशब्दयुक्तं। मंथराः घनयोये मृदंगवादित्रविशेषः। एतैः शंखैस्तथा
शंखैः कंबुभिः भेरीभिः ढक्काशब्दैः काहलाभिरित्यर्थः। आदिग्रहणात् दुंदुभिपणवकरटीनां वंशाद्यानां १६१
ग्रहणं। एतैरपि सहितं तथा विप्रैः ब्राह्मणैः पठद्भिः अत्यर्थं पुनः पुनरपि पठद्भिः कीदृशैः। श्रुतिविहितवचोभिः।
श्रुतिर्वेदः तद्विहितानि वचांसि वाक्यानि येषां तथाभूतैः पठद्भिः। अनुविहितशब्दं अशुभाः अनिष्टाः शब्दा वि

शेषेण हताः नष्टाः यस्य तथाभूतं केतुं॥ वृः मंत्रशान्त्यन्त इंद्रध्वजोत्थापनकालो भवितव्यं। तदुत्थापनकालमाह॥
फलदधिघृतलाजाक्षौद्रपुष्पाणि हस्तैः प्रणिपतितशिरोभिः तुष्टुवद्भिश्च पौरैः। शतमनिमिषभर्तुः केतुमावृ
आनां मारिनगरनतायं कारयेत् विद्वधाय॥ प्रजानामीश्वरः प्रभुः राजा अनिमिषभर्तुः इंद्रस्य केतुं ध्वजं द्विषां
ऋणां वधाय घाताय अरिनगरजनताग्रे अरिनगरं शत्रुपुरं तत् सम्मुखं अग्रं प्रांतं यस्य। कीदृशं ध्वजं। विविधैः पौरैः
पुरजनैः रुद्धं परिवृतं। कीदृशैः फलदधिघृताः। फलानि नालिकेरादीनि श्रीफलादीनि॥ दधि क्षीरविकारः। घृतमाज्यं। ला
जा व्रीहिधानाः क्षौद्रं माक्षिकं॥ पुष्पाणि। एतानि हस्ते दक्षिणपाणौ येषां तथाभूतैः। तथा च प्रणतशिरोभिः प्र
कर्षेण भूमौ निपतितं शिरो मूर्धा येषां तैः तथाभूतैः तुष्टुवद्भिः। अत्यर्थं पुनः पुनः स्तुवद्भिः॥ अथ ध्वजोत्थापनलक्षण
माह॥ नातिद्रुतं न च विलंबितमप्रकंप्यमध्वस्तमाल्यपिटकादिविभूषणं च॥ उत्थानमिष्टमशुभं यदतोऽन्यथा स्या
त्तच्छांतिभिर्नरपतिः शमयेत्पुरोधाः॥ ४२॥ एवंविधमुत्थापनमुक्तोपणामिंद्रध्वजस्य इष्टं शुभदं। कीदृशं नातिद्रु
तं। नातित्वरितं। न च विलंबितं न च लंबं अप्रकंप्यं प्रकंपश्चलनं नास्य यत्र॥ तथा अध्वस्तमाल्यपिटकादिभूष
णं॥ माल्यानां पिटकानां पूर्वोक्तानामलंकरणानां ध्वंसो विनाशो येन न भवति। आदिग्रहणात् छत्रध्वजादे
र्ग्रहणं ध्वजं द्वारयेत्पतनं। अतोस्मादुक्ता दन्यथा विपर्ययेण यदुत्थानं द्रुतं विलंबितं सकंपं ध्वस्त माल्यपिटका
दिभूषणं तन्नरपतेर्नृपस्याशुभमश्रेयस्करं भवेत॥ तच्चानिष्टं पुरोधाः पुरोहितः शांतिभिः शमयेत। तथा च ग
र्गः॥ भविता ध्वमनाधूतमद्रुतान्निश्चमृ धंगा। इंद्रध्वजसमुत्थानं क्षेममाभिशक्रक्रांनिर्घातोल्कामहीकंपाश्चा
ताश्च मृगपक्षिणः। उत्थाप्यमाने वेदाचाद्याच्चः स्युर्भयावहः। अथान्यत्शुभाशुभमाह॥ क्रव्यादकौशिक
पातककाकर्कैः केतुस्थितैः महद्दुःखं तिभयं नृपस्य॥ चाषेण चापि युवराज्यभयं वदंति श्येनोतिलोचनभयं
निपतत्करोति॥ ४३॥ क्रव्यादा आमममांसभुजो गृध्रप्रभृतयः। कौशिकउलूकः। कपोतकाककंकाः प्रसि
द्धाः इंद्रध्वजाश्रितेन चाषेण युवराजभयं वदंति पक्षिणः। एतैः केतुस्थितैः नृपस्य राज्ञो महदत्यर्थं भयं भव
ति इत्युक्तिकथयंति॥ चाषः प्रसिद्धः। इंद्रध्वजाश्रितेन चाषेण युवराजभयं वदंति। श्येनः आजिकोनिपतन्नेत्र

बृ.सं. निघ्नन्विकोशमभयं च शत्रून्दारुं करोति। अन्यदप्याह। छत्रभंगपतनेन नृपमृत्युस्तस्करान्मधु करोति निलीनं॥ हंतिचा
१६८ प्य पुरोहितमुल्का पार्थिवस्य महिषीमशनिश्च॥ ६३॥ छत्रस्यातपत्रभंगे स्फोटने पतने वा नृपस्य मृत्युर्भव
ति। मधुकृच्छेन मधुकृन्मक्षिका उच्यंते। मधुनिलीनं तत्र संश्लिष्टं। तस्करान् चोरान्। करोति उत्पादयति। तत्र पतिता पु
रोहितं हंति॥ अशनिस्तत्र पतिता पार्थिवस्य महिषीं प्रधानस्त्रियं हंति। राष्ट्रविनाशं पतिता पताका कुरुते च
क्षितिपटकस्य पातः। मध्याग्रमूलेषु च केतुभंगो निहंति मंत्रीश्वरपौरभृत्यान्॥ ६४॥ पिटकस्य पातने वा पताका निजयंत्रप
तिता नृपस्य प्रधानस्त्रीमरणं करोति। पिटकस्य पूर्वोक्तस्याभरणस्य पातः क्षितिपक्षयं करोति। केतोरिंद्रध्वजस्य मध्याग्र
मूलेषु भंगः स्फोटनं यथाक्रमं मंत्रिक्षितिपालपौरान्हंति। तद्यथा। मध्यादूर्ध्वं मंत्रिणं हंति। अग्राद्भंगः क्षितिपालं राज्ञा
नं। मूलात्पौरान् जानपदान्॥ ॥ अन्यदप्याह॥ धूमावृते शिखिभयं तमसा च मोहो व्यालैश्च भग्नपतितैर्न भवं
त्यमात्याः॥ रत्न्याश्च युद्धप्रभृतिन्कृमशो द्विजाद्यान् भंगोत्कृष्टिकबंधकथितः कुमार्याः॥ ६५॥ इंद्रध्वजे धूमा
वृते तत्कालं नभसि यदि धूमो दृश्यते तदा सोपि धूमावृतो भवति। तथाभूतेग्निभयं अग्निभयं भवति॥ तमसावृते
मोहः स्वित्तमोहो राज्ञस्य भवति। चित्तवैकल्यमित्यर्थः। व्यालैः प्राणिविशेषैः भग्नैः स्फुटितैः पतितैः अमात्यमंत्रि
णां न भवंति विनश्यंति। उदकप्रभृति उत्तरादिदिक्कुलत्रयेषु उत्पातः क्रमशो द्विजाद्या क्रमशो नाश्यंते। पीड्यंते॥ तद्यथा
उत्तरस्यां विप्राः। पूर्वस्यां क्षत्रियाः। दक्षिणस्यां वैश्याः। पश्चिमायां शूद्राः। कुमार्योः शत्रुकुमार्यां भंगस्फोटने
बंधकीनां वेश्यानां वधो मरणं कथितं। अन्यदप्याह॥ रज्जुसंगछेदने बालपीडा राज्ञो मातुः पीडनं मातृकायाः॥
यद्वत्कुर्यु बालिका त्वारणपातन तत्तादृग्भाविपार्थिवस्य भंगपातं॥ ६६॥ रज्जुसंगे उत्थापनकाले यत्र कुत्रचित्तरज्जु
छेदने द्रुघ्नीभावे बालानां डिंभानां पीडा भवति। तथा च मातृकायाः तोरणपार्श्वे छिन्नस्य काष्ठस्य पीडने राज्ञो
मातुर्जनन्याः पीडनं भवति। तथा न बालकाः क्रीडया वारणाद्यश्च भंगं पातनं वा कुर्युः आचरेयुः तत्ता १६८
दृक् भावि। तथाभूतं लोकानां शुभमशुभं वा भवति॥ तथा च गर्गः॥ प्रहृष्टमनसः सर्वे क्रीडयुर्मुदितायदि। तदा लो
न गं धिश्च विंद्यात्सोभिक्षलक्षणं॥ असंधेः कर्दमैः कीटैः भस्मनापांशुनाथवा॥ दुर्भिक्षपीडितेयात्...

मपभयं भवेत्॥ अथेंद्रध्वजविसर्जनविधानमाह॥ दिनचतुष्टयमुषितमर्चितं समभिपूज्य नृपो दिनपंचमे॥ प्रकृतिभिः
सह क्षमाविसर्जयेत बलभिदः स्वबलाभिविवृद्धये॥ ६७॥ बलभित इंद्रस्य केतुमाविंद्रध्वजं स्वबलाभिवृद्धये आत्मीयबलवृ
द्ध्यर्थं नृपो राजा पंचमे दिने पंचमे दिवसे प्रतिपूज्य समभिपूज्य संपूज्य। मंत्रिभिः सह विसर्जयेत॥ प्रधानादिदिनात्
दिनचतुष्टयं अर्चितं द्वादश्याः प्रभृति दिनचतुष्टयं पौर्णमासीयावत्पूजितं॥ ततः उषितं उत्थापितं॥ अथेंद्रध्वजविधानक
र्तुः प्रभावमाह॥ उपरिचरवसुप्रवर्तितं नृपतिभिरनुसंततं कृतं॥ विधिमिममनुमन्य पार्थिवाना रिपुकृतं भयमाप्नु
यात कृचित॥ ६८॥ पार्थिवो राजा इमां विधिमनमन्य सम्यक्कृत्वा इंद्रध्वजं संपूज्य कुत्राद्रिपुकृतं शत्रुकृतं भयं न प्रा
नुयान्न लभते॥ कीदृशं विधिं। उपरिचरवसुप्रवर्तितं उपरिचरेण इंद्रगामिना वसुना राज्ञा चेदिपतिना प्रवर्तितं
नृपान्नृपतिभिरपि अनुसंततं आ वाच्छिन्नं कृतमनुष्ठितं॥ ॥ इति श्रीभट्टोत्पलकृतौ विवृतौ बृहत्संहितायां वि
वृतौ इंद्रध्वजसंपन्नाध्यायः त्रिचत्वारिंशः॥ ४३॥ ७॥ ॥ अथ नीराजनं व्याख्यायते॥ तत्रादावेव का
लनियमप्रदर्शनार्थमाह॥ भगवति जलधरपक्षक्षपाकरार्कक्षणे कमलनाभे। उन्मीलयति तुरंगमकरिनरनीराज
नं कुर्यात्॥ १॥ भगवति परमैश्वर्ययुक्ते कमलनाभे नारायणे जलधरपक्षक्षपाकरार्केक्षणे उन्मीलयति॥ जलधराम
घास्त एव पक्ष्माणि अक्षिरोमाणि ययोः क्षपाकरश्चंद्रो र्क आदित्यस्तावेवेक्षणे नेत्रे यस्य तद्रुन्मीलयति विकास
यति। तुरंगमानामश्वानां करिणां हस्तिनां॥ नराणां मनुष्याणां नीराजनं भंजनं स्पर्शनं कुर्यात्॥ अनेन नीराजन
स्य चपांसि निषिधक्तः॥ वर्षासु अर्कचंद्रयोर्मेघाच्छन्नत्वात्॥ नभसः स्थगितः। पुनरप्याह॥ द्वादश्यामष्टम्यां का
र्तिकशुक्लपक्षस्य द्वादश्यां द्वादश्यामष्टम्यां कार्तिकशुक्लपक्षस्य पंचदश्यां वा॥ आश्वयुजे वा कुर्यान्नीराजनसंज्ञितां
शांतिं॥ २॥ कार्तिकमासशुक्लपक्षस्य द्वादश्यां तिथौ अष्टम्यां वा पंचदश्यां पूर्णमास्यां आश्वयुजः शुक्लपक्षे वा एता
सु तिथिषु नीराजनसंज्ञितां नीराजनाख्यां शांतिं कारयेत॥ तद्विधानमाह॥ नगरोत्तरपूर्वदिशि प्रशस्तभूमौ प्रशस्त
दारुमयं। षोडशहस्तोच्छ्रायं दशविपुलं तोरणं कार्यं॥ ३॥ नगरस्य उत्तरपूर्वस्यां दिशि ऐशान्यां दिशि प्रशस्तभूमौ शु
भलक्षणयुक्तायां भूमौ शिल्यादिदोषवर्जितायां प्रशस्तदारुमयं प्रशस्तवृक्षनिर्मितं षोडशहस्तोच्छ्रायं उच्छ्रित

दन्नादलाविली र्णतोरणं कार्यं ॥ ॥अथ शांतिकलक्षणमाह ॥ मत्स्यौ दुंबरशाखा कुंभमयं शांतिसमकुशादूर्वं ॥
वा॰ सं॰ वंशावनिर्मितमत्स्यध्वजचक्राकारं तदावं ॥ ५ ॥ मत्स्योदुंबरकुंभगता । वृक्षविशेषाः एतेषां शाखामयकृतानि मि
तसमशांतिकं कुर्यात् ॥ कुशं च दूर्वां च भवदर्भे । तथा वंशनिर्मितानि वणुरचितानि मत्स्यध्वजचक्राणि । मत्स्यो मीनः ।
१६९ ध्वजः चिन्हं चक्रमायुधं एते रवंकृतं शोभितं द्वारमस्यतथा भवेत् ॥ ॥अथाश्वादीनां दीक्षाविधानमाह ॥ प्रतिसरया
तुरंगाणां भङ्गातकशालिकुष्ठसिद्धार्थान । कंठेषु निबध्नीयात् पुष्यर्थे शांतिम्हृष्टानां ॥ ७ ॥ तुरंगाणामश्वानां गजा
नामपि प्रतिसरया कुंकुमरंजितसूत्रेण अन्येन वा तन्निर्मितेन वा कंठेषु गलेषु भङ्गातकं प्रसिद्धं । शालिः कुष्टं । सिद्धार्थाः
गौरसर्षपाः एतान् पुष्यर्थे वृद्धिकरणाय शांतिमृष्टानां शांतिसमकानां निबध्नीयात् ग्रादृयेत् ॥ तथा च काश्यपः ॥
शालिजातकसिद्धार्थान कुष्ठं भङ्गातकं तथा ॥ अश्वकंठेषु बध्नीयात् सम्राट् शांतिमाचरेत् ॥ ॥अथ शांतिविधान
माह ॥ रविवरुणविश्वदेवतप्रजेशपुरहूतवैष्णवैर्मंत्रैः ॥ सप्ताहं शांतिम्हृद् कुर्यात् शांतिं तुरंगाणां ॥ ८ ॥ रवि
वरुणाः विश्वेदेवाः देवविशेषाः प्रजेशो ब्रह्मा पुरहूतइंद्रः विष्णुर्नारायणः एषां संबंधिभिर्मंत्रैः तुरगाणां शां
तिगृहीतानां सप्ताहानि शांतिं कुर्यात् । तथा च काश्यपः ॥ तोरणे कृत विधेर्मंत्रैः पुरोधा हुतभुक् हुताः ॥ हुतांतिभो
तयद्विप्रानदक्षिणाभिः कल्पयेत् ॥ अश्वानां कुर्यादित्यत आह ॥ अभ्यर्चितान्यरत्वं न तस्य नातिपीडनीयास्त
॥ पुण्याहशंखतुर्यध्वनिगीतरवैर्विमलाभयाः ॥ ९ ॥ अश्वाः अभ्यर्चिताः पूजिताः परत्वं अप्रियं न वक्तव्याः तेना
तिपीडनीयाः कशादिभिर्न हंतव्याः पुण्याहरवैः शुभवाचनशब्दैः तुर्यशब्दैः गीतरवैः गीतशब्दैः विमलं परि
त्यक्तं भयं भीतिर्यैः तेतस्यापि धाः कार्याः । ततः सप्ताहे किं कुर्यादित्यत आह ॥ उदक्सुतोरणस्य दक्षिणतः कृत्वा
गाढतमाश्रयमग्निपरतोस्य वेदीं च ॥ ततो ष्टमदिवसे प्राप्ते तोरणस्य प्रांशुर्नाद्वारस्य दक्षिणतो दक्षिणभागे आ
श्रयं कुटकमुग्वं उत्तराभिमुखं गृहं कुर्याद्वा वा रचितं ॥ कुशैर्दर्भैः वीरादिभिर्वा वल्कलैः आवृतमाच्छादितं कुर्या
त । यस्याश्रयस्य पुरतो ग्रे वेदीं अग्निं कुर्यात् ॥ वेदीलक्षणमत्राचार्येण नोक्तं ॥ अस्माभिरन्यशास्त्रात्तदुद १६९
श्यते । तथा च ॥ यजते च तुः षष्टिकरा विवाहे वेदीविहितानां हिनरप्रमाणं ॥ कुर्याद्देतीलांगुलमयक्रमेणाग्रजन्यवैश्य

शूद्रजातानां ॥ तथा । सप्तहस्ता ब्राह्मणानां वेदीयज्ञे प्रकीर्तिता ॥ षट्करा क्षत्रियाणां तु वैश्यानां पंच कीर्तिताः ।
चतुर्हस्ता च शूद्राणां विवाहेपि विनिश्चिता । अन्त्या मे सर्ववर्णानां चतुर्हस्ता प्रकीर्तिता । कुंजराणां मतान्युनानि
दिक्षामुनिभिः स्मृता ॥ अतोन्यूनाधिका वेदी यज्ञमानस्य मृत्युदा ॥ तथा च ॥ यज्ञे विवाहे स्वामिने दीमानं सप्त
मतः । त्रिः सप्तहस्ता विस्तारा ब्राह्मणानां शुभावहा ॥ क्षत्रियाणां पंचदश वैश्यानां नवसंमिता । सप्तहस्ता च शूद्र
णां शिल्पिनां पंच कीर्तिता ॥ त्रिहस्तायंतराणां च वेदी सर्वत्र कीर्तिता ॥ ध्रुवः सर्वत्र कीर्तितः भूपालभृत्यानां
नानुवर्णे त्रि कीर्तिता । पंचहस्तायता वेदी सर्वमंगलदायका ॥ एवं प्रमाणं ज्ञात्वा तस्याः शुभाशुभमाचार्ये
णोक्तं ॥ तथा च ॥ वेदीशुभाशुभविधान दृष्टादकृशानन्यूनाधिकानहीना ॥ सूत्रप्रमाणा न कृतातिभंगादि
कृवक्रसंस्थानवर्जिता स्यात् ॥ प्राक्भागहीना नगरस्य नेष्टा पुरोधसो दक्षिणभागवक्रा ॥ नरेंद्रतायाः शु
भदा परा स्यात् उदक्बलेशस्य न पश्यमध्ये ॥ तथा च काश्यपः ॥ अष्टासंधिपुरस्त्यपीरंजानपदैः सह ॥ गजितश
तिहदिह दशांशवनूर्ध्वरवैः सह ॥ अथ संभाराणां लक्षणमाह ॥ चंदनकुष्ठसमंगा हरिताल मनः शिलाप्रियंगु
वचा । दंत्यमृताः जनरजनीसुवर्णपुष्पाग्निमंथाश्च ॥ ८ ॥ श्वेतासंपूर्णकोशां कंटभरीत्रायमाणसहदेवी ॥ ना
गकुसुमांस्वगुप्ताजातावरीसोमराजीच ॥ १० ॥ कलशेषु तान्कृत्वा संभारानुपहृत्य बलिं सम्यक् । भक्ष्यैर्नाना
कारैर्मधुपावकपायसयवाद्यैः ॥ ११ ॥ चंदनं कुष्ठं च । चंदनं मलयजं । कुष्ठं प्रसिद्धं । समंगा मंजिष्ठा । हरितालं प्रसि
द्धं । मनः शिला प्रियंगुः वचा दंती । अमृता गुडूची । अंजनं सौवीरांजनं । स्रोतांजनं वा । रजनी हरिद्रा सुवर्णपु
ष्पा प्रसिद्धा ॥ अग्निमंथा तर्का । श्वेता गिरिकर्णिका । संपूर्णकोशां पूर्णकोशा श्यामा सह ॥ कंटभरी सर्ध्वेता
त्रायमाणं प्रसिद्धं सहदेवी महागंधा । नागकुसुमं नागपुष्पं । स्वगुप्ता कपिकच्छुरित्यर्थः । जातावरी प्रसिद्धा
सोमराजी सोमवल्ली ॥ एता ओषधयः कलशेषु पूर्णघटेषु अंतरे कृत्वा मध्ये संस्थाप्य संभारानेतान् ततः
सम्यक् यथाविधानेन बलिमुपहारमुपनयेत् ढौकयेत् ॥ भक्ष्यैर्मोदकापूपिकापूपादिभिर्नानाप्रकारैर्बहु
विधैर्मधुरैः पायसयावकप्रचुरैः । मधुमाक्षिकं । पायसं पयसा विकारो यत्किंचित् क्षीरसंभवं । यावकं यव

व॰ सं॰ प्रकार: । एते प्रचुरा: प्रभवा: । अन्यदप्याह ॥ स्वदिरपलाशोदुंबरकाश्मर्यैः [illegible] निर्मिता: समिधः । [illegible]
[illegible] ॥ २२ ॥ स्वदिरः पलाशः उदुंबरः काश्मर्य [illegible] । [illegible]
[illegible] निर्मिता: कार्याः समिधो [illegible] । [illegible]
१७० [illegible] । ततः किं कुर्यादित्याह ॥ पूर्वाभिमुखः श्रीमान् [illegible]
॥ [illegible] ॥ २३ ॥ [illegible] श्रीमान् । [illegible]
श्री: श्रीमानिति ॥ [illegible] । कुर्वाभिमुखः पूर्वस्यां
[illegible] । [illegible]
[illegible] । अथ [illegible] ॥ यात्रायां [illegible]
[illegible] ॥ [illegible]
[illegible] ॥ [illegible]
[illegible] ॥ यात्रायां [illegible]
[illegible] । [illegible]
[illegible] ॥ [illegible] । [illegible]
[illegible] ॥ [illegible]
[illegible] ॥ ॥ [illegible] ॥ [illegible]
[illegible] प्रदक्षिणगतिः [illegible] । [illegible]
[illegible] श्रियं [illegible] ॥ [illegible] १७०
[illegible] स्निग्धस्वनः [illegible] । [illegible]
[illegible] ॥ ॥

ततः किं कुर्यादित्याह ॥ [illegible] ॥ अ [illegible]
कृत्वा ॥ २५ ॥ आश्रमतोरणमूले [illegible] ॥ [illegible] ॥ २६ ॥
[illegible] ॥ [illegible] । [illegible]
[illegible] । तथा [illegible]
[illegible] ततः आश्रमतोरणमूले आश्रम [illegible]
[illegible] । शनैः शनैः मंदं मंदं [illegible] ॥ [illegible] तोरणमूले ॥ [illegible]
[illegible] ॥ ॥ अथ [illegible]
[illegible] ॥ [illegible] दक्षिणचरणं [illegible] ॥ [illegible]
॥ २७ ॥ [illegible] ॥ यात्रायां [illegible] ॥ [illegible]
[illegible] । अथ [illegible] दक्षिणचरणं [illegible]
[illegible] । [illegible]
[illegible] ॥ [illegible] । [illegible]
[illegible] ॥ [illegible] ॥ [illegible]
[illegible] दक्षिण [illegible] । तथा [illegible]
[illegible] पृथिव्यां [illegible]
[illegible] ॥ [illegible] ॥ [illegible]
[illegible] ॥ २९ ॥ [illegible]
[illegible] । [illegible] । [illegible] । नापि [illegible] ।
[illegible] ॥ ॥ अथ [illegible] ॥ [illegible]

स्नातेऽनुरगान। शांतिकपौष्टिकमंत्रैरेव सेनां सन्त्रपनायां॥ २०॥ कलशोदकेषु कलशान्तलेषु साकुलापितेषु औ
बृ॰ सं॰ षधिमिश्रेषु उदुंबरवृक्षसंभवांशाखामापूर्य मत्तयितानुरगान अश्वान स्नपेत। शांतिकपौष्टिकमं
त्रैः सद्भसेनां सन्त्रपनांगान्नृपोराजानां गाद्दिनः। तत्तं यत्ता सेनां च मृंस्नपेत॥ ततः किं कुर्यादित्याह॥ शां
१११ तिराष्ट्रविवृध्यैकृत्वाभूयोऽभिचारकैर्मंत्रैः॥ मृन्मयमरिंविभिंद्यातश्शूलेनोरसि हृदि विप्रः॥ २१॥ भूयः पुनः
राष्ट्रविवृध्यै राष्ट्रविवर्धनाय शांतिं कृत्वा ततोऽभिचारिकैर्मंत्रैरभिचारकर्माणि ये मंत्रा अथर्वणा उक्ताः तैर्मं
त्रैर्मृन्मयं मृत्तिकारचितं अरिं शत्रुं उरसि वक्षःप्रदेशे विप्रो ब्राह्मणः शूलेन अग्रतीक्ष्णेन काष्ठेन विभिंद्या
त्। ततः किं कुर्यात॥ खड्गिनं द्रव्यायुदग्रदृभिमंत्र्य पुरोहितस्ततो राजा। आरुह्य द्विरदकुपूर्वं यायान्नीराजितः स
बलः॥ २२॥ ततोऽनंतरं खड्गिनं विक्रमभिमंत्र्य द्रव्याय उदग्वायुद्धातत स्मिन्नश्वराजा आरुह्य नीराजितः स
तनीराजनः सबलो बलसहितः उदकूपूर्वामैशानीं दिशं याया तगच्छेत। यथा प्राप्ति यथा योगं प्रतत्सर्वं यात्रां नं
इहनीराजनेऽपि चिंतनीयं॥ कथं गच्छेदित्याह॥ मृदंगशंखध्वनिहृष्टकुंजरं स्रवन्मदामोदसुगंधिमारुतं।
शिरोमणिप्रांतचलत्प्रभामयैर्बलैरुदीर्णस्वानिवतायद्रालयं॥ २३॥ इसपंक्तिभिरिव सतताधिराद्दसंपत
द्भिरिव शुक्लचामरैः। सुगंधपवनानुवासिभिर्धूयमानरुचिरध्वगंबरः॥ पाठांतरं॥ नैकवर्णमणिवज्रभू
षितैर्भूषितामुकुटकुंडलांगदैः। भूरिरत्नकिरणानुरंजितः शक्रकार्मुकरुचं समुद्वहन॥ २४॥ उत्पतद्भिरिव
खंतुरंगमैर्दारयद्भिरिवदंतिभिर्धरां। निर्जितारिभिरिवामरैः शक्रवत्परिवृतोऽभ्रजेन्नृपः॥ २५॥ नृपोरा नी॰
जानीराजितः तोयदात्यये शरदि विवस्वान आदित्यस्तद्वत्कांतिमानव्रजेत॥ तोयदा मेघाः तेषामत्य
त्ययोऽभावः तस्मिन शरदीत्यर्थः॥ कीदृशः॥ मृदंगध्वनिः मृदंगा वादित्रविशेषाः। शंखाः प्रसिद्धाः मृदं १११
गानां शंखानां यो सो ध्वनिः शब्दः तेन हृष्टाप्रमुदितायेकुंजरा हस्तिनः तेषां स्रवन्मदो गलज्जलं तस्य सोद
सौरभ्यं तेन सुगंधीकृतो मारुतो वायुस्तेन युक्तः यतः शरीरोद्दिवृकुलकगंधो मारुतो वहति। तथा शिरोमण
यश्चूडारत्नानि तेषु प्रांतमग्रं तत्र चलंतः स्फुरंतो ये प्रभा नयाः रश्मिसमूहाः तैर्ज्वलतं दीप्यमानः नैकवर्णैः

अनेकवर्णानानाविधामणयोरत्नानि॥ वज्रं हीरकं तैर्भूषिता अलंकृताये मुकुटकुंडलांगदाः तैर्भूषितोऽलंकृतः
तथा भूरिरत्नानां मणीनां ये किरणा रश्मयः तैरनुरंजितः स्फुरितः तदा शक्रकार्मुकरुचं समुद्वहन शक्रकार्मु
कस्य कांतिं नानावर्णां भाति॥ उत्पतद्भिरिवेति॥ तथा दंतिभिर्हस्तिभिर्धरां भूमिं दारयद्भिरिव॥ यतो दंततैर्भूमि
विदारयंति। नरैर्मनुष्यैर्निर्जितारिभिर्जितशत्रुभिरमरैर्देवैरिव परिवृतः अतो वाद्यकलेवर धारित्वात अतएवो
त्प्रेक्ष्यते॥ शक्रवत। इंद्रवत परिवारयुतो व्रजेत॥ तुरंगैरश्वैः खं आकाशमुत्पतद्भिरिव यथाइंद्र आकाशं गच्छ
ति॥ अन्यदप्याह॥ सवज्रमुक्ताफलभूषणोऽथवा सितस्रगुष्णीषविलेपनांबरः। धृतातपत्रो गजपृष्ठमाश्रि
तो घनोपरीतिंदुतलेऽभ्रगो मृतः॥ २६॥ अथ वेत्युक्तेन। वज्रं हीरकं वज्रसहितानि मुक्ताफलानि भूषणं यस्य। सनाथा
सितस्रकुसिता शुक्लाया स्रजो मालाः सिताश्च उष्णीषाः पटविशेषाः। सितानि चाविलेपनानि समालंभनानि सिता
नि चराणि वस्त्राणि यस्य॥ स तथाभूतः धृतातपत्रः धृतं आतपत्रं यस्य सगजपृष्ठं हस्तिपृष्ठं समाश्रितो अ
तएवोत्प्रेक्ष्यते॥ घनोपरीतिंदुतलेऽभ्रगो मृतः शुक्लो घनो पारिमेघपृष्ठं इंदुश्चंद्रस्य तले अधोविभागे स्थित
इव मेघसंस्थानीयो गजाः छत्रं चंद्रसंस्थानीयं शुक्लसंस्थानीयो नृपः॥ अथ सैन्यचेष्टितमाह॥ संप्रहृष्ट
वाजिकुंजरं निर्मलप्रहरणांशुभासुरं॥ निर्विकारमरिपक्षभीषणं यस्य सैन्यमचिरात सगां जयेत॥ २७॥ यस्य
राज्ञः ईदृशं सैन्यं स राजा अचिरात शीघ्रमेव गां भूमिं जयेत॥ कीदृशं। संप्रहृष्टनरवाजिकुंजरं॥ संप्रहृष्टाः प्रमु
दिताः नरा मनुष्याः वाजिनोऽश्वाः कुंजरा हस्तिनो यत्र॥ पुनः कीदृशं निर्मलानामुज्ज्वलानां प्रहरणानां ख
ड्गादीनां अंशवो रश्मयः तैर्भासुरं दीप्यमानं निर्विकारं विकाररहितं निरुत्पातमित्यर्थः॥ अरिपक्षभी
षणं शत्रुपक्षभयानकं॥ ॥ इति श्रीभट्टोत्पलकृतायां बृहत्संहितावृतौ नीराजनविधिर्नाम चतुश्च
त्वारिंशोऽध्यायः॥ ४४॥ ॥ ९॥ ॥ अथ खंजनाध्यायो व्याख्यायते॥ तत्रादावेवागमप्रदर्शनार्थमाह
॥ ॥ खंजनकोनामाय्यं योविहगस्तस्य दर्शने प्रथमे॥ प्रोक्तानि यानि मुनिभिः फलानि तानि प्रवक्ष्यामि॥ १॥ ॥
अयं खंजनकोनामपक्षी तस्य दर्शने आदौ वर्षे यस्मिन्दिवसे दृश्यते। तत्र मुनिभिर्गर्गादिभिः फलानि प्रोक्तानि

ब॰सं॰ कथितानितानिप्रवक्ष्यामि॥ आचपापूर्वंमासादिषु खंजनोनदृश्यतेइतिस्थितिः। अतएकंग्रंथेप्रथममुक्तं। तत्रतान्य
नचेतारः खंजनकाभवंति। तेषांनामानिफलंचाह॥ ॥ स्थूलोऽभ्युन्नतकंठः कृष्णगलोभद्रकारकोभद्रः॥ आकंठ
मुखंकृष्णः संपूर्णः पूरयत्याशां॥२॥ कृष्णोगलेऽस्यबिंदुः सितकरटांतः सरिक्तःख्यातः। पीतोगोपीतइतिक्लेशकृ
१७२ त्। खंजनोदृष्टः॥३॥ स्थूलोऽभ्युन्नतकंठइति। यः खंजनः स्थूलोबृहत्कायः अभ्युन्नतकंठः उच्चग्रीवः। कृष्णग
लोऽसितकंठः सभद्रोनामविहगः भद्राख्यः पक्षी सचदृष्टोभद्रकारकः। भद्रंश्रेयः करोति। भद्रः संपूर्णोनाम
कार्यं। गोतइत्येवान्वर्थसंज्ञा॥ आकंठमुखात् कृष्णः मुखात्प्रभृतिआकंठंगलंयावत् कृष्णोऽसितवर्णः ससं
पूर्णोनामाशांइच्छांपूरयतिपरिपूर्णांकरोति॥ कृष्णोगलेऽस्यबिंदुरिति॥ ॥ अस्यविहगस्यगलेकंठेकृष्णोऽसि
तोबिंदुस्तिलकः तथासितकरटांतः शुक्लकपोलः सचारिक्तसंज्ञः सचरिक्तत्वाद्रिक्तंफलमन्यंसर्वंकरोति॥ यःपी
तः पीतवर्णः सचगोपीतइतिगोपीतनामा सखंजनकोदृष्टः क्लेशकरः क्लेशंकरोति॥ तथाचकाश्यपः॥ स्थू
लोऽभ्युन्नतकंठोभद्रः कृष्णगलःस्मृतः॥ कृष्णोमूर्धगलांतयोः संपूर्णइतिस्मृतः॥ करटांतोऽसितोयस्यकृ
ष्णाबिंदुर्गलेतथा॥ सरिक्तइतिनिर्दिष्टः पीतोगोपीतकस्तथा॥ नामानुरूपेणफलंविहगानांविनिर्दिशेत्॥
अथकस्मिन्स्थानेदृष्टःकीदृक्फलंकरोतीत्याह॥ ॥ मधुरफलकुसुमतरुषुसलिलाशयेषुपुण्येषु॥ क
रितुरगभुजगमूर्धप्रासादोद्यानहर्म्येषु॥ गोगोष्ठसत्समागमयज्ञोत्सवपार्थिवद्विजसमीपे॥ हस्तितुरगशाला
छत्रध्वजचामराद्येषु॥ हेमसमीपांबरकमलोत्पलपूजितोपलिप्तेषु॥ दधिपात्रधान्यकूटेषुचश्रियंखंजनः
कुरुते॥ अथैतेषुस्थानेषुदृष्टःखंजनकः श्रियंलक्ष्मींकरोति॥ कीदृशेषु॥ मधुराणिसुरभीणिफलानि
कुसुमानिपुष्पाणि। येषुतरुषुवृक्षेषु तथापुण्येषुपावनेषुसलिलाशयेषुजलाधारेषु। तथाकरिणांहस्तिनां
तुरगाणामश्वानां भुजगानांसर्पाणां मूर्धसुमस्तकेषु तथाप्रासादेषुदेवगृहेषु उद्यानेषुउपवनेषुहर्म्येषुधवलगृहेषु। १७२.
तथागोरूपासुगोषुगोष्ठेषुगवांस्थानेषु सतांसाधूनांयत्रसमागमः यज्ञोयागः उत्सवोविवाहादिः पार्थिवोराजाद्विजो
ब्राह्मणः एषांसमीपेसंनिधौ हस्तिशालासुतुरंगशालासु अश्वशालासुछत्रमातपत्रंध्वजंप्रसि

द्धंचामरंबालव्यजनं आदिग्रहणात्भृंगारकुंभतालवृंतादयः। एतेष्वपितथादिसमसमीपेसुवर्णसमीपेऽसितां
बरंश्वेतवस्त्रंकमलंपद्मंउत्पलंनीलोत्पलं पूजितेष्वर्चितेषु उपलिप्तेषुसंस्कृतेषुस्थानेषु दधिपात्रेदधिपूर्ण
भाजने धान्यकूटेधान्यराशौ एतेष्वपि॥ अन्यदप्याह॥ पंकेस्वाद्वन्नाप्तिर्गोरसंगोमयेचगोरसोपगते॥
शाद्वलगेवस्त्राप्तिः शकटस्थेदेशविभ्रंशः॥ गृहपटलेऽर्थभ्रंशोवध्रेबंधोऽशुचौभवतिरोगः॥ पृष्ठेऽजावि
कानांप्रियसंगममावहत्याशु॥ पंकइति। पंकः कर्दमः तत्रस्थेखंजनकेस्वाद्वन्नाप्तिर्मिष्टभोजनलाभः। तथा
गोमयेगोपगतेगोमयनिचयस्थे गोरससंपन्नदधिबाहुल्यं॥ शाद्वलगेदूर्वास्थेवस्त्रादिअंबरलाभः। तथाशकटस्थे
देशात्स्वविभ्रंशोनाशः। गृहपटलइति गृहपटलेगृहाच्छादनेअर्थस्यभ्रंशोनाशः। वध्रेचर्ममयबंधेबंधनंभयं
वा अशुचिस्थानेरोगोभवति। अन्यच्चाह॥ पृष्ठइति। अविःप्रसिद्धः। अजाविकानांपृष्ठेउपरिआशुक्षिप्रमेवप्रिय
संगमंवल्लभसंयोगमावहतिकरोति॥ अन्यदप्याह॥ महिषोष्ट्रगर्दभास्थिश्मशानगृहकोणशर्करादिस्थः॥ प्रा
कारभस्मकेशेषुचाशुभोमरणरुग्भयदः॥ एतेषुस्थानेषुखंजनकोदृष्टः सचाशुभः प्राकृतलक्षणेनयदिभव
ति। तदामरणरुग्भयदः मरणंभयंरुग्भयंददाति॥ केषुस्थानेषु। महिषउष्ट्रकरभगर्दभखरेषु अस्थिष्वस्थि॥ श्म
शानेगृहकोणेवेश्माग्रे शर्करेष्मसंदे(?)॥ अट्टप्राकारभित्तौभस्मनिकेशेषुएतेषुस्थानेषु॥ अन्यदप्याह॥ पक्षौ
धुन्वन्नशुभः शुभःपिबन्वारिनिम्नगासंस्थः॥ सूर्योदयेप्रशस्तोनेष्टफलःखंजनोऽस्तमये॥ पक्षौगरुतौ
धुन्वन्कंपयन्नशुभः अनिष्टफलदः। निम्नगानदीतत्रस्थोवारिजलंपिबन्शुभः इष्टफलः। सूर्योदयकालेखं
जनकः प्रशस्तःशुभफलदः। सूर्यास्तमयेनेष्टफलोऽशुभइति॥ अन्यदप्याह॥ नीराजनेनिवृत्तेययादिशा
खंजनंनृपोयांतं। पश्येत्तयागतस्याशुक्षिप्रमरातिर्वशमुपैति॥ निवृत्तेपरिसमाप्तेनीराजनेनृपोराजाययादि
शाखंजनंयांतंपश्येदवलोकयेत्। तयादिशागतस्यराज्ञः अरातिःशत्रुःक्षिप्रमाशुवशमुपैतिवशगोभव
ति॥ अथप्रत्ययदर्शनार्थमाह॥ तस्मिन्निधिर्भवतिमैथुनमेतियस्मिन्यस्मिंस्तुछर्दयतितत्रतलेऽस्तिकाच
ः। अंगारमप्युपदिशतिपुरीषणेऽस्यतत्कौतुकापनयनायखनेद्धरित्रीं॥ ॥यस्मिन्स्थानेमैथुनमेति

बृ॰ सं॰ उपि नवतक्रेभ सोनिधिर्निधानं भवति। यस्मिन्नुच्छर्दयति वमति तत्र तले काचं अस्थि विद्यते अस्य खंजनस्य पुरीष
णादिविष्ठाकरणे अंगारमपि उपदिशंति मुनयः कश्यपादयः॥ तथा च कश्यपः। मैथुनं कुरुते यत्र तत्राधो निधिमा
१२३ दिशेत। भुक्तं छर्दयते तत्र तत्र काचं विनिर्दिशेत॥ पुरीषं कुरुते यत्र तत्रांगारं विनिर्दिशेत॥ नतकौतुकापनयना
य कुर्यात् दृष्टस्यापनयनाय आपगामास्य धात्री भूमिरवनितले॥ येन प्रत्ययस्तस्य यत्र इति॥ अन्यत् शुभाशुभमाह॥
स्तविकलविभिन्नगात्रितः स्वतनुसमानफलप्रदः खगः॥ धनरुद्धभिनिलीयमानकायः यतिचर्वधकसमागमप्रदः॥
खगः पक्षी खंजनकः मृतविकलः विभिन्नगात्रितः स्वतनुसमानं स्वशरीरतुल्यं फलं प्रददाति॥ तद्यथा॥ मृतो यदि दृश्य
ते तदा मरणमेव ददाति दृष्टः विकलांगः वैकल्यं विभिन्नं शरीरभेदनं गात्रिणः संजातरोगो रोगमेव ददाति॥ धनरुद्धमभि
निलीयमानक इति। अभिमुखमनिलीयमानकः आलयं प्रविशन धनरुत्॥ विद्यमानको रुदीयमानाद्यं धकसमा
गमं बंधुभिः सह संयोगं ददाति॥ अथ शुभस्थाने दृष्टविधानमाह॥ ॥नृपतिरपि शुभं शुभे प्रदेशे खगमवलोक्य
महीतले विदध्यात। सुरभिकुसुमधूपयुक्तमर्घं शुभमभिनन्दितमेवमेति वृद्धिं॥ नृपती राजा शुभे प्रदेशे शुभप्रश
स्तलक्षणं खलोक्य दृष्ट्वा महीतले भूपृष्ठे सुरभिकुसुमधूपयुक्तमर्घं सुरभीणि कुसुमानि पुष्पाणि तथा सुगंधा
ये धूपा तैः संयुक्तमर्घं विदध्यात् अर्पयेत॥ एवमनेन प्रकारेण शुभफलमभिनन्दितं संमतं वृद्धिमेति वृद्धिं गच्छति॥
अथाशुभखंजने दृष्टविधानमाह॥ अशुभमपि विलोक्य खंजनं द्विजगुरुसाधुसुरार्चने रतः। न नृपतिरशुभं
समाप्नुयात न यदि च सप्तदिनानि मांसभुक॥ नृपती राजा अशुभमप्यनिष्टमपि खंजनं विलोक्य दृष्ट्वा यदि द्विजा
नां ब्राह्मणानां गुरूणां सुराणां देवानां साधूनां सज्जनानां अर्चने पूजने रतः सक्तो भवति। तदा अनिष्टफलं नाप्नु
यात शुभं प्राप्नोति॥ यदि च सप्तदिनानि सप्ताहं मांसभुक न भवति मांसं यदि न भुंक्ते॥ अथ कालफलप्रदर्शनार्थ
माह॥ ॥अब्दं वर्षात प्रथमे दर्शने फलं प्रतिदिनं तु दिनशेषात॥ दिक्स्थानमूर्तिलग्नर्क्षशांतदीप्तादिभिश्चोह्यं॥ प्रथमं १२३
खंजनस्य दर्शने आशाविवतस्मिन्नब्दे निश्चयते तत्र यत फलं शुभमशुभं वा तदा वर्षाद्वर्षे यावत वर्षमध्ये भवति। यत्
र्थः। प्रतिदिनं तु यद्दर्शने फलं तत् दिनशेषात तस्मिन्नेव दिने मध्ये भवति। यदर्थः। तथा च कश्यपः॥ प्रथमे दर्शने पाकमा

वर्षात प्रथमात भवेत। प्रतिदिवसिके चान्यं दर्शने स्वसमये फलमिति॥ फलं दिक्स्थानमूर्तिलग्नर्क्षशांतदीप्तादिभिश्चोह्यं
॥ दिक् यस्यां दिशि स्थितः शुभायामशुभायां वा॥ तत्र पूर्वोत्तराः शान्त्यः स्वभावादेव शुभाः शेषा अशुभाः। स्थानं यत्र
स्थितः। अथमधरसुरभिरित्याद्युक्तं प्रदर्शितं॥ मूर्तिः शरीराकारः पुष्टोऽभ्युन्नतकं इत्यादि मृतविकलविभिन्नइ
ति च॥ लग्नं तत्कालिको होरा शुभराशिरशुभग्रहयुतं दृष्टं वा॥ पापलग्नं पापयुतमवलोकितं वा॥ नक्षत्रं नक्षत्रं ध्रुव
मृदुदारुणक्षिप्रचरसाधारणादि॥ तत्र च ध्रुवाणि मृदूनि च शस्तानि॥ क्षिप्रचरसाधारणानि मध्यानि उग्रा
ण्यशोभनानीति॥ तत्र शांतदीप्तादिभिः स्वपक्षिकं शाता यां दिशि स्थितः शांतस्वरश्च॥ दीप्तादीप्तायां दीप्तस्वर
श्च॥ आदिग्रहणात् अंगारादिनाभिधूमितान्याद्यः कल्प्या॥ एवमादिभिः शुभमशुभं व्यामिश्रं वा फलं सम्यग्बुध्वा
न्वेषणीयं॥ एतदाचार्यः सविस्तरं शाकुने वक्ष्यति। वयमपि सविस्तरं तत्रैव व्याख्यास्यामः॥ ॥इति श्रीभ
ट्टोत्पलविरचितायां खंजनलक्षणं नाम पंचचत्वारिंशः॥ ४५ ॥ ॥ॐ॥
अथ उत्पाताध्यायो व्याख्यायते॥ तत्रादावेवागमवस्तुप्रदर्शनार्थमाह॥ यानत्रिरुत्पातान् गर्गः प्रोवाच तानहं
वक्ष्ये॥ तेषां संक्षेपोऽयं प्रकृतेरन्यत्वमुत्पातः॥ १॥ अत्रिर्मुनेर्यानुत्पातान् अद्भुतान् गर्गः प्रोवाच उक्तवान् तानहं वक्ष्ये
कथयिष्ये तेषामुत्पातानामयं संक्षेपः समासः प्रकृतेरन्यत्वमुत्पात इति॥ प्रकृतेः स्वभावादन्यत्वं विपरीत्यं स एवो
त्पात इति। अथान्यच्च समाससंहितायां॥ यः प्रकृतेरन्यत्वमुत्पात इति॥ यः प्रकृतिविपर्यासः सर्वसंक्षेपतः स उत्पा
तः क्षितिगगनदिव्यजन्यो यथोत्तरं गुरुतरो भवति॥ कथमुत्पात उत्पद्यत इत्याह॥ अपचारेण नराणामुपसर्ग
ः पापसंचयाद्भवति॥ संसूचयंति दिव्यांतरिक्षभौमास्तमुत्पाताः॥ २॥ नराणां पुरुषाणां अपचारेण अविनयेन
पापसंचयो भवति॥ पापसंचयात उपसर्गः उपद्रवः। तथा च गर्गः॥ अतिलोभात् असत्याद्वा नास्तिक्याद्वाप्य
धर्मतः। नरापचारान्नियतमुपसर्गः प्रवर्तत इति॥ ततो दिव्यांतरिक्षभौमा उत्पातास्तमुपसर्गं संसूचयंति क
थयंति॥ दिवि आकाशे भवा दिव्याः॥ अंतरिक्षभवा आंतरिक्षाः॥ भूमौ भवा भौमाः इति॥ कथमुत्पाता उत
पद्यंत इत्याह॥ मनुजानामपचारादपरक्ता देवताः सृजंत्येतान् तत्प्रतिघाताय नृपः शांतिं राष्ट्रे प्रयुंजीत॥३

न॰सं॰ मनुष्याणांनगराणांअपचाराद्दुनयमानाः॥ देवताःमृगाः अपरा॥णिचिरकालाएतानुत्पातानसृजंतिउत्पादयंति॥ तस्मात्तेषा
तायेतेषामुत्पातानांक्रियाउपायाः।पशान्ताः शांतिप्रपदेशांतिमुत्पातप्रतीकारं प्रयुंजीत प्रायश्चित्तमिति॥ तथा च गर्गः॥
ततोपचारान्मर्त्यानामपरज्यंति देवताः॥ ते सृजंत्यद्भुतानभावाद्दिव्यभौमांतरिक्षजान्॥ तएव सर्वलोकानामुत
१७४ पातान्देवनिर्मिताः॥ विचरंतिविनाशाय रूपैःसंबोधयंति च॥ तानग्राम्यांतनिगमाद्याः पश्यंतिजानन्ति च॥ प्रच
इति तु मर्त्यपदिष्टार्थं शुद्ध्यान्विताः॥ तेषु संबोधितार्थं प्रशांतयो मंगलानि च॥ श्रद्दधानाः प्रकुर्वंति न ते यांति प
राभवं॥ ये तु न प्रतिकुर्वंति क्रियासामर्थ्यक्षयान्विताः॥ नास्तिक्याद्दर्पात्कोपाद्विनश्यंति न ते चिरात्॥ अधुना दिव्या
न्तरिक्षभौमानामुत्पातानां प्रविभागमाह॥ ॥ द्रिव्यं ग्रहर्क्षवैकृतमुल्कानिर्घातपवनपरिवेषाः॥ गंधर्वपुरपुरं
दरचापादि यदांतरिक्षं तत्॥४॥ भौमं चरस्थिरभवं तच्छांतिभिराहितं शममुपैति॥ नाभसमुपैति मृदुतां क्षिति
हातिव्यमुत्पातान्॥ ततोल्कानिर्घातपवनो विकृतो वायुः॥ परिवेषश्चंद्रसूर्ययोः॥ गंधर्वपुरं गंधर्वनगरं पुरंदर
चापमिंद्रधनुः आदिग्रहणात् रोहितेरावतदंडपरिघादग्रहणं॥ एवमादि यत् तदांतरिक्षमुत्पातं॥ भौमं चरस्थिर
भवमिति॥ चराणां चरतां स्थिराणां चरतां तदुत्पन्नं यत्तद्भौममुत्पातं॥ तथा च गर्गः॥ स्वर्भानुः केतुनक्ष
त्रग्रहताराकं चंद्रजं॥ दिवनोत्पद्यते यच्च तद्दिव्यमिति कीर्तितं॥ वाय्वभ्रसंध्यादिग्दाहपरिवेषतमांसि च॥ ख
पुरं चेंद्रचापं च तद्विद्यादंतरिक्षजं॥ भूमावुत्पद्यते यच्च स्थावरं वाथ जंगमं॥ तदेकदेशजं भौमंमुत्पातं परिकीर्तितं॥
तथा च समासंहितायां॥ दिव्यग्रहर्क्षजातं भुवि भौमं स्थिरचरोद्भवं यच्च॥ दिग्दाहोल्कापतनं पारिवेषाद्यंवि
तप्रभवमिति॥ तच्छांतिभिराहतं शममुपैति॥ यच्च भौममुत्पातं भौमंचरस्थिरं तच्छांतिभिः प्रशमं याति॥ नाभसमंतरिक्षं
शांतिभिराहतं मृदुतामुपगच्छति॥ दिव्यं शांतिभिराहतं न शमं प्रति शांतिं नयति तथ्यमेकं वदंति॥ कथयंति॥ तथा
च कश्यपः॥ भौमं शांतिहतं नाशमुपगच्छति मारिषं॥ नाभसं न शमं याति दिव्यमुत्पातदर्शनमिति॥ समतमाह १७५
दिव्यमपि शममुपैति प्रभूतकनककाञ्चनगोमहीदानैः॥ रुद्रायतनेभूमौ गोदोहात कोटिहोमाच्च॥५॥ अपिश
ब्दः संभावनायां॥ प्रभूतकनककाञ्चनगोमहीदानैर्दिव्यमपि शममुपैति॥ कनकं सुवर्णं॥ अन्नं भोज्यं॥ गावः

महोक्षाः॥ एवं प्रभूतैः बहुभिर्दानैः दिव्यमपि उत्पातं शममुपैति॥ अपि ग्रहणात् नाभसं भौमं च॥ न श्यन्रुद्रायतनेनाश
यात् कश्यप भूमौ भूविशोद्भवान्न गवां दोहनात् कोटिहोमाच्च दिव्यमपि शममुपैति॥ दैवमुत्पातं नृपतेः कति विधं पापं
पाकमायांतीत्यर्थः॥ आत्मसुतकोशवाहनपुरदारपुरोहितेषु लोके च॥ पाकमुपयाति दैवं परिकल्पितमष्टध
मान् नृपतेः॥ दैवमुत्पातं नृपतेः स्वतः ऽभ्यधाप परिकल्पितमष्टभिः प्रकारैः पाकमुपयाति फलं ददाति॥ तद्यथा॥
आत्मनि स्वयमेव पुत्रे कोशे भांडागारे वाहने धुरवाहे पुरे नगरे दारेषु भार्यासु पुरोहिते आचार्ये। एतेषु लोके
कृष्णजनपदे॥ एवमष्टप्रकारं॥ तथा च गर्गः॥ पुरेजनपदे कोशेवाहने च पुरोहिते॥ पुत्रेष्वात्मनि भृत्येषु प
तत्येतदेवमष्टधा॥ इति॥ अथोत्पातं दर्शयितुमाह॥ ॥ अनिमित्तभंगचलनस्वेदाश्रुनिपातजल्पनाद्यानि॥
लिंगार्चायतनानां नाशाय नरेशदेशानां॥ ॥ लिंगं महादेवः। अर्चा प्रतिमा आयतनं देवनिर्मितं पुण्यस्थानं एषां लि
गार्चायतनानां अनिमित्तं विना कारणं भंगः स्फोटनं चलनं कंपनं स्वेदः प्रस्वेदः अश्रुरोदनं निपातः पतनं जल्पनं सं
भाषणं आदिग्रहणात् हसनं प्रसर्पणं च॥ तथा च गर्गः॥ देवतार्चाः प्रनृत्यंति वेपंते प्रज्वलंति च॥ मुंचन्त्यंम्
निरोदंति प्रस्विद्यंति हसंति वा॥ उत्तिष्ठंति निषीदंति प्रधावंति पिबंति वा॥ वमंत्यग्निं तथा धूमं स्नेहं रक्तं पयो
जलं॥ निःश्वसंति च जृंभंते विचेष्टंते श्वसंति वा॥ समंताद्यत्र दृश्यंते गात्रेषु विपरिवर्तिताः॥ एतानि सर्वाणि यथा
कालेन नरेश देशानां नरेशस्य राज्ञो देशस्य विनाशाय भवंति॥ अन्यदप्याह॥ दैवतयात्रा शकटाक्षचक्रयुगक
तुभगपतनानि। समपर्यासनसादनसंगाश्च न देशनृपशुभदाः॥ दैवतयात्रायां देवतोत्सवे अक्षस्याक्षस्य
चक्रयुगस्य चक्रकेतोर्ध्वजस्य॥ एषां भगः स्फोटनं पतनं चाएतानि तथैतेषां च समपर्यासनं परिवर्तनं सादनं।
सज्जनं संग आसक्तिः यत्र कुत्रचित। एते सर्व एव न देशनृपशुभदाः देशस्य जनपदस्य च राज्ञोऽशुभप्रदा इति
॥ ॥ अधुना प्रतीकारं दर्शयितुमाह॥ ॥ ऋषिधर्मपितृब्रह्मप्रोद्भूतं वैकृतं द्विजातीनां
॥ यद्रुद्रलोकपालोद्भवं पशूनामनिष्टं तत्॥ गुरुसितशनैश्चरोत्थं परोधसां विष्णुजं च लोकानां॥ स्कंदविशा
खसमुत्थं मांडलिकानां नरेंद्राणां॥ वेदव्यासमंत्रिणां विनायकं चैव भूतं चमूनाथे॥ धातरि सविश्वकर्मणि॥

-रोकाभावायानिर्दिष्टं॥ देवकुमारकुमारीवनिताप्रेष्यवर्गे कृतं यत्स्यात्। तं नरपतेः कुमारकुमारस्त्रीपरिजनानां
॥ रक्षःपिशाचगुह्यकनागानामेतद्वेनिर्दिष्टं॥ मांसैश्च पष्टाभिः सर्वेषामेव फलवान्॥ ॥ अथ पित्र्यमपि
अस्ति॥ क्रूरयोगनयः। धर्मादिव्यविशेषः पितरः प्रमिताः। मृतजनालयमयाः। कुत्रचिन्नविर्यते॥ अल्पापिता
महः। एतेषु यत्राद्भुतं उत्पन्नं विकृतं विकारस्तद्विजातीनां ब्राह्मणानामनिष्टमरुणमप्रदेयचरद्रव्यशान्त्यर्थं
तं। कृपालानामिन्द्रादीनां यद्विकृतं तद्दृष्टं तत्पदस्थानां तु पदानां अनिष्टमशुभं गुरुसितशनैश्चरस्थमिति॥
गुरुर्जीवः सितः शुक्रः शनैश्चरः तद्दृष्टं तन्मं भवमनिष्टपुरोधसां पुरोहितानां॥ विश्वकर्मा दूरिसंभृतं विकृतं लोका
नां जनानां। स्कंदः कुमारः विशाखोऽस्य विशेषः। तत्र मृष्टं तद्भूतं मांडलिकानां मंडलेश्वराणां राज्ञां अनिष्टं॥
वेदव्यासइति। व्यासे यद्विकृतं तन्मंत्रिणामनिष्टं आनिष्टं॥ विनायकगणेशे यद्विकृतं तत् चमूनाथः सेनापतय
निष्टं। धातरि प्रजापतौ सविश्वकर्मणि विश्वकर्मसाङ्गिते यद्विकृतं तत् लोकानां जनानामभावाय निर्दिष्टं कथि
तं॥ देवकुमारकुमारीति। देवकुमाराणां यद्विकृतं तन्नरपतेः कुमाराणामनिष्टं एवं कुमारीणामपि। देववनि
तानां सुरस्त्रीणां यद्विकृतं तद्राजस्त्रीणामनिष्टं। देवप्रेष्याणां देवदासानां यद्विकृतं तद्राजदासानामनिष्टमि
ति। रक्षःपिशाचेति। रक्षोराक्षसः पिशाचादेवयोनयः। गुह्यकायक्षाः। नागाः सर्पाः। एषां विकृतं एवमनेन
प्रकारेणानिष्टं कथितं॥ एतदुक्तं भवति। रक्षःपिशाचगुह्यकनागानां यत्कुमारकुमारीवनिताप्रेष्यास्तेषु यद्वि
कृतं तन्नरपतेः कुमारकुमारीवनिताप्रेष्याणामनिष्टं॥ एषामुत्पातानां सर्वेषामष्टाभिर्मासैः फलैः फ
लपाकः। अथ तेषामुत्पातानां शांतिमाह॥ वृक्षादेवविकारेषु चिः पुरोधास्त्र्यहोषितः स्नातः। स्नानकुसुमा
नुलेपनवस्त्ररभ्यर्चयेत प्रतिमां॥ मधुपर्केण पुरोधाभक्ष्यैर्वलिभिश्चाविधिवदुपतिष्ठेत। स्थालीपाकं जु
हुयात् विधिवन्मंत्रैश्च तल्लिंगैः॥ वृक्षादेवविकारेति॥ देवविकारे सति कृते वृक्षादात्वा पुरोधाः पुरोहि
तः शुचिः शौचयुतः समाहितः संयतः स्नातश्च कृत ध्यानश्च त्र्यहोषितश्च त्रिदिनचर्यं कृतोपवासः स्नानैः कु
सुमैश्च पुष्पैरनुलेपनैः समालंभनैर्वस्त्रैरंवरैः प्रतिमां पूजनाविकारामभ्यर्चयेत॥ मधुपर्केणापुरोधाः

पुरोहितामधुपर्केण दधि भक्ष्यैर्मोदकैः लोपिकापूपादिभिर्वलिभिरुपहारैश्च विधिवत्तविधानेनोपतिष्ठेत। स्थाली
पाकं चरं तल्लिंगेस्तद्दैवैर्मंत्रैर्विधिवद्विधानेनाग्नौ जुहुयात्॥ अथ कालप्रमाणं शांतिप्रभावं चाह॥ ॥इ
तिविबुधविकारे शांतयः सप्तरात्रं द्विजविबुधगणानर्चितास्त्यांत्रमंत्रैश्च। विधिवद्देवनिपातिर्येः प्रयुक्ता जनत्वा
भयति दुरितपाको दक्षिणाभिश्च रुद्धः॥ ॥इतिविबुधविकारेइति॥ इत्यनेन विधानेन विबुधविकारे सप्तरात्रं
सप्तरात्रं समाद्दं शांतिकर्तव्याः द्विजानां ब्राह्मणानां विबुधानां देवानां गणानां गणेश प्रभृतीनामर्चापूजा
न थाग्नौ तत्तत्प्रमुख्यानां च गात्रिनामारं नानाविर्ये। एतैर्यैर्वानिवाकेराद्याभिर्विधिवत सम्यक् विधानेन प्रयुक्ताः का
रिताः तेषां राज्ञां दुरितपाकदुत्पातानि फलं न भवति॥ ॥अथान्यानुत्पातानाह॥ राष्ट्रे यस्यानग्निः प्रदीप्यते
चनेधनवान मनुजेश्वरस्य पीडा तस्य च राष्ट्रस्यावर्तिया यस्य मनुजेंद्रस्य राष्ट्रेजनपदे अनग्निः प्रदीप्यते
अग्निनाविनाज्वालादृश्यते तथेंधनवान्काष्ठयुक्तोऽग्निर्नदीप्यते न ज्वलति। यन्नेन। तत्र मनुजेश्वरस्य पीडा
स्य च पीडाविलयात्तात्व्या॥ अथान्यत॥ जलमांसाद्रंज्वलनेन पतिवधः प्रहरणरणारिद्धः॥ सैन्यग्रामपुरेषु
ननाशो वन्हेर्भयं कुरुते॥ जलमुदकं मांसमामिषादि। आर्द्रमशुष्कं यातीति नित। एषांज्वलनेन पतिवधो राजो म
रणं॥ प्रहरणं आयुधरसुद्धारोज्वलिते रिपोर्घोररणः संग्रामः। सैन्ये सेनायां पुरे नगरे एतेषु वन्हेर्नाशो वन्हेर्भ
यं कुरुते। अथान्यत॥ प्रासादभवनतोरणकेत्वादिष्वनलाद्दग्धेषु। तडितावाष्णमासात् परचक्रस्यागमो
भवति॥ ॥प्रासादोदेवताकर्यं भवनं वेश्मतोरणं प्रसिद्धं केतुर्ध्वजः आदिग्रहणात कोष्ठागारकुसलाद
यः। एतेषु अनलेन विनाग्निना दग्धेषु सत्सु षण्मासात षड्भिर्मासैः परचक्रस्यान्यनृपस्यागमो भवति।
अथान्यत॥ धूमोऽनग्निसमुत्थो रजस्तमश्चाह्निजं महाभयदं॥ व्यभ्रेनिश्युडुनाशो दर्शनमपि चाह्निदोष
करं॥ अनग्निसमुत्थो धूमः विनाग्निना यत्र धूमो दृश्यते॥ तथाह्निजं दिनसंभवं रजो धूलिस्तमोऽन्धकारं
श्च तन्महाभयं ददाति। तथा च गर्गः। अनिशानितमांसि स्युर्यो दिवा पांसवो दिवा॥ धूमश्चानग्निजो य
त्र तत्रापि घोरमादिशेत्॥ व्यभ्रेनिशिउडुनाशः। निशि रात्रौ विगताभ्रेन क्षत्राणां विनाशोऽदर्शनं। तथा

दिवसेनक्षत्राणामेव दर्शनं तन्महद्भयं ददाति॥ अथान्यत्। नगरचतुष्पादअण्डजमनुजानां भयकृज्ज्वलनमाह। धू
बृ॰सं॰ माग्निविस्फुलिंगैः शय्याम्बरकेशजैर्मृत्युः॥ ॥नगराणां पुराणां चतुष्पादानां गवादीनां अण्डजानां पक्षिणां म
नुजानां मनुष्याणां ज्वलनं महज्ज्वलनं महद्भयंकरमित्याह। उत्तरेणान्वयः। शय्या आस्तरणं अम्बरं वस्त्रं।
२.१६ केशा मूर्धजाः। शय्याम्बरकेशजैर्धूमाग्निविस्फुलिंगैः। धूमः प्रसिद्धः। अग्निर्ज्वालारूपः। विस्फुलिंगा अ
ग्निकणाः एतैर्दृष्टैः तत्स्वामिनो मृत्युर्भवति॥ तथा च गर्गः। शयनासनयानेषु केशप्रावरणेषु च॥ दृश्य
ते विस्फुलिंगा वा स्वामिनो मरणाय तत्॥ अथान्यत्॥ आयुधज्वलनसर्पणस्वनाः कोशनिर्गमनवेपनानि
च। वैकृतानि यदि वायुधपराण्याशु रौद्ररणसंकुलं वदेत्॥ आयुधानां ज्वलनं खड्गादीनां तथा सर्पणं गम
नं स्वनः शब्दः कोशः परिवारः तस्मान्निर्गमनं निःसरणं वेपनं कंपनं॥ एतानि सर्वाणि भवंति। अथवा आयु
धपराण्यनानि वैकृतानि विकाराणि ज्वलितरुदितहसितानि॥ तदा अभ्युत्थितमर्भस्यं रौद्रसंकुलं वदेत्॥ युद्धं
निकटवर्ति ब्रूयात्। ननु तत्कर्मासाह्ययतेनैव प्रतिबंधः प्रहरणरणे॥ रौद्र इत्यस्य निर्देशस्यायुधज्वलनसर्प
णस्वनाः कोशनिर्गमनवेपनानि च॥ वैकृतानि यदि वायुधपराण्याशु रौद्ररणसंकुलं वदेदित्यस्य किं चिह्न
मित्युदयांति॥ यथा प्रहरणज्वलने फलमुक्तं तदेवायुधज्वलनेन च प्रहरणानामायुधानां च भेदो राति॥ तत्र
च्यते॥ नग्नाद्वितीयचत्रलक्षणे आयुधानां त्रयो भेदा अभिहिताः। प्रहरणानि पाणिमुक्तानि यंत्रमुक्तानि च
ति॥ तत्र प्रहरणानि खड्गादीनि पाणिमुक्तानि चक्रादीनि यंत्रमुक्तानि अश्मस्त्रमतास्त्रकादंबादीनि॥ येयमा
युधसंज्ञा सा सर्वव्यापिनी॥ यस्मादायुधानामिति प्रहरणाद्यो भेदा यथायुधनिर्देशेन प्राक्फलमभिधा
यपश्चात्प्रहरणनिर्देशेन तदेव फलं निर्दिशं करोति तत्सामान्यार्थत्वात् विभक्तिदोषः स्यात् यत्र पुनः प्राक्प्रह
रणानिर्देशेन फलमुक्तं पश्चादायुधनिर्देशेन प्रहरणनिर्देशेन खड्गादीनामेव ग्रहणं स्यात्॥ न पाणिमुक्ता २१६
नामायुधभेदानामेतदाशंक्य वार्ष्येण पुनरायुधज्वलनस्य फलमुक्तं तस्मात् दूरगतं दोषो नात्राधिगंतव्य
ति॥ नत्वायुधसंज्ञा व्यापिनी तदायुधग्रहणेन प्रहरणादीनि गृह्यंते न च फलभेदोस्ति॥ तस्मात्प्र

Dr. BHAU DAJI MEMORIAL

हरणनिर्देश मतोऽवरथ्यत इत्युच्यते अयमाचार्यस्याभिप्रायो॥ यथायं पृथक्प्रहरणायुधनिर्देशाद्वयोः प्रह
रणाभेदख्यापनार्थं प्रहरणनिर्देशः कृतः॥ ॥अथ उत्पातानां शांतिमाह॥ ॥मंत्रैराग्नेयैः क्षीरवृक्षात्समिद्भिर्हो
तव्योऽग्निः सर्षपैः सर्पिषा च॥ अग्न्यादीनां वैकृते शांतये तं देयं चास्मिन्कांचनं ब्राह्मणेभ्यः॥ राष्ट्रे यस्यानल
ः प्रदीप्यत इत्यत आरभ्य ये उत्पाताः कथितास्तेषामग्न्यादीनां वैकृते विकारे आग्नेयैरग्निदैवत्यैर्मंत्रैः क्षीर
वृक्षाः स्फूर्ति सामिद्भिः सिद्धार्थैः घृतेनाग्निर्होतव्यः हवनात्... एवमनेन प्रकारेण शांतिः। अस्मिन्नुत्पाते वि
प्रेभ्यः कांचनं दक्षिणार्थं देयं॥ अथान्यानुत्पातानाह॥ ॥शाखाभंगोऽकस्मात्वृक्षाणां निर्दिष्टो रणोद्योगा
हसनादूरुदिते च व्याधिबाहुल्यं॥ ॥अकस्मात् अकारणात् वृक्षाणां शाखिनां शाखाभंगे शाखास्फो
टने रणोद्योगं संग्रामोनिर्दिष्टं वदेत्॥ अथ वृक्षाणामेव हसने देशभ्रंशो देशविनाशो रुदिते च व्याधिबाहुल्यं
रोगप्राचुर्यं॥ अन्यदप्याह॥ राष्ट्रविभेदस्त्वनृतौ बालवधोऽतीव कुसुमिते बाले॥ वृक्षात्क्षीरस्रावे सर्वद्रव्यक्ष
यो भवति॥ वृक्षाणामनृतौ पुष्पफलोद्गमे पुष्पाणां फलानां च संभवे राष्ट्रस्य विभेदो भवति॥ बाले बालवृक्षे
अतीव कुसुमिते संजातपुष्पे बालानां शिशूनां वधो मरणं॥ तथा च गर्गः। स्याद्राष्ट्रभेदं वृक्षेषु पुष्पफलमनार्तवं॥
बालानां मरणं कुर्यात्बालानां फलपुष्पिणां॥ तथा वृक्षात्क्षीरस्रावे दुग्धश्रुते सर्वद्रव्याणां क्षयो भवति॥ अन्यद
प्याह॥ मद्ये वाहननाशः संग्रामः शोणिते मधुनि रोगः। स्नेहे दुर्भिक्षभयं महद्भयं निःसृते सलिले॥ ॥वृक्षा
न्मद्ये निःसृते निर्गते वाहनानां अश्वादीनां नाशः क्षयः। शोणिते रक्ते निःसृते संग्रामो युद्धं भवति॥ मधुनि
माक्षिके निर्गते रोगो भवति॥ स्नेहे तैलादौ निःसृते दुर्भिक्षभयं भवति॥ सलिले निःसृते महद्भयं अतुलं भयं
भवति॥ अन्यदप्याह॥ शुष्कविरोहे वीर्यान्नसंक्षयः शोषणे च विरुजानां। पतितानामुत्थाने स्वयं भयं दै
वजनितं वा॥ ॥शुष्कविरोहे शुष्काणां नीरसवृक्षाणां विरोहे वीर्यान्नसंक्षयो वीर्यस्य बलस्य अन्नस्य च सं
क्षयो विनाशः॥ विरुजानां नीरुजानां च शोषणे वीर्यान्नसंक्षय एव॥ पतितानां वृक्षाणां स्वयमेवोत्थाने दैव
जनितं रोगजन्यं भयं भवति॥ चशब्दः समुच्चये। अन्यदप्याह॥ पूजितवृक्षे ह्यनृतौ नतौ कुसुमफले

रेवं धान्यनिर्दिष्टं। धूमज्वलिते ज्वालाथवा भवेत्तत्र धान्येन। पूजितवृक्षे प्रधानद्रुमे अनृतौ कुसुमफलं कुसु
मानां पुष्पाणां फलानां चोद्गमस्तस्य राज्ञो धान्यनाशाय निर्दिष्टं कथितं॥ अथ तस्मिन्वृक्षे धूमो ज्वाला वा अथवा
भवेत्। तदा नृपस्य धान्येन राजमृत्युर्भवति। अन्यदप्याह॥ सर्पन्मृतरुद्भवत्यल्पमतापितजनसंक्षयाविनि
 र्दिष्टः। वृक्षाणां वैकृत्ये दशभिर्मासैः फलविपाकः॥ तरुषु वृक्षेषु सर्पत्सु जल्पत्सु व्याहरत्सु नानालोकानां सं
क्षयो विनाशः कथितः॥ वृक्षाणां वैकृत्ये विकारे दशभिर्मासैर्गतैः फलस्य विपाको भवति॥ ॥अत्र शांति
माह॥ स्रग्गंधधूपांबरभूषितस्य छत्रं निधायोपरि पादपस्य॥ कृत्वा शिवं रुद्रजपोत्र कार्यो रुद्रेभ्य इत्ये
व षडंग होमाः॥ पायसेन च मधुनान्वभोजयेत ब्राह्मणान्घृतयुतेन भूपतिः॥ मेदिनीनिगदितात्र दक्षिणा बु
धकृतवैकृतापहार्थिभिः॥ ॥स्रग्गंधेति। पादपस्य वृक्षस्य स्रग्भिर्मालाभिः गंधैः सुगंधद्रव्यैः धू
पैर्गुग्गुलुप्रभृतिभिरंबरैर्वस्त्रैः पूजितस्यार्चितस्योपरि मूर्धनि छत्रमातपत्रं निधाय धृत्वा अत्रास्मिन्नुत्पाते
रुद्राणां जपः कार्यः। रुद्रेभ्यः स्वाहा इत्यत्र षडंग होमाः कार्याः। एवं कृतास्य शांतिर्भवति॥ पायसेनेति॥ भू
पती राजा पायसेन क्षीरेण मधुना माक्षिकेण घृतयुतेनाज्यमिश्रेण ब्राह्मणान्भोजयेत॥ अत्र वृक्षकृते वैकृ
ते मुनिभिर्मेदिनी भूर्दक्षिणा उक्ता॥ अथान्यानुत्पातानाह॥ ॥नालेब्जे यवादीनामेकस्मिन्द्वित्रिसंभवे
मरणं॥ कथयति तदधिपतीनां यमलं जातं च कुसुमफलं॥ अब्जानि पद्मानि यवाः प्रसिद्धाः। आदिग्रहणात्
गोधूमप्रियंगुधान्यानि॥ एतेषामन्यतमस्यैकस्मिन्नाले द्वित्रिसंभवे द्वाभ्यां त्रिभ्यो वा भवति। तदा तदधिपती
नां तेषां यवादीनामधिपतीनां स्वामिनां मरणं कथयति। यथा यमलं द्विगुणितं द्विपदादि वर्जमन्यकुसुमं पु
ष्पं फलं च जातं तदधिपतीनां मरणमेव कथयति॥ अन्यदप्याह॥ अतिवृद्धिः सस्यानां नानाफलकुसुमसं
भवो वृक्षे॥ भवति हि यद्येकस्मिन्परचक्रस्यागमो नियमात्॥ सस्यानामतिवा यद्यतिवृद्धिर्वृद्धत्वं। एकस्मि १७१
न्वृक्षे तरौ नानाविधानां बहुप्रकाराणां फलानां कुसुमानां पुष्पाणां च संभवः उत्पत्तिर्यदि चेत्स्यात्। तदा नि
यमान्निश्चयात् परचक्रस्यागमो भवति॥ अन्यदप्याह॥ अर्धं नियतं भवति तिलानामतैलता च

स्यात्। अन्नस्य च वैरस्यं तदानुविद्याद्भयं महदत्। तिलानामर्धं नियतं तैलं भवति यावत्प्रमाणं तैलं प्राप्तं तदर्धं
भवतीत्यर्थः॥ अथवा अतैलता तैलनाशः स्यात्भवेत्॥ अन्नस्य भोज्यस्य वैरस्यं विरसत्वं तदा तु महद्भयं विद्या
त् जानीयात्॥ ॥अथैतेषामुत्पातानां शांतिमाह॥ विकृतं कुसुमं फलं वा ग्रामादथवा पुराद्बहिः कार्यं। सौम्यः
श्चरुः कार्यो निर्वाप्यो वा पशुः शांत्यै॥ सस्ये च दृष्ट्वा विकृतिं प्रदेयं तत्क्षेत्रमेवं प्रथमं द्विजेभ्यः॥ तत्रैव मध्ये च
रुमत्र भौमं कृत्वा न दोषं समुपैति तज्ज्ञं॥ ॥वैकृतमिति विकृतं सविकारं कुसुमं पुष्पं फलं वा ग्रामात्पुरात्
नगराद्वा बहिः कार्यं गृहीत्वा बहिरुत्स्रजेत्। अत्रास्मिन्नुत्पाते सौम्यः सोमदैवत्यश्चरुः कार्यः। तथा पशुः छागः
शांत्यर्थं निर्वाप्यो देयः॥ [illegible]। सस्ये च दृष्ट्वेति॥ सस्ये विकृतं विकारं दृष्ट्वा विलोक्य तत्क्षेत्रं प्रथम
मादौ द्विजेभ्यो ब्राह्मणेभ्यः प्रदेयं॥ अत्रास्मिन्नुपसर्गे तत्क्षेत्रमध्ये भौमं भूमिदैवतं पार्थिवं चरुं कृत्वा तज्ज्ञं भूमि
देवत्यामीदोषं न समुपैति न प्राप्नोति॥ अन्यानुत्पातानाह॥ दुर्भिक्षमनावृष्ट्यामतिवृष्टौ क्षुद्भयं परभयं च॥
रोगो ह्यनृतुभवायां नृपतिवधोऽनभिजातायां॥ अनावृष्ट्या दुर्भिक्षं स्याद्भवत्येव॥ अतिवृष्ट्या अतिवर्षेण
क्षुद्भयं दुर्भिक्षभयं परभयं च भवति॥ अनृतुभवायां वर्षकालं विना अन्यस्मिन्नृतौ अतिवृष्टौ रोगो
भवति॥ अनभिजातायां विनामेघमुत्पन्नायां वृष्टौ नृपतिवधो राजमरणं भवति॥ ॥अन्यानाह॥ शीतो
ष्णविपर्यासे नो सम्यग्ऋतुषु संप्रवृत्तेषु॥ षण्मासाद्राष्ट्रभयं रोगभयं दैवजनितं च॥ ऋतुषु शिशिरादिषु
नसम्यक् प्रवृत्तेषु। शीतत्वे उष्णतायां विपर्यासोऽन्यत्वं यदा॥ उष्णकाले शीतं शीतकाले उष्णतां
षण्मासादनंतरं राष्ट्रभयं भवति। तथा दैवजनितं प्राक्कर्मणा जनितं रोगभयं भवति॥ अन्यानप्याह॥ अन्यर्तौ
सप्ताहं प्रबंधवर्षे प्रधाननृपमरणं। रक्ते शस्त्रोद्योगो मांसास्थिवसादिभिर्मरकः॥ धान्यहिरण्यवल्कफलकु
सुमाद्यैर्वर्षिते भयं विद्यात्। अंगारपांसुवर्षैर्विनाशमायाति तन्नगरं॥ ॥अन्यर्ताविति॥ वर्षाकालं
विना अन्यस्मिन्नृतौ सप्ताहं सप्तदिनानि प्रबंधवर्षप्रभूतायां वृष्टौ प्रधानस्य नृपस्य राज्ञो मरणं भवति॥
रक्तवृष्ट्या शस्त्रोद्योगः संग्रामो भवति॥ मांसास्थिवसादिभिः मांसमामिषं॥ अस्थि प्रसिद्धं वसा मज्जा आ

दिग्रहणात् घृततैलं। एतैर्वर्षैर्मरकोद्भवमरणं भयाति॥ धान्यं हिरण्यं॥ धान्यं शालयः। हिरण्यं सुवर्णादि। वल्क
बृ॰सं॰ वृक्षसंभवं वल्कलं॥ कुसुमं पुष्पं आदिग्रहणात् पर्णानि। एतैर्वा वर्षैर्भयं विद्यात् ज्ञानी यांति॥ तथा यत्र वर्षे
पांसुवर्षं तत्र नगरं यत्र वर्षति तद्विनाशं प्राप्नोति॥ ॥अन्यानाह॥ उपलाविना जलधरैर्विकृता प्राणिनो यदा
१७८ दृष्टाः। छिद्रं चाप्यतिवृष्टिः सस्यानामीतिसंजननं॥ जलधरैर्मेघैर्विनाउपलाः करका दृष्टाः॥ अथवा विकृताः
सविकाराः प्राणिनः खरोष्ट्राः समाता रादृष्टाः। अतिवृष्टिर्वा छिद्रं मध्ये कुत्रचिद्वृष्टिः। तत्र सस्यानामीतिसं
जननं उपद्रवोत्पादनं॥ अन्यानप्याह॥ यद्यमलेर्कच्छाया न दृश्यते दृश्यते प्रतीपा वा॥ देशस्य तदा महद्भय
मायातं विनिर्देश्यं॥ ॥अमलेनिर्मलेर्के सूर्ये सति नदिवा वृक्षादीनां छाया प्रतिबिंबं न दृश्यते॥ अथ प्रती
पा विपर्यस्ता छाया दृश्यते सूर्याभिमुखीत दा देशस्य जनपदस्य महद्भयं॥ प्रचुरं भयमायातं प्राप्तं विनिर्देश्यं व
क्तव्यं॥ ॥अन्यानप्याह॥ व्यभ्रे नभसींद्रधनुर्दिवा यदा दृश्यते अथवा रात्रौ॥ प्राच्यामपरस्यां वा तदा भवेत्
क्षुद्भयं सुमहत्॥ ॥व्यभ्रे विगताभ्रे नभस्याकाशे इंद्रधनुः इंद्रचापं तत् यदि दिवसे यदि दृश्यते अथवा रात्रौ दृ
श्यते॥ पूर्वस्यां दिशि पश्चिमायां वा तदा सुमहदतिप्रभूतं क्षुद्भयं दुर्भिक्षं भवति॥ अथैतेषामुत्पातानां शां
तिमाह॥ सूर्येंदुपर्जन्यसमीरणानां यागः स्मृतो वृष्टिविकारकाले। धान्यान्नगोकांचनदक्षिणाश्च देयास्त
तः शांतिमुपैति पापं॥ ॥सूर्यो रविः इंदुश्चंद्रः पर्जन्यो मेघः समीरणो वायुः एषां वृष्टिविकारे विकृतवर्षण
समये यागः स्मृत उक्तः। तथा धान्यं शालयः। अन्नं भोज्यं। गावः कांचनं हिरण्यं। एता दक्षिणा ब्राह्मणे
भ्यो देयाः। ततोनंतरं पापमनिष्टं शांतिमुपैति गच्छति॥ अथान्यानाह॥ अपसर्पणं नदीनां नगराद
चिरेण शून्यतां नयति। शोषश्चाशोष्याणामन्येषां वा ह्रदादीनां स्नेहास्रमांसवहाः संकुलाः कलुषाः प्रती
पगाश्चापि। परचक्रस्यागमनं नद्यः कथयंति षण्मासात्॥ अपसर्पणमिति। नदीनां सरितां नगरादप्स १७८
र्पणं दूरगमनं शीघ्रमचिरेण शून्यतां कुरुते॥ तथा अशोष्याणां बहुजलानां स्थानानां शोषो जलाभावः। अन्ये
षां वान्यह्रदादीनां ह्रदं यत्र पातालादुदकमायाति तच्छोषमेव॥ आदिग्रहणात् सरसामपि शोषः शून्यतामि

यकरोति॥ स्नेहास्रमांसेति॥ नद्यः सरितः स्नेहं तैलादि। अस्रं रक्तं। मांसमामिषं। यदा वहंति। तदा संकुलाः स
व्याः कलुषाः अनिर्मलाः प्रतीपगाश्च तत आगतास्तत्रैव गच्छंत्यः एवंविधा नद्यः षण्मासात् षड्भिर्मासैः परतः
परचक्रस्यागमनं कथयंति॥ अन्यानप्याह॥ ज्वालाधूमक्वाथरुदितोत्क्रुष्टानि चैव कूपानां। गीतप्रजल्पिता
नि च जनमरकायोपदिष्टानि॥ कूपानां ज्वालाप्रज्वलनं॥ धूमः क्वाथः फेनै रुदितं उत्क्रुष्टं मुत्क्रोशितं गीतं प्रजल्पि
तं। एतानि भवंति। तथा गीतप्रजल्पितं व्याहरणं एतानि सर्वाणि जनानां मरकाय उक्तानि॥ अन्यानप्याह
॥ ॥सलिलोत्पत्तिरखाते गंधरसविपर्यये च तोयानां॥ सलिलाशयविकृतौ वा महद्भयं तत्र शांति
मिमां॥ अखाते प्रदेशे सलिलस्य जलस्योत्पत्तिः संभवः॥ तोयानां जलानां गंधारसविपर्यये गंधस्य
सुगंधस्य रसस्य स्वादुताया विपर्यये अन्यत्वे तथा सलिलाशयानां मृदकाधारणां विकारे स्वरूपान्यत्वे
महाभयं भवति॥ तत्र वक्ष्यमाणां शांतिमाह॥ ॥सलिलविकारे पूजां कुर्यात् वरुणस्य वारुणैर्मंत्रैः। तैरेव
च पोद्धोमः शममेवं पापमुपयाति॥ सलिलविकारे जलविकृतौ वरुणस्य वारुणैर्मंत्रैः पूजामर्चां कुर्यात् तैरे
व वारुणैर्मंत्रैर्होमं अग्नौ कुर्यात्। एवमनेन प्रकारेण पापमनिष्टं शमं शांतिमुपयाति। प्राप्नोति॥ अन्यान्य
प्याह॥ प्रसवविकारः स्त्रीणां द्वित्रिचतुःप्रभृतिप्रसूतौ वा॥ हीनातिरिक्तकाले देशकुलसंक्षयो भवति॥ वडवोष्ट्र
महिषगोहस्तिनीषु यमलोद्भवे मरणमेषां॥ ॥षण्मासात् सूतिफलं शांतौ श्लोकौ च गर्गोक्तौ॥ ॥प्रसववि
कार इति॥ स्त्रीणां प्रसवविकारे प्रसूतिविकृतौ अथवा द्वित्रिचतुःप्रभृतिसंप्रसूतेः द्वित्रिचतुः पंचषट्सप्ता
नवदशबाला यदि जायंते॥ हीनातिरिक्तकाले हीनेऽपूर्णे अतिरिक्ते वाधिककाले देशविनाशः कुलसंक्षयो वि
नाशश्च भवति। वडवेति॥ वडवा अश्वा। उष्ट्रः करभी। गौः महिषी हस्तिनी। तासु यमलोद्भवे द्वाभ्यां जननेनै
षामश्वादीनां मरणं भवति॥ तथा च गर्गः॥ अकालप्रसवे चैव कालेनातीत वा पुनः। असंख्यजननेनैव युग्मस्य
प्रसवेन च। अमानुषाणि चांगानि नारीणां मंडलानि वा। अनंगप्यधिका गावो दृश्यन्ते संभवंति वा॥ विमला
पापिसदृशाः तथा भवंति पशुष्वपि॥ विनाशस्तस्य देशस्य कुलस्य च विनिर्दिशेत्॥ अग्रामचयमोगर्भाद्

वा॰सं॰ चतुःपाः स्थया पिबा॥ अन्यच्च विनताश्चापि प्रजायंते तयोर्भवेत्॥ बडवाद्यास्तनानि गोर्वाथ द्वियुग्मं प्रसूयते। विनाश्यं
निरुतं चापि षड्भिर्मासैः न्यपक्षयः। कृतिफलं प्रसवफलं षण्मासात्परतो भवति॥ ॥अत्र गर्गः॥ मद्रुर्षिकथिता
१२८ श्लोकौ द्वाविमौ वक्ष्यमाणौ तान्याह॥ नार्यः परस्य विषयेत्यगत्याभूतानिमत्ता। तयेत्र द्विजान्कामैः शांतिचे
वात्र कारयेत्॥ चतुष्पदाः स्वयूथेभ्य रूपकृत्याप रभूमिषु॥ नगरं स्वामिनं चैव सम्यक्थानाशयंतिते॥ तानार्यो यो
षितो भूतिमभ्युदयं वांछता परस्यान्यस्य विषये देशेत्यक्तव्याः॥ ॥द्विजान्विप्रान्कामैरिच्छाभिस्तर्पयेत्॥ तथा
प्राप्तिरुत्पाते शांतिं च कारयेत्॥ चतुष्पदाश्च गवादयः स्वयूथेभ्य आत्मीयवर्गेभ्यः परभूमिष्वन्यदेशेषु त्यक्तव्याः
॥ एवं कृते श्रेयो भवति॥ अन्यथा नगरं पुरं स्वामिनं पातिं यूथं विनाशयंति क्षयं नयंति॥ ॥अन्यानप्याह॥ पर
योनावभिगमनं भवति तिरश्चामसाधु धेनूनां॥ उक्षाणो वान्योन्यं पिबति श्वा वा सुरभिपुत्रं॥ परयोनाविति
॥ तिरश्चां तिर्यग्जातीनां परयोनावन्ययोनावभिगमनं यदि भवति तदसाधु अनिष्टं॥ तथा धेनूनां गवानाम
न्योन्यं परस्परं पाने स्तनपाने सति तथा उक्षाणो वा वृषभा अन्योन्यं स्तनं पिबंति। वत्सांश्च वर्जयित्वा॥ अथ
वा सुरभिपुत्रं गोतनयं श्वा सारमेयः पिबति॥ एतेषां परिपाकमाह॥ मासत्रयेण विघातस्तस्मिन्न निःसंशयं
परागमनं॥ तत्प्रतिघातार्थे तौ श्लोकौ गर्गेण निर्दिष्टौ। तस्मिन्नुत्पाते मासत्रयेण परागमनं निःसंशयं अ
संदेहं विघातं जानीयात्॥ तथा च गर्गः॥ वियोनिषु यदा यांति मैथुनभावः प्रजायते। खरोष्ट्रहयमातंगा म
नुष्या वा न साधु तत्॥ अकालमत्ता दृश्यंते कालि च विमदा यदि। श्वानो वृषहयमातंगाः पक्षिणो वा न साधु
तत्॥ धेनुर्धेनुं पिबेद्यत्र अनड्वान्वृषभं तथा॥ श्वानो वाथ पिबेद्धेनुं धेनुः श्वानमथापि वा॥ त्रिषु त्रिषु
मासेषु परचक्रागमं वदेत्॥ इति॥ एतेषामुत्पातानां प्रतिघाताय गर्गेण श्लोकौ निर्दिष्टौ तानाह॥ त्यागो विवा
सनं दानं तत्तस्याशु शुभं वदेत्॥ तर्पयेत् ब्राह्मणांश्चात्र जपहोमांश्च कारयेत्॥ स्थालीपाकेन धातारं पशुना थप १२९
तोद्धृतः॥ प्राजापत्येन मंत्रेण यजेत बहुदक्षिणं॥ ॥त्यागो विवासनमिति॥ त्यागः स्वत्यजनं॥ निवासनमन्यत्र
स्थापनं॥ दानमन्यस्य ब्राह्मणादेः ततस्य चतुष्पदस्याशु क्षिप्रमेव शुभं भवेत्स्यात्॥ अस्मिन्नुपसर्गे ब्राह्म

णान्द्विजान्तर्पयेत्पूजयेत्॥ जपं मंत्राणामद्भुतशमनानां होममग्नौ च कारयेत्॥ पुरोहितः स्थालीपाकेन चरुणा पशुना
च छागादिना धातारं प्रजापतिं प्राजापत्येन मंत्रेण बह्वन्नं प्रभूतान्नं बहुदक्षिणं च यजेत्॥ अथान्यानुत्पातानाह॥
यानं वाहवियुक्तं यदि गच्छेन्न व्रजेच्च वाहयुतं॥ राष्ट्रभयं भवति तदा चक्राणां सादभंगे च॥ यानमश्वादिकं वाहनपु
रुषेण रहितं यदि गच्छेद्व्रजेत्। वाहनयुतं च न व्रजेत्॥ तदा राष्ट्रभयं भवति। तथा चक्राणां रथचक्राणां सादने
सज्जने भंगे च स्फोटने राष्ट्रभयमेव भवति॥ अन्यानप्याह॥ अनभिहततूर्यनादः शब्दो वा ताडितेषु यदि न स्या
त्॥ व्युत्पत्तौ वा तेषां परागमो नृपतिमरणं वा॥ अनभिहतानामताडितानां तूर्याणां नादः शब्दः यदि वा ताडि
तेष्वाहतेषु शब्दो न स्यात्॥ तथा तूर्याणां व्युत्पत्तौ विविधा उत्पत्तिर्व्युत्पत्तिः नानाशब्दवत्॥ परागमः परचक्र
स्यागमो भवति॥ नृपते राज्ञो मरणं वा॥ ॥अन्यानप्याह॥ गीतरवतूर्यनादा नभसि यदा वा चराचरान्यत्वं॥ मृ
त्युस्तदा गदा वा विस्वरतूर्ये पराभिभवः॥ ॥नभस्याकाशे यदा गीतशब्दास्तूर्यशब्दाः श्रूयंते अथवा चराचरा
न्यत्वं चरस्य शकटादेः स्थिरता स्थिरस्य वृक्षादेश्चरत्वं तदा मृत्युर्मरणं गदा रोगा वा भवंति॥ तथा विस्वरतूर्ये तूर्या
णामाहतानां यदन्यादृशः सविकारः शब्द उत्पद्यते तदा पराभिभवो भवति॥ परैः शत्रुभिरभिभवः परा
जय इति॥ ॥अन्यानप्याह॥ गोलांगलयोः संगे दर्वीशूर्पाद्युपस्करविकारे॥ क्रोष्टुकनादे तथा शत्रुभयं मान
वचश्चेदं॥ ॥लांगलं हलं गोलांगलयोः संगः परस्परं संश्लेषः। गौर्यत्र हललग्ना दृश्यत इति। तस्मिन्तथा दर्वी
शूर्पाद्युपस्करविकारे। दर्वी प्रसिद्धं शूर्पं प्रसिद्धमेव॥ दर्वीशूर्पादिकानामुपस्करभांडानां विकारे विकृते आदि
ग्रहणात् मुशलोलूखलादिकं गृह्यते॥ एषां विकारः स्वरूपान्यत्वं हसनं गायनं रोदनं वा॥ क्रोष्टुकः शृगाल
स्तत्सदृशो तेषामेव नादे शत्रुभयं भवति॥ इदं च श्यामः॥ अत्रास्मिन्नुत्पाते शांत्यर्थं मुनिवचः ऋषिवाक्य
मिति॥ तच्चाह॥ वायव्येषु नृपतिर्वायुं सक्तुभिरर्चयेत्॥ आवायोरिति पंचर्चो जप्याश्च प्रयतो द्विजैः॥ ब्राह्म
णान्परमान्नेन दक्षिणाभिश्च तोषयेत्॥ बह्वन्नदक्षिणा होमाः कर्तव्याश्च प्रयत्नतः॥ वायव्येष्विति॥ एषु वा
यव्येषूत्पातेषु नृपती राजा वायुमनिलं सक्तुभिरर्चयेत्पूजयेत्॥ तथा प्रयतः संयतो द्विजैः आवायोरिति

पंचवक्त्वः जप्यात्तपनीयाः। तथाचाय सेनब्राह्मणभोजयित्वा तथा होमावसाने दक्षिणाः प्रभूतभोज्याः प्रभूतदक्षि
बा॰सं॰ णाश्चकर्तव्याः॥ ॥अन्यानप्याह॥ पुरपक्षिणो वनचरा वन्याश्चानि भयाद्विशंतिपुरं नक्तंचाद्दिवसचराः क्षपाचरा
श्चाचरंत्यहनि॥ पुरपक्षिणो ग्राम्या विहगा यदि वनचरा भवंति॥ अरण्यं विचरंति॥ तथावन्याः पक्षिणो निर्भया
१८० गतभीतयः पुरं नगरं प्रविशंति॥ अथवा दिवसचराः पक्षिणः काकादयो नक्तं रात्रौ विचरंति॥ क्षपाचरा रात्रि
चारिणः कौशिकादयो अहनि दिवसे चरंति॥ अन्यानप्याह॥ संध्याद्वयेपि परिमंडलमावध्नंतो मृगा विहंगा
वा॥ दीप्तायां दिश्यथवा क्रोशंतः संहताभयदाः॥ अरण्यचारिणो विहंगाः संध्याद्वयेपि मंडलमावध्नंतो मृगा वि
हंगा वा दीप्तायां दिश्यथवा क्रोशंतः संहताभयदाः॥ अरण्यचारिणो विहंगाः संध्याद्वयेपि सूर्योदयास्तयोर्मंडलं
चक्राकारमावध्नंतो रचयंतः॥ अथ संहताः समेताः बद्धवः क्रोशंतो वासमाना दृश्यंते तदा भयदा इति॥ यस्यां दि
शि ज्वलति सा दिक् प्रदीप्तेति॥ ॥अन्यानप्याह॥ श्येनाः प्ररुदंतश्च द्वारे क्रोशंति जंबुकादयः॥ प्रविशेन्नरेंद्रभव
ने कपोतकः कौशिको यदि वा॥ श्वानः प्रातःकालपक्षिणः प्रवर्षण रुदंतो रोदमानाः चक्रोशंति। तथा जंबुकाः श्र
गालादीप्ताः सूर्याभिमुखाः क्रूरशब्दाश्च द्वारे पुरद्वारे क्रोशंति शब्दं कुर्वंति॥ नरेंद्रभवने राजगृहे कपोतः कौशिक
उलूको वा प्रविशेत॥ ॥तथाच गर्गः॥ श्येनाः गृध्रा बलाकाश्च वामना मंडचारिणः। अदृश्यंत तु वान्यर्थे प्रदीप्ताः
संघशो यदि॥ रुदंति विविधं यत्र तद्देशो विनश्यति॥ स गर्भाश्शीर्णं कपोतो वा प्रविशंति वसंति वा॥ राजवेश्म
न्युलूको वापि तद्देशो विनश्यति॥ अन्यानप्याह॥ कुक्कुटरुतं प्रदोषे हेमंतादौ च कोकिलालापाः॥ प्रतिलोममंड
लचराः श्येनाद्याश्चांबरे भयदाः॥ गृहचैत्यतोरणेषु - - - चपक्षि - - संपातः॥ मधुवल्मीकांभोरुहसमुद्
भवश्चापि नाशाय॥ कुक्कुटरुतमिति॥ ॥प्रदोषे रात्रिमुखे कुक्कुटरुतं॥ तथा हेमंतादौ॥ हेमंतमुखे कोकिलालापाः
परभृतानां शब्दाः श्येनाद्याः सर्वपक्षिणो मांसाशिनः आदिग्रहणात काकवककंकादयो गृह्यंते। एते अंबरे आकाशे १८०
प्रतिलोममंडलचराः अप्रदक्षिणेन मंडलेन चरंति। तथाभूता भयदाः भयं जनयंति॥ गृहचैत्येति गृहं वेश्म चै
त्यः प्रधानवृक्षः तोरणं प्रसिद्धं एतेषु चैत्यगृहतोरणेषु द्वारेषु च पक्षिसंघानां खगसंघानां संपातः संश्लेषाय
च

तथैतेषामेव गृहादीनां मधुवल्मीकांभोरुहसंभवः मधुमक्षिकाणां वल्मीकस्य सरसि पंकजस्य। गृहरूपस्यांभोरुहस्य
पद्मादेः समुद्भव इत्यनिश्चयविनाशाय भवति॥ पशूनां चतुष्पदानां गवाश्वादीनां मनुष्याणां व्याहारेषु संभाषणेन सर्वस्य राज्ञो मृत्यु
मरणं इदं वक्ष्यमाणं शांत्यर्थं मुनिवचः वाक्यं तथाह॥ मृगपक्षिविकारेषु कुर्याद्धोमान् सदक्षिणान् जपेच्छा
कुनं सूक्तं मनोवेदामरांसि च मृगपक्षिविकारेष्विति॥ मृगाणां पक्षिणां च विकारेषु वैरुतेषु सदक्षिणान् दक्षिणा
भिः सहितान् होमान् कुर्यात् पंचभिः द्विजैः पंचभिर्ब्राह्मणैः देवाः कपोत इति जप्तव्या। सुदेवा एतत्पदं यस्य मंत्रस्या
दिः स चैकेन द्विजेन जप्तव्यः एषां ब्राह्मणानां गावश्च दक्षिणा देयाः शाकुनसूक्तं मंत्रं जपेत पठेत शाम नोमंत्रः वेद
त्रयांस्यथर्वशिरः प्रभृतीनि जपेत अथान्यानाह शक्रध्वजेंद्रकीलस्तंभद्वारप्रपातभंगेषु तद्वत्कपाटतोरणके
तूनां नरपतेर्मरणं॥ शक्रध्वज इंद्रध्वजः इंद्रकीलकः द्वारार्गलः स्तंभद्वारं प्रसिद्धं एषामन्यतमस्य प्रपातः पतनं
भंगः स्फोटनं वा एतेष्वेदेषु तथा कपाटं द्वारपिधानं तोरणं प्रसिद्धं केतुर्ध्वजः एतेषामपि तद्वत् प्रपतनं भंगो वा
दृश्यते तदा नरपते राज्ञो मरणं निर्दिष्टं तद्वदेत अन्यानप्याह॥ संध्याद्वयस्य दीप्तिर्धूमोत्पत्तिश्च कानने नग्नौ
छिद्राभावे भूमेर्दरणं कंपश्च भयकारी॥ संध्याद्वयस्य सूर्योदयास्तमययोः दीप्तिस्तेजः कानने वने नग्नावग्नि
रहिते धूमोत्पत्तिर्धूमसंभवः। तथाछिद्राभावे व्रणसंभवे सति भूमेर्दरणं स्फोटनं कंपश्चलनं च भयं करोति
अन्यानप्याह॥ पाखंडानां नास्तिकानां च भक्तः साध्वाचारः प्रोज्झितः क्रोधशीलः ईर्ष्युः क्रूरो विग्रहासक्तचेता
ः यस्मिन् राजा तस्य राष्ट्रस्य नाशः यस्मिन्देशे ईदृशो राजा नरपतिस्तस्य देशस्य नाशो भवति कीदृशः पाखंडानां वे
दबाह्यानां नास्तिकानां लोकायतिकानां भक्तः। तथा साध्वाचारः प्रोज्झितः साधूनां सतां संबंधी आचारः
प्रोज्झितस्त्यक्तो येन क्रोधशीलः कोपपरः ईर्ष्युः परमत्सरः। क्रूरः खलः विग्रहासक्तचेताः विग्रहे सर्वकालम
कालेपि आसक्तं चेतो यस्य॥ अन्यानप्याह॥ प्रहरहरादिभिर्धिभिर्धात्यायुधकाष्ठाश्मपाषाणैर्बालाः।
निगदंतः प्रहरंते तत्रापि भयं भवत्येव॥ बालाः शिशवः आयुधकाष्ठाश्मपाणयः आयुधानि खड्गादीनि का
ष्ठानि काष्ठानि लगुडाः। अश्मानः पाषाणाः पाणिषु हस्तेषु ते तथाभूताः प्रहरहरादिभिर्धिभिर्धि इति निगदं
तः

बा॰सं॰ प्रदृश्यंते परस्परं घ्नंति यत्र तत्राशु शीघ्रं भयं भवति। तथा च पराशरः॥ यदि धनुरसिकाष्ठदण्डाः प्रज्वलितावार
णवत् समाचरंति॥ प्रहरद्रूप अत्यल्प प्रहरंतो भयमचिरात् तुमुलं निवेदयंति॥ ॥अन्यानप्याह॥ अंगारगैरि
१८१ काद्यैर्विकृतप्रेताभिलेखनं यस्मिन्॥ नायकं चित्रितमथवा क्षयं क्षयं याति नचिरेण॥ यस्मिन् क्षये गृहे अंगारगै
रिकाद्यैः अंगारकेन दग्धकाष्ठेन गैरिकेन धातुविशेषेणान्यैः पीतरक्तादिभिः अंगैर्विकृतानां विरूपाणां प्राणिनां
प्रेतानां मृतपुरुषाणां वा अभिलेखनमालेखनं॥ अथ नायको गृहस्वामी न्यंगारगैरिकाद्यैः आलेखितो विकृतोऽथ
वा दृश्यते गृहे तत्र गृहस्वामी नचिरेण शीघ्रमेव क्षयं नाशं याति॥ अन्यानप्याह॥ लूतापटांगनावलंनसंध्ययोः पूजितं च
कलहयुतं। नित्योच्छिष्टस्त्रीकं यत् गृहं तत् क्षयं याति॥ लूताजालेन लालकारा उच्यंते। तदीयैस्तंतुभिर्यैः पटः अं
गान्यवयवानि च तदीयान्येव तैर्यत् गृहं दूराद्वकंप्याभिश्रितं तथा संध्ययोर्द्वयोः सूर्योदयास्तमययोर्यन्न पूजितं
नार्चितं। तथा नित्यं कलहयुतं तथा यत् गृहं नित्यमुच्छिष्टस्त्रीकं नित्यं सर्वकालमुच्छिष्टाः स्त्रियो यत्र तत् क्षयं नाशं या
ति॥ ॥अन्यानप्याह॥ दृष्टेषु यातुधानेष्वनिर्दिष्टो जनमरकमारुसंप्राप्ते। प्रतिघाताय तेषां गर्गः शांतिं चकार
मां॥ यातुधानेषु राक्षसेषु दृष्टेषु आशु शीघ्रं मरकं संप्राप्तं निर्दिष्टं तु वदेत्॥ एतेषामुत्पातानां नाशाय गर्गः
इमां वक्ष्यमाणां शांतिं चकार कृतवान्॥ तामाह॥ महाशांत्योऽथ बलयो भोज्यानि सुमहांति च॥ कारयीत महेंद्रं च मा
हेंद्रीं च समर्चयेत्॥ ॥महाशांत्यः गणशांतिप्रमुखाः। बलयः उपहाराः तथा सुमहांत्यतिप्रभूतानि भोज्यानि च
कारयेत्॥ महेंद्रमिंद्रं तथा माहेंद्रीं इंद्राणीं समर्चयेत् पूजयेत्॥ अथ यत्र कालेऽत्पाता दृष्टा विफलास्तत्प्रदर्शय
न्नाह॥ नरपतिदेशविनाशे केतोरुदयेऽथवा ग्रहेऽर्केंद्वोः। उत्पातानां प्रभवः स्वर्तुभवश्चाप्यदोषाय॥ ॥नरपति
विनाशे देशविनाशे परैर्देशस्तु जने तथा केतोरुदये शिखिदर्शने अथवा ग्रहेऽर्केंद्वोः सूर्याचंद्रमसो रुपप्लवे एत
ष्कालेषूत्पातानां प्रभवः संभवः तथा स्वर्तुभवः। तथा स्वर्तौ आत्मीये ऋतौ वक्ष्यमाणानामुत्पातानां प्रभ १८१
व उत्पत्तिरदोषाय भवति। तत्र यद्दृष्टं फलमुक्तं तन्न भवति॥ अथ स्वर्तुस्वभावकृतं वक्ष्यामीत्याह॥ ॥ये चान्य
दोषान् जनयंत्युत्पातांस्तानृतुस्वभावकृतान्। ऋषिपुत्रकृतैः श्लोकैर्विद्यादेतैः समासोक्तैः॥ ये चोत्पाता ऋतु

स्वभावकृतास्त्वृतुस्वभावेनोत्पद्यंते तानृतुस्वभावकृतान् दोषाननिष्टफलान्येव जनयंत्युत्पादयंति॥ तानृषिपुत्र
कृतैरिमैः समासोक्तैः संक्षेपकथितैः श्लोकैर्विद्याज्जानीयात्। तत्र वसंते प्राकृतानुत्पातानाह॥ वज्राशनिमही
कंपसंध्यानिर्घातनिःस्वनाः॥ परिवेषरजोधूमरक्तार्कास्तमनोदयाः॥ द्रुमेभ्योऽन्नरसस्नेहबहुपुष्पफलोद्गमाः
गोपक्षिमदवृद्धिश्च शिवाय मधुमाधवे॥ ॥एतानुत्पातान् मधौ चैत्रे माधवे वैशाखे शिवाय शुभाय संभ
वंति॥ का नेति॥ वज्राशनीत्यादि॥ वज्रं विद्युत् अशनिरश्मवर्षणमुल्का भेदो वा॥ महीकंपो भूकंपः संध्याप्र
सिद्धा दीप्ता यत्र तस्याः लक्षणमुक्तं॥ निर्घातनिःस्वनाः निर्घातशब्दाः। परिवेषश्चंद्रसूर्ययोः। रजो धूलिः धूमः का
ननेषु॥ तथा रक्तः लोहितस्य वर्णोऽर्कस्य सूर्यस्यास्तमनोदययोः॥ द्रुमेभ्यो वृक्षेभ्योऽन्नस्य भोज्यस्य रसानां मधुरादीनां
स्नेहस्य तैलादेर्बहूनां पुष्पाणां फलानां चोद्गमः संभवः। गवां पक्षिणां च मदवृद्धिः कामसेवनं॥ अथ ग्रीष्ममाह॥
तारोल्कापातकलुषं कपिलार्केंदुमंडलं॥ अनग्निज्वलनस्फोटधूमरेण्वनिलाहतं॥ रक्तपद्मारुणा संध्या नभः क्षु
ब्धार्णवोपमं। सरितां चांबुसंशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत्॥ तारोल्कापातेति॥ नभः आकाशं तारोल्कापातकलुषं
तारापातेनोल्कापातेन च कलुषमनिर्मलं॥ तथा कपिलवर्णौ यौ अर्केंदू सूर्याचंद्रमसौ मंडलबिंबे यत्र॥ अनग्निज्व
लनं अग्निना विना ज्वालास्फोटस्तेन च शब्दः। धूमः। रेणुर्धूलिः अनिलो वायुः एतैराहतं। तथा संध्या रक्तपद्मारु
णा लोहिता॥ नभः आकाशं क्षुब्धार्णवोपमं क्षुब्धः समुद्रस्तुल्यं जलवीचिभिः व्याप्तं॥ सरितां नदीनां अंबुसंशो
षो जलाभावः॥ अथ वर्षास्वाह॥ शक्रायुधपरिवेषविद्युच्छुष्कविरोहणं॥ कंपोद्वर्तनवैकृत्यं रसनं दारणं क्षितेः॥ नदो
दपानसरितां वृद्ध्यूर्ध्वतरणप्लवाः॥ सरणं चाद्रिगेहानां वर्षासु न भयावहं॥ एतद्वर्षासु न भयावहं शुभमित्यर्थः
शक्रायुधमिंद्रायुधं परिवेषः सूर्याचंद्रमसोः विद्युत्तडित् शुष्कविरोहणं शुष्काणां द्रुमाणां पुनर्विरोहणं सरसत्वं
क्षितिर्भूमिस्तस्याः कंपश्चलनं उद्वर्तनं परिवर्तनं वैकृत्यं विकृतता विकारः स्वरूपान्यत्वं। रसनं शब्दः कषणं वा
दारणं निःसरणं स्फोटनं इत्यर्थः॥ नदीनामुदपानानां जलधाराणां सरसां च वृद्धिर्जलाधिक्यं। वृद्ध्युत्तरं वा। ऊर्ध्व
तरणं प्रतीपगमनं वा प्लवो नौप्लवनं॥ अथवा प्लवानां वेदकादीनामूर्ध्वतरणं विपर्ययगमनं अद्रीणां पर्वतानां

वारा॰सं॰ ेश्मनां ग्रहाणां चन्द्रारणं कुठनमिति॥ अथ शरदमाह॥ दिव्यस्त्रीभूतगंधर्वविमानाद्भुतदर्शनं॥ ग्रहनक्षत्रताराणां द
र्शनं च दिवांबरे॥ गीतवादित्रनिर्घोषा वनपर्वतसानुषु॥ सस्यवृद्धिरपां हानिरपापाः शरदुद्भवाः॥ एते उत्पाताः शर
दृतुजाः शरत्काले अपापाः शुभफलदाः स्मृताः उक्ताः॥ दिव्यस्त्रीणामप्सरसादीनां गंधर्वाणां देवयोनीनां विमानानां रथाना
१८२ मद्भुतानामाश्चर्योत्पादकानां च दर्शनं॥ तथांबरे आकाशे दिवा दिवसे ग्रहनक्षत्रताराणां दर्शनं॥ वने अरण्ये पर्वत
सानुषु अद्रिसमभूभागेषु गीतवादित्राणां च निर्घोषः शब्दः श्रूयते॥ सस्यानां वृद्धिः पयसां जलस्य च हानिरल्पत्वं॥ अथ हेम
न्त आह॥ ॥शीतानिलतुषारत्वं नर्दनं मृगपक्षिणां॥ रक्षोयक्षादिसत्वानां दर्शनं वागमानुषी॥ दिशो धूमांधकाराश्
च सनभोवनपर्वताः॥ उच्चैः सूर्योदयास्तौ च हेमंते शोभनाः स्मृताः॥ एते उत्पाता हेमंते शोभना इष्टफलाः स्मृता उ
क्ताः॥ अनिलस्य च वायोस्तुषारस्य भावः॥ मृगपक्षिणां नर्दनं शब्दः॥ रक्षसां यक्षाणां सत्वानां प्राणिनां अदृश्यानां
दर्शनं॥ आदिग्रहणात् भूतपिशाचानामपि॥ अमानुषी वाक् मानुषेण विना गीः॥ दिश आशाः धूमांधकारा धूम
ांधकाराकुलाः कीदृशो दिशः सनभोवनपर्वताः सह नभसा आकाशेन वनेनारण्येन पर्वतैश्च सहितास्तथा सूर्यस्या
दित्यस्योदयास्तमयावुच्चैः उच्चतरस्थाने॥ ॥अथ शिशिरमाह॥ हिमपातानिलोत्पातविरूपाद्भुतदर्शनं॥ कृष्णा
ञ्जनाभमाकाशं तारोल्कापातपिंजरं॥ चित्रगर्भोद्भवाः स्त्रीषु गोजाश्वमृगपक्षिषु॥ पत्रांकुरलतानां च विकाराः
शिशिरे शुभाः॥ ॥एते विकाराः शिशिरे शुभाः इष्टफलाः॥ हिमस्य तुहिनस्य पातः पतनं॥ निलोत्पातो वायुप्रसर्गः
॥ विरूपाणां भीषणानां सत्वानां अद्भुतानां आश्चर्योत्पादकानां दर्शनं दिव्यपुरुषादीनां आकाशं नभः कृष्णाञ्जन
वत् आभा कान्तिर्यस्य॥ तारकापातैरुल्कापातैश्च पिंजरं चित्रितं स्त्रीषु चित्रकर्मचित्रा नानाप्रकारा गर्भाणामुद्
भवाः॥ तथा गोषु अजेषु छागेषु अश्वेषु तुरगेषु पक्षिषु च चित्रगर्भोद्भवाः चित्रसंभवा गोजाश्वानां पक्षिणां प्रसूति १८२
विपर्यासः॥ पत्राणां पर्णानां अंकुराणां लतानां च विकारा विकृतयः॥ इति॥ ॥अत्र च विशेषमाह॥ ऋतुस्वभाव
जाश्चैते दृष्टाः स्वर्तौ शुभप्रदाः॥ ऋतोरन्यत्र चोत्पाता दृष्टास्ते भृशदारुणाः॥ एते यथोक्ता उत्पाता ऋतुस्वभावजा
ऋतुस्वभावेन जायंते उत्पद्यंते॥ स्वर्तौ आत्मीयर्तौ दृष्टा विलोकिताः शुभप्रदा भवंति॥ ऋतोरन्यत्रान्यस्मिन् काले दृ

MEMORIAL

ष्टास्ते उत्पाता भृशमत्यर्थं दारुणाः कष्टफला भवंति॥ यद्यद्विशेषेण फलप्रदं भवति तत्तदाह॥ ॥उन्मत्तानां च या
गाथा शिशूनां यच्च भाषितं॥ स्त्रियो यच्च प्रभाषंते तस्य नास्ति व्यतिक्रमः॥ ॥उन्मत्तानां विचेतसां या गाथाः प्रा
कृतवाक्यानि शिशूनां बालानां यच्च भाषितं व्याहृतं यच्च स्त्रियो योषितः प्रभाषंते व्याहरंति तस्य व्यतिक्रमो अन्यथात्वं
नास्ति न विद्यते॥ सर्वथा तद्भवतीत्यर्थः॥ येन प्रकारेण तत्स्वरूपं भवति तत्प्रदर्शनार्थमाह॥ ॥पूर्वं चरति देवे
षु पश्चाद्गच्छति मानुषं॥ नाचोदिता वाक् वदति सत्या ह्येषा सरस्वती॥ एषा भगवती वाक् सत्यासत्यस्वरूपा चो
दिता प्रेरिता न वदति नः ब्रवीति॥ यतः प्रथमं पूर्वं देवेषु चरति दिवलोके याति देवप्रेरिता पश्चादनंतरं मानुषान् ग
च्छति॥ अथोत्पातशास्त्रस्य प्रभावमाह॥ उत्पातान् गणितविवर्जितोपि बुद्ध्या विख्यातो भवति नरेंद्रवल्लभ
श्च॥ एतत्तन्मुनिवचनं रहस्यमुक्तं यज्ज्ञात्वा भवति नरस्त्रिकालदर्शी॥ गणितविवर्जितो ग्रहगणितरहितो
प्युत्पातान् बुद्ध्या ज्ञात्वा विख्यातः कीर्तियुक्तो नरेंद्रवल्लभो नृपतिप्रियश्च भवति॥ एतद्रहस्यं परमार्थं मुनिवचनं
ऋषिवाक्यं कथितं ज्ञात्वा नरः पुमान् त्रिकालदर्शी अतीतानागतवर्तमानकालज्ञो भवति॥ ॥इति भट्टोत्पल
विरचितायां संहिताविवृतावुत्पाताध्यायः ४६॥ ॥श्री॥ अथ मयूरचित्रं व्याख्यायते॥ ॥तत्रादावेवैतत्प्रयोज
नप्रदर्शनार्थमाह॥ दिव्यांतरिक्षाश्रयमुक्तमादौ मया फलं शस्तमशोभनं च॥ प्रायेण चारेषु समागमेषु युद्धेषु उक्तं
च मार्गादिषु विस्तरेण॥ भूयो वराहमिहिरस्य न युक्तमेतत्कर्तुं समासकृदसाविति तस्य दोषः॥ तदीरिताद्यामि
दमुक्तफलानुगामि चित्रं तु यच्चित्रकमिति प्रथितं वरांगं॥ स्वरूपमेव तस्य तत्प्रकीर्तितानुकीर्तनं ब्रवीम्यहं न चेदि
दं तथापि मेत्र वाच्यते॥ ॥दिव्यांतरिक्षाश्रयमिति॥ मया पूर्वं प्रथमं दिव्यांतरिक्षाश्रयं फलं ग्रहाश्च नक्षत्राण्याश्र
यो यस्य तद्दिव्यं॥ उल्कानिर्घातपवनपरिवेषगंधर्वनगरेंद्रचापाद्यान्याश्रयो यस्य तदांतरिक्षं॥ तच्च शस्तमशोभनं
च शस्तं प्रायेण बाहुल्येन चारेषु ग्रहचंद्रसंयोगेषु युद्धेषु ग्रहयुद्धेषु मार्गादिषु मार्गादिषु शुक्रचारे चादिग्रहणात् मंडले
षु सर्वं विस्तरेणोक्तं॥ कथितं॥ भूय इति॥ एतत्सर्वं पूर्वोक्तं भूयः पुनः वराहमिहिरस्य कर्तुं न युक्तं न शोभनं॥ यतोसौ
वराहमिहिरः समासकृत् संक्षेपकृत् तस्य वराहमिहिरस्य तद्दोषः पौनरुक्त्यदोषः इति न वाच्यं॥ न कथनीयं॥ यद्यस्मा

बा॰ सं॰

दिदं चार्द्धचित्रकं मयूरचित्रकं वराहसंहितायाः प्रधानमंगमुक्तं ॥ ॥ फलानुगीतिरिति प्रसिद्धं ॥ इकानां फलानामनुगीतिः
कीर्तनं प्रथितं प्रसिद्धं स्वरूपमेवेति ॥ तस्य मयूरचित्रस्य तदेव चरितस्वरूपं चरितं यत प्रकीर्तितं तेनामनुकीर्तनं पुनः कर
णं । अतदूंयादर्दं मयूरचित्रकं न अर्वामिनवत्सिततथाप्यत्रमेवाभ्यस्ताभवति ॥ तदत्र ग्रहचारोक्तं फलमाह ॥ ॥ उत्तरवीथि
१८३ गताद्युतिमंतः क्षेमसुभिक्षारोग्याय समस्ताः ॥ दक्षिणमार्गगताद्युतिहीनाः क्षुद्भयतस्करमृत्युकरास्ते ॥ उत्तरवीथ्यां
नगागते रवतीः तासु वीथिषु समस्ताः सर्व एव भौमादयस्ताराग्रहाः गताः ॥ ते च द्युतिमंतस्तेजस्विनः क्षेमसुभिक्ष
आरोग्याय भवंति ॥ क्षेमसुभिक्षं श्रेयश्च भवति ॥ तथा त एव ग्रहा दक्षिणमार्गगता मृगाजदहनाख्यासु वीथिषु स्थिता
द्युतिहीनाः कांतिहीनाः क्षुद्भयतस्करमृत्युकरास्ते ॥ उत्तरवीथ्यां नगागते सनतीः तासु वीथिषु समस्ताः सर्व एव भौ
मादयस्ताराग्रहा गताः ॥ ते च द्युतिमंतस्तेजस्विनः क्षेमसुभिक्षं क्षुद्भयं दुर्भिक्षं तस्कराश्चौराः मृत्युं मरणं च कुर्वंति ॥
अर्थादेव मध्यमवीथिषु गतामध्यफलाः ॥ तथा च गर्गः ॥ वर्णवंतः समागोरुजानागवीथ्याविचारिणः ॥ याद्दतारा
ग्रहाश्चेत्स्युः सर्वलोकहिताबहाः ॥ वैश्वानरपथं प्राप्ताः एकनक्षत्रचारिणः ॥ पंचताराग्रहाश्चेत्स्युर्विघ्नदास्तस्य सं
क्षयमिति ॥ अन्यदप्याह ॥ कोष्ठागारगते भृगुपुत्रे पुष्यस्थे च गिरांप्रभवे वा ॥ निर्वैराः क्षितिपाः सुखभाजः संहृष्टा
श्च जनागतरोगाः ॥ कोष्ठागारं मघा तत्र गते भृगुपुत्रे शुक्रे गिरांपतौ बृहस्पतौ पुष्यस्थे च क्षितिपा राजानो निर्वैराः
गतद्वेषाः सुखभाजश्च भवंति ॥ तथा लोकाः प्रमुदिता गतरोगाश्च भवंति ॥ तथा च गर्गः ॥ कोष्ठागारगते शुक्रे पु
ष्यस्थे च गिरांपतौ ॥ विग्रहाद्धतं सुखं लोके शांतं स्यात्समनामयं ॥ ॥ अन्यदप्याह ॥ पीडयंति यदि कृत्तिकामघारो
हिणीश्रवणमैंद्रमेव वा ॥ प्रोज्झ्य सर्वमपरेऽग्रहास्तदा पश्चिमा गमनयेन पीड्यते ॥ म यं माहिन्यं प्रोज्झ्य त्यक्त्वा परे स
र्वचंद्रादयो ग्रहा यदि कृत्तिकामघारोहिणीश्रवणमैंद्रं ज्येष्ठां ॥ एतानि नक्षत्राणि पीडयंति दक्षिणमार्गगमनेन
योगतारकाछादनेन भेदनेन वा ॥ तदा पश्चिमा दिक् अनयेन अनीत्या पीड्यते ॥ तथा च गर्गः ॥ येषामन्येऽप्यमा १८३
नेयं ज्येष्ठामपि च रोहिणीं ॥ पीडयंति यदैतानि ग्रहस्थानुचारिणः ॥ दुर्भिक्षं जायते लोके सस्यमात्रं न रोहति ॥ शु
ष्यंति सरितः सर्वाः पर्जन्यश्च न वर्षति ॥ अन्यदप्याह ॥ प्राच्यां च ध्वजवदवस्थिता ग्रहास्ते प्राच्यानां भवति हि विग्रहो

नृपाणां ॥ मध्ये चेद्भवति हि मध्यदेशपीडा रूक्षैस्तैर्न तु रुचिमन्मयूखवद्भिः ॥ त एव च प्राच्यां ग्रहाः हिनांतिः स्तमयका
ले प्राच्यां पूर्वस्यां दिशि ध्वजवत्पताकासंस्थानावस्थिता यदि भवंति ॥ तदा प्राच्यानां प्राग्देशवर्तिनां नृपाणां विग्रहो
भवति ॥ अथ यदि मध्येन भौमध्ये ध्वजवदवस्थिता भवंति तदा मध्यदेशपीडा भवति ॥ किं सर्वदा नेत्याह ॥
रूक्षैस्तैस्तैर्ग्रहैः रूक्षैः कलुषैः स्वल्पबिंबैः यदुक्तं तदेव भवति ॥ प्राच्यानां नृपाणां विग्रहस्तथा मध्यदेशपीडा
॥ न तु रुचिमन्मयूखवद्भिः रुचिमद्भिः दीप्तिमद्भिर्मयूखवद्भिः स्फुटरश्मिभिश्च न भवति अन्यदप्याह ॥ दक्षिणां क
कुभमाश्रितैस्तैर्दक्षिणापथपयोमुचां क्षयः ॥ हीनरूक्षतनुभिश्च विग्रहः स्थूलदेहकिरणान्वितैः शुभं ॥ तैर्ग्र
हैर्दक्षिणां ककुभं याम्यां दिशमाश्रितैर्दक्षिणापथपयोमुचां मेघानां क्षयो विनाशो भवति । तैरेव दक्षिणां क
कुभमाश्रितैर्हीनरूक्षतनुभिः हीना अल्पा रूक्षा अनिर्मला तनुः शरीरं येषां तैस्तथाभूतैर्विग्रहः तैरेव स्थूलदेहैः
स्थूलबिंबैः किरणान्वितैः रश्मिवद्भिः तत्र शुभं वाच्यं ॥ अन्यदप्याह ॥ उत्तरमार्गस्य पृथुमयूखाः शांतिकरास्तत्र नृप
तीनां ॥ ह्रस्वशरीरा भस्मसवर्णा दोषकराः स्युर्दिग्नृपाणां ॥ ॥ त एव ग्रहा उत्तरमार्गे उत्तरस्यां दिशि उत्तर
वीथिषु स्थिताः स्पष्टमयूखा विपुलरश्मयः तन्नृपतीनां उत्तरापथराज्ञां शांतिकराः क्षेमप्रदाः ॥ तथा त एव ग्र
हाः ह्रस्वशरीराः स्वल्पबिंबाः भस्मसवर्णा विगतकांतयः रूक्षाश्च तद्दिग्नृपाणां उत्तरापथराज्ञां दोषकराः ॥
तथा च गर्गः ॥ उत्तरोत्तरमार्गस्था रश्मिमालाधरा ग्रहाः ॥ विस्पंदं तद्वा लभ्यर्थं जयमादुरुपस्थितं ॥ अन्यदप्याह ॥
नक्षत्राणां तारका सग्रहाणां धूमज्वाला विस्फुलिंगाश्च येषां ॥ आलोकं वा निर्निमित्तं नयांति यांति ध्वंसं सर्वलो
कः सभूपः ॥ ॥ येषां देशानां नक्षत्राणां वा तारका धूमज्वाला विस्फुलिंगान्वृता धूमेन ज्वालया विस्फुलिंगैरग्नि
कणैः आवृता व्याप्ता ॥ अथ वा निर्निमित्तं कारणं विना रजनीदूरमेघं विना आलोकं दर्शनं नयांति तेषां देशानां स
भूपो नृपसहितः सर्वलोको जनो ध्वंसं नाशं यातिगच्छति ॥ अन्यदप्याह ॥ दिवा विभाति यदा तु हिमांशुर्यु
गं द्विजराड्दूरतीवतदाशुभमाह दिनं तरणी रणार्कयुगेन गतः प्रलयं त्रिचतुः प्रभृतिः । दिवा आक्रम्य यदा यामि
न्काले तु हिमांशु युगं चंद्रयुगं भाति दृश्यते तदा तस्मिन्काले अतीवात्यर्थं द्विजानां ब्राह्मणानां च भयं भवति ॥ तथा च

कैयुगे सूर्ययुग्मेदृष्टेतदनंतरवर्णस्यक्षत्रियवर्णस्यरणः संग्रामो भवति॥ तथाच्चिचतुः प्रभृतीन्त्रिचतुष्पंच
बा॰सं॰ सत्वादृष्टेषुजगतोजनस्यप्रलयः संहारइति॥ तथाचगर्गः॥द्विचंद्रंगगनंदृष्ट्वाविंद्यातब्रह्ममुत्थितं॥द्वौचार्कौ
यदास्यातांतदाक्षत्रंविनश्यति॥ द्व्यादित्रिचतुरः सूर्यानुदितान्सर्वतोदिशं॥ नास्त्रेणजनमारेणतत्ध्रुवांतानिदर्शनमि
१८४ ति॥ अन्यदप्याह॥ मुनीनभिजितंध्रुवंमघवतश्चभंसंस्पृशन॥ शिखीचनविनाशकृत कुशलकर्महारोगकरः॥ भुजंग
भमथस्पृशन भवतिवृष्टिनाशोध्रुवंक्षयंव्रजतिविग्रहोजनपदस्यबालाकुलः॥ ॥शिखीकेतुः मुनीन्सप्तर्षीन॥
अभिजितमभितारकाः॥ ध्रुवंध्रुवतारकांमघवतइंद्रस्यभंज्येष्ठा॥ एतानियदिसंस्पृशति तदाधनानांमेघानांवि
नाशकृत। कुशलकर्महा॥ कुशलाःशिक्षिताः येकर्मणितांश्चहंति॥ रोगकृतःरोगंकरोति। भुजंगभमश्लेषाम
थसंस्पृशन तदाध्रुवंनिश्चितंवृष्टिविनाशोभवति। तथाजनपदोलोकोबालाकुलःशिशुभिराकुलःतांविद्धतश्चक्ष
यंविनाशंयाति॥अन्यदप्याह॥ ॥प्राक्द्वारेषुचरनरविपुत्रोनक्षत्रेषुकरोतिचवक्रं॥ दुर्भिक्षंकुरुते महदुग्रंमित्राणां
चविरोधमवृष्टिं॥ रविपुत्रःशनिःप्राक्द्वारेषुयानिप्राक्द्वारिकाणिकृत्तिकादीनिसप्तनक्षत्राण्युक्तानि
॥ तेषुसप्तसुनक्षत्रेषुचरनतिष्ठनयदावक्रंकरोतितदामहदुग्रंअतीवकष्टंदुर्भिक्षंकुरुते॥ मित्राणांचसुहृदांचप
रस्परमन्योन्यंविरोधमवृष्टिंचकुरुते॥ तथाचगर्गः॥ विलंबितगतिः सौरिः प्राक्द्वारेषुयदाचरेत॥ महतःसर्वानि
चत्वारिविज्ञानीयात्समंततः॥ अनावृष्टिभयंघोरंदुर्भिक्षंमित्रविग्रहं॥ अन्यदप्याह॥ रोहिणीशकटमर्कनंदनो
यदिभिनत्तिरुधिरोथवाशिखी॥ किंवदामियदनिष्टसागरेविश्वमेतदुपयातिसंक्षयं॥ ॥अर्कनंदनःसौरि
यदारोहिणीशकटंभिनत्तिदारयतिरुधिरोंगारकोवाशिखीकेतुरथवा॥ तदानिष्टसागरेअनिष्टसमुद्रेवि
श्वंएतत्समुद्रविनाशंयाति। किमन्यदपरंवदामिकथयामि॥ यदिदृष्टंनभवति॥ तथाचगर्गः॥ रोहिणीशक
टंभौमोभिनत्यर्कसुतोथवा। केतुर्वातदागतोक्षयंतप्रलयंसमुपस्थितं॥ अन्यदप्याह॥ उदयतिसततंयदा १८४
शिखीचरतिभचक्रमशेषमेववा॥ अनुभवतिपुराकृतंतदाफलमशुभंसचराचरंजगत॥ ॥शिखीकेतुर्यदा
सततंसर्वकालंउदयतिदर्शनंगच्छति॥ अशेषंसमग्रंभचक्रंनक्षत्रमंडलमेववाचरति॥ तदासचराचरंस्थाव

रंजंगमंजगत्विश्वंपुराकृतमन्यजन्मार्जितंफलंअशुभमनिष्टंअनुभवत्यनुभुंक्तइत्यर्थः॥ अथसाचंद्रचारोशुभफ
लमाह॥ ॥धनुस्थायीरूक्षोरुधिरसदृशःक्षुद्भयकरोबलोद्योगंचेंदुः कथयतिजयंज्यास्यचयतः॥ अवाक्शृंगो
गोघ्नोनिधनमपिसस्यस्यकुरुतेज्वलनधूमायन्वान्पतिमरणायैवभवति॥ ॥इंदुश्चंद्रोधनुस्थायीचापसंस्था
नः॥रूक्षोनिर्मलःरुधिरवर्णोतिलोहितः क्षुद्भयकरोदुर्भिक्षभयंकरोति॥तथाबलानामुद्योगंयुद्धंकथयत्या
चष्टे॥ अस्यचंद्रमसोयतोयस्यांदिशिज्यागुणःतत्रयेनृपास्थितास्तेषांजयः॥ अवाक्शृंगोधोविषाणोगो
घ्नोगवांनाशकरःसस्यापिनिधनंविनाशंकरोति॥ अथज्वलतज्वालामुद्वहन धूमयनवाधूममुद्वहननृपतेरा
ज्ञोमरणायमृत्यवेभवति॥ अन्यदप्याह॥स्निग्धःस्थूलःसमशृंगोविशालस्तुंगश्चोदक्चावचेरन्नागवीथ्यां॥
दृष्टःसौम्यैर्नशुभैर्विप्रयुक्तोलोकानंदंकुरुतेतावचंद्रः॥ ॥एवंविधश्चंद्रःशशांकोदृष्टःसतांबालोकानांजना
नांआनंदंतुष्टिंकुरुते॥कीदृशोनिर्मलः स्थूलोतिपीनःसमशृंगःतुल्यविषाणःविशालोविस्तीर्णःउच्चस्तुंगःउ
दगुत्तरेमार्गेनागवीथ्यांनानानुपचनयाम्यानक्शानीत्युक्त्वातस्यांविचरनतिष्ठनसौम्यैःशुभग्रहैर्बुधजीवशुक्रैर्दृ
ष्टोवलोकितः॥ अशुभैःपापैरादित्यभौमसौरैर्विप्रयुक्तोरहितः॥ अन्यदप्याह॥ पैत्र्यमैत्रपुरहूतविशाखात्वा
ष्ट्रमेत्यचयुनक्तिशशांकः॥ दक्षिणेनशुभःशुभकृतस्याद्वायुदक्चरतिमध्यगतोवा॥ ॥पैत्र्यंमघा। मैत्रमनुरा
धा।पुरहूतःज्येष्ठा।विशाखा।त्वाष्ट्रंचित्रा। एतानिनक्षत्राणिशशांकश्चंद्रएत्यप्राप्य दक्षिणेनयाम्येनभागेनयु
दियुनक्तिसंयोगंकरोति॥ तदानशुभअनिष्टफलदः॥ यद्युदक्उत्तरेणचरतिगच्छतिप्रागुक्तेष्वेवनक्षत्रेषुमध्य
गतोवामध्येनगच्छति॥ तदाशुभकृतशुभंकरोति॥ अथपरिघपरिधिपरिवेषइंद्रअमोघरोहितैरावतानां
लक्षणमाह॥ ॥परिघइतिमघरेखातिर्यक्भास्करोदयेस्तेवा॥ परिधिस्तुप्रतिसूर्योदंडस्त्वृजुरिंद्रचापनिभः॥
उदयेस्तेवाभानोर्यदिघोरमयस्तमोघाताः॥ सुरचापखंडमृज्वयदोहितेरावतंदीर्घं॥ ॥परिघइति।भास्क
रस्यादित्यस्योदयेस्तमयेवायातिर्यक्स्थितामेघरेखाभवतिसपरिघःपरिघसंज्ञः॥ तथाप्रतिसूर्यःपरिधि
संज्ञः॥ दंडश्चापनिभःऋजुधनुःसदृशःसत्वृजुःस्पष्टोदंडसंज्ञःउदयेस्तेवेति॥ भानोरादित्यस्यउदयेस्तमये

वाहीर्घा आयामतो रश्मयः किरणास्ते अमोघाख्या अमोघसंज्ञाः सुरचापखंडं मिंद्रधनुःखंडं यदृजुः सरलं तद्रोहि
व॰ सं॰ तसंज्ञं तदेव यदि दीर्घं भवति तदा ऐरावतसंज्ञो यं॥ अथ संध्यालक्षणमाह॥ अर्धास्तमयात्संध्या यावत्तारा न भा
न तारका यावत्॥ ततः परिह्लानिमुखात् भानोरर्धोदयं यावत्॥ तस्मिन्संध्याकाले चिह्नैरेतै शुभाशुभं वाच्यं॥ सर्वैरे
१८५. तैः स्निग्धैः सद्यो वर्षभयं रूक्षैः॥ ॥अर्धास्तमयादिति॥ भानोरवेः अर्धास्तमयादारभ्य यावत्तारका नभसि
व्यक्तीभूता न परिस्फुटास्तावत्पराः संध्या॥ तथा तारकाणामेव तेजः परिह्लानिमुखात् दीप्तिनिवृत्तेरारभ्य यावत्
भानोरर्कस्यार्धोदयस्तावत्पूर्वसंध्या॥ तस्मिन्निति तस्मिन्यथोद्दिष्टसंध्यासमये एतैः प्रागुक्तैः चिह्नैर्वक्ष्यमाणैः
शुभाशुभं फलं वक्तव्यं॥ एतैः संध्यावक्ष्यमाणैश्चिह्नैः पूर्वोक्तैः स्निग्धैः सस्नेहैः सद्यस्तस्मिन्दिने वर्षणं तस्मिन्न
स्निग्धत्वाद्वृष्टिः॥ प्रतिकूलै रूक्षैः सद्यो भयमिति॥ ॥अथ ग्रहस्थितानमाह॥ अच्छिन्नः परिघो वियच्च विमलं
श्यामा मयूखा रवेः स्निग्धा दीधितयः सिताः सुरधनुर्विद्युच्च पूर्वोत्तरा॥ स्निग्धो मेघतरुर्दिवाकरकरालोकि
तो वायुदा वृष्टिः स्याद्यदि वार्कमस्तसमये मेघो महांश्छादयेत्॥ परिघो छिन्नो खंडः सकल इत्यर्थः॥ वियत
आकाशं विमलं निर्मलं रवेरादित्यस्य मयूखा रश्मयः श्यामा श्यामवर्णा दीधितयो रश्मयो मेघाख्यास्तथा
दीधितयः सामान्यमयूखा ये न्ये मेघवर्जितास्ते स्निग्धा निर्मलाः॥ सुरधनुः श्वेतं वियच्चाकाशं निर्मलं पूर्वो
त्तरा चेत्पार्श्वादित विद्युत मेघतरुर्मेघ एव तरुसाकारः स च स्निग्धो निर्मलः॥ अथवा स एव मेघतरुर्दिवाकरकरैः
सूर्यरश्मिभिरालोकितो व्याप्तः॥ तदा वृष्टिर्वर्षणं स्याद्भवेत्॥ यदि वास्तमये स्तमनकाले महान्विपुलो मेघो
घनोर्कं सूर्यं छादयेत्॥ स्थगयेत्॥ तथापि वृष्टिः स्यात्॥ अथार्कचारोक्तं फलमाह॥ ॥खंडो वक्रः कृशो ह्रस्वः
काकाद्यैर्वा चिह्नैर्विक्षितः॥ यस्मिन्देशे रूक्षश्चार्कस्तस्याभावः प्रायो राज्ञः॥ ॥अर्कं आदित्यो यस्मिन्देशे यो राजा
तस्य राज्ञः प्रायो बाहुल्येन अभावो विनाश इत्यर्थः॥ तथा च गर्गः॥ खंडो वा कृष्णवर्णो वा ह्रस्वः पिंगलकोथवा॥ १८५.
यत्रार्को दृश्यते तत्र राज्ञो मृत्युं विनिर्दिशेत्॥ अथ युद्धकाले जयपराजयज्ञानमाह॥ ॥ शार्दूलं समुपयाति पृष्ठ
तो मांसभुक् खगगणो युयुत्सतः॥ यस्य तस्य बलविद्रवो महान् अग्रगैस्तु विजयो विहंगमैः॥ ॥यस्य राज्ञो युयु

त्सतो योद्धुमिच्छतः शार्दूलो सेना मांसभुगामिषादः खगगणः पक्षिसमूहः पृष्ठतः पश्चात्समुपयाति गच्छति तस्य म
हानतिबलस्य सेनाया विद्रवः पलायनं भवति॥ अग्रगैः पुरोगैर्विहंगमैः पक्षिभिर्विजयो भवति॥ ॥अथ गंधर्वपु
रलक्षणमाह॥ भानोरुदये यदि वास्तमये गंधर्वपुरप्रतिमा ध्वजिनी॥ विंबं निरुणद्धि आछादयति तदा नृपतेरा
त्तः समरं संग्रामे भयसदृशं प्राममायातं चेद्दृश्यासंश्रूयात्॥ तथा च गर्गः॥ आदित्ये सरथा सेना संध्याकालेय
दा भवेत्॥ प्रत्यासन्नं विजानीयात् भूमिपस्य पराजयमिति॥ ॥अथ संध्यालक्षणमाह॥ दिग्दाहशांता मृगद्विजघु
ष्टा संध्या स्निग्धा मृदुपवनाश्च पांशुध्वस्ता जनपदनाशं धत्ते रूक्षा रुधिरनिभा वा॥ ॥संध्याशांतैरनकैर्भि
मुखैर्मधुरस्वरैश्चाङ्गैः पक्षिभिः मृगैरारण्यपशुभिश्च घुष्टाकुल नादाकुलाः शुभदा तथा स्निग्धा निर्मला मृ
दुपवना अल्पवाता च या रता॥ पांशुनाध्वस्ता रूक्षा रुधिरनिभा वा लोहितवर्णा जनपदानां लोकानां नाशं क्षयंध
त्ते ददाति॥ आत्मनः पौरुषत्वं दर्शयितुमाह॥ यद्विस्तरेण कथितं मुनिभिस्तदस्मिन् सर्वं मया निगदितं पुनरु
क्तवर्ज्यं॥ श्रुत्वापि कोकिलरुतं बलिभुग्विरौति यत्तत्तत्स्वभावकृतमस्य न पिकेन तुल्यं॥ ॥मुनिभिर्गर्गादिभिर्म
यूरचित्रकं व्यासेन विस्तरेण कथितमुक्तं॥ तत्सर्वमस्मिन्मयूरचित्रके मया पुनरुक्तवर्जं निगदितमुक्तं॥ आदौ ता
वन्मयूरचित्रकं पुनरुक्तं तत्रापि मुनिभिः पुनरुक्तं कृतं तन्मया पुनरुक्तं नोक्तं॥ यद्यप्येवं तथापि कोकिलरुतं श्रु
त्वा स्थितं श्रुत्वा बलिभुक् काकः स्तरलसारेण विरौति यत्तत्तस्य काकस्य स्वभावकृतं प्रकृतिभवमेवं॥ न पिकं कोकि
लं पराजेतुं शक्नोति॥ अनेनात्मनः पैशाल्यं प्रदर्शितं भवति॥ ॥इति श्रीभट्टोत्पलविरचितायां संहिता
विवृतौ मयूरचित्रकं नामाध्यायः॥ ४७॥ ॥७॥ ॥अथ पुष्यस्नानं व्याख्यायते॥ ॥तत्रादावेव
प्रयोजनप्रदर्शनार्थमाह॥ ॥मूलं मनुजाधिपतिः प्रजातरोस्तदुपघातसंस्कारात्॥ अशुभं शुभं च लोके
भवति यतोतो नृपतिचिंता॥ १॥ प्रजातरोर्जनवृक्षस्य राजा मूलं॥ तदुपघातात्तस्य विनाशाद्दोषेण जनपदे
अशुभमनिष्टं भवति॥ तत्संस्कारा ऽश्वशामिष्टं भवति॥ यतो यस्मादेतो ऽतात् हेतोर्नृपतिश्चिंता राज्ञः शुभदः
प्यर्थं चिंता कार्या॥ यतो मूलात्फलसंभवः॥ तद्विनाशात्सर्वनाशः॥ एवं राजान्परस्वार्थं सर्वथा चिंता

वृ०सं. कार्या॥ तत्रागमप्रदर्शनार्थमाह॥ ॥ याप्याख्याता शांतिः स्वयंभुवा सुरगुरोर्महेंद्रार्थे। तां प्राह वृद्धगर्गः प्राह य
था भार्गवे: शृणुतां॥ याशांतिः स्वयंभुवा ब्रह्मणा महेंद्रस्य सुराधिपत्यार्थं सुरगुरोर्बृहस्पतेर्व्याख्याता कथिता॥ तांशांति
वृद्धगर्गः प्राप्य यथा येन प्रकारेण भार्गवमुनिवरस्य शिष्यस्य प्राह उक्तवान् तांशांतिं शृणु आकर्णय॥ तथा च गर्गः
१८६ देवाश्च दैतेयैः सार्धं स्पर्धमाना अभिमानिनः परस्परं महायुद्धं चक्रुः सर्वैः सुराः सुराः॥ ततो दैत्यगणैः क्रुद्धैर्देवास
र्वे विनिर्जिताः॥ ततोगिराः सुरगुरुः ध्यानासक्तो भवत्पुरा॥ पुरंदराभिषेकार्थं बृहस्पतिरकल्पयत्॥ नक्षत्रं पुष्य
मात्मीयं यस्य देवो बृहस्पतिः॥ तेन देवोभिषिक्तस्य देवराजः पुरंदरः॥ ततो बलसमाक्रांतो नाशयामास दानवान्॥ दे
वाश्च हृष्टमनसः पुरीं प्राप्यामरावतीं॥ पुष्यस्नानं बलकरं तदारभ्य प्रवर्तितं॥ इति॥ ॥अथ पुष्यस्नानमाह॥ पुष्य
स्नानं नृपतेः कर्तव्यं दैवविन्पुरोधाभ्यां॥ नातः परं पवित्रं सर्वोत्पातांतकरमस्ति॥ ॥नृपते राज्ञः पुष्यस्नानं पु
ष्यनक्षत्रेण स्नपनं दैववित्पुरोधाभ्यां। कर्तव्यं॥ दैववित्सांवत्सरः॥ पुरोधा आचार्यः आभ्यां अतः स्नानपु
ष्यस्नानात परं प्रकृष्टं पावनं पवित्रं तथा सर्वेषामुत्पातानां नाशकरमन्यत नास्ति न विद्यते॥ कस्मिन्स्थाने पुष्य
स्नानं कुर्यादित्याह॥ श्लेष्मातकाक्षकंटकिकटुतिक्तविगंधिपादपविहीने। कौशिकगृध्रप्रभृतिभिरनिष्टविहगैः
परित्यक्ते॥ तरुणतरुगुल्मवल्लीलताप्रतानान्वितवनोद्देशे॥ निरुपहतपत्रपल्लवमनोहरमधुरद्रुमप्राये॥ ॥
श्लेष्मातकेति॥ एवंविधे वनोद्देशे वनभूमौ पुष्यस्नानं कुर्यात्॥ कीदृशे श्लेष्मातको वृक्षविशेषः अक्षो विभीतकः॥
कंटकिनः संकंटकाः खदिरादयः। कटुकोमरीचादिः तिक्तो निंबादिः। विगंधिनो दुर्गंधा वृक्षास्तैर्विहीने वर्जिते।
तथा कौशिक उलूकः। गृध्रप्रभृतयः काककंकप्लवश्येनकपोता अप्रशस्ताः पक्षिणस्तैर्वर्जिते। तरुणतरुगुल्मेति।
तरुणैरभिनवैर्वृक्षैर्गुल्मैरेकमूलैः शाखासमूहैः सस्तंबैर्वल्लीभिर्व्रततिभिश्च लताप्रतानैर्लताविस्तारैरन्वि
ते युक्ते वनोद्देशे। तथा निरुपहतानि निरुपसर्गाणि पर्णानि पल्लवा अभिनवा अंकुरास्तेषां मनोहराणां चित्ताह्ला १८६
दकानां मधुरस्वादूनां द्रुमाणां वृक्षाणां प्रायो बाहुल्यं यत्र अन्यत्कीदृशे इत्याह॥ ॥ कृकवाकुजीवजीवकशि
खिशतपत्रचाषहारीतैः। कुररचकोरकपिंजलवंजुलपारापतशुकैः॥ कुसुमरसपानमत्तद्विरेफपुंस्को

किलादिभिश्चान्यैः॥ विरुते वनोपकंठे क्षेत्रागारेषु चाथवा॥ कृकवाक्विति। अथवा कीदृशे वनोपकंठे वनसमीपे पुष्यस्ना
नं कुर्यात्॥ कीदृशे कृकवाकुः कुक्कुटः॥ जीवजीवकः पक्षिविशेषः। शिखी मयूरः। शतपत्रः दार्वाघाटः पक्षी
चाषहारीतौ पक्षिविशेषौ तैर्विरुते॥ कुसुमरसेति। तथा कुसुमानां पुष्पाणां रसपानेन रसास्वादनेन मत्ताः प्रहृष्टा द्वि
रेफा भ्रमरास्तथान्ये च ये पुंस्कोकिलादयः पुंस्कोकिलः प्रधानकोकिलः। आदिग्रहणाच्चक्रवाकसारसादिग्रहणं॥ तैरन्वि
तं कार्श्वतैरपि विरुते॥ अथवा अशुद्धक्षेत्रागारे क्षेत्रे पुण्यस्थाने य आगारो गृहं तत्र क्षेत्रागारमपि कदाचिद्रुधिर
मद्यसंपर्कादशुचि भवत्यत उक्तं क्षेत्रागारेषु चोद्दाते। अन्यत्कीदृशे स्थाने कुर्यादित्याह॥ ॥ हृदिनीविलासिनीनां जल
खगनखविक्षतेषु रम्येषु। पुलिनजघनेषु कुर्याद्रमनसां प्रीतिजननेषु॥ हृदिन्यो नद्यः॥ ता एव विलासिन्यो वारयोषि
तः। तासां यानि पुलिनानि तीराणि तान्येव जघनानि तेषु प्रदेशास्तेषु कुर्यात्॥ कीदृशेषु॥ जलखगनखविक्षतेषु॥
जलखगा जलचराः पक्षिणस्तैर्नखाविक्षतेषु॥ करजाद्भतेषु॥ तथा रम्येषु रमणीयेषु हृन्मनसां हृत्स्यमनसो हृदयमन
सश्च तस्य च प्रीतिं पुष्टिं जनयंत्युत्पादयंति॥ तथाभूतेषु। अत एव विलासिनीनां जघनेषु सादृश्यं। अन्यत्कीदृशेषु
कुर्यादित्याह॥ ॥ प्रोत्फुल्लहंसच्छत्रे कारंडवकुररसारसाकुले। कुमुदेंदीवरनयने सरसि मदस्थाक्षकांतिधरे॥ अथ
वा सरसि कुर्यात्॥ कीदृशे सरसि। मदस्थाक्षकांतिधरे॥ मदस्थाशीर्षस्य कांतिं यश्च भर्ति तस्मिन्नाक्रिभुते प्रोत्फु
ल्लहंसच्छत्रे॥ प्रोत्फुल्ला उड्डीयमाना ये हंसास्त एव छत्रमातपत्रं यत्र॥ तथा कारंडवैः कुररैः सारसैश्च पक्षिविशेषैः कृत
गीतकृतरुतं यत्र॥ कुमुदानि विकसितानि इंदीवराणि नीलोत्पलानि नयनानि नेत्राणि यस्मिन् अत एव मदस्थाक्षा
सादृश्यं॥ अन्यत्कीदृशे कुर्यादित्याह॥ ॥ प्रोत्फुल्लकमलवदनाः कलहंसकलस्वनप्रभाषिण्यः। प्रांतुंगकूलकुचा
यस्मिन्नलिनीविलासिन्यः॥ यस्मिन्स्थाने नलिन्यः पद्मिन्य एव विलासिन्यो वारयोषितस्तत्र कुर्यात्॥ कीदृश्यः प्रो
त्फुल्लकमलवदनाः। प्रोत्फुल्लानि विकसितानि कमलानि पद्मानि तान्येव वदनानि मुखानि यासां॥ तथा कलहंसा
राजहंसास्तेषां कलं मधुरं यत्स्वनितं तद्वत्प्रभाषणं यासां॥ तथा प्रांतुंगान्युच्चानि यानि कूलानि कूलानि कृत
कास्तान्येव कुचाः स्तना यासां ताः। अत एव विलासिनीनां सादृश्यं॥ अन्यत्कीदृशे स्थाने कुर्यादित्याह॥ ॥ कुर्वा

गेमंथजफेनलवशास्त्ववगुरक्षतोपचिते॥ अनन्चिप्रसृतद्रुतबलितवत्सोत्सवगोव्रे॥ अथवान्यैर्विशेगोव्रेगोः स्था
वा०रा० नेकुर्यात। कीदृशे। गोगेमंथजफेनलवशरजखुरक्षतोपचिते॥ गोः गेमंथोगोगेमंथः। गवांचर्वितचर्वणं॥ तस्माज्जा
तोयोमोफेनलवोलालाबिंदुः तथाग्रावूद्धेमयं॥ तस्यखुरैः क्षतैःस्थानिक्षतानिछिद्राणितेरुपचितेसंयुक्ते॥ तथाअ
१८० नतिचिरप्रसृताः सद्यएवजातायेवत्सास्तर्णकास्तेषांद्रुतंद्रुतंकारशब्दस्तथाबलितंक्रीडितंतदैवोत्सवोमहोत्सवःयत्र॥ अ
न्यत्कीदृशेष्वन्येकुर्यादित्याह॥ ॥अथवासमुद्रतीरकुशलागतरत्नपोतसंबाधे॥ घननिकुलद्धिनालचरसितखग
द्युवल्लीकृतोपांते॥ अथवासमुद्रतीरसंमार्गोपांतेकुर्यात॥ कीदृशे॥ कुशलेनाविघ्नेनागताः प्राप्तायेरत्नानांमणीनांपो
ताः प्रवहणानितैः संबाधेव्याप्ते॥ तथाघनाः संततायेनिकुलाःक्षविशेषास्तेषुयेलानाभिःप्रालज्जलचरजलप्राणि
नस्तथासिताः श्वेताः खगाःपक्षिणस्तैः उपवल्लीकृताश्छिन्नाउपांताः समीपायत्र। अन्यत्कीदृशेकुर्यादित्याह॥ ॥
क्षमयाक्रोधउबलितःसिंहास्मृगाभिभूयंतेयेषु॥ दत्ताभयखगमृगशावकेषुतपाश्रमेष्वथवा॥ अथवाआश्रमेषुमु
निनिवासेषुकुर्यात॥ कीदृशेषु॥ येषुसिंहाद्दूरिमृगाद्दूरिण्यापरंजीयते॥ कथंक्षमयाक्रोधउबल्जितः॥ तथाक्ष
मयाक्षांत्याक्रोधोजितः॥ तथाखगानांपक्षिणांमृगाणामेणानांचसंबंधिनोयेशावकाःपोतकास्तेभ्योदत्ताभयाद
त्तायेषु॥ ॥अन्यत्कीदृशेषुकुर्यादित्याह॥ ॥कांचीकलापनूपुरगुरुजघनोद्वहनाद्धनविघ्नितपदाभिः॥ श्रीमति
मृगेक्षणाभिर्युतेगृहेन्यमृतवल्गुवचनाभिः॥ अथगृहेवरमनिकुर्यात॥ कीदृशे। श्रीमति॥ श्रीर्विद्यतेयस्मिन॥ त
थाएवंविधाभिः स्त्रीभिर्युक्ते। किंभूताभिः कांचीमेखलातस्यायासौकलापोविस्तारः तस्योद्वहनंतेनधारणेनतः
थानूपुरेमंजीरेतयोरप्युद्वहनेनविघ्नितपदाभिः॥ तथागुरुघनस्याविस्तीर्णोन्नितंबस्यचोद्वहनेनविघ्नितौमंदगा
मिनौपादौचरणौयासांताभिः। तथामृगेक्षणाभिर्हरिणनेत्राभिः अन्यभृतवल्गुवचनाभिः। अन्यभृतः को
किलस्तद्वद्वल्गुरम्यंमधुरंवचनंयासांताभिर्युक्तेगृहे॥ अन्यत्कीदृशेकुर्यादित्याह॥ ॥पुण्यप्रायतनेष्वतीर्थप्र १८०
स्थानरम्यदेशेषु। पूर्वोदक्प्लवभूमौप्रदक्षिणांभोवहास्यांच॥ पुण्यपवित्रेपायतनेष्वपुकुर्यात॥ पुण्येषुतीर्थेषुस
लिलाशयेषु। उद्यानेषुपवनेषुरम्येषुरमणीयेषुदेशेषुस्थानेषु। तथापूर्वोदक्प्लवभूमौपूर्वस्यांदिश्युत्तरस्यांवाय

स्यांभूमौप्लवोनिम्नता॥ तथाप्रदक्षिणांभोवहास्यांप्रादक्षिण्येनयस्यांमंभःपावनीयंवहति॥ तथाचगर्गः। समुद्रती
रेचाद्यानेनदीनांसंगमेशुभे॥ महान्द्रदेःथवानार्थेदेवतायतनेथवा॥ सर्वर्तुकुसुमोपेतेवनोद्देशेवरेथुने॥ गृहेरम्येवि
विक्तेरापुष्यस्नानंसमाचरेत॥ ॥अथभूलक्षणमाह॥ भस्मांगारास्थ्यूषरयातुधनकेना श्वभ्रकर्करायामेः॥ श्वावि
न्मूषकाविवरैर्वल्मीकैर्याचसंत्यक्ता॥ धात्रीवनामृगंधाम्लिगधामधुरासमाचिततायाय॥ सैनावामेपेपायोजस्थित
त्वायथायोगं॥ भस्मांगारेति। याधात्रीभूरेवंविधातस्यांपुष्यस्नानंकुर्यात॥ कीदृशीभस्मनाभूतिनाअंगारैर्दग्धः
काष्ठैःअस्थिभिः ऊषरसिकताच॥ यातुधान्यचर्मभिःकेशोपांतिश्वभ्रैर्गर्तैः कर्कराः प्रतणितोमृगजातयः॥ तेषांग
द्वाणिविद्यंतेयस्यांतेर्यारहिता॥ तथाश्वाविद्धिर्बिलवासिभिः प्राणिभिर्मूषकविवरैरालुबिलैर्वल्मीकैश्चयासंत्यक्ता
।वल्मीकःकृतेर्मृत्पुंजैः रहितासाशुभा॥ सचश्वत्रः समृत्यंये॥ नकेवलंभस्मांगारादिदोषरहिता॥ तथाघनात्मसाग
मृगंधाश्शोभनगंधास्निग्धामस्निग्धामधुरामृत्वादुसमानिम्नोन्नतरहिता॥ एवंविधाविज्ञेयावभवति। नकेवलं
स्नानेसैन्यनिवेशविभागेनयोजयितव्याग्राह्या॥ तत्रविधानमाह॥ निःकम्प्यपुरान्तकेदेवतामान्ययाज्ञकाप्रा
च्यां। कीदृशेवाकृत्याबलिंदत्त्वाग्रधिपायांवा॥ कालाक्षतदधिकुसुमैः प्रयतःप्रणतःपुरोहितःकुर्यात॥ आ
वाहनमथमंत्रस्तस्मिन्मुनिभिःसमुद्दिष्टः। निःक्रम्येति॥ दैवज्ञःसांवत्सरःकः। आमात्योमंत्रीयाज्ञकःपुरोहितः॥
निःदैवज्ञामात्ययाज्ञकाःपुरान्नगरान्नगरान्निःक्रम्यनिर्गत्यप्राच्यांपूर्वस्यांदिशिकौबेर्यामुत्तरस्यांवाईशाधि
पांदिशान्यांवादिशिबलिमुपहारंकुर्यात॥ लाजाक्षतेति। प्रयतःसंयतःप्रणतःप्रह्वः पुरोहितोलाजाक्षतदधिकु
सुमैर्लाजाभिरक्षतैर्यवैर्दध्नाक्षीरविकारेणकुसुमैःपुष्पैरेतैरावाहनमामंत्रणंकुर्यात॥ तस्मिन्नावाहनेमुनि
भिर्गर्गादिभिरयंवक्ष्यमाणोमंत्रः समुद्दिष्टःकृतः तंचाह॥ ॥आगच्छंतुसुराःसर्वेयेत्रपूजाभिकांक्षिणः॥ दिशोना
गाद्विजाश्चैवयेचान्येअंशभागिनः॥ आवाहितांततःसर्वान्निवंप्रयात्पुरोहितः। श्वःपूजांप्राप्स्यथास्मिंतिदत्वायथाशांति
महीपतेः। आगच्छंत्विति। सर्वेसुरादेवायत्रास्मिन्यागेपूजाभिकांक्षिणोऽर्थिनस्तेसर्वेएवआयांतु॥ तथार
ग्राआशानागाः पंनगाद्विजामुनयः। येचान्येनअपरेनानुकीर्तिताअंशभाजिनोभागभाजस्तेआयांतु॥ आवा

ब० संहि. स्विनमिति। एवमनेन प्रकारेण सर्वान्दोषानाशानोपनिमंत्र्य ततः पश्चादनंतरं पुरोधा आचार्यो ब्रूयादिदं॥ येत्वमु
राजा गतरात्रिकः प्रातः पूजां मत्याप्य कुर्यात् मङ्गलवतोरातः शांतिं श्रेयोर्थं तायास्यंतिततः किं कुर्यादित्याह॥ आ
१८८ वाहितेषु कृत्वा पूजां तां सर्वान् संयुक्त॥ मदमत्स्यान्नामितया यात्रायां स्वप्नविधिरुक्तः। तेष्वावाहितेषु मुख्यपूजां नीत्वा
वाविधाय तां सर्वां रात्रौ निदेवता मात्यथा कार्य मेयुः तिष्ठेयुः। किमर्थं सदसत्स्वप्ननिमित्तं शुभाशुभसूचनं दर्शना
र्थं यात्रायां यस्य स्वप्नेषु यात्रायां स्वप्नविधिरुक्तः। तथा च यात्रायां॥ दुकूलमुक्तामणिभिर्नरेन्द्रः समंत्रिदैवज्ञपुरोहितोंऽतः
स्य देवतागारमनुप्रविश्य निवेद्य स्थाने त्रिदशेश्वराचीं। अभ्यर्च्य मंत्रेण पुरोहितस्तां मधश्च तस्या भुवि संस्तरीयां॥ द
र्भैश्च कृत्वा स्तरमक्षतैर्लाजैः सहस्रमंत्राक्षितमर्वपैश्च॥ पूर्णैर्घटैः पुष्पफलाभिधानैः नानाशास्त्रदर्शनतुरैः क्रमेण॥
यज्जाग्रतो दूरमुदैति दैवमावर्त्य मंत्रं प्रयतः स्विपेत्तु। कृत्वोर्ध्वमुक्तं दक्षिणपार्श्वशायी स्वप्नं प्रतीक्षेत यथोपदिष्टं॥ न
मो नित्यं त्रिनेत्राय रुद्राय वरदाय च। वामनाय विरूपाय स्वप्नाधिपतये नमः॥ भगवन्देवदेवेश शूलभृद्वृषवाहन॥
इष्टानिष्टं ममाचक्ष्व स्वप्ने सुप्तस्य शाश्वतं॥ एकाग्रबुद्धिर्नितरां सुप्तः प्रयतमानसः॥ निशांते पश्यति स्वप्नं शुभं वा
यदि वाशुभं॥ ततः किं कुर्यादित्याह॥ अपरेद्युः स्नानप्रभाते संभारानुपहरेद्यथोक्तगुणान्॥ गत्वा च निप्रदेशेऽपरा
काश्चाप्यत्र मुनिर्गाता॥ अपरेद्युः स्नानहुताद्यहिनप्रभातसमये यस्मिन्नेवावनिप्रदेशे भद्रं गत्वा यथोपयोज्यान्।
यथोक्तगुणान् संभारानुपहरेत्॥ उपढौकयेत्। तत्राप्यस्मिन्नर्थे श्लोका मुनिगीता मुनिना सदृश्या गर्गेणोक्ता
ताः कथिताः अपितावत्संभावनायां तांश्चाह॥ ॥ तस्मिन्मंडलमालिख्य कल्पयेत्तत्र मंदिरं॥ नानारूपाकारवंति
स्थानानि विविधानि च॥ पुरोहितो यथास्थानं नागान् यक्षान् सुरान्पितॄन्॥ गंधर्वाप्सरसश्चैव मुनीन् सिद्धांश्च
ब विन्यसेत्॥ ग्रहान्सनक्षत्रान् रुद्रांश्च सह मातृभिः॥ स्कंदं विष्णुं विशाखं च लोकपालान् सुरस्त्रियः॥ वर्णकैर्विविधैः
कृत्वा हृद्यैर्गंधगुणान्वितैः॥ यथास्वं पूजयेद्विद्वान् गंधमाल्यानुलेपनैः॥ भक्ष्यैरन्यैश्च विविधैः फलमूलामिषैस्तथा १८८
॥ पानैश्च विविधैर्हृद्यैः सुराक्षीरासवादिभिः। तस्मिन्मंडलमालिख्येति। तस्मिन्भू प्रदेशे यत्र पुष्पस्नानं क्रिय
ते पूर्वोद्दिष्टलक्षणे। अस्माभिः कार्षकुंडकीलत्वादिदोषरहिते मंडलं मालिख्य विरच्य तस्मिन्स्थाने मंदिरं भित्तिं नाना

रूपाकारवंतं नानाविधानां रूपाणामाकारवंतं नानंतथा भूतं। तथा विविधानि नानाप्रकाराणि स्थानानि संनिवेशस्थानानि वर्ण
येत्॥ ततः पुरोहितः आचार्यो नागान् पन्नगान् यक्षान् गुह्यकान् सुरान्देवान् पितॄन्देवविशेषांश्च यथास्थानं यथा
प्राधान्यानुसारेण च समालिखेत्॥ गंधर्वान् देवयोनयः। अप्सरसो देवस्त्रियः। मुनीन् ऋषीन् सिद्धान् देवयोनीं
न विन्यसेत् लिखेत्॥ ग्रहानादित्यादीनन् क्षत्रैरश्विन्यादिभिः सह॥ तथा रुद्रान् मातृभिर्देवताभिः सह लिखेत्॥ स्कंदं
कुमारं विष्णुं नारायणं विशाखं स्कंदं लोकपालानिंद्राग्नियमनिर्ऋतिवरुणवायुकुबेरेशानान् सुरस्त्रियो देवप
त्न्यः यथेंद्राणी गौरी लक्ष्मी वर्णकैरितिविविधैर्नानाप्रकारैर्वर्णकैर्धातुप्रदेशोत्थैः गैरिकहरितालपीतकुसुम्भामिश्र
कैर्हृद्यैश्चित्ताह्लादकैर्गंधगुणान्वितैः सौगंध्ययुक्तैः तथा भक्तैः कृत्वा विद्वान् पंडितः गंधैः सुगंधद्रव्यैः माल्यैः स्र
ग्भिः अनुलेपनैः समालंभनैर्यथास्वं पूजयेदर्चयेत्॥ एतदुक्तं भवति॥ यो यस्मिन्स्थाने लिखितो वर्णकानुसा
रेण स तत्रैव गंधमाल्यैरनुलेपनैर्यथार्हं पूजयेदर्चयेत्॥ एतदुक्तं भवति॥ यथा भक्ष्यैर्नानाप्रकारैर्मोदककोशिका
पूपादिभिः फलैः श्रीफलादिभिर्मूलैः प्रसिद्धैः आमिषैर्मांसैः विविधैर्नानाप्रकारैः हृद्यैर्हृदयप्रियैः पानैः क
रमर्दकरैः तथा सुरया मद्येन क्षीरेण दुग्धेन आसवेन मध्वासवेन आदिग्रहणात् लेह्यचोष्यपेयादिभिरन्यै
श्च पानविशेषैः पूजयेत्॥ अतः परं पूजां कथयामीत्याह॥ ॥ कुर्यात्साम्प्रतः परमदं पूजामस्मिन्यथाभिलषि
तानां। ग्रहयज्ञेयः प्रोक्तो विधिः ग्रहाणां स कर्तव्यः। मांसौदनमत्स्याद्यैः पिशाचादितितनयदानवाः पूज्याः। अभ्य
ञ्जनांजनतिलैः पितरो मांसौदनैश्चापि॥ सामयजुर्भिर्मुनयो गंधैः स्रग्भिश्च धूपमाल्ययुतैः। अश्लेषकुब
हुवर्णैर्भ्रमरैणाभ्यर्चयेन्नागान्॥ धूपाज्याहुतिमाल्यैर्विबुधानन्नैः स्तुतिप्रणामैश्च॥ गंधर्वान्स्मर
सो गंधैर्माल्यैश्च ससुगंधैः। शेषान्सार्ववार्णिकबलिभिः पूजांश्च सेतं च सर्वेषां॥ प्रतिसरवस्त्रपताकाभू
षणयुक्तं पवितानि॥ कथयामीति॥ भतो स्मात्परमनंतरं अहमस्मिन्नां गलयथाभिलषितानां वन्यलतानां पू
जां मर्चां कथयामि वक्ष्यामि॥ ग्रहाणामादित्यादीनां यात्रायां ग्रहयज्ञे यो विधिः प्रोक्तः कथितः स एवात्र कर्तव्यः
तद्यथा॥ यात्रायां ग्रहयज्ञे तत्रार्चा ताम्रमयी। ह्री। सवितुः पालाशिकासमित्स च। आक्रस्मातिच। मंत्रोरका

गंधाः सदूगारुणा ॥ मायात मालितळातावृ मुक्तांश्चिणकानखिदाय भोज्यः ॥ बकुला कीगत्सवपल्लवा सप्तुका कुसुमप्रहा
व॰सं॰ च ॥ अत्र्यंतात संमिते भ्यादिभ्यो दक्षिणाद्दितान्निभ्यः ट्टियादवकनकमई सदृष्ट किरणं समुद्दिश्य इति । मांसौदन
मत्स्यादौरिति । पिशाचादि वक्षोनयः । दितिजादित्यादानवादनुपुत्राः । मांसेनामिश्रेण ओदनेन भक्तेन मधेनमीधुनाच
१८९ पूज्याः । अर्चनीयाः । तथापितरअभ्यंजनेन स्निदानेनं तैललेपाभ्यंगेन ॥ अंजनेन कज्जलेनांजितेमांसौदनेन च ॥ एते
पूज्याः । सामऋग्भिरिति । मुनयः ऋषयः सामभिः यजुर्भिः ऋग्भिश्च ॥ तथागंधैः सुगंधद्रव्यैर्धूपमाल्य यति धूप
गुग्गुलुप्रभृतिभिश्च ॥ माल्यैः स्रग्भिः महितैर्नागान पंनगान ॥ अर्चयेत वर्णार्थत्रयकृतांवर्णानां संक्षेपः संयोगाना
त्रितस्त्रिमधुरेणत्रमधुना घृतेन शर्करयाचेति ॥ एतैःपूजयेत ॥ धूपाद्यादूतिमाल्यैरिति । विबुधानदेवान धूपा
द्येन घृतेना हुतिभिर्होमैर्माल्यैः स्रग्भिः स्तुतिभिः स्तोत्रैः प्रणामैर्नमस्कारैश्च पूजयेत ॥ गंधवानपारसश्च गंधेसु
गंधद्रव्यैर्माल्यैः स्रग्भिश्च पूजयेत ॥ सुसुगंधैः शोभनगंधैः ग्रोषांश्चेति ॥ शेषान यक्षान सार्ववर्णिकबलिभिः
पूजयेत ॥ सार्ववर्णिकैर्बहुवर्णकैश्च बलिभिरुपहारैर्बहुद्रव्यमिश्रितैः पूजयेत ॥ सर्वेषां मंडलं यथाभिलषितानां
पूजांन्यसेत कारयेत ॥ तथाप्रतिसरं ॥ अंलंगनरंकुंकुमेनरक्तसूत्रंप्रतिसरं । पताकाध्वजाः । भूषणमलंकरणं । य
तोपवीतं प्रसिद्धं । एतानिच सर्वेषान्यसेत ॥ ततोकिंकुर्यादित्याह ॥ मंडलपश्चिमभागंकृत्वाग्नेर्दक्षिणेनथवावेद्यां
। आद्वात संभारान्दर्भानदीर्घानिगर्भांश्च ॥ मंडलस्य पश्चिमेभागे पश्चिमायांदिशिदक्षिणेनथवावेदिं कुर्यात ।
वेदीलक्षणमस्माभिः प्रागुक्तंनाग्नेन ॥ यस्यांवेद्यामग्निकुल्लाकुतान्दानि प्रज्वाल्यततः संभारानुपयोगिकानभा
हृत्य आनटो कयेत ॥ दर्भानदीर्घानअच्छिन्नान ॥ अगर्भानगर्भरहितांश्च दद्येत ॥ ॥ अन्यतकिमित्याह ॥ काश्या
दक्षतदधिमधुसिधार्थकगंधसुमनसाधूपाः ॥ गौरसर्षपान्तिलाः सर्वजमधुरादिफलानि ॥ मघृतस्यपा
यसस्यचतत्रशरावाणि तेषुसंभारः ॥ पश्चिमेवेद्यां पूजांकुर्यात स्नानस्य मा वेदी ॥ ॥ कांडेनेति ॥ कांडाः प्र १८०
सिद्धाः । आद्यंघृतं ॥ अक्षतायवाः । दधिक्षीरविकाराः । मधुमाक्षिकं ॥ सिधार्थाः गौरसर्षपाः । गंधाः सुगंध
द्रव्याणि । सुमनसः पुष्पाणि ॥ धूपः प्रसिद्धः । गौरिलंनागोपितसंभवाः । अंडतंप्रसिद्धं तिलाः । नवंसर्वजा

नि आन्नादयदुत्ताततान्युसंनानियानिमधुराणिफलानि ॥ सघृतस्यपायसस्येति ॥ तथातत्रतस्मिनमंडलेसघृतस्यघृ
तसहितस्यपायसस्यशरावाणिमृन्मयानिपात्राणिपरिपूर्णानि दातव्यानि ॥ तैश्च संभारैः पूर्वोक्तैः पश्चिमवे
द्यांपूजांकुर्यात यतः सावेदीस्नातस्यतस्यांस्नानं ॥ कार्यमित्यर्थः ॥ तत्रकिंकुर्यातादित्याह ॥ ॥ तस्याःकोणेषुदृढा
नकलशानसितसूत्रेणवेष्टितग्रीवान ॥ सक्षीरवृक्षपल्लवफलापिधानान्न्यसेताष्य ॥ पुष्पस्नानविमिश्रेणां
भसापूर्णान्सिरत्नांश्चपुष्पस्नानद्रव्याण्यापह्यतगर्भगतानि । तस्याःकोणेष्विति ॥ तस्याः वेद्याः कोणेषुचतुर्ष
दृढानअभग्नानकलशान्घटानसितसूत्रेणवेष्टितग्रीवानसितेनश्वेततंतुनाग्रीवाकंठोवेष्टितायेषांतानव्य
वस्थाप्यस्थापयित्वा ॥ कीदृशानसक्षीरवृक्षपल्लवफलापिधानानसक्षीराःवृक्षाअश्वत्थादयस्तेषांयेपल्लवाअभिन
वपत्राणितथान्यानिचफलानितान्येवासमंतानपिधानमाच्छादनंयेषां ॥ अन्यतकीदृशानपुष्पस्नानेनापिमि
श्रेणमिश्रेणांभसाजलेनसंभरितानसरत्नांरत्नसहितांश्चगर्भगतानिमध्यगतानिपुष्पस्नानार्थंद्रव्याण्या
हृत्यातदोकयेत ॥ तथाच्चगर्गः ॥ कलशैर्हेमताम्रैश्चराजतैर्मृन्मयस्तथा ॥ सूत्रसंवेष्टितग्रीवैश्चंदनागरुचर्चितैः
प्रशस्तदृशपत्रैश्चफलपुष्पसमन्वितैः ॥ पुष्पतोयेनसंपूर्णैरत्नगर्भैर्मनोरमैरिति ॥ ॥ अथपुष्पस्नानद्रव्या
ण्याह ॥ ज्योतिष्मतीत्रायमाणामभयामपराजितां ॥ जीवांविश्वेश्वरींपाठांसमंगांविजयांतथा ॥ सहांश्चस
हदेवीचपूर्णकोशांशतावरीं ॥ आरिष्टकांशिवांभद्रांतेषुकुंभेषुविन्यसेत ॥ ब्राह्मीक्षेमांअजांचैवसर्वबीः
जानिकांचनं ॥ मंगल्यानियथालाभंसर्वौषधिरसांतथा ॥ रत्नानिसर्वगंधांश्चबिल्वंचसविकंकतं ॥ प्रजारत
नामपथ्योपधौद्धिरण्यंमंगलानिच ॥ ॥ ज्योतिष्मतीमिति ॥ ज्योतिष्मतीप्रसिद्धा ॥ त्रायमाणाप्रसिद्धा ॥ अभया
हरीतकी ॥ अपराजिताप्रसिद्धा ॥ जीवांजीवंतीं ॥ विश्वेश्वरींपद्मचारिणीं ॥ पाठाप्रसिद्धा ॥ समंगांरक्तमंजिष्ठा ॥ कित्यांच
वां ॥ सहांमुद्गपर्णीं ॥ सहदेवीप्रसिद्धा ॥ पूर्णकोशांप्रसिद्धां ॥ क्षेमांकोत्तगुग्गुलुं ॥ वीरकामितिप्रसिद्धं ॥ अजानिद
कारूणी ॥ सर्वाणिचबीजानि ॥ कांचनंस्वर्णं ॥ अन्यानिमंगल्यानिद्रव्याणिदध्यक्षतसुमनसादीनियथालाभ
मेतानिद्रव्याणियावंतिप्राप्यंते ॥ सर्वाओषधयोरसाश्चसर्वौपधमधुराम्लकषायतिक्तकटुकक्षारास्तथा

वा॰सं॰ स्नानिमणिविशेषाः सर्वसुगंधाश्च निःशेषाणि सुगंधद्रव्याणि बिल्वं श्रीफलं॥ मधिकं कृतं बेकलन फलेन मदूमना
सनाख्यायाओषधयः यथालयंती जीवपुत्रापुनर्नवा विष्णुक्रांता बाराही ब्राह्मण्यं सुवर्णादयो धातवः मंगला
१९० निमंगलवंत्यो याधानि॥ यथागोरोचनासर्षपा दूर्वा हस्ति मदादयेन माहि॥ ॥ततः किं कुर्यादित्याह॥ आद्ावन
डुहश्चर्मत्रस्यामंद्रतायुषः॥ प्रशस्तलक्षणभृतः प्राचीनग्रीव मास्तरेत॥ ततो वृषस्य योधस्य चर्मरोहित मक्षः
सिंहस्याथ तृतीयं स्यात्व्याघ्रस्य च ततः परं॥ बलानितानि चर्माणि तस्यां वेद्यामुपास्तरेत॥ शुभे मुहूर्ते संप्रा
प्ते पुष्य युक्ते निशाकरे॥ ॥आद्ावति॥ आदौ प्रथम मनुडुहो बलीवर्दस्य त्रयवार्धस्य संहृतायुषो
मृतस्य॥ कीदृशस्य प्रशस्तलक्षणभृतः। प्रशस्तानि गोलक्षणानि लक्षणानि यो बिभर्ति धारयति तस्य
तस्य प्राचीनग्रीवं पूर्वाभिमुखकंठमास्तरेत प्रसारयेत। ततोनंतरं योधस्य वृषस्य रोहितं चर्म अक्षतमच्छिद्रं
मास्तरेत॥ द्वितीयं तदनंतरं सिंहस्य तृतीयं च मास्तरेत। ततः परं चतुर्थं व्याघ्रस्यास्तरेत। तानि बलानि चर्मा
णि तस्यां प्रागुक्तायां वेद्यां उपास्तरेत। प्रसारयेत। तस्मिन्काले निशाकरे चंद्रे पुष्य युक्ते शुभे च मुहूर्ते क्षणे संप्रा
प्ते॥ ततः किं कुर्यादित्याह॥ भद्रासनमेनकारितं कनकरजतताम्राणां॥ क्षीरितरुनिर्मितं वाकिन्यास्यं चर्म
णामुपरि। त्रिविधस्यो कुर्यादुत्तः पादार्धिकोर्धयुतश्च॥ मांडलिकानंतरजित्समस्तराज्यार्थिनां शुभ
दं॥ ॥भद्रासनमिति॥ कनकं सुवर्णं रजतं रूप्यं कनकरजतताम्राणामेकतमेन नान्येन। तेषां प्रागुक्तानां च
र्मणामुपरि उपरिष्ठितानामुपरि विन्यास्यं स्थाप्यं॥ त्रिविधस्यो श्रायस्याति॥ तस्य भद्रासनस्य त्रिविधस्त्रिप्र
कारः उच्छ्रायः उच्चता॥ हस्तोत्सेधो मांडलिकानां राज्ञां शुभदं श्रमंप्रदं॥ पादाधिको हस्तः सपादहस्तो नात्यर्थः
अनंतरजितां नृपाणां राज्ञां शुभदं॥ अर्धयुक्तो हस्तः सार्धः सपादः समस्तराज्यार्थिनां राज्ञामधिकेच्छेयिणां रा
ज्ञां शुभदं॥ ततः किं कुर्यादित्याह॥ ॥अंतर्धायाहिरण्यं तत्रोपविष्टो नरेश्वरः मत्रमनाः। सचिवाप्तपुरोहितदै १९०
वज्ञपौरकल्याणनामयुतः तत्र तस्मिन्भद्रासने सुवर्णं कनकमंतर्धाय अंतरे क्षिप्त्वा नरेश्वरो राजा सुमनाः शो
भनचित्तः। उपविशेत्। अध्यासीत। सचिवैर्मंत्रिभिः आप्तैर्नरैर्विश्वस्तपुरुषैः पुरोहित आचार्यः दैव

ज्ञेनैर्दैवज्ञः सांवत्सरिक उच्यते॥ आभ्यां सहितः अन्यैश्च पौरैर्जनैः कल्याणनामभिर्युतः परिवृतः कल्याणनामानः शु
भनामानः यथाजय गजः सिंहगजः व्याघ्रराज इति। एवमाद्यः॥ किंभूतोराजेत्याह॥ ॥बंदिजनपौरविप्रप्रघुष्टपु
ण्याहवेदनिर्घोषैः समृदंगशंखतूर्यमंगलशब्दैर्हृतानिष्टः बंदिजनो मंगलपाठकाः बंदिजनैः पौरैः नागरैः विप्र
द्विजैः एतैः कीदृशैः प्रघुष्टपुण्याहवेदनिर्घोषैः प्रकर्षेण घुष्टउच्चारितः पुण्याहशब्दश्च येरेवंविधैः रैतैस्तथा
समृदंगशंखतूर्यैः मंगलशब्दैः सह मृदंगशंखतूर्यैः ये मंगलशब्दा उच्यंते तैर्हृतानिष्टः शुभो यस्य स तथाभृतः
॥ ततः किं कुर्यादित्याह॥ अहतक्षौमनिवसनं पुरोहितः कंबलेन संछाद्य॥ कृतबलिपूजं कलशैरभिषिंचेत॥ सर्पि
षः पूर्णैः॥ ॥ततः पुरोहितो राजानमभिषिंचेत॥ कीदृशं राजानं॥ अहतक्षौमनिवसनं अहतेन नवेन क्षौमं निवसनं
वासो यस्य॥ तथाकृतबलिपूजं कृतो बलिरुपहारः पूजा अर्चा येन तं॥ कथमभिषिंचेत। सर्पिषः पूर्णैः कलशैः
घृतपूरितैः कुंभैरित्यर्थः॥ अथ कलशप्रमाणमाह॥ ॥अष्टाद्यामार्विशतिरष्टशतं चापि कलशपरिमाणं॥
अधिके।धिकगुणोत्तरमयं च मंत्रो।त्र मुनिगीतः॥ अष्टौ कलशाः अष्टाविंशतिर्वा॥ अष्टशतमष्टाधिकश
तं वा घृतकलशानां परिमाणं अधिके।धिके कलशपरिमाणे गुणोत्तरं गुणाधिक्यं। अत्र घृताभिषेके मंत्रो।यमु
निगीतो मुनिना गर्गेण गीतो गदितउक्तः॥ तमेवाह॥ आद्यं तेजः समुद्दिष्टमाज्यं पापहरं परं॥ आज्यं सुराणामा
हार आज्ये लोकाः प्रतिष्ठिताः॥ भौमांतरिक्षं दिव्यं वा यत्ते कल्मषमागतं॥ सर्वं तदाज्यसंस्पर्शात्प्रणाशमुपग
च्छतु॥ ॥आद्यं घृतं तद्देवतेजः समुद्दिष्टं कथितं॥ तथा आज्यं परं प्रकृष्टं पापहरं कल्मषापहं॥ आज्यं सुराणां
देवानामाहारो भोजनं॥ आज्ये लोकाः भूर्लोकादयः प्रतिष्ठिताः संस्थापिताः तेन च यत्ते कल्मषं यत्पापम
दिव्यं स्वर्गजनदिव्यविकारजातं॥ आंतरिक्षमुल्कापातनिर्घातपवनपरिवेषगंधर्वपुरपुरंदरचापादिजातं॥ भौमं च
राष्ट्रोद्भवं आगतं प्राप्तं तत्सर्वमाज्यसंस्पर्शात् घृतस्पर्शनमात्रादेव प्रणाशं क्षयमुपगच्छतु प्रयातु॥ ततः किं
कुर्यादित्याह॥ ॥कंबलमपनीय ततः पुरोहितः शक्रदेवतैर्मंत्रैः॥ अभिषिंचेन्मनुजेंद्रं पुरोहितः तेन मंत्रेण॥
ततोनंतरं कंबलमपनीयापास्य ततः सफलपुष्पैः फलपुष्पसहितैः पुष्पस्नानांबुभिः पुष्पस्नानद्रव्ययुक्तैर्जलैः

पुरोहित आचार्यो मनुजेंद्रराजानं अनेन मंत्रेणाभिषिंचेत॥ अथ तमेव स्नानमंत्रमाह॥ ॥ सुरास्त्वामभिषिंचंतु
न॰ सं॰ ये च सिद्धाः पुरातनाः। ब्रह्मा विष्णुश्च रुद्रश्च साध्याश्च समरुद्गणाः॥ आदित्या वसवो रुद्रा अश्विनौ च भिषग्वरौ।
अदितिर्देवमाता च स्वाहा सिद्धिः सरस्वती॥ कीर्तिर्लक्ष्मीर्धृतिः श्रीश्च सिनीवाली कुहूस्तथा॥ दनुश्च सुरसा चैव वि
१९१ नता कद्रुरेव च॥ देवपत्न्यश्च या नोक्ता देवमातर एव च॥ सर्वास्त्वामभिषिंचंतु दिव्याश्चाप्सरसां गणाः॥ नक्षत्राणि
मुहूर्ताश्च पक्षाहोरात्रसंधयः॥ संवत्सरा दिनेशाश्च कलाः काष्ठाः क्षणाः लवाः॥ सर्वे त्वामभिषिंचंतु कालस्याः
वयवाः शुभाः॥ एते सर्वे च मुनयो वेदव्रतपरायणाः। सशिष्यास्त्वाभिषिंचंतु सदाराः सतपोधनाः॥ वैमानि
काः सुरगणाः मनवः सागरैः सह॥ सरितश्च महाभागाः नागाः किंपुरुषास्तथा॥ वैखानसा महाभागाः द्वि
जा वैहायसाश्च ये॥ सप्तर्षयः सदाराश्च ध्रुवस्थानानि यानि च॥ मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुरंगिराः॥ भृ
गुः सनत्कुमारश्च सनकश्च सनंदनः॥ सनातनश्च दक्षश्च जैगीषव्यो भलंदनः। एकतश्च द्वितश्चैव त्रितो जाबालि
काश्यपौ॥ दुर्वासा दुर्विनीतश्च कण्वकात्यायनस्तथा॥ मार्कंडेयो दीर्घतपाः शुनःशेपो विदूरथः॥ ऊर्वः संव
र्तकश्चैव च्यवनोऽत्रिः पराशरः॥ द्वैपायनो यवक्रीतो देवराजः सहानुजः॥ पर्वतास्तरवो वल्यः पुण्यान्यायतना
नि च॥ प्रजापतिर्दितिश्चैव गावो विश्वस्य मातरः॥ वाहनानि च दिव्यानि सर्वलोकेश्वरास्तथा॥ अग्नयः पितरस्ता
रा जीमूताः खं दिशो जलं॥ एते चान्ये च बहवः पुण्यकीर्तनशोभिनः॥ तोयैस्त्वामभिषिंचंतु सर्वोत्पातनिबर्हणै
ः॥ यथाभिषिक्तो मघवानेतैर्मुदितमानसैः॥ एवं अभिषेकः सुबोधः तथापि मंदबुद्धिव्युत्पादनाय किंचित
व्याख्यायते॥ सुरास्त्वामभिषिंचंत्विति॥ हे नरपते सुरास्त्वाभिषिंचंतु॥ ये च सिद्धा देवयोनयः पुरातना
श्चिरंतना ब्रह्माद्याः सुराः समरुद्गणाः मरुद्गणसहिताः भिषग्वरौ अश्विनौ॥ अदितिर्देवमाता स्वाहाद्या
देवताः। सिनीवाली दृष्टचंद्रा अमावास्या यस्यां भ्रांतेः चंद्रो न दृश्यते। तस्यां कुहूर्नष्टचंद्रा। पक्षाहोरात्रयोः १९२
याश्च संधयः संवत्सरा वर्षाणि दिनेशाः आदित्याः क्षणपतयः काष्ठाः कालाः कालस्यावयवाः। एते उक्ता अन्ये च
मुनयः सर्वेऽपि वेदव्रतपरायणास्तेऽपि सशिष्याः शिष्यसहिताः सदाराः भार्यासहिताः तपो

धनास्तपोधनं येषां वैमानिकाः विमानयायिनः मनवः सागरैः समुद्रैः सह सहिताः सरितो नद्यः महाभागाः प्रधानाः किं
पुरुषाः किंनराः वैखानसाः वैहायसा इति संज्ञा विशेषणं॥ सप्तर्षयो मरीच्यादयः सदाराः सभार्याः ध्रुवस्थानानि
स्थिरप्रदेशाः मरीच्याद्या मुनयः दीर्घतपा मुनिविशेषः द्वैपायनो व्यासः देवराज इंद्रः उपेंद्रः सहितः जीमू
ता मेघाः दिशः आशाः जलमुदकं एते यदुक्तास्तथान्येऽपरे बहवः प्रभूताः पुण्यकीर्तनाः पुण्यं पवित्रं संकीर्त
नं येषां तथाभूताः शुभैः पवित्रैस्तोयैर्जलैः त्वामभिषिंचंतु॥ किंभूतैः सर्वोत्पातनिबर्हणैः अशेषानिष्ट
निवारकैः यथा येन प्रकारेण एतैर्मुदितमानसैः प्रहृष्टचित्तैर्मघवानिंद्रः पूर्वमभिषिक्तस्तथा त्वामभिषिं
चंतु॥ ॥अन्यान्याह॥ इत्येतैश्चान्यैश्चाप्यथर्वकल्पोदितैः सरुद्रगणैः कूष्मांडमहारोहिणकुबेर
हृदयैः समभ्यषाच्च॥ इत्येवं प्रकारैरेतैर्मंत्रैस्तथान्यैरपरैः अथर्वकल्पोदितैः अथर्वकल्पनिर्दिष्टैः
सरुद्रगणैः रुद्रगणसहितैः कूष्मांडैर्मंत्रैर्महारोहिणेन कुबेरहृदयेन मंत्रेण समभ्यषाच्च॥ ततः कुर्या
दित्याह॥ ॥आपो हि ष्ठेति तिसृभिर्हिरण्यवर्णा इति चतसृभिर्जप्तं॥ कार्पासिकवस्त्रयुग्मं बिभृयात्तस्मा
तो नराधिपतिः॥ ततो नराधिपती राजा स्नातः कृतस्नानः कार्पासिकं वस्त्रयुग्मं बिभृयात् धारयेत॥
कीदृशं। आपो हि ष्ठेति तिसृभिः ऋग्भिर्जप्तं॥ तथा हिरण्यवर्णा इति चतसृभिः ऋग्भिर्जप्तं॥ आपो हि ष्ठा हिरण्यव
र्णा इत्यादि पदद्वयं ग्रहणं॥ ततः किं कुर्यादित्याह॥ पुण्याहशंखशब्दैः कृतार्चाभ्यर्च्य देवगुरुविप्रान॥ छत्रध्वजा
युधानि च ततः स्वप्रज्ञां प्रयुंजीत॥ ॥ ततो नृपः पुण्याहशंखशब्दैश्च सहाचांतः शुद्धकायः देवान
सुरान् गुरून् उपाध्यायान् विप्रान् द्विजान् अभ्यर्च्य संपूज्य॥ तथा छत्रायुधानि च॥ आतपत्रचिह्नध्व
जखड्गादीनि च संपूज्य ततोऽनंतरं स्वप्रज्ञामात्मीये प्रदेशे नार्चां प्रयुंजीत कारयेदिति॥ ततः किं कुर्यादित्याह॥
आयुष्यं वर्चस्यं गायस्याभिः ऋग्भिरेताभिः॥ परिजप्तं जयिकं नवं बिभृयादलंकारं॥ ततोऽनंतरं
नवं तनं अलंकारं विभूषणादिकं जैत्रयिकं विजयावहं बिभृयात् धारयेत॥ कीदृशं। आयुष्यं वर्चस्यं गाय
स्याभिः ऋग्भिः जगीभिः परिजप्तमभिमंत्रितं॥ ततः किं कुर्यादित्याह॥ गताहुताय वेदीसमुपाविश

चर्मणामुपरि राजा॥ देयानि वै चर्माण्युपर्युपरि चैतानि॥ ततोऽग्निं ताभ्यां वेदीं दक्षिणां गत्वा प्राप्य तत्र राजा
बृ०सं० नृपश्चर्मणामुपरि समुपविशेत् तिष्ठेत्॥ तत्रोपर्युपरि चर्माण्येतेन प्रकारेण एतानि च देयानि ख्याप्यानि
कानीत्याह॥ वृषस्येति॥ तद्यथा॥ वृषस्य बलिवर्दस्य संबंधि प्रथमं चर्म दद्यात्॥ तस्योपरि वृषदंशस्य मा
१०२ र्जारस्य तस्योपरि रुरोर्मृगजातेः। तेषां सर्वेषामुपरि सिंहस्य दद्यात् ततः परं तस्योपरि व्याघ्रस्येति॥ ततः किं कु
र्यादित्याह॥ ॥ पुष्पस्नानं तु कुर्यात् पुरोहितोऽग्निं समभिज्वलद्धृताद्यैः॥ विनयेन गुरुबृहस्पतिनारायणनियमा
तिभिर्मंत्रैः॥ पुरोहितः आचार्यो मुख्यस्नानं प्रधानस्नानं दक्षिणवेद्यां समभिज्वलद्धृताद्यैः समिद्भिस्तिलैर्घृ
तेनाज्येन आदिग्रहणात् अन्यैः शांतिकरैः श्रीफलादिभिः यथावत् वह्निं जुहुयात्॥ विनयेनो रुद्रः इन्द्रः
बृहस्पतिर्देवगुरुः नारायणो विष्णुः नियतगतिर्वायुः एषां संबंधिन्यो या ऋचस्तानि॥ अन्यच्चाह॥ इंद्रध्व
जनिर्दिष्टान्यग्निनिमित्तानि दैववित् ब्रूयात्॥ कृत्वाऽशेषसमाप्तिं पुरोहितः प्रांजलिर्ब्रूयात्॥ ॥ दैववित्
सांवत्सरिकः इंद्रध्वजनिर्दिष्टानि इंद्रध्वजोक्तानि अग्निदैवत्यानि निमित्तानि अग्निलक्षणानि ब्रूयाद्द
न॥ तद्यथा॥ स्वाद्वावसानसमयस्य मुखस्यार्चिरग्निः प्रदक्षिणावर्तो हुतभुक्तृपस्य॥ गंगादिवाकरसु
ताजलचारुहारां धात्रीं समुद्ररसनां स्ववशीकरोति॥ इत्येतत्सर्वं विचार्य अशेषसमाप्तिं सर्वकर्मणां परि
समाप्तिं कृत्वा। ततः प्रांजलिः पुरोहितोंऽजलिं कृत्वा इदं ब्रूयादिति॥ किं कुर्यादित्याह॥ यांतु देवगणाः सर्वे
पूजामादाय पार्थिवात्॥ श्रियं च विपुलां दत्त्वा पुनरागमनाय च॥ ॥ सर्वे देवगणाः सुरसमूहाः पा
र्थिवात् राज्ञः पूजामादायांगीकृत्य तस्य च विपुलां विस्तीर्णां श्रियं दत्त्वा पुनर्भूय आगमनाय च यां
तु गच्छंतु इति॥ ततो राज्ञः किं कर्तव्यमित्याह॥ ॥ नृपतिरतो दैवज्ञं पुरोहितं चार्चयेत् धनैर्बहुभिः॥ अन्यां
श्च दक्षिणीयान् यथार्हतं श्रोत्रियप्रभृतीन्॥ ततोऽनंतरं नृपती राजा दैवज्ञगणकं पुरोहितमाचार्यं बहु
भिर्धनैः प्रभूतैर्वित्तैः अर्चयेत् पूजयेत्॥ तथान्यान् दक्षिणीयान् दक्षिणायोग्यान् यथार्हतं कुलशील १०२
पाश्रुतानुसारेण श्रोत्रियप्रभृतीन् आहिताग्निहोतॄन् अर्चयेत्॥ तथा च गर्गः॥ दत्ताश्चितं ब्राह्मणेभ्यो

गावो हेमपरिष्कृताः॥ वस्त्रयुग्मं महार्हं च तेभ्यस्तु बहुभोजनं॥ शंखभेरीस्वरैर्दिव्यैर्गीतैश्चैव मनोरमैः॥
ततः प्रविश्य राजासौ सचिवैः परिवारितः॥ श्वेतकुंजरमारूढः श्वेतेनातपवारिणा॥ श्वेतचंदनलिप्तांगः श्वे
तांबरधरः शुभः॥ पुरस्ताद्द्विजवरैर्नतमार्गावादैश्च पूजितः॥ ततः किं कुर्यादित्याह॥ दत्वाभयं प्रजानामा
घातस्थानगतान् पशून् छागादीन्। विसृज्य विमुच्य ततो बंधनमोक्षं कुर्यात्॥ बंधनस्थान पुरुषान् परित्य
जेत्॥ किंतु॥ अभ्यंतरं दोषकृतं वर्ज्य। अभ्यंतरे नृपशरीरे अंतःपुरस्थाय दोषकृतस्तान् वर्जयित्वा इत्यर्थः॥
अथ पुष्यस्नानमाहात्म्यमाह॥ ॥ एतत्प्रयुज्यमानं प्रतिपुष्यं पुष्यं प्रतिप्रयुज्यमानं क्रियमाणं सुखयशोर्थ
वृद्धिकरं॥ पुष्यादिनार्धफलदं पौषी शांतिः परा प्रोक्ता॥ ॥ एतत्स्नानं प्रतिपुष्यं पुष्यं प्रतिप्रयुज्यमानं क्रि
यमाणं सुखयशोर्थवृद्धिकरं सुखस्य यशसोऽर्थस्य वृद्धिं करोति॥ पुष्यादिनान्यत्र क्रियमाणमर्धफलं यथोक्ता
दर्धफलं ददाति॥ पौषी शांतिः पुष्यनक्षत्रेण युता पौषी पौर्णमास्यां च परा प्रकृष्टा प्रोक्ता कथिता॥ अन्यदप्या
ह॥ राष्ट्रोत्पातोपसर्गेषु राहोः केतोश्च दर्शने॥ ग्रहावमर्दने चैव पुष्यस्नानं समाचरेत्॥ राष्ट्रोत्पातेषु दिव्यां
तरिक्षभौमेषु तथोपसर्गेषु उपद्रवेषु अन्येषु व्याध्यादिषु राहुदर्शने ग्रहदर्शने केतुदर्शने कृते दृष्टे ग्रहावमर्द
ने ग्रहयुद्धे एवमनेन प्रकारेण सर्वथा पुष्यस्नानं समाचरेत् कारयेत्॥ अन्यदप्याह॥ नास्ति लोके स उत्पा
तो यो ह्यनेन न शाम्यति॥ मंगलं चापरं नास्ति यद् अस्मात् अतिरिच्यते॥ ॥ लोके स उत्पातो नास्ति न विद्यते
॥ यः अनेन पुष्यस्नानेन न शाम्यति॥ शमं नयाति॥ अपि तु सर्व एव शाम्यतीत्यर्थः॥ अस्मात्पुष्यस्ना
त् अतिरिच्यते श्रेष्ठतरं परं अन्यन्मंगलं नास्ति न विद्यते॥ तथा च गर्गः॥ प्रतिपुष्येण यो राजा स्नायेतावि
क्रिं धनं॥ तस्य राष्ट्रे न सीदंति मर्त्यास्त्रिजनवो भुवि॥ ॥ अथ पुष्यस्नानमाहात्म्यमाह॥ आधिराज्यार्थिनो
राज्ञः पुत्रजन्म च कांक्षतः॥ तत्पूर्वमभिषेकेन विधिरेष प्रशस्यते॥ राज्ञो नृपस्य आधिराज्यार्थिनो अधि
राज्यमिच्छतः तथा पुत्रजन्म सुतप्रसवं कांक्षतः समभिलषतः तत्पूर्वं तत्प्रथमं योऽभिषेकस्तस्मिन् अथ अभि
षेके एष विधिः प्रशस्यते स्तूयते॥ अन्यदप्याह॥ महेंद्रार्थमुपाचीर्णं गुरुणा र्तबृहस्पतिः॥ स्नानमा

षुः व्रताप्तऋद्धिसौभाग्यकरणं परं॥ ॥ इदं स्नानं बृहस्पतिः कृतगुरुर्वृत्तकीर्तिर्वृद्धश्रवा महेन्द्रार्थं देवराजहिता
वा०सं० र्थं प्राचा चोक्तवान्॥ कीदृशं॥ आयुषोद्योवितस्य प्रजानां वृद्धिकरोति॥ परं प्रकृष्टं सौभाग्यकरणं॥ अन्यद
प्याह॥ अनेनैव विधानेन हस्त्यश्वं स्नापयीत यः॥ तस्यामयाविनिर्मुक्तं परां सिद्धिमवाप्नुयात्॥ ॥ योगा
३०३ त्रा अनेनैव पूर्वोक्तेनैव विधानेन हस्त्यश्वं गजतुरगं स्नापयेत तस्य राज्ञस्तत् हस्त्यश्वमामयविनिर्मुक्तं रो
गवर्जितं परां प्रकृष्टां सिद्धिमाप्नुयात्॥ कृभवतीति॥ ॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ पुष्य
स्नानं नाम षट्चत्वारिंशोऽध्यायः॥ ४६॥ ॥ श्री॥ अथ पट्टलक्षणं व्याख्यायते॥ ॥ तत्रादावेवागम
प्रदर्शनार्थमाह॥ विस्तरतोऽभिहितं पट्टानां लक्षणं यदाचार्यैः तत्संक्षेपः क्रियते मयात्र सकलार्थसंपन्नः॥
आचार्यैः कश्यपादिभिः यत्पट्टानां नरेंद्रमुकुटानां लक्षणं विस्तरतो विस्तरेण निर्दिष्टमुक्तं॥ तस्य मयात्र स
कलार्थसंपन्नो निःशेषार्थयुक्तः समासः संक्षेपतः क्रियते॥ तथाह॥ पट्टः शुभदो राज्ञां मध्येऽष्टांगुलानि विस्ती
र्णः॥ सप्त नरेन्द्रमहिष्याः षड् युवराजस्य निर्दिष्टः॥ चतुरंगुलविस्तारः पट्टः सेनापतेर्भवति मध्ये॥ द्वे च प्रसाद
पट्टः पंचैते कीर्तिताः पट्टाः॥ राज्ञां पट्टो मुकुटाः मध्ये मध्यभागे अष्टौ अंगुलानि विस्तीर्णः कार्याः॥
नरेन्द्रकन्या राजमहिष्याः सप्तांगुलानि मध्ये विस्तीर्णः कार्यः॥ षडंगुलानि युवराजस्य निर्दिष्टः कथितः॥
सर्वे च शुद्धकांचनविनिर्मिताः॥ श्रेयसो वृद्धिः॥ सर्वे च पंचैव पट्टा द्विगुणायामाः विस्तारात् द्विगुणा दीर्घाः कर्त
व्याः॥ यस्य पट्टस्य यो विस्तार उक्तः तस्य दैर्घ्यं विस्तारात् द्विगुणं कार्यं॥ यथा नृपपट्टोऽष्टांगुलानि विस्तीर्णः स
षोडशांगुलायामः कार्यः॥ एवमन्येषां॥ तथा पट्टस्य मध्ये यो विस्तारः तस्यार्धेन पार्श्वयोः विस्तारः
कार्यः॥ यथा नृपपट्टोऽष्टांगुलानि मध्याद्विस्तीर्णः॥ स च पार्श्वयोश्चतुरंगुलः कार्यः॥ इत्येवमन्येषामपि स
र्वपट्टाः शुभेन कांचनेन सुवर्णेन विनिर्मिताः रचिताः श्रेयसो वृद्धिर्भवति॥ अन्यल्लक्षणमाह॥ पंचशि ३०३
खो भूमिपतेस्त्रिशिखो युवराजपार्थिवमहिष्योः॥ एकशिखः सैन्यपतेः प्रसादपट्टो विना शिखया॥ ॥
पंचशिखो भूमिपटलक्षणान्निर्गमनपराजयाय भवति॥ खड्गस्य मुष्टिपरिधाना स्वयमेवा विनिर्गतिरव

ई युद्धे संग्रामे भवति॥ वलिते सव्याले खड्गे विजयो भवति॥ ॥ अथ परिभाषार्थमाह॥ नाकारणं विवृणुयान्न
विघुट्टयेज्ज पश्येन्न तस्य वदनं न वदेच्च मूल्यं॥ देशं न चास्य कथयेत् प्रतिमानयेच्च नैव स्पृशेन्नृपतिरप्रयतोऽ
सियष्टिं॥ असियष्टिं खड्गयष्टिमकारणं निःप्रयोजनमाह॥ कृणितं भ्रमणाभ्यां न परस्परायावर्तनं कोशात्॥ स्वयमु
त्कीर्णं शुद्धं ज्वलिते विजयो भवति खड्गयोजननं विवृणुयाद्बाहुगतावरणं न कुर्यात्कोशादित्यर्थः॥ तथा अकारणं
न विघुट्टयेन्न चालयेत्॥ तत्र तस्यां खड्गयष्टौ वदनं मुखं न पश्येत् नानिरीक्षेत॥ तथा कारणं मूल्यं च वदेन्न ब्रूयात्॥ तथा
खड्गस्य देशं जातिं न कथयेत्॥ न प्रतिमानयेन्नांगुलैर्दीर्घयेत्॥ नृपती राजा प्रयतः समाहितः असियष्टिं स्पृशेत॥
अन्यल्लक्षणमाह॥ जिह्वासंस्थानं नीलोत्पलवंशपत्रसदृशं च। करवीरपत्रशूलाग्रमंडलाग्राणि शस्तानि॥ मंडलाग्र
मिति॥ खड्गस्य नामाग्रं तस्य खड्गाग्रं जिह्वासंस्थानं। गोजिह्वाकारं॥ नीलोत्पलपत्रसदृशं॥ कुवलयपत्राकारं। वंशपत्र
सदृशं च॥ करवीरपत्रसदृशं। शूलाग्रं च॥ शूलाकारं॥ एतानि मंडलाग्राणि खड्गानि शुभानीति॥ अन्यच्चाह॥
निःष्पन्नं न छेद्यं निकषैः कार्यं प्रमाणयुक्तं तत्॥ मरणाय स्वामिजननी तस्याग्रे तच्छिन्ने॥ खड्गं निष्पन्नं यदि कदा
चित्प्रमाणाधिकं भवति तदा न छेद्यं न कर्तनीयं तन्निकषैर्निघर्षणैः प्रमाणं कार्यं येन शुभं भवेत्॥ ॥ अथ
खड्गमुष्टौ दृष्टा ये व्रणास्तानाह॥ यस्मिन् उत्प्रदेशे व्रणो भवेत् तद्देव खड्गस्य वनितानामिव तिलकं गुह्ये वाथ मुखे
दृष्ट्वा यस्मिन् गुरुप्रदेशे मुष्टिभागे मूले मध्ये वाग्रे वा व्रणं छिद्रं भवेत् तदनेनैव प्रकारेण खड्गस्य मूले मध्येऽग्रे वा भवे
त्। एतदुक्तं भवति॥ यदि मुष्टिमूले व्रणो दृश्यते तदा खड्गस्यापि मूले व्रणो भवेत्॥ अथ मुष्टिमध्यभागे तदा
खड्गस्यापि मध्ये व्रणो भवेत्॥ अथ मुष्टेरग्रभागे व्रणस्तदा खड्गस्याप्यग्रे भवेत्॥ तदानीं सुरेण॥ तत्रोक्तोऽपि
योऽयं॥ अत्र दृष्टान्तमाह॥ वनितानामपि तिलकमिति॥ वनितानां स्त्रीणां यथा तिलकं मुखे वक्त्रे दृष्ट्वा विज्ञो
ऽप्यगुह्येऽपि वाच्यं वक्तव्यमिति॥ एवं यस्मिन् खड्गमुष्टौ भवति॥ व्रणस्तस्मिन्निश्चयात्मध्ये व्रणो वाच्य इति॥ अ
थान्यद्गुणदोषयत्नादानमाह॥ अथवा स्पृशति यदंगं प्रष्टा निस्त्रिंशभृत्तदूरधार्थ॥ कोशस्थस्य देशो व्रणा
सिङ्गास्त्रं विद्धिरिदं॥ वा शब्दः प्रकारार्थे अथवा निस्त्रिंशभृत् प्रष्टा खड्गधारकः॥ पृच्छको यदंगं यमवयवं स्पृ

वरा० सं० ग्राति स्पृशयति॥ इत्ययं धार्य वलोक्य कोशस्थस्यैव खड्गस्य प्रमाणनाम सप्तचत्वारिंशोध्यायः॥ ४७॥ ०॥ ॥
अथ खड्गलक्षणं व्याख्यायते॥ तत्रादौ खड्गप्रमाणं॥ व्रणानां च शुभाशुभज्ञानमाह॥ अंगुलशतार्धं उत्तम ऊनः
स्यात्पंचविंशतिः खड्गः अंगुलमानाद्यो व्रणोशुभो विषम पर्वस्थः॥ १॥ उत्तमः प्रधानः खड्गोंगुलशतार्धं पं
१०५ चाशदंगुलानि दीर्घ इत्यर्थः॥ ऊनः स्यात्पंचविंशतिः। पंचविंशत्यंगुलानि ऊनः खड्गः स्यात्भवेत्॥ अनयोः प्रमाण
यार्मध्ये स्थितः समध्यम एव॥ अंगुलमानाद्यो व्रणो विषमपर्वस्थो विषमांगुलस्थितः प्रथम तृतीय पंचसप्त
दिष्वंगुलेषु स्थितः॥ सोशुभो नेष्टफलदः॥ अर्थादेव समांगुलेषु द्वितीयचतुर्थषष्ठाष्टमादिषु स्थितः स शुभद
मिष्टं षंगुल मध्यमदति॥ ॥अथ व्रणानां शुभाशुभज्ञानमाह॥ श्रीवृक्षवर्धमानातपत्रशिवलिंगकुंडलाब्जा
नां॥ सदृशा व्रणाः प्रशस्ता ध्वजायुधस्वस्तिकानां च॥ श्रीवृक्षो बिल्व॥ वर्धमानं वन्हिविशेषं वर्धमानं वा मुनः
सदृशं। केचित्समगृहमिति॥ कुर्वंति। आतपत्रं छत्रं। शिवलिंगं प्रसिद्धं॥ कुंडलं कर्णाभरणं॥ अब्जं पद्मं॥ एतेषां स
दृशा ये व्रणाः खड्गे प्रशस्ताः तथा ध्वजस्य यागकामः॥ आयुधस्य खड्गादेः स्वस्तिकस्य चिन्हस्य स्वस्तिकस्य स्व
नः सदृशस्य च सदृशा व्रणाः॥ प्रशस्ता एव॥ अथाशुभलक्षणान्याह॥ कृकलासकाककंकक्रव्यादकबंधवृश्चि
काकृतयः॥ खड्गे व्रणा न शुभदा वंशानुगताः प्रभूताश्च॥ ॥कृकलासः प्राणिविशेषः। काको वायसः। कंकः
पक्षिविशेषः क्रव्यादा मांसाशिनो विहंगाः श्येनगृध्रप्रभृतयः। कबंधः छिन्नशिराः पुरुषः। वृश्चिकः कीरजाति
एतेषां सदृशी आकृतिः येषां ते व्रणाः खड्गे न शुभदाः॥ वंशानुगताः वंशाग्रदंडेन खड्गस्य मध्यभागउच्यते
। तत्र येनुगताः स्थिताः वभूता बहवस्तेप्यशुभदाः॥ अन्यल्लक्षणमाह॥ स्फुटितं ह्रस्वं कुंठं वंशाच्छिन्नं तदृग्
मनोनुगं अस्वनमिति चानिष्टं प्रोक्तं विपर्यस्तमिष्टफलम्॥ स्फुटितं क्वचितमिव दृश्यते॥ ह्रस्वं प्रमाणहीनं कुंठमतीक्ष्णं
वंशाच्छिन्नं वंशाग्रदेशाद्विच्छिन्नमिव दृश्यते॥ न दृग्मनोनुगतं अस्वनमिव चानिष्टं दृष्टं च शब्दो मनसश्चित्तस्या १०५
यन्नानुगतं तदप्रियं॥ अस्वनं निःशब्दं यस्याहतस्य शब्दो नोत्पद्यते॥ इत्येवं विधमनिष्टमशुभं प्रोक्तं विपर्यस्त
मिष्टफलं इत्युक्तलक्षणेभ्यो विपर्ययस्थं विपरीतलक्षणं अस्फुटितमह्रस्वमकुंठमन्यं वंशाच्छिन्नं दृग्मनो

नुगतं सस्वनं यत्तदिष्टफलं शुभलक्षणमिति॥ ॥अथ खड्गस्य व्रणितं ज्ञानं शुभाशुभमरणायोनं खड्गस्वामिनां यत्स्पर्शे कथितं
कोशान्निष्कासनादप्रवर्तनं अदेशयोरुक्तः॥ एवं वक्ष्यमाणं असिशास्त्रविदितानां तात्व्याह॥ शिरसि स्पृष्टे प्र
थमेंगुले दृष्टा यल्ललाटसंस्पर्शे भ्रमध्ये चलतोयनेत्रेस्पृष्टे च तुर्थेच॥ नन्विदं भवत प्रष्टायादिकारः स्पृशति॥
तदा खड्गमूलादेव प्रथमेंगुले व्रणो वाच्यः॥ एवं ललाटसंस्पर्शे द्वितीयेंगुले भ्रूमध्ये स्पृष्टे तृतीयेंगुले नेत्रेन यने स्पृष्टे
चतुर्थेंगुले वाच्यः॥ अन्यदप्याह॥ नासौष्ठकपोलहनुश्रवणग्रीवांसकेषु संबोध्याः॥ उरसि द्वादश संज्ञेत्रयोदशे
कक्षयोर्ज्ञेयः॥ नासायां स्पृष्टायां पंचमेंगुले व्रणो वाच्यः॥ ओष्ठयोः स्पर्शने षष्ठेंगुले ग्रीवास्पर्शने दशमे॥ अं
सोस्कंधो अंसस्पर्शने एकादशे॥ एवं पंचाद्याः। पंचादित आरभ्य। उरसि संस्पृष्टे द्वादशसंज्ञे॥ द्वादशेंगुले व्रणो
वक्तव्यः॥ कक्षयोः स्पृष्टयोस्त्रयोदशेंगुले वाच्यं॥ अन्यदप्याह॥ स्तनहृदयोदरकुक्षीनाभीषु चतुर्दशाद्याः
ज्ञेयाः॥ नाभिमूलकटयोर्गुह्ये वैकविंशाः स्यात्॥ स्तनस्पर्शे चतुर्दशेंगुले व्रणो ज्ञेयः॥ हृदयस्पर्शने पंचदशे
एवं पंचाद्याः पंचादिः॥ उदरस्पर्शने षोडशे कुक्षिस्पर्शने सप्तदशे॥ नाभिस्पर्शने अष्टादशांगुले एवं चतुर्द
शाद्यो ज्ञेया ज्ञातव्याः॥ नाभिमूलं नाभेरधो भागः॥ नाभिमूलस्पर्शने एकोनविंशेंगुले कटिस्पर्शने विंशा
ति॥ गुह्यस्पर्शने एकविंशे॥ अन्यदप्याह॥ ऊर्वोर्द्वाविंशस्याचोर्वोर्मध्ये व्रणस्त्रयोविंशे जानुनि चतुर्विंशे
ज्ञायां पंचविंशे॥ ऊर्वोः स्पर्शने द्वाविंशेंगुले व्रणो वाच्यः॥ ऊर्वोर्मध्यस्पर्शने त्रयोविंशे॥ जानुनोस्पर्शे चतुर्वि
शे जंघास्पर्शने॥ पंचविंशे॥ अन्यदप्याह॥ जंघामध्यगुल्फवाप्रानपार्ष्णिपादतथांगुलीषु विच॥ षाड्विंशतिमा
द्यानविंशादिनिर्मतं नगर्गस्य॥ जंघामध्यभागस्य स्पर्शे षड्विंशांगुले व्रणो वाच्यः॥ गुल्फस्पर्शने सप्तविंशे। पा
र्ष्णिस्पर्शनेष्टाविंशे॥ पादस्पर्शने एकोनत्रिंशे पादस्पर्शने एकोनत्रिंशे पादांगुलिस्पर्शने त्रिंशेंगुले एवं ष
ड्विंशतिबादंगुलान्यति त्रिंशादंगुलानि यावद्वान्यं इत्यनेन गर्गस्य मुनेर्मतेन॥ तथा गर्गः॥ शिरो ललाटं भ्रूमध्यं ने
त्रे घ्राणे कपोलकौ। हनुकर्णौ च ग्रीवा स्कंधौ धाक्षवक्षसोः॥ स्तनहृत्कोद्र कुक्षीणां नाभी तन्मूलमेव च॥ कटिमध्या
रतन्मध्यं जानु जंघेन योरधः॥ गुल्फपार्ष्णि चरणमंगुलीस्पर्शने ध्रुवं॥ मूलात्प्रभृति खड्गेषु व्रणांस्त्रिंशांगुलं वद
न्॥

DR. BHAU DAJI MEMORIAL डा० भाऊ दाजी स्मारक पुस्तकालय

अथैतेषां ग्रणानां फलान्याह॥ पुत्रमरणं धनाप्तिर्धनहानिः संपदश्च बंधश्च एकाद्यंगुलं सांस्थित्रणेः॥ फलांनिर्दिशेत
व०सं० क्रमशः॥ मृकान्प्रभृतिप्रथमंगुल्केव्रणो यदि दृश्यते॥ तदा पुत्रमरणं सुतवधो भवति॥ द्वितीये धनाप्तिर्वित्तलाभः॥ तृती
ये धनहानिः अर्थविनाशः॥ चतुर्थे संपदः पंचमे च धो बंधनं॥ एवमेकाद्यंगुलमंस्थैः व्रणैः क्रमशः॥ क्रमेण फलं निर्दि
१२५ शेत॥ वदेत॥ अन्येष्वप्याह॥ सुतलाभः कलहो दलिल्झिपुत्रमरणं॥ धनलाभः कर्मविनाश मानिता दुःखानि ष शि
द्वयन्ति॥ सुतलाभः षष्ठे शोकः कलहः सप्तमे॥ द्रष्टिकल्चिगजलाभा अष्टमे पुत्रमरणं सुतविनाशो नवमे धनलाभो वित्ताग
मो दशमे विनाशो मरणमेकादशे वनिताप्तिः॥ स्त्रीलब्धिर्या द्वादशे॥ एवं षड्प्रभृतिभिः॥ स्तद्वादि संगुल्केषु क्रम
शः॥ क्रमेण फलं निर्दिशेत॥ बुद्धिहानिः स्त्रीलब्धिश्च धारुधि मरणं परितोषाः॥ तेयास्थितु दशादिषु धनहानि
र्थे कार्वं तास्यात॥ लब्धिरर्थलाभश्चतुर्दशांगुले॥ हानिरर्थनाशः॥ पंचदशे स्त्रीलब्धि योषित्प्राप्तिः षोडशे च धा
मरणं सप्तदशे॥ वृद्धिरर्थादीनामष्टादशे परितोषश्चैकोनविंशे॥ एवं चतुर्दशादिष्वंगुलेषु फलनिश्चयो ज्ञातव्यः॥
एकविंशे धननाशः वित्तहानिः स्यात्पूर्वतः॥ अन्येष्वाह॥ वित्ताप्तिर्निर्वाणं धनागमो मृत्युः संपदो स्वयं॥ ऐश्वर्यम
त्युगत्यानि च क्रमात्त्रिंशादितियावत॥ वित्ताप्तिर्धनागमो द्वाविंशे निर्वाणं मृत्युस्त्रयोविंशे॥ धनागमो वित्तलाभश्च
तुर्विंशे॥ मृत्युर्मरणं पंचविंशे॥ संपदः षड्विंशे॥ अथत्वानि धनत्वं सप्तविंशे॥ मृत्युर्मरणमष्टाविंशे॥ एवं त्रिंशत्फ
लानि च क्रमात्त्रिंशत्॥ अतः परमाह॥ आपरतो न विशेषफलं॥ विषमसमसंख्यश्च पापशुभफलदाः॥ केचिद्दफलाः
प्रदिष्टाः स्त्रिंशत्परात्रमिति॥ यावत॥ अतोस्मात्त्रिंशत परतो नंतरं विशेषफलं न भवति किंतु विषमसंख्याकाः पाप
शुभफलदाः॥ ये विषमांगुलिकाव्रणास्ते पापफलदाः॥ अनिष्टा निष्टफलदायो च समांगुलकास्ते शुभफलदाः॥ तथा
च गर्गः॥ अंगुलानि तु पंचाशत्प्रधानः स्वरूपउच्यते॥ तदर्धकनिष्ठं तु तंमध्ये मध्यमं विदुः॥ विषमांगुलसंस्थायो व्र
णः सो निष्टदः स्मृतः॥ शुभः समांगुलस्थस्तु मध्यगा मध्यमस्मृतः॥ आत्रिंशद्विनिर्दिष्टमंगुलानां फलं तत १०५
॥ शेषांगुलगतो दोषो व्रणो मध्यफलदः केचिद्दफलाः प्रदिष्टा इति॥ केचिन्मुनिभिः॥ पराशरादिभिस्त्रिंश
त्परतो ग्रंथा वरफलानि फलाः प्रदिष्टा उक्ताः॥ तथा च पराशरः॥ तेषां प्रमाणानि तत्र मध्यमंगुलानि पंच

विंशतिर्मध्यमं ज्येष्ठं त्वंगुलं तावत्क्रमात्फलनियमः॥ पुत्रनाशोर्थागमोर्थनाशोर्थसंचयोयदरादोमित्रलाभोग्या
धिभयं सुखाया प्तिज्ञातिवध आरोग्याधान्यं विपत्सोत्यत्तिर्वादनलाभः शोकः॥ प्रव्रज्यासुतज्ञातिकुलच्छेदो महा
त्मबललाभः॥ संतापः क्रूराः पुत्रलाभो धनागमः शोकः सामान्यमाधिपत्यमुपभोगो भयं दौर्भाग्यमैश्वर्य
गजप्रलेति परतः सर्वमप्रशस्तं विद्यात॥ ॥अथ गंधलक्षणमाह॥ करवीरोत्पलगजमदघृतकुंकुमकुंदचंदनसुगं
धिः शुभदः मंजिष्ठगोमूत्रमेदपंकामिषसुगंधिपूर्णावसामृक्क्षारोपमश्च भयः दुःखदो भवति गंधः॥ वैदूर्यकन
कविद्युत्प्रभो ज्ञयारोग्यवृद्धिकरः॥ करवीरोत्पलेति॥ करवीरं प्रसिद्धं॥ उत्पलं नीलोत्पलं॥ गजमदं हस्तिमदम॥
घृतमाज्यं॥ कुंकुमं घुसृणं॥ कुंदः पुष्पविशेषः॥ चंदनं प्रसिद्धं॥ एषां सुगंधिसदृशगंधिः अनिष्टः मशुभं॥ खद्र॥
कुर्मवसासृक् क्षारोपमइति॥ कूर्मः प्राणीवसामज्जाः॥ असृक् रक्तं॥ क्षारं प्रसिद्धं॥ तेषामुपमः॥ सदृशगंधोभ
यदुःखदो भवति॥ भयं दुःखं च ददाति॥ तथा वैदूर्यो मणिविशेषः पंककर्दमः॥ कनकं स्वर्णं॥ विद्युत्तडित॥ एषां
सदृशप्रभुः॥ नकल्पकांतिरेव खड्गो ज्ञयारोग्यवृद्धिं च करोति॥ ॥अथ व्रणस्त्रपातमाह॥ इदमोशन संवत्सरत्र
पानं रुधिरेण श्रयामिच्छतः॥ प्रदीप्तं॥ हविषा गुणवत्सुताभिलिप्ताः सलिलेनाक्षयमिच्छतश्च वित्तं॥ बहुलोद्
करेण दुग्धपानं क्षीरपायिनसमादत्ते यसिद्धिं प्रपापितमश्वाश्च॥ बृहत्दुग्धः करिदस्ताछिदयसतालगर्भैः इद
मोशनसमिव इदं वक्ष्यमाणं शस्त्रपानमोशनसंभुशनसा पुत्रेणोक्तं प्रदीप्तामुत्रलक्ष्मीश्रियं लक्ष्मीमिच्छतः॥
प्रार्थयतो रुधिरेण रक्तेन पानं॥ गुणवत्सुताभिलिप्तेर्गुणवत्सुता॥ रुचिमिच्छति॥ यस्तस्य हविषा घृतेन पा
नं॥ अक्षयमपरिमितं वित्तं धनमिच्छतः॥ सलिलेन जलेन पानं॥ यदि पापान वधादिनार्थसिद्धं समादत्ते प्रा
र्थयति॥ तदा वडवा क्षुरकरेण दुग्धपानं वडवाश्च॥ उष्ट्राकरभाकरेण हस्तिनां॥ आसांदुग्धेन क्षीरेण करिणां
हस्तिनां हस्ताछिदाय करच्छेदनाय खड्गस्य इच्छति॥ तस्य प्रपायितेन मत्स्यपित्तेन मृगोद्वारिणः अश्वखुरगाः
वलाङ्गागाए षाडुग्धेः क्षीरैरेतैः॥ किंभूतैः सतालगर्भेणयवर्तेतो॥ तालोवृक्षः तस्य गर्भो निर्यासः॥ तथा च प
राशरः॥ अथ पायनानि॥ क्षीरपायीतमरिवधार्थ धारयेत्तिलतैलपायितं रणार्थी पुत्रार्थी दत्तेन सार्पपस्त्री

ब्रा॰सं॰

कामः मार्दवकः शोणितेन दग्धश्चाम्बुक्षारैः शिलासारच्छेदकामो त्वाक्षीरेणतावंशयोर्भग्नस्य च सपाकश्चपिते
माहिषदक्षं धेनुकमानिन्यं चैनं धपयुष्मं धबल्युपदरिष्वंचविनाशिरस्य पश्चात्पिनं कुर्यान्नाचमन्येतन नौदिष्टः
संस्पर्शोऽन्यदर्शको कुर्यान्नानिमित्तं विरुणुयान्कोऽदनास्य भल्पंत्र्यादिति॥ अन्यान्यप्याह॥ अर्कपयोहरविषाणमषी
समेतं पारावतपुरीषतायुतः प्रलेपः॥ शस्त्रस्य तैलमथितस्य ततोऽस्य पानं पश्चाच्छितस्य न शिलासु भवेद्विघातः॥
१९६ ॥ अर्कपयोअर्कक्षीरं। हरविषाणं गोषशृंगं तस्मान्मषी तया समेतं मर्दितं॥ पारावतः पक्षी॥ आखुर्मू
षकः॥ अनयोः शकृताविद्याच युतः संयुतः॥ एष प्रलेपः शस्त्रस्य तैलमथितस्य दृष्टस्य तैलं॥ तैलेन मर्दित
स्य प्रलेपो देयः॥ ततोऽनंतरमस्य स्वस्य पानं कर्तव्यं पूर्वोक्तद्रव्यैः पश्चादनंतरं शितस्य तीक्ष्णकृतेः शिला
सु पाषाणेषु विघातो न भवेन्न भज्यत इति॥ ॥ अन्यान्यप्याह॥ क्षारे कदल्या मथितेन युक्ते दिनोषिते पायित
मायसं भवेत॥ सम्यक्शितं चाश्मनि नैति भंगं नान्येषु लोहेष्वपि तस्य कौण्ठ्यं॥ कदलीवृक्षः प्रसिद्धस्तं भस्मतस्तस्याः क्षा
रे मथितेन तक्रेण सहितेयुक्ते दिनोषिते॥ अहोरात्रमेकं कृत्वा स्थापिते यथा संयको दंपायितं सम्यधानं मस्य कृश
ितं तीक्ष्णीकृतमश्मनि पाषाणे भंगं नैति॥ न प्राप्नोति चतस्यान्य लोहेष्वपि न शस्त्रेष्वपि कौण्ठ्यं कुंठत्वं भवति॥ ॥
इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ खड्गलक्षणं नाम अष्टाचत्वारिंशोऽध्यायः॥ ४८॥ ॥ ॥ ॥
॥ अतः परं कुक्कुरविद्याचिह्नं पटंति॥ आचार्येण प्रागेवोक्तं॥ वाग्गुविधाधागविद्यते॥ तस्मादस्माभिर्व्याख्यायते॥
तत्रादावेव प्रयोजनप्रदर्शनार्थमाह॥ देवज्ञेन शुभाशुभं दिग्गदितस्थानादृतानि क्षता वाच्यं भष्टनिलापरांगाद्
इतोचालोक्य कालं धिया॥ सर्वज्ञो हि चराचरात्मकतया सौम्यत्यदर्शी विभुर्चेष्टान्याहृतिभिः शुभाशुभफ
लं संदर्शयत्यर्थिनां॥ देवज्ञेन गणकेन मानिपदार्था नेनीक्षता विचारयता पृष्टपृच्छकस्य शुभाशुभं सदसत
फलं वाच्यं वक्तव्यं॥ कानीत्याह॥ दिगाश्रप पूर्वादिकाउदितं व्याहृतमुक्तं पृच्छकेन स्थानं प्रदेशो यत्रासितः॥ आकृ १९६
तं तल्लक्षं। केनचिचन्वितं कंपितं। एतानिक्षता तथा प्रष्टा नजापरांगघटनांचालोक्य पृष्टः पृच्छकस्य निजांगाना
मात्मीयावयवानां परांगानामन्यावयवानांच घटनां स्थिति स्पर्शनादिकां कालं च तत्कालं दिनगतं च सर्वं धिया

बुध्यालोक्य पश्चाच्छुभं वाच्यं॥ सर्वज्ञो हीति॥ यतोऽसौ कालश्चराचरपरात्मकतया चराणां जंगमानां चराणां स्थावराणां स एवा
त्मा जीव भूतस्तेन चराचरात्मकत्वेन स एव विभुः॥ प्रभुः सर्वदर्शी सर्वमशेषं पश्यतितस्मात्कालः त्रियस्मादर्थिबिष्टास्य
र्शनादिकाक्रिया। व्याहरणं व्याहृतिः संभाषणं॥ एताभिः शुभाशुभं सदसत्फलमर्थिनां पृच्छतां संदर्शयति॥ तथा
च पराशरः॥ इह खलु चराचराणां भूतानां कोकालः सर्वदा सर्वदर्शी शुभाशुभं॥ फलस्य वक्ता सविशेषेण प्राणिनामप
रांगेष्वस्पर्शव्याहृतेंगितचेष्टादिभिर्निमित्तैः॥ फलमभिदर्शयति॥ तस्य यतो दैवज्ञोऽनुपहतमतिरवधार्य स्वशास्त्रार्थमनु
सृत्य यथावत्सानुग्रहार्थमर्थिनां शुभाशुभानां भावाभावमभिनिर्दिशेत॥ तत्र देशादिशः कालं व्याहारं द्रव्यदर्शनं॥
अंगप्रत्यंग स्पर्शनं समीक्ष्य फलमादिशेति॥ अधुना स्थाननिर्देशार्थमाह॥ स्थानं पुष्पसुहासिभूरिफलभृत्स्निग्धक
तिच्छिद्रासत्युषितच्युतच्छास्त्रसंक्षिततरुस्थायोपगढंसमं॥ देवर्षिद्विजसिद्धसाधु निलयं सत्पुष्पसंवांछितं सत्स्वादूदक
निर्मलं च जनिताल्हादं च सच्छादूलं। एवंविधं स्थानं सत्यपृच्छायां शुभदमित्यर्थः॥ कीदृशं एवंविधानां तरूणां स्था
णां छायायाभयोपगृहं छन्नं॥ कीदृशानां पुष्पसुहासिपुष्पाणि कुसुमानि शोभनाहासो हसनं येषां ते पुष्पसुहास
नः॥ तथा भूरीणि प्रभूतानि फलानि धारयंति ये ते भूरिफलभृतः॥ सुस्निग्धान्यतिरूक्षत्वच्छदानि पर्णानि येषां
ते सुस्निग्धपर्णतिच्छदाः॥ तथा सत्यक्षीतरनिष्टविहंगः॥ कोकिलकादिभिः स्युताराहितास्तथा शास्त्रसंज्ञिताः॥ प्र
शस्तनामानो येच पलाशपिप्पलन्यग्रोधप्रभृतयः॥ तेषां समं निम्नोन्नतावनिरहितं देवर्षय इति। देवाः असुराः ऋ
षयो मुनयो द्विजा विप्राः साधवः संतः॥ सिद्धा देवयोनयः॥ एषां यस्मिन्नालयः स्थानं॥ तथा सत्पुष्पैः सुगंधैः। कुसुमैः स
म्यक् धान्यादिभिर्युक्तं सुक्षितां सवितं सक्षुभं॥ तथा स्वादूदकं निर्मलस्वच्छजनिताल्हादं च॥ स्वादुसुगंधयुदकं जलं निः
र्मलं प्रसन्नं तद्भावेन जनितमुत्पादितमाल्हादं चित्तचिनदं पर्षयेन तनतथाभूतं नीदकेनयुतं सच्छादूलं। शोभनदूर्वायुक्तं
स्वसादिति॥ तथाच पराशरः॥ अथ पुष्पितफलितहरितस्निग्धत्वक्पत्रप्रशस्तनामांकित। सौम्यद्विजनिषेवित तरुच्छा
यो पगूढसस्यकुसुमरहितस्य मृदुशाद्वलसिकतमघ दृष प्रसन्नसलिलाः। वशाकादेवर्षिसिद्धसाधुद्विजावासि
त्रात्सुखो तरोत्तरवोत्तरपूर्वाभिमुखो वाच्यः पृष्टं तस्य प्रार्थितायोपपत्तिमभिनिर्दिशेत॥ अथ शुभस्थानप्रदर्श
नार्थमाह॥

बृ.सं.

छिन्नभिन्नकृमिपातकं टकिंकल्पटरूक्षकुटिलैर्नमकुलैः क्रूरपक्षियुतनं मनाग्नभिः शुष्कशीर्णबहुपर्णचर्मभिः॥ एवंवि
धैः कुजैर्वृक्षैर्युक्तस्थानेन सन्नश्रुभः प्रष्टुर्वदेत्॥ कीदृशैः छिन्नैः कृत्तैर्भिन्नैः। स्फुटितैः कृमिखातैः कीटभक्षितैः
कंटकवृक्षैः सकंटकैः। पुष्टैः पक्षिभिर्विहंगैः काककंकवकाद्यैः क्रूरैः विषमानभिः कुत्सितसंज्ञैः बिभीतकश्वेतसप्र
१९.२ भृतिभिः शुष्कैः नीरसैः तथा शीर्णानि च्युतानि बहूनि प्रभूतानि पर्णानि पत्राणि च र्माणि त्वचो येषां तैः॥ अन्यदप्या
ह॥ श्मशानशून्यायतनं चतुष्पथं तथा मनोज्ञं विषमं सदोषरं॥ अवस्करागारकपालभस्मभिश्चितं तृणैश्च शुष्यत्तेण
न शोभनं॥ एवंविधं स्थानं पृच्छायां न शोभनं॥ कीदृशं श्मशानं॥ शावदायन प्रदेशं शून्यायतनं सुखासीन देवगृहं चतुःप
थं चत्वारः॥ पंथानो यत्र तथा मनोज्ञमाविलाह्लादकं विषमं निश्चलं तन्नेष्यते सदा सर्वकालं सिकता संयुक्तं अवस्करैः संदूषितं
शुचिभिः रत्नुपयोगोऽर्थैः विलंघ्यानं॥ तथांगारैः कृदग्धकाष्ठैः कपालैः शटिकाकेलिर्भस्मनाच धं संयुक्तं तथा तु
पसर्वतोभद्रं चतुःशालं स्वपादानां राज्ञां मंत्रिणां राज्ञाश्रितानां देवानां च शुभदं नान्येषामिति। अथ त्रिशालानां हि
रण्यनाभसुक्षेत्रचुल्लीपक्षघ्नानां लक्षणं सफलमाह॥ उत्तरशालाहीनं हिरण्यनाभं। त्रिशालकं धन्यं। प्राक्शाल
काविहीनं सुक्षेत्रं वृद्धिदं वास्तु। याम्याहीनं चुल्ली त्रिशालकं वित्तनाशकरमेतत। पक्षघ्नमपरया वर्जितं सुतध्वंसवैर
करं। उत्तरशालाहीनमिति उत्तरशालया सौम्यहीनं वर्जितं। अन्याभिस्तिसृभिर्दिक्षु शाला भवंति॥ केवलया
उत्तरया हीनं तत्त्रिशालकं हिरण्यनाभसंज्ञं धन्यं प्रशस्तं प्राक्शालया पूर्वशालया विहीनं वर्जितं तत्त्रिशाल
कं सुक्षेत्रं नाम तच्च वृद्धिदं धनसुतादीनां वृद्धिं ददाति॥ याम्याहीनमिति॥ याम्याहीनं दक्षिणस्यां दिशि॥ हीनं त
च्चुल्लीसंज्ञं त्रिशालं तच्च धनस्य वित्तस्य नाशकरं। पक्षघ्नमपरया पश्चिमया शालया वर्जितं रहितं तत्पक्ष
घ्नसंज्ञं। तच्च सुतध्वंसकरं सुतानां पुत्राणां ध्वंसं विनाशं करोति॥ वैरं च करोति। एषां विन्यासः सुगमत्वान्न
प्रदर्शितः। ततः चतुःशालाकृतिः स्यात्। अलिंदवर्जितएकादशाद्वितश्च शालाः इति। तथा च गर्गः। सुक्षेत्रं त्रिशालं हि
रण्यनाभाख्यं हीनं चोत्तरया शालया सुक्षेत्रे पूर्वतो हीनं शालया वृद्धिदं मतं। चुल्ली दक्षिणया हीनं धनार्थप्राणना
शं। पश्चाद्रथया हीनं पक्षघ्नं॥

व॰ रा॰ सं॰ सिद्धार्थं धीवासिर्यमसूर्य्यं गृहपतेर्मृत्युं दंडवधं दंडाख्ये। दंडवधं दंडाख्ये फलद्वैगुण्यमर्थस्य वानान्यविज्ञविनाशश्चान्यानाति
विरोधः सुतेः। का वा सिद्धार्थमिति॥ अपरयाम्यपश्चिमदक्षिणशाले द्वे शाले। यत्र भवनं तद्विशालकं॥ सिद्धार्थसंज्ञं॥
एवं पश्चिमोत्तरे यत्र द्वे शाले विशाले॥ तद्गृहं यमसूर्यनाम द्विशालकं। यत्र दक्षिणोत्तरे शाले तत् काचं नाम द्विशालकं। यानि
२३० शालानां फलान्याह॥ सिद्धार्थे धीवासावाप्तिरिति॥ सिद्धार्थसंज्ञे द्विशालके अर्थावाप्तिर्धनलब्धिः। यमसूर्ये गृहपते
र्गृहनाथस्य मृत्युर्मरणं भवति। दंडाख्ये दंडसंज्ञे द्विशालके दंडवधः। दंडेन वधो दंडवधः। दंडताडनेन मरणं। अथवा दं
डस्य वधश्च दंडवध इति केचित्पठंति॥ दंडार्थापि कर्णं च धनाद नंतो द्वावेव भवनतः। वाताख्ये वातसंज्ञे सर्वदेव सर्व
कालं कलहोद्वारः। कलहेनोद्वेगः। वित्तशोकः। कुल्यां वित्तस्य धनस्य विनाशः। काचे तातिविरोधो बंधुभिः सह प्रीति
सततं इति तथा च किरणाख्ये तंत्रे सिद्धार्थं तद्भवेच्छ्रेयो व्यापारयुतं यदि॥ पश्चिमोत्तरसंयुक्तं यमसूर्यं तु मृत्युदं॥ उदक्
संयुतं पश्चाद् दंडाख्यं दंडकारकं॥ पूर्वयाम्यायुतं यं वाताख्यं कलहप्रियं॥ पूर्वापरयुतं गेहं चुल्लीनामार्थनाशकृत॥ दक्षि
णोत्तरशालाख्यं काचसंज्ञं विरोधकृत॥ इति। अत्र विश्वकर्ममयकश्यपादिभिः कृ कश्मिन्वास्तुनियमो महताग्रंथसंद
र्भेणोक्तः स एवाचार्येण गृहीतः अल्पेनैव ग्रंथभारेण मम मासोनि प्रियेणैकैकेन च पदकेनार्थो निर्दिष्टस्तथा
चाहिरण्यगर्भेणाष्टानां ग्रन्थाधिकं ज्ञातमष्टतथा चाह॥ अष्टानां क्रमयोगेन ननु चाष्टिष्टमामतः। अनेकयोगाभे
दाज्ज्ञातविज्ञानैरस्तमिति॥ तथा च विश्वकर्माह॥ एवं नाशं तु यत्पंडाः पश्यंति चान्यतमेऽमना॥ यथाचैतत्कृत्वातः
कृत्वा इत्यपि च यत्नतः॥ आचार्येण चतुःशालिशालानि त्रिशालानि पंच द्विशालगृहाण्यभिहितानि विश्वकर्मादीनां
वाक्तिभिरनुपन्यस्यमानाभिः स्पष्टार्थमिथातुरनेव्यतेत इति उपन्यासो वाक्यैर्येन ज्ञातिग्लैः विस्तारिस्यात॥ अ
तिविस्तारोक्तिः स्यात॥ अतिविस्तरोक्तिश्च गर्ह्यते॥ तथा च विकिमाचरकेऽपश्यत॥ परोधिकारं पुनरोक्तिर्ज्ञोलतिनोतोत्र
ततः प्रयत्न इति॥ तस्मात्स्वार्थोभिधीयते॥ वास्तुनिर्णयविस्तारः स एवाचोच्छ्रायनिश्चयः शुभदः इत्युक्तमा २३०
चार्येण पुनः स एवाह॥ नेच्छंति शालकागृहत्वज्ञानादुच्छ्रितं परतः। अथाणामशेनरज्ञातेच्छ्रायविस्तारः। गृह
विस्तारतुल्यस्य गृहोच्छ्रायः शुभदः नेच्छंति शालकागृहत्वज्ञातादुच्छ्रितं परतः। इत्यनेन सहविरोधेन अत्र केचि

द्विदित शास्त्रसंभावामन्यंते यथा गृहस्य विस्तारतुल्योच्छ्रायो भवितोत्सर्गः। नश्यंति शास्त्रसंभावामन्यं
भ्यंते नेच्छंति शास्त्रं भावामन्यंते॥ शालागृहत्वज्ञातादुच्छ्रितं परतरत्यपवादः॥ उत्सर्गाश्चापवादेन बाध्यत इति वचनात्क्र
मः। विषयविभागेन कल्पनानुकृतानोत्सर्गो न चापवाद इति। आचार्य आह॥ विस्तारषोडशांशः सचतुर्हस्तो भा
वेदुच्छ्रायः॥ द्वादशभागेनाभूमौ समस्तानां विप्रादीनां गृहेषु भूमिकामानं मया विश्वकर्मणाभिहितं॥ अर्धचतु
र्भूमिकं गृहं शूद्राणां कर्तव्यं विशां मदं पंचकभूमिकं अर्धपंच भूमिकं क्षत्रियाणां द्विजानामावासमभूमिकम
र्धासम भूमिकं नृपाणां कर्तव्यं॥ तथा च विश्वकर्माह॥ यजंते राजसत्याद्यैः कृतभिश्चेवानिशसः। तदिरर्धाष्टमेतो
स्यांकारयेद्भवनोत्तमं॥ तथार्धसप्तमं रंवा विप्राणां कारयेद्गृहं॥ अर्धषष्ठिः क्षत्रियाणां वैश्यानामर्धपंचमं॥ त्रि
भिरर्धैश्च शूद्राणां भवनं शुभदं स्मृतमिति॥ विश्वकर्मापि मंदबुद्धिप्रबोधनार्थं पुनः स्पष्टतरं साधारणेन ह
स्तेन गृहोच्छ्रायहस्तसंख्यामाह॥ साधारणेन हस्तेन परं शूद्रस्यार्धविंशतिः। चत्वारिंशच्च वैश्यस्य षष्टिस्यात्क्षत्रियस्य
च॥ ब्राह्मणस्य तथाशीतिशतं च नृपतेः स्मृतं। ततोनः परमं नृणां मूर्धमानं विधीयते॥ गंधर्वसिद्धयक्षाणां
धर्मतः समुदाहृतं॥ साधारणेन हस्तेन हस्तं ज्ञातं यत्तन्त्रे गांगेयकगणेन यावृश्च हस्तेनानुमीयमानं ससा
सीतिहस्ताः सार्धा भवंति। द्वादशभागेनाभूमौ भूमावित्यस्येनापन्यायेन धीष्ठिमभूमिकाभिर्हस्ताद्विषष्टि
: सार्धा भवंति॥ अथात्रेदं मन्यसे साधारणेन हस्तेन हस्तज्ञातो यायं ज्येष्ठहस्तमितं हस्ताः। हस्ताशीतिः सार्धा भवं
ति। न्यपरहस्येतमस्यार्शेनरज्ञातविस्तृतस्य द्वादशभागेनाम भूमौ समस्तानामन्यातनन्यायेन हस्ताद्विष
ष्टिः सार्धा भवंति। एवं तस्य च ग्रंथस्यान्नापि भिन्नवाक्यता इति॥ अत्रोच्यते॥ विश्वकर्मणा उत्तमगृहाणां हस्त
इयं सार्धपीठोच्छ्रायमुक्तं॥ भूमिकांतरे कांडोच्छ्रायमस्तकस्तरवरंदिकादिभिः। साहितमेवमानं भवतितस्मा
त्पुनरुक्तता दोषो नावगम्यत इति॥ द्वित्रिचतुःशालादिषु गृहेषु भूमिकोच्छ्रायनियमो मंतव्यः। एकदालुव्यासतु
ल्यगृहोच्छ्रायः ज्ञस्यते न द्वित्रिचतुःशालेषु तथा चाह॥ एकशालं यथाकामं विस्तारं कारयेद्गृहं॥ गृहमा
या मदानं चेन्चे कशालं ससंभवेत॥ गृहविस्तारमासंधिप्राहोत्सेधं तु गौतमः। आचार्येण तु कशाले गृहव्यास

व॰ सं॰ तुल्यास्तद्वाच्छा योभिहितः व्यासः द्विगुणाश्च यामः। एकशालादिविग्रादीनां चिसनो द्विचतुःशालाश्च क्रियन्ते। तथाच

गृहगर्गः। अनाद्यानि विकर्मसर्वमेव शालम् द्वारेति। अविशालाल ए मयाकायाति स्थभमद्वा आह॥ नारत नियो

२११ विस्तारः स एव चाच्छा अनिश्चयः शुद्धः। शालेकेषु गृहेषु यान्यत्रापि विज्ञ व्यश्वकारार्थोदूत्रयः। विस्ताराद्विगुणितेन

तथैव रणशालेषु दैर्घ्यं कर्तव्यः। द्वित्रित्रिंशमानाःक्षयः क्रमादंगुलानि तेषामित्यत्र संदिह्यन्ते। किमस्यायवनांगु

लेन चातुर्विंशतिः। चतुर्विंशतिभिरंगुलैर्यद्धि हस्तः समस्त। किं वा षष्ठ्यवेनांगुलेन चतुर्विंशत्यायाद्धस्तः। समस्ताति।

विश्वकर्मणाविविधाद्धस्तउक्तः। यचम ध्यानितान्यष्टाचंगुलं यवमुच्यते। सममध्य समंख्यान मंगुलं षड्दूल्यसाभि

॥ तत्राष्टयवांगुलः प्रासत्याख्यः। सप्तयवांगुलः साधारणः षड्यवांगुलः समाख्य इत्याशत्रोच्यते। आचार्येण प्रा

भिधानेन सामान्येनैव हस्तः॥ शमाभिहितः। अष्टाविंशकर्मणा त्रिविधस्यापि हस्तस्य प्रत्येकं कर्मप्रदर्शितं॥ तत्राप्यष्ट

वेनेवांगुलेनायाद्दस्तरनेष्टद्ध कर्माणि आह॥ ग्रामस्य खपुरादीनां विभागायामविस्तरात॥ परिखा द्वाराण्याश्च सभा

प्रासादवेश्मभिः॥ नेयानिश्च समागंश्चि सामाश्चत्रांबराणिच॥ दशनंनरविभागांश्च वंशोपमानयोस्तथा॥ अश्वनःप

रिमाणं च कोशगव्यतियोजनैः॥ रथानक कराश्चि प्राशयेन प्रमापयेत॥ पञ्चांगुल हस्तस्य करमाण्यादः॥ शयनास

प्रयानानि धनुर्दंडा अंग्रस्तथा॥ वापीकूप प्रमाणानि तथागजमवाजिनां॥ इक्षुयंत्रा रथरश्विद्धलयपयुत अवतान॥

अतोद्यानि च यानां श्च शिल्पिनां चाप्युपस्करान॥ पादुकेन वमाछत्रं धर्मोपकरणानि च॥ मात्रोशयेन हस्तेन तदुंडो

श्च मापयेत॥ इत्येतत्र यस्मादाचार्येण ग्रामाभिधाने समासेनैव ग्रामो द्वास्वइति॥ केचिच्छ शदृतिपठंति। त्रिविहित्विहिश

याइति। एतत्सायुतलक्षणं॥ ग्रामाक्षस्यांति॥ व्यासाद्वोडशभागः सर्वेषां सद्मनां भवति भित्तिः॥ पक्वेष्टकाकृतानां दा

रुकृतानां तु नविकल्प इत्यत्र सर्वग्रन्थेनेतद्धापयतियथाचातुर्वर्ण्यादि सद्मनां तु शालादिस्तद्रणां विस्तारषोडशभा

गतुल्या पृथुलाभित्तिः पक्वेष्टकाक्षतः तेकर्तव्याः पक्वाभिरिष्टिकाभिः कृतानि पक्वेष्टकाकृतानि तेषामयं नियमः पक्वे

ष्टका आमेष्टका संयोगनिषेधमंत्रांतपमतेनवेनेसं। पुराणायुक्तनपक्वमानेनवेव संयोज्य॥ अन्यत्रमवालितद्वारा ...॥ २११

विस्तीर्णसभिन्नसंस्कारतः। संयोगोचेष्यते॥ तदानेनमत्रमणेत्यन्नहिरण्यगर्भआह॥ आमेष्टकास्तु थण्डिलामपक्वा

यं

श्चिनुयाततः। पक्वाश्चित्वा सधश्चेयायथेश्मुपरिष्टका॥ पक्वेष्टकाद्रहूणंसवर्णलणं वस्त्रादिरतानां हिरण्यगर्भानां

निवेधार्थमयेन पंचप्रकारश्क्राः। एत्रिमंत्रयिनं चेवथि मंरिपुमेनथा। रोतिमन्त्राप रंख्याताक्रियापंचविधाइह॥ सुवर्णा

द्विभेदानाहिरण्यगर्भआह॥ एदंतु विविधं प्रोक्तं आर्तरिस्तत्रयस्त्वंधेः। पाषाणानि चितयस्तनेन्द्रसंदिरं स्मृतं॥ पक्वेष्टकं

सुनामभ चनंदितमुत्तमं॥ आमेष्टकं मुमंतंगमुमुर्द्धर्मैतनु॥ नमस्यं चाद्धितं काष्ठा वेणुभिर्मंदिरं स्मृतं॥ वस्त्रैश्चवित्त

यंप्रोक्तं गत्तां शिल्पिविकल्पितं। कारु मतिच वित्तं यमत्र मतं एतानिभिः॥ चनमानि च वस्त्राणि रत्नाणि रत्नमधिनां। सौव

र्णं रात्नं तान्नमयं च संप्रकार्तितं॥ सौवर्णपुष्करं नाम रात्नं तच्श्रीभवं तथा॥ ताम्रेण मृण्मयं तं तु चंद्रनाभिः स्तथात्र सांद्रव

दानवगंधर्वा यक्षराक्षसाकिंनराः॥ द्वादशां तप्रकारास्तु रत्नाणां नियमाः स्मृताः। तातु यत्वानि लेना मन्नायुपंचार चिं

द्रेषु॥ एवं सर्वासु जातीषु रत्नाणि नुचतुर्दश॥ दारुकृतानां तु विकल्पः। दारुकृतानामनीयस्य सुवर्णादि नाह्नां वेलार विक

ल्पोना स्तेच विंभिनानि स्तार मेवकवर्त्तं दारु सुवर्णादि रचितान्निति। उत्तमः सर्वाण्वरत्नं भगृनिविध भागाद्या विकल्पाद

त्यत्रोच्यते॥ सर्वेण विकल्पाः पक्वेष्टकाकृतानां क्रियते॥ नान्येषां दारुकृतानादीनां न पुनर्देवतानि वेदा शालानंदया

गार महान साद्विवेग्रामान्त्रमेवक्रियंते॥ नान्यादिति। तथाच तंत्रांतरे पठ्यते॥ तत्रच विमरपथभमेः पक्षिणं देवतानि

वेगार्श्व नलकोश्यश्च कार्याविधासौविधानतोवारक पुरुषस्य सोपाणमेचिव॥ तथैवभान्निवेग्रास्त्रियासमुद्दिष्टं भो

ग्रनशालासंस्थानलक्षणं चैव सामान्येन यां नियमस्तत्कोषावेपुनायामानरतरेषु सर्वेषुन द्वारेषुन द्वारपनपालनांदी

विभागमित्यक्रमतिप्रसंगेन आह॥ - - -

पदस्य क्षेत्रस्य विभाग प्रदर्शनार्थमाह॥ एकाद्रशानि विभागा द्वाद्रशपूर्वेनिरायतान्येषां। अस्त्रयेन्नासुरा द्वात्रंशा

द्वाह्यकोष्टकाः॥ एकाशीति पदविभागं क्षेत्रं दशरेखाः पूर्वपरायता दश चैत्रास्थ कार्याः। एवं कृतेएकाशीति

पदंक्षेत्रमुत्पद्यते॥ अस्य क्षेत्रस्यांतर्मध्यत्रयोदशसुरादेवा। स्थिता वास्तु द्वावृद्धिः कोष्ठपुस्थिता द्वात्रिंशत्॥ एवं पंच

चत्वारिंशत्सुराः। क्षेत्रइति। तत्र द्वात्रिंशत्वाह्यकोष्ठकात्सगणनाह॥ शिखिपर्जन्यजयंतेंद्रसूर्यसत्य भृशांतरि

क्षश्चेशान्याद्याः क्रमशोदक्षिणपूर्वांनिलाकोणं॥ पूषावितथावृहत्क्षतयमगंधर्वाख्यभृंगराजमृगाः पितरो

व.रा.सं.

२१२

वारि वायुमसुग्रीवः। कुसुमदंतोऽसुरपत्यसुराः। शोषोऽथ पापयक्ष्मारोगाः कोणे ततोऽहिर्मुख्यश्च भल्लाटसोमभुजग भुजगास्ततो
दितिः। दितिभिरितिक्रमशः। ईशादिपर्जन्येति। ईशान्याद्याईआर्न। मादितिः। एतान्क्रमगः क्रमेणकोष्ठेष्वारवाद्यादेवाः स्थि
ताः। तद्यथा। ईशान्यामग्निकोष्ठेवां च सक्षोडिवः ततः पर्जन्यश्चैकत्वाद्वितीयकोष्ठके पर्जन्यस्ततो जयंतस्ततइंद्रः। ततः
सूर्यस्ततः सत्यस्ततो भृशः ततोंतरिक्षइति। दक्षिणपूर्वेऽनिलः कोणेइति। दक्षिणपूर्वकोणे आग्नेय्यां दिश्यनिलः स्थि
तः। वायुः। केषांचित्पक्षेनलइति। अनलोऽग्निः। पूषादिवितथेति। अनिलादनंतरं क्रमेणदक्षिणस्यां दिशि पूषादयः स्थिताः।
तद्यथा। पूषा तथोऽनंतरं वितथः। ततो गृहक्षतः। केषांचित्गृहक्षतः ततो यमस्ततो गंधर्वांशः ततो भृंगराजः ततो मृग
पित्रादयः। पश्चिमायां। तद्यथा पितृनैर्ऋतकोणे ततोऽनंतरं दौवारिकस्ततः सुग्रीवस्ततः कुसुमदंतः पुष्पदंतस्ततोऽसुरपतिर्वरु
णस्ततोऽसुरः। ततः शोषः। अथानंतरं पापयक्ष्मारोगः। कोणे पश्चिमोत्तरे तत्र उत्तरस्यामाह। ततो मुख्यः ततो भल्लाटस्त
तः। सोमस्ततो भुजगस्ततः अदितिस्ततोदितिरनेनप्रकारेणक्रमशः परिधावदेवास्थिताः द्वात्रिंशत। अथ मध्यस्थितानरू
याहब्रह्मासनादि। मध्ये ब्रह्मानवकोष्ठाधिपः स्यात् स स्थितः। प्राच्यामंकोदिग्गणि प्रदक्षिणमस्मात् अर्यमा विवस्वांश्च विबु
धाधिपतिस्तस्मान्मित्रोऽन्यो राजयक्ष्मानामाय। पृथ्वी। धरापृथिव्यानंतरं ब्रह्मणः परिधौ आपो नामैशानकोण
हुताशनं च सावित्रः जय इति च नैर्ऋते रुद्रः। अनिलेभ्यंतरपदेषु मध्ये ब्रह्मेति। मध्ये मध्यमभागे ब्रह्मा पितामहो नवानां
कोष्ठानां अधिपतिस्वामी।। अस्य ब्रह्मणः अर्यमा प्राच्यां पूर्वस्यां दिशि स्थितः। अस्मादर्यम्णः एकांतरात् एकपदव्यवहि
तात्प्रदक्षिणं प्रादक्षिण्येन सवितृप्रभृतयः स्थिताः। यथा ह्यार्यम्ण एकपदव्यवहितं सविता। ततः एकपदव्यवहितो वि
वस्वान्। ततो विविबुधाधिपतिरिंद्रः। तस्माद्विबुधाधिपतेर्मित्रः। ततस्माद्न्यो राजयक्ष्मानाम। ततः पृथ्वीधरस्तत
आपवत्स इत्येवंप्रकार अष्टौ देवाः एकांतरं ब्रह्मणः परिधौ व्याप्य स्थिता आपोनामेति। ईशानकोणे पर्जन्याध आपो
नाम स्थितः। हुताशनं आग्नेयकोणे अंतरिक्षाधः सावित्रः स्थितः। नैर्ऋतकोणे दौवारिकस्याधो जयः स्थितः। अनि २१२
लवायव्यकोणे पापयक्ष्माधोभागे रुद्रः स्थितः। एते सुरा अभ्यंतरपदे द्वीशानादिपु यतो ब्रह्मपदमा आग्ना
यस्थिताः।। अथ तत्र स्थितानां देवानां पदसंख्याप्रदर्शनार्थमाह।। आपस्तथापवत्सः पर्जन्योग्निर्दितिश्च वर्गोयं।। एवं

एवं कोणे कोणे पादिकास्युः पंचपंचसुराः। बाह्या द्विपदाः शेषास्ते विबुधा विंशतिसमाख्याताः शेषाश्चत्वारोऽन्ये त्रिपदाश्च
दिक्षु ब्रह्मा नवपदास्ते। आपस्तथापवत्सेति। आप एकः। तथापवत्सो द्वितीयः। पर्जन्यस्तृतीयः। अग्निश्चतुर्थः। दितिः पंचम
अयं वर्गः। समुदायएकपादिकः एकैकस्मिन्पदेस्वामी।। एवमनेनक्रमेण कोणे पंचस्या पंचपंचसुरादेवाः। पादिका एकपद
स्वामिनस्युर्भवेयुः। तद्यथा आपः। आपवत्सः पर्जन्यः अग्निर्दितिरित्यैशानकोणे एकपादिकाः सविता। सावित्रः।
अंतरिक्षः अनिलः पूषा। इति पंचाग्नेयकोणे। एकपदा विबुधाधिपतिर्जयः। दौवारिकः पितरः। मृग इति पंच नैर्ऋतको
णे एकपादिका राजयक्ष्मा रोगः। अहिः। इति वायव्ये पंचैकपादिका बाह्या द्विपदाः शेषा इति। शेषा बाह्या बाह्यकोष्ठेषु
स्थिताः। विबुधादेवाः द्विपदाः पदद्वयस्वामिनस्ते विंशतिः। समाख्याता उक्ताः। तद्यथा जयंत इंद्रसूर्यसत्यभृशाः पूर्वस्यां
द्विपदा वितथा बृहत्क्षत्रयमगंधर्वभृंगराजा नाम दक्षिणस्यां द्विपदाः। सुग्रीवकुसुमदंतासुरपत्यसुराशोषाः। पश्चिमायां
द्विपदाः मुख्यभल्लाटसोममृगादितयउत्तरस्यां द्विपदा एवं विंशतिः। द्विपदाः सुराः सुराणां चत्वारोऽन्ये त्रिपदा इति। मु
ख्यभल्लाटसोमभुजगादितिउक्तोभ्योऽन्ये शेषाश्चत्वारः अर्यमाद्या दिक्षु ब्रह्मणः स्थितास्ते चान्ये त्रिपदास्त्रि
पुपदेषु स्वामिनः तद्यथा। अर्यमा विवस्वान्मित्रः पृथ्वीधरश्चेति एते त्रिपदाः स्वपादाल्पोश्चर्यद्वयेषामन्यपदद्व
यमिति। तथाच पराशरः। तत्रकादिदेवताः प्राक्पर्जन्यकरग्रदश्चादिंद्ररविषसत्यभृशांतरिक्षपवनाद्दक्षिणतः। पू
ष्या वितद्गृहक्षतयमभृंगगंधर्वमृगपितरश्चेति। पश्चिमतो दौवारिकसुग्रीवपुष्पदंतासुरवरुणायक्ष्मरोगशो
षाश्चेति। उदग्भृंगराजमुख्यभल्लाटसोमादितिः। कुबेरनागहुतदिग्दिग्स्तस्माद्ब्रह्मा। तत्पुरतोऽर्यमा दक्षिणतो विव
स्वान्। मित्रपश्चिमगुदकपृथ्वीधरइति। ब्रह्मपदानुवर्गिणो। अशावन्ये आपआपवत्सौ वैश्यानां सावित्रराजाग्नेय्यां
जयेंद्रो नैर्ऋत्यां रुद्रव्याधायथामिति। सर्वदेवताः पंचचत्वारिंशद्भिः अत्रान्येः सदैतेषां यदानामासादृश्यंत
थाचरुद्राः हुताशनश्चैव पितावानिलएवच।। एतेकोणगतादेवाः। एकादशतिपदेस्मृता।। चतुःषष्टिपदे प्येवं पा
पयक्ष्मात्रनस्थिताः। एभ्योऽन्ये सदृशा देया सुराः सर्वपदाश्रिताः। तथाच वास्तुनरस्यांगप्रविभागमाह।। पूर्वोत्तर
दिङ्मूर्धा पुरुषः यमवाङ्मुखोऽस्य निर्ऋतिशिखी। आपो मुखे स्तनस्यार्यमा वक्षस्यापवत्सश्चापर्जन्याद्यंश्च ला

G. BHAU DAJI

उदकश्च वरुणाः। स्थलांशगा देवाः। मध्याद्याः पंच भुक्ते दलैः सविता सावित्रः वितथो बृहत्क्षत्रः पुनः पार्श्वे जिदरे स्थितावि
बृ०सं० वस्वांश्च। इंद्रजानुक्तं घे स्फिगौ तियमाद्यैः परिगृहीताः। एते दक्षिणपार्श्वस्थाने वैवं वामपार्श्वस्थाः। मेंद्रजाख्यस्तंता
हृदये आपापवत्सभिर्दिंष्टैर्वांत्तिरग्निमूर्धा पुरुषोऽयमिति॥ अयं पुरुषो वास्तुनरः। पूर्वोत्तरदिक्शिर्धा पूर्वोत्तरेशानी
२३३ दिकतस्यामस्याशिरः सचावाङ्मुखो धोमुखः स्थितः। आपोमुखे वदान॥ स्तनेस्य वास्तुनरस्यार्यमा स्थितः। उरसि वत्स
स्याप वत्सः पर्जन्या द्याइति॥ पर्जन्याद्याः पर्जन्य प्रभृतयो बाह्यबाह्यकोष्ठ स्थाय्यात्र नेत्रं दक्षिवणा रक्तांशगाः देवाः
स्थिताः। यद्यथा पर्जन्याद्यः चक्षुर्जयंतः श्रवणं कर्णस्थं इंद्र उरस्थले वक्षः स्थले। सूर्यमंत्रं स्कंधे सत्यागाः पंचसत्यभ
शांतरिक्षाः नलपृषाणाः। एते भुजे वाह्वौ स्थिताः। हस्ते पाणौ सविता तथा सावित्रश्च स्थितः। वितथाद्यति। वितथो बृहत्
क्षत्रसहितः पार्श्वे स्थितः। विवस्वान् आदित्योजठरे उदरे जठरे आदित्यो ज माद्यौ यमाद्यौ परिगृहीता अधिष्ठिताः। तद्यथा उरुं प्रदं
शौ यमः। जानुनि गंधर्वः। जंघायां भृंगराजः। स्फिजि भृंगः॥ एते दक्षिणपार्श्वे इति। एते यथाहिष्यात् दक्षिणपार्श्वे देवाः
स्थिताः। एवमनेन प्रकारेण श्लोकेन प्रवाम पार्श्वस्थाः तद्यथा वामस्तने पृथिवीधराहिभिर्दित्ता। अदितिः श्रवणे भु
जगाउरः स्थले। सोमो सिभल्लाटमुख्याद्दोरगापापयक्ष्माणौ भुजे। भद्रराजयक्ष्माणौ हस्ते॥ शोषः स्करापार्श्वे। अ
सुरपतिरुदरप्रदेशे। कुसुमदंतो जानुनि। सुग्रीवो जंघायां॥ दौवारिकास्फिजिः। एवं वामपार्श्वे स्थिता मेंद्रो लिंगे जयंत्रजयं
तास्थितावत्सा हृदये। अंघ्रिपादौ पितृभिः परिगृहीतौ। एवमेकाशीतिः पदेन नगरग्राममग्रदेः। वास्तुपुरुषप्र
विभागः। अथुना देवगृहे चतुःषष्टिपदस्य वास्तुलस्यप्रविभाग प्रदर्शनार्थमाह॥ अष्टाष्टकपदमथवा कृत्वा। रेखाः
श्च कोणगास्तिर्यक्। ब्रह्मा चतुःपदोस्मिन्न र्धपदा ब्रह्मकोणस्थाः। अष्टौ च बाह्यकोणेष्वर्धपदास्तदुभयस्थिताः
सर्वे उक्तेभ्यो ये शेषा स्ते द्विपदा विंशतिः स्तेच॥ अष्टाष्टकपदमथवेत्यथवा अष्टाष्टकपदं चतुःषष्टिपदं क्षेत्रं कार्ये
त। एतदुक्तं भवति। नयन पूर्वोत्तरायता रेखाः। अष्टाष्टकपदमथवेति॥ अथवा अष्टाष्टकरूत्वा चतुःषष्टिपदा दिमं वति
तत्र कोणगास्तिर्यकृतस्ता रेखाः कार्याः। कोण चतुष्टये तिर्यक् रेखाः कोष्ठक त्राय मध्यगताः। ख्याता इति। अ २३३
स्मिंश्चतुःषष्टिपदे क्षेत्रे मध्ये ब्रह्मा चतुःपदः। ब्रह्मकोणस्था अष्टौ विबुधाः अर्धपदाः तद्यथा। आप आपवत्सः

सविता सावित्रो विबुधाधिपतिर्जयंत राजयक्ष्मा रुद्रश्चेति। अष्टौ च बाह्यकोणेष्विति। बाह्यकोणेषु बाह्यकोणेषु येऽष्टौ स्थिताः॥
सार्धा तदिन्यनेनाग्न्याद्यादीनां कोणगानां परामर्शः तेषामुभयपार्श्वस्थाः तद्यथा पर्जन्यश्चान्तरिक्ष पृषा भृंगराजौ दौवारिकशोष
नागादितय एते सार्धपदिकाः उक्तेभ्यः कथितेभ्यो येऽशेषाः परिशिष्टा विंशतिस्ते द्विपदा। तद्यथा जयंतइंद्रसूर्यसत्यवित
थ बृहत्क्षत यम गंधर्व सुग्रीव कुसुमदंतासुरपत्यसुरमुख्य भल्लाट मृग विवस्वान् मित्र पृथिवीधराणे विंशति द्विपदा॥ ए
वं चतुःषष्टिपदो वास्तुनरः एतत्क्रमतस्सर्वास्तु नरमिच्छंति तदपि नाकश्चिद्दोषः अनेन प्रविभागेन कोणकाभ्द्रं इंद्रारं जाय
ते॥ निःसंशयमिति। अत्राचार्येण चतुरस्र क्षेत्रे वास्तुनरस्य दर्शितः नरः षडशीत्याश्रि द्वारशत्याश्रि षोडशाश्रि षोडशाश्रि वा कोष्ठ
णि दृश्यते तत्र स्थाने नैव माचार्येणोक्तं तत्र षडश्रिम रुद्राश्रिमुत्तमा रित्यादि॥ तथा च भरतमुनिनाम्नाप्रस्तं नृत्यशा
स्त्रमुक्तं तस्मादन्यशास्त्रादानीय प्रसंगेनास्माभिरिदं प्रदर्श्यते॥ तद्यथा एकाशीतिपदे क्षेत्रे कर्तव्यं यत्र पंचकं। बाह्य
मभ्यंतरं यत्र पदं द्वात्रिंशता युतं॥ पदं चतुर्थं च चतुःपदं। एवं पंचमकोष्ठे कार्ये। ब्रह्मापं च स्वबस्थितः। शिख्यादय
स्तु द्विपदं बाह्ये विकभसंस्थिताः। मरुतः सर्वपदिकाः परिकीर्तिताः। यत्रैते एकाशीतिपदे यतानि चत्वारि समानितः
या वा स्तोष्ठः चतुःषष्टिः पदश्चतुःषष्टिपदस्य सम्यक् रुद्रस्तदर्धमचसर्वं वेदविभज्यते य तच्चतुष्टयं च शिख्यादयश्चि
कृपाद्या विहितपदद्वाः। ये वार्यमकाद्यश्चापादयश्चत्रिपदाः। प्रदिष्टा श्चतुष्पदस्य ब्रह्मा मदहः स्यात्॥ प्रत्य
से क्षेत्रं चतुःषष्टिपदं एवमेषे वेड्शि प्र भृत्तानां विन्यासः कार्यः सम्प्रदायः॥ वंशानां कोणको गतानां सूत्राणां ये
संतापः परस्पराणामेकीभाव तद्यान्वयस्तति॥ मर्माद्यास्युपिततोदुल्तानर्वसूत्रशेषमापाठितथाः॥ मुख्यान् भ्रंशं
जयंताञ्च भृंगमातितेन च सुग्रीवादितेस्तथा॥ एतच्चतुर्वंशोक्तं रज्जुसंज्ञं मनिषिभिरेवं वंशानां ये संपाताः पूर्वाः
पराभिः शिराभिः सदृतथा पदानां सर्वेषां यानि च समानि मध्यानि तानि सर्वाणि मर्माणि विद्यात् जानीयात्। तानि च
मर्माणि --- धार्चा न परिपीडयेत। तेषां पीडानायद्भवति। तदाह॥ नान्यशुचभां - - - -

वा॰ संहि॰

२१६

		अ	ई	सृ	स	भू	अदि वत
		अ	ई	सृ	स	पृथ	पृ
	भत	आ आ	अ	आ	सावि त्रय	वि	वि
सोम	सोम	रु	प्र	प्र	ति	रु	रु
भुजं	मघा	रु	घ्र	प्र	वि	यम	यम
मुख्य	मु	सर्प	मि	जे	वि	गं	गं
अदि	प्रश	अ	स	कु	स्क	देभ	अरु
जेव पाप	शो	अ	पर	कु	स्क	दो	पित

शि	प	ज	इ	स	प्र	भृ	अं	अ
दिति	आप	ज	ई	स	स	भृ	सा वि	रव
अ दि	अ दि	आ प	अ	अ	अ	सवि	वि	वि
भुज	भ	रु	प्र	प्र	प्र	वि	रु	रु
सो	सो	रु	प्र	प्र	प	वि	य	य
भ	भ	रु	प्र	प्र	पि	गं	ग	पर्व
मु	मु	राज	मि	मि	मि	तिद	भं	भं
अ	सर्प	शो	अ	ते	पु	स	गण	ग ण
रोग	पा	शो	अ	व	पु	सु	दो	पित



उक्तंच — — — शल्येष्वथग्रहभंगेषु
पीडां मंगेप्रयच्छति। तानिकर्माण्यशुचिभां — — — —
रूपकरणवस्तुभिस्तथाकीलकैः शंकुभिः स्तंभैश्च॥ आदिग्रह
णादन्यैरपिगुरुभिः — — — — — शल्यैश्चापिपरिपीडितानि बाढं भवन्ति॥ तदात्तगृहेषु
गेतस्मिन्येयांगेगृहं तुः पीडांरुजां प्रयच्छति॥ अधुना शल्यस्थानमाह॥ कं दृश्यते यदंगं गृहभ
र्तुर्यत्र वामायस्तात्रशुभंभवेन्निमित्तं विकृतिर्वाग्नेः शुभाल्पंतत्र। गृहभर्तुर्गृहस्वामिनोहोमकाले प्रच्छायां॥ बाधि
दंगं यद्दृश्यते कंडूयते तदेवांगं वास्तुनरस्य सशल्यं यत्र वामरादुत्था मन्तुभंभवेन्निमित्तं। अमरादेवाः क्रिव्वादय

स्तेषांहोमकालेयात्रआहुतिस्तस्यां यदशुभंनिमित्तंभवेत। अतानिष्ठीवितरोदनाक्रोशनवातोः सर्गादि अनिष्टवाक्य
श्रवणं। अग्नेर्विकृतिर्विकारो वधिस्फुलिंगसशब्दं दुर्गंधादितस्थानममराधिष्ठितं। सशल्यंशल्यसंयुक्तमिति
पार्थं। अथशल्यानांप्रविभागेन फलमाह॥ धनहानिर्धान्यमायमपथुर्दारुणभयानिचास्थिकृतेअपिना
गदंतकोमर्मसंस्थितादोषकृद्भवति। दारुमयेकाष्ठमथेवाल्पे धनहानिर्विज्ञनाशोभवति। अस्थिकृते चाल्पेप
शूनांचतुष्पदानांपीडायथारुग्भयानिचभवंति। अपिच्चमब्दः संभवनायांवर्तते॥ नागदंतको हस्तिदंतः
शुभोपिकर्मसंस्थितोदोषः कृतअनिष्टदोभवति॥ अथवंशानुरसुक्ष्मणंमहामर्माणिप्रदर्शयितुमाह॥ रोगाद्वा
युंपितृतोहुताशनंनेषवस्त्रमवितिनथात। मुख्याद्भृशंचयंताद्भृंगमदितेश्चसुग्रीवं॥ तत्संपातानवधेतान्यति
मर्माणिसंप्रदिष्टानियस्यपदस्याष्टांशुस्तत्प्रोक्तंमर्मपरिमाणं। रोगाद्वायुमिति। रोगाद्वारभ्यवायुमक्लिंयाव
त्सूर्यातिर्यक्रमध्यात। एवंपितृतोहुताशनंआग्निवं। यावद्दितथासर्वत्रीणंयानत। मुख्याद्भृंगंयावत॥ जयंता
द्भृंगंयावत। अदितेश्चसुग्रीवंयावत। तत्संपातादिति। नदितिसूत्राणांपरात्परः। तेषांसूत्राणांपरामर्शः।
तेषांसूत्राणांपरस्परंयेनवसंपातास्तान्यतिमर्माणि॥ महामर्माणिसंप्रदिष्टान्युक्तानिममप्रमाणमाह॥ यश्च
पदस्येति। पदस्यपश्चाष्टांशोष्टमभागस्तन्मम अत्रक्षेत्रे अत्राणिपंचक्षेत्राणिकोणपरिकल्पयेत॥ ७ ॥ त्रि-
तत्रापिकोणत्रितयेपूर्वोक्तानाडिबुधान्यसेत॥ त्रितयेषुबाह्यकोष्ठकात्कराश्चविनिवेशयेत॥ क्षेत्रेतृतीयेचतारिसर्वा
त्रिगुणमुकारयेत॥ प्राग्घग्धर्मसाविद्यासवितावततःपरं॥ विवस्वांश्चजयंतश्चइन्द्रोमित्रोहरस्तथा॥ राजयक्ष्मा भूमिध
रःआपावत्सयुतः सत्र॥ चतुर्थेत्रिषुकोणेषुपंचमेमध्यगस्तथा॥ पितामहोविनिर्दिष्टअत्रग्रहेष्वप्ययंविधिरिति॥ एवमे
तिसर्वएवसत्याधिष्ठातारअग्रस्तरेणविदर्शितारिति॥ ॥ अथान्यमर्मप्रविभागप्रदर्शनार्थमाह॥ संतोवांवंशानांमध्या
निसमानियानिचपदानांमर्माणितानिविद्यात। नतानिपरिपीडयेत्परिमाणंप्रोक्तंकथितं। एतदुक्तंभवति॥ क्षेत्रमेकाशीति
पदविभवतिमतंहृत्वयावत्प्रमाणंपदमुत्पद्यते॥ तस्याष्टांशोमर्मपरिमाणमिति॥ अथान्यदृष्टांतशाराश्चप्रमाणमाह॥
परहस्तसंख्यायामपितानिवंशांगुलानिविस्तीर्णाः वंशाव्यासाध्यर्द्धः त्रिशत्प्रमाणंसमुद्दिष्टंपदहस्तसंख्यायापदस्यावं

लोहस्ताविस्तारं भवति। तत्संमितानि तत्संख्यानि पंक्तिस्थानि वंशो विस्तीर्णो भवति तेषां द्व्युविस्तीर्णं कृत्वा द्वितीयमेव दुर्गाद्बहिर्नीत्वा
वरा॰सं॰ ते॥ एवं वंशव्यासो वंशविस्तारो ध्वजो द्विगुणितः गुणितः प्रमाणं विनिर्दिष्टं कथितं। द्वारायामेन पूर्वापरस्येता दक्षिणो
त्तरायताश्च दक्षाररेखा दीर्घा॥ तथा च गर्गाः स्मृताः पञ्चमते॥ शांतायशो वनी कांता विशाला प्राणवाहिनी। धन्या च सुमता नंदा
२१५ सुभद्रा च रथा रथा॥ पूर्वापरायताश्चैता दश्यामाश्रिताः शृणु॥ हिरण्या सुव्रता लक्ष्मीर्विभूतिर्विमला श्रियो। जया ज्वा
लाविशोका च तथैता दश नामस्मृता॥ एकादश पदे ह्येताः शिराश्च परिकीर्तिताः॥ श्रियायशा मती कांता सुप्रिया विव
सा शिवा। सुशोभा च मनोज्ञा तथैतान वर्मा स्मृता॥ पूर्वापरायताश्चैताश्चतुःषष्टिपदे स्मृता॥ धन्या धरा विशालाच
स्थिरा रूपा गदा निशा। विभवा प्रभवा चान्या सौम्या श्चाश्रिताः शिराः॥ इति॥ ॥अत्रैव परिभाषार्थमाह॥ मुखमित्युक्तं ब्रह्म
णं यत्नाद्रक्ष्यं गृहीगृहांतस्थं॥ उच्छिष्टाद्युपघातात् गृहपतिरुपतप्यते तस्मिन्। गृहीगृहपतिः सुखमिच्छन् सुखमभिलषन्॥
गृहांतस्थं गृहमध्यगतं ब्रह्माणं पितामहं यत्नात्सर्वप्रयत्नेन रक्षेत्पालयेत॥ ततस्तस्य ब्रह्मण उच्छिष्टाद्युपघातादुच्छिष्ट
मशुचिः आदिग्रहणात् मेध्याद्युपस्करभांडैरेतेषां तत्र स्थानादुपघातो भवति॥ तस्मात्तस्मिन् गृहे गृहपतिर्गृहस्वामी
उपतप्यते उपतापं प्राप्नोति॥ ॥अथ सकलवास्तुनिर्दोषप्रदर्शनार्थमाह॥ दक्षिणभुजेन दीनेवास्तुनार्थक्षयं गतादो
षाः स्युरेवमेवेत्याह॥ गृहनगरग्रामेषु च सर्वत्रैवं प्रतिष्ठितादेवाः। तेषु च तथानुरूपं वर्णा विप्रादयो वास्याः॥ एवमनेन प्रका
रेण गृहे वेश्मनि नगरे पुरे ग्रामे वा एतेष्वपि सर्वत्र सर्वस्मिन् देवाः सुराः प्रतिष्ठिताः॥ परिकल्पिताः। एतदुक्तं भवति। यथा
गृहे वास्तुनरस्य परिकल्पना कृता तथैव ग्रामे नगरे च कार्या तत्रापि च यानि कर्माणीति॥ मर्माणि च तानि प्रान्तान्यथाहानि तान्यपि
तेषु गृहनगरग्रामेषु विप्रादयो ब्राह्मणाद्या ब्राह्मणक्षत्रियवैश्यशूद्रा यथानुरूपं यथाक्रमं॥ यथानुरूपं वास्या वासनी
या॥ यत्र दिग्विभागो यस्योचितं तत्र वासयेदित्यर्थः॥ कथमिति दर्शयन्नाह॥ वासगृहाणि चार्थं घातं॥ विप्रादीनामु
दगादिगतानि निवास्तां तथा च भवनं भवंति तान्येव दक्षिणतः। विप्रादीनां द्विजादीनां वासगृहाण्युदगादिगतानि वि
ज्ञातज्ञानीयात्॥ गृहे चतुःशाले ग्रामे नगरे वा ब्राह्मणानामुत्तरस्यां दिशि। वासगृहाणि कार्याणि पूर्वस्यां क्षत्रिया २१५
णां। दक्षिणस्यां वैश्यानां। पश्चिमायां शूद्राणामिति। तथा च कार्याणि यथा भवनं। यथाभ्यंतरमंगणं। विज्ञातांतान्य

वं वासगृहाणि दक्षिणस्यां दिशि भवंति। एतदुक्तं भवति। प्राङ्मुखस्य गृहस्यांगणस्य द्वारमुत्तराभिमुखं कार्यं॥ दक्षिणा
भिमुखस्य प्राङ्मुखं। पश्चिमाभिमुखस्य दक्षिणाभिमुखं॥ उत्तराभिमुखस्य पश्चिमाभिमुखमिति॥ अधुना यानि चांति
स्पृष्टिक्षद्वात्रिंशद्द्वाराण्युक्तानि तेषां शुभाशुभं फलं वक्ष्यामीत्याह। नवगुणसूत्रविभक्तान्यष्टगुणेनाथवा चतुःषष्टि
द्वाराणि यानि। तेषामनलादीनां फलोपनयः॥ नवगुणेन सूत्रेण यानि विभक्तानि द्वात्रिंशद्द्वाराणि तथाष्टगुणेन सूत्रेण
विभक्तानि यानि चत्वारिंशत द्वाराणि। नवगुणेन सूत्रेणाशीति पदे। अष्टगुणेन सूत्रेण चतुःषष्टिपदे चतुःषष्टिरिति
करणं। यानि द्वात्रिंशद्द्वाराण्यनलादीनि तेषामनलादीनां द्वाराणां क्रमेण परिपाट्या फलोपनयः फलकथनं तथाह॥
अनलभयं स्त्रीलाभ धनसंपन्नृपतिभयं धनक्षयो रोगभयं रेषु सुपादाः पुत्रव्यथा पित्रो रिपुवृद्धिः धनसुताकुलं दोषाः
कृतानां पुत्राणां धनानां च नाशिः लाभः सुग्रीवे। कृतानां पुत्राणामर्थानां धनानां बलस्य वीर्यस्य संपत्। संपत्तिकु
समदंते धनानां संपत्तिर्वारुणे नृपतिभयं राजभयमासुरे॥ धनक्षयो वित्तनाशः शोके रोगो गदः पापयक्ष्मा शोषस्त
या पश्चिमायां द्वारनिर्देशः॥ अथोत्तर आह॥ वधबंधौ रिपुवृद्धि धनसुतलाभः समस्तगुणसंपत्। पुत्रधना
प्तिर्वैरं सुतेन दोषाः स्त्रियां निःस्वं। वधबंधौ रोगाख्ये रिपुवृद्धिः सार्पे सुत धनलाभो सुतानां पुत्राणां धनस्य च
लाभो मुख्याख्ये समस्तपुण्यसंपत्समस्तगुणानां संपत्तिर्भल्लाटे। पुत्रधनाप्तिः पुत्रार्थसौम्ये। वैरं द्वेषं सुते
न पुत्रेण सह भोगे गृहस्त्रीणां दोष आदितेनैः स्यांतिर्द्धनत्वं आदित्याख्ये॥ एवमुत्तरतो द्वारनिर्देशाः॥ नन्वत्र नवगुण
सूत्रविभक्तानि कर्तव्यानि॥ कुत एव निश्चीयत इत्युच्यते॥ अष्टगुणेनाथवा चतुःषष्टिरित्यस्मादेव विकल्पाद्गम
्यते। पूर्वाचार्यप्रणीतस्य पक्षस्याव विकल्पः यस्माद्द्वारकर्मणा एकाशीतिपदकाःतचतुःषष्टिपदान्युक्तानि। त
षु च प्रत्येकं विभागान्यभिहितानि॥ तथा चाह। राजवेश्मानि वर्गाश्च गृहाद्यानि च पणीनां॥ एकाशीतिपदेनैव क्षात्रलक्षणं
च मापयेत। प्रासादान्विबुधानां च दाकस्तथान्यांश्च शिष्टमंडपान्। चतुःषष्टिपदेनैव सर्वानेतान्प्रमापयेत। नगरग्रामखेटा
दीन् शिबिराणि च भूभृतां॥ शतपदप्रविभागेन मापयेत इति॥ तस्मान्नवगुणसूत्रविभक्तान्येकाशीतिप
देनपादानां कर्तव्यानि। अत्र केचिदनिश्चितबुद्ध्या विकल्पं श्लोका पादयंति। तथा चाति स्वपादे सुनवगुणसूत्रविभाग

व॰ रा॰ सं॰ निनयांति नति भागानि भवति। अनलभयं स्त्रीजन्म इत्यादि त्यष्टद्वाराण्युक्तानि। ये मानवमो भागः स तत्र प्रदेशो विकृतस्त्वभि
त्यत्रोच्यते। प्रागेव वास्तुदेवतानां प्रविभागं कृत्वा अनलादीनां देवतानां पदेषु द्वाराणि कल्प्यन्ते यानि। कल्पितानि च द्वारेभिः फलैश्चिंतनी
या। तथा च नंदी आह॥ भागांश्छित्वा द्वारं मत्वा चार्यास्य नस्यात्ति॥ आचार्येण समाससंहितायां निबंधे स्पष्टतरं निबद्धं। तथा चाह॥
२१६ पूर्वादिशान्याद्याश्चाग्नेय्यां दक्षिणानि तानि स्यात। द्वाराणि नैर्ऋतान्यश्विमान्युदकापि वायव्यां॥ आग्नेयमग्निभयदं पर्जन्यं स्त्री
प्रसूतिद्वारं प्रचुरधनदं जयंतं तत्पवल्लभकारि माहेंद्रं॥ सार्य क्रोधः प्रचुरः सत्ये मतवादिता भृशे क्रौर्यं तथांतरिक्षे प्राग्द्वारा
णि प्रदिष्टानि। वायव्यमल्पसुतत्वं प्रेष्यं पौष्णं च नीचता वितथे॥ बृहत्क्षतान्नपानं पुत्रं करदूरतं याम्यमिति। रौद्रं। गांधर्वं गां धा
यन्नपचौरभया भृंगराजाख्यं॥ मृगमपि वीर्यं मतं दक्षिणतो द्वाराणि निर्दिष्टानि॥ पित्र्ये नारिर्दौवारिके सांतति रिपु वृद्धिः॥
सुग्रीवे धनहानिः पुत्र धनाढ्यं कुसुमदंतं। वारुणमर्थानिचयदं तत्पभयं चासुरं विनाशदृश्य शोषं धनहानिकरं॥ बद्धरोगपा
पयक्ष्माख्यं। रोगद्रव्यवधबद्धदमात्मजविराधिनाद्रोह्यं नागं। मुख्यं धनसुतदं भल्लाटं मनेकगुणं च भल्लाटं॥ सौम्यं धनपुत्र
करं भौजंगं पुत्रवैरकरि वृद्धिः। आदितिरुक्तानि दोषाः। स्फुटं धनं संक्षयं स्यादिति। तथा च गर्गः। पूर्वादिक्रमयोगेन द्वा
ता शाग्नि भयं वदेत॥ पर्जन्ये प्रचुरा नार्यो जयंते बहुवित्तताः। महेंद्रे नृपवाल्लभ्यं शौर्ये तिक्रोधना भवेत्॥ सत्ये
नतं वितथे क्रूरत्वं तु भृशे भवेत॥ अंतरिक्षे तु वित्तानि त्यं चौरसमागमः। स्यात्पुत्रनाशो वायव्ये पौष्णे प्रेष्यत्वमेव च॥
नीचत्वं वितथे ज्ञेयं स्याद्गृहक्षते तु संततिः। क्षुद्रकर्मा भवेद्याम्ये गांधर्वे कृतनाशनं॥ अधनं भृंगराजाख्ये मृगे पुत्रवि
नाशनं॥ पित्र्ये स्त्र्यायुरधनं द्वा यद्दौवारिके भवेत्। सुग्रीवे पुत्रनाशः स्यात्पुष्पदंते तु वर्धनं॥ वारुणे क्रोधभोगि
त्वं नृपभंगस्तथासुरे॥ नित्याभिरोगिता शोषे पापाख्ये पापसंचयः। रोगे रोगवधौ नित्यं नागाख्ये धनं महत्॥ मुख्ये धन
सुतोत्पत्तिर्भल्लाटे विपुलाः श्रियः। सौम्ये तु धनशालत्वं भुजंगे बहुवैरिता॥ कन्यादोषास्तदादित्ये त्वदितौ धनसंक्षयः २१६
पदे पदे कृतं यस्य द्वारस्य फलदायकं॥ पदद्वये कृतं तत्र तद्द्वामिश्रफलप्रदमिति॥ अत्राचार्येण सामान्येन ग्रहाणां द्वा
त्रिंशन्नक्षत्राणि उक्तानि तत्र चंद्रताराकल्पेन द्वाणां द्वाराणां चक्रमुक्तं। तच्च लोकतो दृश्यते ततोस्माभिरन्यतन्त्रा
स्त्राद्वास्तुनराणां सामान्यायनं नक्षत्राच्च प्रसंगेनास्माभिः प्रदर्श्यते॥ तद्यथा रिको ध्वजश्च ध्वांक्षश्च सिंहः श्वाच

वृषभस्तथा॥ वानरो भद्र इत्येते द्या वास्तुनरा बुधैः। अथैषामानयनं। गृहांतरस्थितं। मानं संगुण्य वा परस्परं। वसु
भिर्भागमाहृत्य शेषं वास्तुनरं वदेत॥ अथवा बाहुप्रबाह्वोः संयोगदलमन्योन्यताडितं। व्यासभक्तं तलः शेषवशाख्य
वास्तुनरं वदेत॥ एतच्चतुरस्रक्षेत्रे। अथ वर्तुले व्यासं त्रिगुणितं कृत्वा विष्कंभं तत्समाहितेन॥ व्यासार्धवर्गात्त्रिगुणं
फलं स्यात्परिवर्तुले॥ अथ षडश्रिप्रभृतिषु दीर्घस्य पादे वर्गमेकस्यादष्टभाजिताः॥ ऊर्ध्वं संशोध्य परतो
भुक्त्वा द्वादशभिः फलं॥ अथ त्रिकोणे। बाहुप्रबाहुसंयोगदलघातं त्रिकोणके॥ एवं सर्वत्र क्षेत्रफलमानीयतस्या
ष्टाभिर्भागमपहृत्य यच्छेषो वास्तुनरस्तद्यथा॥ समस्तन्यमतो रिको ध्वजश्चैकावशेषके। द्वाभ्यां ध्वांक्षस्त्रिभिः
सिंहश्चतुर्भिश्वा प्रकीर्तितः। पंचभिर्वृष इत्याहुः षड्भिर्वानर उच्यते॥ सप्तभिर्भद्र इत्येतद्वास्तूनां लक्षणं स्मृतं॥ रि
के समर्धस्तथाश्लेषा ध्वजे सोमश्च रेवतिका॥ ध्वांक्षे राद्भश्च भरणी सिंहे भाग्यस्तथा मघा॥ वृषः ज्ञानि धनिष्ठा च व
यत्ता चैव रोहिणी॥ भद्रे तु श्रवणः मोरकपोश्रकश्च फाल्गुनी॥ चंद्रताराफलेनेन कारयेत् विचक्षणः॥ विलंनस्यति
रकेन ध्वजेन विपुलाः श्रियाः॥ ध्वांक्षेन नित्यमुद्वेगाः सिंहेन जितशत्रुता॥ जेष्ठादिष्वादितानि चित्रं क्रमाद्दक्षिणसंज्ञितं॥ पित्र्यं
प्रोष्ठपदार्यम्णमाषाढं चाग्निदैवतं॥ वारुणाश्विनसावित्रं क्रमाद्दक्षिणसंस्थितं॥ स्वात्यश्लेषार्भज्ञे सौम्यं वै समवं
वासवं तथा॥ याम्यं ब्राह्म्यक्रमात्सौम्य द्वारे पुष्यावाचाद्यं दितं॥ ॥अथ द्वारवेधफलमाह॥ मार्गतरुकोणकूपस्तंभ
भ्रमविद्धमशुभदं द्वारं॥ उच्छ्रायाद्द्विगुणमितां त्यक्त्वा भूमिं न दोषाय॥ मार्गः पंथाः। तरुर्वृक्षः कोणः अश्रिः कूपः स्तंभः प्र
सिद्धः। भ्रमो जलनिर्गमनप्रदेशः। एतैः सन्मुखैर्विद्धं द्वारमशुभदं॥ कियति दूरस्थितो वेधा न दुष्टफलो भवती
त्याह॥ उच्छ्रायाद्द्विगुणमितामिति॥ द्वारोच्छ्रायाद्द्विगुणमितां द्वारस्योच्छ्राय उन्नत्यं तस्मात् द्विगुणप्रमाणं भूमिमवानित्य
त्काद्य यादृग्वहिस्थिता दोषाय न ते वेधा भवंति॥ नक्षत्रसामान्येनोक्तं। उच्छ्रायाद्द्विगुणमितां त्यक्त्वा भूमिं। यद्वा पंथ्य
त्यत्रतायते॥ किं वेधोद्द्वायो द्विगुणां वृत्वा वेधोच्छ्रायाद्द्विगुणां भूमिं त्यक्त्वा न दोषाय भवति त्यत्रोच्यते। आचार्येण स
मास संहितायां निबंधे स्पष्टतरं निबद्धं तत्त्वाह॥ स्तंभतरुभ्रमकोणैर्विद्धं वेधश्च न शुभदं द्वारं॥ वेधोच्छ्रायाद्द्विगुणं
त्यक्त्वा भूमिं न दोषायेति। तथा च गर्गः। द्वारोच्छ्रायद्विगुणितां त्यक्त्वा भूमिं बहिः स्थितः। न दोषाय भवेद्वेधो गृहस्य

गृहद्रूणोथ चोति। अत्रैव विशेषफलमाह॥ रथ्याविद्धं द्वारं नाशाय कुमारदोषदं तरुणा॥ पंकद्वारे शोको व्ययोऽम्बुनिश्रा
वा॰ म॰ विणि प्रोक्तः। कूपेनापस्मारो भवति विनाशश्च देवताविद्धे। स्तंभेन स्त्रीदोषाः कुलनाशो ब्रह्मणाभिमुखे। रथ्यावि
द्धं मार्गेणाविद्धं द्वारं नाशाय गृहस्वामिनो भवति॥ तरुणा वृक्षेणाविद्धं कुमाराणां बालानां दोषदं दोषान्ददाति॥
२१२ यत्कद्वारे कर्दमविद्धं नित्यं यस्मात्ततः कर्दमं भवति। तस्मिन् शोको भवति॥ अंबुनिश्राववेणि जलनिर्गमनमार्गवि
द्धे व्ययो धनव्ययो भवति। कूपेन विद्धे द्वारे अपस्मारो भवति। देवतासुरप्रतिमा। तयाविद्धे विनाशः स्वामिनो भवति
स्तंभेन विद्धे स्त्रीदोषा योषितां दोषा भवंति॥ ब्रह्मणा विमुखस्समम ध्यवर्तिनि द्वारे कुलनाशो वंशक्षयो भवति। नन
भसंदेहः किं वास्तुद्वारं ब्रह्मणाभिमुखे कुलनाशो भवति। किं वा बाह्य ब्रह्मणाभिमुखे इति नावगम्यते। तस्माद्युक्तं भ
वति विनाशश्च देवताविद्धे। वास्तुमध्यगब्रह्मणाभिमुखेनापि कल्पमाने पूर्वापरग्रंथविरोधः स्यात॥ यस्मादुक्तं ब्रह्मा
भिमुखं पंचमं द्वारमिष्टमुक्तं गृहमध्यगं च भवतीत्याह॥ धधवं धोरिपुवृद्धिर्धनसुतलाभः समस्तगुणसंपद्विया
दि। अत्रोच्यते। बाह्यस्याभ्यंतरस्य च ब्रह्मणाभिमुखद्वारस्यानिष्टफलं प्रत्येकं देवताविद्धस्य फलमिदमाह। दिव
द्वारं विनाशाय शंकरद्वारमेव चेत्यादि॥ तथा च। ब्रह्मणायद्गसंविधेत द्वे कुलनाशनं॥ श्वावद्गलक्ष्मीकृता
र्यावासंप्रदृष्यते॥ तथा च भरद्वाजः। नागमर्माणि वंशाश्च नालमध्यं च सर्वदा। विद्धाय वास्तुमध्यं च द्वाराणि
विनिवेशयेत। तथा च मय आह॥ ब्रह्मस्थानं न विध्येन नागदंतस्तु कासु च॥ तद्द्वारुभिर्गता क्षेश्च यानपाने स्थिर
त॥ द्वारैश्च भित्तिभिश्चैव नाम्याभोगः कथंचन॥ स्वामिनो मरणं तत्र महद्दुःखं च पार्थिव॥ एवं चेत दाचार्येण पूर्वा
परविरुद्धानि निविरुद्धस्यात। तत्रोच्यते॥ सर्वेषु वास्तुषूत्सर्गापवादरूपेण न निषेधो व्याख्यातव्यो भवति। यथा
यात्राप्रकरणे प्राच्यादिससस्तनक्षत्राण्यभिधाय पुनः सर्वद्वारकं सतां नक्षत्रचतुष्टयमाह॥ एवमत्रापि तस्मा
दयमदोष इति॥ अन्यस्य द्वारस्य विशेषमाह॥ उत्सादयं स्वमुद्घटितं थपिहितं स्वयं कुलविनाशः। मानाधिकेन २१३
पभयं च सन्नीचं॥ द्वारे द्वारस्यापरि यत्तन्नाशाय संकटं यच्च। अध्यात्मिक्षुद्भयदं कुब्जं कुलनाशनं भवति॥
पीडाकरमतिपीडितमंतर्विनतं भवेदभावाय॥ बाह्यविनते प्रवासो दिग्भ्रांते दस्युभिः पीडा उत्साद इति॥ स्वय

मुद्घाटिते आत्मनो वा उद्घाटिते द्वारकपाटे उत्साद उत्सादनं भवति। तदुद्भूम उद्वसतीत्यर्थः॥ केचिदुन्माद इति पठंति। उन्मादो वि
चित्तनय। अथ स्वयमेव पिहिते स्थगिते द्वारकपाटे कुलस्य वंशस्य विनाशो भवति। मानाधिके उक्तप्रमाणादभ्यधि
के द्वारे न्पभयराजभीतिर्भवति। नीचमल्पं द्वारं दस्युभयं व्यसनदं चौरभीतिदुःखं च ददाति॥ द्वारे द्वारस्यापरो ध्व
द्वितीयभूमिकायायदन्यद्वारं क्रियते॥ समस्तं च तत्तन्नाशाय नश्रेयसे भवति॥ यच्च संकटमल्पं तच्च नाशा
याय च भवति॥ अध्यात्मं ध्याविस्ततं मुरजाकारं क्षुद्भयं ददाति॥ कुब्जमस्पष्टद्वारं कुलनाशनं भवति। पीडाक
रमिति। अतिपीडितमुदंबरेणातिपीडितं गृहस्वामिनापीडां करोति॥ अंतर्गदाभ्यंतरे विनतं द्वारमभावायेम
रणाय भवति। बाह्यविनते बहिर्नते द्वारे प्रवासो भवति। अन्यदेशगमनं॥ दिग्भ्रांते द्वारे दस्युभिः पीडा भवति।
अत्रैवविशेषमाह॥ मूलद्वारं नाम्ना द्वारैरिति संदधीत रूप्या। घटफलपत्रप्रमथादिभिश्च तन्मंगलैश्चिनुयात। मूलं
द्वारं प्रधानद्वारमन्यैरपरैर्द्वारैरूपद्धारूपसमृद्ध्या नातिसंदधीत न संधानं कुर्यात॥ एतदुक्तं भवति। मूलद्वारस्यया
दृशीरचना कृता तादृशीनान्यद्वाराणां कार्येति॥ तच्च मूलद्वारं घटैः कलशैः फलैः श्रीफलादिभिः पत्रैर्वंदनैरश्वा
दिभिः पत्रलताभिर्वा प्रमथैर्गणैः शादियद्रूणालिंदूव्यालैदूसज्ञावज्ञा। वक्रेमंगलैश्चितयाद्दुपचितं कुर्यात॥ अथ
कोणवत्सु यगृहादीनां ये दोषा न वसंति तत्र त्वत्रिवासिनां च फलमाह॥ ऐशान्यादिषु कोणेषु संस्थिता बाह्य
तो गृहस्यैताः॥ चरकी विदारी नामा च पूतना राक्षसी चेति। पुरभवनग्रामाणां ये कोणास्तेषु दोषाः सतां दोषाः
स्वपदादयोऽप्यत्रात्यास्तद्ध चविरादूर्मायांति॥ ऐशानादि स्वतिबास्यतो बहिर्गृहस्य च शमन ईशानादिषु एता दे
वताः संस्थिताः। नागुत्तरैशान्ये। नैऋत्यैशानकोणे चरकी आग्नेय्यां विदारी मामा। अथ नैर्ऋते पूतना वायव्ये रा
क्षसी चेति। इत्येवं प्राकारा बहिः कोणेषु निवसंति। शास्त्रांतरे षष्ठीपठंते॥ पूर्वस्यां स्कंदः दक्षिणस्यामर्य
मा। पश्चिमायां जृंभकः। उत्तरस्यां पिलिपिच्छः। तथा च। ईशान्यां चरकी प्रोक्ता संदग्रागभाग संस्थितः। कृतात्रांत
विदारीत्वयाग्न्यां चिर्वार्यमा स्थितः। पूतना नैर्ऋते तेजो जृंभकः पार्श्वे संस्थितः। राक्षसी वायानिले कोणे पिलिपिच्छ
स्तथोत्तरे॥ इति। पुरभवनेति। द्विचसमानाव धिमायांति। नान्ये। अथ दिक्षु शुभाशुभ मदस्थानाह॥ याम्यादि

वृ॰ सं॰ चशुभफलदाता स्तरवः प्रदक्षिणेनेति। उदगादिप्लवा भूमिः प्लक्षवटोदुंबराश्वत्थाः। एतेस्तरवो वृक्षा याम्यादि
षु दक्षिणाद्यासु दिक्षु प्रदक्षिणेन जाता। अशुभफलप्रदा अनिष्टदाः। तद्यथा। प्लक्षो याम्यायां दक्षिणस्याम
२१९ शुभो वटः पश्चिमायां। उदुंबर उत्तरस्यां। अश्वत्थः पूर्वस्यां। अशुभ इति। अत एवोदगादिषु [illegible] प्ल
क्षावटोदुंबराश्वत्थाः। प्रशस्ताः। शोभनाः प्लक्ष उत्तरस्यां शुभः। वटः पूर्वस्यां। उदुंबरो दक्षिणस्यां। अश्वत्थः
पश्चिमायामिति॥ तथा च गर्गः। वर्जयेत्पूर्वतोऽश्वत्थं प्लक्षं दक्षिणतस्तथा॥ न्यग्रोधं पश्चिमे भागे उत्तरे चाप्यु
दुंबरं॥ अश्वत्थे तु भयं ब्रूयात् प्लक्षे ब्रूयात्पराभवं॥ न्यग्रोधे राजतः पीडां नेत्रामयमुदुंबरे॥ वटः पुरस्ताद्धन्य
स्ताद्दक्षिणेनाप्युदुंबरं॥ अश्वत्थः पश्चिमे भागे प्लक्षस्तूत्तरतो भवेत्॥ अधुना निन्द्यवृक्षद्वारेण गृहोपघातक
न वृक्षानाह॥ आसन्नाः कण्टकिनो रिपुभयदाः क्षीरिणोऽर्थनाशाय॥ फलिनः प्रजाक्षयकरा दारूण्यपि वर्जयेदे
षां॥ छिन्द्याद्यदि न तरूंस्तांस्तदन्तरे पूजितान्वपेदन्यान्॥ पुंनागाशोकारिष्टबकुलपनसान् शमीशालान्॥ आसं
ना इति। कण्टकिनः कण्टकवृक्षाः खदिरप्रभृतयः। आसन्ना निकटवर्तिनो रिपुभयदाः शत्रुभीतिदाः। क्षीरि
णः क्षीरद्रुमाः आसन्ना अर्थनाशाय भवंति॥ फलिनः फलवृक्षा आम्रप्रभृतयः प्रजाक्षयकराः प्रजानां क्षयं
कुर्वंति॥ नासन्नमेते आसन्ना अशुभदा यावदेषामपि दारूणि गृहार्थं वर्जयेत्। छिंद्यादिति॥ यदि कण्टकिप्र
भृतीन् तरून् छेत्तुं न कल्पयेत तदंतरे तेषां मध्ये अन्यान् परान् पूजितान् प्रशस्तान् वृक्षान्वपेत्। कांस्तानित्या
ह॥ पुंनागेति॥ पुंनागः अशोकः अरिष्टः बकुलः पनसः शमी शालः। एतान्वपेत्॥ अथ प्रशस्तभूल
क्षणान्याह॥ शस्तौषधिद्रुमलता मधुरा सुगंधा स्निग्धा समा न शुषिरा च मही नराणां॥ अप्यध्वनि श्रमविनो
दमुपागतानां धत्ते श्रियं किमुत शाश्वतमंदिरेषु॥ एवंविधा मही नराणां पुरुषाणां अध्वनि पथि श्रमविनोदमुपा
गतानां श्रमापनयनप्राप्तानामपि श्रियं लक्ष्मीं धत्ते ददाति॥ किमुत शाश्वतमंदिरेषु चिरकालेषु। किंपुनर्यैः २१८
शाश्वता चिरमंदिरेषु गृहेषु निवसंति॥ कीदृशी शस्तौषधिद्रुमलता शस्ताः प्रशस्ताः ओषधयो द्रुमा वृक्षा
लताः प्रततयो यस्यां। ओषधयो [illegible] द्रुमा माधिकाः पलाशाश्वत्थपिप्पलाः कृता

DR. BHAU DAJI MEMORIAL

मतिसुरभिः तथा सा च भूमिः स्निग्धा [illegible] सुगंधा। शोभनगंधा [illegible] समा निम्ना तुंगरहिता। अशुषि
[illegible] उदगादिप्लवकुल
[illegible]
[illegible] चतुष्पथसम
[illegible] चैत्यवृक्ष
[illegible]
तेभ्यो गृहावासे पराङ्मुखं। अरतिस्त्वभिवर्धितनिविष्टे कटकद्रुमेरिति॥ चैत्यवृक्षः तथा पुराणं [illegible]
रेः शृंगमदावृक्षः सकेतुराट्। आलंबशाखश्चेति विरःकदंबाश्चैत्यपादपादिति। वल्मीकश्वभ्रकुलाविपद
इति। वल्मीकं संकुलं वल्मीकाकीर्णभूभागश्वभ्रसंकुलं च श्वभ्रान्वितं समीपस्थे व्यपदो व्यापदो भवंति। गर्ता
यां समीपवर्तिन्यां पिपासा तृष्णा भवति॥ कूर्माकारे भूभागे समीपस्थे धननाशो वित्तक्षयो भवति॥ अथा
परं भूमिलक्षणमाह॥ उदगादिप्लवमिष्टं विप्रादीनां प्रदक्षिणेनैव॥ विप्रः सर्वत्र वसेदनुवर्णमथेष्टम
न्येषां॥ विप्रादीनां ब्राह्मणक्षत्रियवैश्यशूद्राणामुदगादिप्लवः प्रदक्षिणेन भूतागइष्टः शुभदः। प्लवशब्देन
निम्नत्वमुच्यते॥ तद्यथा उदक्प्लवा भूर्ब्राह्मणानां शस्ता पूर्वप्लवा क्षत्रियाणां। दक्षिणप्लवा वैश्यानां पश्चिम
प्लवा शूद्राणामिति। विप्रः ब्राह्मणः सर्वत्र सर्वस्यां भूमौ वसेत्॥ उत्तरपूर्वदक्षिणपश्चिमप्लवायामिति॥ अ
न्येषां क्षत्रियाणामनुवर्णमथेष्टं वर्णानुक्रमेण शोभनं॥ तद्यथा। पूर्वप्लवा क्षत्रियाणां दक्षिणपश्चिमा वै
श्यानां॥ पश्चिमप्लवा शूद्राणामेवेति॥ अन्यत्क्रमेः शुभाशुभलक्षणमाह॥ गृहमध्ये हस्तमितं खात्वा परि
पूरितं पुनः श्वभ्रं। यद्यूनमनिष्टं तत् समे समं धन्यमधिकं यत्॥ गृहमध्ये भवनांतः हस्तमितं प्रमाणं श्वभ्र
मवटं खात्वा प्रमत परिवर्तुलं हस्तायामं हस्तमात्रं गंभीरं पुनः पूरितं तयैव मृत्तिकया यद्यूनं भवति॥ त

दनिष्टमशुभं। समे समं नशुभं नाप्यशुभमित्यर्थः। यदाधिकं भवति। तद्धन्यं प्रशस्तमित्यर्थः। अन्यदप्याह॥ श्वभ्रमथवां
बुपूर्णं पदशतमित्वागतं यस्य यदि न्यूनं॥ तद्धन्यं यच्चाभ्यं वपलानि पांसूढं कं चतुः षष्टिः। अथवा श्वभ्रमवटं पूर्वोक्तं
मेवांबुनाजलेन परिपूर्णं कृत्वा ततः पदशतं क्रमशतमित्वा गत्वा ततः पुनरागतस्य यदि जलं न्यूनं भवति तदा तद्धन्यं
शुभमिति॥ अन्यथा धन्यं। अथवा यत्र पांसूनां मृत्तिकानामाढकं चतुः षष्टिपलानि भवति। तद्धन्यमेव। एतदुक्तं भ
वति। भूमौ मृत्तिकानां गर्त्ता वा तन्निर्गतां तयाढकमापूर्यतोल्यते न यदि चतुः षष्टिपलानि भवति तद्धन्यं। नान्यथे
ति। तथा च पराशरः। निर्मेयत्वमत्ता यां भाति श्वभ्रगतजलेनं धारिणी। समुद्धृता पूर्यमाणा मातिरिक्ता स्यादं चतुःषष्टिप
लाढकतुल्यां वेति। अन्यदप्याह॥ आमे वामृत्पात्रे श्वभ्रे दीपवर्तिरभ्यधिकं ज्वलति दिशि यस्य ज्ञातासा भूमि
स्तस्य वर्णस्य॥ अथवा मेपकृमृत्पात्रे मृन्मये भांडे श्वभ्रे श्वभ्रांतरस्थिते वर्णानां चिन्हैश्चतस्रो दीपवर्त्तयो दत्त्वा
प्रज्वाल्यंते। ताश्चोत्तरादि ब्राह्मणवर्णक्रमेण दातव्याः। ताश्च सर्वास्तुल्यप्रमाणाः कार्या यस्य वर्णस्याभ्यधिकं
धिकं चिरकालं वर्तिर्ज्वलति तस्यैव वर्णस्य सा भूः प्रशस्ता शुभा भवति॥ अन्यदप्याह॥ श्वभ्रोषितं न कुसुमं यस्मिन्नः
म्लायते मृद्वर्णसमं॥ तत्तस्य भवति शुभदं यस्य च यस्मिन्मनोरमा तत्रथवा न वर्णं सम्यग्ब्राह्मणादिवर्णचतुष्टय
नेयस्य वर्णस्य संबंधि कुसुमं न म्लायते॥ नशुष्यति म्लानं तस्यैव वर्णस्य शुभदं। अथवा यस्य वर्णस्य यस्मिन्भूभा
गेमनश्चिरं रमते तत्तस्यैव शुभदं॥ नदत्तदाविचारः। कार्य इत्यर्थः। तथा च गर्गः। यावत्स्वरूपितां भूमिर्मयेतुगदद
कर्माणि॥ तस्य श्वभ्रं खनेन्मध्ये हस्तमात्रं समंततः। तच्छ्वभ्रं पूरयेत्तेन पांसुना तु विचक्षणः। वर्धमाने च वृद्धिः स्या
त्क्षीयमाने विगर्हिता॥ साम्ये साम्यं विनिर्दिष्टः मथवान्यद्धि कारणं॥ पूरयित्वाथवा श्वभ्रमाद्भिः क्रमशतं व्रजेत्।
पूर्णं स्यां दागमत्वा च सभूमिस्तु प्रशस्यते॥ तस्मिन्वाधास्येद्दौ भोग्विचित्रमाल्यमनुक्रमात्॥ यास्त्रेऽनम्लायते मा
ल्यंत हूर्णस्सु मंसयेत्॥ अथवाम्न्मये पात्रे दीपवर्तिचतुष्टयं॥ यस्यां दिशि प्रज्वलति चिरं तस्यैव सा शुभा॥
अन्यद्भूलक्षणमाह॥ सितरक्तपीतकृष्णा विप्रादीनां प्रशस्यते॥ भूमिर्गंधश्च भवति घृतरुधिरान्नाद्यमद्यसमः॥

कुशयुक्ता शरबहुला दूर्वा काशाेद्धता क्रमेण मही॥ अनुवर्णं वृद्धिकरी मधुरकषायाम्लकटुकाद्या॥ सितरक्तेति। विप्रादी
नां ब्राह्मणादीनां ब्राह्मणक्षत्रियवैश्यशूद्राणां सितरक्तपीतकृष्णा यथाक्रमेण भूः प्रशस्यते॥ श्वेतवर्णा ब्राह्मणा
नां भूः प्रशस्ता। रक्तवर्णा लोहिता क्षत्रियाणां॥ पीतवर्णा हरिता वैश्यानां। कृष्णवर्णा शूद्राणामिति। गंधस्य भवति यस्या
इति। घृतसमगंधा ब्राह्मणानां। रुधिरसमगंधा क्षत्रियाणां। अन्नसदृशगंधा वैश्यानां। मद्यसमगंधा शूद्राणामिति।
कुशयुक्तेति। कुशयुक्ता दर्भसंयुक्ता भूर्विप्राणां शुभदा॥ शरबहुला भूः क्षत्रियाणां॥ पूर्वाह्णादुक्तं। दूर्वावृता वैश्या
नां। काशावृता शूद्राणामिति। एवं क्रमेण मही भूः प्रशस्ता॥ तथा मधुरकषायाम्लकटुकाद्या नुवर्णवृद्धिकरी॥ मधु
रा स्वादा ब्राह्मणानां वृद्धिकरी। कषाया क्षत्रियाणां। अम्ला वैश्यानां॥ कटुका शूद्राणामिति॥ तथा च गर्गः॥ मधुरा
दर्भसंयुक्ता घृतगंधा च या मही॥ उत्तरप्रवणा चेति ब्राह्मणानां सदा शुभा॥ कटुका सकुशा या च शरवारणसंवृता
। रक्ताप्राक्प्रवणा ज्ञेया क्षत्रियाणां तु सा मही॥ दक्षिणाप्लवणा पीता या च दूर्वाभिरन्विता॥ अन्नगंधा नां वैश्यानां
पितृणामपि प्रशस्यते॥ पश्चिमप्रवणा कृष्णा वि कुशकाशसंवृता। धान्यगंधा मही धन्या शूद्राणां कटुका तथा॥ अ
थुनागृहप्रारंभविधानमाह॥ कृष्णां प्ररूढबीजां गोध्युषितां ब्राह्मणैः प्रशंसां च॥ गत्वा महीं गृहपतिः काले सांवत्स
रोद्दिष्टे॥ भक्ष्यैर्नानाकारैर्दध्यक्षतसुरभिकुसुमधूपैश्च दैवतपूजां कृत्वा स्थापनेन भ्यर्च्य विप्रांश्च॥ विप्रः स्पृष्ट्वा शीर्षं
क्षत्रः क्षत्रियो विशा स्थारूः शूद्रः पादौ स्पृष्ट्वा कुर्याद्दृष्टं गृहारंभं॥ कृष्टां हलैर्विलिखितां प्ररूढबीजां संजातांकुरां दृष्टां। एवं
कृतशुद्धिर्भूमिर्भवति कृष्णां यां उप्तं बीजं संजातं यस्याः गोध्युषितां गावः प्रत्युषिता निवासिता यस्यां। ब्राह्मणैश्च
प्रशस्तां प्रशंसितां॥ एवं कृतशुद्धिर्भूमिर्भवति। तथा चोक्तं। सन्मार्जनेनांजनेन सेकेनोल्लेखनेन च। गवां च परिवा
सेन भूमिः शुध्यति पंचभिः। एवंविधां भूमिं गृहपतिर्गृहस्वामी सांवत्सरोद्दिष्टे ज्योतिषिकेनोक्ते काले समये निरूपद्
रूमिः पुण्यैर्धूपैश्च सुगंधैर्दैवतापूजां क्षेत्रपालांश्च कृत्वा स्थपतीस्यकांविप्रांदीश्च न ब्राह्मणानां श्चाभ्यर्च्य संपूज्य
ततो गृहारंभे रक्षां कुर्यात्॥ तत्र विधानमाह॥ विप्रं स्पृष्ट्वा शीर्षमिति॥ गृहपतिर्विप्रो ब्राह्मणो यदि भवति। तदा

ब॰ सं॰ शीर्षं मूर्धानं स्पृष्ट्वा गृहद्वारे भेरेखां कुर्यात्। एवं क्षत्रयोनक्षं स्पृष्ट्वा बिम्बाश्च उरुं स्पृष्ट्वा। गृहद्वारे भेरेखां कुर्यात्। तस्याः
कृतायाः लक्षणमाह॥ अंगुष्ठकेन कुर्यात् मध्यांगुल्याथवा प्रदेशिन्या। कनकमणिरजतमुक्तादधिफलकुसुमाक्ष
तैरथवा॥ शस्त्रेणमृत्युं बंधो लोष्टेन भस्मनाग्निभयं॥ तस्करभयं तृणेन चकाष्ठादिलिखिता चराजभयं। वक्रा पादालिखि
२२० तानाकभयकृशरदाविरूपाच॥ चर्मांगारास्थिकृता दारिद्र्यन च भर्तुर्वशिवाय्या॥ वेरमपमस्त्यलिखिता प्रदक्षणेसंपदो विनिर्दि
श्य॥ वाचः पुरुषानिष्टा विवतं कृतं वाशुभं कथितं॥ अंगुष्ठकेनेमितरेखायादि गृहपतिरंगुष्ठकेन कुर्यान् मध्यांगुल्याथवा
प्रदेशिन्यावा॥ अंगुष्ठसमीपवर्तिनी प्रदेशिनी ततसमीपवर्तिनी मध्यमा॥ कनकेन सुवर्णेन वा मणिनावा। रजतेन रूप्ये
नवा। दध्ना फलेन श्रीफलादिना। कुसुमेन पुष्पेन वा। अक्षतैर्यवैर्वा॥ एतेषामन्यतमेन यदि करोति तदा कर्तुः शुभं विधा
त॥ अस्त्रेणेति तां रेखां शस्त्रेण यदि करोति॥ तदा शस्त्रेणैव गृहपतेर्मृत्युः। एवं लोष्टेन बंधो बंधनं। भस्मनाग्निभयम
वन्हिभीतिः। तृणेन तस्करभयं। चोरभीतिश्च। काष्ठेन लिखिता रेखा राजभयं नृपभीतिं करोति। वक्रा अस्पष्टा पा
देनालिखिता च या रेखा सा नाकभयं रिपुभीतिं क्लेशांच ददाति॥ विरूपा च या रेखा चित्रादि लिख्यादिना न भवति॥ सापि
[illegible] भयक्लेशदा। चर्मणांगारकेणवा[illegible]नवा कृता रेखा भवति॥ तदा भर्तुः स्वामिनो न शिवाय श्रेय
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] २२०
[illegible]
[illegible]
[illegible]

स्थाद्यारभ्यादिनस्य प्रथमं प्रहरं यावत्तावदैशान्यां दिगंगारिणी दीप्ता दक्षिणा धूमिता। शेषाः पंच शान्ताः। ततः प्रहराद्
र्ध्वं प्रहरद्वयं यावत्तावत् पूर्वा दिगंगारिणी आग्नेयी दीप्ता दक्षिणा धूमिता। शेषाः शान्ताः। ततः प्रहरद्वयादूर्ध्वं प्रहरत्रयं
यावत् आग्नेयी दिगंगारिणी नैरृती दीप्ता॥ पश्चिमाभिधूमिता। शेषाः शान्ताः। ततोऽस्तमयादूर्ध्वं प्रथमं प्रहरं यावन्नै
रृती दिगंगारिणी पश्चिमा दीप्ता। वायव्याभिधूमिता ततः प्रहरत्रयादूर्ध्वं प्रहरद्वयं यावत्तावत् पश्चिमा गंगारिणी
वायव्या दीप्ता उत्तराभिधूमिता॥ ततः प्रहरद्वयादूर्ध्वं रात्रौ प्रहरत्रयं वायव्यांगंगारिणी उत्तरा दीप्ता। ऐशान्याभिः
धूमिता ततः प्रहरत्रयादूर्ध्वं सूर्योदयं यावत् उत्तरा गंगारिणी ईशानी दीप्ता। पूर्वाभिधूमिता। शेषाः पंच सर्वत्र शा
न्ता इति। तस्मिन् काले गृहद्वारे वेशसमये शकुनो पक्षी रौति दीप्तारविवर्जनतकाले यदी मादिक्स्थः स्थितः सूर्याभिमुखस्य यदि
परुषरवो रूक्षशब्दः विरौति। तदा संस्पृष्टांगसमानां गृहपतिना स्वकीयं यदंगं स्पृष्टं तत्समानं तदंगसंभूतं तस्मिन्देशे
यत्र गृहपतिः स्थिता। तत्रास्थि निर्देश्यं वक्तव्यमिति॥ अत्र प्रमाणमाचार्येणोक्तं तन्मे वाच्यं॥ संस्पृष्टांगसमानमि
थेन न ज्ञायते॥ यत्तदंगं स्पृष्टं तत्प्रमाणः शोभा भागे शल्यं स्थितमिति तेयं॥ अन्यदप्याह॥ शकुनसमये श्वा चेद्
रूपश्चाद्योनुवासं॥ तत्प्रभवमस्थितं तस्मिंस्तस्मिंस्तदंगसंभूतं॥ नचेति निमित्तकाले एषामन्यतमो रविदिग्वासते
तदा तस्मिन् स्थाने गृहं तत्राधिष्ठितं येन प्रभवेत प्राणिजातमस्थितदंगसंभूतमेव गृहपति संस्पृष्टांगसमानमे
व वक्तव्यं प्रमाणं प्राग्वदिति॥ अन्यदप्याह। सूत्रप्रसार्यमाणे गर्दभरवोऽस्थि शल्यमाचष्टे॥ स्वश्रृगालकृतघ्नेवाम्
त्रे शल्यं विनिर्देश्यं॥ सूत्रप्रसार्यमाणे यदि गर्दभस्य खरस्य रवः शब्दः श्रूयते॥ तदा शल्यमाचष्टे कथयति। अथवा
सूत्रेण स्वश्रृगालकृत लंघितं प्रथमं शल्यं वक्तव्यं गृहभर्तुरधिष्ठिते स्थाने संस्पृष्टांगसमाने प्रमाणं प्राग्वदिति॥ अ
शुभशल्यज्ञानमाह। दिशि शांतायां शकुनो मधुररविरावी। पदातदावाच्यः। अर्थस्तस्मिन् स्थाने गृहेश्वराः धिष्ठितं
गवा। तात्कालं शान्तायां दिशि यदा शकुनः मधुरविरावि नं विरौति तदा तस्मिन् स्थाने यत्र शकुनिः स्थितस्त
त्रार्थो वाच्यः॥ धनं वक्तव्यमिति। अथ गृहेश्वरेण गृहपतिना वास्तुनरस्य यदंगमधिष्ठितं तत्र वाच्यमिति। तच्च
ज्ञानं प्राग्वदिति। यदुक्तं संस्पृष्टांगसमानमिति तत्रापि प्रमाणं॥ भूमिनिखनने यावत्तदंगगृहभर्तुरधिष्ठितस्योः

बृ·सं· र्ध्वं बाहोर्न्निमज्जनेतावत्प्रमाणेतच्छल्यं वक्तव्यमिति। तथाच गर्गः। प्रश्नकाले गृहपतिः कस्मिन्स्थाने व्यवस्थितः। किम
गं संस्पृशेद्वापि व्याहरेद्वाशुभाशुभं। विलोक्य स्थपतिः पूर्वं पश्चाच्छल्यं प्रचारयेत्। शंखभेरीमृदंगानां पटहानां च
निःस्वनाः। दृश्यक्षतानां पुष्पाणां फलानां दर्शनानि च॥ प्रशस्तान्प्रवदेच्छल्यं वास्तुज्ञानविशारदः। दीप्तादिक्संस्थितः पक्षी
२२१ विरौति परुषं वचः। स्पृष्टांगसदृशं शल्यं तस्मिन्स्थाने विनिर्दिशेत्। निखने दृवानितत्रतदंगद्रव्यं यदा॥ गृहनाथ
स्य तत्राधः शल्यानि संग्रायं वदेत्॥ प्रश्नकाले गर्दभो वापि तुरगो गर्दभोपि वा। उष्ट्रो वा सारमेयो वा मार्जारो गला
हिका॥ यः प्राणी व्याहरेत्तत्र तदस्थं शल्यमादिशेत्॥ प्रमाणं तस्य वक्तव्यं पूर्वोक्तेन विधानतः इति। अथान्यच्छुभा
शुभज्ञानमाह॥ सूत्रच्छेदे मृत्युः कीले चावाङ्मुखे महान्रोगः। गृहनाथस्थपतीनां स्मृतिलोपे मृत्युरादेश्यः॥ स्कंधाच्च्यु
ते शिरोरुक्कुलोपसर्गोपवर्तिते कुंभे। भग्नेपि च कर्मिवधश्च्युते च हस्ताद्गृहपतेर्मृत्युः॥ सूत्रच्छेद इति। सूत्रे प्रसार्यमा
णे यदि सूत्रच्छेदो भवति॥ तदा गृहपतिमृत्युर्भवति॥ तदा कीलके निखन्यमाने अवाङ्मुखे अधोमुखे गते महान्रो
गो गृहभर्त्तुर्भवति। तथा गृहनाथस्य वेश्मप्रभोः स्थपतीनां तक्ष्णां च स्मृतिलोपे स्मृतिभ्रंशे यदा भवति। तदा तेषामेव
मृत्युरादेश्यो वक्तव्यः। स्कंधाच्च्युत इति। कुंभे घटे स्कंधदेशाच्च्युते पतिते शिरोरुक् गृहस्वामिनो भवति॥ तथापवर्तिते अधोमु
खे गते कुलोपसर्गः कुलोपद्रवस्तस्य भवति। तथा भग्ने कुंभे कर्मिवधः कर्मकराणां मरणं भवति। करात् हस्ताच्च्युते पतिते कुंभे गृ
हपतेर्गृहस्वामिनो मृत्युर्मरणं भवति॥ अथ शिलान्यासप्रदर्शनार्थमाह॥ दक्षिणपूर्वे कोणे कृत्वा पूजां शिलां न्यसे
त्प्रथमां। शेषाः प्रदक्षिणेन स्तंभाश्चैवं समुत्थाप्याः॥ छत्रस्रगंबरयुतः कृतधूपविलेपनः समुच्छ्राप्यः। स्तंभस्तथैव कार्यो
द्वारोच्छ्रायः प्रयत्नेन॥ दक्षिणपूर्वकोण इति। दक्षिणपूर्वकोणे आग्नेय्यां दिशि स्रगंबरधूपबलिपुष्पहिर
ण्यमधुमांसादिभिः पूजामर्चां कृत्वा प्रथमाद्यां शिलां न्यसेत्स्थापयेत्॥ शेषा अन्याः शिलाः प्रदक्षिणेन न्यास्या
एतदुक्तं भवति। प्राग्दक्षिणस्यां शिलान्यासं कृत्वा ततो दक्षिणस्यां ततो नैर्ऋत्यां ततः पश्चिमायां ततो वायव्यां
ततः उत्तरस्यां ततः ऐशान्यां ततः पूर्वस्यां न्यसेदिति। केचिदुत्तरपूर्वे कोणे कृत्वा पूजां शिलां न्यसेत्प्रथमामेवं प २२१
ठंति। उत्तरपूर्वे ऐशाने कोणे प्रथमां शिलां न्यासं कृत्वा ततः शेषाः प्रदक्षिणेन न्यस्याः एतच्छ्लोके स्थपतिसु च दृश्यत इति।

स्तंभाश्चैवं समुत्थाप्याः एवमनेन प्रकारेण स्तंभाः समुत्थाप्याः। समुत्थापनीया यथा शिलान्यासः कृतस्तथा स्तंभानां
समुत्थापनं कार्यमिति। स्तंभद्वाराणां विशेषमाह। छत्रस्रगंबरयुत इति। स्तंभः छत्रेणातपत्रेण स्रग्भिर्मालाभिरंबरै
र्वस्त्रैर्युक्त इति। तथा कृतधूपविलेपनः दत्तधूपो दत्तानुलेपनः समुत्थाप्यः। तथैव तेनैव प्रकारेण च प्रयत्नेन द्वारो
च्छ्रायः कार्य एतदुक्तं भवति। तथा छत्रस्रगंबरयुतः कृतधूपविलेपनः स्तंभः समुत्थाप्यस्तथा द्वारमप्युत्थापनीय
मिति। तथाच गर्गः। शिलाविन्यासकाले तु संभारांश्चोपकल्पयेत्॥ समुद्रजातिरत्नानि सुवर्णं रजतं तथा॥ सर्वबी
जानि गंधांश्च शरागर्भांस्तथैव च॥ शुक्लं कमनसः सर्पिः श्वेतां च मधुरोचनं॥ आमिषं च तथा मद्यं पुष्पाणि विविधा
नि च॥ क्षीरेटं पूर्णकुंभान् कोणे कोणे प्रदापयेत्। नानाविधानि भक्ष्याणि पानानि विविधानि च॥ हुत्वाग्निं विधि
वत्काले मुहूर्तेनाभिपूजिते॥ गृहकोणेषु सर्वेषु पूजां कृत्वा विधानतः। ततः पुण्याहघोषेण शिलान्यासं प्रकल्पयेत्
ऐशान्यामादितः कृत्वा प्रागदक्षिण्येन विन्यसेत्॥ अनेनैव विधानेन स्तंभद्वाराणि रोपयेत्। वास्तुविद्याविधानज्ञः का
रयेत्सुसमाहितः। शिलाविन्यासमंत्रो यो निर्दिष्टो मुनिभिः पुरा॥ नंदे नंदय वासिष्ठे वसुभिः प्रजया सह॥ जये भार्गव
दायादे प्रजानां भद्रमावह॥ पूर्णेंगिरसदायादे पूर्णकामाः प्रजाः कुरु॥ भद्रे काश्यपदायादे प्रजानां भद्रमावह॥
सर्वबीजसमायुक्ते सर्वगंधौषधैर्वृते। रुचिरे नंदने नंदे वासिष्ठे रम्यतामिह॥ प्रजापतिसुते देवी चतुरस्रे मही
मुते॥ सुभगे सुव्रते देवि गृहे काश्यपि रम्यतां॥ पूजिते परमाचार्यैर्गंधमाल्यैरलंकृते। भवभूतिकरी देवी गृहे भा
र्गवि रम्यतां। अव्यंगे चाक्षते पूर्णे मुनेरंगिरसः सुते। इष्टके त्वं प्रयच्छेष्टं प्रतिष्ठां गृहिणः कुरु। ग्रामस्वामिपुर
स्वामिगृहस्वामि परिग्रहे॥ मनुष्यपशुहस्त्यश्वधनवृद्धिकरी भवेत् इति॥ अत्रापि क्रमेण शंकुप्रतिष्ठालक्ष
णं प्रसंगेन लिख्यते। अन्यशास्त्रात् तत्र शंकुलक्षणं स्निग्धादिभूभागे समुत्थितानां न्यग्रोधबिल्वद्रुमखादि
राणां॥ शमीवटोदुंबरदेवदारुक्षीरखंदशोर्वफलद्रुमाणां॥ उपोषितः स्थपतिजनः स्वस्थैषां मध्यान्ताक्ष्ण
न कुठारकेण॥ छित्वा तथा हि क्षयतो न रस्यांभुभिर्विरूपेन परिग्रहशंकुं॥ करप्रमाणं परतश्च तस्य तदर्धमा
नेन ततोनुरूपं॥ नीत्वा न्यसेत्तानि गृहे तु ताव यावत्प्रतिष्ठा समयोस्य शंकोः॥ नंदेति शंकुः कथितः त्रिकोणे

दुताभूनास्येमुभंगातिचान्या॥ सुमंगल्यानिकेत भागसंज्ञाभद्रकुरीमारुतकोणजाता॥ यथाश्च पुंनागपदांकितानां नंद्यादि
वास्तु सं० कानां क्रमशः शिलानां॥ अखंडितानां मृदुदारुतानां सल्लक्षणानां ग्रहणे निरुक्तं॥ कूर्मो यत्रो यादृशजनार्दनश्री ध्रुवस्यमः
ध्ये भवनस्य संज्ञाः॥ द्वाराधिपादिकपतियो तगाश्च संपूजनीया बलिभिः स्वमंत्रैः॥ स्नानार्थमाल्यांबरधूपलेपैर्बलोप
२२२ हारैः प्रतिपूज्य शंकुः॥ ध्रुवे सकुंभे च ततः खनित्वा शंकुं प्रतिष्ठाप्य तथा सदाच॥ लालाक्षतादि सपंचगव्यं मध्यकया
तंपरित्र्यसम्यक्॥ स्रगभिलार्थं शांतिविधिवप्रकुर्याद्धोम ध्रुवादुत्तरतस्तु कार्यं॥ ॥अथ लग्नशुद्धिः॥ धनुर्वणिग्नोमि
थुनारिमीनिर्वास्तु प्रति शांकरणप्रधाना॥ एतच्चतुर्थग्रहसंज्ञकं लग्नोद्भवं तच्छुभमुद्दिशंति॥ असंभवे शुक्रशशां
या शिला सा भूरिसमीपतोया भूरि प्रभूतं समीपे समीपे निकटे तोयं यस्यां तथाभूता सा वा शिला ज्ञातव्या॥
अन्यदप्याह॥ पारावतः॥ क्षौद्रघृतोपमा या क्षौमस्य वस्त्रस्य तत्तुल्यवर्णा या सोमवल्ल्या समानरूपाश्च सु

तोयं। कुरुते क्षयं चेत्याच शिलापारापतपक्षिणः सदृशा शीघ्रमाक्षिकं घृतमात्स्यंत दृष्टमासन्नदृशा च या। न पाशोम
स्य वल्कस्य तुल्यवर्णा सदृशवर्णा या च सोमवल्ल्याः सदृशरूपा तत्सदृशावर्णा सोमेथापि कस्य वल्ली सोमवल्ली सापि
शिला आयुः शीघ्रमेवाक्षयांख्यं तोयं तु उदकं कुरुते॥ अन्यद॰॥ ताम्रैः समेता पृषतैर्विचित्रैर्पांडु भस्मोष्ट्रख
रानुरूपा॥ भृंगोपमांगुष्ठकपुष्पिका वा सूर्याग्निवर्णा च सितासिता वा॥ या च शिला ताम्रैस्ताम्रवर्णैः पृषतैः तिल
कैः तिलकैस्तथा विचित्रैर्नानावर्णैस्तिलकैः समेता संयुक्ता तथा या च पांडुरा पांडुरवर्णा भस्मनः करभस्य उष्ट्रस्य ख
रस्य गर्दभस्य चानुरूपा तत्सदृशवर्णा भृंगोपमा भ्रमरसदृशवर्णा अंगुष्ठिका विटपविशेषस्तत्पुष्पसदृशवर्णा वा नी
लकोद्भितेत्यर्थः। सूर्यस्याग्निरस्याग्नेर्दुर्लवहस्य सदृशवर्णा या सिता सा चितोया तोयाराद्रिता॥ अन्यदप्याह॥ चंद्रात
पस्फटिकहेमरूपा याश्चेंद्रनीलमणिहिंगुलकांजनाभाः सूर्योदयांशुहरितालनिभाश्च याः स्युस्ताः शोभना मुनिवचो
विवरसमेतत्॥ या शिलाश्चंद्रातपस्य चंद्रप्रभा स्फटिकमणेर्मौक्तिकस्य मुक्ताफलस्य हेम्नः कवर्णस्य याः समानरूपाः
सदृशवर्णा याश्च शिला इंद्रनीलमणेः हिंगुलकस्य हिंगुलकमिति रक्तवर्णमिति यत्प्रसिद्धः अंजनं कज्जलमिति प्रसिद्धमा
एतेषां सदृशी आभा कांतिर्यासां तथा याश्च सूर्योदयांशुनिभाः सूर्यस्योदयस्योदयकाले यादृशा अंशवो रश्मयो दृ
श्यंते तुल्यवर्णा उद्दिता इत्यर्थः॥ याश्च हरितालनिभाः स्युर्भवेयुस्ताः शिलाः सर्वाः शोभनाः अत्रास्मिन्प्रकरणे
तद्रक्ष्यमाणं इदं मुनिवचः ऋषिवाक्यमित्यनेनागमसमनुश्रितं भवतीति तत्र मुनिमाह॥ एताश्चैभ्यश्च शिलाः शिवा
श्च यक्षैश्च नागैरभिपूजिताश्च यास्वाग्रेषु भवंति रसांतेषामवृष्टिर्न भवेत्कदाचित् एताः शिलाः सर्वा अभेद्या न
विदार्यायतः शिवाः श्रेयस्कर्यः सदा सर्वकाल ऋषिभिर्देवयोनिभिः नागैश्चाहिपुत्राः सौविताश्चेषां राष्ट्राणां
णां राष्ट्रेषु देशेषु ताभवंति तेषां कदाचिदप्यवृष्टिर्न भवेत् नित्यमेव प्रलेषुवर्षतीत्यर्थः॥ अधुना शिलानां विदार
णमाह॥ भेयं यदा नैति शिला तदानीं सकाष्ठैः सहतिंदुकानां प्रज्वालयित्वाऽनलमग्निवर्णां सुधांबुसिक्तां प्रविदारयेत् २३३
तां॥ शिला विदार्यमाणा यदा भेदं नैति न याति तदानीं तस्मिन्काले किं कुर्यात् उच्यते पालाशकाष्ठैः सहतिं
दुकानां वृक्षविशेषाणां काष्ठानि दारूणि प्रज्वाल्य अनलमग्निं ज्वालयित्वा दग्धां शिलां कृता तां वर्णामग्नि

वर्णां कृत्वा सुधांबु सिक्तां तदा क्षारसंयुक्तेनांबुना जलेन सिक्तां संसिक्तां प्रविदारयेत् भेदमायाति॥ ॥अन्यदप्याह॥ तोयं
श्रितं मोक्षकभस्मनायात्सप्तकृत्वः परिषिच्यतं तं॥ कार्यं शरक्षारयुतं शिलायाः प्रस्फोटनं वन्हिवितापितायाः॥ मोक्ष
को वृक्षः यस्य मरकुकमिति प्रसिद्धः मोक्षकभस्मना यत्तोयं तेनाश्रितं क्वथितं तत्सप्तवारः श्रायुतं शरभस्मना संयुक्तं कृत्वा
तेन वन्हिवितापितायाः पूर्वोक्तविधानेनाग्निसंतप्तायाः सप्तवाराः परिषिच्यनं कार्यं संतप्य ततः परिषेचनं कार्यं
ततस्तस्याः प्रस्फोटनं भेदनं भवति। अन्यदपि शिलाभेदमाह॥ तक्रकांजिकसुराः सकुलत्था बोभिनानि बदराणि च तत्
स्मिन् सप्तरात्रमुषितान्यभितसां दारयंति हि शिलां परिषेकैः॥ तक्रं मथितं कांजिकं। अन्नोद्वारं सुरा प्रसिद्धा एताः सकुल
त्थाः कुलत्थग्रहिताः तस्मिन् बदराणि। बदरफलानि च यानि तानि सप्तरात्रमुषितानि एतानि सर्वाणि सप्तरात्रमुष्या
नि सप्तरात्रस्थापितानि परिषेकैः प्रसेकैरभिसंतप्तामभितप्तामपि तां प्रागविधिना शिलां विदारयंति स्फोटयंति॥ ॥
अन्यदप्याह॥ नैंबं पत्रं वल्कलं नागतिलानां सापामार्गं तिंदुकं स्यात् गुडूची॥ गोमूत्रेणस्राविते क्षार एषां षड्रात्रं तत्ता
पितोऽभिघ्नतोऽश्मा॥ नैंबं निंबस्य पत्रं वल्कलं नेयं मेयं तिलानां नालं यस्मिन्न पतंति रोकोशकारे तिला भवंति सापामार्गमपा
मार्गसहितं तिंदुकं तिंदुकफलं स्यात् भवेत् गुडूची अमृता एषां एकीकृतं क्षारो भस्म गोमूत्रेणास्रावितं तेनाश्मा पाषाणस्ता
पितः शागविधिना षड्रात्राः षड्वारान् परिषिंचनं कृत्वा भिद्यते अधुना शस्त्रपानमाह॥ अर्कपयो हुडुविषाणमषी
समेतं पारावताखुशकृता च पुनः प्रलेपः। टंकस्य तैलमथितस्य ततोऽस्य पश्चात् पानस्य न शिलासु भवेद्विघातः
घातः॥ टंकशास्त्रे एवश्लोकः खड्गलक्षणे व्याख्यातः॥ ॥अन्यदप्याह॥ क्षारे कदल्या मथितेन युक्ते दिनोषिते पायि
तमायसं यत्। सम्यक्शितं चाश्मनि नैति भंगं न चान्यलोहेष्वपि तस्य कौंठ्यं॥ एषोपि खड्गलक्षणे व्याख्यातः
॥ ॥अथ वापीलक्षणमाह॥ पाली प्रागपरायतांबु सुचिरं धत्ते न याम्योत्तरा कल्लोलैरवदारमेति मरुता सा प्राय
सः प्रेरितैः तां चेदिच्छति सारदारुभिरपां संपातमावारयेत्। पाषाणादिभिरेव वा प्रतिचयं क्षुण्णं द्विपाश्वादि
भिः॥ पाली वापी प्रागपरा पूर्वपश्चिमयोः दिशोरायता दीर्घा सा न सुचिरं चिरं धत्ते यतः सा मरुता वायुना प्राय
सो बाहुल्येन प्रेरितैः कल्लोलैर्जलसंक्षोभनैरवदारं विनाशमायाति याम्योत्तरायातां पालीं प्राय

वा॰सं॰ ऊमिकृतां कुर्यात्तस्यां संपातं सारद्रुभिर्बाधयेत पाल्यां जलेन मद्रुसंपर्कस्तत्र भित्तौ मारिद्वंद्वैर्दृढैः काष्ठैरावा
रंकुर्यात्पाषाणादिभिरेववा पाषाणैरश्माभिर्वा पां पालमाधारयेत॥ आदिग्रहणात्पक्वेष्टकादिभिः खुरकार्कैश्च
२३४ तत्र च प्रतिबंधं प्रतिद्विपैर्गजैरश्वैश्च खुरैर्गोगादिग्रहणाद्वृषमहिषवंदैः क्षुण्णं मर्दितं कार्यं येन सा दृढं भवति। कीदृशं वा
च्यालंकारयेदित्याह॥ ककुभवटाम्रप्लक्षकदंबैः सनिचुलजंबूवेतसनीपैः। कुरवकतालाशोकमधूकैः बकुलवि
मिश्रैश्चावृततीरां कुर्यादसत्। सर्व एव वृक्षविशेषाः ककुभः वटः आम्रः प्लक्षः कदंबः एतैः किंभूतैः सनिचुलजं
बूवेतसनीपैः निचुलेन जंबूवेतसेन नीपेन एभिः सहितैः संयुक्तैः तथा कुरवकः तालः अशोकः मधूकः एतैरा
पि किंभूतैः बकुलविमिश्रैः बकुलसंयुक्तैः एतैरावृतो व्याप्तस्तीरस्तटो यस्याः पाल्याः सा तथा॥ भूतां कारयेदि
ति अथ नैर्वाहिकद्वारलक्षणमाह॥ ॥ द्वारं च नैर्वाहिकमेकदेशे कार्यं शिलासंचितवारिमार्गं कोशस्थितं निर्विवरं
कवाट २- पुटपत्रपनान्वि॥५॥ गाढी॥

२३४

ऽभिवृद्धये। प्रभूतं पर्याप्तं सलिलं जलं कृत्वा आरामान् वृक्षान् वाटिका विनिवेश्य च निवेशयित्वा यशोधर्माभिवृद्धये। यशसो धर्म
स्यापि वृद्ध्यर्थं देवतायतनं देवालयं कुर्यात्॥ ॥ अत्रैव प्रादेशार्थमाह॥ इष्टापूर्तेन लभ्यन्ते ये लोकास्तान् बुभूषता। देवानामा
लयः कार्यो द्वयमप्यत्र दृश्यते॥ इष्टं यज्ञादिकं पूर्तं वापीकूपतडागादिकं। तथा चोक्तं॥ इष्टं यज्ञेषु यद्दानं तेनान्ये स्वर्गमिष्यते॥ इष्टा
पूर्तेन ये लोकाः पुण्यस्थानानि लभ्यन्ते॥ तान् बुभूषता भवितुमिच्छता प्राप्तुमिच्छते॥ इत्यर्थः॥ देवानां सुराणामालयः कार्यो।
गृहं देवानां कर्तव्यमित्यर्थः॥ ततः त्रिदेवालये द्वयमपि दृश्यते। इष्टापूर्तेषु यत्फलं। तदत्र दृश्यते। प्राप्यत इत्यर्थः॥ इष्टापू
र्तादिभिर्यैस्तैर्यागं कुर्वतिमानवाः॥ अग्निहोत्रमादिशुभः इष्टं यदत्र कीर्तितं। वापीकूपतडागानि पूर्तमायतनानि च॥ स्वर्ग
लिप्सदा कुर्यान्नातस्तत्र संशितं॥ देवानामालयः कार्यो द्वयमप्यत्र लभ्यते॥ कीदृशेषु स्थानेषु सुरालयं न इत्याह॥ सलिलो
द्यानयुक्तेषु कृतेष्वकृतकेषु च॥ स्थानेष्वेतेषु सांनिध्यमुपगच्छन्ति देवताः॥ सलिलसंयुक्तेषु जलयुतेषु उद्यानयुक्तेषु वनसहितेषु
कृतेष्वकृतेषु निष्पादितेषु॥ अकृतकेषु स्वयं निष्पन्नेषु एतेषु स्थानेषु देवताः सांनिध्यं संनिहितत्वमुपगच्छन्ति यान्ति॥
अन्यत्रोद्देशश्चेत्याह॥ सरःसु नलिनीछत्रनिरस्तरविरश्मिषु॥ हंसांसाक्षिप्तकह्लारवीथीविमलवारिषु॥ हंसकारंडवक्रौंच
चक्रवाकविराविषु॥ पर्यन्तनिचुलच्छायाविश्रान्तजलचारिषु॥ सरस्विति॥ एवंविधेषु सरःसु नित्यं सर्वकालं देवता दिवाविशे
षास्ममंते॥ कीदृशेषु॥ नलिनीछत्रनिरस्तरविरश्मिषु॥ नलिनी पद्मिनी चैव छत्रं तेन नलिनीछत्रेण पद्मिनीपत्रपत्रै
र्निरस्ता निराकृता रविरश्मयः सूर्यकरा येषु हंसः पक्षिविशेषः। तस्यांसौ स्कन्धौ हंसांसाभ्यामाक्षिप्तानि दूरं प्रेरितानि
कह्लाराः पुष्पविशेषाः सितोत्पलं तस्या वीथी पंक्तिर्यासां वार्थीमार्गस्तत्र यानि निर्मलवारीणि येषु हंसः कारंडवाः क्रौंच
चक्रवाकः एते सर्व एव पक्षिविशेषाः एषां विराचनाञ्येषु सरःसु तथाविधेषु निचुलाद्वृक्षविशेषास्तेषां या छाया
आतपाभाव छायामुपविश्रान्ता जलचारिणो जलप्राणिनो येषु सरःसु तेषु नित्यं देवता रमंते॥ अन्यत्रोद्देशश्चेत्याह॥ क्रौं
चकांचीकलापाश्च कलहंसकलस्वनाः। नद्यस्तोयांशुका यत्र शफरीकृतमेखलाः॥ फुल्लतीरद्रुमोत्तंसाः संगमश्रोणि
मंडलाः। पुलिनाभ्युन्नतोरस्या हंसहासाश्च निम्नगाः॥ क्रौंचकांचीति। यत्र यस्मिन्स्थाने एवंविधा नद्यः सरितस्तत्र दे
वता रमंते। कीदृश्यः क्रौंचाः पक्षिविशेषाः तेषां शब्दः सा कांची तत्कलापा रसनाविलासा यासां कलहंसा राजहंसास्ते

PAGE(S)MISSING

NOT AVAILBLE

FOLIO NOS.
235 – 238

वा॰ सं॰ सांद्रः कलो मधुरः स्वरः मृदुस्वरः शब्दः संभाषणं यासां तोयेन तं तदेवांशुकं संवर्यासां ताः कूर्यः सरसमन्यास्ताः एवंकृता॥ मे
घभाषाभिः मेघभाषा बलकस्तया परिवेष्ट्यते॥ नार्वातिक्रोके न स्थितु॥ तथाचनादिगमग्रंथनं॥ नार्धघनस्तस्य वासनं इति। पु
२३० ष्परोति। यत्र हरगानि म्नानमलकानि त्यदेवभारमंते॥ तीरेषु पानेषु येन्द्रमाथुरा शाः पुष्पा पुष्पिता लतास्ता नं मकाः पूर्ण
पुष्पाणि कंदकावायां सां संगमो दुर्यो नं घोर्मे लक्षः मनश्रीणां मंडकं घनघलंघा सां पद्मिनी घनंदेषयेन्युनता अत्युक्ता प्रदेश
लाः घडमरस्यास्तनायामादूसाः पक्षिविडोपालत्वश्च कूला हासोद्गमनं यासां तास्तथाभूता स्तासु देवतारमंत इति॥ अन्यत
कौद्रोपुदेवतारमंत इत्याह॥ वनोपांतनदीशैलनिर्झरोपांतभूमिषु॥ रमंते देवतानित्यं पुरेषूद्यानवत्सु च॥ वनोपांतेषु
वनोपकंठेषु उपांतशब्दः प्रत्येकमभिसंबध्यते॥ नदीषु सरित्सु। शैलेषु पर्वतेषु निर्झरोपांतभूमिषु निर्झरेण प्रपात
पानीयेन युक्ता उपांता न ग्रादीनां समीपास्तासु भूमिषु निपतत्करतिर्भवति। निर्झरोपांतरमंते संदादेवतारमंते॥
पुरेनगरेषु। उद्यानवत्सु येषु उद्यानान्युपवनानि विद्यंते॥ तेषु नित्यं रमंत इति॥ तथाच कश्यपः॥ हरितोद्यलतोद्याद्यांवा
प्यः पक्षिभिरावृताः वनोपवनमालिन्यो नित्यं सकुसुमितद्रुमाः॥ हंसकारंडवाकीर्णाः कोकिलाः कोकनादिताः॥ प
द्मगोरीतमधुस्तन्यद्रुःशिखिभिर्युताः। तत्र देवा रतियाति सान्निध्यं नित्य संस्थिताः॥ उपकृताप्रतिष्ठा करणभूमिगु
णानाह॥ भूमयोब्राह्मणादीनां याप्राक्ता वास्तुकर्मणि॥ एताव तेषां प्रशस्यंते देवतायतनेष्वपि॥ ब्राह्मणादीनां ब्राह्म
णक्षत्रियवैश्यशूद्राणां याभूम्या वास्तुकर्मणि॥ पुरा प्रोक्ताः कथिताः। तद्यथा शिल्पे। सितरक्तपीतकृष्णा विप्रादीनां
प्रशस्यते भूमिः। गंधश्च भवति यस्याः घृतरुधिरान्नमद्यसमः॥ कुशयुता शरबहुला दूर्वा काशा वृता क्रमेणाम
ही॥ अनुवर्णं वृद्धिकरी मधुरकषायाम्लकटुका च तेषां विप्रादीनां तारच भूमयो देवतायतने पुदेवतायद्वपि प्रशस्यंते॥
भवंत इति। अधुना देवगृहे वास्तुपुरुषलक्षणं द्वारप्रविभागं चाह॥ ॥ चतुःषष्टिपदं कार्यं देवतायतनं सदा॥ द्वारं
तु मध्यमं तस्मिन् समदिक्स्थं प्रशस्यते॥ सर्वदा सर्वस्मिन् काले देवतायतनं सुरालयं चतुःषष्टिपदं कार्यं॥ अष्टा
ष्टकपदमथ वेति। पूर्वमेव प्रदर्शितं। तस्मिन् देवतायतने मध्यमद्वारसमम्ध्यवर्तिनं समदिक्स्थं समायां दिशि
व्यवस्थितमिति॥ तथा प्रशस्यते। इष्यते॥ ॥अथ प्रासादानां प्रमाणमाह॥ यो विस्तारो भवेत्तस्य द्विगुणा तत्समु २३०

न्नतिः। उच्छ्रायात् स्तत्तीयांशस्तेन तुल्या कटिस्मृता॥ विस्तारार्धं भवेद्गर्भो भित्तयोऽन्याः समंततः॥ गर्भपादेन विस्तीर्णं
द्वारं द्विगुणमुच्छ्रितं॥ उच्छ्रायात्पाद विस्तीर्णा शाखा तद्वदुदुंबरः॥ विस्तारपाद प्रमितं बाहुल्यं शाखयोः स्मृतः॥ त्रिपंचस
प्तनवभिः शाखाभिस्तत्प्रशस्यते॥ अतः शाखा चतुर्भागप्रता द्वारानिवेशयेत्॥ शेषं मंगल्यविहगैश्रीवृक्षस्वस्तिकैर्घटैः
॥ मिथुनैः पत्रवल्लीभिः प्रमथैश्चोपशोभयेत्॥ द्वारमानाष्टभागोना प्रतिमा स्यात्सपिंडका॥ द्वौ भागौ प्रतिमा तत्र
तीयांशश्चापिंडकाः॥ यो विस्तारो यतिः तस्यदेवगृहस्य योविस्तारो विष्कंभो भवेत्तस्यात् द्विगुणा विस्ताराद् द्विगुणा समुन्नति॥
उच्छ्रायो भवति। यथा प्रासादस्य द्वात्रिंशद्धस्ता विस्तारः विस्तारात् द्विगुणा समुन्नतिः॥ चतुःषष्टिहस्ता उच्छ्रायादेोत्त्याद्य
स्ततीयांशः तृतीयभागस्तेन तुल्या तत्समा देवगृहस्य कटिः॥ स्मृता तज्ञा। यथा मेरोश्चतुःषष्टिहस्ता उच्छ्रायः तस्यत्रि
भागः एकविंशतिर्हस्ता अष्टावंगुलानि॥ अनेन प्रकारेण कटिर्भवति। सोपानानां परिस्थितो देवगृहस्य प्रारंभः साक
टिरुच्यते। विस्तारार्धं समिति। देवगृहस्य यो विस्तारस्तत्स्तदर्धं गर्भो भवति॥ यथा मेरोर्द्वात्रिंशद्धस्ता विस्तारस्तदर्धं
षोडश॥ अनेन प्रकारेण मेरोर्गर्भः अन्याः समंततः सर्वासु दिक्षु भित्तयो भवंति॥ गर्भस्य यः पादश्चतुर्थांशः
स्तेन मानेन विस्तीर्णं द्वारं भवति। यथा मेरोर्गर्भः षोडशहस्तास्तस्य चतुर्भागश्चत्वारो भूत्वा एतद्वारस्य विस्ता
रात् द्विगुणमुच्छ्रितं कार्यं॥ एवमष्टौ हस्ता मेरुद्वारस्योच्छ्राय उच्छ्राय इति। द्वारस्य उच्छ्रायाद्यस्य चतुर्भागो द्वौ हस्तौ
प्रशाखयोर्विस्तारश्च तद्वदुदुंबरस्तद्वत्तेनैव मानेनचोदुंबरः कार्यः॥ शाखयोरपरिवर्जना हं दोत्रेतय च्छाय तद्वदुंबरस्तु
च्यते॥ तद्वदुदुंबरस्थिति केचित्पठंति॥ विस्तारपादप्रमितमिति॥ शाखयोर्या विस्तारस्तस्य यः पादश्चतुर्भागस्तत्प्रमितं
तत्तुल्यं शाखयोर्बाहुल्यं घनत्वं कार्यं॥ यथा मेरुद्वारशाखाया विस्तारो द्वौ हस्तौ विस्तारपादे द्वादशांगुलानि॥ एतद्धन
त्वं। त्रिपंचसप्तनवभिरिति। तद्द्वारं त्रिभिः पंचभिः सप्तभिर्नवभिश्च शाखाभिर्द्वारिकाभिः प्रशस्यते इष्यते॥ एवं वि
स्तारस्त्रिभिर्योजितप्रयत्नेन॥ तदा पंचभिस्ताभिरपि न प्रयत्नेन॥ तदा सप्तभिरपि न प्रयत्नेन॥ तदा नवभिः पूर्णाकृति
। शाखयोरर्धं मूले चतुर्भागश्चतुर्थांशस्तत्प्रमितं प्रता। द्वारानंद्यादि कोनिवेशयेत्। कारयेत्। शेषमिति शेषं भाग
त्रयं मंगल्यविहगैर्मंगल्यपक्षिभिः श्रीवृक्षैः स्वस्तिकैः श्रीवत्सविशेषैर्घटैः कलशैर्मिथुनैर्युग्मैः पत्रवल्लीभिः

वा॰म॰ पञ्चकलाभिः प्रमथैर्गणैश्चोपशोभयेत्॥ शोभा मुख्येत॥ द्वारमानाष्टभागोनेति॥ द्वारस्य यन्मानं प्रमाणमुच्छ्रयस्य योऽष्टभा
गोऽष्टांशस्तेन द्वारप्रमाणाद्धीना प्रतिमा सपीठिका पीठसहिता कार्या॥ तत्र चेद्द्वौ भागौ प्रतिमा कार्या॥ तृतीयांशस्तेन त्रिभा
२४० गः पीठिका पीठिका कार्या॥ यथा मेरुप्रासादस्य द्वारोदयः षोडशहस्ताः अस्याष्टभागः एको हस्तः एतेन द्वारमानं पञ्चदशहस्ताः एत
त्सपीठिकायाः प्रतिमायाः प्रमाणं॥ तस्माद्भागद्वयं चत्वारि हस्ताः वेदशांगुलानि एतत्प्रतिमायाः प्रमाणं तृतीयांशो हस्तद्वय
मष्टावंगुलानि॥ एतत्पीठिकायाः प्रमाणमिति॥ एवं सर्वप्रासादेषु ज्ञेयमिति॥ तथा च काश्यपः॥ पुरानुसारप्रासादाः कर्तव्याश्च
भलक्षणाः॥ नान्याश्चानाविद्धाश्च समंदिरे सप्तशाखिनाः॥ चतुःशाखश्च कोष्ठानां त्र्यंशं पंचत्रिशाख्यसेन॥ द्वारं कुर्यान्मध्य
मध्ये च समं दिक्कुलस्य प्रशस्यते॥ विस्ताराद्द्विगुणोत्सेधः कर्तव्यो शालकायकः॥ विस्तारे पञ्चदश च भूमिकाः स्थानके॥ गर्भश्च
तुर्थभागेन द्वारं तु द्विगुणोच्छ्रयं॥ द्वारोच्छ्रायाच्चतुर्भागो विस्तारः शाखयोः स्मृतः॥ उदुंबरस्तथैवोक्तः शाखायामाननिम्नशः
शाखाश्चतुर्थभागेन प्रतोलीतु कारयेत्॥ प्रथमे विंदुरेखेन बीजावर्जा ... स्वस्तिकः पद्मशंखौ च
मनोरमः॥ पत्रांतरलताभिश्च ग्रहैर्नागैश्च कारिभिः॥ देवं सपीठिकं द्वारे ... शुभं॥ द्वौ भागौ प्रतिमा कार्या
तृतीयं चैव पीठिका॥ समसं द्रोणिकाभागे वामे पार्श्वे विधीयते॥ निर्मालं ... प्रणालं ...॥ अथ प्रासा
दीनामान्याह॥ मेरुमंदिरकैलासविमानछंदनंदनाः॥ समुद्गपद्मगरुडनंदिवर्धनकुंजराः॥ गुहराजवृषहंसः सर्वतोभद्
कोघटः॥ सिंहो वृत्तश्चतुःकोणः षोडशाष्टाश्रयस्तथा॥ इत्येते विंशतिः प्रोक्ताः प्रासादाः संज्ञया मम॥ यथानामगुणा
नेव लक्षणानि वदाम्यतः॥ मेर्वाद्याः यथावत्क्रमेण विंशतिसंज्ञाः॥ मेरुमंदरः कैलासविमानः छंदनंदनः समुद्गः पद्म
गरुडः नंदिवर्धनः कुंजरः गुहराजः वृषः हंसः सर्वतोभद्रः घटः सिंहः वृत्तः चतुःकोणः षोडशाश्रिः इत्येतत्क्रमेण
तेन विंशतिप्रासादाः मया संज्ञया नामोक्ताः कथिताः॥ अतोऽस्मादनंतरं यथोक्तानुक्रमेणैव क्रमेणोक्ताः कथिता॥
तेनैवानुक्रमेण लक्षणानि वदामि कथयामीति॥ तत्रादौ च मेरुप्रासादस्य लक्षणमाह॥ तत्र षडश्रिर्मेरुर्द्वादशभौ २४०
मा विचित्रः कुहरैश्च॥ द्वारैर्युतश्चतुर्भिर्द्वात्रिंशद्धस्तविस्तीर्णितत्र तस्मिन् प्रासादलक्षणे मेरुर्नाम प्रासादः॥ षडश्रिष
डश्रिय कोणा यस्य द्वादशभौमः द्वादशपर्युपरि तस्य द्वादशभूमिका भवंति॥ विचित्रकुहरो विचित्रनामाप्रकाराप

मंतरगवाक्षालि ... भवंति॥ चतुर्भिर्द्वारैर्युतश्चत्वारि दिक्षु तस्मिन् द्वाराणि भवंति॥ द्वात्रिंशद्धस्तविस्तीर्णविष्कंभान॥ अथोद
यं चतुःषष्टिहस्तास्तस्योच्चा॥ तथा च काश्यपः॥ द्वात्रिंशद्धस्तविस्तीर्णश्चतुर्द्वारः षडश्रिकः॥ भूमिकास्तत्र कर्तव्या विचित्रकुह
रान्विता॥ द्वादशोपर्युपरिगा चतुर्लक्षैः समायुताः॥ प्रासादो मेरुसंज्ञः स्यान्निर्दिष्टो विश्वकर्मणा॥ अथ मंदरकैलास
योर्लक्षणमाह॥ त्रिंशद्धस्तायामो दशभौमो मंदरः शिखरैर्युतः कैलासो विंशत्या शिखरैः विस्तारे विंशोऽष्टभौमश्च॥ त
त्र षडश्रिर्मंदरे स्यात्स सर्वत्रानुवर्तते॥ मंदरलक्षणं यावत्॥ मंदरसंज्ञप्रासादः त्रिंशद्धस्तायामस्त्रिंशद्धस्तविस्तीर्णोऽवि
ष्कंभानः षष्टिहस्तोऽस्योच्चः॥ षडश्रिश्च॥ दशभौमा दशभिर्भूमिकाभिर्युक्तः॥ शिखरैर्युक्तः शिखरैः सुंदरैः समायुतः॥
तथा च काश्यपः॥ मंदरः शिखरैर्युक्तः षडश्रिर्दशभूमिकः॥ त्रिंशद्धस्तास्तु विस्तीर्णः प्रासादोऽयं द्वितीयकः॥ कैलासोऽपि त
अपि कान्त्यसंभावनायां कैलासोऽपि षडश्रिः शिखराणां शतैर्युतः विंशतिश्च अष्टाविंशतिहस्तविस्तीर्णोऽवि
ष्कंभानः षट्पंचाशद्धस्तास्तस्योच्चः॥ अष्टभौमा अष्टाभिर्भूमिकाभिर्युक्तः॥ तथा च काश्यपः॥ अष्टभूमिकः कैलासोद
स्ताष्टाविंशतिस्मृतः॥ षडश्रिः शिखरोपेतः प्रासादस्तु तृतीयकः॥ अथ विमानच्छंदनंदनयोर्लक्षणमाह॥ गवाक्षशुक
नासाविमानसंज्ञस्त्रिसमकायामः॥ नंदनइति षड्भौमो द्वात्रिंशांशोऽशयुतः॥ विमानछंदसंज्ञः षडश्रिर्गवाक्षगवाः
शुकयुतः गवाक्षकापलक्षालि गवाक्षैश्च शुकनासिकाभिर्युक्तः त्रिसमकायामो विष्कंभोदयः विंशतिहस्तायामो
दैर्घ्यं॥ अथ देवद्वारचत्वारिंशद्धस्तास्तस्योच्चं॥ अष्टभौमिकश्च॥ तथा च काश्यपः॥ गवाक्षजालसंयुक्तो विमानस्थानक
विंशतिः॥ षडश्रिरत्र मासमस्त्र प्रासादश्चतुर्थकः॥ नंदनइति नंदनसंज्ञः॥ षडश्रिः षड्भौमः षड्भूमिकाभिर्युक्तः
द्वात्रिंशद्धस्तविस्तीर्णविष्कंभानः॥ चतुःषष्टिहस्तास्तस्योच्चः अंडकैर्नभावेष्टितः एकनवतिशृंगाणि
ता द्वावष्टौ॥ तस्य प्रासादस्य षड्भूमिका भवंति॥ तथा च काश्यपः॥ वर्तुलस्तु समुद्रः स्यात्पद्मः पद्माकृतिस्तथा
द्वात्रिंशकं तु विस्तीर्णो भूमिकाः षड्भाविता॥ अथ गरुडनंदिवर्धनयोर्लक्षणमाह॥ गरुडाकृतिस्तु गरुडो नंदिर्नित च
षड्हस्तश्चतुष्कविस्तीर्णः कार्यस्तु सप्तभौमो विभूषितः देवैः विंशत्या॥ गरुडसंज्ञः गरुडाकारः पक्षपुच्छयुक्तः
नंदीनिचा समुद्रश्च॥ नंदिवर्धनसंज्ञश्च गरुडाकारएव च॥ किंतु पक्षपुच्छादिहीनः षड्हस्तस्तु चतुष्कविस्तीर्णः॥ गरु

ऽर्णो नंदिवर्धनश्च। षडश्रकाश्चतुर्विंशत्या विभूषितौ। अनेन तौ गरुडो नंदिवर्धनश्च॥ तथा च काश्यपः। गरुडो गरुडाका
रः पक्षपुच्छविभूषितः। नंदीतदाकृतिर्ज्ञेयः पक्षादिरहितः पुनः। कर्णांस्त्वष्टचत्वारिंशत्सप्तभूमिकौ॥ द्वाभिर्द्वि
गुणैरंडैर्भूषितौ कार्यौ तु तौ॥ ॥अथ कुंजरगुहराजयोर्लक्षणमाह॥ कुंजर इति। गजपृष्ठः षोडशहस्तैः समुच्छ्रितो मू
लात्। गुहराजः षोडशकस्त्रिचंद्रशालाभावद्वलभी। कुंजर संज्ञो गजपृष्ठाकृतिपृष्ठाकारः॥ षोडशहस्तः समुच्छ्रितो मूलात
। मूलात् षोडशहस्तविष्कंभः अन्येषां पाठे॥ षोडशहस्तायामविस्तारो मूलात्। एवं द्वात्रिंशद्धस्तास्तस्योच्छ्रायः। गुहराजाख्या
एकः भूमिकः गुहराजो गुहाकारः षोडशहस्तविस्तीर्णो। द्वात्रिंशद्धस्तस्तस्योच्छ्रायः। एकभूमिकः अनयोर्द्वयोरपि वल
भीकृतिस्त्रिचंद्रशाला भवेत्स्यात् त्रिस्त्रिभिश्चंद्रशालिका युक्ते इति। तथा च काश्यपः। कुंजरो गजपृष्ठाभो हस्ताः षोडश
विष्कंभः। गुहराजो गुहाकारो विष्कंभात् षोडशस्मृतः। त्रिचंद्रशालासंयुक्तावलयो वलभिर्भवेत्। द्वावेकादशावेतौ प्रा
सादौ प्रकीर्तितौ॥ ॥अथ वृषसिंहघटानां लक्षणमाह। वृष एकभूमिशृंगो द्वादशहस्तः समंततो वृत्तः हंसो
हंसाकारो घटोष्टहस्तः कलशरूपः। वृषसंज्ञः एकशृंगः एकया भूमिकः। एकेन च शृंगेण प्रासादेन युतः। द्वादश
हस्तः विस्तीर्णो विष्कंभात्। चतुर्विंशतिहस्तास्तस्योच्छ्रायः॥ समंततः सर्वासु दिक्षु वृत्तः परिवर्तुलः एकभूमिकश्च। हंसो हं
साकारो हंसः सदृशः। चंचुपक्षपुच्छयुतः। द्वादशहस्तविस्तीर्णः चतुर्विंशतिहस्तास्तस्योच्छ्रायः। एकभूमिकश्च। घटसं
ज्ञः कलशरूपः कलशाकारः अष्टहस्तविस्तीर्णो विष्कंभात् षोडशहस्तास्तस्योच्छ्रायः। एकभूमिकश्च सर्व एकैकशृंगाः॥ त
था च काश्यपः॥ एकभूमिको वृषो वृत्तः पक्षपुच्छाद्यलंकृतः। घटः कलशरूपश्च स्वविस्तारो द्विगुणाः स्मृताः॥ अथ सर्व
तोभद्रस्य लक्षणमाह॥ द्वारैर्युतश्चतुर्भिर्बहुशिखरो भवति सर्वतोभद्रः। बहुरुचिरचंद्रशालः षड्विंशः पंचभौमश्च॥
सर्वतोभद्रसंज्ञः प्रासादश्चतुर्भिर्द्वारैर्युतः। चतसृष्वपि दिक्षु तस्मिन् द्वाराणि भवंतीत्यर्थः॥ बहुशिखरो बहूनि
यस्मिन् शिखराणि भवंति। बहुरुचिरचंद्रशालो बह्वीभिः प्रशस्ताभिः शोभनाभिश्चंद्रशालाभिर्युतः। षड्विंशः ष
ड्विंशतिर्हस्ता विस्तीर्णो विष्कंभात्॥ अथ द्विपंचाशद्धस्तास्तस्योच्छ्रायः पंचभौमः पंचभूमिकाभिः युतः। चतुरस्रश्च॥
तथा च काश्यपः। शिखरैर्बहुभिर्युक्तः चतुर्द्वारविभूषितः। रुचिरैश्चंद्रशालैश्च बहुभिः परिवारितः॥ चतुरस्रः पंचभौ

माद्वात्रिंशद्धस्तविस्तृतः॥ सर्वतोभद्रसंज्ञः प्रासादस्तु चतुर्दश॥ अथ सिंहस्य चतुष्कोणः षोडशाश्रस्याश्चाणां लक्षणमा
ह॥ सिंहः सिंहक्रांतो द्वादशकोणाष्टहस्तविस्तीर्णः। चत्वारोंऽजनरूपाः पंचांडयुतस्तु चतुरस्रः। सिंहसंज्ञः। सिंहाक्रांतः सिं
हयुक्तः। द्वादशकोणो द्वादशाश्रितः॥ अष्टहस्तविस्तीर्णः सर्वेऽन्ये च चतुःकोणः षोडशाश्रश्च संज्ञा सदृशा वृत्तः प
रिवर्तुलः चतुष्कोणश्चतुरस्रः षोडशाश्रितः षोडशकोणः अष्टाश्रिः अष्टकोणः एतेंऽजनरूपा अंजनरूपाः। साकारा
इत्यर्थः। वाच्यं न कारणं संतेषु न प्रविशंति॥ अयमर्थः। देवप्रासादस्य संनिकृष्टाश्चत्वारो वृषा। दिक्षु भिन्नाः कृत्वा प्रासाद
स्य पश्चिमे भागे भागे कार्याः। ताश्च भिन्नत्वात् ऊर्ध्वाभागास्तथा कार्या यथा प्रासादात्पन्नाद्व्यक्तस्थैते। न चैषु कला
शः अपि द्वारेण प्रविश्य प्रासादस्य वामपार्श्वेनागत्य पुरतः प्रासादस्य द्वारं कार्यं। तत्र मणिमयी प्रतिमा न कांस्यान्यनका
र्यमुत्पद्यते। सिंहः सिंहैः समाक्रांता कोणैर्द्वादशभिर्युतः॥ विष्कंभादष्टहस्तः स्यादेकान्तस्य च भूमिका। वृत्तोष्टनाश्
तिः कार्याः संज्ञा तुल्याः तथा परेषां अधिकाराः तु सर्वतोभूमिकैकाः समाहृताः। एकांडभूमिकाः सर्वे पंचभिश्चतुरस्रकः॥
अथ मयविश्वकर्मणोर्मतेन भूमिकाप्रमाणमाह॥ ॥भूमिकांगुलमानेन मयस्याष्टोत्तरं शतं॥ सार्धं हस्तत्रयं चैव
कथितं विश्वकर्मणा॥ मयस्य मतेनाष्टोत्तरशतमंगुलानां भूमिकामानं भवति। तथा च मयः॥ प्रासादभूमिकामानं
शतमष्टोत्तरं स्मृतं॥ अंगुलानामिति॥ विश्वकर्मणा सार्धं हस्तत्रयं भूमिकामानं कथितमुक्तं॥ चतुरशीत्यंगुलमित्यर्थ
ः॥ तथा च विश्वकर्मा। चतुर्भिरधिकाशीतिरंगुलानां तु भूमिका इति॥ अत्रापि परमतेनैकवाक्यमाह॥ प्रादुस्थपन
युश्चात्र मतमेकं विपश्चिता। कपोतपालिसंयुक्तान्यूना गच्छंति तुल्यतां। अत्रास्मिन्नर्थे विपश्चितः पंडिताः स्थप
तयो मयविश्वकर्मणोरेकं मतं प्राहुः कथंतः॥ विश्वकर्मणो मतेन यान्यूनाः प्रमाणहीनाः भूमयः कपोतपालिसंयु
क्ता मयस्तेन तुल्यतां गच्छंति॥ समत्वं गच्छंति। कपोतपालिग्रहणाद्बाह्यनिर्गतानि सिंहमुखानि काष्ठान्युच्यंते॥ तथा च
कपोतपालिभ्युर्वतेविंर्बं बहुश्रुताः तथा चोक्तं। कपोतपालिरहितं मानं चतुरशीतिकं। भूमिकानां सहितं यावच्छतमष्टो
त्तरं स्मृतमिति॥ अंगुलानां अथोपसंहारार्थमाह॥ प्रासादलक्षणमिदं कथितं समासाद्गर्गेण। यद्विरचितं तदिह्वास्ति
सर्वमतादिभिरविरचितानि पृथूनि यानि तत्संस्पृष्टान् प्रतिमयात्र कृताधिकारः इदं मया प्रासादलक्षणं समासा

संक्षेपात्कथितं ॥ उक्तं च । यच्च प्रासादलक्षणं गर्गेण मुनिना विरचितं स्थितं । तत्सर्वं निरवशेषमिहास्मिन्लिखितव्यं नैयाः
व॰रा॰सं॰ मिच पृथूनि विस्तीर्णानि मनुतादिभिर्मनुवसिष्ठमयनग्नजिद्भिर्विरचितानि । प्रासादलक्षणानि प्रतिमादिलक्षणानामभावा
नेत्यादिलक्षणलक्षितायां संस्पृष्टानधिकारः ॥ प्रासादलक्षणं कृतमित्यर्थः ॥ अथ यातस्मृत्वा तानि सर्वाणि लक्षणा
२४२. नि प्रतिसंस्मृत्वा न पुराकृतानि मयात्राधिकारः क्रियत इति ॥ ॥५६॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ प्रासा
दलक्षणं नाम षट्पंचाशत्तमोऽध्यायः ॥५६॥ ॥ ७॥ अथ वज्रलेपलक्षणं व्याख्यायते । तत्रादावेव प्रथमं
वज्रलेपलक्षणमाह ॥ आमं तिंदुकमामं कपित्थकं पुष्पमपि च शाल्मल्याः । बीजानि शल्लकीनां धन्वनवल्को वचा चेति ॥ ए
तैः सलिलद्रोणः क्वाथयितव्योऽष्टभागशेषश्च । अवतार्योऽस्य च कल्को द्रव्यैरेतैः समनुयोज्यः ॥ श्रीवासकरसगुग्गुलभल्ला
तककुंदुरुकसर्जरसैः । अतसीबिल्वैश्च युतः कल्कोऽयं वज्रलेपाख्यः ॥ आमं तिंदुकमिति । तिंदुकं तिंदुकफलमामम् अपक्वं
। कपित्थफलमप्याममेव शाल्मल्या अपि पुष्पं पक्वं ॥ शाल्मलिवृक्षः शल्लकीनां शल्लकीवृक्षाणां ॥ बीजानि धन्वनवृक्ष
: वल्कः धन्वनो वृक्षस्तस्य वल्कलं ॥ वचा च ॥ इत्येवं प्रकारः ॥ एतैर्द्रव्यैः सह सलिलद्रोणः क्वाथयितव्यः ॥ द्रोणप
कारान् द्वयं यस्य चाष्टाधिकं यावदष्टभागशेषो भवति ॥ द्वात्रिंशत्पलान्यन्यवदिष्ट इत्यर्थः ॥ ततोऽष्टभागशेषोऽ
वतार्थः अवतारणीयोऽग्नेरित्यर्थः ॥ अस्य चाष्टमभागावशेषस्यैतैर्वक्ष्यमाणैर्द्रव्यैः कल्कश्चूर्णं समनुयोज्यो
दातव्यः । तच्चूर्णं संयुक्तं कार्यमित्यर्थः ॥ कैरित्याह ॥ श्रीवासकः प्रसिद्धो वृक्षनिर्यासः रसो बोलः गुग्गुलः प्रसिद्धः भ
ल्लातकं प्रसिद्धं । एवं कुंदरुको देवदारुवृक्षनिर्यासः सर्जरसोऽपि वृक्षनिर्यास एव ॥ एतैस्तथा । अतसी प्रसिद्धा । बिल्वस्य
फलं । एतैर्युतैः समन्वितः अयं कल्को वज्रलेपाख्यः वज्रलेप इत्याख्या यस्य ॥ अथास्य गुणानाह ॥ प्रासादह
र्म्यवलभीलिंगप्रतिमासु कुड्यकूपेषु । संतप्तो दातव्यो वर्षसहस्रायुतस्थायी ॥ प्रासादो देवप्रासादः ॥ हर्म्यं ईश्व
रभवनं वलभी वातायनं । लिंगानि च लिंगप्रतिमा अर्चाः ॥ एतेषु प्रासादादिषु तथा कुड्येषु भित्तिषु ॥ कूपेषु चोदकाधारेषु सं २४२.
तप्तो दातव्योऽदेयः ॥ वर्षसहस्रायुतस्थायी भवति ॥ वर्षाणां सहस्राणामयुतं वर्षकोटिमिति स्थायीत्यर्थः ॥ अथान्यव
ज्रलेपमाह ॥ लाक्षाकुंदरुगुग्गुलुगृहधूमकपित्थबिल्वमध्यानि ॥ नागफलतिंदुकमदनफलमधूकमंजिष्ठा ॥

सर्जरसरसामलकानि चेति कल्कः कृतो द्वितीयोऽयं । वज्राख्यः प्रथमगुणैरयमपि तेष्वेव कार्येषु ॥ लाक्षा प्रसिद्धा । वृक्षनिर्या
सः । कुंदरु देवदारु लाक्षा प्रसिद्धः । गुग्गुलु प्रसिद्धः । कपित्थैः कपित्थफलं बिल्वमध्यं । एतानि तथा नागफलं चैव प्रसिद्धः
तिंदुकं तिंदुकफलं । केचिन्नागबलाफलतिंदुकमदनफलमिति पठंति । मदनफलं मधूकफलं । मंजिष्ठा प्रसिद्धा । सर्जरसो
वृक्षरसः रसो बोलः । आमलकं धात्रीफलं । एतानि च । इत्येवं प्रकारो द्वितीयः कल्कः । एतो वज्राख्यो वज्रलेपसंज्ञः प्र
थमगुणैः पूर्वोक्तैर्गुणैरेतैः सलिलद्रोणः क्वाथयितव्योऽष्टभागशेषश्चेति । तथा संतप्तो दातव्य इति । अयमपि तेष्वेव
कार्येष्विति । अयमपि वज्रलेपाख्यस्तेष्वेव प्रागुक्तेषु कार्येषु प्रासादादिषु सच वर्षसहस्रायुतस्थायी भवति । अन्यद॰
गोमहिषाजविषाणैः खररोम्णा महिषचर्मगव्यैश्च । निंबकपित्थरसैः सह वज्रतलो नाम कल्कोऽन्यः ॥ गोमहिषाजाः प्रसिद्धाः ॥
अजश्छागः एषां सर्वेषां विषाणानि शृंगाणि ॥ तैस्तथा खररोम्णा गर्दभरोमभिः महिषचर्मणा गोश्च चर्मणा सह ॥ निंबः क
पित्थः फलं । रसो बोलः एतैः सह अन्यः कल्कः प्राग्वत् ततः एतैः सलिलद्रोणः क्वाथयितव्यः ॥ अष्टभागशेषश्चेति ॥ व
ज्रतलो नाम अयमपि प्रथमगुणस्तेष्वेव कार्येष्विति ॥ अन्यदप्याह ॥ अष्टौ सीसकभागाः कांसस्य द्वौ तु रीतिकाभा
गः ॥ मयकथितो योगोऽयं विज्ञेयो वज्रसंघातः ॥ सीसकस्याष्टौ भागा ग्राह्याः ॥ कांसस्य द्वौ भागौ रीतिकाभा
गस्त्वेकः ॥ अयं योगो वज्रसंघातो नाम कथ्यते । मयेनोक्तः अयमपि प्रथमगुणस्तेष्वेव कार्येष्विति । अस्य प्रमाणानुसा
रेण भागपरिकल्पना कार्या ॥ अन्यसममात्राकार्येत्यागमः ॥ ॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ वज्र
लेपलक्षणं नाम सप्तपंचाशोऽध्यायः ॥ ५७ ॥ ॥ अथ प्रतिमालक्षणं व्याख्यायते । तत्रादावेव परमाणुप्रमा
णमाह ॥ जालांतरगे भानौ यदणुतरं दर्शनं रजो याति । तद्विद्यात्परमाणुं प्रथमं तद्धि प्रमाणानां ॥ भानौ सूर्ये
जालांतरगे गवाक्षजालमध्यवर्तिनि यद्रजः अणुतरं दर्शनं याति । दृष्टिपथमायाति । तत्परमाणुं नाम प्रमा
णविद्यां जानीयात् । दिवस्मात् अथ परमाणूनां सर्वेषां तत्प्रथममाद्यं ॥ प्रमाणं परमाणुसंज्ञं । अथ परमाणो
णाते अंगुलप्रमाणसंज्ञमाह ॥ परमाणुरजो बालाग्रलिक्षायूका यवोऽङ्गुलं चेति । अष्टगुणानि यथोत्तरमंगुल
मेकं भवति संख्या ॥ तद्यथाष्टाभिः परमाणुभी रजो भवति ॥ अष्टभी रजोभिर्बालाग्रं । अष्टाभिर्बालाग्रैर्लिक्षा । अ

दृभिर्भिर्द्वादशभिर्युक्ताः द्वाभिर्युक्ताभिर्भवः अष्टाभिर्यवैरंगुलं एवं यथोत्तरं परमाणुवादान्यष्टगुणानामंगुलसंख्याभव
वा॰म॰ ति॥ तथा च॥ जालांतरगते भानौ यत्सूक्ष्मं दृश्यते रजः। प्रथमं तत्प्रमाणानां परमाणुं प्रचक्षते॥ तस्मादुक्तः कलाश्चेति
शात्रकाया वांगुलं॥ क्रमादष्टगुणं ज्ञेयं निजसंख्यांगुलं क्रमः॥ अथ समस्तायाः प्रतिमायाः प्रमाणमाह॥ देवागारद्वा
२४३ रस्याष्टांशोनस्य यत्तृतीयांशः तल्लिंगकाप्रमाणं प्रतिमा तद्द्विगुणपरिमाणा देवागारस्य द्वारं द्वारं तस्य यस्तृतीयस्त
स्याष्टांशोनस्याष्टभागहीनस्य तृतीयांशः॥ तृतीयो भागस्तल्लिंगिकाप्रमाणं तद्द्विगुणपरिमाणा पिंडिका द्वि
गुणप्रमाणा प्रतिमा वा भवति॥ अथ प्रतिमायाः अवयवप्रमाणमाह॥ स्वैरंगुलप्रमाणैर्द्वादश विस्तीर्णमायामं च
मुखं। नग्नजिता च चतुर्दश दैर्घ्येण द्राविडं कथितं। यस्मात्काष्ठपाषाणादिकृता प्रतिमा क्रियते। तद्दैर्घ्यप्र
माणं विवर्त्तितं द्वादशभागविभक्तं कृत्वा तत्रैको भागो नवधा कार्यः सोंगुलसंज्ञा भवति। यस्माद्दष्टाधिकांगुलशतं प्र
तिमाप्रमाणं वक्ष्यति। स्वैरंगुलप्रमाणैरिति। प्रतिमायाः स्वकीयैरंगुलप्रमाणैर्मुखं वदनं द्वादशांगुलानि विस्तीर्णं कार्यं।
द्वादशांगुलान्यायतं च दैर्घ्यमित्यर्थः। नग्नजिता मुनिना द्वादशांगुलानि विस्तीर्णं मुखं कथितं दैर्घ्येण चतुर्दशां
गुलानि। एतद्द्राविडं द्रविडदेशजं मानं॥ तथा च नग्ने नग्नजिता विस्तीर्णं द्वादश मुखं दैर्घ्येण चतुर्दश। अंगुलानि तथा का
र्यं तन्मानं द्राविडं स्मृतं इति॥ अन्यदप्याह॥ नासाललाटचिबुकग्रीवाश्चतुरंगुलास्तथा कर्णौ। द्वे अंगुले च हनुके चि
बुकं च द्व्यंगुलं विततं॥ नासा चेमा चतुरंगुला दैर्घ्येण कार्या। ललाटमुखं एवं च चतुरंगुलमेव चिबुकं चतुरंगुलमेव॥ चिबु
कस्य दशनाधरस्याधश्चतुरंगुलो भाग उच्यते॥ ग्रीवा चतुरंगुला दीर्घा तथा कर्णौ श्रोत्रौ चतुरंगुलौ दीर्घौ। हनु
हनुके द्वे द्व्यंगुले च विस्तीर्णे। मुखगलसंधी हनू ना॥ चिबुकं च द्व्यंगुलं विततं विस्तीर्णं कार्यं। चिबुकशब्देनात्र मुखस्या
धोभाग उच्यते॥ अन्यदप्याह॥ अष्टांगुलं ललाटं विस्तीर्णात् द्व्यंगुलौ परे शंखौ। चतुरंगुलौ तु शंखौ कर्णौ तु द्व्यंगुलौ
पृथुलौ॥ ललाटं विस्ताराद् अष्टांगुलं कार्यं॥ तस्मात् परे भागद्वये द्व्यंगुलौ द्व्यंगुलप्रमाणौ शंखौ कार्यौ॥ ललाटान्त २४३
रतः कार्याविति अर्थः॥ शंखौ चतुरंगुलावधोभागे दीर्घौ कार्यौ॥ यतः शंखाधोगंडभाग उच्यते। कर्णौ तु द्व्यंगुलौ पृथु
लौ विस्तीर्णौ कार्यौ॥ अन्यदप्याह॥ कर्णोपांतः कार्योर्धपंचमे भ्रूसमेन सूत्रेण॥ कर्णस्रोतः सुकुमारकं च नेत्रप्र

बंधसमं॥ कर्णस्योपांतः समीपश्चार्धपंचममंगुलं यस्मिन्भागे सार्धानि चत्वार्यंगुलानि। तत्रांतरालादारभ्य तस्मिन् भ्रूसमेन सू
त्रेण भ्रूमध्यगेन कर्णोपांतः कार्यः। कर्णाग्रमित्यर्थः॥ कर्णस्रोतः कर्णच्छिद्रं सुकुमारकं च॥ कर्णस्रोतः समीपे उन्नतो भा
गः तन्नेत्रप्रबंधसमं नेत्रप्रबंधशब्देनात्र कृपिकोच्यते॥ तत्समं तत्तुल्यं कार्यमंगुलप्रमाणमित्यर्थः॥ अन्यदप्याह॥
चतुरंगुलं वसिष्ठः कथयति नेत्रांतयोर्विवरं॥ अधरोंगुलप्रमाणस्तस्यार्धेनोत्तरोष्ठश्च॥ वसिष्ठमुनिर्नेत्रांतरं कर्णयो
र्विवरमंतरं चतुरं कथयति॥ तथा च वसिष्ठः॥ कर्णनेत्रांतरं यच्च तद्विद्याच्चतुरंगुलं॥ अधरोष्ठोंगुलप्रमाणो विस्तीर्णः का
र्यः। उत्तरोष्ठः तस्यार्धेनाधरोष्ठस्यार्धेनार्धांगुलो विस्तीर्णः कार्यः॥ अन्यदप्याह॥ अर्धांगुला तु गोच्छा वक्त्रं चतुरंगुलायतं
कार्यं॥ विपुलं तु सार्धमंगुलमव्यात्तं त्र्यंगुलं व्यात्तं॥ गोच्छा अर्धांगुलं विस्तीर्णा कार्या॥ उत्तरोष्ठस्योपरि सीमंतो गोच्छा। ना
साधो मध्यभागादारभ्योत्तरोष्ठं यावन्निम्नो भागः इत्यपरे॥ वक्त्रं मुखं चतुरंगुलायतं चत्वार्यंगुलानि दीर्घं कार्यं॥ तथा सा
र्धमंगुलं विस्तीर्णं कार्यं यच्च व्यात्तमविकासितं व्यात्तं विकासितं पुनस्त्रिसंख्यांगुलं विस्तीर्णं कार्यं॥ अन्यदप्याह॥
वा प्रतिचयं स्मृद्धिवाक्याद्विभिः॥ पाली वापी॥ सा नागपदायता। पूर्वपश्चिमयोर्दीर्घायिता दीर्घा सुचिरं चिरकालं
वुज्ञलं धत्ते। धारयति। न याम्योत्तरा। दक्षिणोत्तरायता पाली न सुचिरमंबु धत्ते॥ यतः सा मरुता वायुना प्रेरिता प्राप्य
शोषाद्रुत्यनकल्लोलैर्लक्ष्याभिनेरखदानं विनाशमेति। गच्छति। द्व्यंगुलतुल्यौ नासापुटौ च नासापुटाग्रतो ज्ञेया। स्या
द्व्यंगुलमुच्छ्रायश्च चतुरंगुलमंतरं चाक्ष्णोः॥ नासापुटौ द्व्यंगुलमितौ। द्व्यंगुलप्रमाणौ कार्यौ। तथा नासापुटाग्रतो द्व्यंगुल
तुल्या ज्ञेया ज्ञातव्या। द्व्यंगुलं नासायाः उच्छ्रायस्तच्च स्याद्भवेत्॥ अक्ष्णोर्नेत्रयोर्द्वयोर्मध्ये चतुरंगुलप्रमाणं भवति॥
अन्यदप्याह॥ द्व्यंगुलमितोक्षिकोशो द्वे नेत्रे तत्त्रिभागिका तारा। दृक्तारापंचांशो नेत्रविकाशोंगुलं भवति। अक्षिकोशो
द्विपुटो द्व्यंगुलमितो द्व्यंगुलप्रमाणो द्वे नेत्रे अंगुलं च यत्ने तत्त्रिभागिका तारा अंगुलस्य त्रिभागप्रमाणा तारा नेत्रमध्य
कृष्णोभागः दृक्तारामध्यवर्तिनी कुमारी। अंगुलस्य पंचांशः पंचभागः तत्र विकाशो नयनविपुलमंगुलं भवति
अन्यदप्याह॥ पर्यंतात्पर्यंतं दश भ्रुवोः द्व्यंगुलं भ्रुवोर्लेखा भ्रूमध्यं तु भ्रुवोंतरं द्व्यंगुलकं द्व्यंगुलप्रमाणं विस्तीर्णं का
र्यं॥ भ्रू दैर्घ्येण दैर्घ्येनांगुलचतुष्का भ्रूलेखा द्व्यंगुलविस्तीर्णा। भ्रूमध्यार्धभ्रुवोंतरं द्व्यंगुलकं द्व्यंगुलप्रमाणाव

वा॰ सं॰ स्तीर्णं कार्यं॥ भ्रूदैर्घ्येण दैर्घ्यं वेदांगुलचतुष्कं कार्यमिति। अथान्यत्। कर्णयोर्निकेशरेखाभ्रूबंधसमांगुलार्धविस्तीर्णा। नेत्रा
२४५ न्तकर्णांतरं समुपन्यसेद्व्यंगुलप्रमितं॥ केशरेखालला‍टोपरिस्थबंधसमाभ्रूवंधुरूपा कार्या। दशांगुलप्रमाणेन्यर्थअ
र्धांगुलविस्तीर्णा। नेत्रांते चक्षुः पर्यंतकर्णादकं प्रथितमिदं॥ तदंगुलप्रमितमंगुलप्रमाणं चान्यमेतत्स्यात्। अ
थान्याद्॥ द्वात्रिंशत्परिणाहा चतुर्दशायामितांगुलानि शिरः। द्वादशांगुलविस्तीर्णानि दृश्यमानानि विंशतिरदृश्या। शिरः द्वात्रि
शदंगुलानि परिणाह कार्यं॥ चतुर्दशांगुलान्यायामतो विष्कंभात॥ चित्रकर्मणि च द्वादशांगुलानि दृश्यंते। विंशति
रदृश्या॥ पश्चिमभागे तानि छायागतो भवंति॥ अथान्यत्॥ आस्यं सकेशांतं चर्याषोडशदैर्घ्येण गलजितोक्तः॥ ग्री
वा दशविस्तीर्णा परिणाहा द्वाविंशतिः। सैकानन्गलजिप्रोक्तः प्रतिमालक्षणे आस्यमुखं सकेशांतं च यत्केशरेखा सहितं षोड
शांगुलानि मुखं दीर्घं चतुर्दशांगुलानि। केशरेखा द्व्यंगुलषोडश॥ तथा च नग्नजित॥ अंगुलेकेशरेखा च नित्यमुखं स्या
षोडशांगुलं इति। ग्रीवा द्विशोधरादशांगुलानि विस्तीर्णा कार्या॥ विंशतिः सैका। एकविंशति परिणाहात॥ अन्यदप्याद्॥
कंठा द्वादश हृदयं हृदयान्नाभी च तत्प्रमाणेन॥ नाभीमध्यान्मेढ्रं तत्स्मान् मध्यं चान्यतुल्यं तत्सममेवोक्तं॥ कथितं द्वादशांगु
लानान्यर्थः॥ अथान्यत्। उरु चांगुलमानेश्चतुर्युता विंशतिस्तथा जंघे॥ जानुकपित्थे चतुरंगुले च पादौ च तत्तुल्यो। उरुदीर्घा
वंगुलमानेश्चतुर्युता विंशतिश्चतुर्विंशत्यंगुलानि॥ तथा जंघे चतुर्विंशति। एवं दीर्घं॥ जानुकपित्थे चतुरंगुले चतुरंगुलप्रमा
णं कार्यं॥ येच लोके चकलिकेति प्रसिद्धे। पादौ च तत्तुल्यौ तत्समांगुल्यौ द्वादशाधो भागे च चतुरंगुलः कार्यः। अन्यदप्या
द्॥ द्वादशदीर्घौ षट्प्रयुतयाच पादौ त्रिकायतांगुष्ठौ पंचांगुलपरिणाहौ प्रदेशिना चांगुलं दीर्घा॥ पादौ चरणौ पार्ष्ण्यग्रा
रभ्यां गुष्ठं यावद्द्वादशांगुलानि दीर्घौ कार्यौ॥ पृथुतया विस्तारेण षडंगुलानि॥ अंगुष्ठौ त्रिकायतौ स्त्रीण्यंगुलानि दीर्घौ कि
र्यौ। पंचांगुलपरिणाहौ परिधिः पंचांगुलौ कार्यौ॥ प्रदेशिन्यंगुष्ठसमीपवर्तिन्यंगुलात्रीण्यंगुलानि दीर्घा कार्या॥ अन्यद॰
अष्टांशाष्टांशोनाः शेषांगुल्यः क्रमेण परिणाहात्संशोना अष्टांशोनाः कार्याः। प्रदेशिनी नाम ध्यमाष्टांशोना कर्तव्याः। २४६
न ताध्यनामिकाष्टांशोना। ततः कनिष्ठिकाष्टांशोनाः कार्याः॥ अंगुष्ठस्यात्सेधउच्छ्रायः सचतुर्भागमंगुलयुक्तः कथितः।
शेषांगुलीनामष्टांशोनमंगुष्ठप्रमाणात प्रमाणं कार्यं॥ अन्यदप्याद्॥ अंगुष्ठनखः कथितश्चतुर्भागोनमंगुलंतज्ज्ञैः॥ अ
र्थ

खानामंगुलिनखानामर्धांगुलं प्रमाणं। अथवा क्रमात्परिमाणाद्विकिंचिदूनप्रमाणं कार्यं॥ यथा शोभना भवति। अन्यद॰
जंघाग्रे परिणाहश्चतुर्दशोक्तस्तु विस्तरात्पंचमध्ये तु समस्त्रिपुल्याः परिणाहास्त्रिगुणिताः समं। जंघाग्रे जंघाप्रांते चतुर्दशां
गुलानि परिणाहात्। उततः विस्तरात्पंचांगुलानि। जंघामध्ये मध्यभागे सप्तांगुलानि विपुलानि। विस्तीर्णाः परिणाहात्स
प्तत्रिगुणिताः एकविंशत्यंगुलानीति॥ अन्यद॰॥ अष्टौ जानुमध्ये वैपुल्यं अष्टकं तु परिणाहः। विपुलौ चतुर्दशोरूमा
ध्ये द्विगुणश्च तत्परिधिः। जानुमध्ये अष्टांगुलानि वैपुल्यं। पृथुत्वं। चतुर्विंशत्यंगुलानि परिणाहः। उरूमध्ये मध्यभा
गे चतुर्दशांगुलानि विपुलौ विस्तीर्णौ। तत्परिधिः तयोः परिधिर्द्विगुणः अष्टाविंशत्यंगुलानीति। अन्यदप्याद्॥ कटि
ष्टादशाविपुला चत्वारिंशच्चतुर्युता परिधौ। अंगुलमेकं नाभीवेधनतथा प्रमाणेन। कटिरष्टादशांगुलानि विपुला विस्ती
र्णाः परिधौ चत्वारिंशच्चतुर्युताश्चत्वारिंशद्द्व्यंगुलानि॥ परिणाहात॥ नाभीवेधनं गांभीर्येण वैपुल्येन चांगुलमेकं भ
वति। अन्यदप्याद्॥ चत्वारिंशद्द्वियुता नाभिमध्येन मध्यपरिणाहः। स्तनयोः षोडशचांतरमूर्ध्वं कक्षे षडंगुलात्कना
भीमध्येन मध्यपरिणाहः चत्वारिंशद्द्वियुता द्वाचत्वारिंशदंगुलानि स्तनयोरंतरं मध्यं षोडशांगुलानि। स्तनयोर
र्ध्वं तिर्यक् षडंगुलकं कक्षे कार्यं। अन्यदप्याद्॥ अष्टावंसौ द्वादश बाहू कार्यौ॥ तथानुबाहू च। बाह्वोपरिविस्तीर्णौ
प्रतिबाहू त्र्यंगुलचतुष्कं॥ अंसौ स्कंधौ ग्रीवापार्श्वद्विशांतेयावदष्टांगुलं विस्तीर्णं कार्यं॥ अंसासमीपवर्तिनौ बा
हू द्वादशांगुलानि दीर्घौ कार्यौ। बाहूसमीपवर्तिनौ प्रतिबाहू तावेव द्वादशांगुलानि। दीर्घौ बाहू षडंगुलानि विस्ती
र्णौ प्रतिबाहू त्र्यंगुलचतुष्कं विस्तीर्णौ॥ अन्यदप्याद्॥ षोडशं बाहुमूले परिणाहो द्वादशाग्रहस्ते च। विस्तारेण क
रतलं सप्तदैर्घ्येण बाहुमूले षोडशांगुलानि परिणाहः। अग्रहस्ते च द्वादशांगुलानि परिणाहः। करतलं हस्ततलं
विस्तारेण षडंगुलं कार्यं। दैर्घ्येण सप्तांगुलानि॥ अन्यदप्याद्॥ पंचांगुलानि मध्याप्रदेशिनी मध्यापर्वदलेन
हीना। अनयातुल्या चानामिका कनिष्ठा तु। पूर्वेना। अंगुष्ठानंतरं चांगुली सा प्रदेशिनी। तदनंतरा मध्या तदनंतरं ग
ध्यमिका। तदनंतरं कनिष्ठा। मध्यमांगुली। पंचांगुलानि दीर्घा कार्याः। प्रदेशिनी मध्यमात्वाः पर्वदलेन पर्वणोर्धेन
हीना कार्याः। पूर्वरेखायाः प्रभृति द्वितीयरेखा यावत्। पूर्वमित्युच्यते। अनया प्रदेशिन्या तु भा चानामिका कार्या। अस्या

पर्वभिः
अनामिकायाः पर्वेनापि कनिष्ठिका कार्या। अन्य इत्यादि॥ पर्वद्वयमंगुष्ठः शेषांगुल्यस्त्रिभिस्त्रिभिः कार्याः। नखपरिमाणं
वा·सं· कार्यं। सर्वासां पर्वणोर्धेन। अंगुष्ठः पर्वद्वयेन कार्यः। शेषा याः शिष्टा अंगुल्यस्त्रिभिस्त्रिभिः कार्याः। नखपरिमाणं कार्यं
सर्वासामंगुलीनां पर्वणोर्धेन नखपरिमाणं कार्यं॥ कीदृशाः प्रतिमा कार्या इत्याह॥ देशानुरूपभूषणवेषालंकारमूर्तिभिः
२४५ कार्याः। प्रतिमा लक्षणयुक्ता संनिहिता वृद्धिदा भवति। युक्ता संनिहिता वृद्धिदा भवति। देशानुरूपैर्देशस्य देशे भूषणैराभ
रणैः हारकेयूरकुंडलकादिभिः वेषैः वस्त्रैः अलंकारैर्यस्मिन् देशे यादृशा पुरुषाणां वेषस्तादृशः मूर्तिभिः देहस्वरूपभावैर्
देशानुरूपेणैव कार्याः। यतः प्रतिमा लक्षणैः युक्ता संनिहिता सर्वकालं भवति। वृद्धिदा च भवति। कर्तुर्व
द्धिं करोति। तथा च काश्यपः॥ द्वादशांगुलकं वक्त्रं कंठाच्चतुरंगुलं। नासाग्रं चानुकर्तव्यात्तुल्यं चैतत्प्रमाणतः। ग्रीवा लल
ाटं स्यादीयमष्टांगुलं पृथु। दृष्ट्या तु चिबुकं द्व्यंगुलं तु तत्संस्मृतं। चतुरंगुलकौ कर्णौ भ्रुवा चैव तथा स्मृतौ। द्व्यंगुलौ पृथुलौ
कर्णौ भ्रूमध्यं तत्प्रमाणतः। कर्णनेत्रांतरं कुर्यात्तत्मार्धं चतुरंगुलं॥ अर्धांगुलमानं तु तदर्धं नेत्रांतरं स्मृतं॥ चतुरंगुलकं च
कनासाग्रं द्व्यंगुलं स्मृतं। नेत्रे द्व्यंगुलके ज्ञा दैर्घ्ये त्रिभागेन तारका। द्व्यंगुलं पंचमांशेन सृक्किणी गुलसंमिता॥ द्व्यंगुलं
क्षिपुटकं तथा नासापुटौ स्मृतौ। कर्णस्थितां गुलमलं तु कुमारं तत्रैव च॥ गोजाद्यांगुलिका कार्या तत्समा कुंडलेषिका। द्व्यं
गुलौ तु स्मृतौ शेषौ वार्या तौ च चतुरंगुलौ॥ चतुर्दशांगुलः शीर्षो द्वात्रिंशत्परिणाहतः॥ एकविंशः स्मृता ग्रीवा विस्तारात्स्या
द्दशांगुला॥ [illegible] हृदयं नाभिमध्यं तत् द्वादशांगुलं॥ [illegible] चतुर्विंशत्तानुना च चतुरंगुलं॥ द्वादशांगुलकं पादौ विस्ता
रेण षडंगुलं॥ अंगुष्ठं अंगुलं दैर्घ्यं पंचैव परिणाहतः॥ शेषाः पादानुसारेण कर्तव्याः शुभलक्षणाः॥ अंगुष्ठेन नखाण
स्यात् अर्धमंगुलविस्तृतं॥ शेषाणामनुसारेण नखमानं प्रकल्पयेत्॥ जंघाग्रे परिधिर्ज्ञेयो अंगुलानि चतुर्दश॥
[illegible] तद्द्विगुणं प्रोक्तो कटिस्तद्द्विगुणा स्मृताः॥ अंगुलं तु भवेन्नाभिर्वेधगांभीर्ययोरपि॥ नाभिमध्याच्च [illegible]
संयुता॥ षोडशस्तनयोर्मध्यं कक्षा द्व्यंर्धं षडंगुलं॥ अष्टांगुलौ स्मृतौ स्कंधौ बाहू द्वादशयुताः॥ बाहुमूले च २४५
ग्रास्याद्धस्ताग्रे द्वादश स्मृताः॥ षडंगुलं हस्ततलं सप्तदैर्घ्येण च स्मृतं॥ पंचांगुला भवेन्मध्या तर्जन्यर्धांगुलान्विताः।
अनामिका च तत्तुल्या कनिष्ठा त्र्यंगुला स्मृता। कर्णपाया च कर्तव्या द्विपर्वांगुष्ठकः स्मृतः। त्रिपर्वांगुलयः शाखास्ता

पर्वार्धविस्तृताः॥ देशवेषायुधा ... कारयेत्॥ सुरूपा लक्षणोपेता प्रतिमा वृद्धिदा भवेत्॥ इति। अथ प्रतिमा
नां विशेषलक्षणमाह॥ दशरथतनयो रामो बलिश्च वैरोचनिः शतविंशं॥ द्वादशहान्याः शेषाः प्रवरसमन्यूनपरिमाणाः॥
दशरथतनयो दशरथात्मजो रामः वैरोचनिः विरोचनपुत्रश्च बलिः शतं विंशत्यधिकं शतमंगुलानां कार्यमित्यर्थः॥ शेषा
अन्याः प्रतिमा द्वादशहान्या द्वादशकहानितः प्रवरसमन्यूनपरिमाणा भवंति॥ विंशत्यधिकादंगुलशताद् द्वादशांगुलान्यपा
स्याष्टाधिकं शतमंगुलान्यासां प्रतिमा प्रवराप्रमाणा भवति॥ ततोपि द्वादशकमपास्य षण्णवत्यंगुलानि समा मध्यमा भ
वंति॥ ततोपि द्वादशकमपास्य चतुरशीत्यंगुलानि न्यूनपरिमाणा भवति॥ अधुना विष्णोः स्वरूपं कथयन्नाह॥ कार्योष्ट
भुजो भगवांश्चतुर्भुजो द्विभुज एव वा विष्णुः। श्रीवत्सांकितवक्षाः कौस्तुभमणिभूषितोरस्कः॥ अतसीकुसुमश्यामः पीतां
बरनिवसनः प्रसन्नमुखः। कुंडलकिरीटधारी पीनगलोरःस्थलांसभुजः॥ खड्गगदाशरपाणिर्दक्षिणतः शांतिदश्चतुर्थकरः
॥ वामकरेषु कार्मुकखेटकचक्राणि शंखश्च॥ अथ च चतुर्भुजमिच्छति शांतिद एको गदाधरश्चान्यः। दक्षिणपार्श्वे त्वेवं वामे शं
खश्च चक्रं च॥ द्विभुजस्य च शांतिकरो दक्षिणहस्तोपरश्च शंखधरः॥ एवं विष्णोः प्रतिमाः कर्तव्याः। भूतिमिच्छद्भिः कार्यो
ष्टभुजो भगवानिति। भगवान् विष्णुरष्टभुजः कार्यः। चतुर्भुजो वा द्विभुज एव वा कार्यः। श्रीवत्सांकितवक्षाः
श्रीवत्सनरोमावर्तेनांकितं चिह्नितं वक्षः उरो यस्य। कौस्तुभाख्यमणिना भूषितमलंकृतमुरो वक्षःस्थलं यस्य। अतस
सीकुसुमेति। अतसीकुसुमवत् श्यामो कृष्णः। पीतांबरवसनः पीतान्यंबराणि वसनं परिधानं यस्य प्रसन्नमुखः सौम्यव
दनः। कुंडलं कर्णाभरणं किरीटं मुकुटं ते धारयति। तच्छीलः पीनगलः पीवरकंठः मांसल इत्यर्थः। तथा पीनोरःस्थलः पी
नांसः पीनस्कंधः पीनभुजः पीनबाहुः खड्गगदाशरपाणिरिति। दक्षिणतो दक्षिणभागे ष्टभुजस्य येन चत्वारः पा
णयो हस्तास्ते ष्वेकस्मिन् खड्गो नंदकः द्वितीये गदा कौमोदकी। तृतीये शरः चतुर्थः शांतिदः प्रसृताभिमुख ऊर्ध्वांगुलिः शां
तिदः करः वामकरेषु वामहस्तेषु च। कार्मुकं धनुः खेटकं फलकं चक्रं शंखश्च॥ अथ च चतुर्भुजमिति। अथ शब्दो विकल्पे अनुक्ता
विशेषघातकः। यदि चतुर्भुजं कर्तुमिच्छति। तदा दक्षिणपार्श्वे एकः शांतिदः करोन्यो द्वितीयो गदाधरः। वामपार्श्वे
भुजद्वयेप्येकस्मिन् शंखो द्वितीये चक्रं। द्विभुजस्येति द्विभुजस्य चास्य दक्षिणहस्तः शांतिदः अपरो वामः शंखधरः।

वा॰ सं॰ एवमनेनप्रकारेणभूमिमिच्छद्भिसमृद्धिः वांछद्भिः विभोर्देवप्रतिमाकार्या॥ अथ हलधरस्यलक्षणमाह॥ बलदेवोहलपा
णिर्मदविभ्रमलोचनश्चकर्तव्यः॥ बिभ्रत्कुंडलमेकंशंखेंदुमृणालगौरतनुः॥ बलदेवोबलभद्रोहलपाणिर्मदनविभ्रमलोच
नः॥ मदिरापानेनयोसौमदस्तेनचलितेलोचनेनेत्रेयस्य॥ मलथाभूतः कार्यः॥ एकंकुंडलंकर्णाभरणंबिभ्रद्धारयन्॥ शं
२४६ खेंदुमृणालगौरतनुः शंखप्रसिद्धः इंदुश्चंद्रः मृणालंबिसंतद्वद्गौरश्वेतातनुर्यस्यासतथाभूतः॥ अथैकानंशायाल
क्षणमाह॥ एकानंशाकार्यादेवीबलदेवकृष्णयोर्मध्ये॥ कटिसंस्थितवामकरासरोजमितरेणचोद्वहंती॥ कुर्याच्चतु
र्भुजायाः वामकराभ्यांसपुस्तकंकमलं॥ द्वाभ्यांदक्षिणपार्श्वेवरमर्थिषुअक्षसूत्रंच॥ वामेथाष्टभुजायाः कमंडलुश्चाप
मंबुजंशास्त्रं॥ वरशरदर्पणयुक्ताःसव्यभुजासाक्षसूत्राश्च॥ एकानंशेतिबलदेवकृष्णयोर्हलपाणिवासुदेवयोर्मध्ये
एकानंशाभिधानादेवीदेवतासदृशी॥ कटिसंस्थितवामकरा॥ वामकरोवामहस्तः कटिसंस्थितोयस्याः इतरेणदक्षिणे
नसरोजंपद्मंउद्वहंती॥ याकुर्यादिति॥ अथचतुर्भुजाक्रियते॥ तदातस्याः वामकराभ्यां एकस्मिन्पुस्तकद्वितीयेकमलं
पद्मंकार्यं॥ दक्षिणभागद्वयोः करयोः एकोर्थिभ्योवरदोद्वितीयेक्षसूत्रंवा॥ वामेष्टभुजायाइति॥ अथाष्टभुजाक्रियते॥ तदा
तस्यावामहस्तचतुष्केएकस्मिन्कमंडलुर्द्वितीयेचापं॥ तृतीयेपद्मं॥ चतुर्थेशास्त्रंपुस्तकं॥ सव्यदक्षिणभागेएकोह
स्तोवरदोद्वितीयेशरस्तृतीयेदर्पणमादर्शश्चतुर्थेक्षसूत्रमिति॥ अथसांबप्रद्युम्नयोर्लक्षणमाह॥ सांबश्चगदाह
स्तः प्रद्युम्नश्चापभृत्सुरूपश्च॥ अनयोःस्त्रियौचकार्येखेटकनिस्त्रिंशधारिण्यौ॥ सांबोहिभुजागदाहस्तः कार्यः॥ प्र
द्युम्नश्चापभृद्धनुर्हस्तः सुरूपः शोभनरूपश्च॥ अनयोर्द्वयोः सांबप्रद्युम्नयोःस्त्रियौकार्ये॥ कीदृशेखेटकनि
स्त्रिंशधारिण्यौ॥ खेटकंफलकंनिस्त्रिंशंखड्गं॥ तौधारयंत्यौ॥ अथब्रह्मकार्तिकेययोर्लक्षणमाह॥ ब्रह्माकमंडलुकर
श्चतुर्मुखःपंकजासनस्थश्च॥ स्कंदः कुमाररूपः शक्तिधरोबर्हिकेतुश्च॥ ब्रह्मापितामहः कमंडलुकरः कमंड
लुहस्तः चतुर्मुखः चतुर्वक्त्रः पंकजासनस्थश्च॥ पंकजेपद्मासनेस्थितः॥ स्कंदः कार्तिकेयः कुमाररूपोबालरूपः श २४६
क्तिधरः शक्तिरायुधविशेषस्तंधारयति॥ बर्हिकेतुर्मयूरध्वजः॥ अथेंद्रलक्षणमाह॥ शुक्लश्चतुर्विषाणोद्वि
पोमहेंद्रस्यवज्रपाणित्वं॥ तिर्यक्ललाटसंस्थंतृतीयमपिलोचनंचिन्हं॥ महेंद्रस्यद्विपोहस्तीशुक्लश्वेतवर्णश्चतु

र्विषाणश्चतुर्दंतः कार्यः॥ वज्रपाणित्वंवज्रमायुधविशेषस्तत्पाणौहस्तेयस्यासौवज्रपाणिस्तस्यवज्रपाणित्वं॥ तृती
यलोचनंत्रितीयनेत्रंतिर्यक्ललाटसंस्थंतिर्यक्ललाटस्थंतच्चिन्हंपार्श्वकार्यं॥ अथशंभोर्लक्षणमाह॥ शंभो
शिरसींदुकलावृषध्वजोक्षिचतृतीयमपिचोर्ध्वं॥ शूलंधनुःपिनाकंवामार्धेवागिरिसुतार्धं॥ शंभोःशिवस्यशिरसि
मूर्ध्नि इंदुकलाकार्या॥ चंद्र इत्यर्थः॥ वृषध्वजः वृषभः ध्वजचिन्हंयस्य ऊर्ध्वमुखस्थितं तृतीयमप्यक्षिनेत्रंकार्यं॥ शूलंत्रि
शूलमेकस्मिन्॥ पाणौधनुश्चापंतदेवपिनाख्यकंतामन्यस्मिन्हस्ते॥ वामार्धेवागिरिसुतागौरीसेवार्धेवाकार्या॥ अर्धं
गौरीश्वरमित्यर्थः॥ अथबुद्धस्यलक्षणमाह॥ पद्मांकितकरचरणः प्रसन्नमूर्तिः सुनीचकेशश्च॥ पद्मासनोपविष्टःपिते
वज्जगतोभवतिबुद्धः॥ बुद्धः पद्मांकितकरचरणः कार्यः॥ करौहस्तौचरणौपादौकमलाचिन्हितौयस्यांकितौयस्यलांछितावित्या
त्यर्थः॥ प्रसन्नइत्यर्थः॥ सौम्यदेहः सुनीचकेशश्च॥ सुनीचाः स्तोकाः केशाः कचायस्यकुंचितकुंतलकेशश्चेतिपठंति॥
कुंतला॥ अर्तिनियमतापद्मासनेउपविष्टोस्थितः पितेवजगतः जगतोविश्वस्यपितेवजनकइव॥ शांतिधीरइत्य
र्थः॥ अथार्हतांदेवस्यलक्षणमाह॥ आजानुलंबबाहुः श्रीवत्सांकः प्रशांतमूर्तिश्च॥ दिग्वासास्तरुणोरूपवां
श्चकार्योर्हतांदेवः॥ अर्हतांदेवोजिनआजानुलंबबाहुर्जानुसंप्राप्तहस्तः॥ श्रीवत्सांकः श्रीवत्सः अंकेयस्य॥ प्र
शांतमूर्तिर्जितेंद्रियः प्रहसितवदनः दिग्वासानग्नः तरुणोयौवनोपेतः रूपवान्शोभनरूपः॥ अथसूर्य
स्यलक्षणमाह॥ नासाललाटजंघोरुवक्षांसियोन्नतानिरवेः॥ कुर्यादुदीच्यवेषंगूढंपादादुरोयावत्॥ बिभ्रा
णः स्वकररुहेबाहुभ्यांपंकजमुकुटधारी॥ कुंडलभूषितवदनः प्रलंबहारोवियद्गवृतः॥ कमलोदरद्युतिमुखः
कंचुकगुप्तः स्मितप्रसन्नमुखः॥ रत्नोज्वलप्रभामंडलश्चकर्तुः शुभकरोर्कः॥ नासाललाटेति॥ एवंसूर्यस्यनासानासि
का॥ ललाटंमुखाग्रं॥ जंघा॥ ऊरु॥ गंडौमुखगंडौवक्षः उरः प्रदेशः॥ एतान्युन्नतानिउच्चानि॥ उदीच्यां॥ वेषउत्तरापथ
वेषंकुर्यात्॥ पादाप्रभृतिउत्तरोवक्षोयावद्गूढंचोलकगुप्तंबिभ्राणइति॥ स्वकररुहेनिजेनखेबाहुभ्यांभुजाभ्यांपं
कजेकमलेबिभ्राणः सद्वृत्तनकस्यकरलग्नत्वात्सपत्रभागस्यबाहुलग्नत्वाच्चबिभ्राणः॥ मुकुटधारीमुकुटंमौलिं
संधारयति॥ कुंडलभूषितवदनः॥ कुंडलाभ्यांकर्णाभरणाभ्यांभूषितमलंकृतंवदनंमुखंयस्य॥ प्रलंबहारः

MEMORIAL

हारेण मुक्ताहारः प्रलंबो यस्याविद्धं गात्रं कर्णौ विद्धौ गातारसमनंतेन च संयुक्तः। कमलोदरद्युतिमुखगति। कमलस्य पंकजस्योदरः
मध्यं तद्वद्युतिः कांतिर्मुखे यस्य। कंचुकगूढः कंचुकेन निगूढः। तेन गात्रमाच्छादितः। स्मितप्रसन्नमुखः स्मितं प्रहसितं प्रसन्नं सौ
म्यं मुखं वक्त्रं यस्य। रत्नोज्ज्वलप्रभामंडलश्चेति मणिविशेषैरुज्ज्वलो दीप्यमानाः प्रभामंडलकांति मंडलं यस्य। एवंविधोर्कः
सूर्यः कर्तव्यः करः शुभदः॥ अधुना विशेषलक्षणमाह॥ सौम्या तु हस्तमात्रा वसुदा हस्तद्वयोच्छ्रिता प्रमिता। क्षेमसुभि
क्षाय भवेत्त्रिचतुर्हस्तप्रमाणा वा। नृपभयमत्यंगायां हीनांगायामकल्यता कर्तुः। शातोदर्यां क्षुद्भयमर्थविनाशः कृशां
गायां मरणं तु सक्षतायां शस्त्रनिपातेन निर्दिशेत्कर्तुः। वामावनता पत्नीं दक्षिणावनताहिनस्त्यायुः। अंधत्वमूर्ध्वदृष्ट्या
करोति चिंतामधोमुखी दृष्टिः॥ सर्वप्रतिमास्वेवं शुभाशुभं भास्करोक्तसमं। सौम्या तु हस्तमात्रेति। हस्तमात्रा हस्तप्रमाणा ह
र्यप्रतिमा सौम्या शुभा वसुदा स्यात्। हस्तद्वयोच्छ्रिता वसुधा प्रतिमा भवेत्। यात्रिहस्तप्रमाणा सा क्षेमाय भवति। या तु चतुर्हस्त
प्रमाणा सा सुभिक्षाय भावयेत॥ अत्यंगायामधिकायां नृपभयं राजभीतिर्भवेत॥ हीनांगायां न्यूनावयवायां कर्तुरकल्य
ताऽनारोग्यं शातोदर्यां तनूदरायां क्षुद्भयं भवेत्॥ कृशांगायां दुर्बलशरीरायामर्थविनाशो वित्तक्षयः मरणमिति।
सक्षतायां व्रणायुक्तायां कर्तुः शस्त्रनिपातेन मरणं निर्दिशेद्वदेत्॥ वामेन वामभागेनावनता प्रतिमा कर्तुः पत्नीं भार्यां हिन
स्ति मारयति। दक्षिणावनता आयुर्जीवितं हंति। आयुषः क्षयं करोति। अंधत्वमूर्ध्वदृष्ट्या मिति॥ ऊर्ध्वदृष्ट्या प्रतिमांध
त्वं नेत्रनाशं करोति। अधोमुखी दृष्टिश्चिंतनाशं करोति। एवं भास्करोक्तकथितसमं सर्वत्र स्थितं तुल्यं शुभाशुभं पश्चि
मे स्थितासर्वासु प्रतिमासु ज्ञातव्यं तदा ज्ञातव्या। अथ लिंगस्य लक्षणमाह॥ लिंगस्य वृत्तपरिधिं दैर्घ्येणासूत्र्य तत्त्रिधा
विभजेत्। मूले तच्चतुरस्रं मध्ये त्वष्टाश्रितवृत्तमतः॥ चतुरस्रमवनिखाते मध्यं कार्यं तु पिंडिकाश्वभ्रे। दृश्योच्छ्रायेण समासम
ततः पिंडिकाश्वभ्रात्। लिंगस्य वृत्तभागस्य परिधिः परिणाहः समं मध्ये परिधिं धनत्रसूत्रं दैर्घ्येण दीर्घत्वेना
सूत्र्य मित्वा तत्प्रमाणं तल्लिंगदैर्घ्यं त्रिधा विभजेत् त्रिभागं कुर्यात्। ततो लिंगस्य मूले योऽसौ त्रिभागस्तच्चतुरस्रं कार्यं। मध्येऽष्टा
श्रि कुर्यात्। अतः परं तृतीयभागस्तं परिवर्तुलं कुर्यात्। चतुरस्रमिति। तत्र चतुरस्रं यद्भागं तदवनिखाते भूखाते का
र्यं। योऽष्टाश्रिस्तं पिंडिकाश्वभ्रे पीठगर्भे क्षिपेत्। श्वभ्रात दर्शनयोग्यस्तु मंततः सर्वांसु दिक्षु पिंडिकातः दृश्यो

च्छ्रायेण समा कार्या। दृश्यभागस्य परिवर्तुलस्य योऽसावुच्छ्रायस्तत्प्रमाणं तदुच्छ्रं भवति। यावत्प्रमाणं वृत्तभागस्योर्ध्वं तावत्प्र
माणं समंततः पिंडिका पृथुत्वं कार्यमिति। अन्यदप्याह॥ कृशदीर्घं देशघ्नं पार्श्वविहीनं पुरस्य नाशाय। यस्य क्षतं भवेन्म
स्तके विनाशाय तल्लिंगं। यल्लिंगं कृशं दुर्बलं दीर्घं महत्तद्देशघ्नं देशं हंति। यत्पार्श्वैर्वाविहीनं तत्पुरस्य नाशाय भवति। यस्य
मस्तके शिरसि क्षतं छिन्नं भवेत्स्यात्॥ तल्लिंगं विनाशाय कर्तुरेव भवति॥ अथ मातृगणादीनां लक्षणमाह॥ मातृगणाः क
र्तव्याः स्वनामदेवानुरूपकृतचिन्हाः। रेवंतोऽश्वारूढो मृगयाक्रीडादिपरिवारः। तस्य योऽयः परिवारः समृगयाक्रीडायुक्तः॥
आदिग्रहणादश्ववाहन तत्परीक्षणं तद्गवेषणादि च॥ अथ यमवरुणकुबेराणां लक्षणमाह॥ दंडी यमो महिषगो हं
सारूढश्च पाशभृद्वरुणः। नरवाहनः कुबेरो वामकिरीटी बृहत्कुक्षिः। यमः प्रेतपतिः दंडी दंडपाणिर्महिषारूढश्च कार्यः
वरुणो अपांपतिः हंसारूढः पाशभृत्पाशपाणिः कार्यः। कुबेरो धनदः नरवाहनो मनुष्यवाहनो नरवाहनमिति। राजि
त्यर्थः। वामकिरीटी वामभागे किरीटमुकुटो यस्य बृहत्कुक्षिः कार्यः॥ अत्र प्रतिमालक्षणे देवानां वाहनलक्षणमा
चार्येणोक्तं तेषां लोकप्रसिद्धा यथा शास्त्रं भाष्यति। यथा तथोक्तप्रतिकार्या॥ कश्यपेन तु स्वांगुलप्रमाणेन त्या
हिना। यदुक्तं। तत्सर्वं कार्यमनुक्तं लोकतो दृष्ट्वा कार्यमिति॥ तथा च कश्यपः॥ एकदंष्ट्रो गजमुखश्चतुर्बाहुर्विनायकः॥
ब्रह्मा चतुर्मुखो दंडी कृष्णाजिनकमंडलुः॥ विष्णुश्चतुर्भुजः शार्ङ्गी शंखचक्रगदाधरः॥ श्रीवत्सांकः पीतवासा वाराहो
नारसिंहकः॥ ईश्वरो जटिलः त्र्यक्षो वृषचंद्रांकभूषणः॥ उमार्धांगपर्वतो चैव तु निवासः पिनाकधृत॥ चंडिका
दशभुजा सर्वभद्रणान्विता॥ अष्टासिंहरथा कन्या महिषासुरमर्दिनी॥ मयूरवाहनः स्कंदः शक्तिकुंडलधारकः॥
सौम्यः तु विक्रांतो देवसेनापतिः स्मृतः॥ आदित्यः तरुणः स्वर्णकवचांबरधृक्तथा॥ तेजस्वी पद्मकरः पद्म
श्चाकृतिदिवान॥ ऐरावतस्थस्तु देवेंद्रः श्वेतवर्णो महागजः॥ तदारूढो महेंद्रस्तु वज्रहस्तो बलाधिकः॥ नीलकांत्ति
वर्णश्च तिर्यक्तस्यापि लोचनं॥ एवं देवगणाः सर्वे सायुधाभरणान्विताः॥ कर्तव्याः स्वपरिपूर्णाः शुभल
क्षणाः॥ हस्तमात्रा भवेत्सौम्या द्विहस्ता धनदायिनी॥ सुभिक्षक्षेमदा पुण्या त्रिहस्ता च चतुःकरा॥ वेदकंपकृत्त
हीना कृशांगा दुःखनाशिनी॥ भरणं सक्षितायां स्यादतिदीर्घा विनाशिनी॥ वामनताद्दक्षिणायामायुर्वृद्धि

वारा॰ सं॰ णनता। ऊर्ध्वदृष्टिश्च सुरेशगीतो दाम्भाद् अधोमुखी। सुरूपा सुप्रभा कान्त्या मनोऽभिरामभूषिताः। सायुधैश्च समायुक्ता कर्त
व्या प्रतिमाः शुभाः॥ ॥ इति श्रीभट्टोत्पलविरचितायां संहितावृत्तौ प्रतिमालक्षणं नामाष्टपंचाशोऽध्यायः॥५८॥
२४८ ॥ ॥ अथ वनसंप्रवेशो व्याख्यायते॥ तत्रादौ वनविधानमाह॥ कर्तुरनुकूलदिवसे दैवज्ञविदर्शिते शुभनिमित्ते
॥ मंगलशकुनैः प्राङ्निशि केवलं वनसंप्रवेशः स्यात्कार्यः॥ प्रतिमाकर्तुः अनुकूलदिवसे शुभावहे सशुभेन नक्षत्रे च दैवज्ञविदर्शित
शुभनिमित्ते दैवज्ञो ज्योतिर्विदा यस्तद्विदर्शितं ख्यापितं शुभं निमित्तं शकुनमुहूर्तादिकं कस्मिन् शुभनिमित्ते प्राङ्नि
शि केवलं मंगलशकुनैर्वनप्रवेशः स्याद्भवेत्॥ वनेऽरण्ये वृक्षच्छेदे प्रवेशः प्रतिमार्थं कार्य इति॥ अधुना वर्ज्यानवृ
क्षानाह॥ पितृवनमार्गसुरालयवल्मीकोद्यानतापसाश्रमजाः। चैत्यसरित्संगमसंभवाश्च घटतोयसिक्ताश्च॥ कु
ब्जानुजातवल्लीनिपीडिता वज्रमारुतोपहताः। स्वपतितहस्तिनिपीडितशुष्काग्निप्लुष्टमधुनिलयाः॥ तरवो वर्जयित
व्याः शुभदाः स्युः स्निग्धपत्रकुसुमफलाः। अभिमतवृक्षं गत्वा कुर्यात्पूजां सबलिपुष्पां॥ पितृवनमार्गसुरालये
ष्वं विधास्तरवो वृक्षा वर्जयितव्याः परिहर्तव्याः कीदृशाः पितृवनं श्मशानं तत्र ये जाताः॥ मार्गः पंथाः सुराल
यो देवगृहं॥ वल्मीको वल्मीकं तेन स्वसपा। उद्यानमुपवनं। एतेषु ये जाता वृक्षाः। तथा चैत्ये प्रस्थानवृक्षः सरि
तो नद्यः तासां संगमो मेलकः स्तत्र येषां वृक्षाणां संभव उत्पत्तिर्घटतोयसिक्ताश्च घटजलेन ये संसिक्तास्ते न वर्ज
नीयास्तेषां च येऽपि नतादृशा वर्द्धिताः॥ कुब्जानुजातवल्लीति। कुब्जः स्पष्टः अनुजातो वृक्षस्यानुपश्चाद्यो जा
तो जातः उत्पन्नः तेन यो निपीडितः येन वृक्षो वल्लीभिर्निपीडितो वज्रमशनिर्मारुतो वायुस्ताभ्यां येऽप्युपहता भग्नाः
यश्च स्वपतितः स्वयमेव निपतितः। हस्तिना गजेन यः पीडितो भग्नः शुष्कोऽपगतरसः अग्निना प्लुष्टो दग्धः मधु
निलयः भ्रमराणामाश्रयः एवमेते यथोक्तास्तरवो वर्ज्याः अन्ये परिशिष्टाः शुभदाः ये च स्निग्धपत्राः स्निग्धकु
सुमाः कुसुमानि पुष्पाणि स्निग्धानि येषां स्निग्धफलाश्च शुभदाः॥ ततोऽभिमतमभीष्टं वृक्षं तरुं गत्वा तस्य सबलिपु २४८
ष्पां बलिभिरुपहारैः पुष्पैः कुसुमैः सहितां पूजामर्चां कुर्यात्। अथ वर्णक्रमेण योग्यान्वृक्षानाह॥ सुरदारुचंदन
शमीमधूकतरवः शुभा द्विजातीनां। क्षत्रस्यारिष्टाश्वत्थखदिरबिल्वा विवृद्धिकराः॥ वैश्यानां जीवकखदिरसिंधु

स्यंदनाश्च शुभफलदाः। तिंदुककेसरसर्जार्जुनाम्रशालाश्च शूद्राणां॥ सुरदारु चंदन शमीति सुरदारु देवदारु चंदनं म
लयजं शमी प्रसिद्धा। मधूकः प्रसिद्धः। एते तरवो वृक्षाः प्रतिमार्थं देवगृहार्थं वा द्विजातीनां विप्रादीनां शुभदाः अ
रिष्टः अश्वत्थः खदिरः बिल्वः एते वृक्षाः क्षत्रस्य क्षत्रियस्य विवृद्धिकराः जीवकः खदिरः सिंधुकः स्यंदनः एते वृक्षा
वैश्यानां शुभफलदाः। तिंदुकः केसरः सर्जः आम्रशालः एते तरवः शूद्राणां शुभफलदाः। अरिष्टाश्वत्थखदिर
बिल्वाः क्षत्रियजातिषु तथा च वसिष्ठः॥ सुरदारुः शमीवृक्षो मधूकश्चंदनं तथा। प्रतिमार्थं ब्राह्मणानां एते योग्याः शु
भावहाः। अरिष्टाश्वत्थखदिरबिल्वाः क्षत्रियजातिषु॥ जीवकः खदिरश्चैव तिंदुकः स्यंदनं तथा। वैश्यानां शुभदाः
प्रोक्तास्तिंदुकाः केसरस्तथा॥ सर्जार्जुनाम्रशालाश्च शूद्राणां शुभदाः स्मृताः॥ अत्रैव विशेषमाह॥ लिंगं वा प्रतिमा वा
द्रुमवल्लभ्या यथादिशं यस्मात्॥ तस्माच्चिह्नयितव्या दिशो द्रुमस्योर्ध्वमथवाधः॥ लिंगमिति। लिंगं वा प्रतिमा वा य
स्माद्द्रुमवृक्षवद्यथादिशं लभ्या। अयमर्थः द्रुमस्य यः पूर्वाभिमुखो भागः स एव प्रतिमायाः अधोभागः कार्य
ः। वृक्षस्य ऊर्ध्वभागः सोऽपि प्रतिमाया ऊर्ध्वभागः कार्यः। तस्माद्धेतोर्द्रुमस्य वृक्षस्य दिश आशाश्चिह्नयितव्या
ः। एवमूर्ध्वाधसोभागावपि चिह्नयितव्यौ॥ तथा च वसिष्ठः॥ वृक्षवत्प्रतिमा कार्या प्राग्भागाद्युपलक्षिता॥ पादा
पादपु कर्तव्या ग्रीवमूर्धनि कारयेत॥ अथ वृक्षच्छेदनविधानमाह॥ परमान्नमोदकौदनदधिपललोल्लो
पिकादिभिर्भक्ष्यैः। मद्यैः कुसुमैर्धूपैर्गन्धैश्च तरुं समभ्यर्च्य॥ सुरपितृपिशाचराक्षसभुजगासुरगणविनाय
काद्यानां। कृत्वा रात्रौ वृक्षं संस्पृष्ट्वा च ब्रूयात्॥ परमान्नेति। परमान्नं पायसं॥ मोदकः लड्डुकाः ओदनं भ
क्तं। दधिः क्षीरविकारः। पललं धर्षितास्तिलकाः उल्लोपिकाः प्रसिद्धाः। आदिग्रहणाद्दधिभक्तं वर्काररूप
प्रभृतिभिः भक्ष्यैः पेयैश्चोष्यैः कुसुमैः पुष्पैर्गन्धैर्गन्धद्रव्यैस्तरुं वृक्षं संपूज्य। सुरपितृपिशाचेति। सुरा देवाः पि
तरो देवा योनयः पिशाचा देवयोनय एव राक्षसाः। नक्तंचरा भुजगा नागाः असुरा दैत्यागणाः प्रथमविनायका
विघ्ना आदिग्रहणात् प्रेतसिद्धगन्धर्वा एतेषां रात्रौ निशि पूजामर्चां कृत्वा तरुं पाणिना॥ तेन संस्पृष्ट्वा च वदं
ब्रूयात्। किं तदित्याह॥ अर्चार्थममुकस्य त्वं देवस्य परिकल्पितो। न मस्ते वृक्ष पूजेयं विधिवत्संप्रगृह्यतां।

यानीह भूतानि वसंति तानि बलिं गृहीत्वा विधिवत्प्रयुक्तं॥ अन्यत्र वासं परिकल्पयंतु क्षमंतु तान्यद्य नमोऽस्तु तेभ्यः॥ अर्चा प्रतिमेति॥
दृक्षममुकस्यामुकस्यनाम्नो देवस्य सुरस्यार्च्चार्थं पूजार्थं ... विज्ञापितः। नमस्ते भवतु। नमस्कारो भवतु॥ इयं प्रता
मयापनीतानां विधिवद्विधानेन संप्रयुक्ता॥ यानीह भूतानीति। इह अस्मिन्वृक्षे यानि भूतानि वसंति तानि मया बलिमुपहारं विधि
प्रयुक्तं विधानेनार्पितं॥ गृहीत्वा संप्रदाय अस्मिन्वृक्षे वासं परिकल्पयंतु॥ तान्यद्य क्षमंतु॥ शांतिं कुर्वंतु॥ तेभ्यो भूतेभ्यो
नमोऽस्तु नमस्कारो भवतु॥ ततः किं कुर्यादित्याह॥ वृक्षं प्रभाते सलिलेन सिक्त्वा पूर्वोत्तरस्यां दिशि संनिकृत्य। मध्वाज्यदि
ग्धेन कुठारकेण प्रदक्षिणं शेषमतो निहन्यात्॥ प्रभाते प्रातः वृक्षं तं सलिलेन जलेन सिक्त्वा पूर्वोत्तरस्यामैशान्यां
दिशि प्रथमं सिक्त्वा कुठारकेण परशुना मध्वा माक्षिकेनाज्येन घृतेन दिग्धेनोपलिप्तेन प्रथमं समैशान्यां संनिकृत्य छित्वा त
तः शेषं प्रदक्षिणेन पूर्वाग्नेययाम्यनैर्ऋतपश्चिमवायव्योत्तरासु दिक्षु छिंद्यात्॥ ॥ अथ पतितस्य तरोर्लक्ष
णमाह॥ पूर्वेण पूर्वोत्तरतोऽथवोदक्पतेद्यदा वृद्धिकरस्तदा स्यात्॥ आग्नेयकोणात्क्रमशोऽग्निदाहो रुग्रोगरोगास्तुर
गक्षयश्च॥ पूर्वेण पूर्वस्यां दिशि पूर्वोत्तरतोऽथवोदगुत्तरस्यां दिशि यदा पतेत् तदा वृद्धिकरः स्याद्भवेत्॥ आग्नेयकोण
प्रभृतिक्रमेण यदा पतति तदैतानि क्रमेण फलानि॥ तद्यथा॥ आग्नेयकोणे यदि पतति तदाग्निदाहो भवति। दक्षि
णतो रुग्रोगो भवति। नैर्ऋत्ये रोगश्च॥ पश्चिमे पतितो वायव्येऽपि तुरगक्षयोऽश्वविनाशः॥ अथ यन्नोक्तं तदन्यत्रोक्तमि
त्याह॥ यन्नोक्तमस्मिन्वनसंप्रवेशे निपातविच्छेदनवृक्षगर्भाः॥ इंद्रध्वजे वास्तुनि च प्रदिष्टाः पूर्वं मया तेऽत्र त
थैव योज्याः॥ अस्मिन्वनप्रवेशे यन्नोक्तं यन्न कथितं किं तन्निपातविच्छेदनवृक्षगर्भाः निपातः प्रथमं वृक्षस्य। प
तनं पतनयनं विध्वंसपतनमनाकुंचितं च पूर्वादिकामवलग्नं चान्यतरोर्विपरीतमतस्तत्पातः। विच्छेदनं यथा
परशोर्जर्जरशब्देन दृष्टा स्निग्धा घनश्च सहितेति। तथा। वृक्षगर्भापातेन मंडलो तरोर्नाडीकोऽन्मध्ये गोधा
मित्यादि॥ एते निपातविच्छेदनवृक्षगर्भाः ते मया पूर्वमादाविंद्रध्वजे वास्तुनि च प्रतिष्ठाः उक्ताः। ते चात्रास्मिन् २५०
वनप्रवेशे तथैवानेनैव प्रकारेण योज्या योजनीयाः॥ ॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ वनप्र
वेशो नाम सप्तपंचाशोऽध्यायः॥ ५७॥ ॥ छ ॥ ॥ अथ प्रतिमाप्रतिष्ठापनं व्याख्यायते। तत्रादाव

वाधिवासनमंडपस्य लक्षणमाह॥ दिशि याम्यायां कुर्यादधिवासनमंडपं बुधः। प्राग्वा तोरणचतुष्टययुतं शस्तद्रुमपल्ल
वच्छन्नं॥ १॥ पूर्वे भागे चित्राः स्रजः पताका मंडपस्योक्ताः। आग्नेय्यां दिशि रक्ताः कृष्णाः स्युर्याम्यनैर्ऋत्योः॥ २॥ श्वेता दिश्यपरस्यां
वायव्यायां पांडुरा एव॥ चित्राश्चोत्तरपार्श्वे पीताः पूर्वोत्तरे कार्याः॥ दिशि याम्यायामिति। अधिवासनसंस्कारविशेषः पंडिता
याम्यायां दक्षिणस्यां दिशि प्राक्पूर्वस्यां वाधिवासनमंडपं कुर्यात्॥ केचित्सौम्यायामिति पठंत्युत्तरस्यां। तं च मंडपं तो
रणचतुष्टययुतं॥ चतुर्दिशं चतुर्भिः तोरणैर्युक्तं॥ शस्तानां प्रशस्तानां द्रुमाणां वृक्षाणां क्षीरकाणां पल्लवैः पत्रैश्छन्न
माच्छादितं कुर्यात्॥ पूर्वे भाग इति। मंडपस्य पूर्वे भागे पूर्वस्यां दिशि स्रजो मालाः पताकाश्च चित्रवर्णा नानाविधचित्र
वर्णा उक्ताः कथिताः। आग्नेय्यां पूर्वदक्षिणस्यां दिशि स्रजः पताकाश्च रक्ता लोहिताः कार्याः। याम्यनैर्ऋत्योश्च कृष्णा
स्युर्भवेयुः॥ अपरस्यां पश्चिमायां दिशि श्वेताः शुक्लवर्णाः कार्याः। वायव्यां पांडुरा ईषच्छुक्लाः कार्याः। एवमुत्तरपा
र्श्वे उत्तरस्यां दिशि चित्रा नानावर्णाः पूर्वोत्तरे ऐशान्यां स्रजः पताकाश्च पीतवर्णाः कार्या इति। अथ प्रतिमायाः प्रवि
भागेन फलमाह॥ आयुःश्रीबलजयदा दारुमयी मृण्मयी तथा प्रतिमा। लोकहिताय मणिमयी सौवर्णी पुष्टिदा भ
वति। रजतमयी कीर्तिं नानात यांति नांदिपुण्याहैर्वेदघोषैः पुष्टाश्चोदुंबरवाति। प्लक्ष अश्वत्थ उदुंबरशि
रीषवटः एते सर्वे वृक्षविशेषाः एषां संभवैः कषायजलैः त्वक्पल्लवक्वथितपानीयैस्तथा मंगल्यसंज्ञिता
भिः सर्वौषधिभिः यथाज्ञया॥ जयंती जीवंती। जीवपुत्राः पुनर्नवा विष्णुक्रांताः अभया विश्वरी। सहसद्
देवा। पूर्वं शतावरी॥ एताभिस्तथा कुशाद्याभिः कुशा दर्भाः आदिग्रहणात् ... दूर्वा
दूर्वा। ते नांदीनाद्यामन्। वृषभोद्धृतैः तेनोद्धृताभ्यां च मृत्। पूर्वं भूत वल्मीकमृत्॥ सरितां नदीनां यत्र समागा
मो मेलकस्तत्तटेषु च या मृत्॥ पद्मसरस्सु च मृद्भिः पद्मसंयुक्तानि यानि च सरांसि तेषु या मृत् ताभिः तीर्थोद्भि
ः पुण्यतीर्थपानीयैः स पंचगव्यैः पंचगव्यसहितैः पंचगव्यलक्षणं गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशो
दकमिति। पूर्वशिरस्कामिति। एतैः प्रागुक्तैः प्रतिमां स्नापितां॥ पूर्वशिरस्कां शयने संस्थापयेत्॥ नानाविधानां
तूर्याणां निनादैः शब्दैः तथा पुण्याहैः पुण्याहशब्दैर्वेदघोषैः सह। ततः कुर्यादित्याह॥ ऐंद्र्यां दिशींद्रः

लिंगाम्। प्राग्दक्षिणे अग्निलिंगाश्च। वक्र्याद्विजमुख्यैः पूज्यास्ते दक्षिणाभिश्च॥ ऐंद्र्यां पूर्वदिश्यां देशांगुलिंगानि द्वाभ्यां त्राह्म
वा·सं· णमुख्यैः विप्राश्चिर्वर्णैः पूज्याः पठनीयाः केचित्तत्र मध्याइतिपठंति। तथा प्राग्दक्षिणे आग्नेय्यां दिशि अग्निलिंगा आग्ने
यामंत्रास्त्र पूज्याः। ते चद्विजमुख्या दक्षिणाभिः पूज्याः। अन्य तत्राह किं कुर्यादित्याह॥ यो देवः संस्थाप्यस्तन्मंत्रैश्च
२५० न लं[?]होमं तु कुर्यात्॥ अग्निर्नाम तानि मयाग्नौ कान्यौ द्रव्याणि होमार्थानि॥ कृष्णमकृतानि संस्थाः मदुर्मदुः शब्दस्फुलिंग
कृतश्चुभः हेतुः स्मृतिलोपो वा प्रसर्पणं वा अशुभं भांति॥ यो देवइति॥ यो देवः स्थाप्यः प्रतिष्ठापनीयस्तन्मंत्रैस्तद्दैवमं
त्रैर्हुतं विधानलाग्निं हुयात्॥ मयाग्निनिमित्तान्यग्निलक्षणानि इंद्रध्वजस्थानि प्रोक्तानि वक्ष्यितानि॥ स्वा
हावसान समाचारयमुत्तलावधिहारस्वाहा॥ तथाग्निश्च साकृतः धूमेनाकुलो हुत॥ अपसव्यावामावर्तः
मुदुर्मदुः शब्दः पुनःशब्दं करोति। स्फुलिंग वह्निस्फुलिंगं करोति। मुंचति। तथा विधानश्चुभः करी। प्रजाविरुद्धं क
रोति। ताम्रमयी। भूप्रभंतु मद्वांतं शैली प्रतिमा यलिंगं आयुश्च रति॥ प्रतिमार्चा दारुमयी काष्ठमयी तथा
च मृन्मयी पार्थिवा। आयुर्जयं वित्तं श्री लक्ष्मी र्बलं वीर्यं जयं च विजयं ददाति॥ मणिमयी रत्नमयी प्रतिमा स्त्री
कानां दानानां हृताय भवेत॥ सौवर्णं कांचनमयी पुष्टिदा देद पुष्टिं ददाति॥ रजतमयी रजतनिर्मिता कीर्ति
यशः करोति। ताम्रमयी प्रजानां पुत्रादीनां वृद्धिं करोति। शैली शिलामयी प्रतिमा चार्यलिंगं वा लिंगं भूलं म
भिप्रभलक्षाभं करोति॥ तथाच। वसिष्ठः॥ वार्क्षी च दारुसंभृता आयुःश्रीबलदा स्मृता॥ सौवर्णी पुष्टिदा
या रत्ना कांचिकारिणी। रजताद्वा कीर्तिदा ताम्रा प्रजावर्धिनी। मद्वकरोतिभूलाभं यावीपापाणनि
र्मिता॥ पुनरपि विशेषमाह॥ शंकुपदद्रुता प्रतिमा प्रधान पुरुषं च कुलं च घातयति॥ श्वभ्रोपद्रुता रोगानु
पद्रवांश्चाक्षयान्कुरुते॥ शंकुस्तिर्यकुनिर्गतः कीलकः अग्नइति। प्रसिद्धं लोके। तेनापद्रुता प्रतिमा चाप्र
धानं पुरुषं नायकं न रकुलं वंशं च घातयति॥ नाशयति॥ श्वभ्रो गर्भश्च तेनोपद्रुता प्रतिमा क्षयाद्रिया २५०
नुपद्रवान्दोषान्कुरुते॥ तथाच वसिष्ठः॥ वार्चा शंकुद्रुता शत्रुप्रधान कुलनाशिनी॥ छिद्रेणोपद्रुता या नवद्रुरा
पकरी मता॥ अथाधिवासनलक्षणमाह॥ मंडपमध्यकुंडिलमुपलिप्यास्तीर्य सिकताश्चकुशैः। भद्रास

नकृतोग्रं वा पिधान्यपात्यमेतप्रतिमां अधिवासनमंडपस्य मध्ये कुंडलंऽस्थंडिलं भूभागमुपलिप्य ततः सिकताया
कुशैरुहभेश्चास्तीर्य। अथ शब्दोत्र चार्थे आस्तरणमाच्छादनं तत्र भद्रासनेप्रतिमां कृत्वा। भद्रासनं राजासनं तत्र
कृतशीर्षं शीलितमलंकारोपधानपादं॥ उपधानं शीर्षस्थानं तत्र कृत पादा अन्यत्र पादान्यसे कार्पयेत॥ अन्य द्विधा
नमाह॥ प्लक्षाश्वत्थोदुंबरशिरीषवटसंभवैः कृतकषायजलैः मंगल्यसंज्ञिताभिः सर्वौषधीभिः कुशाद्याभिर्विष
वृषभोद्धृत पर्वत वल्मीक सरित्संगमागमतदेषु॥ पद्मसलिलैश्च मृद्भिः सपंचगव्यैश्च तीर्थजलैः पूर्वशिरस्कां स्नातां सुवर्ण
रत्नांबुतिश्च॥ मुस्तुगंधेः अथवा दातुः पुरोहितस्य स्मृतिलोपो विम्रातिर्भवति। प्रसर्पणं च पश्चात् मनसमुत्तममनि
शं प्रोक्तं कथितं॥ ततः किं कुर्यादित्याह॥ स्नातामभुक्तवस्त्रां स्वलंकृतां पूजितां कुसुमगंधैः॥ प्रतिमा स्वास्तीर्णायां शय्या
यां स्थापकः पकुर्यात्॥ तां प्रतिमां स्नातां कृतस्नानां अभुक्तवस्त्रां नवस्त्रावृतां स्वलंकृतां शोभनैरलंकारैरलंकृतां॥ कुसु
मैः पुष्पैः गंधैः सुगंधद्रव्यैः अगरुप्रभृतिभिश्च पूजितामर्चितां स्थापकः प्रतिष्ठापकः स्वास्तीर्णायां शोभनास्तीर्णायां
शय्यायां कुर्यात्॥ स्थापयेदित्यर्थः॥ नतस्याः सुप्तायाः किं कुर्यादित्याह॥ सुप्तां सगीतनृत्यैर्जागरणैः सम्यगेव म
धिवासयेद्दैवज्ञ संप्रदिष्टकाले संस्थापनं कुर्यात्॥ तां प्रतिमां सुप्तां मनसूत्यगीतैः नृत्यगीतसहितैर्जागरणैः सुस्नानपर्वणे
: सम्यक्कुशलेनमनेन प्रकारेणाधिवास्य ततो दैवज्ञेन गणकेन यो सौ संप्रदिष्ट उक्तः कालः॥ समयस्तस्मिन संस्थापनं प्र
तिष्ठापनं कुर्यात्। कथं प्रतिमां स्थापयेदित्याह॥ अभ्यर्च्य कुसुमवस्त्रानुलेपनैः शंखतूर्यनिर्घोषैः॥ प्रागदक्षिण्येन ना
यतनस्य प्रयत्नतो कृत्वा बलिं प्रभूताम भ्यर्च्य ब्राह्मणांश्च सभ्यांश्च॥ दत्वा हिरण्यशकलं विनिक्षिप्य पिंडिकाश्वभ्रो
स्थापकः दैवज्ञद्विजसभ्यान स्थापितेनार्चितेनाभ्यर्च्य॥ कल्याणानां भागी भवतिह परत्र च स्वर्गे। अभ्यर्च्यं कुसुमगं
धानुलेपनैरिति॥ तां प्रतिमां कुसुमैः पुष्पैर्वस्त्रैरंबरैरनुलेपनैः समालंभनैरभ्यर्च्य संपूज्य ततः शंखानांतूर्याणां नि
र्घोषैः शब्दैः सदायतनस्य प्रासादस्य प्रयत्नेन प्रागदक्षिण्येन नयेत्॥ अधिवासनमंडपान्निष्क्रम्य प्रागदक्षिण्येन प्रा
सादस्य गर्भागारं प्रवेशयेदित्यर्थः॥ तथा प्रभूतामतिबह्वीं बलिमुपहारं कृत्वा ब्राह्मणानाहूतान सभ्यान सभागतां
श्च जनानभ्यर्च्य संपूज्य हिरण्यशकलं सुवर्णखंडं पिंडिकाश्वभ्रे पीठगर्भे दत्वा विनिक्षिप्य ततः प्रतिमां विनिक्षिप

न्यसेत॥ स्थापक इति स्थापकः प्रतिष्ठापकः। दैवतागणकः द्विजो ब्राह्मणमभ्यानमभागतान्स्थापयितुं क्षमः॥ एतान्यत्नो
बा॰ सं॰ पतोऽभ्यर्च्य इहास्मिंल्लोके कल्याणानां श्रियसां भागी भवेत॥ परत्र च परलोके स्वर्गी भवति। अथ प्रतिष्ठापकलक्षणमाह
॥ विष्णोर्भागवतान्मगांश्च सवितुः शंभोः सभस्मद्विजान् मातॄणामपि मातृमण्डलविदो विप्रान्विदुर्ब्राह्मणाः। शाक्यान्सर्वहित
२५१ स्य शान्तमनसो नग्नान्जिनानां विदुर्ये यं देवमुपाश्रिताः स्वविधिना तैस्तस्य कार्या क्रिया॥ विष्णोर्नारायणस्य भागवताः
संस्थापकान्विदुः तेन कार्या इत्यर्थः॥ सवितुः सूर्यस्य मगान् मगब्राह्मणान्। शंभोरीश्वरस्य द्विजाः ब्राह्मणाः सभस्मा भस्मस
हिताः पाशुपता इत्यर्थः॥ मातॄ मण्डलविदो मातृमण्डलज्ञान्मातॄणां ब्राह्म्यादीनां संस्थापयितृन्विदुः ब्रह्मणः पितामहस्य विप्रान्ब्राह्म
णाः सर्वहितस्य बुधस्य शान्तमनसोऽतीन्द्रियस्य शाक्यस्य कारकं शाक्यान्विदुः। जिनानामर्हतां नग्नान्नग्नक्षपणकान्विदुः। ये
नरा यं देवमुपाश्रिताः॥ शरणं गताः स्तैर्नरैस्तस्य देवस्य स्वविधानमाम्नायदर्शितं तेन विधानेन क्रियाः कार्या इति॥ अ
थ प्रतिष्ठाकाललक्षणमाह॥ उदगयने सितपक्षे शिशिरगभस्तौ च जीववर्गस्थे। लग्ने स्थिरे स्थिरांशे सौम्यैर्धीधर्मकेन्द्रगतैः
पापैः उपचयसंस्थैर्ध्रुवमृदुहरितिष्यवायुदेवेषु। विकुजे दिनेऽनुकूले देवानां स्थापनं शस्तं॥ उदगयने उत्तरायणे सितपक्षे
शुक्लपक्षे शिशिरगभस्तौ चन्द्रे जीववर्गस्थे बृहस्पतिवर्गेण॥ वर्गाश्च गृहहोराद्रेष्काणनवांशद्वादशांशत्रिंशांशकाख्याः। त
था लग्ने स्थिरे वृषसिंहवृश्चिककुम्भानामन्यतमे स्थिरनवांशकश्च॥ सौम्यैः शुभग्रहैर्बुधशुक्रजीवैः धीधर्मकेन्द्रगतैः धीस्थानं पं
चमं। धर्मस्थानं नवमं॥ केन्द्राणि लग्नचतुर्थसप्तमदशमानि॥ एतेषु स्थानेषु समवस्थितैः पापैः पापग्रहैरादित्याङ्गारकश
नैश्चरैः उपचयसंस्थैः॥ षडेकादशत्रिदशमस्थानानां समवस्थितैः तथा ध्रुवमृदुहरितिष्यवायुदेवेषु नक्षत्रेषु उत्तरारोहि
णी चेति॥ ध्रुवाणि मृगशिरश्चित्रानुराधा रेवती चेति। मृदूनि हरिः श्रवणः तिष्यः पुष्यः वायुदेवः स्वातिः एता
नि नक्षत्राणि विकुजे अङ्गारकवर्जिते दिने वासरे अनुकूले कर्तुः शुभकरे देवानां सुराणां स्थापनं प्रतिष्ठापनं प्रशस्तं शो
भनमिति॥ एतत्प्रतिष्ठापनं सर्वदेवानां सामान्यं मयोक्तमित्येतदाह॥ सामान्यमिदं समासतो लोकानां हितदं म २५१
याकृतं॥ अधिवासनसंनिवेशने॥ सावित्रे पृथगेव विस्तरात्॥ इदं प्रतिष्ठापनं समासतः संक्षेपतः सामान्य
मेवेदं सर्वतुल्यं हितदं लोकानां मयाकृतं। सावित्रे शास्त्रे प्रत्येकस्य देवस्य अधिवासनं संनिवेशनं प्रतिष्ठाप

नं च तेषु पृथक्पृथक् विस्तरात् विस्तरेण तत्र भवतः॥ अथवा सावित्रे सवितुः सूर्यस्य ये अधिवाससंनिवेशने ते पृथगेव वि
स्तरात्तच्छास्त्रे सौरे भवत इति॥ ॥७॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ प्रतिमाप्रतिष्ठापनं नाम अष्टप
चाशोऽध्यायः॥५८॥ ॥ अथ गोलक्षणं व्याख्यायते॥ तत्रादावेवागमप्रदर्शनार्थमाह॥ पराशरः॥ प्राह बृ
हद्रथाय गोलक्षणं क्रियते ततोऽयं॥ मया समासः शुभलक्षणास्ताः सर्वास्तथाप्यागमतोऽभिधास्ये॥ पराश
राख्यो मुनिर्बृहद्रथाय क्षितिपते राज्ञे बृहद्रथनाम्ने स्वशिष्याय गोलक्षणं प्राहोक्तवान्॥ तस्मात् गोलक्षणान् मया समा
सः संक्षेपः क्रियते। सर्वास्ता गावः शुभलक्षणाः प्रशस्तगुणाः अपलक्षणगुणाः अशुभगुणाः सर्वा निर्दोषा
स्तथा तानेव प्रकारेण आगमत आगमादभिधास्ये कथयिष्ये॥ तत्रादावेवाशुभलक्षणान्याह॥ सास्राविलरूक्षा
क्षो मूषकनयनाश्च न शुभदा गावः प्रचलच्चिपिटविषाणाः करटाः खरसदृशवर्णाश्च॥ दशसप्तचतुर्दशदन्त्यः प्रलं
बमुण्डाननाविनतपृष्ठाः। ह्रस्वस्थूलग्रीवा यवमध्या दारितखुराश्च॥ श्यावातिदीर्घजिह्वा गुल्फैरतितनुभिरतिबृ
हद्भिर्वा। अतिककुदाः कृशदेहा नेष्टा हीनाधिकाङ्ग्यश्च॥ सास्राक्षाः साश्रुनित्यमश्रुणा संयुक्ते ईक्षणे यासां ता
सास्राख्याः आविले कलुषे अप्रसन्ने रूक्षे अस्निग्धे अक्षिणी यासां। मूषकतुल्ये नेत्रे यासां ता गावो न शुभदा अ
प्रशस्ताः॥ तथा प्रचलच्चिपिटविषाणाः प्रचलानि चिपिटानि विषाणानि शृङ्गाणि यासां ता अशुभाः॥ करटा
वर्णाः कृष्णवर्णा इत्याद्युक्तमित्यर्थः॥ खरसदृशवर्णाः गर्दभतुल्यवर्णा न शुभदाः॥ दशसप्तचतुर्दन्त्य इति॥ या गा
वः दशदन्त्यः चतुर्दन्त्यः प्रलम्बमुण्डाननाः प्रलम्बं लम्बमानं मुण्डं शृङ्गरहितमाननं मुखं यासां विनतपृष्ठाः विन
तमप्रसृतं भग्नं पृष्ठं मध्यं यासां॥ ह्रस्वा अल्पा स्थूला च ग्रीवा शिरोधिर्यासां॥ दारितखुराश्चातिभग्नाः पादा
यासां श्यावातिदीर्घजिह्वेति। श्यावा श्यामवर्णा अतिदीर्घजिह्वा यासां गुल्फैरपि तनुभिर्युक्ता अतिबृहद्भि
स्थूलैर्वा युक्ता। कृशदेहा दुर्बलशरीरा। हीनाङ्ग्यः अधिकाङ्ग्यो वा नेष्टा अशुभाः॥ तथा च पराशरः॥ साश्रुणि लो
चने यासां रूक्षे येऽवनताः शुभाः। चलच्चिपिटशृङ्गाश्च करटा खरसंनिभाः॥ दशसप्तचतुर्दन्ताः लम्बवक्त्रा न
ताः शुभाः। विषाणवर्जिता ह्रस्वाः पृष्ठमध्यातिसंनिभाः। ह्रस्वस्थूलग्रीवा यवमध्या दारितखुरसंयुताः॥ श्यावातिजि

बा॰ सं॰ गा देयाश्च हीनाश्चावयवैश्च या ॥ नताः शुभप्रभा गावो भर्तुर्वृषस्य नाशना इति ॥ अथ वृषभलक्षणमाह ॥ वृषभोऽप्य
वं कुलातिलकं वृषणः गोरातंकोऽरुः स्थूलशिरा शिरानंगोऽस्थिरवक्रमेहनतयश्च ॥ मार्जाराक्षः कपिलः करटो वा न शुभ
२५२. दो द्विजस्येव ॥ कृष्णोष्ठतालुजिह्वश्वसनो यूथस्य घातकरः ॥ वृषभोऽप्येवमिति ॥ वृषभोऽपि गोनामेवं लक्षणयु
क्तोऽनशुभः ॥ किंतु विशेषलक्षणानि ॥ कुलातिलकं वृषणः कुलोपमस्य मारणाच्चेति ॥ कर्वोपकब्दमानोऽवृषणोऽशुभो
यस्य शिरालं तक्रोडः शिराभिः सततं पार्श्वं क्रोडमुदरं यस्य तथा स्थूलाभिरुन्नताभिः शिराभिश्चितो मुखगंडो यश्च
त्रिस्थूणं मेहनं सिंचति ॥ मूत्रपुरीषानुत्सर्गकाले कुरुते ॥ अक्षिप्यावाक्षिन्नमिव नतानि के चित ॥ मार्जाराः प्रइति ॥ मा
र्जाराक्षो बिडालतुल्यनेत्रः कपिलः कपिलवर्णः करटः करटवर्णो वा ॥ स तथाभूतो द्विजस्यैव ... न शुभः किं
तन्यवर्णानां यतो न शुभलक्षणयुक्तो द्विजस्य ददाति ॥ कोकुक्षितः यश्च कृष्णाः ओष्ठतालुजिह्वा श्वसनोऽ... श्वास
सितायस्य स च सन संचामयुक्तश्च ॥ वृषस्य यूथस्य नाशकरो घातकरः ॥ अन्यदप्याह ॥ स्थूलदोलमणिशृंगः सितोदरः
कृष्णसारवर्णश्च ॥ गृहजातोऽपि त्याज्योऽयं यूथविनाशाय वा गोवृषभः ॥ यश्च स्थूलशकलमणिशृंगः स्थूलशकलो मयं
यस्य मणयश्च शृंगेषु विषाणेषु दृश्यंते यस्यासनयाभृतः केचित्स्थूलशकलस्थूल गोमयः स्थूलमणिः स्थूलगः स्थूल
शृंग इत्याहुरिति ॥ सितोदरः श्वेतजठरः कृष्णः श्यामवर्णः कृष्णः श्वेतो वर्णो यस्य ॥ कृष्णचित्रलः कश्चित् श्वेत इति ॥
अपितद्गृहे संभवनायावर्तते ॥ वृषभोऽयं त्याज्यः गृहजातोऽपि सम्भूतोऽपि त्याज्यः ॥ परिहर्तव्यः ॥ यतो यूथस्य वि
नाशाय दोषविनाशकः ॥ अन्यदप्याह ॥ श्यामकपुष्पचिताः श्यामकैः श्यामवर्णैः पुष्पैश्चितान्यंगान्यस्य यस्य
स ॥ श्यामकश्चासौ पुष्पचितांगश्चेति केचित ॥ भस्मारुणसंनिभो भस्मलोहितवर्णो बिडालाक्षो मार्जारनेत्रः ॥ स
विप्राणां द्विजातीनां मयि परिगृहीतो नशुभं करोति ॥ किंतन्येषां ॥ अन्यदप्याह ॥ ये चोद्धरंति पादान्पंकादिवया
निताः कृशग्रीवाः कातरनयना हीनाश्च ॥ पृष्ठतः कोनभारसहाः ये च वृषभा निताभारा दीनमुखाः पंकात्कर्दमा
दिव पादान् खुरानुद्धरंति ॥ कृशग्रीवा दुर्बलकंधराः कातरनयनाः कातरः सादीनाश्च रक्षतः ॥ अत्यविनतपृष्ठाः
तेन भारसहा भारोद्वहनेन समर्था इति ॥ तथा च पराशरः ॥ आपावकाक्षाः कपिलाः कृष्णपुष्पयुतश्च ये मार्जा

रपिंगलाक्षाश्च दुर्गावो वृषघातिनः ॥ पंकादिवालसाः पादानुद्धरंतो व्रजंति ये अ धूर्धरा भवंत्येते भारे च्यानि विगर्हि
ता इति ॥ अधुना शुभलक्षणान्याह ॥ मृदुसंहतताम्रोष्ठास्तनुस्फिक्ताम्रतालुजिह्वश्च ॥ हस्वतनूच्चश्रवणाः
सुकुक्षयः स्पष्टजंघाश्च ॥ आताम्रसंहतखुरा व्यूढोरस्का बृहत्ककुद्युक्ताः ॥ स्निग्धश्लक्ष्णतनुत्वग्रोमाणस्ताम्र
तनुशृंगाः ॥ तनुभूस्पृग्बालधयो धरोरक्तांतविलोचनाम हौच्छ्वायाः ॥ सिंहस्कंधा स्तनुलंबकंबलाः प्रशिताः
सुगताः ॥ मृदुसंहतनाम्नोष्ठाद्युति ॥ एवंविधा वृषभाः प्रशस्ताः शोभना इत्यर्थः ॥ कीदृक्राम मृदुसंहतताम्रोष्ठा मृदव
: कोमलाः संहताः संलग्नास्ताम्रवर्णाः ईष्टा येषां तनुस्फिक्ताः तनवः स्वल्पा मांसाः स्फिजः सक्थिनी येषां ॥ ताम्र
तालुजिह्वाः ताम्रवर्णा लोहितास्तालुपश्च घण्टरसनाजिह्वा च येषां ह्रस्वास्वल्पा तनमोघना उच्चाः ॥ अतिनताश्च
श्रवणाः कर्णा येषां ॥ सुकुक्षयाः शोभनकुक्षयः स्पष्टजंघाः अवक्रजंघाः आताम्रसंहतखुरा इति ॥ आताम्राः
स्ताम्रवर्णाः संहता अविरलाः खुराः पादा येषां व्यूढोरस्काः सुहृढवक्षसः बृहत्ककुद्युक्ताः महता ककुदेन संयुक्ता
स्निग्धाः सस्नेहाः श्लक्ष्णा मृद्वी तनुस्त्वचातनुत्वचर्म तथा रोमाणि च येषां ताम्रवर्णानि लोहितानि तनु शृंगाणि
विषाणानि येषां ॥ तनुभूस्पृगिति ॥ वालधिः पुच्छवालास्तन वा घना भूस्पृशो भूमिस्पृश इति ॥ येषां ते तथाभूता रक्तां
ताविलोचनारक्तालोहिता अंताः कार्यता विलोचनयोर्नेत्रयोर्येषां महोच्छ्रायो महानति दीर्घश्छ्रायो येषां ॥ सिंहस्कं
धाः सिंहतुल्यांसाः तनवो घना अल्पाश्च कंबला येषां ॥ सुगताः शोभनगतिर्येषां ते तथाभूता इति ॥ अन्यदप्याह
वामावर्तैर्वामे दक्षिणपार्श्वे च दक्षिणावर्तैः ॥ शुभदा भवंत्यनडुहो जंघाभिश्चैकमिभातिः ॥ ये अनडुहो वृषा
वाम पार्श्वे वामावर्तैर्दक्षिणा ॥ पार्श्वे दक्षिणावर्तैश्चारामभियुक्ताः ते च शुभदा भवंति ॥ ताः श्वेतकनिभाभिः ए
कवसदृशाभिर्जंघाभिः शुभदा भवंति ॥ एकेऽपि ॥ अन्यदप्याह ॥ वैडूर्यमल्लिकाबुद्बुदेक्षणाः स्थूलनेत्रवर्त्मानः
पार्ष्णिभिः अस्फुटिताभिः शुरास्ता सर्वे च भारसहाः ॥ वैडूर्यं प्रसिद्धं मणिविशेषः श्यामवर्णः मल्लिकेक्षणामल्लि
काक्षास्तल्लक्षणमुक्तं ॥ बुद्बुदो जलबुद्बुदः प्रसिद्ध एव ॥ वैडूर्यमल्लिकाबुद्बुदसदृशे ईक्षणास्ततुल्या नेत्रवर्त्मान्य क्षो
माणि ॥ स्तानि स्थूलान्यतिघनानि येषां पार्ष्णिभिः खुरपश्चिमभागैरस्फुरिताभिरभग्नाभिरतः सर्वे निःशेषाः

ऽस्त्याः प्रशस्ता भारसहाश्च॥ भारंसहंतइति। अन्यदप्याह॥ घ्राणोद्देशे सबलिर्मार्जारमुखः सितश्च दक्षिणतः। कमलोत्पल
वा॰ म॰ लाक्षाभः सुवालधिर्वाजितुल्यजवः॥ कंबलविषाणोऽमेषोदरश्च संक्षिप्तवंक्षणक्रोडः। ज्ञेयो भारध्वगः श्रमसहोयवश्च तुल्यश्च
शस्तफलः॥ घ्राणोद्देशइति। यस्य घ्राणोद्देशे नासायां सबलिर्वलिसहितः मार्जारमुखो बिडालतुल्यवदनः दक्षिणतो
२५३ दक्षिणभागे सितः शुक्लवर्णः कमलोत्पललाक्षाभः कमलं पद्मं उत्पलं लाक्षा प्रसिद्धा। तादृक्वर्णाः।
एषां सदृशा भा कांतिर्यस्य सुवालधिः शोभनः पुच्छवालः वाजितुल्यजवः वाजी तुरगस्तत्तुल्यस्सदृशो जवो वेगो य
स्य॥ शीघ्रगतिरित्यर्थः॥ कंबलविषाणो भिन्न॥ कंबलं प्रलंबमानं चर्म विषाणे शृंगे यस्य सः। मेषोदरस्य मेषोदरस्य सदृशं क्षिप्र
सवंक्षणाः संक्षिप्तो संवृतो वंक्षणो यस्य॥ वक्षिमज्जघावृषणांतरं वंक्षणशब्देनोच्यते। असुवैया थेशालि
होत्र आह॥ यदूरूमूलांतरालं वंक्षणा वभिनिर्दिशेत॥ अग्रतो घातंक्रोड उच्यते। वंक्षणान्वक्रोडश्चावंक्षण
क्रोडानि॥ एतानि संक्षिप्तानि यस्य स एवंभो भारे भारोद्वहने ध्वनिपथि च समर्थः। ज्ञेयो विज्ञेयो ज्ञातव्यः॥ ज्ञातव्यश्च तुल्य
स्तु सारसमः जवो वा योगतिरितिपर्यायाः एवंविधः शस्तफलः शुभफलदइति॥ अन्यदप्याह॥ सितवर्णः पिंगाक्षस्ताम्रवि
षाणेक्षणो महावक्त्रः। हंसो नाम फलाशुभं दर्शयति वर्धनः प्रोक्तः॥ यश्च सितवर्णः श्वेतवर्णः पिंगाक्षः पिंगले
त्र स्ताम्रविषाणेक्षणः ताम्रवर्णो लोहितौ विषाणौ शृंगौ ईक्षणे नयने यस्य। स महावक्त्रः स्थूलवदनः स हंसोनाम
हंसाख्यः शुभं प्रयच्छतः फलः वृषश्च॥ यूथस्य च विवर्धनो वृद्धिकरः प्रोक्तः कथितः॥ अन्यदप्याह॥ भूस्पृग्वाल
धिराताम्रविषाणोरक्तदृक्ककुद्मांश्च॥ कल्माषश्च स्वामिनमचिरात्कुरुते पतिं लक्ष्म्याः॥ योवृषभो भूस्पृग्वालधिः
पुच्छवालो यस्य स तथा॥ आताम्रविषाणो लोहितशृंगः। रक्तदृग्लोहितनेत्रः ककुद्मान्॥ ककुदयुक्तः। कल्माषश्च
ल्माषवर्णः सितरक्तपीतकृष्णयामिश्रवर्णः। सितरक्तपीतयामिश्रवर्णः स स्वामिनं पतिमचिरात्शीघ्रमेव
लक्ष्म्याः श्रियः पतिं प्रभुं कुरुते। अन्यदप्याह॥ योवा सितैकचरणैर्यथेष्टवर्णश्च सोऽपि शुभफलकृत् मिश्रफ २५३
लोऽपि ग्राह्यो यदि नैकांतप्रशस्तोऽस्ति॥ योवृषभः सितैः शुक्लैश्चरणैः पादैर्युक्तः यथेष्टवर्णो वा इतरो यदि ब
र्णः शुभाशुभवर्णयुक्तोऽपि स शुभफलकृत प्रशस्त इति केचिद्योवासितैः करणैरिति पठंति। एकांतः प्रशा

स्तः सर्वलक्षणसंपूर्णो यदि नास्ति न विद्यते। तदा मिश्रफलोऽप्यमिश्रफलो ग्राह्यः अपिशब्दः संभवनायां नैकांत
कांतप्रशस्तोऽस्ति॥ इति पठंति। मिश्रफलस्य शुभानामशुभानां च लक्षणानामंतरं कल्पनाय ग्रोक्ता शुभा॥ इत्येव
मानेनास्मिन्नातिरिच्यते। तदा शुभाशुभलक्षणयुक्तोऽपि ग्राह्य इति॥ तथा च पराशरः॥ स्वदुसंहताग्राह्यालनुविद्ध
स्तनुस्फिक्॥ वैदूर्यमधुवर्णश्च जलबुद्बुदसंनिभे॥ रक्तस्निग्धश्च नयनैस्तथा रक्तकनीनिकैः॥ संहताश्चामह्रा
स्वाय स्पष्टमुखाः ककुद्मिनः॥ भूमौ कर्षतिकां गृह्लंप्रलंब स्थूल बालधिः॥ पुरस्ताद्घनानीला ह्रस्वतः सुसमाहिताः
वृत्तांगाः स्थूलगात्राश्च विस्तीर्णा जघनाश्च ये॥ स्पष्टाताम्रतनुस्कंधाः शृंगे रविरले ह्रीः॥ समुद्रवरसंस्थानैः समा
स्फुटैश्च पार्ष्णिभिः॥ रक्तस्कंधोर्ध्वतग्रीवाः ककुदेश्च समुच्छ्रितैः॥ यते भारसहा ज्ञेया धारिता निच पूजिताः प्रलंब
वर्णास्य यथे संदर्शपादरवंक्षणः विस्तीर्णव क्षोल्लघनो भारयानेच पूजितः स्निग्धपिंगक्षणश्चैवताम्रशृंगो महा
नसः। सतुगोः पक्षकोनाम गोसहस्रप्रवर्धन इति॥ ॥इति श्रीभट्टोत्पलविरचितायां संहितावृत्तौ गोलक्षणना
मारध्यैकषष्टितमोऽध्यायः॥ ६१॥ ॥श्री॥ अथातः श्वलक्षणं व्याख्यायते। तत्रादावेव शुभं श्वलक्षणमाह॥ पादाः
पंचनखाः स्त्रयोऽग्रचरणः षड्भिर्नखैर्दक्षिणस्ताम्रोष्ठाग्रनसो मृगेश्वरगतिर्जिघ्रन्भुवं याति च॥ लांगूलं सुह
दृङ्ग्रक्षमासदृशी च कर्णौ लघू॥ मृदू यस्य स्यात्स करोति पांडुरचिरात्पुष्टिं श्रियं स्वामिनः॥ यस्य शुनः श्वानस्य च
यः पादाः सुयश्चरणाः पंचभिर्नखैः करजैर्युक्ताश्चत्वारो दक्षिणोऽग्रचरणो यपदः षड्भिर्नखैर्युक्तः ताम्रोष्ठा
ग्रनसः ताम्रवर्णौ लोहितावोष्ठौ तथाग्रनासा नासिकाग्रं यस्य॥ मृगेश्वरः सिंहस्तत्सदृशा गतिर्भुवं भूमिं जिघ्रन्
यातिगच्छति॥ लांगूलं पुच्छं सटं सटायुक्तं लोमहितमित्यर्थः। दृक्दृष्टिः ऋक्षसदृशी वानरतुल्या॥ कर्णौ श्रोत्रे लघू
मृदू मार्दवयुक्तौ॥ यस्यैवंस्याद्भवति स श्वा कुक्कुरः पोषः पालयितुः न चिरात्शीघ्रमेव ग्रहे वेश्मनि पुष्टिं पुष्टिं संपूर्णां
श्रियं लक्ष्मीं करोति॥ तथा च गर्गः। त्रयः पादाः पंचनखा अग्रगो दक्षिणस्तथा॥ षड्नखास्ताम्रनासा यस्या
ग्रोष्ठः सिंहविक्रमः॥ मदोत्तिघ्रन सदायातिलांगूलं लोमहितं तथा॥ ऋक्षभेच शर्षा कर्णौ मृदू लंबौ सकुक्कुरः॥ न
ग्स्य महतीं लक्ष्मी परिपुष्टिंददत्यसौ॥ ॥अथ कुक्कुर्या लक्षणमाह॥ पादे पादे पंच पंचाग्रपादे वामे यस्याः

खट्टखा मल्लिकाक्ष्याः॥ वक्त्रं पुच्छं पिंगलं कंचुकं च यस्याः सा पिंगला कुक्कुटी याति वृद्धिं॥ यस्याः कुक्कुट्याः पादे पादे प्रतिचरणं
पंच पंच नखाः करजाः अग्रपादे अथ चतुर्थं वामे चरणे यस्याः खट्टखा भवति॥ या च मल्लिकाक्षी मल्लिकाक्षमद्रकवाहमल्लि
काकुसुमसदृशे नयने यस्याः भवति॥ सा मल्लिकाक्षी॥ तथा च कश्यपः॥ दक्षोअन्तरनखा यौतवर्णसमा भागा॥ समानकुक्षा
कुमा॥ भानजई अस्वर्णानां यंतमल्लि आभासा॥ तथा च शालिहोत्रः॥ शुक्लशालिपरिक्लिन्नयस्यांतरप्रान्वंतेन्दुभः॥
मल्लिकाक्षो महाधन्यः स दृश्यः कृष्णतारकइति॥ एवं या मल्लिकाक्षी पुच्छं तांम्रकंचकं कुट्टि च॥ पिंगला कपिला कंचुक
पाइया॥ सा कुक्कुटी पृथ्वीपतिरधिपतिः श्रियं पातिरक्षाति॥ ॥ इति भट्टोत्पलविरचितायां संहिताविवृतौ अश्वलक्षणं
नामोपनिषत्माध्यायः॥ ६०॥ ॥ श्री॥ अथ कुक्कुटलक्षणं व्याख्यायते॥ तत्रादावेव तावदाह॥ कुक्कुटस्त्वृजुतनूरु
हांगुलिस्ताम्रवक्त्रनखचूलिकः सितः॥ रौति सुस्वरमुषात्यये च यो वृद्धिदः स नृपराष्ट्रवाजिनां॥ यः कुक्कुटः ऋजुतनु
रुहः तनूरुहः रोमाः मृदुलानि रुहाणि पक्षाणि यस्य सः अंगुलिस्य ऋजवः ताम्रवक्त्रः लोहितवदनः ताम्रनखः ताम्रचू
लिकः ताम्रचूडः तथा सितः शुक्लः उषात्यये रात्रिवसाने सुस्वरं मधुरं रौति शब्दं करोति॥ स नृपस्य राज्ञो राष्ट्रस्य जनपदस्य
च वाजिनाम् अश्वानां वृद्धिरभिवृद्धिं ददाति॥ तथा च गर्गः॥ श्वेतस्ताम्रनिभः श्रेष्ठस्ताम्राक्षस्त्वृजुलाङ्गुलिः॥ अनालतां
गुलिः स्वांगताम्रचूडः प्रशस्यते॥ अस्यालभियचश्रावो दधिःवर्णःशुभं भानन॥ प्रशस्यते॥ स्तुलद्धिरागराह्निस्व
र्णारिद्रा॥ अखरा स्ताम्रवक्त्राश्च स्निग्धवर्णाश्च पूजिता॥ दीनाश्चैव विवर्णाश्च विस्वराश्च विगर्हिता॥ इति॥
अथान्यलक्षणमाह॥ यवग्रीवो यो वा बदरसदृशो वापि विहगो बृहन्मूर्धा वर्णैर्भवति बहुभिर्यश्च रुचिरः॥ स
शस्तः संग्रामे मधुमधुवर्णश्च जयकृत् न शस्तो योऽतोऽन्यः कृशतनुरवः खंजचरणः॥ योऽविहगः पक्षी यव
ग्रीवो यवसदृशग्रीवः पक्षाय वशरालो कोप्रसिद्धः॥ यो वा बदरसदृशः कोहितवर्णः बृहन्मूर्धा विस्तीर्णशीर्षः
बहुभिर्नानाप्रकारैः सितरक्तपीतनीलकृष्णैर्वर्णैर्युक्तः रुचिरो निर्मलः स कुक्कुटः संग्रामे युद्धे शस्तः प्रशस्तः॥ अथ
वा मधुवर्णपीताभः मधुपवर्णो भ्रमरवर्णः कृष्णः सोऽपि जयकृत॥ अतोऽस्मादुक्तादन्यो विपरीतो न शस्तोऽशुभः॥
तथा यो कृशतनुः रवः कृशा क्षामाः तनुः स्वरो रवः शब्दो यस्य खंजचरणो विकलपादः सोऽपि न शुभः॥ अथ कुक्कु
टीलक्षणमाह॥

कुक्कुटी च मृदुचारुभाषिणी स्निग्धमूर्तिरुचिराननेक्षणा॥ सा ददाति सुचिरं महीक्षितां श्रीयशोविजयवीर्यसंपदः॥ या कुक्कु
टी मृदु मार्दवयुक्तां चारु शोभनं भाषिणी॥ स्निग्धमूर्तिर्निर्मलशरीरा॥ रुचिराननेक्षणा॥ रुचिरं शोभनं आननं मुखं ईक्षणे
लोचने यस्याः सा महीक्षितां राज्ञां सुचिरं चिरकालं श्रीर्लक्ष्मीर्यशः कीर्तिर्विजयो विशेषेण जयः वीर्यं बलं
संपदा मैश्वर्यं च ददाति॥ ॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ कुक्कुटलक्षणं नाम एकषष्टितमोऽध्या
यः॥ ६१॥ ॥श्री॥ ॥ अथ कूर्मलक्षणं व्याख्यायते॥ तथा च॥ स्फटिकरजतवर्णो नीलराजीविचित्रः कलशसदृशमू
र्तिश्चारुवंशश्च कूर्मः॥ अरुणसमवपुर्वा सर्षपाकारचित्रः सकलनृपमहत्त्वं मंदिरस्थः करोति॥ यः कूर्मः स्फटिक
वर्णः स्फटिकोपलाभः रजतवर्णो रजताभः नीलाभिर्नीलवर्णाभिः राजीभिर्वीचित्रश्चित्रितः॥ कलशसदृशमू
र्तिः कुंभतुल्यशरीरः चारुवंशः पृष्ठास्थि चारु शोभनं यस्य नात्युच्च इत्यर्थः॥ अथवा अरुणसमवपुर्लोहितश
रीरः सर्षपाकारैः श्वेतैर्बिंदुभिर्विचित्रश्चित्रतः स मंदिरस्थो गृहे समवस्थितः॥ सकलनृपाणां समस्तराज्ञां महत्त्वम
भ्युन्नतिमाहिमानं करोति॥ राज्ञोऽभिराज्यतां करोतीत्यर्थः॥ अन्यदप्याह॥ अंजनभृंगश्यामवपुर्वा बिंदुविचित्रो
ऽव्यंगशरीरः सर्पशिरा वा स्थूलगलो यः सोऽपि नृपाणां राष्ट्रविवृद्ध्यै॥ अंजनं प्रसिद्धं कज्जलं भृंगो भ्रमरः अं
जनभृंगवत् श्यामा तनुः शरीरं यस्य बिंदुभिर्विचित्रः अव्यंगशरीरः अव्यंगपरिपूर्णावयवं शरीरं देहो यस्य
सर्पशिरा वा भुजगसदृशमूर्धा वा॥ यस्य स्थूलगलः महत्कंठः सोऽपि कूर्मो नृपाणां राज्ञां राष्ट्रविवृद्ध्यै भवति॥
अन्यदप्याह॥ वैदूर्यत्विट् स्थूलकंठस्त्रिकोणो गूढच्छिद्रश्चारुवंशश्च शस्तः॥ क्रीडावाप्यां तोयपूर्णे मणौ वा कू
र्मः कार्यो मंगलार्थं नरेंद्रैः॥ वैदूर्यमणिवद्वैदूर्यकांतिः स्थूलकंठः पीनगलः त्रिकोणः शृंगाटकाकृतिः गूढच्छिद्रः
गूढान्यच्छिद्राणि यस्य॥ चारुवंशः शोभनपृष्ठास्थिसन्धिः शोभनः एवंविधः कूर्मः सनरेंद्रैः राजभिर्मंग
लार्थं क्रीडावाप्यां क्रीडापुष्करिण्यां मणौ वा मणिमये भाजने तोयपूर्णे कार्यः कर्तव्यः॥ तथा च गर्गः॥ कांस्यदर्भप्रतीः
काशश्छत्राभो रजतप्रभः॥ तथा वैदूर्यवर्णाभो या याभावो हृष्टसर्पिषः॥ यथाश्च वा वा कोकिलाभासमकालिवाभश्च
वाभवेत॥ पीतकांचनवर्णश्च पुंडरीकसमप्रभः॥ गोधामुखस्त्रिकोणश्च तथा मंडलवर्धनं॥ स्त्रीपुत्रगात्रसंचया

बा॰ स॰ नकुर्मेण श्रीविवर्धनं॥ ॥इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ कूर्मलक्षणं नाम द्विषष्टितमोऽध्यायः॥ ६२॥ ७
॥ ॥अथातश्छागलक्षणं व्याख्यायते। तथा च। शुभाशुभलक्षणमभिधास्ये नवदशाष्टदंताः। धन्याश्छा
२५५ ग्या वेश्मनि संस्थाप्याः संत्यक्ताये छागानामतानां शुभाशुभलक्षणमभिधास्येऽत्र व्यवस्थाप्यैन छागान नवाष्ट
षड्दंतान नवदंतान् अष्टदंताश्च दंताधिकाः धन्याः शोभना वेश्मनि गृहे स्थाप्याः येच सप्तदंताः सप्तदंतास्ते सप्रत्याख्याः
अन्यद्व्याह। दक्षिणपार्श्वे मंडलमसितं शुक्लस्य शुभफलं भवति। कृष्णाभिन्नस्थाने लोहितवर्णानां श्वेतमतिशुभदं॥
शुक्लस्य श्वेतवर्णस्य छागस्य दक्षिणपार्श्वे विः स च नीलवर्णो भवति। तथा च कृष्णनीलवर्णस्य च श्वेतमंडलं दक्षि
णपार्श्वे शुभदं भवति॥ अन्यद्व्याह॥ स्तनवदलंबा यस्य कंठे ज्ञेया मणयः स विज्ञेयः॥ एकमणिः शुभफलकृदुत्तमः
मध्ये द्वित्रिमणयो योगकेः कंठे ग्रीवायां छागानां स्तनवत् लंबमाना यथा यो लंबकास्ते मणयो ज्ञेयास्तत्र एकमणिः केन मणि
ना युक्तोऽयः छागः सशुभफलकृत् शुभं फलं करोति। द्वित्रिमणयो द्वित्रिमणयो वा ते धन्यतराः अतिशुभदा इत्यर्थः॥ अन्यद
प्याह॥ मुंडाः सर्वे शुभदाः सर्वसिता सर्वकृष्णदेहाश्च। अर्धासिताः सिता अर्धधन्याः कपिलार्धकृष्णाश्च॥ मुंडाः शृंग
रहिताः सर्वे सकलाश्छागाः शुभदाः॥ तथा सर्वसिताः सर्वशुक्लाश्च शुभदा एव॥ सर्वकृष्णदेहाः तेऽपि असित इति
शब्दः॥ शुभदा एवेति अर्धासिताः असितार्धा अर्धश्वेताः ते सर्व एव धन्याः प्रशस्ताः तथार्धकपिला अर्धकृ
ष्णाश्च धन्या एव॥ अधुना चतुर्णां कुट्टककुटिलजटिलवामनानां लक्षणं करोति॥ तत्रादावेव कुटिकस्याह॥ विचर
ति यूथस्याग्रे प्रथमं वांभोऽवगाहते योऽजः॥ स शुभः सितमूर्धा वा मूर्धनि वा तिलकायस्य यो ज छागो यूथस्य
वृंदस्याग्रे पुरो विचरति गच्छति। प्रथममादौ वा योंभो जलमवगाहते गृह्णाति पिबति स शुभः शस्तः॥ अथवा
सितमूर्धा श्वेतशिरोयः सोऽपि शुभदः। अथवा मूर्धनि मस्तके यस्य तिलका भवंति। तिलकाः तिलिकाः शबलात षट्तिलकाद्य
र्थः। सोऽपि शुभः। एषामन्यतमलक्षणयुतः कुट्टकाख्यः॥ तथा च गर्गः। यूथाग्रे यश्चरति यस्यांभोऽस्पर्शे यजनं। मूर्धनि
वा तिलका यस्यासौ जो यूथतिवर्धनः॥ अथ कुटिलकालक्षणमाह॥ सततं कंदशरोऽवा तिलपिष्टनिभश्चताम्रदृक् कुटिल ... २५५
ः कृष्णचरणः सितो वा कृष्णो वा श्वेतचरणोयः। यश्वेतपृषतकंठः पृषता तिलकाः सितकृकंठः सपृषतः शश्वा

तिलकमूर्धा च॥ तथा चात्र तिलपिष्टनिभश्चातिलपृष्ठसदृग्वर्णः सशुक्लपीतवर्णमिश्रवर्णः ताम्रवर्णः लोहितनेत्रः
स शस्तः शुभः। अथ वा यः कृष्णचरणः सितपादः सितवर्णो वा यः सोऽपि शुभः। अथवा यः कृष्णवर्णः श्वेतचरणः सि
तपादः सोऽपि शुभः। एषामन्यतमलक्षणयुक्तः कुटिकाख्यः। तथा च गर्गः। श्वेतो यः कृष्णचरणः कृष्णश्वेत शफोऽपि वा॥
पालश्च श्वेलक्षणो मूर्ध्नि गलेवाथ स्यात्तादितः। अथ जटिललक्षणमाह॥ यः कृष्णांड श्वेतो मध्ये कृष्णेन भवति पटेन॥
यो वा चरति सलील्यमंदं च स शोभनश्छागः। यश्छागः कृष्णांडोऽसितवृषणः श्वेतः शुक्लवर्णः मध्ये मध्यभागकृष्णेन प
टेन युक्तोऽयः सोऽपि शुभदः॥ अथ वामनलक्षणमाह॥ ऋष्यशिरोरुहपादो यो वा प्राक्पांडुरोऽपरे नीलः। शुभदः
स शुभकृच्छागः श्लोकश्चाप्यत्र गर्गीकः॥ कृष्णशिरो नीलवर्णा मूर्धा॥ ऋष्यः प्राणिमनवीकौंस इत्युच्यते। मनवर्णा
स वर्णो भवति। तथा च व्यासमुनिः। अश्वानृष्यमनवर्णास्तु हंसवर्णे द्वयो तमः॥ व्यामिश्रयद्रोणकर्णः पांडवानदय
नक्षारेः॥ तथा च। तेष्वावद्रोणो भांति व्यामिश्रावाततरं हसः॥ सितासिता महाराज यथा व्याघ्रबलाहकाः॥ तस्मान्नी
लकशरीरशब्दो नीला इत्थश्च॥ सोऽपि शुभकृत्। यश्च प्राक्पूर्वभागे पांडुरः ईषच्छुक्लः। परपश्चिमभागे नीलः सोऽपि शुभकृ
च्छागः॥ एवमन्यतमलक्षणयुक्तो वामनाख्यः॥ तथा च गर्गः॥ ऋष्यमूर्धा नीलपादः भग्नो गौयश्च पांडुरः॥ पश्च
मे नीलवर्णस्यात्सोऽपि भर्तुर्विवृद्धिदः॥ अथास्मिन्नर्थे गर्गीकार्यं श्लोकः। तापकः साक्षात्पठंति। तं चाह॥ कुट्ट
कः कुटिकाश्च जटिलो वामनस्तथा। ते चत्वारः॥ श्रियः पुत्रान्लक्ष्मीकेन संति वे। पूर्वलक्षणाः कुट्टकः कुटि
लो जटिलो वामनश्च तथा ते ते चत्वारश्छागाः श्रियः पुत्रा लक्ष्मीसुता अलक्ष्मीकाः। लक्ष्मीरहिताः
स्थाने नानिवसंति॥ न स्थितं कुर्वंति॥ एवं शुभछागानां लक्षणयुक्तं। अथाप्रशस्तानाह॥ अथाप्रशस्ताः खरः
तुल्यनादाः प्रदीप्तपुच्छाः कुनखा विवर्णाः। निकृत्तवर्णा द्विपमस्तकाश्च भवंति। ये चासिततालुजिह्वाः॥ अथा
नंतरं अप्रशस्ताश्छागा भवंति॥ कीदृशा। खरतुल्यनादाः गर्दभसदृशारवाः प्रदीप्तपुच्छाः गलं वक्रेमल्पं
वा येषां। कुनखाः कुत्सितनखाः विवर्णा अशुभवर्णा निकृत्तवर्णाः छिन्नाः श्रोत्राः छिन्नानुरूपाभ्यां कर्णाभ्यां
द्विपमस्तकागजसदृशमूर्धानः। ये चासिततालुजिह्वाः कृष्णतालवः कृष्णरसनाश्च भवंति। ते अप्रशस्ताः॥ ॥

वा॰ सं॰ अथशुभलक्षणमाह॥ वर्णप्रशस्तैर्मणिभिश्चयुक्ता। मुण्डाश्चयेनाग्रविलोलनाश्च इति। पूजिता वेश्मनि मानवानां सौख्या
निकुर्वंति। मुण्डाश्चियं च। ये छागाः प्रशस्तैर्वर्णैः दक्षिणपार्श्वे मंडलासितं शुक्लस्य शुभफलं भवेत्येवं विधैर्वर्णैर्युक्ता
मणिभिश्च केन द्वाभ्यां त्रिभिर्वा युक्ता ये च मुंडा विषाणरहिताः ये च ताम्रविलोचनाः कृष्णलोचनाः ये नारक्तास्ता मानवानां सौख्या
२५६ न्यदृष्ट्वा जाताः शुभाः सौख्यानि यशः कीर्तिं श्रियं लक्ष्मीं कुर्वंतीति॥ ॥इति भट्टोत्पलविरचितायां संहिताविवृतौ छाग
लक्षणं नाम त्रिषष्टितमोऽध्यायः॥ ६३ ॥ ॥छ॥ अथाश्वलक्षणं व्याख्यायते। तत्र प्रदेशेतानां विनानर्थं चितायेन
। तस्मात्प्रदेशान्स्थायाति स्यते। प्रथममेव। अविज्ञातप्रदेशात्स्वभिषक् मंसुमुख्याति। प्राग्देशाद्देशविज्ञानमतोय
नेन वाजिनां॥ वक्ष्यतांते म धीनादि सिद्धिः कुर्मीमासमर्मेदा॥ त्रिकं कौन लक्ष्य योगास्नालं चनेमसं तां॥ स्तनाद्वलात्त्रिजि
ह्वाया लालु स्यात्तथा परि॥ दीर्घाद्नुबद्धाय दंष्ट्रा तासामवाय जो॥ तता दृताभ्यंजनिनलं यामुपारिवो लिरः॥
अधस्तादिज दंष्ट्राणां मध्ये तु चिबुकं स्मृतं॥ दशनोच्छादनावोष्ठौ तयोरास्यं च मध्यमे॥ प्रमाणमुन्नतस्यस्या
दूर्ध्वं घोणं मेव च॥ नासापुटाग्राग्रभागे घ्राणा घोणा द्विमध्यतः। नासावंशोद्भवे गंडौ शीर्षकं लतापारि। घा
नात् ललाटं तारपंडौ तयोर्मध्येश्चपावनं॥ नेत्रे तथोपरिस्थाने तयोः प्रच्छादने ततः। अभ्यंतरसितं शंङ्खौ मंगल
मेव च॥ कनीनिकं च तत्कोणे तथापांगोच का स्वतः। ततोऽपि परिच पक्ष्माणि अश्रुकूटं तथोपरि॥ भ्रुवौ तत परिश्वा
तुलकांधभ्रुवोरंतरं॥ कर्णकाद्वेपरि चाग्रारः कर्णांतरं भवेत्॥ तदाश्रितो मस्तकश्च कर्णत स्थित पार्श्वयोः॥
कर्णमूलेषु शंकुलास्या कर्णशंखांतरं कुटि। कर्णपार्श्वांतर शंख वष्टा बाह्य च शंखयोः॥ चिबुकस्योपरि दंतगंडा
नुपरि चितयोः। दलो गलश्च गलना ग्रीवाश्च निगालो मध्य उच्यते॥ निगालकोऽध्यो गलकं। गलवक्षः क्रोडे च हृदतं च ह्रम
ध्याबिदूर्चेव कर्णस्यांध्या - दयुले॥ बिंदू रोभयोतोः धस्तान्मध्ये कंठनिर्बंधनं। ग्रीवा बाहुंतरं ग्रीवजत्रु ग्रीवान्तरं च द्
॥ स्कंधस्य चोपरि ग्रीवा तस्याश्चोपरि केसरं॥ बाहुतो जत्रुतश्चांसाः का कंसा कुटितः। आसनं चैव धन्वं च पृष्ठं वंश २५६
स्तनः परं। पर्यंकुकुटिकासो बाहु चांसानिबंधनं॥ क्रोडाधस्तात्तथा बाहू बाहो बाह्वंतरं गलके। बाहोरभ्यंतरे
कक्षौ पार्श्वतस्तौ च वक्षसः॥ किणो चाभ्यंतरे वक्षाद्धस्तात्ततु नीयते॥ जान्वोः कपालेकं चाधो मंडिरं जानुपृ
के।

जंघे च जानुनोऽधस्तात्पृष्ठतश्च कलेमते॥ जंघा कर्णांतरे शंके चाथ दूरस्ततथाग्रतः। पृष्ठ तेचलि दूलस्य कूर्चौ तन्मध्यः
गोकर्णे। कूर्चाधस्तात् कृष्टकं च खुरसंधिस्ततः खुरः। पृष्ठतः पार्ष्णिजा पंच पार्ष्णिर्लोमशलातकं॥ त्रलमध्ये तु मं
दृक्यापीरकं च वल्वालकः। दृत्यरेनाभिवंडासुततश्च जलकं परं। दूल्यभिर्वंकोशनेन्नारामरभ्यंतरमतः॥ तदधो
मंदूतंकोशनतो मुष्कफलं ततः। अधस्तात्पांडुसंधिस्यादूरसंधिस्ततोपरि। सक्थिनी कुलसंधिश्च ईरपांडुरीद्वान्वितो
ईरूरुर्ध्वं पांडुपिंडोवक्षो मंध्योतयोः परं॥ स्फुराधो मंडिरोप्रोक्तो वांकुलं मध्यतो किणा॥ स्फुराधस्तात्पृष्ठमतं पृष्ठ
तश्चाविभावयेत्॥ गात्राद्दयं त्रिगरोग्रीवं पूर्वकायः स उच्यते॥ जघनं तु कपृष्ठं च गात्रे द्वेवापि पश्चिमं॥ प्रदेशा
मध्यमायेतु सोंतः कायप्रकीर्तिताः। शरीरस्याच षट्प्रोक्ता मुखे गात्राणि वालधिः। नवरोमाणि बालश्च केशाश्चा
न यवास्मृताः॥ व्यत्यस्ता व्यत्यमूलांत मध्यं दीर्घां धिकं तथा॥ अत्र तोलं तु यावित्ताद्दृशान दपियुक्ततः। इति प्रदेशा
व्याख्याता वाजिनो दिष्ट संप्रया॥ तान्विज्ञाय भिषक् मंत्रयुक्त्वा परीक्षतीति॥ तत्रादौ वाश्वलक्षणमाह॥ दीर्घ
ग्रीवाक्षिकूटस्त्रिकहृदयपृथुस्ताम्रताल्वोष्ठजिह्वः सूक्ष्मत्वक्केशवालः सुशफगतिमुखो ह्रस्वकर्णोष्ठपुच्छः॥ जंघा
जानूरुवृत्तः समसितदशनश्चारुसंस्थानरूपो वाजी सर्वांगशुद्धो भवति नरपतेः शत्रुनाशाय नित्यं॥ दीर्घग्रीवाक्षि
कूटः दीर्घग्रीवा शिरोधरा यस्य तथा दीर्घौ अक्षिकूटः अक्षिकूटं दृगाश्रयः त्रिकहृदयः पृथुत्रिकं कटिभागः हृदयं हृत्
स्थानं। एते पृथवो विस्तीर्णा यस्य ताम्रताल्वोष्ठजिह्वः ताम्रवर्णौ ताल्वोष्ठौ जिह्वा च यस्य सूक्ष्मत्वक्केशवालः सू
क्ष्मत्वक् केशा वालाः लक्षणकेशाः मूर्धजा वालाः पुच्छवालाः एते सूक्ष्मा यस्य। सुशफगतिमुखः शफाः पादाग्राणि गमनं
सुवक्त्रं। एतानि शोभनानि यस्य ह्रस्वकर्णोष्ठपुच्छः कर्णौ ओष्ठौ पुच्छं यस्य वा ह्रस्वानि॥ एतानि ह्र
स्वानि दीर्घाणि यस्य जंघाजानूरुवृत्तः। जानुनी प्रसिद्धे॥ ऊरू प्रसिद्धौ॥ एवमेतानि च तानि वर्तुलानि यस्य समसि
तदशनः समाः तुल्याः सिताः श्वेताः दशना दंता यस्य। चारुसंस्थानरूपः चारु रम्यं संस्थानमाकृतिः रूपं शरीरशोभना
यस्य। एवंविधो वाजी अश्वः सर्वांगशुद्धः सकलावयवलक्षणेन दोषवर्जितो नरपते राज्ञः नित्यं सर्वदा शत्रुनाशा
य रिपुनाशाय भवतीत्यर्थः। तथा च पराशरः। जघन्यमध्ये श्रेष्ठानामश्वानामायतानि भवंति॥ अंगुलानां शतं

वा॰ सं॰ दीनाविंशत्यादृशभिः स्त्रियः। परिणाहो गुल्फानिष्यात्ससभिः स सप्तसप्तभिः॥ एकार्शीतिः समासेनत्रिविधस्याथयाक्रमं॥ तथाथाष्टिश्च चतुःषष्टिरंकृ षष्टिः समुच्छ्रयः॥ द्विपंचसप्तयकृदानाविंशतिस्यान्मुखायतिः॥ श्मश्रुहीनंमुखंकांतं

२५१ प्रागल्भं तुंगनासिकं॥ ह्रस्वप्रोथंतरुश्रोत्रं रक्तगंभीरतालुकं॥ षडंगमा द्वादशमंगमूढनासापुटं ददं॥ दीर्घोध्वगम्लंग्रीवांह्रस्वकुक्षिखुरंतथा॥ विधायचंउवेगंचदंसामिदसमंस्थनं॥ दूषितांशुक्लवर्णावाश्वेतवाकृष्णमंडलं॥ अश्रुमोदकमोरोदेदु हिनश्चवर्णनवा॥ अश्विनेनोद्गा नातशायदाश्रु युद्धेतालयइति॥ तथाच॥ वर्णेनंकेनमिश्रेणवा किंचस्वर्णाभिवंग्रादि॥ स द्विन्यादुर्णतानदोषान स्तदः सर्वत्र दृश्यत इति॥ तथाचवररुचिः॥ ज्ञानंत्रैलोक्यविंदुर्मुनिभिरभिहितं लक्षणंयद्वशानांदृष्टीयत द्वद्वलादंकोविमत्कांधियानंकृपनर्वोहृद्दोनेः॥ तसमांततस्मासासमूलमधारश्च यतामत्वसंदोषत्वान तेप्रभगाश्वरगतमत्विनेः सत्वंगंधे रूपतं॥ गंमत्वतंज्ञात्वांकेरमित द्वशितेस्मस्द्वमप्रभेश्वकृष्मः शोणावल्कशोद्वाशितिकथितामूल्यवर्णास्तुरंगाः॥ तेचान्योन्यान्ययुत्येननवगंगता यांति॥ भूमोवकुलांनिंदेशस्तवचाध्याविमलपदंध्रियादृष्टसत्वानरूपः॥ अथशुभानांशुमावर्तानांलक्षणमाह॥ अश्रुपातदूनुगंरहृदंस्त्रोथदांखकदिवस्तिज्ञानुषु॥ पुच्छनाभिककुदेतथागुदसव्यकुक्षिचरणेषुवाशुभः॥ अश्रुणःपातायत्रमांः स्तपातश्चभुवोरधोभागादूनुनीप्रसिद्ध॥ गंडौमुखगंडौ। हृत हृदयं। गलं हृतं उसिद्धः॥ प्राथामुखमांतं॥ शंखोकर्णनिकटे। कटीप्रसिद्धा। बस्तिर्नाभिलिंगयोरंतरं। जानुनासंधासंधिः॥ एतेषु शुभप्रतथामुष्कावणौ। नाभीप्रसिद्धा। ककुदंबाहुरप्रभागे। स्कालिकानिकटे। गुदमपानस्थानं॥ अन्ये अर्धमुत्तिपतंति॥ अलमंजत्रुकलसंधिः। मध्यकुक्षिर्दक्षिणकुक्षिः। चरणाःपादाः। एतेषु स्थानेषुये आवर्तागतास्तेसर्वेशुभाः॥ तथाचवररुचिः॥ शंखघ्नगंडनासादनुकटककुदकोडकुक्षासनस्थः मत्याद्दजानुकर्णश्रवणगुदगलप्राथकुक्षश्रुपातेः॥ स्कणास्फिक्काकसादींविकलषणवहूसु धनाभ्यूरजातिः॥ रावर्तेरेवमेते शुभफलवर्द्धनीयाः तुरंगाः॥ अथशुभवर्तोनाहः॥ स्त्रीप्रमाणकलकर्णसंरक्षिताः पृष्ठमध्यनयनेपरिरक्षिताः॥ ओष्ठसक्थितज्ञकुक्षिपार्श्वजास्तेललाटसहिताः सुशोभनाः॥ प्रमाणमुत्तरोष्ठतलं। गलः कंठोनिगलास्यः त गोष्ठवणौ॥ एतेषु २५१

स्थानेषुवोस्थिताः पृष्ठमध्यपर्याणस्थानं। नयनोपरिभ्रूस्थानं। उष्टोदर्शनास्थानं। सक्थिपश्चाद्भागः। खुरोपरिभुजा। प्रागभागेजानूपरि। कुक्षिर्वामभागेकुक्षिः। यतः सर्वस्य गर्हितत्वमुक्तं। पार्श्वप्रसिद्धो। एतेषुस्थितागताआवर्ताःस्तेललाटसहिताःललाटावर्तसहिताः अतिशोभना। ललाटंभालं। तथा च वररुचिः। सकुक्षिप्रमाणभ्रुवबाहुकंठे। केशातपस्सःश्रवणोपरांध्र। ध्रुवंध्रनिगालाः धललाटदेशे शोभमज्ञासंश्रियमावदंति॥ विशेषलक्षणानि। बालार्कनिभनालहेतनकनिभावन्हितैश्वर्यवर्ध्यनं। शोभाजाभवर्णाभवतिमपि लतामवर्गदुःस्वाथदंत्रा॥ गंभीरोनं स्वर्णादिजातिचतुरंगपार्थिवासर्वकामान्नाथयात्रुरूक्षवर्णाहृशुभफलकरानिर्मितायामजाच॥ कांतिलक्षणं। अथाश्वलक्षणंभेरीशंखसिंहादुपापणिवखुरष्टिधर्मभीगनादावीणापुंस्कोकिलानामकुरपदस्वावाजिनोराजवाह्याः॥ कंठोरुः कांशुभाम्यश्वरजरवारूक्षाविच्छिन्नद्योवा॥ अन्येवंचप्रकारस्तुशुभफलकरादूनिशोकप्रदाश्च॥ अथगतिलक्षणं॥ वरितगतिविलासैर्विश्विपन्पादमुच्चैर्वत्रतिनकलगामीकृस्थयसंश्रितायं। अथचितकदखुरोग्रेदसमानोयथाश्वस्तुतालिचरणपातेस्तानिरंतस्यपातोस्थपदेनितताशोद्रमन्त्रस्यवल्कं त्रजति मृगिलामर्वाद्विवृद्धिगामं॥ मगतेमधतुरंगेयाधिरस्थानदेनसुभवतिमुरगामीज्ञात्रुनाशंचकुर्यात॥ अतमद्विपवराहश्चाष्ट्रमात्तोरगामीकपिवृषतुल्यगालिभृत्यगामीचयोश्व॥ सोदितिधनुनाशंज्ञात्रुवृद्धिंचकुर्यात्तिभवतिचनमुरवायस्वामिनः शोकदाता॥ अथसत्वगंधलक्षणं॥ वर्णावर्तप्रभागस्वरगतिसहितः सत्वगंधेरूपेतः शोचारोभिजातिस्मातेनिनयगुणेगल्लितोट्टवसनः॥ गंधर्वैर्यातुधानैर्मुनिवरप्रतिभिः स्तुत्यसत्वाप्रजास्ता स्तेचान्येद्दीनसत्वास्त्वशुचिमलरताभीरवस्तेविनिंद्याः॥ मेरेयांभोजसर्पिः क्षितिमधुमदिरावंदनोत्पलाद्यैकल्हारशोककृतानीवरतरकुसमैस्तुल्यगंधाः प्रदृष्टाः॥ येचान्येक्षारमूलक्षततमलवसाबोक्षितानिर्मीतगंधाः सत्याज्यास्तेपिनित्यं स्वरभपकलकर्माद्वानिशोकप्रदाश्च॥ इतीतिरत्नाणपृथुजघनेनेत्रयुग्मंसुवृत्तंग्रीवादीर्घासभृत्यगुणकेनपोछपृष्ठचन्द्रस्वारस्तगंभीरहृनुरविकं चारुनित्यंशोभा आरारायदिचतुरंगदीर्घमायुः सत्वावः॥ हीनोरस्काधुरांगास्तनुरथघनादीर्घस्ट्रांगदुर्घोषादुर्गंधाः सर्वगात्रेस्तनुगतिविषमर्कवकर्णोश्चपृच्छाः। दुर्गीश्रादुश्वर्गीलाविनपतितमनाभीरवोनश्वसं

बा॰ सं॰
२५८

ताः सर्वेषां स्थितानां यो वर्णस्तनुरगाः संतिष्ठन्त्यायुषस्ते॥ अथाश्वानां ध्रुवावर्तानाह॥ तेषां प्रमाण। एको ललाटे केशेषु
च ध्रुवावर्ता रंध्रोपरंध्रमूर्धसु वक्षसि चेति स्मृतौ द्वौ॥ तेषां ध्रुवावर्तानां दशानां व्याख्यानमाण एको भवति। ध्रुवावर्तः
ललाटे केशेषु च। केशान्तादधस्तान एक एव। कुक्षिनाभिमध्यभागे रंध्रस्थानं॥ तत उपरिभागे उपरंध्रस्थानं॥
उक्तं च दक्षिणाभ्यंतरे रंध्रमुपरंध्रं तथोपरि। एवं रंध्रे एको भवत्युपरंध्रे एक एवं॥ बाहुद्वये चत्वारः मूर्धनि द्वौ
उरसि द्वौ वक्षसि च द्वौ समस्तावुक्तौ॥ एवमेते दशाश्वानां ध्रुवावर्ताः॥ तथा च पराशरः। दश ध्रुवावर्ताः प्रयाणिनः
ललाटे एव॥ मूर्धनि द्वौ द्वौ वक्षसि रंध्रोपरंध्रयोर्द्वौ द्वाविति॥ अधुनाश्वानां वयोज्ञानमाह॥ षड्भिर्दन्तैः सि
ताभैर्भवति ह्ययमिश्रैस्तैः कषायोऽष्टिरब्दः संदंशैर्मध्यमान्त्यैः पतितसमुदितैश्चतुः पंचवर्षः स्यात् संदंशानुक्रमेणाथ
कपरिगुणिताः कालिकापीतशुक्लाः काचामक्षिकाशंखाच्छिद्रकं चलनं दन्तपातं च विद्यात्॥ षड्दन्तैः सिताभैर्भवति
अश्वानामधो दन्तपाल्यां द्व्याद्युपमध्यषड्दंताः संनिवेशाः भवन्ति॥ षड्भिर्दन्तैरयवर्तिभिः सिताभैः श्वेतच्छवि
भिर्द्वयमिश्र भवति। बालोश्व एकाब्द इत्यर्थः। तैरेव षड्भिर्दन्तैः कषायैः कृष्णलोहितैर्द्विवर्षो द्विवर्षः। द्वयोरपि दंतपा
ल्योः समध्यवर्तिनो॥ द्वौ दंतौ संदंशावुच्यन्ते॥ तत्पार्श्ववर्तिनमेकैकं मध्यमं॥ तयोरपि पार्श्वे द्वयमन्त्यवर्तिनमे
कैकमंत्यसंज्ञं॥ संदंशैः पतितैः समुदितैः पतितैर्वापुनरुत्थितैरन्यैस्त्र्यब्दः मध्यमैः पतितसमुदितैश्च
तुरब्दः अन्त्यैः पतितैः समुदितैः पंचाब्दः संदंशानुक्रमेणेति। संदंशानुक्रमेण संदंशपार्श्वपश्चात्कालिकाद्या
ष्यंतानि त्रिकपरिगुणिताः कार्याः त्रिभिस्त्रिभिर्वर्षैर्गुणनीयाः। एतदुक्तं भवति॥ यदा संदंशानां कालिका
भवति। यदा षडब्दः कालिका तदाकारः कालवर्णा इत्यर्थः॥ एवं मध्यमैः सकालिकैः सप्ताब्दः एवं प्रत्येकं चिन्हं संदंशा
नुक्रमेणात्रिवर्षगुणितं कार्यं। तेन संदंशानुक्रमेण पीतायां मेकादशाब्दाः पीता पीतवर्णाश्च। शुक्लायां चतुर्दशा
ब्दः शुक्लाः शुक्लवर्णाः काचायां सप्तदशाब्दः काचः काचवर्णा मक्षिकायां विंशत्यब्दः। मक्षिकावदाकृतिः। शंखायां २५८
त्रयोविंशत्यब्दः शंखाः शंखाकारा उदूखलं छिद्रं तेन षड्विंशत्यब्दः। चलनं कंपनं तेनैकोनत्रिंशदब्दः। दंतपातं
दंतपतनं। तेन द्वात्रिंशदब्दः एवं क्रमेण विज्ञानं तद्॥ तथा च वररुचिः। संदंशं मध्यमत्यं द्वयं स्युरामधःसा

BHAU DAJI MEMORIAL

तरं मर्त्यानेश्वेतं स्वब्दे कषायं पतितसमुदितं त्रिचतुःपंचकेषु॥ कीलमूलो नैकैकमब्दान्सित पीतसिताकाचमक्षिकाशं
खाच्छिद्रं चालं द्युतिश्च प्रभवति तुरगो लक्षणं वज्ञानमिति। पराशरमतेनैव द्विगुणाश्वानामायुः प्रमाणमभिहितं॥
तद्यथा॥ अथलक्ष्यादीर्घा गंभीरा अविच्छिन्नास्तिस्रः प्रोथे यस्य तस्यायुर्द्वात्रिंशदब्दानि ज्ञेयानि त्रिंशत। द्वाभ्यां विंशतिः। द्वा
भ्यां कृत्वा च दक्षिणे नाभिरेखा या द्वादशवंशाग्रमनुगता याश्च द्वात्रिंशत्यस्तिस्रो वल्लव्यो नाना विच्छिन्ना घ्नन्ति दक्षक
वंधका कृषदिकारकाजघन्यमायुरिति॥ ॥ इति भट्टोत्पलविरचितायां संहितावृत्तौ अश्वलक्षणं नामाष्ट
नुःषष्टितमोध्यायः॥ ६४॥ ॥श्री॥ अथ हस्तिलक्षणं व्याख्यायते॥ तत्र गजानां चतस्रो जातयो भवन्ति। तत्र
भद्रमन्द्रमृगमिश्राख्या स्तत्रादौ चैव भद्रलक्षणमाह॥ मध्वाभदंताः सुविभक्तदेहा न चोपदिग्धाश्च न कृशाः क्षमाश्च
श्च। गात्रैः समैश्चापसमानवंशा वराहतुल्यैर्जघनैश्च भद्राः॥ ये गजा मध्वाभदंता माक्षिकाभदंता येषां। सुविभ
क्तदेहाः शोभनं कृतविभक्ताः देहः। शरीरं येषां न चोपदिग्धा नातिस्थूलान कृशा दुर्बलाः क्षमाः कार्यक्षमाः गा
त्रैः शरीरावयवैः समैस्तुल्यैर्युक्ताश्चापसमानवंशाश्चापं धनुस्तेन समानवंशाश्चापं धनुस्तेन समानवं
शा स्तत्तुल्यपृष्ठास्थयः वराहतुल्यैः सूकरप्रतिमैर्जघनैः कटिनागैश्च ते भद्रा गजाः॥ अथ मंद्रलक्षणमाह॥ वक्षो
थ कक्षावलयः श्लथाश्च लंबोदरस्त्वग्बृहती गलश्च॥ स्थूला च कुक्षिः सह पेचकेन सैंहीदृग् मंदमतङ्गजस्य॥ वक्ष
उरः। अथ शब्दश्चार्थे कक्षावलयः कक्षाग्रदेशे नवलास्तानि मध्यस्थानि। वलयः प्रसिद्धाः। एते श्लथाः शिथिलाः लंबो
दरः प्रलंबोदरः त्वगबृहती॥ स्थूला च मांसलः कंठश्च स्थूल एव॥ कुक्षिस्थूलावृहती॥ सह पेचकेन॥ पेचकं पुच्छमूलं सिं
हीव दृक्सिंह सदृशी दृष्टिः मंदमतङ्गजस्य। मंदसंज्ञागजस्य। अथ मृगसंकीर्णयोर्लक्षणमाह॥ मृगास्तु ह्रस्वा
धरवालमेढ्रा स्तत्वन्धिर्कं ठद्विजहस्तकर्णाः स्थूलेक्षणश्चेति यथोक्त चिन्हैः संकीर्णनागा व्यतिमिश्र चिन्हाः॥ ये
गजा ह्रस्वाधरवालमेढ्रा ह्रस्वाधरा अल्पोष्ठाः कोचधरस्वा दीर्घ इति पठंति। ह्रस्ववाला ह्रस्वमेढ्रा मेढ्रं लिंगं तन्तं म
होकंठद्विजहस्तकर्णाः अंघ्रापादौ कंठगलं। द्विजा दंताः। हस्तः करः। कर्णौ श्रोत्रे एतानि तनूनि येषां स्थूलेक्ष
णानि स्थूलानि नेत्राः अथवा स्थूलेक्षणाः स्थूलतारकाः ते एते गजा मृगजातयः यथोक्त चिन्हैः संकीर्णानागाय

तिमिश्रचिन्हाय थोक्तिः। यथानिर्दिष्टैश्चिन्हैर्लक्षणैर्भद्रमंद्रमृगाणां संबंधिभिर्व्यतिकीर्णा नागा गजाः संकीर्णाः
बा॰ सं॰ ।अथैतेषां प्रमाणान्याह॥ पंचोन्नतिः सप्त मृगस्य दैर्घ्यमष्टौ च हस्ताः परिणाहमानं॥ एकद्विवृद्धावथ मंद्र
भद्रौ संकीर्णनागोऽनियतप्रमाणः॥ मृगाख्यस्य गजस्य पंचोन्नतिः पंच हस्तान् दैर्घ्यं पृष्ठमूलात्कुंभं यावत्सप्त हस्ताः
२५०. दैर्घ्यं। अष्टौ हस्ताः परिणाहमानं परिणाहो मध्यपरिधिः। एकद्विवृद्धावथ मंद्रभद्राविति। एकवृद्ध्या मंद्रो द्वि
वृद्ध्या भद्रः। एतदुक्तं भवति। मंद्रस्य षडुन्नतिरष्टौ दैर्घ्यं। नव परिणाहः। भद्रस्य सप्तोन्नतिः नव दैर्घ्यं। दश परिणा
हः। संकीर्णनागः। संकीर्णाख्यो गजः अनियतप्रमाणः अनिश्चितप्रमाण इत्यर्थः। व्यामिश्रप्रमाणो भवति।
त्रयाणां भद्रादीनां यल्लक्षणमुक्तं। तन्मिश्रं तस्य भवति॥ तथा च पराशरः। परिणाहो दश समा नवायामः सप्त
च्छ्रयः समुद्दिष्टप्रमाणस्य नागस्य समुदाहृतः। शेषाल्पसमभ्यर्गाणां मध्यमामध्यमोन्नतिः। अल्पः स्वल्पाद्वि
नः स्याद्धीनान्यान समुन्नतिः मुखाद्दृष्टे च नकं दैर्घ्यं पृष्ठपार्श्वादिशनं आनयद्दृश्यः। पादाद्विति यावद्दासनं ता
न्येतेषां वर्णमदलक्षणमाह॥ भद्रस्य वर्णो हरितो मदश्च मंद्रस्य हारिद्रकसन्निकाशः। कृष्णो मदश्चाभिहि
तो मृगस्य संकीर्णनागस्य मदो विमिश्रः॥ भद्राख्यस्य गजस्य वर्णो हरितः शुकवर्णः मदश्च हरितः मंद्रगजस्य म
दो वर्णश्च हारिद्रकसन्निकाशः हरिद्रया रक्तं हारिद्रं। तत्सन्निकाशः सदृशः। कृष्णवर्णो मदश्चाभिहितः कथितः संकी
र्णनागस्य संकीर्णाख्यस्य गजस्य मदो वर्णश्च विमिश्रः। व्यामिश्रो वर्णो भवति॥ अथ शुभलक्षणान्याह॥ ताम्रो
ष्ठतालुवदना। कलविंकनेत्राः स्निग्धोन्नताग्रदशनाः पृथुलायतास्याः। चापोन्नतायतनिगूढनिमग्नवंशास्त
न्वेकरोमचितकूर्मसमानकुंभाः॥ विस्तीर्णकर्णहनुनाभिललाटगुह्याः कूर्मोन्नतद्विनवविंशतिकैर्नखैश्च। रेखा
त्रयोपचितवृत्तकराः। सुवाला धन्याः सुगंधिमदपुष्करमारुताश्च॥ ताम्रोष्ठतालुवदना इति॥ येषां ताम्रौ
ष्ठतालुवदनाः ताम्रवर्णानि लोहितान्योष्ठतालुवदनानि येषां॥ ईषन्मधुरं तालु गम्भीरं वदनं मुखं कलविं २५०
कनेत्राः कलविंका यामचटकाः तन्नेत्रतुल्यनेत्रनयना येषां। स्निग्धाग्रदशनाः सस्नेहा उन्नताग्रा उच्चप्रांता दश
ना दंता येषां। पृथुलायतास्याः। पृथुलं विस्तीर्णमायतं दीर्घं चास्यं मुखं येषां। चापोन्नतायतनिगूढनिमग्न

वंशाः चापवच्छरासनवत्क्रमेणोन्नत उच्च आयतो दीर्घो निगूढो। उल्बणः सुश्लिष्टसंधिर्निमग्नो नात्युन्नतो वंशः
पृष्ठास्थि येषां। तन्वेकरोमचितं कूर्मसमानकुंभाः तनुभिरल्पैरेकरोमचितैरेककूपोत्थितैः रोमभिश्चितौ संयुक्तौ कू
र्मसमानौ कूर्मसदृशौ मध्योन्नतौ कुंभौ येषां। ते गजा धन्याः। विस्तीर्णकर्णेति। कर्णौ श्रोत्रे हनुर्नाम प्रसिद्धं॥ नाभिरपु
दः ललाटं। मुखमपृष्ठं। गुह्यं लिंगं॥ एतानि विस्तीर्णानि येषां तथा कूर्मोन्नतैः कूर्मवद्वृत्तैः मध्योन्नतैर्द्विनवा
केरष्टादशभिर्विंशतिकैर्वा नखैः करुहैरुपलक्षिताः। तथा च पराशरः। विंशत्यष्टादश नखाः स्निग्धाः कूर्मसमा
हृता गजानां पूजिताः पादाये च स्मृतकं चाविकाः रेखात्रयोपचितवृत्तकराः रेखात्रयेण दैर्घ्यस्थितेनोपचितायुः
क्ताः वृत्ता वर्तुलाः करा हस्ता येषां। सुवालाः शोभनतनुवालाः। सुगंधिमदपुष्करमारुताश्च सुगंधिः शोभनगंधः
मदो दानं तथा पुष्करमारुतः करप्रांतवातो येषां ते गजा धन्या इति। अन्यदप्याह॥ दीर्घांगुलिरक्तपुष्कराः सजलां
भोदनिनादबृंहणाः। बृहदायतवृत्तकंधरा धन्या भूमिपतेर्मतंगजाः। गजानां करप्रांतमांसपदसंगुलिर्वा
च्या। करप्रांतं सकं पुष्करमुच्यते॥ तत्रांगुलिर्दीर्घा रक्तं च पुष्करं येषां। तथा सजलस्य जलसंयुक्तस्याम्भोदस्य मे
घस्याम्भोनिनादः शब्दः तद्वद्बृंहणं गलगर्जितं येषां बृहतो विस्तीर्णा आयता दीर्घा वृत्ता वर्तुला कंधरा शिरो
धरा येषां। ते मतंगजा हस्तिनो भूमिपालराज्ञो धन्याः शुभा इति॥ अथाशुभलक्षणान्याह॥ निर्मदाभ्यधिक
हीननखांगान्कुब्जवामनकमेषविषाणान्॥ दृश्यकोशफलपुष्करदीनान् श्यावनीलशबलासिततालून्॥ स
ल्पवक्त्ररुहमत्कुणषंढान् हस्तिनीं च गजलक्षणयुक्तां गर्भिणीं च नृपतिः परदेशं प्रापयेदतिविरूपफलास्ते॥
निर्मदेति। ये गजा निर्मदा मदरहिताः न कदाचिदपि प्रमत्ता भवंति॥ तान्यांश्चाभ्यधिकहीननखांगान् अभ्य
धिकाद्धीनाश्च करुहा नखाः अंगान्यवयवाश्च येषां। नखा अष्टादशाभ्यतनविंशतेरधिकाः अंगानि काया
नुसारेण परिकल्प्यानि। तथा यश्च कुब्जः तथा यश्च वामनः। मेषविषाणः मेषविषाणसदृशौ विषाणौ दंतौ
यस्य। तथा च। विषाणं च वा तच्छृंगं विषाणो दंत उच्यते। तान्कुब्जवामनकमेषविषाणान् दृश्यदृश्यमाने
कोशफलकवर्णौ। येषां पुष्करं करप्रांतं पद्माकारं तेन दीनान् त्रहितान्। श्यावं मलिनं नीलं काचाभं शबलं व्यामि

श्रंशुक्लवर्णरूक्षवर्णमामितं रूक्षवा तान्येषां तनपि। तथा मस्वल्पवच्छरुदंता मृखलेमानिवार्येषा मकुणाख्यश्चेतरक्षित
बा॰ सं॰ ।तथा च सर्वलक्षणसंपूर्णो दंतैस्तु परिवर्जितो। मत्कुणः स समाख्यातः संग्रामे प्राणघातकः। वृश्चगात्रस्तस्य लक्षणं
पादयोः संनिकर्षः स्याद्धस्तिनागस्य गच्छतः नरांशांश्च नियुञ्जल्लक्षणं दोषितं। तथा च। आरक्तभग्नधिकं यस्यापि
२६० स्फुरेण स्फुलोतरं। विकृतः सविनिर्दिष्टो दुर्गतिर्निमित्तो हि सः। एवं विध्यान्याच॥ गजास्त्वान्यतीतान्परदेशं प्राप
यंत्यादनयंत॥ इतिनीकृणीनां च दुःखगजलक्षणं युक्तं स्फुरदंतान मदापित्यर्थः। गर्भिणी। गर्भसंयुतां च नयंगजा
परदेशं प्रापयेत। यत स्ते गजाः अनिविरूपफलादुष्टफलदा इति॥ ॥इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ
हस्तिलक्षणं नाम पंचषष्टितमोध्यायः॥ ६५॥ ॥श्रीः॥ अथ पुरुषलक्षणं व्याख्यायते॥ तत्रादावेवाभिधेयार्थस्य
संग्रहमाह॥ उन्मानमानगतिसंहतिसारवर्णस्नेहस्वरप्रकृतिसत्वमनूकमादौ। क्षेत्रं मृजां च विधिवत्कुशलोवलो
क्य सामुद्रविद्वदति यातमनागतं वा॥१॥ उन्मानं मानं च गतिश्च संहतिश्च सारश्च वर्णश्च स्नेहश्च स्वरश्च प्रकृतिश्च
सत्वं च तत॥ उन्मानमानगतिसंहतिसारवर्णस्नेहस्वरप्रकृतिसत्वं॥ न केवलमुन्मानमानादि यावदनूकं क्षेत्रं मृ
जां चादौ प्रथमं विधिवद्यथावत्कुशलो दक्षोगाविलोक्य निरूप्य॥ कोसौ सामुद्रवित। वदति कथयति। यातमतीतं काल
मित्यनागतं फलं न केवलं यातं॥ यातमनागतमप्याह॥ अत्र केचिदन्यं प्रकृतिमर्यादितमयामतमन्यार्येणव्याख्यातं
।एवं नराणां प्रकृतिः प्रदिष्टा यल्लक्षणज्ञाः प्रवदंति सत्वमिति। तस्मात्सत्वाढ्याः शांतिं स्पृशंति। नातीत्स्यत उत्पद्यते। स
त्वं नाम तत्धर्मः यस्मिन्सति न कश्चिद्दुःखमुत्पद्यते। न कस्यामप्यावस्थायां विषादः समुत्पद्यते। तत्सत्वमन्य
स्ते॥ कुशलाः॥ तथा च॥ एकाकिनि वने वामस्यरालक्षणपर्वतेति शार्दूलं। सत्वाढ्यिते मृगपतौ राजेंति गिरः परिशामं
ति। तथा चाचार्येणानंतरमेव पंचपुरुषलक्षणे सत्वमन्यदेव प्रदर्शितं॥ तद्वानुमहाभूतः प्रकृतिद्युतिवर्णसत्वरू
पाद्येरिति। तथा च सत्वमहीनं सूर्यादिति। तथा सौमान्सत्वगुरुत्वधान्द्युति। तस्मादुक्तं। तस्मात्सत्वमितिनातिरिच्यते २६०
अपरेत्वथाय कंति॥ प्रकृतिपश्चतत्तो स्तिंतकांमति। प्रकृतिश्चनचार्य उपायान। यतो वक्ष्यस्याः प्रकृत्यायउन्मादि
प्रकृत्यंतसामासिकस्येदं तत्र मांकृमत्वेव प्रकृतिं प्रकृतिरिति। तत्रोदितं त्वं। सत्वमित्येतज्जननसंगृह्णीतं स्यादिति सूक्ष्म

क्ष्यते। उन्मानमिति। ऊर्ध्वमंगुल्यादिकं मानमुन्मानं। तथा च कात्यायनः। ऊर्ध्वमानं किलोन्मानं मानं तुल्यया धृतं। उन
मानमिति॥ अष्टशतं षण्णवतिः परिमाणं चतुरशीतिरिति पुंसां। उत्तमसमहीनानामंगुलसंख्यामानेनेति। मा
नंतुलामानं। भारार्धतनुः सुखभाक् तुलितो दुःखभाग्भवत्यूनः। भारोतीवाढ्यानामध्यार्थः सर्वधरणीशेति। गति
गमितं शाद्वलाद्रिकलापि समवृद्धिपगामिनीनां॥ तुल्या भवंति। गतिभिः द्विपवृषाणां च भूपायेषां च अन्यत्रादिष्टं नाम तत्र
यत्नं। पतिश्च रामहत परिप्लुतगादिरिहादि इति। संहतिरिति संहतिर्घनता॥ तथा सुश्लक्ष्माणि पंचदशनांगुलिरवर्वकेशाः
सांकलवांकरदाश्च नदुःखिता नलस्थाय संघातद्रति च सुश्लिष्टा संधिता सुखभाजो भवंतीति। सारइति। सारभवंति
च सारा मदोमज्जात्वगस्थिशुक्रानि रुधिरमांसानि चेति। प्राणभृतां तत्समासफलमिति वर्णः। तत्रांतपादकरतालुधरोष्ठ
जिह्वारक्तानखाश्चरक्तसमसुखावहति। तथा द्युतिमान्वर्णः स्निग्धः क्षितिपानां मध्यमः सुतार्थवतां॥ रूक्षोपर
हीनानां शुद्धवान्योन्यसंकीर्णइति स्नेहः स्निग्धता सा त्वक्ज्ञः पंचसुलक्ष्या वाग्जिह्वादंतनेत्रनखसंस्थः सुतधनसौ
भाग्ययुताः स्निग्धैस्तैर्नधनारूक्षैरिति। स्वरः शब्दः करिवृषभरथौघभेरीमृदंगसिंहाब्दनिःस्वना भूपाः। गर्दभ
जर्जररूक्षस्वराश्च धनसौख्यसंत्यक्ताः। प्रकृतिः भूजलाग्निखानिलानां बलसुरनररक्षःपिशाचपाशुपतभुजगसत्वेन
भवति पुरुषोलक्षणमष्टधेति॥ तेषां महीश्वराः शुभपुष्पगंधिन्याद्येवं नराणां प्रकृतिः प्रतिष्ठा॥ यल्लक्ष
णज्ञाः प्रवदंति सत्वमिति। सत्वं पंचपुरुषलक्षणोक्तं। प्रावप्रतिपादितमेव। एवं नराणां प्रकृतिः प्रतिष्ठा यल्ल
क्षणज्ञाः प्रवदंति सत्वमिति॥ अनूकमित्यतीतजन्मांतरगत इत्यनूकाख्या साध्यमनूकं च स्वांगकदाशादृ
कसिंहगरुडमुखाः प्रतिलप्ति प्रतापार्जितरिपवो मानवेंद्राश्च॥ अनूकं प्रकृतिनिरोधेणोवा नमास्यते॥ प्रकृ
तिश्वांतरं प्रदर्शितास्ते त्रपादोसकगुल्फो प्रथमं प्रादृष्ट्वा जंघेद्वितीयं च सजानुचक्रो। मेढ्रोरुमुष्काश्च ततस्तृ
तीयं नाभिः कटिश्चेति चतुर्थमाहुः। उदरं वदंतीति पंचमं हृदयं षष्ठमत स्तनान्वितः। अथ सप्तमं जत्रुणीकथयं
त्यष्टमं ओष्ठकंधरे। नवमं नयनं च सभ्रूणि सललाटं दशमं शिरस्तथेति॥ इत्यादीन्याणि। मृजां चेति। मृजा
नाम महाभूतमयीछाया। छायाः शुभाशुभफलानि निवेदयंति लक्ष्या मनुष्यपशुपक्षिषु लक्षणज्ञैः॥

तेजोगुणानबहिरपिप्रविकाशयंतंप्रदीपप्रभास्फटिकरत्नघटस्थितेवाता। नद्याचज्ञापयपुत्रेणप्रद्गणांयद्गुधाछा
याप्रोक्ता॥ येच्छायाप्रभासेवबहुधासाप्रकीर्तिता। तस्याश्चच्छायाप्रभसंसाचनकादौमाविदीविनर्निति॥ अत्राचार्यःपा
दात्प्रभृतिमूर्धांतंलक्षणानिवक्ष्यति। तत्रादावेवपादयोर्लक्षणमाह॥ अस्वेदनौमृदुतलौकमलोदराभौश्लि
ष्टांगुलीरुचिरताम्रनखौसुपार्ष्णी। उष्णौशिराविरहितौनिगूढगुल्फौकूर्मोन्नतौचचरणौमनुजेश्वरस्य। एवंविधौ
चरणौपादौमनुजेश्वरस्यराज्ञःकादृशौ॥ अस्वेदनौस्वेदवर्जितौ। मृदुनामार्दवयुक्तेतलेययोः। कमलोदराभौ।
कमलस्यपद्मस्योदरंगर्भमभ्यंतरंतत्सदृशाभाकांतिर्ययोः। श्लिष्टांगुलीनयनांगुलियुक्तौ। रुचिरताम्रनखौ
गस्ताम्रनखाग्रवर्णादीप्तानखाश्चययोः। क्वचिन्दीधिरपार्ष्णीनखावितिपठंति। सुपार्ष्णीपार्ष्णीययोःसुपार्ष्णि
शोभनपार्ष्णीपार्ष्णिरिवाख्येनपश्चाद्गुल्फभागमन्यते। उष्णावुष्णस्पर्शौ। शिराविरहितौशिराभिर्वर्जितौ। निगूढगु
ल्फौनिगूढौगुल्फौययोः। कूर्मोन्नतौ। कूर्मपृष्ठाकारौ। तथाभूतौचरणौ। मनुजानामीश्वरस्यमनुष्या
णामाधीश्वरःप्रभुरिति॥ तथाचसमुद्रः। पादैःसमांसैःसुस्निग्धैःसोष्णैःस्निग्धैःसुशोभनैः। उन्नतैःश्वरादि
तैःसुरारोद्भवश्चपार्थिवः। तथाचगर्गः। पद्मरक्तोत्पलनिभैस्तथाक्षतसंनिभैः। नृपाःपादतलैर्ज्ञेयास्तावन्योयमुस
भागिनाः। तथान्येषाशुभलक्षणान्याह॥ शूर्पाकारविरूक्षपाण्डुरनखौवक्रौशिरासंततौसंशुष्कौविरलांगुलीचचरणौ
दारिद्र्यदुःखप्रदौ। मार्गायोत्कटकौकषायसदृशौवंशस्यविच्छित्तिदौब्रह्मघ्नौपरिपक्वमृद्द्युतितलौपीताव
गम्यारतौ॥ यौचरणौपादौशूर्पाकारौशूर्पाकारावितिरूक्षौविरूक्षौस्निग्धौपाण्डुरनखौ॥ पाण्डुराःशुक्लाभान
खाययोः। वक्रौस्थितिदीर्घौवा। शिरासंततौशिराबहुलौ। संशुष्कौ। मांसरहितौ। विरलांगुलीच॥ विरलाविस्तृता
अंगुल्यःशाखाययोस्तथाभूतौ॥ दारिद्र्यदुःखप्रदौनिर्धनत्वं। दारिद्र्यंदुःखंचदत्तः। तथाचसमुद्रः। शूर्पा
कारैस्तथाभग्नैर्वक्रैःशुष्कैःशिराततैः। रूक्षैःपाण्डुरसैश्चरणैरतिदुःखिताः। मार्गायोत्कटकाविति। उ २६१
त्कटौमध्यादुन्नतौपादुकाकारौमार्गायाध्वनिरतौभवतः। तथाचकषायसदृशौतद्वर्णौकषायसदृशौवंशस्यकुलस्य
विच्छित्तिदौविनाशकरौ। परिपक्वयामृदयामृत्तलयोर्द्युतिःकांतिर्ययोस्तौब्रह्मघ्नौब्रह्महत्याकरौ।

पातीपीतवर्णौअगम्यासुस्त्रीषुरतौसक्तावित्यर्थः। तथाचगर्गः। उत्कटावध्वनिरतौकषायौकुलनाशनौ। ब्रह्मघ्ना
म्रघ्नमृदुवर्णौअतिपीतावगम्यदौ॥ अथजंघोरुजानूनांलक्षणमाह॥ प्रविरलतनुरोमवृत्तजंघाद्विरदकरप्रति
मैर्वरोरुभिश्च। उपचितसमजानवश्चभूपाधनरहितास्त्वसृगालतुल्यजंघाः॥ प्रविरलैरघनैस्तनुभिःसूक्ष्मैरो
मभिर्वृत्तेवर्तुलेजंघेययोः। तथाचरोरुभिः। श्रेष्ठैरूरुभिर्द्विरदकरप्रतिमैर्गजहस्तसदृशैरुपलक्षिताः। उप
चितौसमांसलौसमांसाविषमौजानूययोस्तेभूपाराजानः। श्वसृगालतुल्यजंघाःश्वसृगालानांचतुल्याःसदृ
शाजंघायेषांतेधनरहितादरिद्राभवंति। तथाचसमुद्रः। जंघाभिरतिवृत्ताभिरैश्वर्यमभिनिर्दिशेत्। श्वगा
लजंघाःदुःखार्त्ताःश्वजंघानित्यमध्वगाः। अथजंघयोरोमलक्षणमाह॥ रोमैकैकंकूपकेपार्थिवानांद्वेद्वेज्ञेयं
पंडितःश्रोत्रियाणां॥ त्र्याद्यैर्निःस्वामानवादुःखभाजःकेशाश्चैवंनिंदिताःपूजिताश्च॥ एकैकंरोमकूपकेपार्थिवा
नांराज्ञांभवति॥ द्वेद्वेरोमणीपंडितानांविदुषांश्रोत्रियाणांनियमतोभवतः। त्र्याद्यैरोमभिस्त्रिभिश्चतुर्भिर्वाकूप
केनवानराःनिःस्वानिर्धनादुःखभाजश्चभवंति। एवमनेनप्रकारेणकेशामूर्धजानिंदितागर्हिताःपूजिताश्चभवं
ति। तथाचा॥ रोमशोभनजंघाभिर्दुःखदारिद्र्यभागिनः। एकरोमाभवेद्राजाद्विरोमश्चमहाधनः॥ त्रिरोमाबहु
रोमाचनरोभाग्यविवर्जितः। अथजानुलक्षणमाह॥ निर्मांसजानुर्म्रियतेप्रवासेसौभाग्यमल्पैर्विकटैर्दरि
द्राः। स्त्रीनिर्जिताभवंतिनिम्नगतैर्राज्यंसमांसैश्चमहद्भिरायुः॥ निर्मांसेमांसरहितेजानुनीयस्यसप्रवासेपथिम्रि
यते। अल्पैःस्वल्पैःसूक्ष्मैःस्तनुभिःसौभाग्यं। विकटैरतिविस्तीर्णैर्दरिद्रानिर्धनाभवंति। निम्नैर्जानुभिःस्त्रीनिर्जिता
भार्याजिताभवंति। मांसैर्मांसयुक्तैःराज्यंस्फलंभवति। महद्भिर्रतिस्थूलैरायुर्दीर्घितंबहुभवति। तथाचनिर्मां
सजानुनीयस्यप्रवासम्रियतेनसः। अल्पैर्भवंतिसौभाग्यंविकटैश्चदरिद्रता॥ स्त्रीजितःस्यात्तथानिम्नैर्मांस
युतैर्नराधिपः। आतिस्थूलैश्चिरंकालंजीवेदैश्वर्यसंयुतः॥ अथलिंगलक्षणमाह॥ लिंगेल्पेधनवानपत्यरहि
तःस्थूलेविहीनोधनैर्मेढ्रेवामनतेसुतार्थरहितोवक्रेन्यथापुत्रवान्। दारिद्र्यंविनतेत्वधोन्यतनयोल्पैस्तु
जेसरासंतते। स्थूलग्रंथियुतेसुखीमृदुकरोयंतंप्रमेहादिभिः। अल्पेलिंगेमेढ्रेधनवान्वित्तवानपत्यरहि
तश्च।

सा॰ सं॰ पुत्रवर्जितो भवति। अतिस्थूललिंगो धनैर्हीनो दरिद्रो भवति। मेढ्रलिंगे वामनते वामभागभागाविनते सुतैः पुत्रैर्धने-
न रहितो वर्जितः। अन्यथा। वक्रो दक्षिणविनते पुत्रवान् भवति। अधोभागविनतलिंगे दारिद्र्यानि धनवान् भवति॥
शिरासंततलिंगा बहुकुले यतनयः स्यात्पुत्रः स्थूलेनातिबहुलाग्रंथिना संयुक्ते सर्वासुखभाक् भवति। मृदुलिंगे-
२६२ न मनुष्यप्रमेदाः शिभिः। मूत्रकृच्छ्रगगारोगं कुर्वीतः म्रियत इत्यर्थः। अत्रैवान्यलक्षणमाह॥ कोशानिगूढैर्भूपा
दीर्घैर्भग्नैश्चाविलपरिणाहः। ऋजुवृत्तशेपसौ लघुशिरालशिराश्च धनवंतः कोशोन्नतमणिभिः स्त्रीणां तथानिगूढकोश-
छादितं लिंगं भूपा राजानो भवंति। शिरालिंगैश्च स्फुटितैर्वितपरिद्धीना निर्धना भवंति। ऊर्ध्वलिंगा ऋजुस्पष्टवृत्तंच
तुंडाकारलिंगं येषां ते ऋजुवृत्तलिंगाः। तथा लघुशिरालघुशिराश्च स्थूलाग्राशिरासंतताश्च लिंगं येषां ते धनवंतो
विनयवंतः। तथा च दक्षिणावर्तलिंगो यः स भवेत्पुत्रवान्नरः। वामवर्तेन थाकन्याभुन्न्याः भवंति च॥ स्थूलैः शिरालैः
लिंगैर्नरा दरिद्रभाजनः॥ ऋजुभिर्वर्तुलैर्लिंगैः पुरुषाः सुखभागिनः। यस्य पार्श्वे च विस्तस्य भूमिस्पर्शति मेढ्रनं॥ दुः-
खितस्तु विज्ञानीयात नरो दारिद्र्यभाजनः॥ भूमौ पादापविश्यस्य ... मेढ्रनं॥ भोगवान् स तु विज्ञेयस्त-
थातुरगमेढ्रनः॥ स्थूलग्रंथियुते लिंगे नरो नित्यं सुखभाग्भवेत्॥ लिंगेन मृदुनामत्यैर्विध्यते कृशपादितः॥ अथ
वृषभेण लक्षणमाह॥ अकालमृत्युरेकवृषणो विषमस्त्रीचंचलः समैः क्षितिपः॥ ह्रस्वायुश्चोद्बद्धैः प्रलंबवृ-
षणस्य शतमायुः॥ एकवृषणे एकांडे जलमृत्युर्भवति॥ जलमध्ये म्रियते। विषमैरतुल्यैर्वृषणैः स्त्रीचंचलः।
स्त्रीषु चंचलः कामुको भवति॥ समैस्तुल्यैः क्षितिपो राजा भवेत्॥ उद्बद्धैरूर्ध्वसंलग्नैर्ह्रस्वायुः स्वल्पजीवितः। प्रलं-
बो वृषणो यस्य स प्रलंबवृषणस्तस्य शतमायुः शतं वर्षाणि जीवति॥ तथा च। एकांडो जलमृत्युर्विषमैरतुल्यै-
र्वृषणैः स्त्रीचंचलः समांडो नरनाथश्च संलग्नैरल्पजीवितः। प्रलंबांडः समानां तु शतं जीवति मानवः। अथ
नामणिलक्षणमाह॥ रक्तैराढ्या मणिभिर्निर्द्रव्याः। पांडुरैश्च मलिनैश्च सुखिनः सशब्दमूत्रा निःस्वा निःश- २६२
ब्दधाराश्च॥ द्वित्रिचतुर्धाराभिः प्रदक्षिणावर्तवलितमूत्राभिः पृथ्वीपतयो ज्ञेयाः। विकीर्णमूत्राश्च धनविहीनाः
॥ एकैकमूत्रधारावलिता रूपप्रदानसुखदात्री॥ स्निग्धोन्नतसममणयो धनवनितारत्नसौक्खाराः। मणिः

भिश्च मध्यनिम्नैः कन्यापितरो भवंति निःस्वाश्च। बहुपशुभाजो मध्योन्नतैश्च नात्युल्वणैर्धनैर्नमः। रक्तैराढ्या मणिभिरिति
। लिंगस्याग्रं मणिशब्देनोच्यते। रक्तैर्लोहितमणिराढ्या ईश्वरा भवंति। पांडुरैः शुक्लाभैर्मलिनैश्च कृष्णवर्णैर्निर्द्रव्या निर्ध-
ना भवंति। सशब्दसहितं मूत्रं येषां ते सुखिनः। निःशब्दाः शब्दरहिता मूत्रधारा येषां ते निःस्वा निर्धना भवंति। द्वि-
त्रिचतुर्धाराभिरिति। द्वाभ्यां मूत्रधाराभ्यां त्रिभिर्वा चतुर्भिर्वा मूत्रधाराभिः प्रदक्षिणावर्तनवलितां वेष्टितं मूत्रं
यासां ताभिः पृथ्वीपतयो राजानो ज्ञेया ज्ञातव्याः। विकीर्णं विक्षिप्तं संस्थापतितं मूत्रं येषां ते विकीर्णमूत्रा धनविहीना
निर्धना भवंति। एकैकेति। एकैकमूत्रधारा वलिता वेष्टिता रूपदात्री भवेत् रूपं ददाति॥ न सत दात्री सुतान् पुत्रान्
ददाति। कश्चिद्रूपप्रदानः शुभदात्रीति पठति। स्निग्धोन्नतसममणयः स्निग्धाः मसृणा उन्नता उच्चाः समास्तुल्या म-
णयो येषां ते धनानां वृत्तानां वनितानां स्त्रीणां रत्नानां मणीनां च भोक्तारः स्वामिनो भवंति। मणिभिरिति। मध्यनि-
म्नैर्मध्यभागविनतैर्मणिभिः कन्यापितरः कन्याजनकाः निःस्वा निर्धनाश्च भवंति। मध्योन्नतैर्मणिभिर्मध्यभा-
गोच्चैर्बहुपशुभाजः बहूनां चतुष्पदानां भोगिनो भवंति। नात्युल्वणैरतिस्थूलैर्मणिभिर्धनिन ईश्वरा भवंति। तथा
च। रक्ताकृतिर्मणिर्यस्य समो मध्ये विराजते॥ पार्थिवः स तु विज्ञेयः समुद्रवचनं यथा॥ सुवर्णरजतप्राप्तैर्मणिप्रतिम-
सप्रभैः। प्रवालसदृशैः स्निग्धैर्मणिभिः पार्थिवो भवेत्॥ पांडुरैर्मलिनै रूक्षैः श्यावैरल्पैश्च निर्धनः॥ मूत्रधा-
रा पतनो हृदा दक्षिणावलिता यदि। पार्थिवैः स तु विज्ञेयः समुद्रवचनं यथा। द्विधारपततमूत्रं स्निग्धं शब्द-
विवर्जितं। भोगवान्स तु विज्ञेयो गवां धनानां च संशयः। बहुधारस्तथा दृष्टः सशब्दपुरुषो धनः। अधुना
बस्तिशुक्रमैथुनानां लक्षणमाह॥ पशिशुक्रबस्तिशीर्षा धनरहिता दुर्भगाश्च विज्ञेयाः। कुसुमसमगंधि
शुक्रा विज्ञातव्या महीपालाः। मधुगंधबहुचिता मत्स्यगंधा बहून्यपत्यानि॥ तनुशुक्रे स्त्रीजनकोमांस-
सुगंधो महाभागः॥ मदिरागंधे यज्वा क्षारसुगंधिरतसिदारिद्र्यं। शीघ्रमैथुनगामी दीर्घायुरतोऽन्यथाल्पा-
युः। पशिशुबस्तिशीर्षा बाहुतिनाभिशीर्षा यंत्रांतरं बस्तिः शीर्षा पशिशु ... नि मांसं येषां ते धनरहिता
दारिद्रा दुर्भगा जनानामप्रियाविज्ञेया ज्ञातव्याः। अथादेव संपूर्णबस्तिशीर्षा सुभगास्तथा च बस्ति

निर्मांसला स्निग्धवलिः पुंसां त्रयः स्युस्ते। निर्मांसा कर्कशाः क्षुद्राः स्युर्दारिद्र्यदा मताः॥ गोमायुःसदृशस्य
स्वरो भूमद्धिकस्य च॥ स भवेद्दुःखितो नित्यं धनहीनश्च मानवः। कुसुमसमगंधिशुक्र इति॥ कुसुमसमगंधं पु
ष्पतुल्यगंधं यस्य शुक्रं रेतो येषां ते महीपाला नृपा स्युर्भवेयुः॥ मधुगंध इति। मधुना क्षौद्रेण मधुतुल्यगंधशुक्रे
ण बहुवित्ताः प्रभूतधनाः मत्स्यसुगंधे मीनसदृशगंधे बहूनि प्रभूतानि अपत्यानि पुत्रा भवंति॥ तनुशुक्रस्
य रेताः स्त्रीजनककन्यानां पिता भवति। मांसगंधे मांससदृशगंधे मीनसदृशगंधे महाभोगी भोगवान्
भवति॥ मदिरागंध इति। मदिरागंधे मद्यसमगंधे शुक्रे यज्वा याज्ञिको भवेत्। क्षारसगंधे क्षारतुल्यगंधे रे
तसि शुक्रे दरिद्रो निःस्वो भवति॥ तथा च। पुष्पगंधो भवेद्राजा बहुद्रव्यो मधुगंधिनः। मत्स्यगंधः पुत्रवान्स्यात्
स्त्रीप्रजस्तनुरेतसः। मांसगंधो महाभोगी यज्वानो मदिरासमे॥ गंधः क्षारसमे यस्य निःस्वा मनुजाः स्मृताः॥
शीघ्रमैथुनगामी तिष्ठेत्प्रमाणवेयो मैथुनगमनशीलः स दीर्घायुश्चिरंजीवी भवति। अतोऽन्यथा चिरं मैथुन
गामी स्वल्पायुः॥ तथा च। शीघ्रं मैथुनगामी यः स दीर्घायुर्भवेन्नरः। चिरं मैथुनगामी यः स स्वल्पायुः प्रकीर्ति
तः॥ अथ स्फिक्लक्षणमाह। निःस्वोऽतिस्थूलस्फिक् सुमांसलस्फिक् सुखान्वितो भवति। व्याघ्रांतोऽध्यर्धस्फिक् मंडू
कस्फिक् नराधिपतिः। अतिस्थूलो स्फिग्यस्य स निःस्वो निर्धनो भवति। सुमांसस्फिक् सुस्फिना मंडूकस्फिक् नरा
धिपः। अध्यर्धस्फिक् नरोऽयं स व्याघ्रांतः प्रकीर्तितः॥ अथ कटिलक्षणमाह। सिंहकटिर्मनुजेंद्रः कपिकरभ
कटिर्धनैः परित्यक्तः। समजठरा भोगयुता घटपिठरनिभोदरा निःस्वाः॥ सिंहसदृशा कटिर्यस्य स मनुजेंद्रो राजा
भवति॥ कपिर्वानरः करभ उष्ट्रः कपिकरभसदृशकटिर्धनैर्वित्तैः परित्यक्तो वर्जितः॥ समजठरा तुल्योदरा मनु
ष्यास्तं जठरमुदरं येषां ते भोगयुता भोगिनः। घटः कुंभः पिठरं भांडविशेषः तन्निभमुदरं येषां ते निःस्वा नि
र्धनाः॥ तथा च। सिंहतुल्या तु कटिर्यस्य स नरेंद्रो न संशयः। उष्ट्रवानरतुल्याऽपि तुल्या यस्य स निर्धनः॥ स २६३
मोदरा भोगयुता विषमा निर्धनाः स्मृताः। सर्वोदरा नरा निःस्वाः स्मृताः स्वकुंभिनस्तथा॥ अथ पार्श्वकुक्ष्युदर
लक्षणमाह। अविकलपार्श्वा धनिनो निम्नैर्वक्रैश्च भोगसंत्यक्ताः। समकुक्षा भोगाढ्या निम्नाभिर्भोगसंत्यक्ताः॥

उन्नतकुक्षाः क्षितिपाः कुटिलाः स्युर्मानवा विषमकुक्षाः। सर्पोदरा दरिद्रा भवंति बह्वाशिनश्चैव॥ अविकलपार्श्वा धनिन इति
कुटिरपरिवर्तरोभागः पार्श्वशब्दवाच्यः अविकलपरिपूर्णः सुमांसलः पार्श्वो येषां ते धनिन ईश्वराः। निम्नैः पार्श्वैर्व
क्रैश्च दीर्घैर्भोगसंत्यक्ता भोगरहिताः। कुक्षिशब्देनोदरमाभागमुच्यते॥ समा तुल्या कुक्षा येषां ते भोगाढ्या भोग
युता। निम्नाभिः कुक्षाभिः भोगसंत्यक्ता भोगरहिता भवंति॥ उन्नतकुक्षा इति। उन्नता कुक्षा येषां ते क्षितिपाला
नः विषमा कुक्षा येषां ते मानवाः पुरुषाः कुटिलाः स्युर्भवेयुः। सर्पसदृशमतिदीर्घमुदरं येषां ते दरिद्रा निर्धना बह्वा
शिनः प्रभूताहारा भवंति॥ तथा च। पार्श्वैः समांसोपचितैर्धनिनो मानवाः स्मृताः। निम्नैर्वक्रैर्विषमैर्नरा भोगविव
र्जिताः। समकुक्षा भोगयुता निम्नाभिर्भोगवर्जिताः। नृपाश्चोन्नतकुक्षाः स्युर्विषमाभिर्दुराशयाः॥ अथ नाभिलक्ष
णमाह। परिमंडलोन्नताभिर्विस्तीर्णाभिश्च नाभिभिः सुखिनः। अल्पा त्वदृश्या निम्ना नाभिः क्लेशावहा भवति॥
वलिमध्यगता विषमा शूलाबाधां करोति॥ नैःस्वं चाशाठ्यं वामावर्ता करोति। मेधां प्रदक्षिणतः॥ पार्श्वा
यता चिरायुषमुपरिष्टाच्चेश्वरं गवाढ्यमधः। शतपत्रकर्णिकाभा नाभिर्मनुजेश्वरं कुरुते॥ परिमंडलोन्न
ताभिरिति। परिमंडलाभिः परिवर्तुलाभिरुन्नताभिरुच्चाभिर्विस्तीर्णाभिः पृथुलाभिश्च नाभिभिः सुखिनो
भवंति॥ अल्पा संकुचिता अदृश्या। अलक्ष्या निम्ना गंभीरा नाभिर्विस्तीर्णाभिः क्लेशावहा क्लेशप्रदा भवति। वलि
मध्यगतेति। वलीमध्यं यस्या नाभेर्गता तथा च विषमा तुल्या शूलाबाधां करोति॥ शूलं दुःखं ततोऽस्तस्य
मृत्युर्भवति। नैःस्वं निर्धनत्वं च करोति। वामावर्ता नाभिः शाठ्यं शठभावं करोति। शठः परकार्यविमुखः। तथा च
वचसा मनसा यश्च दृश्यते कार्यतत्परः। कर्मणा विपरीतश्च स शठः संप्रकीर्तितः॥ प्रदक्षिणतः प्रदक्षिणावर्ता
मेधां बुद्धिं करोति। अत्रास्य गुणा येन संस्थया बुद्धिर्विशिता। तथा च। शुश्रूषा श्रवणं चैव ग्रहणं धारणं त
था॥ ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः॥ पार्श्वायतेति। पार्श्वाभ्यामायता विस्तीर्णा चिरायुषं चिरंजी
विनं करोति। उपरिष्टादायतेश्वरं समृद्धं। अधः आयता गवाढ्यं गोभिराढ्यं करोति। शतपत्रं पद्मं तस्य कर्णिका मध्यभा
गस्तदाभा तत्सदृशी नाभिर्मनुजेश्वरं राजानं कुरुते॥ तथा च। वर्तुला विपुला उच्चा नाभिर्यस्य नरस्
य:

बा॰ सं॰

२६४ अल्पसत्त्वात अल्पनिम्नाभिः क्लेशवहा भवंति। वलिमध्यगताया नमानवस्थ वृधक्राशिण्या। वामावर्ता शाठ्यभावमुमेधांच प्र
दक्षिणा। पार्श्वायतादीर्घजीविनं धनयुक्तं तथा धत्ते। आ धाम्नो बहुलंकुर्यान्नाभिर्भोगानमल्लिनं। पद्मस्थकर्णिकातुल्या
नाभिः कुर्यान्नरेश्वरं। अथाधरमध्यवर्तिनीनां गुल्फानां लक्षणमाह। शस्त्रांतः स्त्रीभोगिनमाचार्यं बहुसुतं यथाम्
ख्यं एकद्वित्रिचतुर्भिर्वलिभिर्भवति नरपतिः भवति। विषमवलयो मनुष्या भवंत्यगम्याभिगामिनः पापाः ऋजुवल
यः सुखभाजः परदारद्वेषिणश्चैव। शस्त्रांतमिति। उदरमध्यगताभिरेकाद्यावलिभिर्यथासंख्यं यथाक्रमं
शस्त्रांताद्या भवंति। एकावली यस्योदरे भवति। सशस्त्रांतः। शस्त्रेण म्रियते। द्वाभ्यां स्त्रीभोगिनं स्त्रीलंपटं। त्रिभि
राचार्यमपदेशकारिणं। चतुर्भिर्बहुसुतं प्रभूतपुत्रं। अवलिर्वलिरहितो नरपतिः राज्ञामपि राजा भवति। विषमव
लयः इति। ये मनुष्या मानवा विषमवलयोऽसमवलयस्ते अगम्यगामिनोऽगम्यगमनशीलाः पापाश्च भवंति॥
ये च ऋजुवलयः स्पष्टवलयस्ते सुखभाजः सुखिताः। परदारद्वेषिणः परस्त्रीद्वेषा भवंति। तथा च। एकावलिः
शस्त्रमृत्युः स्त्रीभोगी द्विवलिः स्मृतः। त्रिभिराचार्यः स्याद्बहुश्चतुर्भिस्याद्बहुपुत्रः। अवलिस्तु नृपः प्रोक्तो यज्ञा
दाने कृतत्परः। विषमावलयो ये ते त्वगम्याभिगामिनः। ऋज्व्यस्तु वलयो येषां ते नराः सुखभागिनः। अथ पार्श्वल
क्षणमाह। सुभगा भवंत्यनुद्धतकुक्षयः। निर्धना विषमदीर्घैः पार्श्वैर्निमग्नैः शिरातपनयश्च नम्रकुक्षयो स्युः।
नः। वृक्षकस्तनाद्यं। अनुद्धतैः सुपृष्ठैश्च कुक्षिभिः सुभगा भवंति। विषमे रक्तपार्श्वदीर्घैश्च कुक्षिनिर्धना द्वा
भवंति। पीनैः क्रौनैः रूपाचितैः समांसलैर्निमग्नैरनुपचितैश्च कुक्षिरशिरापनयौ राजानो भवंति। ते स्युरि
ताः। तथा च। वृत्तकुक्षिः स्यादनुद्धतैः सुभगा धनभागिनः। निर्धना विषमैर्दीर्घैर्मग्नैर्मांसयुतैर्नृपाः। अथ हृदय
लक्षणमाह। हृदयं समुन्नतं पृथुलवेपनं मांसलं च नरपतीनां। अधनानां विपरीतं खररोमचितं शिरालं च
हृदयं समुन्नतं पृथु विस्तीर्णं मांसलं च नरपतीनां राज्ञां भवति। विपरीतं निम्नं विषमं संवेपनं मांसलं
धनानां दरिद्रा भवंति। तथा च। खररोमचितं रूक्षं खररोमसंयुतं शिराल कंठारमंतर्लीनं धनानां तथा
च। समुन्नतं पृथु मग्नं स्पार्शं हृदयं भवेत। विपरीतं शिरालं च रोमशं दुःखभाजिनं। अथ वक्षोलक्षणमा
ह।

सम वक्षसोऽर्थवंतः पीनैः शूराः अकिंचनास्तनुभिः। विषमं वक्षो येषां ते निःस्वाः शस्त्रनिधनाश्च। समं निम्नं ना
न्युन्नतं वक्षो येषां तेऽर्थवंतो धनिनः। पीनैः सुमांसलैः कठिनोरस्वक्षोभिः शूरा भवंति। तनुभिरल्पमांसै
रकिंचना अकिंचिनराः पुरुषा दरिद्राः। येषां तु वक्षो विषमं ते निःस्वा निर्धनाः शस्त्रनिधनाश्च। शस्त्रमृत्य
वो भवंति। तथा च। अर्थवान्समवक्षाः स्यात्पीनैः शूराः धनान्विताः। अल्पैश्चाकिंचनाः विषमैः शस्त्रमृत्यवः।
अथ जत्रुलक्षणमाह। विषमैर्विषमा जत्रुभिर्विषमाः कृशा भवंति। अस्थि संधिपरिणद्धैः अस्थ्यां संधयोऽस्थिसंधयास्तैः
परिणद्धैर्बद्धैरर्थविहीना निर्धना भवति। उन्नतैर्जत्रुभिर्यस्य स भोगी भोगवान भवति। निम्नैर्जत्रुभिर्निःस्वा निर्ध
ना भवति। पीनैः पूर्वैरेर्जत्रुभिरर्थवान धनो भवति। तथा च। जत्रुभिर्विषमैः कृशा दरिद्रा क्रमानिभः। भोगी चोन्न
तजत्रुस्यान्निम्नैर्निःस्वा यथा धनी। अथ ग्रीवालक्षणमाह। चिपिटग्रीवो निःस्वः शुष्का सशिरा च यस्य ग्रीवा
महिषग्रीवः शूरः शस्त्रांतो वृषसमग्रीवः। कंबुग्रीवो राजा प्रलंबकंठः प्रभक्षणो भवति। वृषभमहिषसमग्री
र्थवतो मत्स्यभदमनान्यत। चिपिटग्रीवा इति। चिपिटा चिपिटा यस्य ग्रीवा यस्य स निःस्वो निर्धनो भवति।
यस्य च शुष्का निर्मांसा सशिरा शिरासंतता ग्रीवा भवति स निःस्व इति। महिषसदृशग्रीवः शूरो भवति। वृष
भसमग्रीवो यो वृषतुल्यकंधरः शस्त्रांतो भवति। शस्त्रेण म्रियते। कंबुः शंखस्तत्तुल्या ग्रीवा यस्यासौ भवति कंबुग्रीवः
नाति वृत्तचितग्रीवः यस्य कंबुग्रीव स राजा नरेंद्रो भवति। प्रलंबकंठः लंबग्रीवः स प्रभक्षणो भवति प्रसंग्राही
कः। तथा च। ग्रीवा चर्तुला यस्य स नरो धनवान स्मृतः। कंबुग्रीवो नराधिपो नृपो दुःखभागतः। शुष्का यस्या
नराधिपो तेपि दुःखभागिनः। लंबग्रीवो नराधिपो त्रुटिभिकाः विशनाहत्था। निःस्व स्तु चिपिटग्रीवः शुष्कग्रीव कंधं
वच। शूरस्तु महिषग्रीवः शस्त्रांतो वृषकंधरः। पृष्ठमभग्नमस्फुटितं अरोमशं शोभनमभिवर्ततेऽर्थवतां सधना
नां भवति। अतोऽस्मादन्यद्भग्नरोमशं निर्धनानां भवतीति। मुस्निग्धं मांसलं पृष्ठमभग्नं चाप्यरोमशं। सधना
नां विपर्यस्तं निर्धनानां प्रकीर्तितं। अथ कक्षालक्षणमाह। अस्विन्नपीनोन्नतकक्षा धिसमरोमसंवृतकक्षाः
विज्ञातव्या धनिनामतोऽन्यथार्थविहीनानां। बाहुमूलतलं कक्षा इत्युच्यते। कक्षाः स्विन्ना स्वेदरहिताः

Dr. Bhau Daji Memorial २६४

ता मांसलाः उन्नताः दृढाः कूर्मांशाः समास्तुल्यास्ताभिर्युक्ताः । धनिनां मांसलत्वाणां विज्ञातव्यानीति याः । आ तास्माद्न्यथा
विपरीतलक्षणाः स्वेदनानि मांसानि म्लानि वा स्वगन्धानि विषमाणि मवर्तितानि अर्थविहीनानां धनरहितानां भवंति । त
थाच । निःस्विन्ना मांसलस्त्वाः सुगंधाःस्म संवृताः । धनिनां नितानीयानि निर्धनानामतोऽन्यथा ॥ अथ अंसलक्षण
माह ॥ निर्मांसौ तिरम न्निती भग्नावव्यान निर्धनस्यांसौ । विपुलावत्युच्छ्रितौ सुश्लिष्टौ सौख्यवीर्ययुतौ । अंसौ स्कंधौ
निर्मांसौ मांसरहितौ तौ मन्नितौ तौ मन्निवांसौ भग्नाम्युटितावल्पौ अविस्तीर्णौ निर्धनस्य दरिद्रस्य । विपुलौ वि
स्तीर्णावत्युच्छ्रितावभग्नौ सुश्लिष्टौ सुसंहतौ । सौख्यवीर्ययुतौ सुखिनां भवतः । तथा च । कृकलासंभसंकाश
भग्नसंधाश्च येऽगनस्थाः । राजानस्तु वितयासदृशाः तामद्रावलाः । निर्मांसतेमवदृशानि निर्धनस्य प्रकीर्तिताः । अथबा
हुलक्षणमाह ॥ करिकरसदृशौ वृत्तावाजानुलम्बिनौ समौ पीनौ । बाहू पृथिवीशानामधनानां रोमशौ ह्रस्वौ । बाहू
भुजौ करिकरसदृशौ गजहस्ततुल्यौ वृत्तौ वर्तुलावाजानुलम्बिनौ जानुसंप्रापिणौ समौ तुल्यौ पीनौ मांसलौ पृ
थिवीशानां राज्ञां विज्ञातव्यौ । रोमशौ रोमयुक्तौ ह्रस्वावदीर्घौ च धनानामनिर्धनानां विज्ञेयौ । तथाच । उरुबाहुः पृ
थुग्रीवो धर्मवाननुयात । दीर्घबाहुर्भवेद्राजा समं दृष्ट्वा चनं यथा ॥ प्रलंबबाहुश्च येश्वनुयात गुणसंयुतः ॥ ह्रस्वबा
हुर्भवेद्दासः परप्रेष्यकरस्तथा ॥ वामावर्तभुजा येतु येतु दीर्घभुजा नराः । संपूर्णबाहवो येतु राजानस्ते प्रकीर्ति
ता ॥ इदानीं हस्तलक्षणमाह ॥ हस्ताङ्गुलयो दीर्घाश्चिरायुषामवलिताश्च सुभगानां । मेधाविनां च सूक्ष्मा
श्चिपिटाः परकर्मनिरतानां ॥ स्थूलाभिर्धनरहिता बहिर्नताभिश्च शस्त्रनिर्याणाः । कपिसदृशकरा धनिनो व्या
घ्रोपमपाणयः पापाः । हस्तांगुलय इति अंगुल्यादहस्तांगुलयः करशाखाश्चिरायुषां दीर्घजीविनां भवंति ॥
अवलिताः अवक्रिताः सुभगानां सौभाग्यवतां भवंति । सूक्ष्मा अल्पा अंगुल्यो मेधाविनां बुद्धिम
तां भवंति । परकर्मनिरतानां परप्रेष्याणां चिपिटाश्चपटा भवंति । स्थूलाभिरतिवृद्धाभिर्धनरहिता निर्धना भ
वंति । बहिर्नताभिर्बाह्यविनताभिः शस्त्रनिर्याणाः शस्त्रेण मरणं येषां । कपिसदृशकरा वानरतुल्याः करा
धनेश्वरा भवंति । व्याघ्रोपमपाणयः व्याघ्रपाणितुल्यहस्ताः पापा भवंति । अन्यदप्याह । मणिबंध

नैर्निगूढैर्दृढैश्च सुश्लिष्टसंधिभिर्भूपाः । हीनैर्हस्तच्छेदः श्लथैः सशब्दैश्च निर्द्रव्याः । मणिबंधनशब्देन हस्तस्य
मध्यं उच्यते । निगूढैरनुल्बणैर्मणिबंधनैर्दृढैरशिथिलैः सुश्लिष्टसंधिभिः सुसंलग्नसंधिभिर्भूपा राजानो भवं
ति । हीनैर्मणिबंधनैर्हस्तच्छेदो भवति । श्लथैः शिथिलैः सशब्दैः शब्दयुक्तैर्निर्द्रव्या निर्धना भवंति । अन्य
दप्याह । पितृवित्तेन विहीना भवंति निम्नेन करतलेन नराः । संवृतनिम्नैर्धनिनः प्रोत्तानकराश्च दातारः । विषमै
र्विषमा निःस्वाः करतलैरीश्वरास्तु लाक्षाभैः । पीतैरगम्यवनिताभिगामिनो निर्धना रूक्षैः । पितृवित्तेनेति
गम्भीरेण निम्नेनानुच्चेन करतलेन हस्ततलेन पितृवित्तेन पैतृकेन धनेन विहीना रहिता भवंति । संवृतनिम्नैः सम
वर्तुलैरुन्नतैर्निम्नैर्धनिनः सधना भवंति । प्रोत्तानकराः प्रकर्षेणोत्तानं करं येषां ते दातारो दानशीला भवं
ति । विषमैरसमैः करतलैर्विषमा तवरा निःस्वा निर्धनाश्च भवंति । लाक्षाभैररिति । लोहितैः करतलैरीश्वरा धना
भवंति । पीतैः करतलैरगम्यानां वनितानां स्त्रीणामभिलाषेण गमनशीला भवंति । रूक्षैर्हस्ततलैर्निर्धना दरि
द्राः । अन्यदप्याह । तुषसदृशनखाः क्लीबाश्चिपिटैः स्फुटितैश्च वित्तसंत्यक्ताः । कुनखविवर्णैः परतर्ककाश्च
ताम्रैश्चमूपतयः । तुषसदृशा तुल्यानखा येषां ते क्लीबाः षण्ढा भवंति । चिपिटैः श्चपिटैः स्फुटितैर्भग्नैश्च
वित्तसंत्यक्ताः धनरहिता भवंति ॥ कुनखैः कुत्सितैः नखैर्विवर्णैश्च नखैः परतर्ककाः परमुखप्रेक्षिणो भवंति ।
ताम्रैस्ताम्रवर्णैश्च नखैश्चमूपतयः सेनापतयो भवंति ॥ अन्यदप्याह ॥ अंगुष्ठयवैराढ्याः सुतवंतोऽङ्गुष्ठमूल
जैश्च यवैः । दीर्घांगुलिपर्वाणः सुभगा दीर्घायुषश्चैव ॥ यवो यवाकार एव । अंगुष्ठमध्यगतैर्यवै राढ्या धनिनो
भवंति । अंगुष्ठमूलजातैर्यवैः सुतवंतः पुत्रवंतः । दीर्घाण्यंगुलिपर्वाणि येषां ते सुभगाः सौभाग्ययुता
दीर्घायुषश्चिरंजीविनश्च भवंति । अन्यदप्याह ॥ स्निग्धा निम्ना रेखा धनिनां तद्व्यत्ययेन निःस्वानां । विर
लांगुलयो निःस्वा धनसंचयिनो घनांगुलयः । स्निग्धा निर्मला निम्ना गंभीरा रेखाः करगता धनिनामीश्व
राणां भवंति । तद्व्यत्ययेन चविपरीतेनास्निग्धा निम्ना निःस्वा निर्धनानां भवंति । विरला अश्लिष्टा अंगुलयः
करशाखा येषां ते निर्धनाः । घनांगुलयो धनसंचयिनो धनार्जनशीला भवंति । अन्यदप्याह । तिस्रो रेखा

बृ॰ सं॰

मणिबंधनैराश्रिताः करतलायेगामुपते। मीनयुगांकितपाणिर्नित्यं सत्रप्रदो भवति। वज्राकारा धनिनां विद्याभाजां
तु मीनपुच्छनिभाः। शंखातपत्रशिबिकागजाश्वपद्मोपमा नृपतेः। कलशमृणालपताकांकुशोपमाभिर्भवंति
निधिपालाः। दामनिभाभिः स्याढ्याः स्वस्तिकरूपाभिरैश्वर्यं। चक्रासिपरशुतोमरशक्तिधनुःकुंतसंनिभारेखाः
२६६ कुर्वंति चमूनाथं। यज्वानमुलूखलाकाराः। मकरध्वजकोष्ठागारसंनिभाभिर्महाधनोपेताः। वेदीनिभेन चैवा
ग्निहोत्रिणो ब्रह्मतीर्थेन॥ वापीदेवकुलाद्यैर्धर्मं कुर्वंति च त्रिकोणाभिः। अंगुष्ठमूलरेखाः पुत्राः स्युर्दारिकाः
सूक्ष्माः। रेखाः प्रदेशिनिगताः शतायुषं कल्पनीयमूनाभिः। छिन्नाभिर्द्रुमपतनं बहुरेखारेखिणो निःस्वाः।
तिस्रो रेखा इति। मणिबंधनोत्थिता मणिबंधनात्प्रवृत्तास्तिस्रो रेखाः करतलोपगाः करतलमुपगताः प्रा
प्ता नृपते राज्ञो भवंति। मीनयुग्मेन मत्स्यद्वयेनांकितश्चिह्नितः पाणिर्हस्तो यस्य। स नित्यं सत्रप्रदोऽन्नदो भवति॥
यज्ञप्रद इत्यर्थः। वज्राकारा इति। वज्रं मध्यक्षाममुभयाग्रविस्तृतं। वज्राकारा धनिनां वज्राकारा वज्रसदृ
शाः करतले रेखा धनिनामीश्वराणां भवंति। मीनपुच्छनिभा मत्स्यपुच्छाकारा रेखा विद्याभाजां भवंति विद्यावंत
श्च ते भवंतीत्यर्थः। शंखः प्रसिद्धः। आतपत्रं छत्रं। शिबिका युग्यं गजो हस्ती। अश्वस्तुरगः। पद्मं कमलं। एषामु
पमास्तदाकारा रेखा नृपते राज्ञो भवंति॥ कलश इति। कुंभः मृणालं बिसं। पताका वैजयंती। अंकुशः प्रसिद्धः।
एषामेषामुपमाभिस्तदाकाराभिर्देहवर्तिभिर्निधिपालाः भूपा धनिनो भवंति। दामनिभाभी रज्ज्वाकाराभिरा
ढ्या धनिनो भवंति। स्वस्तिकश्चिह्नविशेषस्तद्रूपाभिस्तदाकृतिभिरैश्वर्यं भवति। चक्रेति। चक्रमायुधं। अ
सिः खड्गः। परशुरायुधविशेषः। कुठारस्तोमरः प्रसिद्धः। शक्तिः प्रसिद्धा। धनुश्चापं। कुंतो भल्लः। एषां संनिभा
स्तदाकारा रेखाः करतलोपगाश्चमूनाथं सेनापतिं कुर्वंति। उलूखलाकारा रेखा यज्वानं याज्ञिकं कुर्वंति। मकर २६६
ध्वजेति। मकरो जलप्राणी ध्वजश्चिह्नं। विचित्रपटांकितत्वाद्वैचित्र्यमस्य भवति। पताका ध्वजः। कोष्ठा
गारः प्रसिद्धस्त्वेषां संनिभाभिस्तुल्याभी रेखाभिर्महाधनोपेता अधिकधनिनः। ब्रह्मतीर्थमंगुष्ठमूले
ब्रह्मतीर्थेन अंगुष्ठमूलतीर्थेन वेदीनिभेन वेद्याकृतिना अग्निहोत्रिणो यज्ञमाना भवंति। वापीति। वापी प्र
सिद्धा

देवकुलं देवताप्रासादः आद्यग्रहणात्सदाव्रतनरस्थान्यकूपप्रपाग्रहणं। ते धर्मं कुर्वंति। धर्मिष्ठा भवंति। त्रिकोणाभि
शृंगाटकाकाराभिश्च रेखाभिर्धर्मं च कुर्वंति। अंगुष्ठमूले या वल्यो रेखाः स्थूलास्ताः पुत्राः सुताः। याश्च सूक्ष्मा
स्ता दारिकाः दुहितरः। रेखाः प्रदेशिनिगता इति। प्रदेशिनी अंगुष्ठानंतरा प्रदेशिनीं गता लब्धास्ता रेखा शतायुषं
शतवर्षजीविनां भवंति। ऊनाभी रेखाभिः स्वबुद्ध्या कल्पनीयं। यथा दलमध्यप्राप्ताभिः पंचाशत् अन्यत्रानुपाता
दायुषः परिकल्पना कार्या। छिन्नाभी रेखाभिर्मध्यात् छिन्नाभिर्द्रुमपतनं वृक्षपतनं भवति। बहुरेखा येषां ते बहुरे
खा निबहुले। रेखा येषां ते अरेखिणो बहुरेखा अरेखाः। अरेखिणो निःस्वा निर्धना भवंति। तथा च। मुनयस्तु निगूढैश्च
मणिबंधैः समन्विताः। दृढैश्च ... राजानस्ते प्रकीर्तिताः। दृढैश्च छिन्नपाणिः स्यात् ... दारिद्र्यभाजि
नः। निम्नं करतलं यस्य स पितृवित्तविवर्जितः। निम्नोन्नतसंवृत्तेन ... संयुतः। समुन्नतकरा ये तु दातारस्ते न
संशयः। विषमो विषमाणिः स्याल्लक्ष्म्याभिः ... अगम्यगामिनः पीतिरूक्षे दुःस्थास्ते निर्धनाः। शर्कराभाः
स्तनरक्ताः रक्ताभा निम्नवक्रा मृगाः। रक्तोष्णा ... महाधनाः। स्फुटिता धान्यरक्ताश्चैव समस्ता
द्रव्यविवर्जिताः। निर्मलैः कोमलैश्चैव ... भवंति धार्मिकाः। पांडुराः विरलाः रूक्षा अंगुल्यः करसंस्थिता येषां
ते च नराः ज्ञेयाः दुःखदारिद्र्यभाजनाः। यस्य मीनसमा रेखा कर्मसिद्धिस्तस्य वै। धनवान्मनुवित्तो बहुपुत्र
श्च मानवः। तुलायस्य तु वेदिर्वा करमध्ये प्रदृश्यते। वाणिज्यं सिद्ध्यते तस्य पुरुषस्य न संशयः। येषां पाणित
ले यस्याङ्गुलस्य तु विशेषतः। यज्ञयाजी भवेन्नित्यं बहूंश्च लभ्यमानवः। श्रीवत्स मथवापि वज्रं च मरमेव
वा। यस्य हस्ते तु दृश्येत स भवेत्पृथिवीपतिः। शक्तितोमरखड्गाभा रेखाश्चापसमा तथा। यस्य हस्ते प्रदृश्यं
ते च मनाथं च तं विदुः। दश वाप्यथवा तोलः करमध्ये तु दृश्यते। अचलं प्राप्य ते राज्यं मंडलं जनसंश्रयः। ध्वजो
वाप्यथवा शंखो दृश्यते करसंस्थिताः। धनेनांतं विज्ञानीयात समुद्रवचनं यथा। दक्षिणे तु करांगुष्ठे यवो य
स्य तु दृश्यते। सर्वविद्याप्रवक्ता सो भवतीति विनिर्दिशेत्। यस्य पाणितले रेखा कनिष्ठामूलसंभवा। गतामध्यप्रदेशिन्याः सत्ता चिरजीवितं। अंगुष्ठमूले या रेखा पुत्रास्ते परिकीर्तिताः। सूक्ष्मा कन्या वाक्दीर्घाः स

मुखचवनं यथा। छिन्नाभिर्दृढैः पनन्तं प्रभृतानि निम्नोधरः। अंगुष्ठमूलदर्शितैर्यवसंस्थानीभिर्विवरैः अथ चिबुकाधरदशना
नां लक्षणमाह। अथ निःद्वाराधरौष्ठिवर्जुकौ निर्द्रव्याणां मांसलैः धनोपेतानां बिंबोपमैरवक्रैरधरैर्भूपाः स्फुटानुभिन्नस्फुटाः।
रूक्षैः स्फुटितविखंडितविवर्णैश्च धनपरिवर्जिताः। स्निग्धा घनाश्च दशना सुतीक्ष्णदंष्ट्राः समाश्च शुभाः। अ
तिकृशदीर्घरतिचिबुकमधरस्याधोभागः अतिकृशो निर्मांसो मांसरहितो दीर्घश्चिबुको निर्द्रव्याणां दरिद्राणां भवति। मांसलश्चि
बुको धनोपेतानां सधना। अथ रक्ताः अधरोष्ठाः बिंबोपमास्तिलकोद्गिरा रक्तस्पृष्टाः भूपालानां भवंति। तनुभिर्मांसरध
रैर्निःस्वा निर्धना भवंति। आरूक्षाः रूक्षाः स्फुटितैर्भिन्नैर्विवर्णैर्लांछनैः धनपरिवर्जिता दरिद्रा भवंति
दशनादंताः स्निग्धा निर्मला घनाश्च संतता सुतीक्ष्णदंष्ट्रा येषां समाश्च सार्वतुल्याः शुभाः। मध्यभागवर्तिनो दं
तचतुष्टयस्य पार्श्ववर्तिन्यो दंष्ट्राः तथा च। निर्मांसश्चिबुको दीर्घो निर्द्रव्यस्याधोगामिनः। सुमांसलो धनोपेताव
द्ध्युच्चसमावृता। रक्तोधरो नरपतिर्धनवान् समोधरः। स्फुटो भग्नो रूक्षो मानश्च रूक्षः क्षीणश्च दुःखिताः। उन्न
तः श्वेतोद्गतश्च धनिनः सौख्यसंयुताः। पांडुविवर्णो निर्द्रव्यः कृशो दुःखसमन्विताः। कुंदकुड्मलसंकाशाः प्रका
शा दृढा निर्लेपाः ऋजवश्चानुरदनाश्च नित्यं सुस्पष्टपादिताः। दृढदंताः खरदंताः स्निग्धदंता गुणान्विताः।
करालदंतैर्विषमैर्दीर्घदंतैर्दुःखजीविनः। द्वात्रिंशद्दंता राजानः एकोनैश्चापि भोगवान्। त्रिंशद्दंता नराश्चैव सुखदुःख
भागिनः। ऊनत्रिंशच्च दशना पुरुषा दुःखजीविनः। अष्टाविंशद्दन्ताये ये ते तु दुःखस्य भागिनः। अथ जिह्वाताल्वो
र्लक्षणमाह। जिह्वा रक्ता दीर्घा श्लक्ष्णा सुसमा च भोगिनां ज्ञेया। श्वेता कृष्णा परुषा निर्द्रव्याणां तथा तालु। जिह्वा र
सना रक्ता लोहिता वर्णा दीर्घा आयामिता श्लक्ष्णा तनुप्राया सुसमा च तुल्या भोगिनां ज्ञेया ज्ञातव्या। श्वेता श्वेतवर्णा
कृष्णा असिता परुषा रूक्षा निर्द्रव्याणां दरिद्राणां भवति। तथा च। अनेनैव प्रकारेण तालु ज्ञेया। यथा जिह्वा श्लक्ष्णा
शोभना। तथा तालु रक्तमपि शोभना श्वेता रूक्षा परुषा तालुरपि शोभना। इति तथा च। रक्ता जिह्वा भवेद्यस्य सम २६७
का यदि वा भवेत्। सपापवान् स्मृता वर्ण्या कृष्णा रूक्षाथवा भवेत्। श्वेता जिह्वा नरा देव्यां शौचाचारविवर्जिता
:। पद्मपत्रसमा जिह्वा सूक्ष्मा दीर्घा सुशोभना। न स्थूला नातिविस्तीर्णा येषां ते मनुजा नृपाः। निम्नदीर्घा नरः

स्यावरक्ता स्थूला रसना यदि। सर्वविद्याप्रवक्तासौ भवेन्नात्र संशयः। कृष्णतालुर्नरो यस्तु स भवेत्कुलनाशकः। विनता
स्फुटिताय स्य तालु स्तस्य न शोभना। सिंहतालुर्नरः पार्थिवो गजतालुस्तथैव च। पद्मतालुर्भवेद्राजा श्वेततालुश्च निर्धन
:। अथास्यलक्षणमाह। वक्त्रं सौम्यं संवृतममलं श्लक्ष्णं समं च भूपानां। विपरीतं क्लेशभुजां महामुखं दुर्भगानां
च। वक्त्रमास्यं सौम्यं अनाकुलं संवृतं परिवर्तुलमविकाशितममलं निर्मलं श्लक्ष्णं। नातिमांसलं समं तुल्यं भूपा
नां राज्ञां ज्ञेयं। महामुखमतिविस्तीर्णमास्यं दुर्भगानां भवति। तथा च। सौम्यं च संवृतं वक्त्रममलं यस्य दृश्यते।
मनुजो भवेन्नित्यं विपरीतं तु निर्धनः। अथ मुखलक्षणमाह। स्त्रीमुखमनपत्यानां शाठ्यवतां मंडलं परिज्ञेयं
दीर्घं निर्द्रव्याणां भीरुमुखाः पापकर्माणः। चतुरस्रं धूर्तानां निम्नं वक्रं च तनयरहितानां। कृपणानामतिह्रस्वं
संपूर्णं भोगिनां कांतं। स्त्रीसदृशं मुखं वदनमनपत्यानामपुत्राणां भवति। मंडलं परिमंडलाकारं परिवर्तुलं शा
ठ्यवतां धूर्तसंयुक्तानां ज्ञेयं। ज्ञातः परकार्यविमुखः। दीर्घं मुखं निर्द्रव्याणां दरिद्राणां भवति। भीरुमुखा भीतस्ये
व मुखं येषां ते पापकर्माणः पापानुरता भवंति। चतुरस्रमिति। चतुरस्रं चतुःकोणं मुखं धूर्तानां परवंचनदक्षाणां
भवति। निम्नं हीनबलं अस्पष्टं वक्रं तनयरहितानामपुत्राणां भवति। अत्यन्तह्रस्वमत्यल्पं कृपणानां भवति। संपूर्णं सु
मांसलं कांतं दीप्तिमद्भोगिनां भोगवतां भवति। तथा च। स्त्रीमुखा निरपत्यानां मंडलं शाठ्यसंचितं। दीर्घं मुखं
दरिद्राणां भीरु वक्त्रा दुराढ्याः। चतुरस्रं धूर्तानां निम्नैः सुतविवर्जिताः। कृपणानां तथा ह्रस्वानि पिशुन
स्यल्पजीविनां। यन्मुखं मांसलं स्निग्धं संपूर्णं प्रियदर्शनं। वर्णाढ्यं संधिविश्लिष्टं अज्ञस्वं सुखभागिनां।
अथ श्मश्रुलक्षणमाह। अस्फुटिताग्रं स्निग्धं श्मश्रु शुभं मृदु च संनतं चैव। रक्तैः परुषैश्चौरा श्मश्रुभिर
ल्पैश्च विज्ञेयाः। श्मश्रुकूर्चं अस्फुटितं अग्रमभिन्नाग्रं स्निग्धं चारु श्लक्ष्णं मृदु कोमलं संततं सम्यक् नतं शुभं। रक्तै
र्लोहितैः परुषैः खरैरल्पैश्च स्वल्पैः श्मश्रुभिश्चौरास्तस्करा विज्ञेया ज्ञातव्याः। तथा च। स्निग्धां संस्फुटिताग्रयु
मन्नतं श्मश्रु इति। रक्तैरल्पैस्तथा रूक्षैः श्मश्रुभिस्तस्करा स्मृताः। अथ कर्णलक्षणमाह। निर्मांसैः कर्णैः पा
पमृत्यवश्चिपिटैः सुबहुभोगाः। कृपणाश्च ह्रस्वकर्णाः शंकुश्रवणाश्च भूपतयः। रोमशकर्णा दीर्घायु

वा॰ सं॰
२६५

पृथुभिश्च धनसंभोगिनो विपुलकर्णाः। क्रूरा शिरालवनद्धैः आखुकर्णा मांसलोमुखिनः निर्मांसैः कर्णैरिति। निर्मांसैर्मांस
रहितैः कर्णैः पापमृत्यव पापकर्मणा म्रियंते॥ चिपिटैर्विस्तीर्णैः सुखदुःखभोगिनश्चेति भोगिनो भवंति॥ ह्रस्वक
र्णा अल्पकर्मणाः कृपणा अटनशीला भवंति॥ शंकुश्रवणाः शंकुवत्कर्णाश्च भूपतयः सेनापतयो भवं
ति। रोमशकर्णाः सलोमश्रवणा दीर्घायुषश्चिरंजीविनो भवंति॥ विपुलकर्णा विस्तीर्णश्रोत्रा धनभोगिनो वित्त
वंतः। शिरावनद्धैः शिराव्याप्तैः क्रूरा भवंति। विषमास्यास्तु दीर्घमांसलैश्च सुखिनो भवंति। तथा च ह्रस्वकर्णाम
हाभागा महाकर्णाश्च ये नराः। आवर्तकर्णा धनिनः स्निग्धकर्णास्तथैव च॥ दीर्घायुषः शंकुकर्णास्तु दिककर्णाम
हाधनाः। सुस्थिता दीर्घकर्णाश्च कर्णास्तपस्विनः॥ निर्मांसैः पापमरणाश्चपिटैर्भोगिनो नराः। दीर्घायुषा
रोमकर्णाश्च धनिनो विपुलैः स्थूलाः। शिरावनद्धैर्विषमांसलैः सुखभोगिनः॥ अथ गंडलक्षणमाह॥ भोगीत्
निम्नगंडामंत्रीसंपूर्णगंडाश्च सुखभाजश्च कन्यासमनास्थिरस्त्रीनीरश्मना मध्य॥ छिन्नानुरूपया गम्यागामिनो
दीर्घया तु सौभाग्य॥ आकुंचितया चौरः स्त्रीमृत्युः स्याच्चापिटनाशः। धनिनो ग्रवक्रनासा दक्षिणवक्राः प्रभाल
ण्णाः क्रूराः। स्त्रजा स्वल्पच्छिद्रा सुपुटानासास भाग्यानां॥ भागीति। अनिम्नाभ्युन्नतगंडो यस्य स भोगी भोगवान्
भवति॥ यस्य संपूर्णगंडः मांसलोऽसम— मंत्रिवा भवति॥ तथा च॥ संपूर्णगंडा नृपतिभिः समांसैर्भोगिनो नराः
निम्नगंडो महादुःखी पापप्रेष्यापटीवकः कृष्य भागीति। शुकनासा। शुकसमा तदाकारनासा यस्य। अग्रकुं
चितलंबलोलितयाक्तसमुख भागभवति। श्रुश्रुत्या मांसानासा यस्य सा निरन्ना वा दीर्घायु भवति। छिन्नानुरूपय
ति छिन्नेव यानासा दृश्यते॥ सा छिन्नानुरूपया गम्यागामिनो गम्यगामन शीला भवंति। दीर्घया नासया सौ
भाग्यं भवति। आकुंचितया नासया चौरस्तस्करो भवति। चिपिटनासश्चपरंप्राणाः स्त्रीमृत्युः स्याद्भवेत्। स्त्री
तरामयतीत्यर्थः। धनिन इति। अग्रवक्राप्रांतकुटिला येषां नासा ते धनिनो वित्तान्विता दक्षिणभागवक्रनासा
येषां नासा ते धनिनो वित्तान्विता दक्षिणभागे वक्रा नासा येषां ते प्रभक्षणा असंचयशीलाः क्रूरा विषमाश्च भ
वंति। ऋज्वस्पष्टास्वल्पच्छिद्रास्यरंध्रा सुपुटा शोभनपुटा सभाग्यानां भाग्ययुतानां नासा भवंति। तथा च। शुकना २६५

स: सौख्यभागी शुष्कनासश्चिरायुषः। छिन्नानुरूपा येषां तु नासा ते गम्यगामिनः। दीर्घनासा भोगयुक्ताः अग्रवक्राधना
न्विताः। क्रूरा दक्षिणवक्रास्थस्पष्टनासा नृपोत्तमाः। स्त्रीमृत्युश्चिपटाभिः कुटिलाभिश्च तस्कराः। अथ क्षुतलक्षण
माह॥ धनिनां क्षुतं सकृत् द्वित्रिपिंडितं दीर्घादि सानुनादं च॥ दीर्घायुषां प्रमुक्तं विद्यात् संहतं चैव॥ धनिनामीश्वराणां
क्षुतं नासाद्भाव्यतं। सकृदेकवारं द्वौ त्रीन् पिंडितं द्वे पिंडितं द्वौ गुणिता त्रिपिंडितं त्रिगुणितं भवति॥ एवं केचित्। अन्ये पुनर्व्या
चक्षते। धनिनामीश्वराणां क्षुतं सकृदेकवारमेव भवति॥ दीर्घायुषां मुहुः स्याद्द्वित्रिपिंडितमेकत्र कृतं ह्रादि सानुनादं प्रमु
क्तं संहतं चेति। ये दीर्घायुषाश्चिरजीविन स्तेषां द्वि पिंडितं त्रिपिंडितं द्विगुणितं त्रिगुणितं भवति॥ तथा ह्रादि। युगपद्दूर
नोद्गत्यतामुपदत्वाद्यो धिं श्वयंतं। सनिर्ह्रादीत्यथा सानुनादं। दूरादपि श्रोतेः श्रुतिरच्चार्यमाणं श्रोत्रमुपथमुप
याति॥ सानुनादि। तथा प्रमुक्तमिति॥ दीर्घसंहतं तत्र वमनेन प्रकारेणाविद्धं वेत्तानव्यं॥ तत्रादौ गत आरंभ श्चा च सा
नेपुनः स्यायः सनंदृतः आधदर्षस्याधिभयादिष्वविरलः श्रोत्रपथं याति सम्मिलितः। य: मर्त्तन मनो भिन्नतः सम
कालदेश्यार्थानं शोभनं यस्मात् परातुरः सकृत क्षुतं भोगानतां द्विर्द्वे नायत्रिरायुषे॥ नतः स्याद्बुगनारायु
परमस्माद्रोषकमिति॥ अथ लोचनलक्षणमाह॥ पद्मदलाभिर्धनिनो रक्तांतलोचनाः श्रियोभाजः। मधु
पिंगलैर्महार्थाः मार्जारविलोचना: पापाः। हरिणाक्षा मंडललोचनाश्च जिह्मैश्च लोचनैश्चौराः। क्रूराः केकरने
त्रागजसदृश विलोचनाश्च भूपतयः। ऐश्वर्यं गंभीरैः नीलोत्पलकांतिभिश्च विद्वांसः। अतिकृष्णतारकाणाम
क्ष्णामुत्पाटनं भवति॥ मंत्रित्वं स्थूलदृशां श्यावाक्षाणां च भवति सौभाग्यं। दीना दृश्यंत्रिः स्वानां स्निग्धानिपुला
र्थं भोगवतां। पद्मदलाभि इति। पद्मदलाभैः कमलदलसदृशैर्लोचनैर्धनिनः पत्तिनो भवंति॥ रक्तांतवि
लोचना: रक्तलोहितवर्णा अंताः पर्यंता विलोचनयोर्येषां ते रक्तांतविलोचनाः। ते च श्रियोभाजो लक्ष्मीवंतः। मधु
वत्पिंगलैर्नयनैर्महार्थमहाधनिनो लक्ष्मीभाजो लक्ष्मीवंतः। मार्जारो बिडालः तत्सदृशविलोचना मार्जारा
क्षाः पापा भवंति। हरिणाक्षा इति। हरिणाक्षा मृगलोचनाश्च जिह्मैश्च कुटिलैर्लोचनैश्चौराः क्रूराः तथा मंडललोच
नाः परिवर्तुलाः न—त्रीः त्रीः जिह्मैर्वक्रैश्च लोचनैश्चौरास्तस्करा भवंति॥ केकरनेत्रा नीलाक्षा क्रूरा विषमा भवं
श्री ति॰

वा॰ सं॰ गजसदृशविलोचनाद्धस्तितुल्यनेत्राश्चमूपतयः सेनापतयो भवंति। ऐश्वर्यमिति। गंभीरैर्नेत्रैः ऐश्वर्यं भवति। नीलो
त्पलकांतिभिर्नेत्रैर्विद्वांसः पंडिता भवंति। अतिकृष्णतारकाणामक्ष्णां नेत्राणामुत्पाटनं भवति। मंत्रित्वमिति। स्थू
लतारका स्थूला दृष्टिर्येषां ते स्थूलसदृशस्तेषां मंत्रित्वं भवति। श्यावाक्षाणां सौभाग्यं भवति। दीना दैन्यं गता दृष्टि
२६० र्येषां ते निःस्वा निर्धना भवंति। स्निग्धानि मंडलानि विपुलानि विस्तीर्णानि दृष्टिश्रेष्ठानां धनिनां भोगवतां च भवति। तथा च। सम
गाश्चित्रवर्णाभैर्नेत्रैः कृष्णतारकैः प्रसन्नैश्च विशालैश्च स्निग्धैर्नेत्रैर्वा यतेः शुभं। अतसीपुष्पसंकाशे भवतां यस्य लो
चने। भूपतिः स नु विज्ञेयः समुद्रवचनं यथा॥ व्याघ्रवत्सु धन्ते युक्तः केकरस्थ कलिप्रियः। बिडालसिंहनेत्राश्च भवं
ति पुरुषाधमाः। मधुरनकुलाक्षाश्च मराः मध्यमाः स्मृताः। नश्यन्ति सर्वत्र परःप्रेम श्रृपिताः॥ आरक्तपिंग
लनेत्राश्च गजाभोगसंयुताः। रौद्रनाद्रिताक्षा गजश्च गाधनेश्वराः। बलवंतो गुणैर्युक्ताः श्यावनेत्राः श्वेतिनः
तमदाट्कवर्णाभैर्भवतां यस्य लोचने। भूपतिः स नु विज्ञेयः समुद्रवचनं यथा॥ द्विमात्रस्पंदितो येनु धनिनस्ते न
कीर्तिताः। त्रिमात्रस्पंदनो लेख्या पुरुषाः सुसजीविनः॥ एकमात्रनिमेषश्च धनवान्प्रकीर्तितः। दीर्घायुषो धनरताः पं
चमात्रनिमेषणाः। अथ भ्रूलक्षणमाह। अभ्युन्नताभिरल्पायुषो। विशालोन्नताभिरतिसुखिनः। विषमभ्रुवो दरि
द्रा बालेंदुनतभ्रुवः सधनाः दीर्घासंसक्ताभिर्धनिनः। खंडाभिरर्थपरिहीनाः। मध्यविनतभ्रुवास्ते सक्तस्त्रीगम्या
सु। अभ्युन्नताभिरिति। अभ्युन्नताभिराभिमुख्येनोच्चाभिर्भ्रूभिरल्पायुषः स्वल्पजीविनो भवंति। विशालाभिर्विस्ती
र्णाभिरुन्नताभिरुच्चाभिर्भ्रूभिरतिसुखिनो भवंति। ये मनुष्या विषमभ्रुवो तुल्यभ्रुवास्ते दरिद्रा निर्धना भवंति।
बालेंदुसदृशा बालचंद्रतुल्या नता भ्रुवो येषां सधनाः। दीर्घासंसक्ताभिरिति। दीर्घाभिरायताभिश्च संसक्ताः दीर्घाः संस
क्ताभिर्दीर्घाभिरसंसक्ताभिरश्लिष्टाभिर्भ्रूभिर्धनिनो भवंति। खंडाभिरर्थपरिहीना दरिद्रा भवंति। ये मनुष्या
विनतभ्रुवः मध्याद्विनता अस्य ह्या भ्रुवो येषां ते गम्यासुस्त्रीषु सक्ता सुनिरताः। तथा च। अभ्युन्नताभिरल्पायुर्वि २६०
शालाभिः सुखान्वितः। मध्यानतभ्रुर्यो यश्च पापासक्तश्च तेन नराः। बालेंदुभ्रूसमाश्चाढ्या दरिद्रा विषमभ्रुवः
असंलग्नभ्रुवो ये च धनिनस्ते नराः स्मृताः। खंडाभिर्निर्धनाते याश्चिपमाभिर्नराधमाः। अथ शंखलक्षणमा।

उन्नतविपुलैः शंखैः धनिनो निम्नैः सुतार्थसंत्यक्ताः विषमललाटा विधना धनवंतोऽर्धेंदुसदृशेन। शुक्तिविशालैराचार्यं
ता शिरास्थैः ततैः धर्मरता उन्नतशिराभिराढ्याः स्वस्तिकवत्संस्थिताभिश्च। निम्नललाटा वधबंधभागिनः क्रूरक
र्मनिरताश्च। अभ्युन्नतैश्च नृपाः कृपणास्युः संवृतललाटाः। उन्नतविपुलैरिति। उन्नतैरुच्चैर्विपुलैर्विस्तीर्णैश्च
शंखैर्धनिन ईश्वरा भवंति। निम्नैः शंखैरनुच्चैः सुतैः पुत्रैरर्थैर्धनैश्च संत्यक्ता भवंति। तथा च। उन्नतैर्विपुलैः
शंखैर्धनिनः सुखजीविनः। सुतार्थरहिता निम्नैर्मा विषमललाटा इति। विषमसमं ललाटं सुस्पष्टं येषां ते निध
ना दरिद्रा। अर्धेंदुसदृशेनार्धचंद्रतुल्येनार्धचंद्रेण ललाटेन धनिन ईश्वरा भवंति। शुक्तिविशालैरिति। शुक्तिविशालेन ललाटेना
चार्यता आचार्यत्वं भवति॥ शिरासंततैः शिराबहुलैर्ललाटैः धर्मरता भवंति। उन्नताभिः शिराभिर्ललाटगता
भिराढ्या ईश्वरा भवंति। स्वस्तिकाकारेण संस्थिताभिः शिराभिश्चाढ्या भवंति। निम्नललाट इति। निम्नं ललाटं येषां ते
वधबंधभागिनो योग्याः क्रूरे विषमे च कर्मणि कार्ये रताश्च भवंति। अभ्युन्नतैरभिमुख्येनोन्नतैर्ललाटै
श्च नृपाः सेनापतयो भवंति। संवृतैर्वर्तुलैश्च ललाटं येषां ते कृपणा अदानशीलाः स्युर्भवेयुः। तथा च। लला
टेनार्धचंद्रेण भवंति पृथिवीश्वराः। विपुलेन ललाटेन महाधनयुता स्मृताः। विषमेन समादेयाः पापा मर्त्याः शि
राततैः। निम्नेन तु ललाटेन क्रूरकर्मरता नराः। अभ्युन्नतैश्च नृपास्युः संवृतैः कृपणा स्मृताः। अथ रुदितलक्षणमाह॥
रुदितमदीनमनश्रु स्निग्धं च शुभावहं मनुष्याणां॥ रूक्षं दीनं प्रचुराश्रु चैवं नाशुभप्रदं पुंसां॥ यो रुदितमदीनं दैन्यर
हितं अनश्रु बाष्परहितं। स्निग्धमरूक्षं॥ एवंविधं मनुष्याणां शुभावहं शुभं। रूक्षपरुषं दीनं दैन्ययुक्तं प्रचुराश्रु बहु
बाष्पं पुंसां नराणां शुभदं॥ तथा च। अदीनमश्रुरहितं स्निग्धं च रुदितं शुभं॥ दीनं रूक्षं च बाष्पयुतं पुरुषाणामनि
ष्टदं। अथ हसितलक्षणमाह॥ हसितं शुभदमकंप्यं सनिमीलितलोचनं तु पापस्य। दुष्टस्य हसितमसकृत्सोन्मा
दस्यासकृत्प्रांते॥ यच्च हसितमकंप्यं कंप्यरहितं तच्छुभदं शुभप्रदं॥ सनिमीलितलोचनं संकुचितनयनं हसितं पापस्य
कर्मणः। असकृत्पुनः पुनर्दुष्टस्य दोषस्पर्शरहितं प्रांते। हसनांते असकृद्धसितं सोन्मादस्य उन्मत्तस्य भवति। तथा च॥
हसितं कंपरहितं नराणामन्यथाशुभं। असकृद्धासयुक्तस्य मीलिताक्षस्य नो शुभं। अथ ललाटरेखानां लक्षणं

वा.सं. निम्नां रेखा ग्रानत्री विनांच्छिन्ना दायतनाभिता गादिताः। चतसृभिरवनीपालं नवतिश्चायुः सपंचाब्दा। विच्छिन्नाभिश्चागम्यगा
मिनो नवतिरप्यरेखेण॥ कनिष्ठांतोपगताभिर्लेखाभिरशीतिवर्षायुः। पंचभिरायुः सप्ततिरनामिकाग्रावलिताभिर
पि षष्टिः। बहुरेखेन ज्ञातार्धं चत्वारिंशच्च वक्राभिः॥ त्रिंशत भग्नाभिर्विंशतिकाश्चैव वामवक्राभिः। क्षुद्राभिः
२७० स्वल्पाभिः न्यूनाभिश्चान्तरे कल्प्यं तिस्रो रेखा इति। कनिष्ठमूलप्रदेशस्थिता आयतास्तिस्रो रेखा दीर्घाः ग्रानत्री वि
नांड्यातायुषा भवंति। चतसृभिर्ङ्गुष्ठायतां रेखाभिरवनीपालं राज्यं भवति। नवतिः सपंचाब्दा पंचभिर्वर्षैर्युक्तान
वतिरायुर्जीवितं भवति। विच्छिन्नाभिरिति। विच्छिन्नाभिश्छेदयुक्ताभिर्लेखाभिरगम्यगामिनो गम्यगाम
नशीला भवंति॥ नवतिर्वर्षाणां तेषामायुः। अरेखेणा रेखावर्जितेन ललाटेन नवतिरेव वर्षाणामायुः। अ
पिशब्दो वार्थे। अगम्यगामिनश्च भवंति॥ कनिष्ठांतोपगतेति। प्रभृतिकनिष्ठामूलपर्यन्तं कनिष्ठांतोपगताभिस्त्र्यमासा
भिरशीतिर्वर्षाणामायुर्जीवितं भवति॥ पंचभिरिति। पंचभिर्लेखाभिर्ललाटस्थिताभिः सप्ततिर्वर्षाणामायुर
नामिकाग्रेव स्थिताः किंवा अग्राच्च स्थिताः। सर्वाभिरेकाग्रावस्थिताभिर्मीलिताभिरविच्छिन्नप्रांताभिः षष्टिर्वर्षाणा
मायुः। बहुरेखेणाबहुरेखाभिरुपलक्ष्यते तेन ज्ञातार्धं पंचाशद्वर्षाण्यायुः। वक्राभिः अस्पष्टाभी रेखाभिश्च
चत्वारिंशद्वर्षाण्यायुः। भग्नाभी रेखाभिस्त्रिंशद्वर्षाणि। वामभागवक्राभिः कुटिलाभिर्विंशतिवर्षाणां
जीवितं परिमाणं यस्य स विंशतिकः। क्षुद्राभिः सूक्ष्माभिः स्वल्पायुर्विंशतेरूनतरमायुः। न्यूनाभिश्चांतरे स्वा
मिति। न्यूनाभी रेखाभिर्दृश्यमानेकयावान्तराब्दाः स्वल्पायुरेव। अंतरे मध्ये कल्प्यास्तु धीमता। यथा तिस्रो
रेखाः ग्रानत्री विनामिति। चतसृभिर्नवतिश्चायुः सप्तपंचाब्दा अन्यत् मध्यांते स्मार्त्ता तिस्रो रेखा यश्च तस्य
नवतिर्वर्षाणामायुरित्याद्यंतरे कल्पनीयं। तथा च। रेखाः पंचललाटे तु यस्या सौ धनवान्स्मृतः शतंजी
वति वर्षाणामैश्वर्यमधिगच्छति। चतुरेखाप्यशीतिं तु त्रिभिः सप्ततिरेव च॥ षष्टिर्द्वाभ्यां तु रेखाभ्यां चत्वारिंशत २७०
थैकया। अरेखेन ललाटेन भवंति निधिपालकाः। रेखाच्छेदैस्तु विज्ञेयाः पापकर्मरता नराः। अन्या अपरत
याल्पायुष्याधियुक्तश्च ते सदा त्रिशूलपट्टिशं चापि ललाटे यस्य दृश्यते। ऐश्वर्यं तस्य कोटिर्गतानां नाय

कश्च सः। अथ शिरोलक्षणमाह। परिमंडलैर्गवाढ्या छत्राकारैः शिरोभिरवनीशाः। चिपिटैः पितृमातृघ्नाः
करोटिशिरसां चिरान्मृत्युः। घटमूर्धाध्वानरुचिर्द्विमस्तकः पापकृद्धनैः परित्यक्तः। निम्नं तु शिरो महतां। बहुनिम्न
मनर्थदं भवति। परिमंडलैरिति। परिमंडलैः परिवर्तुलैः शिरोभिर्मनुष्या गवाढ्या गोबहुला भवंति। छत्राकारैः छ
त्राकृतिभिरूर्ध्वभागविस्तृतैरवनीशा राजानो भवंति। चिपिटैः चर्पटैः पितृमातृघ्नाः पितृमातृहंतारः करोटिः शिरस्था
नां। करोटिसदृशशिरसां चिराद्बहुनाकालेन मृत्युर्भवति॥ चिरायुषो भवंतीत्यर्थः। घटमूर्धेति। घटमूर्धा कुं
भसदृशशिरा अध्वानरुचिरध्वगमनशीलो भवति। द्विनिम्नमस्तको द्विमस्तकः द्विशीर्षः पापकृत्पापकर्ता धनैः त्यक्तो निर्ध
नो भवति। महतां प्रधानानां निम्नं तु शिरो भवति। बहुनिम्नमतिनिम्नं शिरः अनर्थदं दुःखावहं भवति। तथा च।
उन्नतानि यानि निम्नशिरांसि अल्पापदितं च ततः छत्राकारशिरा राजा गवाढ्यः परिमंडलः विषमं तु दरिद्राणां शिरो दीर्घं च
रावुषं। नाककुंभाशिरा राजा सर्वत्र भोगिनः। अथ मूर्धजलक्षणमाह॥ एकैकभावविस्निग्धैः ग्रमागनुं
चितैरभिन्नाग्रैः। मृदुभिर्नचातिबहुभिः केशैः सुखभाङ्नरेंद्रो वा। बहुमूलविषमकपिलाः स्थूलस्फुटिताग्रप
रुषह्रस्वाश्च। अतिकुटिलाश्चातिघनाश्च मूर्धजा वित्तहीनानां। एकैकभवैरिति। केशैर्मूर्धजैरेकैकभवैरेक
स्मिन् रोमकूपे भवंतीत्येककभावा। स्निग्धैः रूक्षैः सूक्ष्मैः तनुभिः नकुंचितैः कुटिलैः अभिन्नाग्रैः अस्फुटितप्रांतैः
मृदुभिः कोमलैः नचातिबहुभिः घनैः रेवानिबद्धैः केशैः सुखभाक् सुखी भवति। नरेंद्रो वा राजा। बहुमूल
ति। बहुमूलाः एकैकस्मिन् रोमकूपे बहूनां संभवेत। अविषमा असमाः केचित् ह्रस्वाः केचिद्दीर्घाः कपिलाः क
पिलवर्णाः स्थूला अश्लक्ष्णाः स्फुटिताग्राः भिन्नप्रांताः परुषाः रूक्षाः ह्रस्वाश्चादीर्घा अतिकुटिला अतिकुंचिता अति
घनाः संततामूर्धजाः केशा वित्तहीनानां निर्धनानां भवंति। तथा च। एकैकसंभवाः स्निग्धाः कृष्णानातिघ
नाः कचाः। कुंचिताविपरीताश्च कृष्णानातिघनाः कचा। कुंचिताविपरीताश्च निर्धनानां प्रकीर्तिताः। आचार्य
णाले। सामुद्रविदितिहानमनागतं चेत्यतोत्र स्माभिः सामुद्राणि पुरुषाणामनुद्दिष्टानि। यावदाचार्यस्य
तिभ्योऽप्यधिकमस्तीति ज्ञेयं। अथ नेत्रवेत्त संक्षेपेणाह। अथ ग्रंथांतरे स्नेहमांसनिद्राणां ग्रागवनडंक्रिया

MEMORIAL

चलनसदनिश्चेष्टोंकं विपरीतमतः शुभं सर्वं यद्धाञ्चमयवंरूक्षमस्निग्धं मांसविहीनं तन्निर्मांसं शिरावनद्धं शिरासंततं
वा॰ सं॰ नन्नद्धात्रमविनष्टमशुभं प्रोक्तं कथितं। अतोस्माद्विपरीतं सर्वं निःश्रेयं शुभं स्निग्धं समांसमशिरालमित्यर्थः॥
अधुना महापुरुषलक्षणान्याह। त्रिषु विपुलो गंभीरस्त्रिष्वेव षडुन्नतश्चतुर्ह्रस्वः। सप्तसु रक्तो राजा पंचसु दीर्घश्च सूक्ष्म
२०१ श्च। यस्त्रिषु अंगेषु विपुलो विस्तीर्णः गंभीरस्त्रिषु च षडुन्नतः षट्सु उन्नतानि यस्य चतुर्ह्रस्वः चत्वारि ह्रस्वानि यस्य
सप्तसु रक्तो लोहितः पंचसु दीर्घः आयामी पंचसु सूक्ष्मश्च स राजा नृपो भवति। अथैतेषामेव प्रतिभागमाह।
नाभिः स्वरः सत्त्वमिति प्रशस्तं गांभीर्यमेतत्त्रितयं नराणां। उरो ललाटं वदनं च पुंसां विस्तीर्णमेतत्त्रितयं प्रशस्तं। वक्षोथ
कक्षानखनासिकास्यं कृकाटिका चेति षडुन्नतानि। ह्रस्वानि चत्वारि च लिंगपृष्ठं ग्रीवा च जंघे च हितप्रदानि॥ नेत्रांतपा
दकरताल्वधरोष्ठजिह्वा रक्ता नखाश्च खलु सप्त सुखावहानि॥ सूक्ष्माणि पंच दशनांगुलिपर्वकेशाः साकं त्वचा कररुहा
श्च न दुःखितानां॥ हनुलोचनबाहुनासिकास्तनयोरंतरमत्र पंचमं। इति दीर्घमिदं तु पंचकं न भवत्येव नृणामभूभृ
तां। नाभिः स्वरः सत्त्वमिति। अविकारकरं सत्त्वं समाख्यातं यदागमे॥ एतत्त्रितयं नराणां पुरुषाणां गांभीर्यं प्रशस्तं। वक्षो
थ कक्षादृति। वक्ष उरः अथशब्दः स्वार्थे कक्षाशब्देन बाहुमूलमुच्यते॥ नखाः कररुहाः। नासिका घ्राणं। आस्यं
वक्त्रं। कृकाटिका ग्रीवापश्चिमभागः। एतानि षट् उन्नतान्युच्चानि। हितप्रदानि प्रशस्तानि। ह्रस्वानि चत्वारि चेति
। लिंगं मेढ्रं पृष्ठं शरीरपश्चिमभागः ग्रीवा शिरोधरः। जंघे एतानि चत्वारि ह्रस्वान्यदीर्घाणि हितप्रदानि प्रश
स्तानि। नेत्रांतपादइति। नेत्रांतश्चक्षुः पर्यंतं पादौ चरणौ। करौ हस्तौ तालु रास्य पृष्ठं अधरस्त्वोष्ठः जिह्वा रस
नखाः कररुहाः। एतानि सप्त रक्तानि लोहितानि सुखावहानि। सुखप्रदानि। सूक्ष्माणि पंचेति। दशनानां अंगु
लिपर्वाणि। करशाखाश्रितारेखाः केशा मूर्धजाः। त्वचा चर्मणा शाकं सार्धं कररुहा नखाः एतानि पंच सू
क्ष्माणि न दुःखितानां भवंत्यपि तु सुखितानां भवंतीत्यर्थः॥ हनुर्नाम प्रसिद्धा। लोचने नेत्रे बाहू भुजौ नासिका २०१
घ्राणं स्तनयोरंतरं मध्यमत्रास्मिन्वर्गे पंचमं पंचसंख्यं। इतीदं पंचकं। दीर्घमनुस्वनृणां पुंसामभूभृता
मराज्ञां भवति। येषां च भवति। दीर्घमनुस्वनृणां पुंसामभूभृतामराज्ञां भवति। येषां च भवति। ते राजा

ते भवंतीत्यर्थः॥ तथा च ऋषिः। चतुर्दशसमद्वंद्वश्चतुःकृष्णश्चतुःसमः। दशपद्मो दशव्यूहस्त्रिशुक्लः शस्यते नरः। पा
दौ गुल्फौ स्फिचौ पार्श्वे वृषणौ वक्षसोग्रकौ। कर्णौष्ठौ वक्षणौ जंघे हस्तौ बाहू सकालकौ। चतुर्दशसमाद्वंद्वम
मुद्दिष्टं पुंसामिति। अक्षतारे ध्रुवौ श्मश्रुकेशाश्च वासिताः शुभाः। अंगुल्यो हृदयं नेत्रे दशनाश्च समा नृणां। चत्वारः
सम्यक् शस्यंते मानैश्वर्यसुखावहाः। जिह्वौष्ठतालुरसनाश्च चक्षुर्नेत्रे स्तनौ नखाः। हस्तौ पादौ च शस्यंते पद्माभ
दशाद्विहिता। पाणिपादमुरो ग्रीवा वाक्श्रवणौ हृदयं शिरः। ललाटमुदरं पृष्ठं व्यूढं तः प्रशस्ता दश। नेत्रे तारे विर
हिता दशनाश्च सिताः शुभाः। एतल्लक्षणसंपन्नं नराणां समुदाहृतं॥ पंच दीर्घश्चतुर्ह्रस्वः पंच पंच षडुन्नतः
पंचरक्तस्त्रिविस्तीर्णस्त्रिगंभीरः प्रशस्यते॥ बाहू नेत्रांतरे चापि हनुनीव पणीतथा दृष्टा। तथा च। स्तनयोरंतरं चैव
पंचदीर्घः प्रशस्यते॥ ग्रीवा प्रजननं श्रोणी ह्रस्वजंघे च पूजिते॥ नखेन रेषु सर्वेषु सर्वमेव प्रशस्यते। सूक्ष्माश्चांगुलि
पर्वाणि दंताः रोमाणि वा त्वचि॥ तथा केश्यं सर्वत्र पंच सूक्ष्मः प्रशस्यते॥ कक्षा च वक्षा च तथा मुखं पृष्ठं कृका
टिका॥ सर्वे नखा नादृष्टाः षडुन्नतः प्रशस्यते॥ पाणिपादौ तथा चास्यमुभे नेत्रे स्तनौ नखाः॥ पंचरक्तानि यस्या
द्रुमेनर्जेंद्र तथा शिरो। उरो मुखं ललाटं च त्रिविस्तीर्णः प्रशस्यते॥ सत्वं स्वरश्च नाभिश्च त्रिगंभीरः प्रशस्यते॥ इति
सर्वं। अथ छायालक्षणमाह॥ छाया शुभाशुभफलानि निवेदयंती लक्ष्या मनुष्यपशुपक्षिषु लक्षणज्ञैः॥
तेजोगुणान् बहिरपि प्रविकाशयंती दीपप्रभा स्फटिकरत्नघटस्थितेव॥ छाया शरीरकांतिः शुभान्यशुभानि च फला
नि निवेदयंती कथयंती लक्षणज्ञैः छायाविज्ञैर्लक्ष्या लक्षणीया विचार्यते। क्व मनुष्यपशुपक्षिषु मनुष्या नराः प
शवः चतुष्पादाः पक्षिणो विहंगाः सा च शरीरांतर्वर्तिनी बहिरपि शरीराद्बहिरपि तेजोगुणान् तेजसः संबंधिगुणा
न् प्रकर्षेणातिशयेन विकाशयंती। कथं दीपप्रभा स्फटिकस्य सा रत्नं च स्फटिकरत्नं स्फटिकरत्नस्य घटः स्फटि
करत्नघटः स्फटिकरत्नघटाभ्यंतरस्थिता दीपप्रभा दीपकांतिर्यथा बहिरपि तेजो गुणान् प्रविकाशयति॥
तथांतरस्था छाया विकाशयतीत्यर्थः॥ तत्र तावत्पंचानां महाभूतानां संबंधिन्यः पंच छाया भवंति। प्रथम
तएव जातके उक्तं। छायां महाभूतकृतां च सर्वेऽभिव्यंजयंति। स्वदशामवाप्य। क्ष्माग्निवाय्वंबरजां गुणाश्च ना

वा॰ सं॰ साम्यद्रक्त्ववृत्त्यवर्णानुमेयान्विता। तत्रादावेव छायालक्षणमाह॥ स्निग्धद्विजत्वङ्नखरोमकेशा छाया सुगन्धा च मही-
समुत्था। तुष्ट्यर्थलाभाभ्युदयान्करोति धर्मस्य चाहन्यहनि प्रवृत्तिम्॥ मही समुत्था भूमिच्छाया यस्य जंतोर्भवति। तदा
दांतस्निग्धाः दंताः त्वक् चर्म नखाः करजाः रोमाणि केशा मूर्धजाः एते सर्वे स्निग्धाः। मसृणा भवंति। तथा सा
२३२ छाया शरीरकांतिः सुगंधा शोभनगंधा च भवति। तस्य जातोः शरीरं सुगंधं भवति। सा च छाया तुष्टिश्चित्तपरितो-
षः अर्थलाभो धनप्राप्तिः अभ्युदयः कार्याणामभिमुख्यं तोदयं तान् करोति। तथा अहन्यहनि प्रतिदिनं धर्मस्य
प्रवर्तनं करोति॥ केचिद्धर्मस्य वृद्धिमिति पठंति। अथ जलच्छायालक्षणमाह॥ स्निग्धा सिताच्छहरिता नयनाभिरामा सौ-
भाग्यमार्दवसुखाभ्युदयान्करोति॥ सर्वार्थसिद्धिजननी जननीव चाप्या छाया फलं तनुभृतां शुभमादधाति। आप्या
वारुणी छाया स्निग्धा स्नेहसंयुक्ता सिता श्वेता गौरप्राया अच्छा निर्मलेत्यर्थः। हरिता हरितवर्णा आर्द्रेत्यर्थः। अ-
च्छा हरिता च नयनाभिरामा नयनानामभिमुख्येन रमते यस्यां तृप्तिं जनयतीत्यर्थः। सा च सौभाग्यं सर्वजनवाल्ल-
भ्यं मार्दवं मृदुता। सुखं सौख्यं अभ्युदयः कार्याणामेतान् करोति। तथा। सर्वार्थसिद्धिजननीति। जननी च माते-
व यथा माता सर्वप्राणिनां हितकारिणीति। सा च तनुभृतां जीवानां शुभं फलमादधाति। करोति। अथ आग्नेय्याश्छा-
याया लक्षणमाह॥ चंडाधृष्या पद्महेमाग्निवर्णा युक्ता तेजोविक्रमैः सप्रतापैः। आग्नेयीति प्राणिनां स्याज्जयाय
क्षिप्रं सिद्धं वांछितार्थस्य धत्ते॥ आग्नेयी छाया चंडा क्रोधना अधृष्या अनभिभावनीया। पद्महेमाग्निवर्णा पद्म-
स्य कमलस्य हेम्नः सुवर्णस्याग्नेर्हुताशनस्य सदृशवर्णा॥ तुल्यकांतिस्तथा युक्ता संयुक्ता तेजोविक्रमैः सप्रतापैः
तेजोसाहसाभ्यां विक्रमेण पराक्रमेण प्रतापेन शौर्येण शत्रूणां च निग्रहेण युक्ता समन्विता यस्याः तेन। वांछितस्याभि-
लषितस्यार्थस्य क्षिप्रमचिरेण सिद्धं धत्ते ददाति। अथ वायव्यानाभस्याश्छाययोर्लक्षणमाह॥ मलिनपरुषकृष्णा
पापगंधानिलोत्था जनयति वधबंधव्याध्यनर्थार्थनाशान्। स्फटिकसदृशरूपा भाग्ययुक्तात्युदारा निधिरिव नभ- २३२
सोत्था श्रेयसां स्वच्छवर्णा। मलिनपरुषकृष्णेति। अनिलोत्था वायुसंभवा छाया। मलिना मलिनवर्णा। परुषा
स्नेहापरुषा रूक्षा। पापगंधा दुर्गंधा। तान् जनयत्युत्पादयति। वधो मरणं। व्याधयः पीडा अनर्थोऽर्थनाशः अथवा

भसा। स्फटिकसदृशरूपेति। गगनोत्था आकाशजा छाया नाभसी। स्फटिकसदृशरूपा स्फटिकमणिसदृशं तुल्यं रूपं कां-
तिर्यस्याः अतिनिर्मलेत्यर्थः। भाग्ययुक्ता सौभाग्यैः समेता। अत्युदारा अतिशयेनोदारा दानशीला। श्रेयसां शुभ-
कार्याणां निधिरिव सर्वार्थप्रदेत्यर्थः। सा च स्वच्छवर्णा निर्मलेति। अथ मतांतरपरमतेनान्याः पंच छाया आह॥ छाया
क्रमेण कुजलाग्न्यनिलांबरोत्थाः केचिद्वदंति दश ताश्च यथानुपूर्व्या। सूर्याब्जनाभपुरुहूतयमोडुपानां तुल्यास्तु
लक्षणफलैरिति तत्समासः॥ कुः पृथिवी। जलं वरुणं। अग्निर्हुताशनं। अनिलो वायुः। अंबरमाकाशं। एभ्यः समुत्था
उत्पन्नाः कुजलाग्न्यनिलांबरोत्थाः छाया आद्याः क्रमेण परिपाट्या पंच। केचिन्मुनयो गर्गादयो दश छाया वदंति। कथयंति
उक्ताः पंच पंचेदानीं वक्ष्यंते। ताश्चापि यथानुपूर्व्या क्रमपरिपाट्या सूर्याब्जनाभपुरुहूतयमोडुपानां सदृशा भव-
ंति। सूर्यो रविः अब्जनाभो हरिः पुरुहूतो इंद्रः यमः प्रेतपतिः उडुपश्चंद्रः एताश्छाया लक्षणैः फलैश्च यथाक्रमेण प्रा-
गुक्तानां पंचानां तुल्याः सदृश्यः तद्यतः सौरा आग्नेयी। अब्जनाभा नाभसी। पुरुहूता पार्थिवी। याम्या वायवी।
उडुपत्या आप्या। इति पंच मिश्रच्छाया। तासां दशानां यत्सीयानां समासः संक्षेपः कृतः फलमास्या पंचैव छायाः
कृता इति। अथ स्वरलक्षणमाह॥ करिवृषरथौघभेरीमृदंगसिंहाब्दनिस्वना भूपाः। गर्दभजर्जररूक्षस्वराश्च
धनसौख्यसंत्यक्ताः॥ करीति। करी गजः वृषभः रथौघो रथसमूहः भेरी प्रसिद्धा मृदंगो मर्दलः सिंहो मृगारिः अब्दो मे-
घः एतेषां सदृशस्वना ध्वनयो ये ते भूपाः। धनैः सौख्यैश्च वर्जिता इत्यर्थः॥ तथा च गर्गः। गंभीरा दुंदुभि-
स्निग्धा मधुराश्चैवानुनादवंतादि स्वरगुणाः पंच समुद्दिष्टास्तत्र लक्षितो भगयुक्तः सौख्यविद्या। मानं सौख्यं धना-
गमः। वाहनानि सुतानार्थो गात्यं भोगागमस्तथा॥ अभिन्नो जर्जरश्चैव मर्दनाद्रि गद्गदस्तथा॥ क्षामस्वरस्त-
थैतासः समुद्दिष्टा विनिर्दिष्टाः॥ स्वरैरेतैः कलिर्वाधः कोऽभिमानलंगारतः। निःस्वण्यमतिमानश्च पारुष्यं शठता म-
वंति। अथ सारानाह॥ सप्त भवंति च साराः मेदोमज्जात्वगस्थिशुक्राणि रुधिरं मांसं चेति प्राणभृतां तत्समा-
सफलं समसनराणां सारा भवंति। तथा। मेदः अस्थ्यंतरगतः स्निग्धभागः मज्जा कपालांतरस्थः। त्वक् चर्म अस्थि
प्रसिद्धं। शुक्रं रेतः। एतानि तथा रुधिरं रक्तं। मांसं पलं। च शब्दः समुच्चये। इत्येवं प्रकाराः प्राणभृतां देहिनां
भवंति।

तन्ममाम्फलं तेषां संक्षेपेण कथं कथयति। तत्र तावद्रक्तसारस्य लक्षणमाह॥ ताल्वोष्ठदंतपालीजिह्वानेत्रांतपायुकरच
रणैः रक्तैस्तु रक्तसारो बहुसुखवनितार्थपुत्रवनिता। तालुः गल्लस्थभागः। ईष्टौ दंतच्छदौ। दंतपाली दंतमांसपंक्तिः। जिह्वा
रसना। नेत्रांतं चक्षुःपर्यंतं। पायुर्गुह्यस्थानं। करौ हस्तौ। चरणौ पादौ। एतैः सर्वैः रक्तैर्लोहितै रक्तसारा नरा भवंति॥
तथा च बहुभिः सुखैः बह्वीभिः वनिताभिर्बहुभिः अर्थैर्धनैः बहुभिः पुत्रैः सुतैर्युक्तास्संयुक्ता भवंति। तत्र त्वङ्म
ज्जामेदः सारानाह॥ स्निग्धत्वक्धनिनो मृदुभिः सुभगा विचक्षणास्तनुभिः। मज्जामेदः सारा सुशरीराः पुत्रवित्त
युताः॥ त्वक्चर्म स्निग्धमसृणं येषां ते स्निग्धत्वक्काः ते च धनिनो धनान्विता भवंति॥ मृदुभिः कोमलाभिः सुभगाः सौभा
ग्योपेता भवंति। तनुभिस्त्वग्भिर्विचक्षणाः पंडिताश्च मज्जासारा मज्जामेदः सारास्तु सुशरीराः शोभनशरीरा
भवंतीति लक्षणं। ते च पुत्रवित्तयुताः सुतधनान्विता भवंतीति गम्यते॥ अथास्थिशुक्रसारावाह॥ स्थूलास्थिरस्थिसारो ब
लवान् विद्यांतगः सुरूपश्च॥ बहुगुरुशुक्राः सुभगा विद्वांसो रूपवंतश्च॥ स्थूलान्यस्थीनि यस्य सोऽस्थिसारः स च बल
वान् प्राणी भवति॥ विद्यांतगः विद्यास्वंतगः समस्तः सुरूपश्च भवंति। बहुगुरुशुक्राः बहु प्रभूतं गुरु घनं शुक्रं रेतो
येषां ते शुक्रसारास्ते च सुभगाः सौभाग्योपेता विद्वांसः पंडिता रूपवंतः सुभगाश्च भवंति। अथ मांससारलक्षणमा
ह॥ उपचितदेहो विद्वान् धनी सुरूपश्च मांससारो यः। संघात इति च सुश्लिष्टसंधिता सुखभुजो ज्ञेयाः॥ उपचितदे
हः स्थूलशरीरः स मांससारः स च विद्वान्॥ पंडितः धनी वित्तवान्। सुरूपश्च रूपवांश्च भवति। अथ संघिलक्ष
संघात इति॥ सुश्लिष्टसंधिता य सर्वांगसंधीनां सुश्लिष्टत्वं संहतिः। सा च सुश्लिष्टसंधिता सुखभुजः सुखिनो ज्ञेयाः सुश्लि
ष्टसंधिता येषां ते सुखभुज इत्यर्थः॥ अथ स्नेहलक्षणमाह॥ स्नेहः पंचसु लक्ष्यो वाग्
जिह्वादंतनेत्रनखसंस्थः सुतधनसौभाग्ययुताः स्निग्धैः रूक्षैर्धनैर्हीनाः॥ पंचसु स्नेहो लक्ष्यो ज्ञातव्यः वाचि
वचने। जिह्वायां दंतेषु। नेत्रयो नखेषु। एतेषु संस्थितः एतैश्च वागादिभिः सर्वैः स्निग्धैः सुतधनसौभाग्ययुता नरा २३३
भवंति। सुताः पुत्रा धनं वित्तं। सौभाग्यं सुभगता। एतैः संयुक्ता रूक्षैश्च सर्वैर्हीनो धना भवंति। अथ वर्णलक्षण
माह॥ द्युतिमान् वर्णः स्निग्धः क्षितिपानां मध्यमः सुतार्थवतां। रूक्षो धनहीनानां शुद्धः शुभदो न संकीर्णः॥ वर्णो

स्निग्धो यस्यासौ वर्णः स्निग्धः स द्युतिमान् भवति। स च क्षितिपानां राज्ञां भवति। मध्यमो वर्णो नातिरूक्षो नातिस्निग्धः
स सुतार्थवतां पुत्रधनान्वितानां भवति। रूक्षो वर्णो धनहीनानां दरिद्राणां भवति। शुद्धवर्णः स्निग्धः शुभदः। न
संकीर्णः न संकीर्णो व्यामिश्रः क्वचित्स्निग्धः क्वचिद्रूक्षः अशुभद इति। अथानूकलक्षणमाह॥ साध्यमनूकं विज्ञात
गोवृषशार्दूलसिंहगरुडमुखाः। अप्रतिहतप्रतापा जितरिपवो मानवेंद्राश्च॥ वानरमहिषवराहाजतुल्यवदनाः
सुतार्थसुखभाजः। गर्दभकरभप्रतिमैर्मुखैः शरीरैश्च निःस्वसुखाः॥ साध्यमनूकमिति॥ अनूकं प्राक्जन्मस
त्वं कस्मात् साध्यं कल्पनीयं। गौः प्रसिद्धः। वृषो वृषभः। शार्दूलः सिंहसदृशप्राणिविशेषः सिंहो हरिः गरुडो
वैनतेयः। एतेषां ये सदृशमुखाः तुल्यवदनाः तेषां प्राक्जन्म शुभं। ते चाप्रतिहतप्रतापा भवंति। अप्रतिहताभि
भवनीयाः प्रतापो येषां जितरिपवो निर्जितशत्रवो मानवेंद्राः राजानो भवंति। वानर इति। वानरः कपिः महिषः प्र
सिद्धः वराहः सूकरः अजश्छागः एषां तुल्यवदनाः सदृशमुखा नराः सुतार्थसुखभाजः सुतं अपत्यं अर्थो धनं सुखं
प्रसिद्धं एषां भागिनो भवंति॥ एतेषां मध्यमं प्राक्जन्म गर्दभः खरः। करभ उष्ट्रः। गर्दभकरभप्रतिमैस्तत्सदृशैर्मुखैर्व
दनैः शरीरैश्च देहैर्निःस्वसुखा भवंति। निःस्वा निर्धनाः। निःसुखाः सुखरहिताश्च भवंति। एतेषामशुभं प्राक्जन्म
अनूकं। अथोन्मानलक्षणमाह॥ अष्टशतं षण्णवति परिमाणं चतुरशीतिरिति पुंसां। उत्तमसमहीनानामंगुलसं
ख्या स्वमानेन। पुंसां नराणां मन्मानमात्मीयमानेनांगुलसंख्या प्रमाणं। अष्टशतमष्टाधिकं शतं स्वांगुलैरुत्तमा
नां नराणां परिमाणं भवति। षण्णवत्यंगुलानि मध्यमानां स्वमानेन चतुरशीत्यंगुलानि परिमाणं हीनानां भवंति॥
अथ मानलक्षणमाह॥ भारार्धतनुः सुखभाक् तुलितोऽतो दुःखभाक् भवत्यूनः। भारोऽतीवाढ्यानामध्यर्धः
सर्वधरणीशः॥ भारः पलसहस्रद्वयं यः पुरुषस्तुलायां तुलितो भारार्धेन भवति। सहस्रपलतुलित इत्यर्थः।
स सुखभाक् सुखिनो भवंति। भारप्रमाणस्तनुरतीवाढ्यानामतिधनिनां भवंति। अध्यर्धभारतनुस्त्रिसहस्र
पलतुलितो यः सर्वधरणीशः सार्वभौमो राजा भवंतीत्यर्थः॥ कुमिल्लकलिंगमानमाने कार्यो यदि त्वेतत् प्रतिपा
दयन्नाह॥ विंशतिवर्षा नारी पुरुषः खलु पंचविंशत्या। अर्हति मानोन्मानं जीवितभागे चतुर्थे वा। नारी स्त्री

विंशतिवर्षमानोन्मानेनभद्रोति।वर्षमानाद्गूनेतुज्ञातिनिश्चितंचतुर्थभागेरल्पकमानं॥ अथप्रकृतिलक्षणमाह॥भु
जलशिख्यनिलांबरसुरनररक्षःपिशाचकतिरश्चांसत्वेनभवतिपुरुषोलक्षणमेतद्भवतितेषांभः प्रसिद्धं।जलंव
रुणंशिख्यग्निः।अनिलोवायुः।अंबरमाकाशः।सुराःदेवाः।नरामनुष्याः।रक्षांसिराक्षसाः।पिशाचादेवयोनयः।
तिर्यंश्च।तिर्यक्जातयः।एतेषांसत्वेनप्रकृत्यापुरुषोनरोभवति।तेषांचैतद्वक्ष्यमाणंलक्षणंभवति।अन्येक
श्चित्पठंति।भूजलशिख्यनिलांबरसुरनररक्षःपिशाचतिर्यंचइति।तत्रैतस्मात्तस्थामितिभावित
व्यं।तस्मात्प्रकृतयःषोडश।तत्रभूजलस्वभावयोर्लक्षणमाह॥महीस्वभावःशुभपुष्पगंधःसंभोग
वान्।सुश्वसनःस्थिरश्च॥तोयस्वभावोबहुतोयपायी।प्रियाभिलाषीरसभोजनश्च॥महीस्वभावोभूःप्रकृतिः
पुरुषःशुभपुष्पःगंधः।शोभनानांपंचकृतभूतानांपुष्पाणांकुसुमानांसदृशोगंधोयस्य।संभोगवानसं
भोगशीलः।सुश्वसनःशोभनःश्वसनोवातोयस्यस्थिरश्चा।अप्स्वभावोभवति॥तोयस्वभावोजलप्रकृतिः।
बहुतोयपायी॥बहुप्रभूतंतोयंपानीयंपिबति।प्रियाभिलाषी।प्रियमनुकूलंभाषितवान्।रसभोजनश्चरसाम
धुरादयस्तेषांभोजनंयस्यसप्रियःकश्चिद्रसभोजनश्चेतिपठंति।अथाग्निमारुतयोर्लक्षणमाह॥अग्निप्रकृत्याच
पलस्तितीक्ष्णश्चंडःक्षुधालुर्बहुभोजनश्च॥वायोःस्वभावेनचलःकृशश्चक्षिप्रंचकोपस्यवशंप्रयाति।अग्निःप्र
कृत्यानलश्चपलःक्रियास्तनकुशितः।अतितीक्ष्णःखरःचंडःक्रूरःक्षुधालुःक्षुधायुतःबहुभोजनश्च।बहाशी।वायोः
स्वभावेनपुरुषश्चलोऽस्थिरमतिःकृशोदुर्बलःकोपस्यक्रोधस्यक्षिप्रमाशुवशंयाति।अथखांबरसुरसत्वलक्षणमाह
॥खप्रकृतिर्निपुणोविवृतास्यःशब्दगतिःकुशलःशुषिरांगः।त्यागयुतःपुरुषोमृदुकोपःस्नेहरतश्चभवेत्सुरसत्वः।
खप्रकृतिराकाशस्वभावोनरःनिपुणःकलासुसूक्ष्मदृष्टिः।विवृतास्यउद्घाटितमुखः।शब्दगतिः।शब्दःस्वग
तिःशब्दगतिरस्यसएवकुशलः।शिक्षितःशास्त्रेषुकुशलः।शुषिरांगःशुषिरशवः।सुरसत्वोदेवप्रकृतिःपुरुष २३५
त्यागःयुतःस्त्यागी।मृदुकोपोल्पक्रोधःस्नेहरतःप्रीतिकरोभवति।अथपुरुषसत्वस्यलक्षणमाह॥मर्त्यःसत्वसंयु
तोगीतभूषणप्रियः।संविभागशीलवान्नित्यमेवमानवः।मर्त्योनरःसत्वसंयुतःगीतभूषणःप्रियः।गीतःप्रि

यःभूषणःप्रियाभूषणान्यलंकरणानिप्रियाणियस्य।सम्यग्विभजनंसंविभागःसंविभागवान्बांधवानामुपकर्ते
त्यर्थः।शीलवांश्चारित्रयुक्तःनित्यंसदामानवोनरोभवति।अथरक्षःपिशाचलक्षणमाह॥तीक्ष्णःप्रकोपःखल
चेष्टितश्चपापश्चसत्वेननिशाचराणां।पिशाचसत्वश्चपलोमलाक्तोबहुप्रलापीचसमुन्नतांगः॥निशाचरा
णांरक्षसांसत्वेनतीक्ष्णःप्रकोपश्चंडःक्रोधःखलचेष्टितः।खलस्यदुर्जनस्यचेष्टितंयस्य।पापश्चपापरतोभ
वति।पिशाचसत्वःपिशाचप्रकृतिर्नरःचपलोनेकमतिमलाक्तोमलोपलिप्तः॥बहुप्रलापीबहुनिधनलपति।समु
न्नतांगःस्थूलांगोभवति।अथतिर्यक्सत्वस्यलक्षणमाह॥भीरुःक्षुधालुर्बहुभुक्चयस्याज्ज्ञेयःससत्वेननरस्तिर
श्चां।एवंनराणांप्रकृतिःप्रदिष्टायल्लक्षणज्ञाःप्रवदंतिसत्वं।योनरःपुरुषोभीरुःभयार्तःक्षुधालुःसक्षुधःबहुभुक्
बह्वाशीचयःस्याद्भवेत्।सतिरश्चांतिर्यक्जातीनांसत्वेनज्ञेयोज्ञातव्यः।एवमनेनप्रकारेणनराणांपुंसांप्रकृतिः
प्रदिष्टोक्ता।लक्षणज्ञाःपुरुषलक्षणविदःयत्सत्वमितिप्रवदंति।कथयंति।तथाचगर्गः।धन्योधन्यतरोवर्णो
वर्णाद्धन्यतरःस्वरः।स्वराद्धन्यतरंसत्वंसर्वंसत्वेप्रतिष्ठितं।अथगतिलक्षणमाह॥शार्दूलहंससमदद्विपगो
पतीनांतुल्याभवंतिगतिभिःशिखिनांचभूपाः॥येषांचशब्दरहितंस्तिमितंचयातंतेपीश्वराद्रुतपरिप्लुतगाद
रिद्राः।शार्दूलःसिंहःपशुः।केचित्तरक्षुंशार्दूलमितिपठंति।समदोमदसहितोद्विपोहस्ती।मत्तगजइत्यर्थः।गोपतिर्वृ
षः।तथाशिखीमयूरः।एषांगतिभिःगमनैस्तुल्यासदृशगतयोभूपाराजानोभवंति।येषांचययायातंगमनंशब्द
रहितंनिःशब्दंस्तिमितमत्वरितंचतेईश्वराधनिनः।द्रुतपरिप्लुतगाद्रुतंत्वरितंपरिप्लुतंजालाक्षेपंगच्छंति।
तेदरिद्रानिर्धनाभवंति।गतिःसिद्धांतमाह॥श्रांतस्ययानमशनंचबुभुक्षितस्यपानंतृषापरिगतस्यभयेषु
रक्षा॥एतानियस्यपुरुषस्यभवंतिकालेधन्यंवदंतिपुरुषंनरलक्षणज्ञाः॥यस्यनरस्यश्रांतस्यखिन्नस्ययानंवा
हनमश्वादिकंवदंति।बुभुक्षितस्याशनंभोजनंभवति।तृषापरिगतस्यपिपासार्तस्यपानंजलादिकंभयेषुत
पनेषुरक्षापरिपालनंएतानिकालेयथोपयुज्यमानानिभवंति।तेनरंधन्यंशुभलक्षणंवदंति।नरलक्ष
णज्ञाःपुरुषलक्षणविदः॥१२७॥ ॥इतिभट्टोत्पल॰संहि॰पुरुषलक्षणंनामषट्षष्टितमोध्यायः॥६६॥७॥

बा॰ सं॰

२७५

॥ अथ पंचमहापुरुषविभागो व्याख्यायते ॥ तत्रादावेवतदारंभप्रयोजनप्रदर्शनार्थमाह ॥ ताराग्रहैर्बलयुतैः स्वक्षे
त्रस्वोच्चगैश्चतुष्टयगैः पंचपुरुषाः प्रशस्ता जायंते तान् ब्रुवे ऽथ ॥ ताराग्रहा भौमबुधगुरुसितमंदाः ताराग्रहैर्ब
लयुतैः स्ववीर्ययुक्तैः स्थानदिक्चेष्टाकालबलयुक्तैः अथवा चतुष्टयगैः केंद्रस्थितैः लग्नचतुर्थसप्तमदशमानामे
कतमस्थानस्थैः पंचपुरुषाः पंचनराः प्रशस्ता जायंते ॥ उत्पद्यंते ॥ तान्पुरुषानहं ब्रुवे कथयिष्ये ॥ तथा च साराव
ल्यां ॥ स्वक्षेत्रे स्वोच्चगृहे ऽथवा बलिभिः स्वांशकैर्निजे केंद्रे शुक्रांगारकमंदजीवबुधैर्जायंते यथासंख्यं ॥ माल
व्यरुचकशशाख्याः कथिताः हंसश्च भद्रस्तथा सर्वेषामतिविस्तरान्मुनिमतात्संकथ्यते लक्षणं ॥ अथैतेषामभि
धानमाह ॥ जीवेन भवति हंसः सौरेण शशः कुजेन रुचकश्च ॥ भद्रो बुधेन बलिना मालव्यो दैत्यपूजितेन ॥ जीवेन बृ
हस्पतिना स्वबलेन स्वक्षेत्रस्थेन चतुष्टयगेन बलिना हंसनामा पुरुषो भवति ॥ एवं सौरेण बलिना शशो भवति । कुजे
नांगारकेन रुचकः बुधेन भद्रः दैत्यपूजितेन शुक्रेण मालव्यो भवति ॥ अथैतेषां मध्ये चंद्रबलवशादित्युक्तमाह ॥
सत्वमहीनं सूर्यात् शरीरं मानसं चंद्रबलात् । यद्राशिभेदयुक्तो वै तल्लक्षणः स पुमान् । तद्धातुमहाभूतप्रकृ
तिद्युतिवर्णसत्वरूपाद्यैः अबलरवींदुयुतांशैः संकीर्णलक्षणाः पुरुषाः सत्वमहीनमिति । सत्वं गुणो भागः
सत्वमहीनं परिपूर्णं सूर्याद्रवेः स्यात् ॥ तस्य पुरुषस्य भवति । बलवशात् शरीरं देहगुणास्तनुकांति । मानसं चित्त
संस्कृतात् चंद्रवशाच्चंद्रबलाद्भवति । कथमित्याह ॥ यद्राशिभेदयुक्तो वै तल्लक्षणः । एतावदुक्तं ये यद्राशिभेदयु
क्ता यस्मिन्राशिभेदे होराद्रेष्काणनवांशद्वादशभागत्रिंशद्भागाख्ये कुजादिसंबंधिनि येनक्षितेन स्याद्राशिभे
दस्य योऽधिपतिः ग्रहस्तल्लक्षणस्तल्लक्षणैश्चिह्नैर्युक्तः स पुमान् भवति । कथमित्याह ॥ तद्धातुमहाभूतप्रकृ
तिरिति । यद्राशिभेदयुक्तो वै तल्लक्षणः स पुमानित्युक्तं ॥ तत्र तद्धातुः तद्राशिपतेस्तस्य धातुर्भवति । तद्यथा । धात
वः स्नाय्वस्थ्यसृक्त्वगथशुक्रवसा मज्जा मंदार्कचंद्रबुधशुक्रसुरेज्यभौमा इति । महाभूतानि पृथिव्यादीनि २७५
भौमादीनां ग्रहाणां प्रकृतानि । तद्यथा । शिखिभूखपयोमरुद्गणानां वशिनो भूमिसुतादयः क्रमेण । अर्के
ंदुयोर्वन्हिजलत्वेन प्रकृतिर्वातपित्तश्लेष्मात्मकता । अथवा महाभूतस्वभावः शुभपुण्यगंधाद्यस्तदुक्तं । द्युतिः कांतिः ॥

छायावंशाध्याये प्रदर्शिता च वर्णाद्युतिर्भौमादीनामुक्ता वर्णा यथा रक्तश्यामो भास्करः सत्वं गुणभागः सत्वग्रहणं गुणत्र
यस्याप्युपलक्षणार्थं । त्रयो गुणाः सत्वरजस्तमांसि । चंद्रार्कजीवा इत्युक्तः सत्वं सकृत्पिंगल इत्यादि । आदिग्रहणा
द्देहस्वभावकर्मकौशल्यं । एतैर्युक्तो भवति । एतदुक्तं भवति । रविचंद्रौ समस्तबलौ ग्रहे होराद्रेष्काणनवांशद्वा
दशभागत्रिंशद्भागेषु यस्य यस्य ग्रहस्य स्थितौ । एषां ग्रहाणां तद्धातुमहाभूतादिभिर्युक्तः पुमान्भवति । अबलर्वीं
दुयुतैरिति । तथा च सारावल्यां ॥ बलरहितेंदुरविभ्यां युक्तैः भौमादिभिर्ग्रहैर्मिश्राः । न भवंति भूमिपाला दशानुगं
तांसकृतार्थयुताः । अथ कस्मात् ग्रहाणां गुणा भवंतीत्याह ॥ भौमात्सत्वं गुरुतां बुधात् सुरेज्यात् स्वरः सितात् स्नेहो वर्णः
सौरात् एषां गुणदोषैः साध्वसाधुत्वं । एषां पुरुषाणां भौमात् सत्वमिति । सत्वं ... गुणवाचकः शौर्यपर्या
यः । गुरुताच्चारित्रगौरवं । परिपुष्टता बुधात् । सुरेज्याद्गुरोः स्वरः शब्दः सितात् शुक्रात् स्नेहो निर्मलता सौरात् शनै
श्चरात् वर्णः कांतिः कृष्णता सर्वदा भवतीत्याह । एषां गुणदोषैः साध्वसाधुत्वमिति । एषां ग्रहाणां गुणैः सबल
स्थैः साधुत्वं सत्वादीनां सम्यक् भवति । दोषैः हीनबलैरसाधुत्वं सत्वादीनामभाव इति । तथा च सारावल्यां ॥ म
हीसुतात्सत्वमुदाहरंति गुरुत्वमिंदोस्तनयात्सुराश्च स्वरः सितात्स्नेहमतोऽथ वर्णः । बलाबलैः पूर्णलवानि चैषां ॥
अवसंकीर्णानां विशेषतः लक्षणैः पुरुषाः संकीर्णाः पाराशर्यानस्युर्भवेयुः । तेषां ग्रहाणां भौमादीनां दशासु
तद्ग्रहः सुखभाजः सुखिनो भवंति । रिपुग्रहः शत्रुक्षेत्रे नीचांशगा ये सा च सा रिपुगृहनीचांशच्युतउच्चान्... । संतः
शुभग्रहाः पूर्णचंद्रबुधजीवशुक्राः पापाः क्षीणचंद्रार्कभौमसौराः रिपुगृहनीचांशच्युतानां सद्ग्रहाणां
पापानां च निरीक्षणात् बलाकैः तैर्भेदा भवंति । तैर्भेदैरेतेषां पुरुषाणां संकीर्णता भवतीत्यर्थः ॥ अधुना हंसभौ
मादीनां प्रमाणमाह ॥ षण्णवतिरंगुलानां आयामो दीर्घत्वं हंसस्य । शशरुचकभद्रमालव्यसंज्ञितानां क्रमेणांगु
लवृद्ध्या ॥ हंसस्य षण्णवतिरंगुलानां आयामः पृथुता भवति प्रसारितभुजद्वयस्य प्रमाणमित्यर्थः । दीर्घतापि
त्येषां षण्णवतिरंगुलानामिति । शशरुचकभद्रमालव्यसंज्ञकाः महापुरुषाः । अतस्त्र्यंगुलविवृद्ध्या त्रिभिस्त्रिभि
रंगुलैस्तेषां विशालतायामो ज्ञेयो भवति । एतदुक्तं भवति । नवनवतिरंगुलानां आयामो दीर्घता च शशस्य भवति ।

मधिकं ज्ञानं रूक्षत्वं पंचाधिकं भद्रस्य। अष्टाधिकं ज्ञानं मालव्यस्येति। एतदुत्तरत्र वक्ष्यमाणग्रंथेऽपि व्यक्तं तत्र प
रिहारार्थं वक्ष्यति। यदि पुनरन्यदेहोऽस्य मकलाद्विनिताथ इति। तथा च पराशरः। उच्छ्रायपरिणाहश्च यस्य तुल्यः श
रीरिणः स राजा पार्थिवानां योऽन्यग्रोधपरिमंडल इति। अथ गुणलक्षणमाह। यः सात्त्विकस्तस्य दया स्थिरत्वं स
त्यार्जवं ब्राह्मणदेवभक्तिः। रजोधिकः काव्यकलाक्रतुस्त्रीसंसक्तचित्तः पुरुषोऽतिशूरः। तमोधिको वंचयिता परेषां
मूर्खोऽलसः क्रोधपरोऽतिनिद्रः। मिश्रैर्गुणैः सत्त्वरजस्तमोभिः मिश्रास्तु तत्सप्त भवंति भेदाः। यः सात्त्विक इति यः
पुरुषः सात्त्विकः सत्त्वाधिकः तस्यैवं विधा गुणा भवंति। स्थिरत्वमकठिनता। सत्यार्जवं सत्यता आर्ज
वं मार्दवमृजुभावः स्पष्टता ब्राह्मणानां देवानां च भक्तिस्तत्परता। रजोधिकः पुरुषः सकाव्यः कलासु गीतनृ
त्यवाद्यचित्रपुस्तकर्मसु क्रतुषु यज्ञेषु च संसक्तचित्तः तल्लमना भवति। अतिशूरः संग्रामप्रियः तमोधिक इति
यस्तमोधिकस्तमसः पुरुषः स परेषां वंचनशीलः मूर्खोऽलसः। अलसस्य आलस्ययुक्तः क्रोधपरः अक्रोधो अतिनि
द्रश्च भवति। सत्त्वरजस्तमोभिस्त्रिभिर्मिश्रैः मिश्रैः पुरुषो मिश्रा मिश्रगुणा भवंति। तत्र गुणाः त्रिभेदैः परस्प
रं भिद्यमानाः सप्त भवंति। तद्यथा। सत्त्वरजस्तमस इति त्रयो भेदाः सत्त्वरजसी रजस्तमसी। सत्त्वतमसी इति त्रयः
सत्त्वरजस्तमसां त्रयाणां योगात् सप्तम इति। एतद्भेदबाहुल्यात् संकीर्णत्वाच्च संभव इति। केचिन्मिश्रास्तु तत्स
मसप्तभेदा इति पठंति। एतच्च शोभनं यतस्त्रयाणां सप्तभेदाः संभवात्। अथ मालव्यलक्षणमाह॥
मालव्यो नागनासः समभुजयुगलो जानुसंप्राप्तहस्तः मांसैः पूर्णांगसंधिः समरुचिरतनुर्मध्यभागे कृश
श्च। पंचाष्टौ चोर्ध्वमास्यं श्रुतिविवरमपि त्र्यंगुलोनं च तिर्यक् दीप्ताक्षं सत्कपोलं समसितदशनं नातिमांसाधरोष्ठं
मालव्यः नागनासः समभुजयुगलः नागो हस्ती तस्य नासा करः। नागनासासमं तुल्यं भुजयुगलं यस्य करिक
रसदृशबाहुः केचिन्नागनासः समभुजयुगल इति पठंति। नागस्येव हस्तिन इव नासा घोणा यस्य। समभुजस्तु
ल्यबाहुयुगमः। जानुसंप्राप्तहस्तः जानू संप्राप्तौ हस्तौ यस्य। आजानुलंबबाहुः मांसैः पूर्णांगसंधिः मांसैरुप
रिपूर्णाः सर्वांगसंधयो यस्य। अनुल्बणा श्लिष्टा इत्यर्थः। समरुचिरतनुः समा रुचिरा तेजस्विनी श्लक्ष्णा तनुः शरी २७६

रं यस्य। मध्यभागे कृशः क्षामप्रदेशः कृशः क्षामः पंचाष्टौ चोर्ध्वमास्यमिति। पंचाष्टौ च पंचाष्टौ त्रयोदशांगुलानि अ ऊर्ध्वमास्यं
ऊर्ध्वमानेनास्य मुखं चिबुकाल्ललाटांतं यावत् त्रयोदशांगुलं भवति। चिबुकात् कर्णविवरं यावत् तिर्यक् अंगुलोनं पूर्वोक्तान्मा
नं भवति। चिबुकमध्यात् कर्णविवरं द्वादशांगुलानि। स्वमानेनास्य भवति। दीप्ताक्षं दीप्ते स्फुटे अक्षिणी यस्य। सत्कपोलं
शोभनकपोलं समसितदशनं समास्तुल्याः सिताः श्वेता दशना दंता यस्य। नातिमांसाधरोष्ठं नातिमांसलोऽधरो
ष्ठो यस्यास्य च स्वरूपमाह। मालवान् सभरुकच्छसुराष्ट्रान् लाटसिंधुविषयप्रभृतींश्च। वित्तमार्जितधनो बलिराजा
रियात्रानिलयः कृतबुद्धिः॥ मालवान् सभरुकच्छसुराष्ट्रान् भरुकच्छः सुराष्ट्रश्च तान् असत् लाट
सिंधुविषयं च एतत्प्रभृतीनन्यान् भवति रक्षति। कीदृशः वित्तमार्जितधनो गतः। वित्तमेण पनार्जितं धनं वित्तं
येन। तथाभूतः सप्तानां पारियात्रनिलयः पारियात्रपर्वतः तत्र निलयो निवासस्थानं येन। केचित् पारियात्रनि
लयानीति पठंति। न केवलं लाटसिंधुविषयप्रभृतीन् भवति यावत् पारियात्रनिलयात् पारियात्रपर्वतनिलयं स्था
नं येषां तान् अपि पाति। कीदृशः कृतबुद्धिः शोभनमतिरिति। अन्यदप्याह। सप्ततिवर्षो मालव्यो यं च क्षितिसम्यक्
प्राणान् निर्लक्षणं लक्षणमेतत्सम्यक् प्रोक्तं। उपनगपणचानां त्यक्ष्यति। अयं मालव्यः सप्ततिवर्षाणि जीवितपरिमाणं
यस्य। तीर्थे पुण्यस्थाने सम्यक् कृतयमाप्राण्यांस्यजति। परित्यजति म्रियत इति। एतत्सम्यक् मालव्यस्य लक्षणं प्रो
क्तं कथितं। गोपनगणानां भद्रादीनां मतानंतरं। लक्षणं वक्ष्यथ विधाय। तथा च सारावल्यां। नखंडोष्टानविषमवपु
नातितुंगांगसंधिर्मध्यक्षामः शशधररुचिर्दीर्घनासः कपोलः संदीप्ताक्षः समसितरदो जानुदेशाप्तबाहुः
मालव्योऽयं विलसितकुलः सप्ततिर्वत्सराणां॥ वक्त्रं त्रयोदशमितानि तथांगुलानि दैर्घ्येण कर्णविवरान्तरं सा
रेण। मालव्यसंज्ञमनुजः सभुनक्ति नूनं लाटान् समालवसिंधुसपारियात्रान्। मालव्यः। अथ भद्रलक्षणमाह।
उपचितसमवृत्तलंबबाहुर्भुजयुगलप्रमितः समुच्छ्रयोऽस्य। मृदुतनुघनरोमबद्धगंडो भवति खलु लक्षणेन भद्रः।
उपचितौ मांसलौ समौ तुल्यौ वृत्तौ परिवर्तुलौ प्रलंबौ दीर्घौ बाहु भुजौ यस्य अस्य भद्रस्य भुजयुगप्रमितः
समुच्छ्रयो भवति। यावदस्य प्रसारितभुजद्वयस्य प्रमाणं तावदस्योच्छ्रायप्रमाणं भवति। मृदुतनुघनरोमन

DR. BHAU DAJI MEMORIAL

वा· सं· दृगंडः मृदूनि। कोमलैः मृदुभिर्घनैः सततैरविरलैरभिन्नैः संयुक्तैर्गंडैर्यस्य सततथाभूतानि रोमकाणि न भिन्नैर्न भद्रसं
शोभननेत्रः खलितस्य शब्दश्रवणमनदर्शनार्थः। अथान्यदप्याह॥ नकृशकुमारः पृथुपीनबाहुः मलाधिको
२११ व्याघ्रमुखस्थिरश्च। क्षमान्वितो धर्मरतः कृतज्ञो गजेंद्रगामी बहुशास्त्रवेत्ता॥ प्राज्ञोऽथ पुष्पान सुललाटशंखः
कुलाभिजातो धृतिमान् सुकुक्षिः सरोजगर्भद्युतिपाणिपादो योगी सुनासः समसंहतभ्रूः॥ नकृशकुमारः इति नव
मारः शोभननवकुमारः कृशो बहुकृशः। पृथुविस्तीर्णपीनं समांसलं बाहुर्यस्य। समलाधिकः मलशब्देन
पापात्मकः। मलबहुर्विलासाभिभूतः इत्यर्थः। व्याघ्रस्येव मुखवदनं यस्य स्थिरः अचञ्चल इत्यर्थः। क्षमान्वितः शमा
न्वितः। क्षांतियुतः। धर्मपरो धर्मानुरक्तः कृतज्ञः कृतं जानाति प्रत्युपकारशीलः। गजेंद्रगामी। गजेंद्रो मातंगः।
गजेंद्र इव गच्छतीत्यर्थः सविलासगमन इत्यर्थः। बहुशास्त्रवेत्ता। बहूनि शास्त्राणि वेत्ति। प्राज्ञो मेधावी नपुष्पा
न। दृढदेहः। सुललाटशंखः। सुललाटं शंखौ च यस्य। कुलाभिजातः अन्यवाच्यविस्पष्टलक्षणमस्याभिज्ञः। धृतिमान्
धैर्ययुक्तः। सुकुक्षिः शोभनकुक्षिः। सरोजपद्मं तस्य गर्भोऽभ्यंतरं तस्य द्युतिः कांतिस्तत्तुल्या पाणिपादयोः कर
चरणयोर्यस्य योगी योगवान्। सुनासः शोभननासः। समसंहतभ्रूः समे तुल्ये संहते संलग्ने भ्रुवौ यस्य॥
अन्यदप्याह॥ नवांबुसिक्तावनिपत्रकुंकुमद्विपेंद्रदानागरुतुल्यगंधिता। शरीरदाढ्यं केशकृष्णकुंचिताः
स्तुरंगनागोपमगुह्यगूढता। नवेन नूतनेनांबुना सिक्तायावनिर्भूः तस्याः दृशोयः सुरभिपत्रं। गंधपत्रं कुं
कुमं प्रसिद्धं। द्विपेंद्रदानं हस्तिमदः। अगरुः प्रसिद्धः। सुगंधद्रव्यं एषां तुल्यगंधिता सदृशगंधता शरीरदा
ढ्यं केशाश्चैव कृष्णाः कुंचिताः केशाः कृष्णाः असिताः कुंचिताः कुटिलास्तुरंगोऽश्वः नागो हस्ती तुरंगना
गोपमा तत्सदृशी गुह्यलिंगगूढता यस्य भवति। प्रच्छन्नलिंगो भवतीत्यर्थः। अन्यदप्याह॥ हलमुशलगदासि
शंखचक्रांकुशमकराब्जरथांकितांघ्रिहस्तः। विभवमपि जनो स्यनो भुनक्ति। क्षमति द्विजनिरतः स्वतंत्रबुद्धिः २११
हलं लांगलं मुसलमायुधविशेषः। गदा प्रसिद्धा। असिः खड्गः। शंखः प्रसिद्धः। चक्रमायुधः। द्विपा हस्ती मकरो जल
चरः। अब्जं कमलं। रथः प्रसिद्धः। एतैर्हलादिभिरंकिताश्चिह्निता यस्य चरणौ हस्तौ करौ यस्य। तदाकारा

रेखाभिश्चिह्निताः पादहस्ता यस्य भवंतीत्यर्थः। अस्य भद्रस्य विभवमैश्वर्यं जनो लोको भुनक्ति। अन्य अमुंक्ते।
स्वजनं धनजनं प्रति निक्षमति। न सहते॥ तं प्रति क्षमाशीलो न भवति। स्वतंत्रबुद्धिः स्वतंत्रानायत्ता बुद्धिर्मतिर्यस्य
। स्वाधीनबुद्धिरिति। अन्यदप्याह॥ अंगुलानि नवतिश्च षडूना युग्मयेण तुलयापि द्विभारः। मध्यदेशनृपति
र्भद्रपुष्टकृशादयोऽस्य सकलावनिनाथः॥ उच्छ्रयेणोच्छ्रायेणांगुलानां षड्विंशं गुल्फलानवतिश्चनरज्ञः। षडंगुलानि
उच्छ्रायो भवति। तुलया पादितभारः पलसहस्रद्वयं। सच मध्यदेशनृपतिर्राजा भवति। अस्य चार्यदय
पुष्टास्थिग्रहणेन षष्ट्याग्रहणेनांगुलानि तानि पश्यति। यत्र दृष्टो माद्राशादवकभद्रमालव्यसंज्ञिताश्चांगु
कविरुध्यन्ति। यदि पंचानां मंगलानां तेषामायामेन च दैर्घ्येण भवति। तदा स कुलाचलनिनाथः सार्वभौमो राजा
भवतीत्यर्थः। अन्यदप्याह॥ भुक्त्वा समस्तवसुधां भुवि शौर्येण बलेनोपार्जितं भुक्त्वा पालयित्वा अशीत्यब्दः
रः। अशीत्यब्दानां प्रमाणं यस्यासावशीत्यब्दः। तीर्थेषु पुण्यक्षेत्रे प्राणांस्त्यक्त्वा भद्रः स्वपत्य भद्रादेवालयं
स्वर्गं याति गच्छति। तथाच सारावल्यां। शार्दूलप्रतिमाननो द्विपगतिः पीनोरुवक्षस्थलः लंबापीनसुवृत्तबाहु
युगलस्तत्तुल्यमानोच्छ्रयः। कामी कोमलसूक्ष्मरोमनिकरः संरुद्धगंडः प्राज्ञः प्राज्ञः पंकजगर्भपाणिचरणः सः
त्वाधिको योगवित्। शंखासिकुंजरगदाकुसुमेषुकेतुचक्राब्जलांगलविलांछितपाणिपादः। पात्राग रुद्रप
मदप्रथमांबुसिक्तभूकुंकुमप्रतिमगंधतनुः सुघोषः। शास्त्रार्थविद्यतियतः समसंहतभ्रूर्नागोपमो भव
ति च पिनिगूढगुह्यः। सत्कुक्षिधर्मनिरतः सुललाटशंखः धीरः स्थिरस्त्वसितकुंचितकेशभारः। स्वतंत्रः
सर्वकार्येषु स्वजनं प्रति नक्षमी। भुज्यते च भवद्भिश्चाम्यानित्यं बंधुजनैः परैः। भारस्तुलायां तुलितो यदि स्या
द्धा कन्यकुब्जाधिपतिः स दासो यस्याभ्दिपुष्टः सहितः सभद्रः सर्वत्र राजा शरदामशीति॥ अथ शशलक्षण
माह॥ ईषद्दंतुरकस्तनुद्विजनखः कोशाक्षणः शीघ्रगो विद्याधातुवणिक्क्रियासु निरतः संपूर्णगंडः शठः।
सेनानीः प्रियमैथुनः परजनः स्त्रीसक्तचित्तश्चलः शूरो मातृहितो वनाचलनदीदुर्गेषु सक्तः शशः॥ अनल्पा
सुरव ईषद्दंतुरकः दंता उन्नता अस्येति तनुद्विजनखः तनवः अघना द्विजा दंता नखाः करस्थाश्च यस्य कोश

क्षणाः आधिकपदे क्षणाः उग्रिमाः उग्रिमाणामतिद्याम् अग्न्यविभ्रमुखानुस्मनः ज्ञातोगोक्तिरिद्युवणिद्यामकृत्य
विकयेषु निरतः सक्तः संपूर्णगंडः। सुमांसलगंडः गाढः परकार्यविमुखः। सेनानीः सेनानायकतिनं भूपतिरित्यर्थः।
प्रियमैथुनो मैथुनः प्रियः। परजनस्नेहसक्तचित्तः परजनानां संबंधिन्या याः स्त्रियो वा स्वस्त्री सक्तमनः तं च चित्तं
मनो यस्य च कोकिलस्वरमतिः शूरः संग्रामः प्रियः। मातङ्गलीलागमनो भवतः वनावननदीदुर्गेषु सक्तः। वनं स्वरण्यम
चलेषु शैलेषु नदीषु सरित्सु दुर्गेषु प्राकारेषु सक्तानुरक्तो भवति। अन्यदप्याह। दीर्घाङ्गुलानां ज्ञातमस्य दीनं सांशं
तेषु परिरंध्रविश्वः साराग्रमसज्ञानि भृतप्रचारः ज्ञातो स्वयं नातिगुरुः प्राक्तनः अहृदीनं ज्ञानं मञ्जुलनादो येऽङ्गिन
वर्णं गुल्मानामुच्छ्रितो भवति। साशंकं न यस्य यस्य धनं तितत्र संशंकमिति। परं प्रविज्ञापरकार्यारम्भणं प्रवि
च्छिद्रज्ञः साराग्र्यमज्ञः। मज्जासारो यस्मिन्नित्यर्थः। निभृतप्रचारः गुप्तप्रचारः अवंचनकः अयं द्वाशीलगुरुर्नातिल
घुः परिछिद्रज्ञः। अन्यदप्याह॥ मध्यमकः इति बकस्य वीणापर्यंकमाला पुरतानकाशाः शंखांशमासे चर्गता
स्वरेखाः ग्रहस्य पादोपगताः करेषु॥ मध्यमध्यभागकः इति श्यामः स्वेदकः कूरः वक्रः भ्रमिः वीणावक्रो पर्यं
कः प्रसिद्धः। आसनं मालास्त्रव। पुरतो मर्दलः एवं वटकादीनामनुरूपाः। सरश्मी रेखाः ग्रहस्य पादोपगता
परातश्च॥ रणयोः स्थिताः करद्रुमतालकवाखिताभवंति। अन्यदप्याह। प्राकारेतिकामोदलिका थवा यस्मि
न्नाच शलाभिभवार्तिमूर्तिः एवंशः समति द्वायनो यं वेवस्वतस्य लक्ष्यमभ्युपैति। अयंशः प्राकारेतिका
गलरयासिना मक्षिपतिः मोदलिका थवा सा भवति॥ निकृश्राचणस्मिकृश्च वणनयो मीशुलोक्ष्यातस्य
रिभवेन तल्पाद्यार्तिः मूर्तिः पादुतजारिः पर्वविधः ज्ञाशांशं समति द्वायनः समसतिर्वर्षा वैवस्वतस्य यम
स्यालयं गृहमभ्युपैति गच्छति। तथा च सारावल्यां॥ तनुद्विजः उग्रिमाति ग्राशीयं ज्ञातो। निःश्राननिभृतः प्रचा
रः वनाद्विदुर्गेषु नदीषु सक्तः क्ष्मयाद्धशीर्ष्णातिलघुः प्रसिद्धः। सेनानाथो निधिविलक्षणो दंतुरश्चापि किंचिद्वा
तो वा द्विनवतिनिरतश्चं चलः कालनेत्रः स्यात् संसक्तः परिजनगृहे मातृभक्तः सुजंघः॥ यदेव प्रासावद्धविधि
मलोदं प्रदेशीप रेखा। पर्यंकुडारवज्रांकुशसद्रंगमालावीणाप्रमायद्विकोननरणे चरेखा॥ वर्षाणि समातीम

तानि करोति राज्यं प्रात्यंतिकः क्षितिपतिः कथितो मुनींद्रैः॥ अथ हंसलक्षणमाह॥ रक्तं पीनकपोलमुन्नतनसं वृ
त्तं सुवर्णोपमं रक्तं चास्यादिशेषं श्रोणिम धुनिभेस वेंचरकाननावां। स्पष्टा मांकुशशंखमत्स्ययुगलं कूलं गकुंभा
बुजैश्चिन्हैर्हंसकलस्वनः सुचरणो हंसः प्रसन्नेंद्रियः। अस्य हंसस्य वक्त्रं मुखं रक्तं लोहितवर्णं पीनकपोलं सुना
सं समुन्नतनं डं नतनसमुन्नतनासं भुवर्णोपमं कनकसदृशं भवति॥ रक्तं नखं रक्तांशं मूर्धा। आनीला नखाग्राम
धुनिभे पिंगले भवतः। नखाः करः रुद्राः सर्वांनि शेषाः रक्ता लोहितवर्णाः स्पष्टामसमात्रा। अंकुशः प्रसिद्धः। शंखः
मत्स्ययुगलं मीनयुग्मं। कुलं गांधर्वांगं। स्वदीर्घवे कुंभः कलशः। अंबुजं कमलं। एतैश्चिन्हैश्चान्हितो हंसः प्रसन्ने
द्रियः प्रसन्नानि निर्मलानि इंद्रियाणि चक्षूंषि पादपाद्य परकानि यस्य॥ अन्यदप्याह॥ रतिं भाग्यं चासारता
स्त्रिगुणाल्पशतोपमेनिभिः। परिमाणमथास्य पत्रुन्नवतिसंपरिकीर्तिता बुधैः। अभ्रसिजलमध्ये रतिः प्रा
तिरस्य भवति। शुक्रसारता शुक्राधिकत्वं अष्टगुणानि द्विगुणानि षोडश गुणानि पलैर्मितिर्मानं॥ अथ नाड्यार्थ
अस्य हंसस्य परिमाणं आयामो दैर्घ्यं च बुधैः पंडितैः षट्छतान वतिः संपरिकीर्तिता कथिता॥ अन्यदप्याह॥
भुनक्ति हंसः खशशूरसेनागांधारगंगायमुनांतराणि॥ शतं दशानं ज्ञात्वा रानपलं कृत्वा चलानां समुपैतिमृत्युं
॥ हंसः खशान् शूरसेनागांधारान् एतान् सर्वान् जनान् तथा गंगायमुनांतरालं मध्यमं तद्देशमित्यर्थ
ः। एतान् सर्वान् भुनक्ति शरद्वर्षाणां शतं नवति च वर्षाणां स्पष्टतरं कृत्वा च नानात्वनं समीपमृत्युं
मरणं समुपैति॥ तथा च सारावल्यां॥ रक्तास्यो नतनासिकः सुचरणो हंसः प्रसन्नेंद्रियो। गौरः पीनकपोल
रक्तकरजो हंसस्वनः श्लेष्मलः। शंखाब्जांकुशदाममत्स्ययुगलकत्वंगमालाघटैश्चिन्हैः पादकरांकितो
मधुनिभनेत्रेऽन्नयलंडिशः। सालिलाशयेषु रमते स्त्रीषु न तृप्तिं प्रयाति कामार्तः। षोडशाशतानिवृत्तितो
गुल्मानि दैर्घ्येण षण्णवतिः। पातोद्देशान् खशशूरसेनान् गांधारगंगायमुनांतरालं॥ शतं दशानं ज्ञात्वा
र्षसंख्यां परयात्क्लांते समुपैति नाशं॥ हंसः॥ अथ रुचकलक्षणमाह॥ सुभ्रूकेशो रक्तश्यामः कंबुग्रीवः
व्यादीर्घास्यः। क्रूरः शूरः श्रेष्ठो मंत्री। चौरस्वामी व्यायामी च। सुधा - - - - - - - - - - - - रुचकः

बा·स· सुश्मश्रुकेशः शोभनश्मश्रुः शोभनकेशः रक्तश्यामो रक्तश्यामो भौमः। पाटलपुष्पवर्णः कंबुग्रीवो व्याघ्रवक्त्रः यस्य तथा
व्यादीर्घास्य। विनिर्गतदीर्घ - - - - - - - - - चौरस्वामी। तस्करनायकः व्यायामी श्रमपरः। च
२७० ग्रुष्ठः सम्मग्नः। अन्यदप्याह। यन्मात्रमास्यस्य कक्ष्यदीर्घम् ध्यप्रदेशं चतुरस्रतास्य। तनुच्छविः शोणितमांसमा
रो हृतांगुष्ठाग्रमांसमास्यकार्थः। यन्मात्रं मास्यस्य कक्ष्यदीर्घमामध्यप्रदेशोदरमध्यं चतुरस्रतावपुलंभव
ति। मुखदैर्घ्यं च तुरंगं आर्यास्मांडल्यं भवति। यथं। तनुच्छविः सुरूपवत्व - - - - - - - - - - - ष्यादृमेन
मिङ्कार्यं यस्य। असमर्थ्याक्षान्तिकार्यं करणमाहसतं। अन्यदप्याह। खट्वांगवीणावृषचापवज्राङ्काद्युत्तरांक
तपाणिपादः। भक्तो गुरुब्राह्मणदेवतानां तंत्रगुल्मस्यामुरुलतास्सदृश्य। - - - - - - - - - - - - -
चापधनुःवज्रमायुधं। शक्तिरप्यायुधमेव। इष्टांकः श्वेतांकित। एतैरंकितौ चिह्नितौ पाणिपादौ हस्तचर
णौ यस्य। गुरूणां ब्राह्मणानां देवतानां च भक्तः तत्परः। दैर्घ्येणायुः - - - - - - - - - - - - - मांद्य। मंत्रा
भिचारकुशलः कृशजानुजंघानि शंसय धर्मारम्भकर्म्यन्नीच भुक्तो। मंत्राण्यसृजानि समाश्रितकांतिः। आक्रमणम्।
युधुपयात्यथवा जनमंत्रकुशलः अभिचारे च - - - - - - - - - - - - णेषु कुशलः कृशजान्वजनिजंघः कृशोदुर्बलेजान्
नीजंघयस्य। वृंशोगिरिदुर्गाय पर्वतं। समहागिरिसंस्थेन मयां येनगिरिणा पर्वतेन सहिता मुक्तायिनो नगरी भुक्तान्
प्रागन्मा समनि समाः। सप्ततिवर्षाणि संप्राप्य समतिक्रम्य शास्त्रेणायु धेनात्मनादेकेन वा मृत्युं मरणं समुपैति। त
थाचसारावल्यां। दीर्घास्यः स्वल्पकर्णो विद्रुमचिरपलः माहसावाप्तकार्यश्चारुश्रवनो लोकरः श्रमकरणरतो मंत्र
विद्धोरनाथः। रक्तश्यामो तिशूरो रिपुबलमथनो मंद्रकंठः प्रधानः क्रूरो भक्तो नराणां गुरुशुभनिरतः श्यामस
त्तानुजंघः। खट्वांगपादवृषकार्मुकवज्रवीणायुत्पश्च दृलच्चरणस्यतथांगलिस्य। मंत्राभिचारकुलेशं भुक्त
त्या सहस्र मध्यं चतस्य कथितं मखदैर्घ्यतुल्यं वेंध्याचलसमस्तगिरीन भुक्त्वा चेत्सप्ततिसमा इति। शास्त्रानलक २७०
तिमत्युपयाति देवालयं रुचकः॥ ३०॥ ॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ पंचमहापुरुषलक्षणं
नामसप्तषष्टितमोऽध्यायः॥ ६७॥ ॥ ७॥ ॥ अथलक्षानुचरणलक्षणं व्याख्यायते। तत्रादावेतल्प्र

विभागमाह॥ पंचापरे वामनको जघन्यः कुब्जोथ वा मंडलकोथ साची। पूर्वोक्तभूपानुचरा भवंति संकीर्णसंज्ञाश्च
लक्षणसंज्ञान॥ अस्मात्पंचमहापुरुषकाल्पपरे पंच भवंति। तद्यथा। वामनकः जघन्यः कुब्जः। अथशब्दआ
नंतर्येवाशब्दश्चार्थे। मंडलकः। अथशब्दश्चार्थे मानिनएतपूर्वानुचरा भवंति पूर्वोक्ताः प्रकथिता ये भूपास्तेषामा
लव्यादयः। तेषामनुचरा कुद्वारा भवंति। ते च संकीर्णसंज्ञा संकीर्णस्याल्पांश्च तस्यमाणिलक्षणैश्चुण्वाकर्ण
यः अथैतेषां पंचानां संक्षेपेण लक्षणानि निश्चिक्षु सूत्रतावद्वामनकलक्षणमाह। संपूर्णांगो वामनो भग्न
पृष्ठः किंचिच्चोरा मध्यकक्षांतरेषु। ख्यातो राज्ञां सपुभद्रानुजीवी स्फीतो दाता वामकेवस्य भक्तः। वामनकः संपूर्ण
संपूर्णांगः परिपूर्णावयवः भग्नपृष्ठः भग्नपृष्ठं यस्य। उरुप्रदेशं मध्यं मध्यभागकक्षांतरे च कक्षामध्ये।
एतेषु किंचिद्दोषवृद्धिर्णवाकिंचिर संपूर्णांगा वामनको राज्ञां पत्यभद्रस्यानुजीवितस्य पश्चाज्जीवति। तन्मद
च रो भवति। ख्यातः कीर्तियुक्तश्च भवति। स्फीतऐश्वर्यदाता वामकेवस्य भक्तः दातारश्च भवति। स च वामदे
वस्य दर्भको भवति। अथ जघन्यलक्षणमाह॥ मालव्यसेवानुजघन्यनामा खंडेंदुतुल्यः श्रवणः सुसंधिः शुक्रा
नुसारः पिशुनः कविश्च रूक्षत्वचः स्थूलकरांगुलीकः। क्रोधनो ग्रहमतिः प्रतीतस्तीव्रच्छविः स्यात्परिहासशीलः।
उरोग्रिहस्तस्वमितोरुपाश परः सुधांकः सत्तघन्यनामा॥ मालव्यसेवानिति। जघन्यनामायः स मालव्यसेवी।
मालव्यस्य नृपस्यानुचरो भवति। खंडेंदुतुल्यः श्रवणः खंडश्च। मार्द्धेंदुश्च खंडेंदुः तत्तुल्यौ श्रवणौ कर्णौ यस्य। अर्द्ध
सं चंद्रसदृशकर्णः सुसंधिः शोभनांगसंधिः। केचित्सुगंध इति पठंति। शोभनसंधः शुक्रानुसारः शुक्राधिकः।
पिशुनः सूचकः कविः पंडितः। रूक्षत्वचो रूक्षत्वचः। स्थूलकरांगुलीकः स्थूलांकरयोर्हस्तयोरंगुल्यकरशाखाय
स्य। क्रूर इति क्रूरशीलः। धनोचितवान स्थूलमतिरल्पबुद्धिः प्रतीतः प्रख्यातः। ताम्रछविर्लोहितनकुस्याद्भवेत्प
रिहासशीलः परिहासनप्रियः सच जघन्यनामा। उरोग्रिहस्तसुरशशक्तपाशपरस्वधांकः उरोवक्षः अंघ्री
पादौ। हस्तौ करौ। असिः खड्गः शक्तिरायुधविशेषः। पाशः सर्पः परशुरेधः परशुरेतैरंकितश्चिह्नितो भव
ति। अथ कुब्जलक्षणमाह। कुब्जो नाम्नायः सशुद्धोह्यधः क्षीणः किंचित्पूर्वकायेन नम्रः। हंसासेवी नास्ति

कोर्थेऽर्पितो विद्वान् शूरः मत्सरकस्यानृतस्य॥ कलास्वभिज्ञः कलहप्रियश्च प्रभूतभृत्यश्च प्रमदाजितश्च। संपूज्यलोकं
प्रजहात्यकस्मात् कुब्जोयमुक्तः सततोघ्नतश्च॥ कुब्जो नाम्नेति। यः कुब्जो नाम स अधस्तात् शुद्धो भागाच्छुद्धः संपू
र्णांगः पूर्वकाये प्राक्देहभागे किंचित्क्षामः क्षीणः पूर्वावयवश्चाकिंचिन्नतो हंसस्यानुचरः नास्ति
कः क्रियार्हितः नास्तिकोऽर्थे मतिरस्य। लोकायतिकप्रायः संपन्नार्थैर्धनैः वैन संयुक्तः विद्वान् पंडितः शूरः सं
ग्रामप्रियः मत्सरः पिशुनः स्याद्भवेति। कृतज्ञः कृतं जानातीति। कलास्वभिज्ञ इति। कलासु गीतः नृत्यवाद्यचित्र
कर्मस्वभिज्ञः आभिमुख्येन जानातीति कलहप्रियश्च भवति। प्रभूतभृत्यो बहुभृत्यः प्रमदाजितः स्त्रीभिर्निर्जितः
लोकं जनं संपूज्यार्थ्यर्थान् कस्माद्विप्रजहाति परित्यजतीति। अयं कुब्ज उक्तः कथितः सततो घ्नतः सर्वकालमुत्पाद्य
कः॥ अथ मंडलकलक्षणमाह॥ मंडलकलक्षणमतोऽनकानुचरोऽभिचारविकुशलः कृत्यावेतालादिषु कर्मसुवि
ज्ञासत्यानुरतः वृद्धाकारः खरपरुषशत्रुनाशने कुशलः॥ द्विजदेवयज्ञदानप्रसक्तधीः स्त्रीजितो मतिमान्॥ मंडलकल
क्षणमत इति। अतोस्मात्कुब्जादनंतरं मंडलकलक्षणं भवति। स चरनकानिनाशकरश्च कस्या। तज्ञानी भवति।
अभिचारविदभिचारज्ञः॥ विद्वेषोच्चाटनवशीकरणमारणेष्वभिज्ञः कुशलः सर्वप्रयतः कृत्यावेतालादिष्वभ
िचारकर्मसु ध्यानः इक्षुकधार्थं मग्निमध्याद्यास्थ्याद्युच्चाट्यते॥ साकृत्या वेतालः शवं वशी। स्यात्तस्य मंत्रेणुन
रुत्थापनं आधिव्यक्तेऽर्थाद्भक्षभर्तेषु। एतेषु कर्मसु सक्तः मुक्तानुरक्तः शाकः वृद्धाकार इति। वृद्धाकारो वृद्धसदृश
शरीरः खरपुरुषमूर्धजः॥ खराः कठिनाः पुरुषाः क्षाम्र धंज्ञाः केशा यस्य शत्रुनाशने शत्रूणां मारणे कुशलः
समर्थः॥ द्विजानां विप्राणां देवानां यज्ञानां यागानां दानेन सत्पात्रार्थं प्रतिपादनेन प्रसक्ता धीर्बुद्धिर्यस्य। स्त्रीजि
तो योषिद्भिः परिभूतो मतिमान् बुद्धिमांश्च भवति। अथ साचिलक्षणमाह॥ साचीति यः सोऽतिविरूपदंत
शशानुगामी खलु दुर्भगश्च॥ दाता मदारंभसमाप्तकार्यगुणैः शशस्येव भवेत्समानः॥ यः साचीनि साची
नामसोऽतिविरूपदंतोऽतिवाशोभनशरीरः शशानुगामी शशस्यानुचर इति। शशानुचारः स्वल्पस्वयं
ग्राल्योचार्यालंकारैर्दुर्भगो जननानाम वल्लभः दाता दानशीलः मदारंभः समाप्तकार्यः। मदल्पारंभेषुसमा

प्तकार्यः येन सततथाभूतः गुणैः सत्त्वादिभिः शशस्येव समानः तुल्यो भवति। ईषद्दंतुरकः तनुद्विजानसरदाढ़िलक्षणैर्युत
इत्यर्थः॥ अथ पुरुषलक्षणादास्याप्रभावमाह॥ पुरुषलक्षणमुक्तमिदं मया मुनिमतान्यवलोक्य समासतः॥ इदम
धीत्य नरो नृपसंमतो भवति सर्वजनस्य च वल्लभः॥ मुनिमतानीति ऋषिप्रणीतानि च शास्त्राणि निरीक्ष्यावलोक्य स
मासतः संक्षेपतो मयेदं पुरुषलक्षणमुक्तं कथितं। इदं च नरः पुरुषोऽधीत्य ज्ञात्वा नृपसंमतो राज्ञां वल्लभो भवति
। सर्वजनस्य वल्लभो भवतीति॥ ३१॥ ॥ इति श्रीभट्टोत्पलविरचितायां पंचमहापुरुषानुचरलक्षणं नाम
अष्टषष्टितमोऽध्यायः॥ ६८॥ ॥ ७॥ अथ स्त्रीलक्षणानि व्याख्यायन्ते। तत्रादावेव पादलक्षणमाह॥ स्नि
ग्धोन्नताग्रतनुताम्रनखौ कुमार्याः पादौ समोपचितचारुनिगूढगुल्फौ॥ श्लिष्टांगुली कमलकांतितलौ च यस्या
स्तामुद्वहेद्यदि भुवोऽधिपतित्वमिच्छेत्॥ यस्याः कुमार्याः कन्यकायाः पादौ चरणौ स्निग्धोन्नताग्रतनुताम्र
नखौ स्निग्धौ॥ मसृणावुन्नता वृद्धा कूर्मपृष्ठा॥ अग्रतन्वा अग्रे तनू ययोः ताम्रनखौ ताम्रवर्णौ नखौ ययोः
तथा समोपचितचारुनिगूढगुल्फौ समौ तुल्यावुपचितौ मांसलौ चारु दर्शनीयौ निगूढावनुल्बणौ गु
ल्फौ ययोः। तथा श्लिष्टांगुली॥ श्लिष्टा घना अंगुल्यः शाखा ययोः कमलकांतितलौ कमलस्य पद्मस्येव कांति
र्मृलं ययोः। तथाभूतौ पादौ यस्याः कन्यायाः यदि भुवोऽस्या अधिपतित्वं राज्यमिच्छेत्तदा तामुद्वहेदुद्वाहयेत्॥
पुनरपि पादजंघाजानूरुगुह्यमणिलक्षणमाह॥ मत्स्यांकुशाब्जयववज्रहलासिचिह्नावस्वेदनौ मृदुतलौ
चरणौ प्रशस्तौ॥ जंघे च रोमरहिते विशिरे सुवृत्ते जानुद्वयं सममनुल्बणसंधिदेशं॥ ऊरू घनौ करिकरप्रति
मावरोमावश्वत्थपत्रसदृशं विपुलं च गुह्यं॥ श्रोणीललाटमुरुकूर्मसमुन्नतं च गूढो मणिश्च विपुलां श्रियमाद
धाति॥ मत्स्यांकुशादीति। मत्स्यो मीनः अंकुशः प्रसिद्धः अब्जं कमलं। यवो यवाकारः वज्रमायुधं हलं सीरं।
असिः खड्गः। एतैश्चिह्नैश्चिह्नितौ चरणौ ययोः स्यातां तथा अस्वेदनौ स्वेदरहितौ। मृदुतलौ मृदुतले ययो
स्तौ तथाभूतौ प्रशस्तौ। तथा च समुद्रः॥ स्निग्धौ ताम्रनखौ धन्यौ कूर्मपृष्ठौ समौ हितौ निगूढगुल्फौ सुश्लि
ष्टघनांगुलिसमन्वितौ। मत्स्यांकुशयवाब्जौ तु हलवज्रासिसंयुतौ। अस्वेदनौ मृदुतरौ हितौ कुमार्याश्चरणौ

बा॰ सं॰

२८१ अतो विपर्यस्तगुणैर्दुःखदारिद्र्यदायिनी। यस्याः पादौ नर्तकान्याम् उद्वेगकारानन॥ तं घाच गोष्ठितादिति। जंघे रोम
रहिते रोमवर्जिते विशिरे शिरारहिते सुरते वर्तुले जानुद्वये जानुयुगले समं तुल्यं। अनुल्बणमस्फुटसंधिदेशं सुश्लि
ष्टजानुनायं। ऊरू घनाविति। ईरू घनौ संनतौ करिकरप्रतिमौ गजहस्तसदृशौ अरोमौ रोमवर्जितौ यस्याः भग
मश्वत्थपत्रसदृशं अश्वत्थदलपत्राकारं विपुलं विस्तीर्णं। श्रोण्या ललाटं श्रोणीललाटं तत्क्षेत्रविस्तीर्णं कूर्म
समुन्नतं कूर्मपृष्ठवत्। कूर्मपृष्ठाकारं। मणिश्च निगूढः स्त्रीयः विपुलं गम्भीरा गोश्रियं लक्ष्मीं ददाति करोति॥
तथा च समुद्रः। जंघे तु रोमरहिते विशिरे च सुवर्तुले। सुश्लिष्टे जानुनी धन्या ऊरू रोमरहितौ। गजहस्तसमौ करभसु
स्पर्शौ संनतौ समौ॥ सुस्पष्टं कूर्मपृष्ठं च विपुलं च घनं शुभं। मणी निगूढः सुश्लिष्टः स्फिक् ज्ञानविपुला शुभौ। ना
भिदेशं सुगम्भीरं च यस्याः सा धनभागिनी। अथ नितम्बनाभीलक्षणमाह॥ विस्तीर्णमांसोपचितो नितम्बो गुरु
श्च धत्ते रसनाकलापं॥ नाभिर्गभीरा विपुलांगनानां प्रदक्षिणावर्तगता च शस्ता। नितम्बः कटीप्रदेशः स च विस्ती
र्णः पृथुलः मांसोपचितः मांसलः गुरुश्च गौरवयुक्तः रसनाकलापं धत्ते धारयति। रसनायाः कलापं च धत्ते
धारयति। रसना मेखला। तथा च। जघनं विपुलं यस्याः मृदुस्पर्शं रोमवर्जितं॥ सुवर्णाभरणैर्युक्ता सा भवेद्राज्य
भागिनी॥ नाभिर्गभीरेति। अंगनानां स्त्रीणां नाभिर्गम्भीरा विपुला विस्तीर्णा प्रदक्षिणावर्तेन चगता
प्रशस्ता धन्या। तथा च। गंभीरा विपुला नाभिर्दक्षिणावर्तमाश्रिता। शस्ता विपर्ययेनैषा वामावर्ता वि
शेषतः। अथ मध्यस्तनरोमग्रीवालक्षणमाह॥ मध्यं स्त्रियास्त्रिवलिनाथ मरोमराजिः वृत्तौ घनौ चाविषमौ क
ठिनावुरस्यौ। रोमप्रवर्जितमुरो मृदु चांगनानां ग्रीवा च कंबुनिचितार्थसुखानि धत्ते॥ यस्याः यस्याः सा राजमहि
षी कन्या नारीत्यत्र संशयः। वृत्तौ घनाविति। उरसि भवावुरस्यौ स्तनौ वृत्तौ वर्तुलौ घनौ संनतौ अविषमौ तुल्यौ क
ठिनौ कर्कशौ। तथा च। वक्षो विलोमः मृदुस्पर्शो विस्तीर्णः पतिसौख्यदः। शिरालतश्च विषमो वैधव्यायास २८१
शोकदः। ग्रीवा चेति। ग्रीवा शिरोधरा वलित्रयविचितार्थसुखानि धत्ते ददाति। तथा च गर्गः। कठिना त्रिरेखा
कंभगौषपञ्चनाः स्निग्धा सुमांसोपचिता मृदुत्वा॥ न चातिदृश्या च तुरंगुला च ग्रीवा च दीर्घा भवती तु धन्या॥

अथाधरदंतलक्षणमाह॥ बंधुजीवकुसुमोपमोऽधरो मांसलो रुचिरबिंबरूपधृक्॥ कुंदकुड्मलनिभाः समा द्विजा
योषितां पतिसुखामितार्थदाः॥ अधर अधरोष्ठः बंधुजीवकुसुमोपमः बंधुजीवपुष्पसदृशः रक्त इत्यर्थः।
मांसलो मांसोपचितो रुचिरबिंबरूपधृक्। रुचिरस्य दीप्तियुक्तस्य बिंबस्य बिंबफलस्य तुल्यं रूपं बिभर्ति धारयति।
तथा च। अधरो बिंबसंकाशो मांसलः स्फुरितस्तथा॥ यस्याः सा राजमहिषी कुमारी नात्र संशयः। कुंदकुड्मलेति। द्वि
जा दंताः कुंदकुड्मलनिभाः कुंदपुष्पविशेषः। तस्य कुड्मलं कलिका तन्निभा तत्सदृशाः समास्तुल्याः योषितां
स्त्रीणां पतिसुखं भर्तृसुखं अमितमपरिमितं प्रभूतमर्थं धनं च ददाति। तथा च गर्गः॥ तीक्ष्णाग्रदंताः सुसमा दृढाश्च
शुद्धा मृणालेंदुसमानवर्णाः। निरंतरास्त्वायुः भवंति धन्याः दुग्धार्तथाय रक्तप्रकाशाः। तथा च समुद्रः। दृढाश्च दंता यस्
याः सर्वगोक्षीरपांडुराः। स्निग्धा शिखरिणः स्निग्धा राजभार्या च सा भवेत्॥ अथ वदननासिकादृग्लक्षणमाह॥ दाक्षि
ण्ययुक्तमशठं परपुष्टहंसवल्गु प्रभाषितमदीनमनल्पसौख्यं। नासा समा समपुटा रुचिरा प्रशस्ता दृग्नीलनीरज
दलद्युतिहारिणी च॥ प्रभाषितं वचनं दाक्षिण्ययुक्तमानुकूल्यसंयुतमशठमशाठ्यरहितं। परपुष्टः कोकि
लः हंसः पक्षिविशेषः तत्सदृशवल्गु मनोरम्य तच्चादीनं दैन्यरहितं यद्भिभर्ति तदनल्पसौख्यं प्रभूतसौख्यं च। गर्गः।
हंसस्वना दुंदुभिनेमिघोषा मेघस्वराः शंखनिनादघोषाः। मयूरचक्रप्रतिनिस्वनाश्च स्त्रियस्तथा कोकिलतुल्य
नादाः। कादंबचक्राह्वयकीर्कणाश्च समस्वनाश्चापि भवंति नार्यः। सर्वाः प्रशस्ता धनपुत्रवत्यो भवंति धर्मानुर
ताः सदा ताः॥ नासा समेति। नासा नासिका। समा स्पष्टा। समपुटा तुल्यनासापुटा रुचिरा दीप्तियुक्ता प्रशस्ता शुभा।
तथा च। स्पष्टा समा समपुटा सौभाग्यं च दामतां ददाति। दृग्दृष्टिः नीलनीरजदलद्युतिहारिणी दृष्टिर्नीलं च तन्नीरज
नीलकमलं रक्तं नालोत्पलं तस्य दलं पत्रं तस्य द्युतिं कांतिं हरति तत्शीला नलिनरक्तदलद्युतिहारिणी दृष्टिः प्रशस्ता॥
तथा च। नीलोत्पलसवर्णाभे नेत्रे लावण्यसंयुते॥ मृगाभे चाथ सा कन्या धनधान्यविवर्धिनी॥ अथ भ्रूकर्णललाट
लक्षणमाह॥ नो संगते नातिपृथुले न लम्बे शस्ते भ्रुवौ बालशशांकवक्रे। अर्धेंदुसंस्थानमरोमशं च शस्तं ललाटं न
नतं न तुंगं॥ भ्रुवौ नासंगते न संश्लिष्टे नातिपृथुले नातिविस्तीर्णे न लंबे नातिप्रलंबे बालशशांकवक्रे॥ बालो

वा॰ सं॰ यासांतु शांकर्थ्यं द्वितीयस्यांतिथौनद्वद्वकुटिलाःस्ते ॥ तथाच । यान्कान्दसमेन केनलंबनातिसंगते । भुवोयस्याः
कुमार्यास्तांमदारात्तां विनिर्दिशेत ॥ अर्धेंदुसंस्थानमिति । ललाटंमुखस्यअर्धेंदुसंस्थानमर्धचंद्राकारमरोमशंस
मरोहितंनिम्नंनितुंगंनोन्नतं समं शस्तं । तथाच । नोन्नतंनचनिम्नंवाद्धिरोमविवर्जितं ॥ अर्धचंद्राकृतिमोल्लला
२८२ टं शस्यतेस्त्रियः । अथकर्णकेशशिरोलक्षणमाह ॥ कर्णयुग्ममपियुक्तमांसलं शस्यतेमृदुसमंसमाहितं । स्निग्ध
नीलमृदुकुंचितैकजा मूर्धजाः सुखदाः शिरः समं ॥ कर्णयुग्ममथात्रद्वयमपियुक्तमांसलंनिमांसमित्यर्थः । मृदु
कोमलं समंतुल्यंसमाहितंसंलग्नंशस्यतेस्त्रियः । तथाच । नातिलंबौसमौवृत्तौ मांसलौनोयुक्तमांसलौ ॥ कर्णौय
स्याः सस्ताःसातुराजभार्यानसंशयः । स्निग्धेति । मूर्धजाः केशाः शिरः समंननिम्नं नोन्नतं सुखकरंभवेत् । तथाच
नोन्नतं नाथवानिम्नं शिरः सौख्यप्रदंस्मृतं ॥ अथदुलपादहस्तलक्षणमाह ॥ शृंगारासनवाजिकुंजररथश्री
वृक्षयूपेषुभिर्मालाकुंडलचामरांकुशयवैःशैलध्वजैस्तोरणैः ॥ मत्स्यस्वस्तिकवेदिकाव्यजनकैः शंखातपत्रांबु
जैः पादेपाणितलेऽथवापिहृदयेयांतिस्त्रियोराज्ञितां ॥ शृंगारोजलभांडं । आसनं पल्यंकादि । तुरगः । कुंजरो
दंती । रथः प्रसिद्धः । श्रीवृक्षोबिल्वः । यूपः यज्ञस्तंभः । इषवः शराः । एतैश्चिह्नैस्तथामालास्रक् । कुंडलं कर्णाभरणं ॥
चामरं बालव्यजनं । अंकुशः प्रसिद्धः । यवो यवाकारः एतैरपि । शैलः पर्वतः । ध्वजः पताका । तोरणं प्रसिद्धं । एतैर
पि । तथा मत्स्यो मीनः स्वस्तिकश्चिह्नविशेषः । वेदिकावेदी । व्यजनं तालवृंतं । एतैरपि । शंखः प्रसिद्धः । आतपत्रं
छत्रं । अंबुजं कमलं । एतैः शृंगारादिभिश्चिह्नैः पादे चरणतले । पाणितले हस्ततले अथवापिहृदयेचिह्निताः
स्त्रियो योषितः राज्ञितां राज्ञीत्वं यांति प्राप्नुवंति ॥ तथाचगर्गः । मत्स्यः समुद्रोवसुधारथध्वजंशाथाश्रीविंलवकुंभी
वा । शंखः पद्मकमथासनं वा द्विपशाथाव्यजनतोरणंच । छत्रं यवः पद्ममथांकुशंचसिंहासनं स्वस्तिक एववापी । कू २८२
र्मः पताकामकरः पुमांश्चदंडं सरित्पूर्णघटोरथश्च । पाणिद्वयेतानिभवंतियासामेकंतथाद्वौथबहूनिवापी ॥
अत्यंतसौख्यंबहुपुत्रतांच स्त्रीणांनिवाथालक्षणमाहि ॥ तथाचसमुद्रः । यस्याः पाणितलेचक्रं छत्रं वा
ध्वजोपिवा । श्रीवत्सं कलशं शंखं मासनं चामरं तथा । अंकुशश्चैव माला च यस्याद्दृश्येत । एकमात्रत

सेन्युत्रंराज्ञानंपृथिवीपतिं ॥ यस्याः पाणितलेदृश्यकोष्ठागारः सतोरणः । अपिदासकुलेजातासाराज्ञमहिषीभवे
त् । अथहस्तलक्षणमाह ॥ निगूढमणिबंधनौतरुणपद्मगर्भोपमौ करौनृपतियोषितस्तनुविकृष्टपर्वांगुली । न
निम्नमतिनिम्नतं करतलं सुरेखान्वितं करौल्पविधवाचिरंसुतसुखार्थसंभोगिनौ ॥ करौहस्तौ निगूढमणिबंधनौ यथा
मणिबंधनग्रहणेनहस्तमूलमुच्यते ॥ तरुणपद्मगर्भोपमौ । तरुणमभिनवं यत्पद्मं कमलं तस्य गर्भोभ्यंतरं तदुप
मौ तत्सदृशौ । तथातनुविकृष्टपर्वांगुली ॥ तनवः सूक्ष्माययोरंगुल्यस्तथाविकृष्टानिदीर्घाणि पर्वाणि यासामंगुली
नां ताविधृते ययोः तथाभूतौ करौनृपतियोषितोराज्ञपत्न्या भवतः । करतलंहस्ततलंन निम्नं नन्नत्वं चानुन्नतं सुरे
खान्वितं शोभनाभीरेखाभिरन्वितं युक्तं । चिरंचिरकालमविधवापतियुतंसमुनसुखार्थसंभोगिनौ । पुत्रसुखसंभो
गयुक्तां । तथाविधं हस्ततलं तांकन्यकां करोति । तथाच । निगूढमणिबंधौतुपद्मगर्भसमप्रभौ । विरलांगुलिपर्वौ
तौ करौनृपतियोषितः । नोच्चौननिम्नः सुसमः सुरेखाभिः समन्वितः । करौयस्याभवेन्नार्याः साराजमहिषीभवेत्
। अन्यदप्याह । मध्यांगुलिंयामणिबंधनोत्था रेखागता पाणितलेंगनायाः । ऊर्ध्वस्थिता पादतलेथवायापुं
सोथवाराज्यसुखायवास्यात । अंगनायाः स्त्रियः पादतले या रेखा मणिबंधनोत्था मणिबंधोत्पन्ना हस्तत
लान्मध्यांगुलिंयावद्गता । अथवायारेखापादतलेऊर्ध्वस्थिताः पुंसः पुरुषस्यापिचैवंविधाहस्ततलेपा
दतलेवा भवंति । साराज्यसुखायस्याद्भवतराज्यंसुखं चकरोतीत्यर्थः । तथाच । मणिबंधसमुद्भूतामध्यांगुलिसमा
श्रिता । रेखापाणितलेयस्याः साकन्याराज्यभागिनी ॥ अन्यदप्याह ॥ कनिष्ठिकामूलभवा गतायाप्रदेशिनीमध्य
मिकांतरालं । करोतिरेखापरमायुषस्याप्रमाणमूनान्तदूनमायुः । यारेखाकनिष्ठिकामूलादुत्पन्नाप्रदेशिन्या
मध्यमिकयोश्चांतरालंमध्यमंतरंगतासारेखापरमायुषप्रमाणंकरोति । विच्छिन्नाखिकेनचान्तरालेविर्तात्य
र्थः । यदूनाभवतिरेखानुसारेणमनुष्यादूनीयमिति । तथाच ॥ कनिष्ठामूलसंभूता गता मध्यमकांतरं ।
प्रदेशिन्याश्चसारेखायस्यासादीर्घजीविनी ॥ अथापत्यलक्षणमाह ॥ अंगुष्ठमूलप्रसवस्यरेखाः पुत्राश्चदुत्याः
प्रमदाश्चतन्यः । अच्छिन्नमध्याश्चद्दायुष्वांताः स्वल्पायुषां छिन्नकपुष्प्रमाणाः । अंगुष्ठमूलेप्रसवस्यरेखा

बा॰ सं॰ देवआदेःरेखाभवंति।यावंत्यस्तास्त्रियोरेखास्तावंतःप्रसवाः।तत्रयारेखास्थूलाःसुतास्तेपुत्रायाश्चतन्व्यःसूक्ष्माः
प्रमदाःस्त्रियः।याश्चरेखाअछिन्नाःयस्यानिमध्यानियासांतायुद्दीर्घायुषोदीर्घजीविनोज्ञेयाः।केचित्छिन्नमूला
२८३ इतिपठंति।लघुप्रमाणाश्चस्वल्पायुषामल्पजीविनांस्त्रियाः।तथाच।अंगुष्ठमूलेयारेखापुत्रास्ताश्चविनिर्दिशे
त्।सूक्ष्मादीर्घतरस्ताभ्यांवृद्धिर्नाडीदीर्घजीविनः।एवंशुभाशुभलक्षणान्युक्त्वानेनादमशुभस्यलक्षणानिवक्ष्या
मीत्याह॥इतीदमुक्तंशुभमंगनानामतोविपर्यस्तमनिष्टमुक्तं।विशेषतोऽनिष्टफलानियानिसमासतस्तान्यनु
कीर्तयामि॥इतिश्लोकःप्रकाशार्थः।इत्येवंप्रकारमिदंमंगनानांस्त्रीणांशुभमुक्तंकथितं॥अतोऽस्माद्यद्विपर्यस्तं
विपरीतं।तदनिष्टमशुभमुक्तं।यानिविशेषतोऽनिष्टफलान्यशुभफलानितानिलक्षणानिसमासतःसं
क्षेपतोऽनुकीर्तयामिकथयामि।तत्रादावेवपादलक्षणमाह॥कनिष्ठिकातदनंतरगावामहींनयस्याःस्पृशं
तिस्त्रियःस्यादगनाथवायानुमतीयस्याःप्रदेशिनीसाकुलटातिपापा॥यस्याःस्त्रियःअंगनायाःपादकनि
ष्ठिकातदनंतरगावानामिकामहींभूमिनस्पृशति।अथवायस्याःप्रदेशिनीअंगुष्ठमतिक्रम्यगतासाकुल
टाअसती।अतिपापाचस्याद्भवेत्।तथाच।कनिष्ठापादयोर्यस्याभूमिंस्पृशतिनांगुलिः।नामातिक्रमतिकौ
मारेबंधकींतांविनिर्दिशेत्॥पादप्रदेशिनीयस्याअंगुष्ठादतिरिच्यते।कुमारीकुरुतेजारंयौवनस्थाविशेषतः॥अथ
जंघागुल्फोदरलक्षणमाह॥उद्बद्धाभ्यांपिंडिकाभ्यांशिरालेशुष्केजंघेरोमशेवातिमांसे॥वामावर्तंनिम्नमल्पंचगुह्यंकुंभा
कारंचोदरंदुःखितानां।उद्बद्धाभ्यांपिंडिकाभ्यांउपलक्षितोजंघापश्चिमभागःपिंडिकाज्ञातव्याः।तयाशिरा
लेशिरासंततेशुष्केनिर्मांसेरोमशेरोमयुक्तेअतिमांसलेबहुमांसलेवादुःखितानांस्त्रीणांभवेतः।तथाच।शुष्के
जंघेतिमांसेचरोमशेचोर्ध्वपिंडिके॥यस्याःसादुःखितानित्यंपुत्रवित्तविवर्जिता।वामावर्तमिति।गुह्यंभगंवा
मावर्तंवामावर्तैःरोमभिःसंयुक्तंनिम्नंचधःस्थमल्पंचातिसंकटंदुःखितानांभवति।तथाच।वामावर्तंभगंयस्यादीर्घं २८३
चुल्लीसमप्रभं॥निम्नंवातेनदोषेणवेश्यात्वंचगच्छति।कुंभाकारमिति।उदरंकुंभाकारंघटाकारंदुःखितानां
मेवभवति।तथाच।कुंभोदरीचयाकन्यादीर्घोदरसमन्विता।भगंदराचदुःखार्तादासभावमवाप्नुयात्।अथ

ग्रीवालक्षणमाह॥ह्रस्वयातिनिःस्वतादीर्घयाकुलक्षयंग्रीवयापृथुलयाचयोषितःप्रचंडता।ग्रीवयाह्रस्वयाऽल्पया
तिह्रस्वयानितांतंनिःस्वताधनत्वंभवति।अतिदीर्घयाकुलक्षयं।वंशविनाशः।पृथुलयापृथुलत्वेनयाचपरिस्थूलया
ग्रीवयायोषितःस्त्रियःप्रचंडताक्रूरताभवति।तथाच।कुलक्षयदीर्घग्रीवा।पृथुग्रीवाप्रचंडत्वंह्रस्वयायोषितोवदेत्।
अथनेत्रगंडयोर्लक्षणमाह॥नेत्रेयस्याःकेकरपिंगलेवासादुःशीलाश्यावलोलेक्षणाच।कूपौयस्यागंडयोश्चस्मितेषु
निःसंदिग्धंबंधकींतांवदंति।यस्याःस्त्रियःनेत्रेचक्षुषीकेकरेकाणेपिंगलेकपिलेवासादुःशीलाअसतीभवति।त
थाच।पारावताक्षीयाकन्यावज्राक्षीतथाचया॥इंद्राक्षीचवलाक्षीचतांकन्यांवर्जयेन्नरः॥कूपौयस्याइति।यस्या
योषितःस्मितेषुहसितेषु।तथाच।यस्याःसतत्समानायाजायतेगंडकूपकाः॥भर्तारंहन्तिसाक्षिप्रंनैवतत्ररमेच्चिरं॥
पराजारःदूष्यादंसंत्यादृश्येतकूपयागंडयोर्द्वयोः॥खलकाकोलगंडाश्याविकृताश्यामदाशना।एकापियस्यानमही
संस्पृशेच्चचरणांगुलिः।तत्समश्वश्रमंत्रीयस्याअधमांतांविनिर्दिशेत्।अन्यदप्याह॥प्रविलंबिनिदेवरंललाटेश्वशु
रंहंत्युदरंस्फिजौपतिंच॥अतिरोमचयान्वितोत्तरोष्ठोनशुभाभर्तुरतीवयाचदीर्घा।ललाटेप्रविलंबिनिलंबमा
नेदेवरंभर्तृभ्रातरंहंतिमारयति॥उदरंप्रलंबिनिश्वशुरंभर्तुःपितरंहंति।स्फिजौप्रलंबमानयोःपतिंभर्तारंहंति।
तथाच।श्रोणिर्यस्याःप्रलंबंनेललाटमुदरंस्फिजौ।श्रीश्वश्रयापुरुषान्हंतिदेवरंश्वशुरंपतिं।अतिरोमचयान्विता
नरहंतिअतिरोमचयेनरोम्णांसंचयेनान्वितःसंयुक्तःउत्तरोष्ठोयस्याःसाभर्तुःपत्युर्नशुभा।अतीवया
दीर्घात्युच्चासापिभर्तुर्नशुभा।तथाच।सास्त्रियकाचसाकन्यायातिदीर्घामलाव्रता।दासभावमवाप्नोतिदुर्दशे
षेणसांगना।अथस्तनकर्णदंतलक्षणमाह॥स्तनौसरोमौमलिनोल्बणौचक्लेशंदधातेविषमौचकर्णौ।स्थूला
करालाविषमाश्चदंताक्लेशायचौर्यायचकृष्णमांसाः॥स्तनौसरोमौरोमयुतौमलिनौकृष्णवर्णौउल्बणौरूक्षौ
विषमावतुल्यौक्लेशंक्लेशंदधातेदत्तः।तथाच।रोमयुक्तौस्तनौयस्यामलिनौनातिगौरतौ।दुःखितासाभवेन्नि
त्यंनिर्धनावर्जितातथा॥एवंविधौचकर्णौस्त्रीणांसरोमौमलिनावुल्बणौविषमावतुल्यौक्लेशंचदत्तः॥तथा
च।शिरायुक्तौनचसमौकर्णौदारिद्र्यभागिनौ।स्थूलाःकरालाइति।दंताःस्थूलाअतिविस्तीर्णाःकरालाउद्गंब

बहिर्निर्गताश्च। विषमा अंगुल्यः क्लेशाय भवंति। रूक्षमांसाश्च दंताश्चौर्याय भवंति। सामुद्रीयो भवति। वर्थः। तथाच
शा॰सं॰ करालाविषमाः रूक्षमांसा बहिर्गताः। दंता दुःखप्रदास्तेषां वैधव्यायामकारिणः॥ अथ दंतलक्षणमाह॥ कृष्णाद
रूपेर्द्धकाक कंके: मर्जारस्य वानरकसमाननिंदैः। शुद्धैः शिरालैर्वियमैश्च दंतैर्भवंति नार्यः मरणविनष्टाः। दंतैः
२८४ कठोरैः कृष्णा हारिद्र्यवर्णैश्छिन्नैश्छिद्रैर्युक्ते: कृष्णा श्यामां सामान्याः पशिणाकः नाणिकाकंकोपशिखा। मर्जारस्य कीट
। उलूकः कौशिकः तत्समानैश्छिन्नैः स्तनुल्येर्लक्षणैः शुष्कैः निर्मांसैः शिरालैः शिरामंततैः विषमैश्च नार्यः क्लि
यः मरणविनष्टाः कलत्रैर्निर्धनैश्च हीना विरहिता भवंति। तथाच। कृष्णा रसदृशाश्छिन्नैः काकोलूकसमप्रभैः शु
केः करालैर्विषमैः कठोरैः दुःखान्विता स्त्रियः। अन्यदप्याह॥ यातु नरागेन समुन्नतेन रुक्षास्यकेशा कृत्वा दीर्घ्यासा॥
मायाविरूपा सुभवंति दोषायत्राकृतिस्तत्र गुणा वसंति। यातुस्त्री समुन्नतेनोच्चेन नासिकाग्रेण नोपलक्षिता रुक्षास्यकेशा
यस्याः सा नित्यं कलहप्रियाकारिणी भवति। तथाच। या कुलत्ररागेन कोश्यात्रिं मदनालितैः। अस्याः सा दुःखिता
नित्यं भर्तुर्निर्धनकारिणी। निम्नयो विरूपाकृतिमायावादुःखेना विरूपासुस्त्री पुदोषा भवंति॥ यत्र यस्याकृतिः
शोभना भवति। तत्र तस्यां गुणा वसंति। अथ शरीरे क्षेत्रविभागमाह॥ पादौ सगुल्फौ प्रथमं प्रदिष्टं जंघे द्वितीयं च
सजानुचक्रे। मेढ्रोरुमुष्काश्च ततस्तृतीयं नाभिः कटिश्चेति चतुर्थमाहुः॥ उदरं कथयंति पंचमं हृदयं षष्ठमथस्तना
न्वितं। अथ सप्तममंसजत्रुणा कथयंत्यष्टममोष्ठकंधरं॥ नवमं नयने सभ्रूणि सललाटं दशमं शिरस्तथा॥ अशु
भेष्वशुभं दशाफलं चरणाद्येषु शुभेषु शोभनं॥ पादौ गुल्फाविति। पादौ चरणौ सगुल्फौ गुल्फसहितौ प्रथमाद्यं क्षेत्र
दशाभागं च शुभाशुभचिन्हितं प्रदिष्टमुक्तं। जंघे सजानुचक्रे जानुयुक्ते जंघे द्वितीयं दशाभागमुक्तं कथितं। मेढ्रलिंगं।
ऊरू द्वौ। मुष्कौ वृषणौ। ततोनंतरमेव तत्तृतीयं दशाभागं। नाभिः कटिश्चेति चतुर्थं दशाभागमाहुः कथयंति। उदर
मिति। उदरं पंचमं दशाभागं कथयंति मुनयः। हृदयं स्तनान्वितं स्तनसंयुक्तं षष्ठं दशाभागं॥ अथानंतरं सप्तमं स्कंधौ २८४
सजत्रुणा च सप्तमं दशाभागं॥ ईष्टौ द्वौ। कंधरा ग्रीवा। एतेनाष्टकं धरं अष्टमं दशाभागं कथयंति। नयने नेत्रे सभ्रूणी
भ्रूसहिते नवमं दशाभागं। शिरो मूर्धा सललाटं ललाटसहितं दशमं तस्मात् नेन प्रकारेण अत्र यद्यपि सामान्ये
नोक्तं।

तथापि परमायुःप्रमाणेन द्वादशवार्षिकं। दृशां पक्षिकुल्य विचारः कार्यः। नानायुषस्तत्प्रमाणेन एतेषु क्षेत्रविभागेषु च
रणाद्येषु पादप्रभृतिषु अशुभेषु अशुभं दशाफलं शुभेषु शोभनमिति। एतदुक्तं भवति। यच्च द्वात्रिंशत् संख्यासवि
द्वौ नीं शुभबहुत्वं। नरतानिश्च प्रोक्तं विपरीतमतः शुभं सर्वमित्यनेन क्रमेण यत्रांगे। अशुभानि लक्षणानि तद्दशाभा
गमशुभं यत्र शुभानि तच्छोभनं। यत्रव्यामिश्राणि तन्मध्यमिति॥ २९॥ ॥७॥ इति भट्टोत्पलविरचितायां सं
हितावृत्तौ कन्यालक्षणं नाम एकोनसप्ततितमोऽध्यायः॥ ६९॥ ॥ अथ वस्त्रच्छेदलक्षणं व्याख्यायते॥ तत्रा
दौ तेषां अश्विन्यादीनां नक्षत्राणां फलमाह॥ प्रभूतवस्त्रदाश्विनी भरण्यथापहारिणी॥ प्रदह्यतेऽग्निदैवते प्रजेश्वरे
ऽर्थसिद्धयः॥ मृगेन्तु मूषकाद्भयं व्यसनमेव शांकरे॥ पुनर्वसौ शुभागमस्तदग्रभे धनैर्युतिः॥ भुजंगमे विलुप्यते
२८ मघासु मृत्युमादिशेत। भगाह्वये नृपाद्भयं धनागमाय चोत्तरा। करेण कर्मसिद्धयः शुभागमस्तु चित्रया शुभं
च भोज्यमानिलाद्द्विदैवते जनः प्रियः। सुहृद्युतिश्च मित्रभे तदग्रभे ह्यम्बरक्षयः। जलप्लुतिश्च नैर्ऋते रुजो जला
धिदैवते। सुमृष्टमन्नमप्यतो विश्वदेवते विष्णुभे भवति। नेत्ररोगता। धान्यलब्धिमपि वासवे विदुर्वारुणे विषभयं
मदूह्यं। भद्रपदाद्भयं सलिलौतोन्तःपरतश्च भवेत्फलकम्पिः। रत्नयुतिं कथयंति च पौष्णे योऽभिनवांबरमि
च्छति भोक्तुं॥ प्रभूतवस्त्रदाश्विनीति। अश्विनीनक्षत्रे यद्यभिनवं वस्त्रं प्रथमं परिदध्यते। तदाश्विनी प्रभूतवस्त्रदा भवं
ति। प्रभूतानि बहूनि वस्त्राणि वसनानि ददाति। अथानंतरं भरणी वस्त्रापहारिणी भवति। अग्निदैवते कृ
त्तिकानक्षत्रे वस्त्रं प्रदह्यते अग्निना। प्रजेश्वरे प्राजापत्ये रोहिण्यां अर्थानां सिद्धयः॥ प्राप्तयो भवंति। मृगे सौम्ये। मृगशिरसि
मूषकाद्रूस्य भयं भवतीति तत्र च्छिद्यते शांकरे आर्द्रायां व्यसनं विपत्प्राणान्तो भवतीति शिवयोग इत्यर्थः।
पुनर्वसौ शुभस्यार्थस्य धर्मादेरागमः प्राप्तिर्भवति। तदग्रभे तस्य पुनर्वसोरग्रतः पुरतः अठे भे नक्षत्रे तिष्ये
धनैर्वस्त्रैर्युतिः संयोगो भवति। भुजंगभे इति। भुजंगभे आश्लेषायां वस्त्रं विलुप्यते छिद्यते मघासु मरण
मादिशेद्वदेत। भगाह्वये पूर्वाफाल्गुन्यां नृपाद्राज्ञो भयं भवति। उत्तरा उत्तराफाल्गुनी धनागमाय
वित्तप्राप्तये भवति॥ करेणेति। करेण हस्तनक्षत्रेण कर्मणां सिद्धयो भवंति॥ चित्रया शुभागमः शुभस्या

रोगा
बा. सं. र्थस्य धर्मादिशुभागमः प्राप्तिर्भवति। अनिलेश्वानोऽशुभं शोभनं भोउपमर्दो भवति। इन्द्रदैवतादिशास्तायां जनप्रिया
न खलु भाभवति। सुहृद्युतिश्चेति। मित्र नैऋत्या यां सुहृद्धर्मं मन्त्रसंयोगः। तद्य भेत स्या अनुराधाया अपाता
२८५. हतः। छिते भेन सवेत्यमाम्यां बरस्य वस्त्रस्य क्षयो विनाशो भवति। नैर्ऋते मूले जलभुतिन स्वज्ञलमयुतिर्यतोऽत्य
र्थः। जलाधिदैवते पूर्वाषाढायां रोगागमो भवति। एषु मन्त्रमपैति वैश्वदैवते उत्तराषाढायां मृष्टमन्नं भोजनं भवति
वैश्वमथ श्रवणे नेत्ररोगतापनयनपीडाता। मंत धनिष्ठायां धान्यानां लब्धिः। आभाति दुर्जनता वारुणे शतभिषजि मद
दृर्ताभयं विषकृतं विषाल्पं न भवति। भद्रपदासु चेति भद्रपदाः पूर्वभाद्रपदासु सलिलोत्थं जलोत्थं भयं भव
ति। तत्परतः उत्तरभद्रपदायां सुतलब्धिः पुत्रलाभो भवेत्। पौष्णे रेवत्यां रत्नयुतिः रत्नसंयोगं कथयंति न वदंति। सर्व
नक्षत्राणां कर्मयोग्यतामाह॥ भोक्तुं नवांबरं शस्तमर्थेऽपि गुणवर्जिते। विवाहे राजसन्माने ब्राह्मणानां च संमते॥ वि
वाहे पाणिग्रहणकाले राजसन्माने नृपपूजायां। ब्राह्मणानां च संमतद्विजवचनेनेत्यर्थः। एतेषु कालेषु शुभं वर्जि
तेऽपि कृत्तिकानक्षत्रे नवांबरमभिनवं वस्त्रं भोक्तुमभिभोक्तुं शस्तं प्रशस्तमिति। अधुना वस्त्रादीनां दैवत्येन शुभा
शुभमाह। वस्त्रस्य कोणेषु वसंति देवा नराश्च पाशांतदशांतमध्ये। शेषास्त्रयश्चात्र निशाचरांशास्तथैव शय्या
सनपादुकासु। वस्त्रस्यांबरस्य कोणेन च कश्चिभागेन प्रविभक्तस्य कोणेषु चतुर्षु देवाः सुरा वसंति। वस्त्र
स्य मृदुपाशांशांतः अग्रदशांतः पाशांतमध्यभागे दशांतमध्यभागे नराश्च दैवविशेषाश्च संति॥ शेषास्त्रयः
कोष्ठकाः समममध्यवर्तिनो वास्मिन्वस्त्रे निशाचरा। शत्रुराक्षसभागाः
न केवलं वस्त्रस्यायं नवविभागो यावच्छय्यायामास्तरणे आसने पादुकासु
चेति वस्त्रस्य मृद्वग्रयथोक्तं तथा सने पादुकासु आसनस्य शय्याशयनस्य भू
त्साग्रपरिकल्पना पादुकापानत्कपादवन्मृद्वग्रन्वकोष्ठं विभक्तस्य च
न्त्रस्यन्यासः। तथाच गर्गः। वस्त्रमुत्तरलोमंतु प्रावृद्दशं च धाभजेत्। त्रि २८५.
धा दशांतपाशांतेत्रिधा मध्यं पृथक्पृथक्। चतुर्षु कोणेषु सुराः पाशांते म

देव	निश	देव
नर	निश	नर
देव	निश	देव

ध्वमेनराः। दशांतमध्ये वेयस्या मध्यभागत्रये पुनः। राक्षसानि च संपर्यं तस्यादिषु अपयं चाधि रिति त्रयोजनमा
दूषितं त्रमषी गोमयकर्दमाद्यैश्छिन्ने प्रदग्धे स्फुटिते न च विज्ञानं। पुष्टेन वस्त्रात्मत रक्त भुक्तेऽपापं शुभं वाधिकमुना
शके कच्छपुटे यथा तथा मिश्रिते चतुर्द्रव्ये। यत्राष्टादशभागास्तस्मिन् गंधाद्यो योगाः॥ नखतगरतुरुष्कयुता जा
तीकर्पूरमृगकृतोद्बोधाः। गुडनखधूप्या गंधाः कर्तव्याः सर्वतोभद्राः। षोडशकाद्विति। अस्मिन् षोडशकोष्ठके कच्छपुटे य
थातथा येन तेन प्रकारेण चतुर्द्रव्ये मिश्रिते एकीकृते चतुर्भिर्द्रव्यैर्यत्र भागपरिकल्पिते तत्रैवाष्टादशभागा भवंति॥
तस्मिन् कच्छपुटे गंधाद्यो योगाः ऊर्ध्वाधःक्रमेण तिर्यग्वा चतुर्षु कोणेषु वा पूर्वादिभागेषु चतुर्षु कोष्ठेषु वा मध्यम
चतुष्कं वा कोणकोष्ठचतुष्टयं वा प्राक्पंक्तौ वा मध्यमकोष्ठद्वयं वा द्वितीयतृतीयपंक्तौ वांतकोष्ठकं युतावायेनान्ये
न प्रकारेण चतुर्षु मिश्रितेषु अष्टादश भागा भवंति। तस्मिन् कच्छपुटे गंधाद्यो योगा आदिश्य दूरात् स्नानीयान्ये
तान्युच्यतो वक्ष्यति। सर्जरसः श्रीवासक इति। नखतगरतुरुष्कयुता इति। एते अष्टादश भागा मिश्रीकृतास्तेन नखतगर
तुरुष्केन युताः कार्याः। तथा जातीकर्पूरमृगकृतोद्बोधाः। जाती जातीफलं। कर्पूरं प्रसिद्धं। मृगः कस्तूरिका। एतैस्त्रिभिः स
मस्तैः कृतोद्बोधा येषां ते तथाभूताः। गुडनखधूप्याः। गुडेन नखेन समभागेन धूप्या धूपनीयाः। एवं गंधाः स
र्वतोभद्राः कार्याः। यस्मात् यतस्ततो गृह्यमाणा अष्टादश भागा भवंति। अतः सर्वतोभद्राः संज्ञाः। अथैते रेव पा
रिजातानाह। जातीफलमृगकर्पूरबोधितैः सम्मदकारमधुसिक्तैः बहवोऽत्र पा
रिजाताश्चतुर्भिरिच्छापरिगृहीतैः। स्वेच्छया चत्वारि द्रव्याणि संगृह्यते चतुर्भिरिच्छ
परिगृहीतैः जातीफलमृगकर्पूरबोधितैः। जातीफलं प्रसिद्धं। मृगः कस्तूरिका।
कर्पूरं प्रसिद्धं। एतैर्बोधितैः सहकारमधुसिक्तैः सहकारेणाम्ररससंयुक्तेन
मधुना माक्षिकेन सिक्तैः। अत्रास्मिन् कच्छपुटे बहवः प्रभूताः पारिजाताः पारि
जातसदृशगंधा मुखवास्या भवंति। अथ स्नानान्याह। सर्जरसश्रीवासकसम
न्वितान्यत्र सर्वधूपास्तैः। श्रीसर्जरसवियुक्तैः स्नानानि सवालकैलगर्भैः। अ

अ २	प ३	तु ५	शै ८
प्रि ५	मु ८	र २	के ३
स्पृ ४	त्व १	त ७	मां ६
म ७	न ६	श्री ४	कु १

वा॰ सं॰ नास्मिन् कच्छपुटये धूपार्सर्वरसश्रीवासकसमन्वितास्ते सर्वेऽपि बहिःशेषाः। तैरेव सर्वैः भागैः श्रीवासकेन सर्जरसेन स
हितैः सबालकत्वगभिः। बालकं ह्रीवेरं। त्वक् प्रसिद्धा। सबालकत्वगभिः बालकत्वग्सहितैः स्नानानि स्नानीयानि चूर्णा
निसेवंति। अधुना चतुरशीतिं केसरगंधानाह। रोध्रोशीरनतागरुमुस्तापत्रप्रियंगुवनपथ्याः। नवकोष्ठकच्छपुटा
२९८ द्द्रव्यत्रितयं समुद्धृत्य। चंदनतुरुष्कभागौ शुक्त्यर्धपादौ द्विकाद्यन्यानि। कटुहिंगुलगुडधू
पैः केसरगंधाश्चतुरशीतिः। रोध्रो लोध्र इति। रोध्रं प्रसिद्धं। उशीरः नतं तगरं। अगरुः प्रसिद्धः।
मुस्ता पत्रं गंधपत्रं। प्रियंगुः प्रसिद्धः। वनं परिपेलवं। पथ्या हरीतकी। एषां प्राग्वत् यथाक्रमे
ण नवकोष्ठके न्यासः। अस्मान्नवकोष्ठकात्कच्छपुटात् यथा पादक्रमेण द्रव्यत्रितयं त्रीणि द्र
व्याणि समुद्धृत्य संगृह्य तत्र चंदनतुरुष्कभागौ योज्यौ। चंदनं मलयजं। तुरुष्कं सिल्हकं। चंद

रो	उशी	नि
श्र	मु	५
प्रि	व	०

नस्यैको भागः। तुरुष्कस्यैको भागः। शुक्तिर्नखस्तदर्धं योज्यं॥ पादः पुष्प्यादिका चतुर्भागेन योज्या। कटुहिंगुलगु
डधूप्या। कटुहिंगुलो प्रसिद्धो। गुडः इक्षुविकारः। एतैर्धूप्या धूपनीयाः। केसरगंधाश्चतुरशीतिर्भवंति। एतदुक्तं भ
वति। श्रीणि द्रव्याणि नवभेदभिन्नानि यावत् त्रियंते तावच्चतुरशीतिर्भेदा भवंति। तद्यथा। एकादीनां तदंतानां न्यास
॥९८ ७६५४ ३२१॥ तद्यथा पूर्वेण पूर्वेण गतेन युक्तमित्यनेन प्रकारेण प्रथमे स्थाने नव जाताः। द्वितीये षट्त्रिंशत्
तृतीये स्थाने चतुरशीतिः। एतेषां प्रदर्शनाय लोष्टकप्रस्तारः प्राग्वत्कार्यः। अथ दंतकाष्ठविधानमाह। सप्ताहं गोम
त्रहरीतकीचूर्णसंयुते क्षिप्ता। गंधोदके च भूयोऽपि निक्षिपेत् दंतकाष्ठानि। एलात्वक्पत्रांजनमधुमरिचनागपु
ष्पकुष्ठैः। गंधांभः कर्तव्यं किंचित्कालं स्थितान्यस्मिन्। जातीफलपत्रैलाकर्पूरैः कृतयमकभागिकैः भागैः। अवचू
र्णितानि भानोर्मरीचिभिः शोषणीयानि। सप्ताहमिति। दंतकाष्ठानि दंतकाष्ठलक्षणाध्यायोक्तानि हरीतकीचू
र्णसंयुते गोमूत्रे सप्ताहं संस्थाप्य तदनंतरं क्षिप्तानि स्थाप्य भूयः पुनर्गंधोदकेन गंधपानीयमध्ये २९८
सप्ताहं भूयो निक्षिपेत् स्थापयेत्। तत्र गंधोदकलक्षणं। एलात्वगिति। एला सूक्ष्मैला। त्वक् प्रसिद्धा। पत्रं गंध
पत्रं अंजनं सौवीरकं। मधु माक्षिकं। मरिचं प्रसिद्धं। एतैस्तथा नागपुष्पं नागकेसरं। कुष्ठं प्रसिद्धं। एतैरपि सर्वैः

समभागैः गंधांभः कर्तव्यं। गंधोदकं कार्यं। अस्मिन् गंधांभसि किंचित्कालं स्थितानि दिनार्धं स्थापनीयानीत्यर्थः। जा
तीफलेति। जातीफलानां रूढसंख्या च त्वागो भागः। पत्रं गंधपत्रं। तस्य यमसंख्यौ द्वौ भागौ। एलायाः सूक्ष्मैलायाः एको
भागः। कर्पूरं घनसारः। तस्याग्निसंख्यास्त्रयो भागाः। एतैर्यथोक्तभागैरेकीकृत्य चूर्णितैः सूक्ष्मीकृतानि दंत
काष्ठान्यवचूर्णितानि। ततो भानोः सूर्यस्य मरीचिभिः किरणैः शोषणीयानि॥ अथ दंतकाष्ठानि संशोषितानि किं कुर्वं
तीत्याह। वर्णप्रसादं वदनस्य कांतिं वैशद्यमास्यस्य सुगंधितां च॥ संसेविनः श्रोत्रसुखां च वाचं कुर्वंति काष्ठान्यसकृद्भवा
नां। असकृद्धारान् भवंतीत्यसकृद्भवानां दंतालेपां काष्ठानि दंतकाष्ठानीत्यर्थः। संसेविनः कुर्वंति वर्णप्रसादं वर्णस्य प्रसन्न
तां कांतिमित्यर्थः। वदनस्य मुखस्य कांतिं कमनीयतां आस्यस्य वैशद्यं निर्मलत्वं शुद्धतां सुगंधितां च सौगंध्यं। श्रोत्रसुखां
कर्णसुखप्रदां वाचं गिरं कुर्वंति॥ अथ तांबूलगुणानाह॥ कामं प्रदीपयति रूपमभिव्यनक्ति सौभाग्यमावहति वक्त्रसु
गंधतां च। ऊर्जं करोति कफजांश्च निहंति रोगांस्तांबूलमेवमपरांश्च गुणान्करोति। तांबूलं संसेवितं एवं तान्परानन्यान्
गुणान् करोति। वर्णप्रसादं वदनस्य कांतिमित्येते गुणास्तांबूलस्याभिहितानेव॥ इमानन्यापरांस्तत्र यथा कामं कंदर्पं प्र
दीपयत्युत्पादयति। रूपं शरीरशोभामभिव्यनक्ति प्रकाशयति। सौभाग्यं वल्लभत्वमावहति करोति। वदनस्य मुखस्य
सुगंधितां सौगंध्यं च करोति। ऊर्जं बलं करोति। कफजान् कफोत्थान् रोगान् गदान् निहंति विनाशयति। तथा परान् क
ठशुद्धिमन्नपरिणाममलक्षयांश्च करोति। अन्यदप्याह। युक्तेन चूर्णेन करोति रागं रागक्षयं पूगफलातिरिक्तं।
चूर्णाधिकं वक्त्रविगंधिकारि पत्राधिकं साधु करोति गंधं। तांबूलं चूर्णेन रागेण युक्तेन न चातिबहुना नात्यल्पे
न रागं करोति। पूगफलातिरिक्तं॥ पूगफलाधिकं रागस्य क्षयं करोति॥ चूर्णेनाधिकमतिरिक्तं वक्त्रस्य मुखस्य वि
गंधिकारि दुर्गंधं करोति। पत्राधिकं तांबूलं साधु शोभनं गंधं करोति। पुनरपि विशेषमाह। पत्राधिकं निशि हितं
सफलं दिवा च प्रोक्तान्यथाकरणमस्य विडंबनैव। कंकोलपूगलवलीफलपारिजातैरामोदितं मदमुदामुखमुदितं
करोति॥ निशि रात्रौ तांबूलं पत्राधिकं हितं। दिवा चाह्नि सफलं पत्राधिकं विडंबनैवोपहासः। कंकोलं प्रसिद्धं। पूगफ
लानि। लवलीफलं लवंगपुष्पं। तस्य फलासंभवात्पारिजातं जातीफलं। एतैरामोदितं संयुक्तं तांबूलं मदमुदाम

दर्दुरेण मुद्रितं हृष्टं नरं करोति॥ ॥इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ अन्तःपुरचिन्तायां गन्धयुक्तिर्नाम सप्त
बा·सं· सप्ततितमोऽध्यायः॥७६॥ ॥ॐ॥ अथ पुंस्त्रीसमायोगाध्यायो व्याख्यायते। तत्रादावेव प्रयोजनप्रदर्शनार्थमाह॥
शस्त्रेण वेणीविनिगूहितेन विदूरथं स्वां महिषी जघान॥ विषप्रदिग्धेन च नूपुरेण देवी विरक्ता किल काशिराजं॥२
२०० एवं विरक्ता जनयंति दोषान्प्राणच्छिदोऽन्यैरनुकीर्तितैः किं। रक्ता विरक्ताः पुरुषैरतोर्थं परीक्षितव्याः प्रमदाः प्रय
त्नात्॥३॥ शस्त्रेणेति। विदूरथं राजानं स्वमहिषी आत्मीया भार्या विरक्ता वेणीविनिगूहितेन केशकलापप्रच्छादिते
न शस्त्रेणायुधेनातिनिगूढेन जघान हतवती किलेत्यागमवचने। काशिराजमिति। काशिराजं देवी स्वभार्या विरक्ता
विषप्रलिप्तेन विषप्रदिग्धेन नूपुरेण मंजीरेण जघान हतवती। तद्विषं पानादिषु क्षिप्तमित्यर्थः॥ एवमिति। एवमनेन प्र
कारेण विरक्ताः स्त्रियः प्राणच्छिदः प्राणांतिकान् दोषान् जनयंत्युत्पादयंति। किमन्यैरपरैर्दोषैरनुकीर्तितैः कथितैः
प्रयोजनमतोऽस्मात्कारणात् पुरुषैर्नरैः प्रमदाः स्त्रियः प्रयत्नात्सर्वथा रक्ता विरक्ता वा परीक्ष्या विचार्याः॥ तथा
च कामंदकिः। स्नानानुलिप्तः सुरभिः स्रग्वी रुचिरभूषणः॥ स्नातां स्वदनवसनां पश्येद्देवीमभूषितां। नहि देवीगृह
छेदात्मीयात्मनिवेशनात्। अत्यंतवल्लभोपीह विस्रंभं स्त्रीषु न व्रजेत्। देवीगृहगतो भ्राता भद्रसेनममारयत्। मातुः
शय्यांतरे लीनः कारूषं चौरसः सुतः। लाजान्विषेण संयोज्य मधुनेति विलोभितं॥ देवी तु काशिराजेंद्रं निजघान र
होगतं। विषाक्तेन च सौवीरं मेखलामणिनान्वितं। नूपुरेण च वैरंत्यं जारूथ्यं दर्पणेन च। वेण्यां शस्त्रं समाधाय
तथैव च विदूरथं॥ अथानुरक्तायाः लक्षणमाह॥ स्निग्धं मनोभवकृतं कथयंति भावा नाभीभुजस्तनविभूषण
दर्शनानि। वस्त्राभिसंयमनकेशविमोक्षणानि भ्रूक्षेपकंपितकटाक्षनिरीक्षणानि। अंतरचलाः स्वल्पकाश्चेष्टाविशेषा भा
वाः शरीरकंपमुखशोषपांडुत्वक्वेत्यादिकाः॥ मनोभवकृतं कामजनितं स्निग्धं प्रीतिं कथयंति व्यंजयंति। तथा नाभीभुज
स्तनविभूषणदर्शनानि मनोभवकृतं स्निग्धं कथयंति। नाभी उदरमध्यं भुजौ बाहू स्तनौ कुचौ विभूषणान्यलंकरणानि॥ २०१
एतेषां दर्शनानि। वल्लभं दृष्ट्वानुरक्ता स्त्री एतानि प्रकटीकरोति। तथा वस्त्राणामंबराणामभिसंयमनं नियमनं केशानां के
शालेप्यामभिमोक्षणं मुंचनं। एतान्यपि मनोभवकृतं स्निग्धं कथयंति। तथा भ्रूक्षेपकंपितकटाक्षनिरीक्षणानि मनो

भवकृतं स्निग्धं कथयंति। कटाक्षो नयनविभ्रमः। भ्रूक्षेपेण भ्रूचालनेन नयनकंपः स्खलनं तेन यत्कटाक्षनिरीक्षणं तानि भ्रूक्षेप
कंपितकटाक्षनिरीक्षणान्यपि। तथा च काश्यपः। अनुरागगता रक्ता विरक्ता द्वेषमानिनी। मनोदृष्टिनिबंधनहृष्टवदनाकुलीकृ
ता॥ आकारलिंगभेदैश्च ज्ञायते चानुरागिणी। विक्षिप्तमन्यचित्तत्वं गुरुरोगे द्व्यगोपनं। आल्हादनं च वाक्येन यस्याः सा
रागरंजिता। अपरा परा तु या नारी सा विरक्तेति कीर्तिता॥ अथान्यदपि रक्तालक्षणमाह॥ उच्चैः ष्ठीवनमुत्कटप्रहसितं श
य्यासनोत्सर्पणं गात्रास्फोटनजृंभणानि सुलभद्रव्याल्पसंप्रार्थना। बालालिंगनचुंबनान्यभिमुखे सख्याः समालोक
नं दृक्पातश्च पराङ्मुखे गुणकथा कर्णस्य कंडूयनं॥ इमानि विद्यादनुरक्तचेष्टाः प्रियाणि वक्ति स्वधनं ददाति। विलो
क्य संहृष्यति वीतरोषा प्रमार्ष्टि दोषान् गुणकीर्तनेन॥ तन्मित्रपूजा तदरिद्विषत्वं कृतस्मृतिः प्रोषितदौर्मनस्यं॥
स्तनौष्ठदानान्युपगूहनं च स्वेदोथ चुंबा प्रथमाभियोगः॥ ॥उच्चैः ष्ठीवनमिति। एवंविधां स्त्रियमनुरक्तचेष्टां विद्या
त्। कीदृशी पुरुषं दृष्ट्वा उच्चैः कृत्वा ष्ठीवनमास्यश्लेष्मत्यागं करोति। तथोत्कटं सशब्दं प्रहसितं। शय्यायामास्तरण
आसने चोपसर्पणं॥ शिष्टत्वं समागमनं करोति। गात्राणामंगानां वयवानां आस्फोटनं शब्दकरणं। जृंभणमा
स्यविदारणं चैतानि करोति। तथा सुलभस्याल्पमूल्यस्य स्तोकमात्रस्य च द्रव्यस्य संप्रार्थनां याच्ञां करोति। अभि
मुखे वल्लभे बालालिंगनचुंबनानि करोति। बालस्य शिशोरालिंगनं परिष्वंजनं। चुंबनं वक्त्रसंयोगं च करोति। सख्या अ
स्याः संकेतकारिण्याः समालोकनं मुखप्रेक्षणं च करोति। दृक्पातश्च पराङ्मुखे तस्मिन् पराङ्मुखेऽन्यत्र प्रेक्षमा
णे दृक्पातः स्नेहावलोकनं। तदीयानां गुणकथा तस्य गुणान्वितानां कथानामनुकीर्तनं कथनं॥ स्वस्य कर्णस्य श्रोत्र
स्य च कंडूयनं करोति। इमानिति इमा एवंविधामनुरक्तचेष्टां विद्याज्जानीयात्। अनुरक्तचेष्टा काय
परिस्पंदा यस्याः सा च प्रियाणि प्रियवचनानि वक्ति भाषते। स्वधनमात्मीयं वित्तं ददाति। तं विलोक्य दृष्ट्वा सं
हृष्यति हर्षयति। वीतरोषा विगतक्रोधा च भवति। तदीयगुणकीर्तनेन तच्चरितकथनेन दोषांस्तत्कृतानपरा
धांश्च प्रमार्ष्टि विनाशयति। तन्मित्रपूजेति। तदीयस्य मित्रस्य सुहृदः पूजां करोति। तदरेस्तच्छत्रोर्द्विषत्वं द्विष्ट
तां करोति। कृतस्मृतिः कृतं यत्कृतं कर्म तत्स्मरति। उपकृतं कीर्तयति। प्रोषिते तस्मिन् प्रवासिनि दौर्मनस्यं दुः

स्मितचिन्तनमनोष्टदानानि। स्नानदानं स्नानस्याद्दुष्टदानमधरपानदानं। उपगूहनमालिंगनं। स्वेदमलसंभ
या॰ सं॰ वः। अथ शब्दस्यार्थे चुंबावल्गनं योगः। एवंविधप्रमदाभिः संयोगः आक्षेपारक्तायाएव भवति। तथा च कश्यपः
दृष्टिं निक्षेपेन तत्र मनमापि विचिंतयेन। मृदुचक्षुष्यनेमानुचित्रचित्रपदं यथा। अकस्मात्पुरतो भूत्वा किंचित
३०० मिरुष्यते भद्रं। ईरुनितंवनाभी च भूषणानि पयोधरान॥ करजैरुलिंगत्वाभीमनुरागेण रंजिता। दंभेन त्याव
तेत्यर्थे वागुल्कश्चाट्टहासिता। कुमारालिंगितं चैव दर्शनेर धरं दृष्टा। एभिर्विकारैर्विदितोयामदना तानि कन्यका। द
र्शनात्कुप्यते यानुमित्रप संचप्रजयेन। स्मितं पराङ्मुखं पश्यकुणार्ध्वे चानुकीर्तयेद्विति। अथविरक्ताया लक्षणमाह
॥ विरक्तचेष्टा भ्रुकुटीमुखत्वं पराङ्मुखत्वं कृतविस्मृतिश्च। असंभ्रमाद्दूरपरिदीयता च तद्वेष्यमैत्री पुरुषं च वाक्यं। स्प
स्वाथ बालोक्य धुनोति गात्रं करोति गर्वं न रुणद्धि यान्तं। चुंबाविरामे वदनं प्रमार्ष्टि पश्चात्समुत्तिष्ठति पूर्वसुप्ता। विरक्ता
चेष्टिति। विरक्ताया विरागश्चेष्टा यस्यास्तस्या इदं लक्षणं। भ्रुकुटीमुखत्वं दृष्ट्वा पतिं दृष्ट्वा मुखे भ्रुकुटीं करोति। पराङ्मुखं
तद्वलोकनादन्यत्र प्रेक्षणं। कृतविस्मृतिः न यत्कृतमुपकारादिकं तस्य विस्मृतिर्विस्मरणं। तद्दर्शनादसंभ्रमो ना
दरः। दूरपरिदीयता दुःखेन परितोषः प्रभूतार्थदानेनापि परितुष्टा न भवति। तद्वेष्यमैत्री तद्वाक्रूणामसहमैत्री प्रीतिः
सहृदां च वाक्यं वचनमनभिमतं स्पृष्ट्वाथ वेति। अथवा तं पुरुषं दृष्ट्वाथ वालोक्य संवीक्ष्य गात्रं शरीरं धुनोति। चा
लयति। गर्वमभिमानं च करोति। तं प्रकुपितं यान्तं गच्छमानं तरुणाद्धि विरोधयति। चुंबाविरामे च कृतसंयोगान्ते वद
नमास्यं प्रमार्ष्टि प्रमार्जयति। पूर्वं प्रथममादावेव शयने सुप्ता पश्चादेनं तं पुरुषे समुत्थिते समुत्तिष्ठति। तथा च
कश्यपः। हृष्टानदृष्ट्वा ते मृदा स्पृष्ट्वा या दुर्वचो वदेत्। रतिकाले च गदा तु चुंबनं मार्जयेन्मुखं। सुप्तापि च पश्चात्प
श्चाच्छयने च पराङ्मुखा। विरक्ता सा स्मृता नारी वर्जनीया प्रयत्नतः। अथैता नाशति विनाशयेता दूत्याभवंति।
ताभ्यः संरक्षणीया दूत्यः। भिक्षुणिका प्रव्रजिता दासी धात्री कुमारिका रजकी। मालाकारी दुष्टांगना सखी नापि- ३००
तीदूत्यः। कुलजनविनाशहेतुर्दूत्यो यस्मादतः प्रयत्नेन ताभ्यः स्त्रियो भिरक्ष्या वंशयशोमानरक्षार्थं। भिक्षु
णिकेति। भिक्षुणिका प्रतिरिका। व्रतस्थारूपदारूप्रव्रजिता दासी कर्मकरी। धात्री स्तनदायी। कुमारिका कुमारी।

रजकी वस्त्ररजकी। मालाकारी पुष्पप्रदायिका। दुष्टांगना सदोषा स्वदेहखलितदुःशीला स्त्री। सखी। आली। नापि
ती। नापितभार्या। एताः स्त्रीणां पुरुषसंबंधिन्यो दूत्यो भवंति। कुलजनविनाशहेतुरिति। यस्मादेता दूत्यः कुलज
नस्य निरवद्यवंशसंभूतस्य जनस्य विनाशने शीलध्वंसने हेतुः कारणं भवंति। अतोऽस्माद्धेतोस्ताभ्यो दूतीभ्यो वंशा
स्य कुलस्य यशसः कीर्तेर्मानस्य पूजाया रक्षार्थं वर्धनाय स्त्रियो योषितो भिरक्ष्या आभिमुख्येन रक्षणीयाः।
अथ स्त्रीणां विनाशने संकेतहेतूनाह। रात्रौ विहारजागरो रोगव्यपदेशः परगृहेक्षणिकाः। व्यसनोत्सवाश्च सं
केता हेतवस्तेषु रक्ष्याश्च। रात्रौ विहारो मानितं स्वगृहान्निर्गत्य नदिष्वक्रमणं। जागरः अस्वप्नः। रोगव्यपदेशा
व्याधिनिमित्त समाश्रियाणं। परगृहे वेश्मनिवासः। ईक्षणिका देवज्ञः। व्यसनं किंचिद्विरोगोत्पातकं हेतुमालं
व्य दुःखानुसेवनं। उत्सवो विवाहादिः। एते स्त्रीणां संकेते परपुरुषसंयोगे हेतवः कारणानि। एतेषु स्त्रियो रक्ष्या रक्ष
णीयाः। तथा च कश्यपः। दुष्टसंगरतात्यात्तु साक्षिप्रनाशयेत्कुलं। तीर्थयात्रादर्शनं भेदं परवेश्मसमागमं। देवालये
गत्वा दर्शनं पानं परनिवासिभिः पितृवेश्मनिवासं च न श्रेयस्वामिना विना। घृतकुंभोपमा नारी पुरुषं वह्निवत्स
संश्लेषात् द्रवते कुंभेन तु स्त्रीपुंसि भाविना। निर्जने तु विविक्तां गयां स्त्री पुरुषमीक्षते। तस्याः प्रस्विद्यते ग्रीवा भुवम्
हेच्छयान्विता। अथ स्त्रीगुणान् गुरुतल्लक्षणं चाह॥ आरोपेच्छति नोज्झति स्मरकथां व्रीडाविमिश्रालसा मध्ये ह्री
परिवर्जिता पुरस्तलज्जा विनम्रानना। भावैर्नैकविधैः करोत्यभिनवं भूयस्स्वया मादरा बुध्वा प्रकृतिं च
यानुचरति ग्लानेतरश्चेष्टितैः। आरोप्रथममेवशय्यनपाति तामुरतं नेच्छति नानुमन्यते। स्मरकथां नोज्झति न
त्यजति। ततः स्मरतारंभे व्रीडाविमिश्रालसा व्रीडालज्जा तया विमिश्रं संयुक्तमलसत्वं यस्याः सा व्रीडाविमि
श्रालसा मध्य सुरतान्ते ह्रीपरिवर्जिता त्यक्तलज्जा भवति। उपरमे सुरतनिवृत्तौ लज्जाविनम्रानना। लज्
ज्जा व्रीडा तया विनम्रमवनतमाननं मुखं यस्याः पुनर्भावैर्लीलाविलासादिभिरनेकविधैर्बहुप्रकारैः स
हस्मरतं करोति। कादरा सादरा आदरयुक्ता। श्रद्धान्विता याच। पुंप्रकृतिं पुरुषस्वभावं बुध्वा तात्वा ग्लानेतर
श्चेष्टितैः सुखदुःखादिभिरनुचरति। पुरुषे ग्लाने सापि ग्लानत्वं दर्शयति। तस्मिन्सरिते सापि सुखिता।

अत्र भावानां लक्षणं बाहुल्यकालिख्यते। तद्यथा। लीला विलासो विच्छित्तिर्विभ्रमः किलकिंचितं मोट्टायितं कुट्टमितं
बिब्बोको ललितं यथा। विस्तरं चैतानि ज्ञेयानि त्रीणां स्वभावजाः। तथा च। शार्ङ्गालंकारे। श्लोकः। प्रतिमयो
गे कर्मधुरैः। इष्टजनस्यानुकृतिर्लीला ज्ञेया प्रयोगज्ञैः। स्थानासनगमनानां हस्तभ्रूनेत्रकर्मणां चैवउत्पद्यते।
विशेषो यः श्लिष्टः स विलासः स्यात्। माल्याच्छादनभूषणविलेपनानामनादरन्यासः। स्वल्पोऽपि परां शोभां जनयति
यस्मात्तु विच्छित्तिः। विविधानामर्थानां वागंगाहार्यसत्त्वयुक्तानां। मदरागहर्षजनितो व्यत्यासो विभ्रमः प्रोक्तः। स्मितरु
दितहसितभयपुलक - - - - - रसंकरं किलकिंचितं ज्ञेयं। इष्टजनस्य कथायां हेलालीलादिदर्शनेनापि।
तद्भावभावनकृतं मोट्टायितमित्यभिख्यानं। केशस्तनाधरादिग्रहणादतिहर्षसंभ्रमोत्पन्नं। कुट्टमितमनुचर्तविद्
सुखमसदुःखोपचारेण। इष्टानां भावानां प्राप्तावभिमानगर्भसंभूतः। स्त्रीणामनादरकृतो बिब्बोको नाम विज्ञेयः।
हस्तपादांगविन्यासो भ्रूनेत्रोष्ठप्रयोजितः। सौकुमार्यभवेनलालितं नप्रकीर्तितं। वाक्यानां प्रीतियुक्तानां प्राप्ता
नां यदभाषणं। व्याजाद्यनवतो वापि हृतं नाम तदुच्यते। अथान्यान्स्त्रीगुणानाह। स्त्रीणां गुणा यौवनरूपवेष
दाक्षिण्यविज्ञानविलासपूर्वाः। स्त्रीरत्नसंज्ञा च गुणान्विता सुस्त्रीव्याधयोन्याश्चतुरस्य पुंसः। स्त्रीणां या विलासे
तिगुणाः केते यौवनंतारुण्यरूपं सुकांतत्वं। वेषः शरीरालंकारः दाक्षिण्यमानुकूल्यं विज्ञानं कामशास्त्रोक्तानां कला
नां पुरुषाणां चित्तग्रहणे कौशलं विलासः। मधुरवचनकटाक्षनिरीक्षणं अथवा विलासो यस्य लक्षणमुक्तं स्थानास
नगमनानामिति विलासपूर्वा विलासः पूर्वः प्रथमो येषां लीलाविलासविच्छित्त्यादयः। अथान्य एव स्त्री
णां गुणान्विता सुस्त्री वररत्नसंज्ञास्ति। तथाच वक्ष्यति। द्विपदृयवनितादीनां सगुणविशेषेण रत्नशब्दोस्ति। तथा
च। जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयत इति। स्त्री व्याधयोन्याति। अन्या अपरलक्षणगुणरहिताश्च पुंसः
पुरुषस्य च तुरस्य नागरस्य स्त्री व्याधयश्चिंता खेदकारिण्य इत्यर्थः। तथाच व्यासः। यस्य भार्या शुचिर्दक्षा भिप्राया ३०१
प्रियवादिनी। आत्मगुप्ता पतेर्भक्ता सा लक्ष्मीर्नसंशयाः परा। यस्य भार्या विरूपाक्षी कश्मला कलहप्रिया। उत्तरोत्तरवा
दी च सा जरा न जरा जरा। निर्विकल्पा निर्विकल्पा मुदिते मुदिता समाकुलाकुलिता। प्रतिबिंबस्य समा कांता संक्रुद्धे केवलं भि
ता।

अथात्र वर्ज्याः स्त्रिय आह। नग्नाम्यवर्णैर्मलदिग्धकायैर्गतिं घांगसंबंधकथां न कुर्यात्। न चान्यकार्यस्मरणं रहस्यमानाः
द्विमूलं दूरदग्धमूर्तेः। ग्राम्ये भावा ग्राम्या ग्राम्यैव वर्णा या उपलक्षिता। प्राकृतभाषिण्य इत्यर्थः। ताभिः स्त्रीभिः सदृसं
बंधे मैथुनं कथं न कुर्यात्। मलदिग्धकाया मलं कायमध्ये शरीरे तथा सा मथवा मलेनादिग्धमुपलिप्तः कायो
यासां। ताभिरपि व्याधिताभिरित्यर्थः। न्यंघांगति कुत्सितान्यंगान्यवयवा यासां ताभिः सहसंबंधकथां न कुर्यात्।
रहस्यासुरतासक्तः स्त्री अन्यकार्याणां स्वाश्रितानां कर्मणां स्मरणं चिंतनं न कुर्यात्। यतो दूरदग्धमूर्तेः कामस्य मनश्चि
तं मूलं तस्मिन्नन्यत्र कामसंसुखं नोत्पद्यते। अतः प्रथमतएवोक्तं। आत्यं मनोभवस्कंदं मुभगस्यसर्वमाभासमात्यमितस्य
मनोवियोगार्हति। अन्यान्यपि स्त्रीगुणानाह। स्वासं मनुष्येण समं त्यजंती बाहूपधानस्तनदानदक्षा। सुगंधकेश सुस्मी
परागा सुप्तेति सुप्ता प्रथमं विबुद्धा। मनुष्येण मनरेण समं तुल्यकालं श्वासमुच्छ्वासं त्यजंति। अनेन परस्परं रागउक्तः। बाहूप
धानस्तनदानदक्षा। बाहुरेवोपधानं बाहूपधानं तस्य दानं स्तनदानं स्तनस्पर्शीकरणं च दक्षा चतुरा सुगंधकेशी। सुगंधी
कृताः केशा यस्याः समीपरागशोभनः समीपे निकटे रागानुरागो यस्याः सुरतारंभएव ज्ञायते। रागो यस्याः न म्ल
न्यात्स्त्री सुसुप्तस्य आत्म सा प्रथमं मा दोषाच बुद्धा विगतनिद्रा भवति। तथाच कश्यपः। निर्जने चाविविक्तांग्या स्त्री प्रत्यमी
क्षते। तस्याः सर्वा येन गुप्तमनवद्य कुष्ठयान्विता। परस्परमनोरागेरभयिता नरस्त्रियौ। गर्भसंभवो नि शिष्ट सुभगं दीर्घजीविनं। ते
दुर्मनस्कोऽपि रक्तोऽपि च भवेतां संभवो यदि। तदा विरूपश्चाल्पायुर्दुर्भगो दुःखितो भवेदिति। अथ वर्ज्या स्त्रिय आह॥
दुष्टस्वभावाः परिवर्जनीया विमर्दकालेषु न च क्षमा याः। यासामसिग्धासितनीलपीतमतोम्रवर्णं च नताः प्रनष्टाः।
यास्त्व प्रनष्टा का च दूरकपीता म्रवादिनी वातकपोतिरक्ता। मदाज्ञानाखतयुतांग दुष्टायास्त्व केशा पलितान्विता च।
मांसानि यस्याः प्रचलंति नार्या महोदरा चिः शिरविना च या स्यात्। स्त्रीलक्षणेयाः कथिताश्च पापास्ताभिर्न कुर्यात्
सहकाम धर्मं। दुःष्टस्वभावा इति। याः स्त्रियो दुष्टा स्वभावा दुष्टप्रकृतयस्ताः परिवर्जनीयाः। वर्ज्यायितव्याः॥
विमर्दकाले सुरतसमाये याश्च न क्षमा न समर्थाः। यासां स्त्रीणामसृग्रक्तमसितं कृष्णं नीलं नीलवर्णं पीतं पीतवर्ण
मा ताम्रमीषल्लोहितं ताश्च नमनप्रनष्टाः। यास्त्व मर्या लाडइति। याश्च स्त्रीस्वमनीलातिनिद्रा। च दूरका प्रभृतशोणिताव

दूषिताभवादिनी। प्रकर्षेण यस्या भगं वर्द्धते स्त्रवति कैश्चिदप्राथिर्नापि प्रवर्तते। प्रकर्षेण यस्या आगमेन पुरुषस्य शिश्नं दाघो
जायते। क्षरते दाघमुत्पादयंति। बालकक्षातिरिक्ता वातश्लेष्मबहुला। महाशनाबहुशना। स्वेदयुता घर्मसंयुक्ता। अंगदुष्टा
अंगान्यवयवानि दुष्टानि सदोषाणि यस्याः। ह्रीनांगी अधिकांगी। कार्यावतन्तूस्वेदगी स्वल्पमर्धनी। पलितानि तैः संयु
ता। यस्याश्च नार्याः स्त्रियो मांसानि वलीनि शिथिलानि भवंति। याच महोदरा स्थूलजठरा खरिसिरोग्रीवा कुटाया स्त्री
लक्षणैः पापा अशुभलक्षणा कथिता। कनिष्ठिकावामनंरास्पाशिकलक्षणयुक्तायाः स्त्रियस्ताभिः सदनकामं कुर्या
त। सर्वथा दुष्टलक्षणयुक्तत्वाद्वर्ज्या इत्यर्थः। अथ रजस्वलायाः शोणितलक्षणमाह। शशशोणितसंकाशं लाक्षारसप
न्निकाशमथ वा यत। प्रक्षालितं विरज्यति यथा सम्यक् भवेच्छुभ्रं। यच्च वेदना वर्जितं त्र्यहात्त्र्यहान्निवर्ततेरजः।
तत्पुरुषसंयोगादविचारं गर्भतां याति। शशशोणितसंकाशमिति। यथा शशशोणितसंकाशं। शशाः प्रा
णास्तस्य शोणितं रक्तं तत्सन्निकाशं सदृशं मथवा लाक्षारससंनिकाशं। लाक्षारसनिर्यासः तत्संनिकाशं तत्स
दृशं वा यत्प्रक्षालितं विरज्यति वस्त्रसंनिघृमतत शुभ्रं भवेत्स्यात। गर्भग्रहणयोग्यमित्यर्थः। यच्च वेदनावर्जितमि
ति। यदृक्तं स्वशब्देन स्वनेन वर्जितं पतमानस्य शब्देनोत्पद्यते। वेदनाव्यथा तया च वर्जितं रहितं त्र्यहात्त्रिदिनत्रयेण च यत्स
न्निवर्तते विरमति। तदुक्तं पुरुषसंप्रयोगात् द्वितीय विचारं निश्चयं गर्भतां याति गर्भत्वं गच्छति॥ अथ रजस्वलायाः परि
भाषार्थमाह॥ यदिनत्रयं निषेव्यं स्नानमाल्यानुलेपनं स्त्रीभिः स्नाया चतुर्थदिवसे शास्त्रोक्तेनोपदेशेन। पुष्पस्नानौ
षधयोग्याः कथितास्ताभिरंबुमिश्राभिः स्नायात्तथात्र मन्त्रः स एव यस्तत्र निर्दिष्टः॥ नदिनत्रयमिति। रजस्वलाभि
स्त्रीभिर्दिनत्रयं स्नानं माल्यं पुष्पादिकमनुलेपनं समालंभनादिकं च निषेव्यं। नानुसेवितव्यं। चतुर्थदिवसे चतुर्थेऽह्नि
शास्त्रोक्तेनोपदेशेन शास्त्रविहितविधानेन स्नायात शौचं कुर्यात। पुष्पस्नानौषधय इति यो पुष्पस्नाने औषध
य उक्ताः कथिताः ज्योतिष्मती त्रायमाणामित्यादिका स्ताभिरंबुमिश्राभिर्जलयुक्ताभिः स्नायात्तत्रानेन प्रकारेण ३०२
तस्याः कोणेषु दद्यात् कलशान् व्रातस्रजा वेष्टितग्रीवानित्यादिके स्नाने च यस्तत्र मंत्र उक्तः तस्मिन् पुष्पस्नाने उक्त
ः सुरास्त्वामभिषिंचंत्वित्यादिकः। स एवात्र निर्दिष्ट उक्तः। अथ स्त्रीनरसंप्रयोगाविभागमाह॥ युग्मासु किल

मनुष्यानिशासु नार्यो भवंति विषमासु। दीर्घायुषः सुरूपाः सुखिनश्च विकृष्टयुग्मासु। आर्तवादनंतरं युग्मासु समासु रा
त्रिषु निशासु मनुष्या नराः भवत्युत्पद्यंते। किलशब्दआगमद्योतनार्थः। समासु यदा भर्ता सह संयोगस्तदा पुत्रा जायंते। ए
वं विषमासु रात्रिषु नार्यः स्त्रियो भवंति। अत्रापि विशेषमाह। दीर्घायुषः सुरूपा इति। विकृष्टयुग्मासु दूरस्थासु रात्रि
षु समासु चतुर्थी रात्रिं वर्जयित्वा षष्ठ्यष्टमीदशमीद्वादशीचतुर्दशीषोडशीषु दीर्घायुषश्चिरंजीविनः। सुरूपाः शोभनरूपाश्च जायंते।
स्त्रियोऽप्येवं संनिकृष्टयुग्मायां विपरीतमिति॥ अथ गर्भस्य स्थितस्य संस्थानवशान् पुंस्त्रीनपुंसकमिति। तदत्र लक्षणमाह।
दक्षिणपार्श्वे पुरुषो वामे नारी यमावुभयसंस्थौ ये दुदरमध्याय गतं नपुंसकं तस्मिन्निबोधव्यं। योगतः स्त्रियाः दक्षिण
पार्श्वे स्थितो भवति। स पुरुषो ज्ञेयः। यश्च वामपार्श्वे सा नारी स्त्रीति ज्ञेया। उभयसंस्थौ वामदक्षिणपार्श्वस्थौ यमलौ द्वौ गर्भौ ज्ञे
यौ। यश्च उदरमध्यापगतः सन् पुंसकमिति तं निबोद्धव्यं। अथ स्त्रीसंप्रयोगकाले शुभयोगमाह। केंद्रत्रिकोणेषु शुभ
स्थितेषु लग्ने शशांके च शुभैः समेते। पापैस्त्रिलाभारिगतैश्च यायात् पुंजन्मयोगेषु च संप्रयोगं। एवंविधे योगे भा
र्यया सह संप्रयोगं गच्छेत। केंद्राणि लग्नचतुर्थसप्तमदशमानि त्रिकोणे नवपंचमे। शुभा बुधशुक्रजीवाः केंद्रत्रिको
णेषु शुभस्थितेषु सौम्यग्रहे यथासंभवमाश्रितेषु। लग्ने प्राक्लग्ने शशांके च चंद्रे शुभैः समेतेषु भयदृयुक्ते। पापै
रादित्यांगारकशनैश्चरैस्त्रिलाभारिगतैः तृतीयैकादशषष्ठस्थानस्थैः। तथा पुंजन्मयोगेषु पुंजन्मयोगो जातके
उक्ताः। उक्तर्क्षे पुरुषांशकेषु बलिभिर्लग्नार्कगुर्विंदुभिरित्यादि। अथ ऋतौ मैथुनकाले परिभाषार्थमाह॥ न नखदश
नावक्षितानि कुर्यादनुसमये पुरुषः स्त्रिया कथंचित। ऋतुरपि षड्वासराणि प्रथमानि शस्त्रितयेन तत्र गम्यं॥
पुरुषो नरः स्त्रिया नार्या। अनुसमये गर्भाधानकाले कथंचित् कथमपि न खदशनावक्षितानि न कुर्यान्न कारये
त। अपि शब्दश्चार्थे ऋतुरजः दश षड्षोडशावासराणि षोडशदिनानि भवंति। तत्र ऋतौ प्रथमा दिनत्रित
यं न गम्यं यस्तत्र गर्भस्तत्स्यायुः संभवतीति॥ ॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ स्त्री
पुंस्त्रीसमागमनाम सप्तसप्ततितमोऽध्यायः॥ ७७ ॥ ॥ अथ वास्तुलक्षणं व्याख्यायते। तत्रादावेव
तदारंभप्रयोजनप्रदर्शनार्थमाह। सर्वस्य सर्वकालं यस्मादुपयोगमेति शास्त्रमिदं। शास्त्रां विशेषतोऽतः

शयनासनलक्षणं वक्ष्ये॥१॥ यस्माद्यतः इदं शास्त्रं शयनासनलक्षणाख्यं सर्वस्य जनस्य सर्वकालं सर्वदा उपयोगमेति
गच्छति। विशेषतो राज्ञां नृपाणामुपयोगमेत्यतो मया शयनासनलक्षणं वक्ष्यते कथयिष्ये। तत्र च दारुणां लक्षण
माह॥ असनस्यंदनचंदनहरिद्रसुरदारुतिंदुकीसालाः। काश्मर्यंजनपद्मकशाकौ वा शिंशपा च शुभा। असनं स्यंद
नं चंदनं प्रसिद्धं। हरिद्रा दारुहरिद्रा। सुरदारु देवदारुः। तिंदुकी सालः। वृक्षविशेषः। काश्मरी। अंजनं रोधांजनं।
शाको वा शिंशपा च। एते वृक्षाः सर्वएव शयने शय्यायामासने च शुभाः शुभदाः। अथाशुभान्वृक्षानाह॥
अशनिजलानिलहस्तिप्रपातिता मधुविहंगकृतनिलयाः। चैत्यश्मशानपथिजातोर्ध्वशुष्कवल्लीनिबद्धाश्च
कंटकिनो ये च स्युर्महानदीसंगमोद्भवा ये च। सुरभवनजाश्च न शुभा ये चापरपश्चिमदिक्पतिताः॥ अशनिजल
इति। अशनिर्विद्युत्। जलं अंबु। अनिलो वायुः हस्ती करी। एभिर्ये वृक्षाः निपातितास्ते निपातिताः मधुविहंगकृत
निलयाः। मधुभिर्मक्षिकाभिर्विहंगैश्च कृतनिलयाः कृतावासस्थानाः। चैत्यप्रधानवृक्षः श्मशानजाः पितृव
नजाः पथिजो मार्गजातः। ऊर्ध्वशुष्कः स्वस्थानस्थ एवोपरिभागशुष्को नीरसो जातः। वल्लीभिर्निबद्धाः परि
वेष्टिताः एते सर्वे एवाशुभाः। कंटकिनः इति। ये कंटकिनः सकंटकाः स्युर्भवेयुः। ये च महानदीसंगमोद्भवाः महानद्योः प्र
धानसरितोः संगमः संयोगो यत्र तत्र ये समुद्भवः उत्पत्तिस्ते च ये सुरभवनजा देववेश्मनि जातास्ते सर्वे एव वृक्षाः न
शुभाः। ये चापरस्यां पश्चिमायां याम्यायां दक्षिणस्यां दिशि पतितास्ते च न शुभाः। अथाशुभवृक्षरचितस्य शय
नासनस्य फलनिष्टमाह। प्रतिषिद्धवृक्षनिर्मितशयनासनसेवनात् कुलविनाशः। व्याधिभयव्ययकलहप्रभवं
त्वनर्थाश्च नैकप्रतिषिद्धेनाप्रशस्तेन वृक्षेन तरुणा यन्निर्मितं कृतं शयनमासनं वा तस्य सेवनात् कुलविनाशो वं
शक्षयो भवति। तथा व्याधिः पीडा भयं भीतिः। व्ययोर्थहानिः कलहः अप्रीतिः। एते भवंत्यनेकविधा बहुप्रकाराः
श्चानर्था अर्थान्यत्वा भवंति। अथ शाकछिन्नस्य वृक्षस्य परीक्षणं वर्जनफलमाह। पूर्वच्छिन्नं यदि वा दारुभवे
त्परीक्ष्यमारंभे। यद्यारोहति तस्मिन् कुमारकः पुत्रपशुदं तत्। यदि वा कदाचित् पूर्वकाले छिन्नं प्राक्छिन्नं।
भवेत्तस्मात्तदारंभेप्रारंभकाले परीक्ष्यं विचार्यं। अंशानिलयेयदि नोक्तलक्षणेन तस्मिन्पूर्वच्छिन्ने दारुणि

यदि कश्चित् कुमारको बालक आगत्यारोहेदुपर्युपविशति। तदा तत्कृतं शयनासनं पुत्रपशुप्रदं भवति। पुत्रान्सुतान्प
शूंश्च चतुःपादान्ददाति। अथारंभकालेशुभचिह्नान्याह॥ सितकुसुममत्तवारणदध्यक्षतपूर्णकुंभरत्नानि। मां
गल्यान्यानि च दृष्टारंभेषु शुभं तत्र यं॥ सितकुसुमानि श्वेतपुष्पाणि मत्तवारणो मत्त हस्ती। दधि क्षीरविकारः। अक्षता
यवाः। पूर्णकुंभो जलपूर्णो घटः। रत्नानि मणयः। अन्यानि मांगल्यानि शंखब्रह्मवेदध्वनिगोवृषचक्रवाकाकोकिलादीनां शु
भा आरंभे प्रारंभकाले दृष्टावलोक्य शुभं तत्र यं ज्ञातव्यमिति। अथ नृपशय्यायाः प्रमाणमाह। करांगुलं यवाष्टकमुदरा
सक्तं तुषैः परित्यक्तं। अंगुलशतं नृपाणां महती शय्या जयाय कृता। अष्टौ यवा यवाष्टकं तुषैः परित्यक्तं तुषरहितं परस्प
रमन्योन्यमुदरासक्तं करांगुलसंज्ञं भवति। तेनांगुलप्रमाणेन नृपाणां राज्ञामंगुलशतं महती दीर्घा शय्या कृता जया
य भवति। अथ नृपपुत्रमंत्रिबलपतिपुरोधसां शय्याप्रमाणमाह। नवतिः सेषड्ना द्वादशहीना त्रिषड्गुहीना च नृप
पुत्रमंत्रिबलपतिपुरोधसां स्युर्यथासंख्यं। अंगुलानां नवतिः नृपपुत्रस्य राज्ञः सुतस्य दीर्घा शय्या कार्या। सैव नव
तिः षड्ना चतुरशीत्यंगुलानि। सचिवस्य मंत्रिणो दीर्घा कार्या। सैव नवतिर्द्वादशहीना अष्टसप्तत्यंगुलानि बलपतेः से
नापतेः। सैव नवतिस्त्रिषड्गुहीना अष्टादशभिरंगुलैरूना पुरोधस आचार्यस्य शय्या कार्या। अथ विष्कंभलक्षण
पादोच्छ्रायप्रमाणं चाह॥ अर्धमतोष्टांशोनं विष्कंभो विश्वकर्मणा प्रोक्तः। आयामत्र्यंशसमा पादोच्छ्रायः संकुष्य
शिराः। अतोस्माद्दैर्घ्यादर्धदलमष्टांशेनाष्टभागवर्जितं विष्कंभो विस्तारो विश्वकर्मणा प्रोक्तः कथितः। तद्यथा
। अंगुलशतं नृपशय्या अतोर्धं पंचाशदंगुलानि। एतदष्टांशोनं त्रिचत्वारिंशदंगुलानि। पादत्रययुतानि विष्कं
भो वैपुल्यं एवं स्वदैर्घ्यानुसारेणान्यासामपि कल्प्यः। आयामत्र्यंशसमेति। आयामस्य दैर्घ्यस्य यस्त्र्यंशः
स्तृतीयभागस्तत्समस्तत्तुल्यः पादस्योच्छ्रायः कार्यः। स च सकुष्यशिराः। सह कुष्येन शिरसा वर्तत इति। सकु
ष्यशिराः कुष्यः कुटिलो भागः। तेन सहितस्य पादस्योच्छ्रायः। न त यथांगुलशतं नृपशय्या दीर्घा। अस्यास्त्र्यं
शस्त्रयस्त्रिंशदंगुलानि सत्रिभागानि सकुष्यशिराः पादोच्छ्राय इति। एवमन्यासामप्यनुसारेण कल्पनीयं
। तथा चाविश्वकर्मा। अन्योन्यमुदरासक्तैर्वतुर्षं तुयवाष्टकं। करांगुलमिति प्रोक्तं तेन मानेन कारयेत्। नृपा

वा० तं० णामंगुलशतंविष्यादीर्घा जयावहा। नवातिरूपपुत्रस्य साष्ट्रनातु मंत्रिणः। द्वादशोनानवेदाश्च त्रिषड्ढीनापुरोधसः॥
दैर्घ्यमानमोर्धेन तत्तुल्यता कारयेत्ततः। दैर्घ्याष्टभागोनं विष्कंभः परिकीर्तितः। आयामत्र्यंशतुल्यश्च पादोच्छ्राय
प्रकीर्तितः। सकुक्षिशिरसां तेषां व्याख्याता शुभकारकः। ईनाधिकाच्चया व्याख्याता साक्षे यास्वामिनोऽशुभोति। अथ नाना
३०४ कर्णाविशेषफलमाह॥ यः सर्वः श्रीपर्ण्याः पर्यंको निर्मितः स धनदाता। असनकृतो रोग हरति तिंदुकसारेण वित्तकरः। यः
केवलशिंशपया वा निर्मिता बहुविधं विराधिकरः। चंदनमयो रिपुघ्नो धर्मयशोदी र्घजीवितकृत। पद्मकः पर्यं
कः श्रियमायुर्दीर्घश्रितं शुभां वित्तं। कुरुते सालेन कृतः कल्याणं शाकरचितश्च। केवलचंदनरचितं कांचनगुप्तं
विचित्ररत्नयुतं। अध्यासन् पर्यंकं विबुधैरपि पूज्यते नृपतिः। यः सर्वः श्रीपर्ण्या इति। यः पर्यंकः सर्वः समस्तः श्रीपर्ण्या
संनिर्मितो रचितः स धनदाता। वित्तप्रदो भवति। यः सर्वासनकृतः स रोगघ्नो रोगान् हरति। यः सर्वः तिंदुकसारेण रचि
तः स वित्तकरो धनकरः। यः केवल इति। यः पर्यंकः केवलशिंशपया विनिर्मितो रचितः स बहुविधं बहुप्रकारं वृद्धि
करः। यः सर्वश्चंदनमयश्चंदनरचितः स रिपुघ्नः। तथा धर्मयशः कीर्ति दीर्घजीवितं च करोति। पद्मकः पर्यंक इति।
यः सर्वः पद्मकरचितः पर्यंकः श्रियं लक्ष्मीं आयुर्जीवितं दीर्घं बहु श्रुतं विघ्नं सुमं धनं वित्तं धनं कुरुते। तथा सा
लेन कृतो रचितः कल्याणं श्रेयः कुरुते शाकरचितस्यैश्च कल्याणं कुरुते। केवलं चंदनरचितं यत्पर्यंकं कांचनेन स्वर्णे
न गुप्तं समाच्छादितं विचित्रैर्विविधैरत्नैर्मणिभिर्युक्तं तं नृपती राजा अध्यासन् उपरि तिष्ठन् विबुधैरपि पूज्यते अर्च्यते।
अथ विमिश्रदारूणां फलमाह। अन्येन समायुक्ता न तिंदुकी शिंशपा च शुभफलदा। न श्रीपर्णीन चंदनदारुवृक्षा न चा
घ्रसनः। शुभा हरिद्रशाकशालौ परस्परं संयुता पृथक् चैव। तद्वत् पृथक् प्रशस्तौ सहितौ च हरिद्रककदंबौ। सर्वस्यंदनरचि
तोन शुभः प्राणान् हिनस्ति चाम्रकृतः। असनोन्यदारुसहितः क्षिप्रं दोषान् करोति बहून्। आम्रस्यंदनचंदनवृक्षा
णां स्यंदना शुभाः पादाः फलतरूणां शयनासनमिष्टफलं भवति सर्वेण। अन्येन समायुक्ता इति। तिंदुकी शिंशपा चान्य ३०४
नापरेण दारुणा समायुक्ता सहिता शुभफलदा न भवति। अशुभेत्यर्थः। न श्रीपर्णी न चंदनदारुवृक्षा नाप्यसनोन्य
न दारुणा युतः शुभफलदो भवति। शुभदा इति। शाकशालौ परस्परमन्योन्यसंयुतौ शुभदौ पृथक् च केवलावपि

शुभदौ। तद्वत्तेनैव प्रकारेण पृथक् पृथक् सहितौ च हरिद्रककदंबौ प्रशस्तौ। सर्वस्यंदनरचित इति। सर्वो निःशेषः स्यंदने
न रचितो निर्मितो न शुभः। पर्यंकः यतः प्राणान् स्वल्पान् हिनस्ति नाशयति। आम्रकृतश्च शब्दादेवमेव प्राणान् हिनस्ति।
असनोन्येनापरेण दारुणा सहितः संयुक्तः क्षिप्रमाश्वेव बहून् प्रभूतान् दोषान् करोति। आम्रस्यंदनेति। आम्रः स्यं
दनं चंदनं तेषां वृक्षाणां स्यंदना वस्यंदनवृक्षात्पादाः शुभाः। सर्वेणायेनकेनचित्फलतरूणां फलवृक्षेण शयनासन
मिष्टफलं शुभफलं भवति। अथ सर्ववृक्षाणां प्रशस्तेन गजदंतेनालंकारविधिः कार्य इत्येतदाह॥ गजदंतः सर्वेषां
प्रोक्ततरूणां प्रशस्यते योगे। कार्योलंकारविधिर्गजदंतेन प्रशस्तेन। प्रोक्ततरूणां कथितवृक्षाणां सर्वेषां समस्ता
नां योगे संयोगे गजदंतो हस्तिरदः शस्यते श्रयते। प्रशस्तेन लक्षणयुक्तेन गजदंतेन हस्तिरदेनालंकारविधिः कार्यः
शोभामुत्पादयेत। अथ गजदंतलक्षणमाह। दंतस्य मूलपरिधिं द्विरायतं प्रोह्य पर्तं कल्पयेच्छेषं। अधिकमनूपच
राणां न्यूनं गिरिचारिणां किंचित्। गजदंतस्य मूले यः परिधिः परिमंडल्यं तद्द्विरायतं तद्द्विगुणं तद्दीर्घः प्रोह्य त्यक्त्वा शेषं
कल्पयेत। एतदुक्तं भवति। मूले यः परिणाहो गजदंतस्य तद्द्विगुणमायतं गजदंतमूलात् परित्यज्य शेषं कल्पयेत। बहू
दकोदेशो नूपः। अनूपचराणां गजानां दंतमूले परिधिद्विरायतमधिकमपि प्रोह्य शेषं कल्पयेत। गिरिचारिणां प
र्वतचारिणां न्यूनमपि शेषं कल्पयेत। यतः पर्वतशिलास्वधस्ताद्दंतास्तेषां स्फुटंति। अथ गजदंतस्य छेदे शुभाशुभ
माह। श्रीवृक्षवर्धमानछत्रध्वजचामरानुरूपेषु। छेदे दृष्टेष्वारोग्यविजयधनवृद्धिसौख्यानि। प्रहरणसदृशेषु जयो नंद्या
वर्ते प्रणष्टदेशाप्तिः। लोष्टेतु लब्धपूर्वस्य भवति देशस्य संप्राप्तिः। स्त्रीरूपेश्च विनाशो भृंगारेभ्युदिते शुभोत्पत्तिः
कुंभेन निधिप्राप्तिर्यात्राविघ्नं च दंडेन। कृकलासकपिभुजंगेष्वसुभिक्षव्याधयो रिपुवशत्वं। गृध्रोलूकध्वांक्षश्ये
नाकारेषु जनमरकः। पाशेथवा कबंधे नृपमृत्युर्जनविपत्क्षते रक्ते। कृष्णश्यावरुक्षे दुर्गंधे चाशुभं भवति। श्रीवृ
क्ष वर्धमाने इति। श्रीवृक्षो बिल्वः। वर्धमानश्चिन्हं। छत्रमातपत्रं। ध्वजः प्रसिद्धः। चामरं वालव्यजनं। एषामनु
रूपेषु सदृशेषु छेदेषु दंतच्छेदे दृष्टेष्वालोकितेषु आरोग्यमरोगित्वं विजयो विशेषेण जयो धनवृद्धिर्दृष्टं तं वर्धनं सौ
ख्यमेतानि भवंति। प्रहरणसदृशेष्विति। प्रहरणमायुधादि तत्सदृशेषु छेदेषु जयो भवति। नंद्यावर्तश्चिन्हः॥

वा·सं· नंद्यावर्तवा सदृशं तस्मिन्दृष्टे प्रणष्टस्यापहृतस्य देशस्य प्राप्तिर्लाभो भवति। कोष्ठाम्रवर्णः कोष्ठसदृशो छेदे दृष्टेन
वपुर्देशस्य देशस्य लाभः प्राप्तिर्भवति। पर्वतः स्थालस्थपूर्वः। आदावेवलक्ष्यं मां प्रतनं दृष्टे भूतं। तलस्थपर्वतस्यैतः
३०५ स्थालस्यइति। स्थालरूप छेदे दृष्टे अश्वानां द्रुयानां विनाशः क्षयः भंगारं जलभांडं तस्मिन्नभ्युत्थिते समुत्पन्ने तदाकोर्
छेदे दृष्टे मृतोत्पत्तिः पुत्रजन्म भवति। कुंभेन कुंभसदृशेन छेदस्थितेन दृष्टेन निधिप्राप्तिर्निधिलाभो भवति। दंडेन दंडकारेण
यात्रा निघ्नगमनेन भवति। कृकलास इति। कृकलासः प्राणिविशेषः। कपिर्वानरः। भुजंगः सर्पः। एवं विधेषु छेदेषु दृष्टेषु
कृमिक्षयाधयः पीडादुर्भिक्षं। गृध्राणांच गलंच उलूकोपक्षिणो ध्वांक्षः काकः। श्येनः शाकुनिः। एतेषामाकारेषु छ
रेषु छेदे जनानां मरको भवति। पाशोऽथवेति। पाशो रज्जुरूपः कबंधः छिन्नशिराः पुरुषः एवंविधे वा छेदे दृष्टे ग्रहस्य
गृहस्वामिनो मृत्युर्मरणं भवति। रक्तं श्रावितेर्लुतेनिर्गते छिद्राज्जनानां लोकानां विपद्विपत्तिर्भवति। कृष्णे कृष्णवर्णे श्यावे म
लिने रूक्षे परुषे दुर्गंधे दुष्टगंधे विच्छिद्रेऽशुभमनिष्टं भवति। अथ शुभछेदानां लक्षणं ज्ञायते तथा विधं फलमा
ह। शुक्लः समः सुगंधिः स्निग्धश्च शुभावहो भवेच्छेदः। अशुभशुभच्छेदा ये ज्ञायते ग्रथितेनथा फलदाः। शुक्लः श्वेतव
र्णः। समस्तुल्यः। सुगंधिः शोभनगंधिः। स्निग्धो निर्मलः एवंविधश्छेदः शुभावहो भवेत। ये छेदा अशुभादेतयु कातिज्ञायेन
ग्रपि ज्ञाप्यायां लग्नास्तथा तेनैव प्रकारेण फलदास्तथा विधं फलं ददाति। शुभमशुभं प्रयच्छन्तीत्यर्थः। ज्ञायते दारुणाम
ध्ये च छेदे वा दृष्टव्यं। अथ वृक्षाणां योगमाह। ईषायोगे दारुप्रदक्षिणार्थं यत्र ज्ञालमाचार्यैः। अपसव्ये कोटिग
ग्रे भवति भयं भूतसंजनितं॥ ईषा शब्देन चत्वारि तानि काष्ठान्युच्यंते। शिरःपादभागयोर्द्वे वामदक्षिणभागयोर्द्वे इ
ति तेषां परस्परं योगः स ईषायोगः। शिरःपादकाष्ठयोर्द्वे छिद्रे कृत्वा वामदक्षिणभागकाष्ठे तत्राक्षिप्येते। तत्रायं क्र
मः। ईषायोगे दारुप्रदक्षिणाग्रमाचार्यैः प्रकारितमुक्तं। प्रादक्षिण्येनाग्रं यस्मिन् शिरःकाष्ठस्य यदग्रं तत्र दक्षिणस्थ ३०५
काष्ठमूलं क्षिप्यते। एवं पूर्वदक्षिणपश्चिमोत्तरसंस्थानन्यासे कृते सति प्रदक्षिणाग्रं भवति। अपसव्ये कोटिगाग्र इति।
अपसव्यप्रदक्षिणरूपं वर्तितविन्यासाद्विपर्ययं कृतं यत्र कोटिगाग्रं स्थितं दारुणि भूतसंजनितं। भूतग्रहोत्पन्नं भयं भो

निर्भवति। शिरःपादभागकाष्ठयोरेकस्मादेकस्याग्रं यदा भवति। तथैकदिगग्रं। अथ पादानां लक्षणमाह। एकेनाक्रांति
रसा भवति द्विपादेन पादवैकल्यं। द्वाभ्यां न जीर्यते अन्नं त्रिचतुर्भिः क्लेशवधबंधाः। एकेन पादेन अवाक्शिरसा अधोमु
खेन मूलाग्रविपर्ययस्थितेन पादेनैकल्पं स्वामिनो भवति। द्वाभ्यां पादाभ्यामेवंविधाभ्यामन्नं भुक्तं न जीर्यते। परिणामं
न याति। त्रिभिश्चतुर्भिः क्लेशवधबंधा भवंति। अथ पादस्य ग्रंथियुक्तस्य लक्षणमाह। शुषिरे यवा विवर्णग्रंथौ पा
दस्य ग्रंथिर्गोव्याधिः। पादे कुंभे यश्च ग्रंथिस्तस्मिन्नुदररोगः। कुंभाधस्ताज्जंघानत्र कृतो जंघयोः करोति भयं। तस्य
श्चाधारो यः क्षयकृतद्रव्यस्य नत्र कृतः। खुरदेशे यो ग्रंथिः खुरिणां पीडाकरः स निर्दिष्टः। ईषाउर्ध्वस्यात्रिभा
ग संको भवेन्नशुभः। शुषिरे यवा इति। पादस्य शीर्षगोऽग्रे गतो ग्रंथिः शुषिरे अंतरसारे। अथवा विवर्णगतवर्ण
पूर्ववर्णाद्वर्णांतरमाश्रितस्त्याधिर्भवति। शिरस्य च स्वामिनः। तस्मिन्नेव पादे यः कुंभभागस्तस्मिन्ग्रंथौ स्थितेस
त्युदररोगो भवति। कुंभाधस्तादिति। कुंभाधस्ताज्जंघायां कृतो ग्रंथिर्जंघयोर्भयं करोति। तस्य जंघाया अधो य
आधारस्तत्र कृतो ग्रंथिर्द्रव्यस्य धनस्य भयं करोति। खुरदेशे इति। यो ग्रंथिः खुरदेशे पादस्थाने स्थितः स खुरि
णामश्वादीनां पीडाकरो विनिर्दिष्टः कथितः। ईषायत्काष्ठं छिद्रे प्रक्षिप्यते। ऊर्ध्वेण शिरः काष्ठं तयोः समाना
त्रिभागत्ततायरोपास्थितो ग्रंथिः। स स्वामिनो नशुभो भवति। पादभागकाष्ठद्वितीयपट्टिकायाअर्पितभा
ग संस्थो न शुभः एव। अथ छिद्राणां नामान्याह॥ निष्कुटमथ कोलाक्षं सूकरनयनं च वत्सनाभं च। कालक
मन्यद्धुंधुकमितकथितश्छिद्रसंक्षेपः॥ निष्कुटं नाम छिद्रं। अथ शब्दश्चार्थे। कोलाक्षं सूकरनयनं वत्सनाभं च॥
कालकं अन्यदपरं धुंधुकमित्येवं प्रकारः छिद्राणां संक्षेपः समासः कथितः। अथैतेषां लक्षणमाह। घट
वत्सुषिरं मध्ये संकटमास्यं च निष्कुटं छिद्रं। निष्पावमाषमात्रं नीलं छिद्रं च कोलाक्षं। सूकरनयनं विषमं वि
वर्णमध्यं च पर्वदीर्घं च। वामावर्तं भिन्नं पर्वमितं वत्सनाभाख्यं। कालकसंज्ञं कृष्णं धुंधुकमिति यद्भवेद्विनिर्भिन्नं
। दारुसवर्णं छिद्रं न तथा पापं समुद्दिष्टं। घटवत्सुषिरं मध्य इति। यच्छिद्रं मध्ये मध्यभागे घटकुंभवत्सुषिर
मास्ये मुखे च संकटमल्पं च तन्निष्कुटं नाम। निष्पावाः धान्यकाः। निष्पावमात्रं निष्पावतुल्यं माषमात्रं च नीलं

वा॰सं॰ नीलवर्णं तच्छिद्रं काकाक्षसंज्ञं। मकरं नयनमिति। विषमतुल्यं। विवर्णं विगतवर्णं। अथ यदर्धपर्वदीर्घमधिकमूर्ध्वं यस्य प
र्वणः सार्धपर्वदीर्घं भवति। वामावर्तमप्रदक्षिणावर्तं भिन्नं द्वितीयभागदृश्यं पर्वमिति पर्वप्रमाणं। वसनाभाख्यं वस्त्रना
भसंज्ञं छिद्रं। कालकसंज्ञं कृष्णं कृष्णवर्णं भवति। यद्विनिर्भिन्नं द्वितीयभागदृश्यं रक्तवर्णं च तद्बुधकसंज्ञं। दारुसव
३०६ र्णं दारुसदृशवर्णं यच्छिद्रं तन्न तथा पापं दुष्टफलं समुद्दिष्टमुक्तं। एतदुक्तं भवत्यशुभमपि छिद्रं दारुसवर्णं यदि भ
वति। तदतिकष्टफलं न भवति। अथैतेषां फलान्याह। निःकुटसंज्ञे द्रव्यक्षयस्तु काकेक्षणे कुलध्वंसः। शस्त्रभयं सू
करके रोगभयं वस्त्रनाभाख्ये। कालकबंधुकसंज्ञे कीटैर्विद्धं चाशुभदं छिद्रं। सर्वग्रन्थिप्रचुरं सर्वत्र न शोभनं दारु। नि
ष्कुटसंज्ञ इति। निष्कुटसंज्ञे छिद्रे द्रव्यस्यार्थस्य क्षयो विनाशः। काकेक्षणे काकाक्षसंज्ञे कुलध्वंसः कुलविनाशो भ
वति। सूकरके सूकरनयने शस्त्रभयं भवति। वस्त्रनाभाख्ये रोगभयं। कालकच्छिद्रं तथा बंधुकाख्यं यच्च कीटैः कृ
मिभिर्विद्धं छिद्रं तच्छिद्रं नेष्टमशुभदं दुष्टफलं। यद्दारु सर्वं ग्रन्थिप्रचुरं समस्तमेव ग्रन्थिबहुलं तत्सर्वत्र सर्वस्मिन्वस्तुनि न शो
भनं न प्रशस्तफलमिति। अथ मिश्रदारुरचितस्य शयनस्य फलमाह। एकद्रुमेण धन्यं वृक्षद्वयनिर्मितं च धन्यतरं
। त्रिभिरात्मजवृद्धिकरं चतुर्भिरर्थं यशश्चाग्र्यं। पंचवनस्पतिरचिते पंचत्वं याति तत्र यः शेते। षट्सप्ताष्टतरूणां
काष्ठे घटिते कुलविनाशः। एकद्रुमेणेति। यच्छयनासनमेकेन द्रुमेण तदेकद्रव्येण रचितं तद्धन्यं शोभनं। तथा
यद्वृक्षद्वयनिर्मितं तद्धन्यतरमतिशोभनं। त्रिभिर्वृक्षैः प्रागुक्तैर्यन्निर्मितं तदात्मजानां पुत्राणां वृद्धिकरं। चतु
र्भिर्यन्निर्मितं तदर्थं धनमग्र्यं प्रधानं यशः कीर्तिं च करोति। पंचवनस्पतिरचित इति। पंचवनस्पतिभिर्वृक्षैः रचि
ते निर्मिते शयनासने तत्र यः स्वामी शेते स्वपिति स पंचत्वं याति म्रियते। षट्सप्ताष्टानां तरूणां काष्ठे
घटिते निर्मिते कुलविनाशो वंशक्षयो भवति॥ ॥इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ शयनासनल ३०६
क्षणं नाम अष्टासप्ततितमोऽध्यायः॥ ७८ ॥ ७ ॥अथ रत्नपरीक्षा व्याख्यायते। तत्र तावन्मणीनां गुणप्रभा
वार्थमाह। रत्नेन शुभेन शुभं भवति नृपाणामनिष्टमशुभेन यस्मादतः परीक्ष्यं दैवं रत्नाश्रितं तज्ज्ञैः॥ नृपाणाम

तो रत्नेन शुभेन शुभलक्षणसंयुक्तेन मणिना शुभं दैवं भवत्यशुभेनानिष्टमशुभं दैवं भवति। दैवशब्देन प्राक्तनकर्मणां
विपाक उच्यते। यस्मादेवमतोऽस्माद्धेतोस्तै रत्नलक्षणज्ञैः रत्नाश्रितं रत्नसंस्थितं दैवं परीक्ष्यं विचार्यं। अथ रत्नपरीक्षा
मुपलरत्नानामधिकारः क्रियते इत्येतदाह। द्विपहयवनितादीनां स्वगुणविशेषेण रत्नशब्दोऽस्ति। इह उपलरत्नानामधि
कारो वज्राणां। द्विपो हस्ती। हयोऽश्वः। वनिता स्त्री। आदिग्रहणाज्जातौ जातौ यदुत्कृष्टं तद्रत्नमित्येवमादीनां स्वगुणविशे
षात्तेषु गुणप्रभावेन रत्नशब्दोऽस्ति विद्यते। इहास्यां रत्नपरीक्षायामुपलरत्नानां पाषाणमणीनां वज्रप्रभृतीनां प्रथ
मानामधिकारः क्रियत इति। अथ रत्नानामुत्पत्तिप्रदर्शनार्थं मतभेदमाचार्याणामाह। रत्नानि बलाद्दैत्याद्दधीचितोऽन्ये
वदंति जातानि। केचिद्भुवः स्वभावाद्वैचित्र्यं प्राहुरुपलानां। बल इति दैत्याख्यातस्मात् बलाद्रत्नानि संभूतानि महर्षि
भिरुक्तानि रत्नानि। तथा च। संभूतानि बलाद्दैत्याद्रत्नानि विविधानि च। गतानि नानावर्णत्वं महिभ्यो भूमिसंश्र
यात्। दधीचितोऽन्ये इति। अपरे त्वेवं दधीचितो दधीचिमुनेरस्थिभ्यो जातानि वदंति। तथा च। केचिदिति। केचिदन्ये आ
चार्या भुवो भूमेः स्वभावादुपलानामुपलमणीनां वैचित्र्यं विभिन्नं नानावर्णत्वं प्राहुः कथयंति। तथा च। भुवः स्व
भावाज्जातानि रत्नानि विविधानि च। उपलाः रत्नरूपत्वं प्राप्ताः कालांतरेण तु॥ अथ रत्नानां नामान्याह। वज्रेंद्रनीलमर
कतकर्केतनपद्मरागरुधिराख्याः। वैदूर्यपुलकविमलकराजमणिस्फटिकशशिकान्ताः। सौगन्धिकगोमेदकशंखमहानीलपुष्पर
ागाख्याः। ब्रह्ममणिज्योतीरससस्यकमुक्ताप्रवालानि। वज्रेंद्रनील इति। वज्रं इंद्रनीलः। मरकतः। कर्केतनः। पद्मरागः। रुधि
राख्यः। वैदूर्यं। पुलकः। विमलकः। राजमणिः। राजावर्तः। स्फटिकः। शशिकान्तः। सौगन्धिकः। गोमेदकः। शंखः। महानीलः
पुष्परागाख्यः। ब्रह्ममणिः। ज्योतीरसः। सस्यकः। मुक्ताफलानि। प्रवालं विद्रुमः। एतानि रत्नभेदानि त्वेतदुत्कृष्टानि च
तानि वज्रमुक्तापद्मरागमरकताख्यानि। तेषामेव लक्षणमाचार्यः करिष्यतीति संबंधः। अथ वज्रमणेः सम्भवस्थानानि
लक्षणं चाह। वेण्यातटे विशुद्धं शिरीषकुसुमोपमं च कौसलकं। सौराष्ट्रकमाताम्रं कृष्णं सौर्पारकं वज्रं। ईषत्ताम्रं हिम
वति मतंगजं वल्लपुष्पसंकाशं। आपीतं च कलिङ्गे श्यामं पौंड्रेषु संभूतं। वेण्यातटे इति। वेण्या नाम्नी नदी। तस्या
स्तीरे तटे यज्जायते। विशुद्धं दोषरहितं। शिरीषकुसुमोपमं शिरीषपुष्पसंकाशं। श्वेतपीतवर्णं। कौशलके कोसलदे

DR. BHAU DAJI MEMORIAL

शसंभूतं जातं। वज्रं। आताम्रं ताम्रवर्णमीषल्लोहितं एतत्सौराष्ट्रं। सुराष्ट्रसंभूतं वज्रं। कृष्णं कृष्णवर्णं। शूर्पारकं शूर्पारकदेशे
संभूतं जातं। ईषत्ताम्रमिति। ईषत्किंचित्ताम्रं ताम्रवर्णं वज्रं हैमवतं हिमवति संभूतं। वल्लुपुष्पसंकाशं। वल्लुपुष्पनिभ
मीषत्पांडुरं मतंगजं मतंगदेशसंभूतं। आपीतं पीतवर्णं कलिंगं कलिंगदेशसंभूतं। पौंड्रं देशजातमिति। अथैतेषां दै
वत्यमाह। ऐंद्रं षडश्रि शुक्लं याम्यं सर्पास्यरूपमसितं च। कदलीकांडनिकाशं वैष्णवमिति सर्वसंस्थानं। वारुणमबलागु
ह्योपमं भवेत्कर्णिकारपुष्पनिभं। शृंगाटकसंस्थानं व्याघ्राक्षिनिभं च हौतभुजं। वायव्यं च यवोपममशोककुसुमप्रभं
समुद्दिष्टं। स्रोतःखनिप्रकीर्णकमित्याकरसंभवस्त्रिविधः। ऐंद्रमिति। यद्वज्रं षडश्रि षड्भिरश्रिभिर्युक्तं। शुक्लं श्वेतमित्य
र्थः। शुक्लं श्वेतवर्णं तदैंद्रं। इंद्रदैवत्यं। यच्चासितं कृष्णवर्णं सर्पास्यरूपं भुजंगमुखसदृशं। तद्याम्यं। यमदैव
तं। यच्च कदलीकांडनिकाशं। रंभाशाखासदृशं। नीलपीतवर्णमित्यर्थः। सर्वसंस्थानं। सर्वाणि यानि संस्थानानि
यस्य सर्वाकारं तद्वैष्णवं विष्णुदैवत्यं वारुणमिति। अबला स्त्री तस्या मुखं वरांगं तदुपमं तदाकारं स्त्रीमणिसदृशं क
र्णिकारनिभं। कर्णिकारवृक्षस्य कुसुमप्रभमापीतवर्णमित्यर्थः। एवंविधं यद्भवति तद्वारुणं वारुणदैवत्यं। यत्शृंगा
टकसंस्थानं त्र्यस्रं व्याघ्राक्षिनिभं व्याघ्रनेत्रसदृशं नीललोहितं वज्रं हौतभुजमाग्नेयं। वायव्यं चेति। यद्वज्रं यवोपमं यवा
कारं मध्यस्थूलमशोककुसुमप्रभं अशोकपुष्पसदृशं। लोहितवर्णं तद्वायव्यं। वायुदैवत्यं। समुद्दिष्टमुक्तं। स्रोतःखनि
प्रकीर्णमिति। स्रोतो यतो जलं भवति। खनिः खन्यत इति। खनिः खानं। प्रकीर्णकं। यस्यां भूमौ मणयो भवंति। समुद्र
यथा। एवं स्रोतःखनिप्रकीर्णकमिति। त्रिविधस्त्रिप्रकार आकरः संभवो वज्रस्येति। अथ वज्राणां वर्णविशेष
कृत्यमाह। रक्तं पीतं च शुभं राजन्यानां सितं द्विजातीनां। शैरीषं वैश्यानां शूद्राणां शस्यतेऽसिनिभं। रक्तं रक्तवर्णं पी
तं च वज्रं राजन्यानां क्षत्रियाणां शुभं सितं श्वेतवर्णं द्विजातीनां विप्राणां शुभदं। शैरीषं शिरीषपुष्पसदृशं वैश्या
नां शुभं। असिनिभं खड्गसदृशं कृष्णवर्णमित्यर्थः। शूद्राणां शस्यते स्तूयते शुभमित्यर्थः। अथ कनास्य च वज्रमणे
र्मूल्यमाह। सितसर्षपाष्टकं तंदुलो भवेत्तंदुलैस्तु विंशत्या तुलितस्य द्विलक्षं मूल्यं द्विघ्नं निगदितं तत्। पादत्र्यंशा
र्द्धोनं त्रिभागपंचांशषोडशांशाश्च भागश्च पंचविंशः शतिकः साहस्रिकश्चैव। सितसर्षपाष्टकमिति। सितसर्षपा

गौरसर्षपास्तैरष्टाभिस्तंदुलो भवति। विंशत्या तंदुलैश्च यद्वज्रं तुलितं परिच्छिन्नं तस्य द्विलक्षं कार्षापणकानां मूल्यं॥
अशीत्या श्वेतिकानां पणः। पणा विंशत्या कार्षापण इति। तथा च। विंशत्या श्वेतिकाः प्रोक्ताः काकिण्यकाचतस्रण
ः। तच्चतुष्कं पण इति। चातुर्थिकं चतुष्कं। चातुर्थिकचतुष्कं तु पुराण इति कथ्यते। कार्षापणः समाख्यातः कनिनुपण
विंशतिः। द्विघ्नं निगदितं तेनेति। तस्मिन्नेव वज्रे द्विघ्ने तंदुलाभ्यां द्वाभ्यां तंदुलाभ्यामूनेन तुलिते। एतद्वक्ष्यमाणपा
दत्र्यंशार्धोनमिति। विंशतिर्द्विघ्ना अष्टादश। अष्टादशभिस्तंदुलैर्यद्वज्रं तुलितं तस्य कार्षापणलक्षद्वयं पादोनमू
ल्यं। सार्धलक्षमित्यर्थः। षोडशभिस्तंदुलैस्तुलितं लक्षद्वयं त्र्यंशोनं त्रिभागरहितं मूल्यं। लक्षमेकं त्रयस्त्रिं
शत्सहस्राणि शतत्रयं। त्रयस्त्रिंशताधिकं सत्रिभागमित्यर्थः। चतुर्दशभिस्तंदुलैस्तुलितस्यार्धोनं लक्षद्वयं मूल्यं
लक्षमित्यर्थः। द्वादशभिस्तंदुलैस्तुलितस्य लक्षद्वयत्रिभागो मूल्यं। षट्षष्टिसहस्राणि षट्शतानि षट्षष्ट्यधिका
नि त्रिभागद्वयमित्यर्थः। दशभिस्तंदुलैस्तुलितस्य लक्षद्वयपंचांशो मूल्यं चत्वारिंशत्सहस्राणीत्यर्थः। अष्टाभि
स्तंदुलैस्तुलितस्य लक्षद्वयषोडशांशो मूल्यं। द्वादशसहस्राणि पंचशतानीत्यर्थः। षड्भिस्तंदुलैस्तुलितस्य लक्ष
द्वयपंचविंशतिकभागो मूल्यमष्टौ सहस्राणीत्यर्थः। चतुर्भिस्तंदुलैस्तुलितस्य लक्षद्वयशतभागो मूल्यं सहस्र
द्वयमित्यर्थः। द्वाभ्यां तंदुलाभ्यां तुलितस्य लक्षद्वयसहस्रभागो मूल्यं शतद्वयं कार्षापणानामित्यर्थः। अंत
रस्थवृध्यास्य त्रैराशिकेन मूल्यमूह्यमिति। अथ शुभवज्रलक्षणमाह॥ सर्वद्रव्याभेद्यं लघ्वंभसि तरति
रश्मिवत्स्निग्धं। तडिदनलशक्रचापोपमं च वज्रं हितायोक्तं। यद्वज्रं सर्वद्रव्याभेद्यं च केनचित् शस्त्रादिना
पि भिद्यते। लघु गौरववर्जितमंभसि जले तरति मज्जतीत्यर्थः। रश्मिवत्तरश्मयः किरणा विद्यंते यस्य तत्स्नि न
ग्धं। स्नेहसंयुक्तं तडिद्विद्युत्। अनलोऽग्निः। शक्रचापमिंद्रधनुः। एषां रूपमानं सदृशं। तद्वज्रं हितायोक्तं श्रेयसे
कथितं। अथाशुभलक्षणमाह। काकपदमक्षिकाकेशधातुयुक्तानि शर्करैर्विद्धं। द्विगुणाश्रि दग्धकलुषत्रस्तविशी
र्णानि न शुभानि। यानि वज्राणि काकपदैः काकपदाकृतिभिश्चिह्नैः। मक्षिकाभिस्तदाकृतिभिः केशैर्वालसदृशै रेखा
भिर्धातुभिर्गैरिकाभिर्लेपैर्युक्तानि तथा यच्च शर्करया कर्करया विद्धं वेधसंयुक्तं। यच्च द्विगुणाश्रिलक्षणाभि

बा॰ सं॰ रश्मिभिर्द्युतिर्गुणाभिर्युक्तं। दग्धमग्निना कलुषं विवर्णं त्रस्तं विगतकान्ति विशीर्णं स्फुटितं रत्नानि नश्च भान्यशोभनानि। अ
थान्यदप्याह। यानि नवं द्युतिमन्त्यपि विदग्धानि फलप्रदायीनि सर्वेषां चैतेषां मूल्याद्भागोऽष्टमोऽल्पानि। यानि च वज्राणि लघु
दुर्दमदृश्यानि दलितान्यग्निदलितानि विदार्य तमश्चं प्रान्ते यानि विपटानि च पतन्ति। वासीफलवत्प्रदीप्तानि। वासीफलश्चांशविशेषः
३०८ एतेषां चाग्निधानेन यन्मूल्यं तस्मादष्टमो भागो हानिर्भवति। अष्टभागोनं मूल्यं भवतीत्यर्थः। अथ वज्रमणेर्धारणगुणा
न्याह। वज्रं न किंचिदपि धारयितव्यमेके पुत्रार्थिनीभिरबलाभिरशान्तिदाः शृंगाटकत्रिपुटधान्यकतलस्थितं यच्छ्रोणीनि
भं च शुभदं तनयार्थिनीनां। वज्रं वज्रमणिरबलाभिः स्त्रीभिः पुत्रार्थिनीभिः सुताभिलाषिणीभिर्न किंचिदपि धारयितव्य
मित्येके। आचार्या ब्रुवन्ति कथयन्ति। यच्च शृंगाटकाकारं त्रिकोणं त्रिपुटं त्रिभिः पुटैर्युक्तं धान्यकतलं धान्यकफलवत्स्थि
तं श्रोणीनिभं स्त्रीवराङ्गसदृशं तत्पुत्रार्थिनीनां शुभदं। तथा च। सुतार्थिनीभिः कन्याभिर्न धार्यं वज्रसंज्ञितं। यच्च शृं
गाटकाकारं त्रिपुटं धान्यवत्स्थितं। श्रोणीनिभं सुवर्णं च स्निग्धं किरणसंयुतं। तच्च तद्धारणं स्त्रीणां पुत्रदं परिकीर्ति
तं। अन्यदप्याह। स्वजनविभवजीवितक्षयं जनयति वज्रमनिष्टलक्षणं। अशनिभयविषारिनाशनं शुभमुपभो
गकरं च भूभृतां। अनिष्टलक्षणमशुभलक्षणसंयुक्तं वज्रं वज्रमणिः स्वजनानां बान्धवानां विभवस्यैश्वर्यस्य जीवि
तस्यायुषः क्षयं जनयत्युत्पादयति। शुभं शुभलक्षणं वज्रं अशनिभयं विद्युद्भीतिं विषतोऽरिसमाद्भयं श
त्रुभीतिं विनाशयति। भूभृतां राज्ञामुपभोगकरं भवति। किंचिदुपभोगकरं विस्तीर्णभोगकरमिच्छन्ति॥ ॥
इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ वज्रमणिलक्षणं नामाशीतितमोऽध्यायः॥ ८०॥ अथ मुक्ता
फललक्षणं व्याख्यायते। तत्रादावेव मुक्ताफलानामुत्पत्तिप्रदर्शनार्थमाह। द्विपभुजगशुक्तिशंखाभ्रवेणुतिमि
सूकरप्रसूतानि। मुक्ताफलानि तेषां बहुसाधु च शुक्तिजं भवति। द्वीपो हस्ती। भुजगः सर्पः। शुक्तिः प्राणिविशेषः
शंखः प्राणी। अभ्रं मेघः। वेणुर्वंशः। तिमिर्मत्स्यः। सूकरो वराहः। एतेभ्यः प्रजातान्युत्पन्नान्युत्पन्नानि मुक्ताफ ३०८
लानि भवन्ति। तेषां सर्वेषां मध्याच्छुक्तिसंभवं बहु साधु अतिश्रेष्ठं भवति। प्राचुर्येण यच्च दृश्यतेत्यर्थः। अथ
मुक्ताफलानामष्टावाकरानाह॥ सिंहलकपारलौकिकसौराष्ट्रकताम्रपर्णिपारशवाः। कौबेरपाण्ड्यवाटकहै

मकरत्याकरास्त्वष्टौ। सिंहलको देशः। पारलौको देशस्तत्र भवः पारलौकिकः। सुराष्ट्रदेशोद्भवः सौराष्ट्रकः। ताम्रप
र्णी नदी। पारशवा देशः। कौबेरो देशः। पाण्ड्यो देशः। हैमिको हिमवानित्येवं प्रकारा अष्टौ मुक्ताफलानामाकराः उ
त्पत्तिस्थानानि। अथैतेषां लक्षणमाह। बहुसंस्थानाः स्निग्धा हंसाभाः सिंहलकाकरभवाः। ईषत्ताम्राः श्वेतास्तमोवि
युक्ताश्च ताम्राख्याः। कृष्णाः श्वेताः पीताः सशर्कराः पारलौकिका विषमाः। न स्थूला नात्यल्पा नवनीतनिभाश्च सौरा
ष्ट्राः। ज्योतिष्मन्तः शुभ्रा गुरवोऽतिमहागुणाश्च पारशवाः। लघु जर्जरं दधिनिभं बृहद्विसंस्थानमपि हैमं। विषमं कृष्णं
श्वेतं लघु कौबेरं प्रमाणतेजोवत्। निंबफलत्रिपुटधान्यकचूर्णाः स्युः पाण्ड्यवाटभवाः। बहुसंस्थाना इति। ये तु बहु
संस्थाना बहुप्रकारं संस्थानमाकारो येषां स्निग्धा निर्मला हंसाभा हंससतुल्यकान्तयः स्थूला बृहन्तस्ते सिंहलाकराः सिंह
लमाकारं येषां ईषत्ताम्राः किंचित्ताम्रवर्णाः। श्वेताः शुक्लाः तमोवियुक्तास्तमोरहितानि निर्मला इत्यर्थः। ते ताम्राख्याः
ताम्रपर्णिभवाः। कृष्णाश्वेता इति। कृष्णाः कृष्णवर्णाः श्वेताः सिताः पीताः पीतवर्णाः सशर्कराः बालुकायुक्ता विषमा
असमास्ते पारलौकिकाः। पारलौकभवाः। ये चानतिस्थूला नातिसूक्ष्मा न स्थूला नातिसूक्ष्मा नवनीतनिभा नवनी
तकान्तयस्ते सौराष्ट्राः। ज्योतिष्मन्तस्तेजोयुक्ताः शुभ्राः श्वेता गुरव इति। अतिगौरवयुक्ता महद्भिर्गुणैर्युक्ताः पारशवाः।
लघुस्वल्पं जर्जरं रूक्षं। दधिनिभं दधिसदृशं बृहद्विसंस्थानं द्विसंस्थानं यस्य तद्धैमं हिमवति संभूतं विषममिति। विष
मसमं कृष्णं श्वेतं कृष्णवर्णं श्वेतवर्णं च। लघु गौरववर्जितं प्रमाणतेजोवत्। प्रमाणं महत्त्वं तेजस्कान्तिर्विद्यते य
स्मिन्तत्कौबेरं। निंबफलसदृशास्त्रिपुटास्त्रिभिः पुटैरुपलक्षितं। धान्यकं धान्यकफलसदृशं चूर्णा चातिसूक्ष्मं। एते सर्वे ए
व मुक्ताः पाण्ड्यवाटभवाः। पाण्ड्यवाटजाता स्युः भवेयुः। अथैतेषां विशेषमाह। अतसीकुसुमश्यामं वैष्णवमैन्द्रं श
शांकसंकाशं। हरितालनिभं वारुणमसितं यमदैवतं भवति। परिणतदाडिमगुलिकागुंजाताम्रं च वायव्यं निर्धू
मानलकमलप्रभं च विज्ञेयमाग्नेयं। अतसीकुसुमश्याममिति। अतसीकुसुमं प्रसिद्धं। तद्वत्श्यामं यन्मुक्ताफलं त
द्वैष्णवं विष्णुदैवत्यं। यच्च शशांकसंकाशं चन्द्राभं। तदैन्द्रं। यच्च हरितालनिभं हरितालवर्णं तद्वारुणं। यच्चासि
तं कृष्णं तत्यमदैवतं याम्यं भवति। परिणतदाडिमगुलिकेति। परिणता परिपक्वा दाडिमस्य गुलिका गुंजा प्रसि

बा॰ सं॰ हाचत्वारिंशति। तद्वज्जाग्रमुक्ताफलं तद्धार्यं दैवत्यं वायव्यं निर्धूमस्य धूमरहितस्यानलस्याग्नेः सदृशी प्रभा कांतिर्यस्य
तथा कमलस्य पद्मस्य च सदृशप्रभं यद्वारुणं यमग्निदैवत्यं। अथैतेषां मूल्यपरिज्ञानार्थमाह॥ माषकचतुष्टयस्य धृत
स्यैकस्य शतादूर्ध्वं त्रिपंचाशत्। कार्षापणानि गदिता मूल्यं तेजोगुणयुतस्य। माषकदलहान्याता द्वात्रिंशतिस्त्रयो
३०० दश चाष्टौ। अष्टौ शतानि च शतत्रयं त्रिपंचाशता सहितं। पंचत्रिंशत शतमिति। चत्वारः कुम्भलानवतिमूल्याः। माषा
र्धिकास्ता गुंजाः सप्ततिमूल्या धृतं रूपं। गुंजात्रयस्य मूल्यं पंचाशद्रूपका गुणयुतस्य। रूपकपंचत्रिंशत्त्रयस्य गुंजार्धहीनस्य
नस्य। माषकचतुष्टयस्य धृतस्येति। एकस्य मुक्ताफलस्य तेजोगुणयुक्तस्य गुणान्वक्ष्यति। स्निग्धः प्रभानुलेपनत्वं चेति धृतस्य
माषचतुष्टयेन धृतस्य तुलितस्य त्रिपंचाशत् कार्षापणाः शताहताः शतगुणिता मूल्यं। त्रिपंचाशत्कार्षापणाः शतानी
त्यर्थः। माषकदलेति। अतो माषचतुष्टयधृतान्मुक्ताफलान्माषकदलहान्या माषकार्धोनितया। एतदुक्तस्य माणं मूल्यं
तत् यथा। सार्धैस्त्रिभिर्माषकैस्तुलितस्य द्वात्रिंशत् कार्षापणशतानि मूल्यं माषकत्रयं धृतस्य विंशतिः कार्षापण
शतानि मूल्यं सार्धाभ्यां माषाभ्यां तुलितस्य त्रयोदश कार्षापणशतानि द्वाभ्यां तुलितस्याष्टौ शतानि अध्यर्धेन माषकेन
तुलितस्य त्रिपंचाशता सहितं शतत्रयं कार्षापणानां मूल्यं पंचत्रिंशत शतमिति। माषकेन तुलितस्य पंचत्रिंशत
शतं कार्षापणानां मूल्यं। चत्वारः कुम्भलानवतिमूल्याः पंचकुम्भलका माष इति। कुम्भलकशब्देन गुंजा इति। य
स्य मुक्ताफलस्य चत्वारः कुम्भला धृतं रूपं। तस्य नवतिकार्षापणानां मूल्यं। यस्य मुक्ताफलस्य रूपं प्रमाणं सा
र्धास्तिस्रो गुंजा धृतं तस्य सप्ततिर्मूल्यं। सप्ततिकार्षापणास्तस्य मूल्यमित्यर्थः। गुंजात्रयस्येति। गुणयुतस्य सगु
णस्य गुंजात्रयस्य पंचाशद्रूपका मूल्यं। रूपकाः सुप्रसिद्धा एव। गुंजात्रयस्य गुंजार्धहीनस्य पंचत्रिंशद्रूपका मूल्यं।
अथान्यन्मूल्यपरिज्ञानार्थं श्लोकमाह। पलदशभागो धरणं तत् यदि मुक्तास्त्रयोदश सुरूपाः। त्रिशती पंचवि ३००
युता रूपकसंख्याकृतं मूल्यं षोडशकस्य द्विशती विंशति रूपस्य सप्ततिः सशता। यत्पंचविंशति धृतं यस्य शतं त्रि
शता सहितं। त्रिंशत्सप्ततिमूल्या चत्वारिंशत्शतार्धमूल्या च। षष्टिः पंचोना वा धरणं पंचाशकं मूल्यं। मुक्ताशी
त्या त्रिंशत शतस्य सा पंचकस्य रूपकविहीना। द्वित्रिचतुःपंचाशताद्वादश षट् पंच रूपकवितयं। पलदशभागः

धरणमिति। पंचकृष्णलको माषस्ते सुवर्णस्तु षोडश पलं सुवर्णाश्चत्वार इति। एवं पलस्य यो दशभागः स धरणमित्यु
च्यते। यद्धरणं त्रयोदश युक्ताः सुरूपा गुणयुता भवंति तदा सपंचविंशानि त्रिशतानि रूपसंख्याकृतं मूल्यं भवति। त्रया
णां शतानां समाहारस्त्रिशती। सह पंचविंशत्या वर्तते या सा सपंचविंशा षोडशकस्येति। मुक्ताषोडशकस्य गुणयुक्त
स्य धरणायुतस्य द्विशती रूपकाणां मूल्यं। एवं विंशतिरूपस्य सप्ततिः सशता। मुक्ताविंशति धरणधृताया सप्तत्यधि
कं शतं मूल्यं। द्विशत धृतस्य द्वादशरूपकामूल्यं। त्रिंशद्धरणस्य त्रिंशता सहितं मूल्यं। त्रिंशत्सप्ततिमूल्यामिति
त्रिंशन्मुक्ता यद्धरणं भवति। तस्य सप्ततिर्मूल्यं। चत्वारिंशन्मुक्ता यद्धरणं तस्य शतार्धं पंचाशद्रूपका मूल्यं। अत्र वा
शब्दश्चार्थे। यत्र षष्टिः पंचोना वा पंचपंचाशन्मुक्ता धरणं भवति। तस्य पंचाशत्कं। अशीतिपंच काश्चत्वारिंशन्मूल्य
मित्यर्थः। मुक्ताशीत्येति। मुक्ताशीत्या धृतस्य धरणस्य त्रिंशद्रूपका मूल्यं। मुक्ताशत धृतस्य सा त्रिंशत्पंचरूपकविहीना। पंच
त्रिंशद्रूपका मूल्यं। द्विशतधृतस्य द्वादशरूपका मूल्यं। त्रिशद्धरणस्य षड्रूपकाः। चतुःशतधरणस्य रूपकपंचकं। पंचश
तधरणस्यात्रितयं रूपकाणां मूल्यमिति। अधुनात्र योदशाद्यानां धरणानां संज्ञार्थमाह। पिक्का पिच्चार्घार्घा रवकः सिक्थं त्र
योदशाद्यानां संज्ञाः परतो निगरश्चूर्णश्चाशीतिपूर्वाणां त्रयोदशाद्यानां धरणानां पिक्काद्याः संज्ञा न द्यथा। त्रयोदश
मुक्ताधृतस्य धरणस्य पिक्केति संज्ञा। षोडशकस्य पिच्चा विंशति कस्यार्घा पंचविंशतिकस्य द्वात्रिंशत्कधृतस्य रवकः।
चत्वारिंशत्कस्य सिक्थं परतोनंतरं पंचपंचाशत्कस्य निगरः। अशीतिपूर्वाणां पंचपंचाशतानां सर्वधरणानां चूर्णा
ति संज्ञा। एताश्च व्यवहारज्ञानेन व्यवहारार्थमुपयुज्यंत इति॥ अथैतेषां मूल्यपरिज्ञानार्थमाह। एतत गुणयुक्तानां ध
रणधृतानां प्रकीर्तितं मूल्यं। परिकल्प्यमंतराले हीनगुणानां क्षयः कार्यः। कृष्णश्वेतकपीतकताम्राणामीषदः
पि च विषमाणां। त्रिंशोनं विषमकपोतयोश्च षड्भागदलहीनं। एतदिति गुणयुक्तानां मुक्ताफलानां धरणधृतानां
मितं तत् यथोक्तं मूल्यं। अंतराले मध्ये परिकल्प्यं स्वबुद्ध्या मूल्यमूह्यं। यथा त्रयोदशकस्य धरणस्य त्रिंशती सपंच
विंशा उक्ता। षोडशकस्य द्विशती॥ अंतराले चतुर्दशपंचदशधृतेस्य चाप्यस्तं त्रैराशिकेन मूल्यानयनं कार्यमित्यर्थः
हीनगुणानां पेक्ष्यमाणानां वक्ष्यमाणेन क्रमेण क्षयः कार्यः। कृष्णश्वेतकांत। ईषदिति नत्वेकमभिसंबध्यते।

ईषत्किंचिद्भासानाम सित वर्णानाम् । पलश्वेतानाम् । पत्रपीत काणाम् । पत्राम्राणाम् । षमाणां माषिधानेन यन्मूल्यं भवति । तदेवत्र्यंशोनं त्रिभागहीनं तेषां मूल्यं । विषमक्‌पीतयोश्च यथासंख्यं षड्भागदलहीनं । अतिविषमस्य षड्भागहीनं मतिपीतस्यार्धहीनमिति । अथ गजमुक्ताफललक्षणमाह ॥ ऐरावतकुलजानां पुष्यश्रवणेन्दुसूर्यदिवसेषु । ये चोत्तरायणभवा ग्रहणेर्केन्द्वोश्च भद्रभाः ॥ तेषां किलजायंते मुक्ताः कुंभेषु सरदकोशेषु । बहवो बृहत्प्रमाणा बहुसंस्थानाः प्रभायुक्ताः ॥ नैषामर्घः कार्यो न च वेधो ऽतीव ते प्रभायुक्ताः । शुभकृदायोग्यकरमहापवित्राधृता राज्ञां । ऐरावतकुलजानामिति । ऐरावतो नाम दिग्गजस्तस्य कुले वंशे जातानामुत्पन्नानां पीतानां दंशप्रमतानां च ये जाताः पुष्यदिने पुष्यनक्षत्रे श्रवणनक्षत्रे इंदुदिने चंद्रवारे सूर्यदिने रविवारे च कृष्णपक्षे भवे ॥ ये भागजाश्चोत्तरायणभवाश्चोत्तरायणे जाता अर्केन्द्वोः सूर्याचंद्रमसोश्च ग्रहणे उपरागे च ये जातास्ते भद्रनामानो गजाः । तेषामिति । किलेत्यागमसूचनार्थः । तेषामैरावतकुलजानां तथा भद्राभानां कुंभेषु मस्तकेषु सरदकोशेषु दंतकोशगर्तेषु मुक्ताः उत्पद्यन्ते । ते च बहवः प्रभूताः बृहत्प्रमाणाः स्थूला बहुसंस्थाना अनेकाकाराः प्रभायुक्ता तेजस्विनः । नैषामर्घः कार्य इति । एषां मुक्ताफलानामर्घो मूल्यं न कार्यं । न चैव वेधः प्रवेधः कार्यः । यतस्ते सर्वे अतीवात्यर्थं प्रभायुक्तास्तेजस्विनः । सदा पवित्रा अतिपावना राज्ञां नृपाणां धृता देहे स्थिताः सुतविजयारोग्यकरा भवंति । सुतान् पुत्रान् विजयं जयः आरोग्यं आरोगतां च कुर्वंति । अथ वराहजस्य मुक्ताफलस्य मीनजस्य लक्षणमाह । दंष्ट्रामूले शशिकांतसप्रभं बहुगुणं च वाराहं । तिमिजं मत्स्याक्षिनिभं बृहत्पवित्रं बहुगुणं च ॥ वराहाणां सूकराणां दंष्ट्रामूले यत्तोदंष्ट्रोत्पन्नं तच्च शशिकांतसप्रभं । चंद्रप्रभाभं ॥ बहुगुणमनेकगुणं वाराहं वराहसंभवं तन्मुक्ताफलं भवति । मत्स्याक्षिनिभं मीननेत्रसदृशं तिमिजं मत्स्यजं भवति । बृहत्स्थूलं पवित्रं पावनं बहुगुणं च तज्ज्ञेयमिति । अथ मेघसंभूतस्य मुक्ताफलस्य लक्षणमाह । वर्षोपलवज्जातं वायुस्कंधाच्च सप्तमाद्भ्रष्टं । ह्रियते किल खाद्दिव्यैस्तडित्प्रभं मेघसंभूतं ॥ वर्षोपलो वर्षोपलस्तद्वज्जातं यथा वर्षमध्ये
उपलो जायते । उत्पन्नं तत् सप्तमाद्वायुस्कंधात् भ्रष्टं पतितं किलेत्यागमार्थः । दिविभवा दिव्याः खादंतरिक्षात् पतमानं दिव्यैरकाशगैर्देवैः ह्रियते । तडित्प्रभं विद्युत्कांतिसदृशं । तन्मेघसंभूतं मेघजं मुक्ताफलं । अथ नागजातस्य

स्य मुक्ताफलस्य लक्षणमाह । तक्षकवासुकिकुलजाः कामगमा ये च पन्नगास्तेषां । स्निग्धा नीलद्युतयो भवंति मुक्ताः फणस्यांते ॥ शस्ते ऽवनिप्रदेशे रजतमये भाजने स्थितं च यदि । वर्षति देवो ऽकस्मात्तज्ज्ञेयं नागसंभूतं ॥ अपहरति विषमलक्ष्मीं क्षपयति शत्रून् यशो विकाशयति । भुजंगमं नृपतीनां धृतमकृतार्घं जयं दत्ते ॥ तक्षकवासुकिकुलजा इति । पन्नगा नागा ये तक्षकवासुकिकुलजाः तक्षककुलवासुकिकुलोत्पन्नाः कामगाः स्वेच्छागामिनस्तेषां नागानां फणस्यांते शिरःपर्यंते मुक्ताः स्निग्धाः मसृणाः नीलद्युतयो नीलकांतयो भवंति । शस्त इति । कथं नागजं ज्ञायते । तत्परिज्ञानार्थमाह । यस्मिन्मुक्ताफले शस्ते ऽवनिप्रदेशे भूभागे रत्ने च रजतमये रौप्ये भाजने पात्रे स्थिते सत्यकस्मात् हठादेव देवो वर्षति । तन्मुक्ताफलं नागसंभूतं ज्ञेयं ज्ञातव्यं अस्य च गुणानाह । अपहरति विषमलक्ष्मीमिति । भुजंगमं सर्पसर्पमुक्ताफलमकृतार्घमकृतमूल्यं रत्नेषु पार्थिवानां विषं अलक्ष्मीं चापहरति । रिपून् शत्रून् क्षपयति विनाशयति । यशः कीर्तिं प्रकाशयति विजयं च ददाति । अथ वेणुशंखोद्भवस्य लक्षणमाह ॥ कर्पूरस्फटिकनिभं चिपिटं विषमं च वेणुजं ज्ञेयं । शंखोद्भवं शशिनिभं वृत्तं भ्राजिष्णु रुचिरं च ॥ कर्पूरस्फटिकनिभं कर्पूरस्फटिकसदृशं चिपिटं चिपिटं विषमं सममतं वेणुजं वेणुसंभवं तु यं ज्ञातव्यं । शशिनिभं चंद्रसदृशं वृत्तं वर्तुलं भ्राजिष्णु भ्राजनशीलं रुचिरं शोभनं च । शंखोद्भवं शंखजातं । अथैतेषां परिभाषार्थमाह । शंखतिमिवेणुवारणवराहभुजगाभ्रजातान्यवेध्यानि । अमितगुणत्वाच्चैषामर्घः शास्त्रे न निर्दिष्टः ॥ शंखप्राणि । तिमिर्मत्स्यः । वेणुर्वंशः । वारणो हस्ती । वराहः सूकरः । भुजंगः सर्पः । अभ्रं मेघः । एभ्यो यानि जातानि संभूतानि तान्यवेध्यानि । न वेध्यानि यानि । एषां सर्वेषाममितगुणत्वाद्बहुगुणत्वात् शास्त्रे ऽर्घो मूल्यं न निर्दिष्टो नोक्तः ॥ एतेषां प्रशस्तार्थमाह ॥ एतानि सर्वाणि महागुणानि सुतार्थसौभाग्ययशस्कराणि । रुक्शोकहंतॄणि च पार्थिवानां मुक्ताफलानीप्सितकामदानि ॥ एतानि सर्वाणि समस्तानि शंखादिसंभूतानि तान्यवेध्यानि मुक्ताफलानि महागुणानि पुत्राः सुताः अर्थो धनं । सौभाग्यं सर्वजनप्रियत्वं यशः कीर्तिं च कुर्वंति । पार्थिवानां राज्ञां रुक्शोकहंतॄणि । रुक् रोगाः शोकः दुःखं हरंति नाशयंति । ईप्सितमभिलषितं कामं मनोरथं च ददाति । अथ नाममुक्तासंचिताभरणानां संज्ञामाह । सुरभूषणं लतानां सहस्रमष्टोत्तरं चतुर्हस्तं । इंद्रच्छंदो नाम्ना

वा॰ सं॰ जयच्छंदस्तदर्धेन। शतमष्टयुतं हारो देवच्छंदो ह्यशीतिरेकयुता। अष्टाष्टकोऽर्धहारो रश्मिकलापश्च नवषट्कः। द्वात्रिं
शता तु गुच्छो विंशत्या कीर्तितोऽर्धगुच्छाख्यः। षोडशभिर्माणवको द्वादशभिश्चार्धमाणवकः। मंदरसंज्ञोऽष्टाभिः
पंचलता हारफलकमित्युक्तं। सप्तविंशतिमुक्ता हस्तेन नक्षत्रमालेति। अंतरमणिसंयुक्ता मणिसोपानं सुवर्णगुलकैर्वा।
३११ तरलकमणिमध्यं तद्विज्ञेयं चाटुकारमिति। एकावली नाम यथेष्टसंख्या हस्तप्रमाणा मणिविप्रयुक्ता। संयोजि
ता या मणिना तु मध्ये यष्टीति सा भूषणविद्भिरुक्ता। सुरभूषणं लतानामिति। अष्टाधिकं सहस्रं लतानां चतुर्हस्तं
चतुर्हस्तदीर्घं। सुराणां देवानां भूषणमलंकरणं क्रियते। तस्य नाम संज्ञा इंद्रच्छंदः। तदर्धेन विजयच्छंदः। तस्यैवेंद्रच्छंद
स्यार्धेन तुल्येन पंचशतानि चतुर्भिरधिकानि लतानां हस्तं विजयच्छंदसंज्ञः। शतमष्टयुतमिति। अष्टयुतं शतं लतानां
हस्तं हस्तं च हारः। एकयुता अशीतिर्लतानां हस्तं देवच्छंदः। अष्टाष्टकोऽर्धहारः। अष्टाभिरष्टाभिश्चतुःषष्ट्या लताना
मर्धहारः। नवषट्कश्चतुःपंचाशल्लतानां रश्मिकलापाख्यः। द्वात्रिंशतेति। लतानां द्वात्रिंशता गुच्छाख्यः। विं
शत्या लतानामर्धगुच्छाख्यः कीर्तितः उक्तः। षोडशभिर्लताभिर्माणवकाख्यः। द्वादशभिर्लताभिरर्धमाणवकः। ह
स्तमिति सर्वत्रानुवृत्तिः। मंदरसंज्ञोऽष्टाभिरिति। अष्टाभिर्लताभिर्मंदरसंज्ञः। पंचभिर्लताभिर्हारफलकमिति। उक्तं
कथितं। सप्तविंशतिमुक्ताफलानि हस्तप्रमाणानि नक्षत्रमालेति तस्याः। अंतरमणिसंयुक्तेति। सैव हस्तप्रमाणा
अंतरमध्ये मणिभिः संयुक्ता सुवर्णगुलकैर्वांतरसंयुक्ता मणिसोपानसंज्ञा भवति। तदेव तरलकमणिमध्यं [illegible]
मणिः समध्ये यस्य तेन संयुक्तं एकावलीति। यथेष्टसंख्या यथेष्टमुक्ताफलैर्युक्ता हस्तप्रमाणा करसंमिता मणिवि
विप्रयुक्ता रहिता एकावली नाम ततः सा भवति। यानु यथेष्टसंख्या हस्तप्रमाणा मणिना तु संयोजिता सा भूषणवि
द्भिर्विचक्षणैर्यष्टीत्यभिकथितेति॥ ॥इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ मुक्ताफललक्षणं नामैकाशीति
तमोऽध्यायः॥८१॥ अथ पद्मरागलक्षणं व्याख्यायते। तत्रादावेव पद्मरागाणामुत्पत्तिलक्षणं चाह। सौगंधिककुरु ३११
विंदस्फटिकेभ्यः पद्मरागसंभूतिः। सौगंधिकजा भ्रमरांजनाब्जजंबूरसद्युतयः। कुरुविंदभवाः शबला मंदद्युतयश्च
धातुभिर्विद्धाः। स्फटिकभवा द्युतिमंतो नानावर्णा विशुद्धाश्च। सौगंधिकेति। सौगंधिककुरुविंदो धातुविशेषौ। स्फटि

स्फटिकोपलः। एभ्यः पद्मरागाणां संभूतिरुत्पत्तिः। तत्र ये भ्रमरद्युतयो द्विरेफसमकांतयः। कृष्णवर्णा अंजनसदृशा वा। अब्जस
दृशा नीलोत्पलतुल्यकांतयः। जंबूरसद्युतयः जंबूफलविशेषस्तद्रससमकांतयो लोहितवर्णास्ते सौगंधिकाः सौगंधिकजाताः
कुरुविंदभवा इति। ये तु शबलाः शुक्लकृष्णमिश्रवर्णा मंदद्युतयो अल्पकांतयो धातुभिर्मृत्तिकादिभिर्विद्धाः संसक्तास्ते
तत्संयोगाज्जातास्ते कुरुविंदभवाः कुरुविंदजाताः। ये च द्युतिमंतः प्रभावंतो नानावर्णा विचित्रा विशुद्धा निर्मलास्ते स्फटिक
भवाः स्फटिकसंभूताः। अथैतेषां सर्वेषां गुणानाह। स्निग्धः प्रभानुलेपी स्वच्छोऽर्चिष्मान् गुरुः सुसंस्थानः। अंतःप्रभो
ऽतिरागो मणिरत्नगुणाः समस्तानां। स्निग्धः स्नेहसंयुक्तः प्रभानुलेपी प्रभया कांत्या नु लिंपति रंजयति। स्वच्छो निर्मल
ः अर्चिष्मान् दीप्तियुक्तः। गुरुर्गौरवयुक्तः। सुसंस्थानः शोभनाकृतिः। अंतःप्रभः अंतर्मध्ये प्रभा कांतिर्यस्य। अतिरागो
ऽतीव रागेण लौहित्येन युक्तः। एते समस्तानां सर्वेषां पद्मरागाणां मणिरत्नगुणाः प्रधानरत्नगुणाः। अथैतेषामेव
दोषानाह। कलुषा मंदद्युतयो लेखाकीर्णाः सधातवः खंडाः। दुर्विद्धा न मनोज्ञाः सशर्कराश्चेति मणिदोषाः। कलुषा अ
निर्मलाः मंदद्युतयः स्वल्पकांतयः। लेखाकीर्णा लेखाभिर्व्याप्ताः। सधातवो धातुभिर्मृत्तिकादिभिः सहिताः। खंडाः स्फुटि
ता दुर्विद्धा दुष्टेनाप्रशस्तेन विधेन युक्ताः। न मनोज्ञा न शुभाः। सशर्कराः शर्करासंयुक्ताः। एवं प्रकारा मणिदोषाः। अथ
सर्पमणेर्लक्षणमाह। भ्रमरशिखिकंठवर्णो दीपशिखासप्रभो भुजंगानां। भवति मणिः किल मूर्धनि योऽनर्घे
यः स विज्ञेयः। भुजंगानां सर्पाणां मूर्ध्नि शिरसि भ्रमरसदृशो द्विरेफकांतिः। शिखिकंठसदृशो वर्णो मयूरगलस
प्रभः। दीपशिखासप्रभः प्रदीपाग्रकांतिर्यो मणिर्भवति। स अर्घेयो मूल्याद्वित्तेयो दातव्यः। अस्य प्रभावमा
ह। यस्तं बिभर्ति मनुजाधिपतिर्न तस्य दोषा भवंति विषरोगकृताः कदाचित्। राष्ट्रे च नित्यमभिवर्षति तस्य देवः
शत्रूंश्च नाशयति तस्य मणेः प्रभावात्। यो मनुजाधिपती राजा। सर्पमणिं बिभर्ति धारयति। तस्य विषरोगकृ
ता दोषा न कदाचिद्भवंति। तस्य राष्ट्रे देवः शक्रो नित्यं सर्वदा वर्षति। तस्य मणेः प्रभावात् शत्रून् रिपून् सर्वा
न्नाशयति। अथास्य मूल्यपरिज्ञानार्थमाह। षड्विंशतिसहस्राण्येकस्य मणेः पलप्रमाणस्य। कर्षत्रयस्य
विंशतिरुपदिष्टा पद्मरागस्य। अर्धपलस्य द्वादश कर्षस्यैकस्य षट्सहस्राणि। यश्चाष्टमाषकस्तस्य सहस्रत्र

भा॰ सं॰ यं मूल्यं माषक चतुष्टयं दशशतत्रयं द्वे च पंचशतमूल्ये। परिकल्प्य मंतराले मूल्यं हीनाधिकगुणानां। वर्णन्यूनस्यार्धं तेजोही
नस्य मूल्यमष्टांशः। अल्पगुणो बहुदोषो मूल्यात् प्राप्नोति विंशांशं। आधिक्यं च पणबहुलं स्वल्पगुणं चानुयाति शतभागं।
इति पद्मरागमूल्यं पूर्वाचार्यैः समुद्दिष्टं। षड्विंशति सहस्राणीति। एकस्य पद्मरागस्य मणेः पलप्रमाणस्य चतुः कर्षस्य
३३२ मूल्यं षड्विंशति सहस्राणि ३ पद्मरागानि कथितानि अर्धपलस्येति। अर्धपलस्य द्वादशसहस्राणि मूल्यं। एककर्षस्य
षट्सहस्राणि। यश्च पद्मरागो द्राभिर्मापकैः र्धतश्च तितस्य मसहस्रत्रयं रूपकाणां मूल्यं। माषचतुष्टयमि
ति। माषचतुष्टययो धृतः पद्मरागः सहस्रशतद्वयः सहस्रमूल्यं। द्वौ तु माषकौ पंचशतमूल्यौ। अंतरालमध्यप
रिकल्प्यं स्वबुध्या मूल्यमुक्तं। यथा पलप्रमाणस्य षड्विंशति सहस्राणि कर्षत्रयस्य विंशतिरेवमर्धकर्षोन पलस्य त्रयोविंशति
नेनमूल्यानयनं कार्यमिति। हीनगुणानां वक्ष्यमाणविधानक्षयः कार्यः। वर्णन्यूनस्य सवर्णहीनस्य पद्मरागस्य पूर्वोक्तान्मूल्या
दर्धमूल्यं भवति। तेजोहीनस्य विगतकांतेः प्रागुक्तान्मूल्यादष्टांशो भागो मूल्यं यो ऽल्पगुणः पद्मरागो ऽल्पगुणो बहुदो
षो न केवलं दोषैर्युक्तः समूल्यात्प्रागुक्तात् विंशांशं विंशतिमं भागं प्राप्नोति लभते। आधिक्यमिति। आधिक्यं बहुपणब
हुलं प्रभूतच्छिद्रं स्वल्पगुणं मूल्यात् प्रागुक्तात् शतभागं प्राप्नुयात् लभते इत्यनेन प्रकारेण पूर्वाचार्यैः पद्मरागमूल्यं
समुद्दिष्टमेतदिति॥ ॥इति भट्टोत्पलविरचितायां संहितावृत्तौ पद्मरागलक्षणं नाम एकाशीतितमो ऽध्यायः॥८१॥
॥ ॥अथ मरकतलक्षणं व्याख्यायते। तल्लक्षणं प्रयोजनं चाह। शुकवंशपत्रकदलीशिरीषकुसुमप्रभं गुणोपेतं। सुरपि
तृकार्ये मरकतमतीव शुभदं नृणां विहितं। यन्मरकतं शुकसदृशं नीलपीतवर्णं च वंशपत्रकदलीसदृशं वा श्या
मपीतं शिरीषकुसुमप्रभं शिरीषपुष्पतुल्यवर्णं श्वेतपीतं वा। एतेषामन्यतमवर्णमपि तत्तद्यदि गुणोपेतं गुणब
हुलं गुणाः स्निग्धः प्रभानुलेपी स्वच्छो ऽर्चिष्मानित्यादिकाः तैर्युक्तं तथा विधं नृणां पुंसां सुरपितृकार्ये देवकार्ये पितृ
कार्ये चातीवात्यर्थं शुभदं विहितमुक्तमिति॥ ॥इति श्री भट्टोत्पलविरचितायां संहितावृत्तौ मरकतनामाद्व्यशी ३३२
तितमो ऽध्यायः॥८२॥ ॥अथ दीपलक्षणं व्याख्यायते। तत्रादावेव शुभलक्षणमाह। वामावर्तो मलिनकिरणः
सस्फुलिंगो ऽल्पमूर्तिः क्षिप्रं नाशं व्रजति विमलस्नेहवर्त्यन्वितो ऽपि। दीपः पापं कथयति फलं शब्दवान्वेपनश्च

आकीर्णार्चिर्विशलभमरुद्यश्च नाशं प्रयाति। यो दीपो वामावर्तो वामेनापदक्षिणेनावर्तेन भ्रमति। तथा मलिनकिरणो
निर्मलरश्मिः सस्फुलिंगः स्फुलिंगैरग्निकणैः सहितः अल्पमूर्तिलघुप्रकाशः विमलेन निर्मलेन स्नेहेन तैलेन वर्त्या
चान्वितो युक्तः क्षिप्रमध्येनाशं व्रजति याति। यथा शब्दवान् शब्दयुक्तो वेपनः कंपयुतः। आकीर्णार्चिर्विकीर्णज्वालः
विशलभमरुद्यश्च नाशं प्रयाति। विनाशलभेन पतंगेन मरुता वायुना च विनाशं प्रयाति गच्छति। स तथा भूतः पा
पमनिष्टं फलं कथयति। वृत्तं। अथ शुभलक्षणमाह। दीपः संहतमूर्तिरायततनुर्निर्वेपनो दीप्तिमान्निःशब्दो रु
चिरः प्रदक्षिणगतिर्वैदूर्यहेमद्युतिः। लक्ष्मीं क्षिप्रमभिव्यनक्ति सुचिरं यश्चोद्यतं दीप्यते। शेषं लक्षणमग्निलक्ष
णसमं योज्यं यथा युक्तितः। यो दीपः संहतमूर्तिर्घनदेहः आयततनुर्दीर्घशरीरो निर्वेपनः कंपरहितः दीप्तिमान्
सुकांतिः निःशब्दः स्वनरहितः रुचिरोऽभिरामः प्रदक्षिणगतिर्वामज्वालः। वैदूर्यमणेर्नीलपीतस्य हेमः क
वर्णस्य च सदृशद्युतिस्तत्कांतिर्यश्च सुचिरमतिबहुकालमचलमतितेजस्विनं दीप्तं ज्वलति। स क्षिप्रमाश्वेव
संभवमग्निलक्षणसमं तत्तुल्यं येकंथं योजयितव्यं। यथाध्वतर्कुभद्रयेन भूभृतां मनुरूपं च नाममिति भूभृतां।
इन्द्रचापतपनाधराद्रिमवंध्यपयोधराधरा नाभीकरासौ कुरंटक मध्ये बहुर्यन्। कांत्यं स सनिभे इति गे। न ध्वांतं संत
भवनेन कार्शं करोति रत्नं द्युतिं न पश्यति। सर्वं संचितमन्य द्धन्नसंभवति यथास्य द्वावसानसम यदित्यादिनोक्तं
मिति। ॥इति श्री भट्टोत्पलविरचितायां संहितावृत्तौ दीपलक्षणं नाम त्र्यशीतितमो ऽध्यायः॥८३॥ ॥श्री
अथ दंतकाष्ठलक्षणं व्याख्यायते। तत्रादावेव प्रयोजनप्रदर्शनार्थमाह। वल्लीलतागुल्मतरुप्रभेदैः स्युर्दंतका
ष्ठानि सहस्रशो ऽपि। फलानि वान्यान्यतिप्रसंगो माभूदतो वच्मि पथ्यकामिकानि। वल्ल्यः प्रसिद्धाः लतागुल्मा
ह्रस्वमूलाः शाखासमूहाः तरवो वृक्षाः। एतेषां ये प्रभेदाः पृथग्जातयस्तैः सहस्रशः सहस्रप्रकारं दंतकाष्ठ
नि स्युर्भवेयुः तैः फलानि वाच्यानि वक्ष्यानि। अतिप्रसंगो मा भूत्। तेषां दंतकाष्ठानामतिप्रसंगो व्यासस्तावि
स्तरेण मा भूत्। अतोऽस्माद्धेतोः कामिकान्यभीष्टफलप्रदानि वच्मि कथयामि। अथ शब्दः पादपूरणो ऽपरि
भाषार्थमाह॥ अज्ञातपूर्वाणि न दंतकाष्ठान्यथान्यपत्रैश्च समन्वितानि। न युग्मपर्वाणि न पाटितानि न चोर्ध्व

Dr. BHAU DAJI MEMORIAL

श्चकानिनिनालचारा। नतानपर्वमुत्पन्निर्यैवांना न्यलात पूर्वाणि दंतकाष्ठानिनाद्यन्न भक्षयेत। पर्वेः पर्वैः चसंयुक्तानि समन्वितानिनाद्यात। नयुग्मपर्वाणि। पर्वद्वंद्वे ग्रंथि द्वयेयुक्तेननाद्यात। विनाल्लचानलकर्दलानिनाद्यात। अथयान
भागफलान्याह। वैकंकतेश्रीफलकाश्मर्यश्चक्राव्हौ। ब्राह्मवर्चसंमतंगैमुदारात्। वृद्धिर्वटे कंटप्रचुरं च तेजः प्रजामश्वर्कै सगु
णाः प्रियत्वं। वैकंकतः प्रसिद्धः श्रीफलो काश्मरी। एते वृदंतकाष्ठे भक्षितेष्वाभर्तौ ब्रह्मसंबंधिनी द्युतिः कांतिर्भ
वति। ब्रह्मवर्चसंभवतीत्यर्थः। शोभनगर्जश्चगृहे मुदाराः शोभनदाराः भवंति। वटे वृद्धिरर्थानां भवति। अर्के अर्क
वृक्षे प्रचुरं बहुलं तेजः कांतिर्भवति। मधूके पुत्राः सुता भवंति। ते च सगुणाः गुणसहिताः प्रियत्वं जनवल्लभत्वं च भव
ति। अथान्यदप्याह। कदम्बाः शिरीषवटप्लक्षजंबूक्षैर्यास्यासिद्धिः समभीप्सितास्यात। मान्यत्वमासोति जनस्य तास्या
मा मान्यमश्वत्थतरोवदंती। शिरीषे शिरीषवृक्षे तथा तेनैव प्रकारेण कंजे च लक्ष्मीर्भवति। प्लक्षे प्लक्षवृक्षे ऽर्था
नां धनानां समभीप्सिता यथाभिलषिता वृद्धिः स्याद्भवेत। जात्यां जनस्य लोकस्य मान्यत्वं प्रजयत्वमाप्नोति लभते।
अश्वत्थतरोश्च अश्वत्थवृक्षे प्राधान्यं प्रधानत्वं वदंति कथयंति। अन्यदप्याह। आरोग्यमायुर्बदरीबृहत्योरैश्वर्यलब्धिः
खादिरेसबिल्वे। द्रव्याणि चेष्टान्यतिमुक्तः प्राप्नोति। तान्येव पुनः कदंबे। बदरी वृक्षविशेषः बृहती कंटकारिका। अ
नयोर्यथासंख्यमारोग्यमायुः। बदर्यामारोग्यं नीरोगतां। आयुर्दीर्घजीवितं भवति। खादिरे सबिल्वे बिल्वसहितेऽ
श्वर्यवृद्धिर्भवति। अथवाणे ऐश्वर्यलब्धिः खादिरे ऐश्वर्यं। बिल्वे लब्धिर्लाभः। अतिमुक्तके प्रान्तर्भातिमुक्तानि द्र
व्याणि धनादीनि स्युर्भवेयुः कदंबे तान्येव द्रव्याणि चेष्टानि प्राप्नोति पुनः। अन्यदप्याह। नीपे धर्माप्तिः करवीरे
तूल्धिर्भंडीरे स्यादन्नमेवं प्रभूतं। शम्यां शत्रून पर्हत्यर्जुने च श्यामायां चाविषतामेवनाशः। नीपेनीपवृक्षे धर्मा
प्तिर्धर्मलाभः। करवीरे अन्नलब्धिरन्नलाभः। भंडीरे भंडीरवृक्षे प्रभूतं पर्याप्तमन्नमेवस्याद्भवेत। शम्यां शमी
वृक्षे शत्रून रिपून हंति विनाशयति। स कर्ता। अर्जुने वृक्षे च शत्रूनेवापहंति। श्यामायां प्रियंगवां शत्रूणा
मेव नाशः क्षयो भवति। अन्यदप्याह। सालेऽश्वकर्णे च वदंति गौरवं सभद्रदारौ च पिचालके च। चान्यथमाया
तितनस्य सर्वतः प्रियंगवपामार्ग मजंबुदाडिमैः। साले साल वृक्षे अश्वकर्णे च गौरवं सन्मानं वदंति कथयंति॥ ३३३

भद्रदारौ भ्यिप्रवः समुच्चये। चाटरूपं च वासिकाय्यां च नयाव्याने गौरवं वदंतिप्रियंगु। अपामार्गेण तजखान वृक्षसमर्दितेन द्रा
डिमेन वा। एतैः सर्वैरेव सर्वतः सर्वजलभ्यं वल्लभत्वमायाति गच्छति। अथ दंतकाष्ठ भक्षणविधानमाह। उदङ्मुखः प्राङ्मुख
एव वाब्दं कामं यथेष्टं हृदये निवेश्य। द्वादशांगुलं सोपविष्टः प्रक्षाल्यतत्याज्यशुचौ प्रदेशे। दंतकाष्ठं वा उदङ्मुख
उत्तराभिमुखः पूर्वाभिमुखः एव वा। अब्दं वार्षिकं यथेष्टं यथाप्रीतिकाममिष्टं हृदये निवेश्य दंतकाष्ठमाभनंदन कु
र्वन सकलोपविष्टः सुखोपविष्टः भक्षयेत। ततः प्रक्षाल्य शुचौ शुद्धे प्रदेशे स्थाने त्यजेत परित्यजेत। अथ तत्फल
लक्षणमाह। अभिमुखपतितं प्रशांतदिक्स्थं शुभमतिशोभमूर्ध्वं संस्थितं यत। अशुभकरमतोऽन्यथाप्रदिष्टं
तपतितं च करोति सुष्टमंनं। अभिमुखपतितं येन भक्षितं तस्यैवाभिमुखे आननं संमुखं पतितं प्रशांतदिक्स्थं प्रशांतायां
दिशि स्थितं च शुभं। यदूर्ध्वसंस्थितं यत्नमेवोर्ध्वं संपतति शोभनं। अतोऽस्मादुक्तात प्राकारसाकारदुपवाशविपर्ययेण
अनभिमुखपतितमप्रशांतदिक्स्थमनूर्ध्वसंस्थितं न शुभकरं निर्दिष्टमुक्तं। स्थितपतितं च करोति। सुष्टमंनं
स्थित्वा यत्पतितं तन्मृष्टमंनं मृष्टभोजनं करोति दधाति॥ ॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ दंतका-
ष्ठलक्षणं नाम चतुरशीतितमोऽध्यायः॥ ८४॥ ॥ ७॥ अथ शाकुनं व्याख्यायते। तत्रादावेवांगमप्रदर्शनार्थ
माह। यद्गुरुर्भृगुश्चागरिवा कपिष्ठलगरुत्मतो। मतेभ्यः प्राह कृत्वा भागुरेर्देवलस्य च। भारद्वाजमतं दृष्ट्वा य
च्चश्रीद्रव्यवर्धनः। आवंतिकः प्राह नृपो महाराजाधिराजकः। मतं सप्तर्षीणां च संस्कृतं प्राकृतं च यत। यानि
चोक्तानि गर्गाद्यैर्यात्राकारैश्च भूरिभिः। तानि दृष्ट्वा च कारेमं सर्वशाकुनसंग्रहं। वराहमिहिरः प्रीत्या शिष्या
णां ज्ञानमुत्तमं। यत शक्र इति। यत्शाकुनं शक्र इंद्रः शुक्रो भार्गवः। वागीशो बृहस्पतिः। कपिष्ठलो मुनिः।
गरुत्मान वैनतेयः। एतेषां शास्त्रकर्तॄणां मतेभ्यः कृत्वा भाग्य आचार्यः प्राहोक्तवान। तथा भागुरेर्मुनेर्देवल
स्य मुनेर्मतं च यत शाकुनं। सप्तर्षिभाष्यः प्राह भरद्वाज मतमिति। यच्च शाकुनं भरद्वाजाख्यस्य मुनेर्मतं दृष्ट्वा
वर्धनस्य श्रीवर्धमानाख्या महाराजाधिराज वैद्यप्रसक आवंतिक उज्जयिन्यां नृपो राजा प्राहूतवान। मतं सप्तर्ष
र्षीणामिति। यच्च शाकुनं सप्तर्षीणां मरीच्यादीनां यच्चान्यसंस्कृतं कौकिल पदं इति। यच्च प्राकृतं शाकुनं मसंस्कृ
त

वा·सं·
३२५
वार्यचितं। यानि च शकुनानि गर्गर्षिर्वसिष्ठपराशरकश्यपऋषिपुत्रैर्भगुभिर्बहुभिर्याचार्यैः कृतानि कथितानि।
च दृष्ट्वावलोक्य चेदं वराहमिहिरनामा द्विजः शिष्याणां प्रीत्या दृष्ट्वा भृतत्वा प्रीत्यै चाप्रीत्यर्थं सर्वशकुनसमूहं संक्षे
पमुत्तमं प्रधानं चकार कृतवान्। अथ शाकुनप्रयोजनमाह॥ अन्यजन्मांतरकृतं कर्म पुंसां शुभाशुभं। यत्तस्य
शकुनः पाकं निवेदयति गच्छतां। पुंसां नराणां अन्यजन्मांतरकृतं प्राक्जन्मन्युपार्जितं शुभाशुभं यत्कर्म तस्य कर्म
णो यत्पाकं शुभाशुभफलं तच्छकुनः शुभाशुभफलस्य वक्ता। कश्चित्प्राणिविशेषः समागच्छतां प्रयोगं गच्छमानानां
यात्रायां निवेदयति कथयति। अधुना शकुनां प्रभेददर्शनार्थमाह॥ ग्राम्यारण्याम्बुभूव्योमद्युनिशोभयचारिणः।
रुतयानेक्षितोक्तेषु ग्राह्या वाम्याः। पुंनपुंसकाः॥ शकुनाः केचित् ग्राम्या ग्रामभवाः अन्ये आरण्याः अरण्यनिवासिनः। अ
न्ये अंबुचरा जलचारिणः। अन्ये भूचराः पृथ्वीचारिणः। अन्ये व्योमचारिणः नभोचराः। तत्र ग्राम्या नरतुरगग
जसारमेयाः। अरण्याः सिंहव्याघ्रवराहद्वीपिमृगाः। अंबुचरा हंसादयः। भूचराः श्वाविधनकुलसर्पादयः। व्योम
चरा नित्यमेवाकाशस्था दृश्यंते न कदाचिद्भूमौ लक्ष्यंते। अन्ये द्युचारिणो अह्निचराः। अन्ये निशाचरा रात्रिचारिणः
। अन्ये उभयचारिणो द्युचरा रात्रिचराश्च एतेषां लक्षणमुत्तरत्राचार्य एव वक्ष्यति। श्यामाश्येनशशघ्नवंजुलेत्यादिना
ग्रंथेन वयमपि तत्रैव व्याख्यास्यामः। तेषु च शकुनेषु पुंस्त्रीनपुंसकाः रुतयानक्षणोक्तेषु ग्राह्या लक्षयितव्याः। रुतं वाशि
तं तेषामेव गमनं। ईक्षणं प्रेक्षणं। तेषामविचारः किमयं पुरुषः स्त्री वा नपुंसको वेति। उक्तलक्षणज्ञाता वा
दूरस्थः शकुनो यत्र व्याहरति। तत्र संशयः किं पुरुषेण व्याहृतं स्त्रिया वा नपुंसकेन वा। तत्र यदि पुंसः संभाषणं नि
कटेलक्ष्यतत्कालं श्रूयते तदा स शकुनः पुमान्। अथ स्त्रियः श्रूयते तदा स्त्री अपि स्त्री यदि नपुंसकस्य श्रूयते। तदा नपुंसक
एवेति। पुनरप्याह। पृथक्जात्यनवस्थानां दोषांश्च विलक्षयेत्। सामान्यलक्षणोद्दिष्टैः कारवविरुतादिभिः॥ ३२४
एषां शकुनानां पृथक् पृथक् जातिर्योनिविभागः। अनवस्थानमेकदेशानवस्थितेर भावः। प्रकृतेर्जातिविभागा
न लक्ष्यते न ज्ञायते। सामान्यविशेषलक्षणं यत्तस्य यद्देशः कथनं तत्र दृष्टमार्षिविरुतामुनिभणितो। एष्टुगर्ग
कोष्ट्रुश्रीकाद्युक्ते। अधुना तावेवाह॥ पीनोन्नतविकृष्टांशाः पृथुग्रीवास्यवक्षसः। स्वल्पगंभीरविरुताः पु

मांसः स्थिरविक्रमाः॥ तनुवृत्तोन्नतग्रीवाः सूक्ष्मास्यपदविक्रमाः। प्रसक्तमृदुभाषिण्यः स्त्रियोतोन्यन्नपुंसकं। पीनो
न्नतरति। पीनो मांसोपचिता उन्नता उच्चा विकृष्टा विस्तीर्णा अंसाः स्कंधा येषां पृथुग्रीवा विस्तीर्णा शिरोधराः मुखवक्षसः।
एते भवंति। स्वल्पमत्यल्पं गंभीरं सानुनादं विरुतं शब्दो येषां ये च स्थिरविक्रमा अचलाः पौरुषाते पुमांसः पुरु
षाख्याः शकुनाः तनूकृत्वदति। तनुः कृशः शिरोधरा ग्रीवा एतान्यत्र यस्य तानि तनूनि येषां तेन यान्ताः उ
न्नताः सूक्ष्माः स्वल्पमल्पमास्यं मुखं पदानि चरणानि विक्रमः पुरुषार्थश्च सूक्ष्मो येषां प्रसक्तमालब्धितं सं
ततं मृदुमधुरभाषितं रवो येषां ताः स्त्रियः। अतोन्यन्नपुंसकमिति। अतोस्मात्लक्षणद्वयादन्यल्लक्षणसंयुक्तं नपुंस
कमुक्तं भवति। पुरुषस्य लक्षणं यदुक्तं न पुंसकं तदुक्तं भवति। पुरुषस्य लक्षणं यदुक्तं यच्च स्त्रियास्तेन चामिश्रेण ल
क्षणद्वयेन संयुक्तं नपुंसकं ज्ञेयमिति। अत्र यच्चालंकरोक्तिमाम्यमित्युक्तमाह॥ ग्राम्यारण्यप्रचाराद्यं लोकादेवोपलक्षयेत्।
न सविशेषकृदुक्तं तत्स्मियाचामात्रप्रयोजनं। एषां शकुनानां ग्राम्यप्रचारमरण्यप्रचारं लोकाल्लोकतोऽन्यशास्त्राद्युपलक्ष
येत्। जानीयात्। आदिग्रहणाद्युनिशाचारिणां यच्चारित्रं। सविशेषकृतोक्तं। संक्षेपं कर्तुमिच्छुः सविशेषकृद्यात्रामात्राम
योजनं यात्रायां यावन्मात्रमुपयुज्यते तावन्मात्रं वक्ष्यामि कथयामि। इति दृष्टोर्थेस्मिन् शास्त्रे यत्रायं ग्रंथारंभो भवतीति
अधुना चामधिकृत्य शाकुनविचारो यस्मिन् तदाह॥ पथ्यात्मानं नृपं सैन्यं पुरं चोद्दिश्य देवतां। सार्थप्रधानं साम्यस्या
ज्जातिविद्यावयोधिकं। पथि गच्छतः पुंसः आत्मानं स्वशरीरमुद्दिश्य शाकुनं शुभाशुभं लक्षयेत्। सैन्ये सेनायां न
परराजानमुद्दिश्य सार्थजनसमूहप्रधानं। सार्थपतिमुद्दिश्य यदा सार्थे बहवः प्रधाना भवंति। तदा साम्ये जाति
तो विद्यावयसा वा योधिकस्तमुद्दिश्य फलं लक्षयेत्। बहुपुरुषार्थपतिषु समस्तुयेन याधिकस्तस्य श
कुनं शुभाशुभं। अथ जातिसाम्यं भवति। यो विद्याधिकस्तस्यैव विद्यासाम्ये यो वयोधिकस्तस्येति। अधुना दि
कुलक्षणं फलनियमं चाह॥ मुक्तप्राप्तेष्यदर्कासु फलं दिक्षु तथाविधं। अंगारदीप्तधूमिन्यस्ताश्च शांतास्ततो
पराः। अत्रेता वह्निदिक्संभ्रमणाच्छानाद्यामर्थं दृश्य वक्ष्यति भवति। तद्यथा सूर्योदयादारभ्य यावद्दिनस्य
प्रथमप्रहरस्तावदैशानी दिक् मुक्तसूर्या। प्राची प्राप्तसूर्या। आग्नेयी एष्यत्सूर्या। ततो नैरृती यदुदया

यथा प्राचीमुक्तसूर्या। आग्नेयी प्राप्तसूर्या। दक्षिणेऽस्तसूर्या ततस्तस्मात् यत्प्रदेशे आग्नेयी मुक्तसूर्या दक्षिणा प्राप्तसूर्या।
वा॰ सं॰ नैर्ऋत्येऽस्तसूर्या। ततश्चतुर्थप्रदेशे दक्षिणा मुक्तसूर्या। नैर्ऋती प्राप्यसूर्या। पश्चिमेऽस्तसूर्या। ततो रात्रेः प्रथमे यामे
नैर्ऋती मुक्तसूर्या। पश्चिमा प्राप्तसूर्या। वायव्येऽस्तसूर्या। ततो रात्रिप्रहरादूर्ध्वं अर्धरात्रं यावत्पश्चिमा मुक्तसूर्या।
३२५. वायव्या प्राप्तसूर्या। उत्तरेऽस्तसूर्या। ततः प्रहरद्वयादूर्ध्वं प्रहरत्रयं यावद्वायव्या मुक्तसूर्या। ऐशानी प्राप्तसूर्या।
पूर्वाऽस्तसूर्या। एतासु मुक्तप्राप्तासु दिक्षु कर्मफलं दिक्षु तथाविधमिति। तासु दिक्षु तथाविधं नामानुरूपं फलमारभ्य
अशुभमित्यर्थः। एतदुक्तं भवति। ऐन्द्र्यस्तसूर्या यायद्दिक्षु भं शाकुनं तदैन्द्र्यं पुरस्ताद्भविष्यति। एवं मुक्तप्राप्तयोरतीतवर्त
मानं वक्तव्यं। अंगारदीप्तधूमिन्यस्ताश्चेति। तद्दिशो मुक्तप्राप्यैष्यदर्काख्या यथाक्रमेणांगारदीप्तधूमिन्यः। मुक्तसू
र्यांगारिणी प्राप्तसूर्या दीप्ता। एष्यत्सूर्या धूमिनी। ततस्ताभ्योऽपराः पंचदिशः शांता इति। उक्तं च। अंगारिणी दिग्वि
प्रमुक्ता यस्यां रविस्तिष्ठति सा प्रदीप्ता प्राप्त धूमिता यास्यति यां दिनेशः शेषाः प्रशस्ताः शुभदाश्च तस्मादिति। अत्र
केचिदत्रेरर्धप्रहरं शेषादारभ्य याबाह्नस्यार्धप्रहरं तावत्प्राचीदिशं प्राप्तसूर्यामिति वर्णयंति। तत ऊर्ध्वं सार्धप्र
हरं यावदाग्नेयं शेषास्वप्येवं वक्तव्यं। अयुक्तमेतत् यस्मात् गर्गः उदये दीप्यते पूर्वा पूर्वाह्णे पूर्वदक्षिणा। मध्याह्ने
दक्षिणा दीप्ता अपराह्णे तु नैर्ऋती। पश्चिमाऽस्तमये दीप्ता वायव्या पूर्वरात्रिके। सौम्या तु मध्यरात्रे स्यादैशान्यपर
रात्रके। संध्यास्वनागतातीतादीप्ता तेन तथा दिशः। यादृशं तेन गन्ता सा ते वदंति मद्दयमा। तञ्चरतु मतातायांदी
सायंजामतमर्गा। अनागता यामागामा दीप्ता यातादिग्गतास्मृतं इति। अथ तासां दिशां फलनियमार्थमाह। तत्पंचम
दिशां तुल्यं शुभं त्रैकाल्यमादिशेत। परिशेषदिशोर्वाच्यं यथासन्नं शुभाशुभं। तद्विनांगारिण्याद्यानां दिशां
परामर्शः। ताभ्यः पंचमास्तत्पंचमाः। तत्पंचमदिशां तुल्यं सदृशं त्रैकाल्यं त्रिकालभवं शुभं फलमादिशेत। एतदुक्तं
भवति। अंगारिण्याया पंचमादिक् तस्यां शुभस्थिते शांतायां तस्यां सौम्यशकुने शुभं यत्फलं तद्यातं। तस्यामेव वा ३२५.
मस्थिते शकुने अल्पमनिष्टं यातं। दीप्तायां पंचमादिक् तस्यां शुभस्थिते शकुने यत् शुभं फलं तत्सांप्रतं। तस्यामे
वा पापे स्थिते शकुनेऽल्पमशुभं सांप्रतं। धूमिताया पंचमादिक् तस्यां शुभस्थिते शकुने शुभं फलं तदैष्यं। तस्या

मेव पापे शकुने अल्पमशुभमैष्यं। अन्यासां मध्ये शुभे शकुनेऽल्पं शुभमशुभं फलमिति। यासामत्र परिशेषदिशोरिति परिशेष
योर्द्वयोर्दिशोः यथासन्नं येन प्रकारेण संनिकृष्टवर्ति शुभाशुभं फलं वाच्यं वक्तव्यं। यस्यां या दिक् आसन्ना निकृष्टवर्तिदीप्ता
यत्ता वा तस्यां यत्फलं तत्रस्यामेव वाच्यं। एतदुक्तं भवति। ते दिशो भागद्वयेन परिकल्प्य निश्चयः कार्यः। तेनांगारिण्याः शां
तासंनभागे पापशकुने स्थिते यातमनिष्टमल्पं ज्ञेयं। तस्मिन्नेव सौम्यस्थिते शकुने शुभं यातं। धूमिताया शांतासंनभागे
सौम्यस्थिते भाव्यल्पमनिष्टं तस्मिन्नेव पापस्थिते शाकुने भावि बहु अनिष्टमिति। उक्तं च। यातमुक्तायां सांप्रतं दीपिता
यामैष्यं ज्ञेयं धूमितायामनिष्टं। शांतास्वेवं दिक्षु तत्संख्यगा स्युः प्रत्यासन्नं तत्र शेषयोः शांतदीप्तमिति। पुनरपि फल
नियमार्थमाह। ग्रामारण्यसंनिकृष्टः स्थिराद्युन्नत दूरगाः। स्थानवृक्षोपघाताद्यैः तत्र स्यात् फलं पुनः। ग्रामसंनि
निकृष्टवर्तिभिः शकुनैर्निम्नस्थितैश्चलस्थानगतैश्च शीघ्रमाश्वेव शुभमशुभं वा फलं भवति। उन्नतस्थानप्रदेशस्थि
दूरगैर्निकृष्टवर्तिभिश्चिराद्बहुना कालेन शुभमशुभं वा फलं भवति। तथा च पराशरः। निम्नेषु तु शुभं क्षिप्रं शुभं वा
यदि चालरेत। दूरस्थेषु तु सर्वेषु चिरात्संपद्यते फलमिति। स्थानवृक्षोपघाताद्यैः तत्र स्यादेव प्रकारेण फलं ब्रू
यात् वदेत्। वर्धमानेन यत्र द्रव्यवृद्धिः स्यात् तत्र स्थितः शुभः शकुनोऽर्थानां वृद्धिं करोति। उपघातो यत्र स्थाने प्रत्यक्षं दृ
श्यते। तत्रस्थोऽशुभः शकुनः उपघातं करोति। अत्रैव शुभः किंचित्। एवं विचार्य पुनर्भूयः शुभाशुभफलं ब्रूयात॥
तथा च पराशरः। दग्धवल्कातरच्छिन्नशुष्ककर्कशवृक्षगाः। अश्मनिम्नकपालास्थिकृताकृतभस्मसु श्मशा
नांगारवल्मीकविषशुषिरपांशुषु। जीर्णजीर्णाशुचिश्वभ्रदरस्थादीप्तसंस्थिताः मनोज्ञस्निग्धफलितक्षीरपुष्पित
स्थिताः समप्रयिष्टभूयिष्ठाः ज्ञेयास्युर्मंगलाक्षिणः इति। अत्र दीप्ता अशुभाः। शांताः शुभा इति। अधुना द्विप्र
कारस्य शकुनस्य लक्षणमाह। क्षणतिथ्युडुवातार्कैर्दैवदीप्ता यथोत्तरं। क्रियादीप्ता गतिस्थानभावस्वरविचे
ष्टितैः। क्षणो मुहूर्तनामाशिवादिकः। तत्र दारुणाग्राणां नक्षत्राणां ये मुहूर्ताः तेषु क्षणेषु दीप्तः शकुनः तिथिनैंश
दिकः। तत्र षष्ठी चतुर्थी दशमी चतुर्दश्यो दीप्ताः। एताः तिथिदीप्ताः। दारुणाग्रनक्षत्रेषु नक्षत्रदीप्तः उडूनि नक्ष
त्राण्युच्यंते। एवमुडुदीप्तः। खंउरवरपुरुषप्रतिलोममरुतो वातदीप्ताः आदित्याभिमुखो दीप्तिकरः आर्कदी
प्तः

बा॰ सं॰

३१६

एवं षोडशसंख्याकः शकुनः पंचप्रकारो दैवदीप्तः एतदुक्तं भवति। क्षणदीप्तात्तिथिदीप्तोऽधिकः। तस्मान्नक्षत्रदीप्तस्तस्माद्वारदीप्त
स्तस्मादर्कदीप्त इति क्रियादीप्त इति। गतिः दीप्तः विद्युदर्कमारुताद्यभिमुखो यो धावति स गतिदीप्तः। छिन्नभिन्नवल्ल्यादौ
दग्धप्राणिजननिपातपराघातकृते नेष्टवेष्टदीप्तः। एवमेषोऽपि यथोक्तं दीप्त इति। तथा चात्र ऋषिपुत्रेणोक्तं
निश्चयः। तद्यथा। चरतः पक्ष्यधर्मीनवमीचतुर्दशीषु तिथिदीप्ता। निष्पादिभकरणाद्दीप्ता। मूलेऽश्लेषायां ज्येष्ठायामार्द्रायां
स्यपिच्छाग्नेयपूर्वाफाल्गुनक्षत्रदीप्ता। मुहूर्ते चैषामेव मुहूर्तादीप्ताविसंज्ञास्वल्पसंज्ञाभावदीप्ताचरपुरुषाभिलाषे
वार्तो दुर्जनीयविषमविद्युताश्वरक्षारमणकोरस्वरः स्वरदीप्तः। अप्रानिदग्धपतितछिन्नभिन्नभग्नोन्मथितार्धदग्ध
तार्धसस्यश्वभ्रकण्ट्याधितापक्ष्यफलाक्षारशुष्कजीर्णविवर्णवित्वचा सारविरसकटुस्थानचलितकुथितोद्यतविष
मसंस्थितसंघटितनततानचेतनानिधिरोधाद्याक्रान्ताकदाग्निदग्धेषु तरुषु प्राकारगोपुरदारुककुम्भमिसंस्थास्था
नदीप्ताः। येऽग्निरिणविषमनिम्नप्राकारकेशास्थिकपालवल्मीकाङ्गारपल्लवविट्काष्ठाद्युधान्याङ्गारकलादूसर्पं
विद्युदुल्कार्कमारुताद्यभ्याग्न्यनुपधावन्तो गतिदीप्ताः। पक्षपातत्तुण्डविधूननेऽर्निपातपराघातावकुण्ठनेष्टवेष्ट
दीप्ताः। चण्डतुरग प्रतिलोममारुतावातदीप्ताः। अर्काभिमुखादीप्ताद्दिक्स्थानविदीप्ता इत्यादि। भगवान् इन्द्रः अ
त्रैवाविशेषमाह। दशधैवं प्रयातोऽपि सौम्यफलफलाशनः। मांसामेध्याशनाऽरौद्रौ विमिश्रावन्नाशनः स्मृतः। एवम
नेन प्रकारेण दशधा शकुनो दीप्तः पंचविधो दैवदीप्तः। पंचविधः क्रियादीप्तश्च। यदि दशधा दशभिः प्रकारैरपि
शांतः शकुनो भवति। तथापि यदि फलाशी तृणभक्षः फलादिवा फलान्यशनाति तदा सौम्यः शुभफलः। अथ मां
सामेध्याशी मांसममेध्यं अमेध्यं विष्ठादि चाश्नाति तदा रौद्रो दीप्तो वा दीप्तः। अन्नाशी अन्नभोजी विमिश्रः शांतो
दीप्तः। स्फुलफः उक्तं च। पिशिताशुचिभोजनः प्रदीप्तः तृणफलभुक्त्वा निसर्गतः शांतः उभयः कथितस्तथा
न्नभोजी दिक्स्थानोदयकालतस्य चिंता इति। अन्यदप्याह। हर्म्यप्रसादमांगल्यमनोहरस्थानसंस्थिताः श्रेष्ठामधुर
सक्षीरफलपुष्पद्रुमेषु च। हर्म्यं गृहं। प्रासादो देवगृहं। मांगल्यस्थानानि। देवब्राह्मणगोभिराध्यासितानि। मनोहर ३१६
राणि। हरितशाद्वलशीतलद्रुमच्छायासंयुक्तानि। एतेषु स्थानेषु ये संस्थिताः शकुनास्ते श्रेष्ठाः शुभफला स्तथाम

धुरेषु सक्षीरफलेषु वृक्षेषु तथा मधुरिकादिषु द्रुमेषु फलवृक्षेषु बीजकपूरादिषु क्षीरेषु च स्थिताः शकुनास्ते श्रेष्ठाः
व। अथ शकुनानां बलविचारमाह। स्वकाले गिरितोयस्थलबलिनो द्युनिशाचराः। क्लीबस्त्रीपुरुषाश्चैवं बलिनस्युर्यथो
त्तरं। स्वकाले आत्मीयसमये गिरितोयस्थलाः पर्वतजलस्थलाः यथासंख्यं द्युनिशाचरा बलिनो वीर्यवन्तो भवंति। द्यु
चरा दिवसे गिरिस्था बलिनः गिरिशब्द उच्चप्रदेशोपलक्षणार्थः। निशाचरा निश्यरण्ये च। तथा च मनुशर्मा। गिरौ दि
वा द्युचारी मन्यरूपे निशाचरः। बोधयत्वा शकुनो यो विमज्जति बलमन्यथा। क्लीबस्त्रीपुरुषा इति। एषां शकुनानां
यथोत्तरं क्लीबस्त्रीपुरुषा बलिनः। क्लीबेभ्यः स्त्रियो बलिनः स्त्रीभ्यः पुरुषा इति। उक्तं च। ग्रामे भयवारण्ये तु
मिश्रचरः सभूमिसंस्थाः सफलविफलाविपर्ययस्थाः गमने सौ पुरुषाश्रिताः शुभाः। अन्यदप्याह। जनजातिबल
स्थान हर्षसत्त्वस्वरान्विताः स्वभूमावनुलोमाश्च न दूतास्युर्विवर्जिताः। जनो वेगो गतिरित्यर्थः। जातिर्जातिविभागः। बलं
प्राणस्थानं लक्षितः। हर्षश्च तद्हर्षः। सत्त्वमौदार्यं। निर्भयत्वमित्यर्थः। स्वरः शब्दः। एतैर्ये बलवन्तस्तावन्तः शुभाः। श
कुनानां बलं तदर्थमुक्तं। इयोर्मध्यात् यः शकुनो जवेनाधिकः यश्च बलाधिकः यश्च स्थानेन शोभनस्थितः यश्च हर्षयुक्तः
श्च सत्त्वसंयुक्तो यश्च शोभनः स्वरान्वितः यश्च स्वभूमावनुलोमश्चेति लक्षितः। स एव बलोत्कटः स्युर्विवर्जिताः। नादि
तिवा यः परामृश्यते। तेऽन्तरेषु ताबलवर्जितास्युर्भवेयुः। अथ नैर्ऋतं ज्ञातिविभागमाह। कुक्कुटेभपरिल्लश्च
शिखिवंजुलछिक्कराः बलिनः सिंहनादश्च कूटपूरी च पर्वते। कुक्कुटः कृकवाकुः इभो हस्ती। परिल्लो पक्षिविशेषः।
शिखी मयूरः। वंजुलः खदिरचञ्चुः। छिक्करो मृगजातिः। सिंहनादः पक्षिविशेषः। कूटपूरी च कुरायिका। एते पर्वत
पूर्वस्यां दिशि बलिनः प्राज्ञापत्याप्रशस्तयात्यानुवर्त्तनत्येवं सर्वत्र ज्ञेयं। अथ दक्षिणस्यामाह। क्रोष्टुकोलूक
हारीतकाककोकर्क्षपिंगलाः। कपोतरुदितारुदितक्रूरशब्दाश्च याम्यतः। क्रोष्टुकः शृगालः। उलूकहारीतौ पक्षिवि
शेषौ। काको वायसः। कोकः पक्षी। ऋक्षः प्राणी। पिंगला कृकलासिका। कपोतः पक्षी। रुदितं रुदनं। आक्रंदितमा
क्रन्दितं। अन्ये क्रूरशब्दाः अप्रियाभिधायिनः। स्वराले च सर्वे याम्यायां दक्षिणस्यां दिशि बलिनः। अथ पश्चिमा
यामाह। गोशशकौंचलोमाससदूंसांकारकपिंगलाः। बिडालोत्सवबादित्रगीतहास्याश्च वारुणाः। गोः प्रसिद्धः

वा॰ सं॰ शशः प्रसिद्धः। क्रौंचः पक्षी। गोमायुः प्राणी। हंसः पक्षी। उत्क्रोशाख्यः कुररः। कपिंजलाख्यः मयूरवत्पक्षिविशेषाः
विडालो मार्जारः। उलूकोऽथ चाटकादिकाः। वादित्रगीतहासाश्च वारुणाः। वा। द्वारोपरि तोरणमुखवकुरदानेरविपरीत
गोमुखपदसदृशः। गीतं प्रसिद्धं। हासमुपहासः। एते वारुणाः पश्चिमायां बलिनः। अथोत्तरस्यामाह। शतपत्रकु
३३० गारेनुसृगोवृषकोकिलाः। चापकल्यकपुण्याहघंटाशंखरवाउदक्। शतपत्रः पक्षी। दीर्घोनादः प्रसिद्धः। कुरंगा
हरिणः। एकशफाश्वखरादिभो। कोकिलः परभृतः। चाषः पक्षी। शल्यकोविलेशयः। प्राणी। पुण्याहरवः आशीःसं
युक्तः शब्दः। घंटाशब्दो प्रसिद्धः। एतासामेतेषां रवाः शब्दा उत्तरस्यां दिशि बलिनः। अधुनाऽन्येषां प्रतिभागमाह।
ग्राम्यारण्यगोग्रामोऽनारण्यो ग्रामसंस्थितः। दिवाचारीन शर्वर्यां नक्तंचरो दिवा। ग्राम्यः शकुनारण्यस्थितः उ
न ग्राम्योऽरण्यगो ग्राम्योऽनारण्यो ग्रामसंस्थितः। दिवाचरो दिवसचरः शर्वर्यां रात्रौ न ग्राह्यः। न तं नक्तंचरो
भाभ्युभोचान ग्राह्यः। एवमारण्योऽपि ग्रामसंस्थितो न ग्राह्यः। दिवाचरो दिवसचरः शर्वर्यां रात्रौ न ग्राह्यः। नक्तंचरो
त्रिचरो दिवसे न ग्राह्य इति। पुनरपि प्रतिषेधार्थमाह। द्वंद्वरोगार्दितत्रस्तकलहामिषकांक्षिणः। आपगांतरिता मत्ता
नग्राह्याः शकुना क्वचित्। द्वंद्वयुग्मं तत्र सारस कुरंगमिथुनादयस्तत् द्वंद्वं पूर्णं स्यात्तिन्। सारसकुरंगमिथुनं च
ग्रहणगर्भादूरतोमिथुनस्येति। रोगार्दिता रोगपीडिताः। त्रस्ता भीताः। कलहकांक्षी कलहेच्छुः। आमिषकांक्षी मांसाभि
कांक्षी। आपगांतरितान्तरितः। मत्तः तु कामवशेन सदर्पः। एवंविधाः शकुनाः सदसत्फलं न कथिदपि ग्राह्याः
उक्तं च। द्वंद्वातेरोगार्दितभीतमत्तं वेगानभृद्धामिषकांक्षिणश्च। सीमांतनद्यंतरितांश्च सैन्ये निर्वर्तयेच्च सदसत्
कोऽपि। एतेषां कृतकलकृतानां निष्फलत्वं चाह। रोहिताश्वाजवालेय तुरंगा भृगाः उरगः। निष्फलाः शिशिरे
ज्ञेयाः संते काककोकिलौ। रोहितामृगजातिः। अश्वस्तुरगः। अजश्छागः। वालेयो रासभः। तुरंगो मृगजातिः।
उष्ट्रः करभः। मृगो हरिणः। शशः प्राणी। एते सर्वे शिशिरे माघफाल्गुनयोः समस्तानि फलादीयात्। ज्ञातव्याः
वसंते चैत्रवैशाखयोः काको वायसः। कोकिलः परभृतः। एतौ समस्तानिःफलामेवेन। अन्यच्चाह। मनुभाद्रप ३३०
दियाद्याः मत्कुरस्थवकादयः। ग्रारघकाद्यः कौलाश्चापचंद्रहिनाचातकौ। भाद्रपदे मासि सकुराः वराहश्चमार
मेयः। वृकः प्राणी। आश्विने दुन्यात् शृगालाद्याः वकेशानग्राह्याः। समस्तान्निःफलाः। शरदि अश्वयुक्कार्तिक
योः

अद्वाराहंसारयः। अप्युक्तीयत उत्तरः। तमदं तिभक्षयंतीत्यद्वादाः। गोत्राभिधा। क्रौंचपक्षिविशेषः। एते समस्तान
निःफला ज्ञनग्राह्या। श्रावणे मासि हस्ति चातकौ न ग्राह्यौ। हस्ती गजः। चातकपक्षिविशेषः। अथान्यदाह। व्याघ्रर्क्षवानरद्वीपि
महिषाः सबिलेशयाः। हेमंते निष्फलाः ज्ञेया बालाः सर्वे विमानुषाः। व्याघ्रः प्र॰ ऋक्षः प्राणि॰ वानरः कपिः। द्वीपी चित्रकः। महिषः
प्रसिद्धा। एते सर्वे बिलेशयप्राणिभिः सह बिलं शेरते बिलेशयाः। श्वाविन्नकुलादयः। मनुष्यवर्जिताः सर्वे प्राणिनो बालाः शि
शवः। हेमंते मार्गशीर्षपौषयोः निःफलादीयाः ज्ञातव्याः। मानुषाः न्बालाः। एतेषां यत्रु भाग्यभेतत्स फलमेव। अथकृ
दक्षिणेन कृतमतः परं उत्तरत्वं तो विस्त तोद्दिश्यते। अत्र शब्दशकुनेषु। कोकिलमयूरशुकवंजुलाचकप्रियपुत्रगजपुत्रिणी
दापत्रिशालपत्रशाखदूमदनसारिकावर्षाभवकाथिमहामत्तरत्नस्कुरादि द्रुमाणां च काकवायसकुक्कुटवंकाक्रोश
शर्द्दू पूनर कश्चित्र कपोतपुष्पार्थाद्यु रथाद्दीनां वसंतो मदः कालः। शतपत्रा क्रोशभृंगराजमयूरकोकिलवंजुलकाप्
चाषाग्नीनमचातकसारंगाणां तृषां। चकोरकादंबमदनसारिकानिःपुष्करवातकहंसवचसारसकुरंकौचकारंड
वामरगणां शरत्। श्येनकुरंकौचसरसादीनां हेमंते शिशिरे च मासस्यः शकुनानामदकालाः। वनमृगाः पुरुषाश्च
शिवाशशलंवृकसमरचमरवानरमार्जारनकुलगजगवयमहिषमयत्नरकासितुल्याः प्रकृतिंखरवराहादयः प्राय
सर्वेषां मदकालः। विशेषतश्च मरस्म मर्गसिंहव्याघ्रादीनां ग्रीष्मः। द्वीपिगजवृषभादीनां प्रावृट्। पृषतरुमहिषगवय
मृगरुचमरगणां शरत्। गोगवयवराहादीनां हेमंतः शिशिरश्च। अधुना द्वात्रिंशदुद्दिष्ट भिन्नस्य दिक्प्रविभागस्य प्रदर्शि
नार्थमाह। ऐंद्रानलदिशोर्मध्ये त्रिभागेषु व्यवस्थिताः। कौशाध्यक्षानलाजीविततपोयुक्ताः प्रदक्षिणं। ऐंद्रयपूर्वा
कृ आनलां आग्नेयी। अनयोर्मध्येऽन्तरे त्रयस्त्रिभागास्तेषु व्यवस्थिताः क्रमेण कोशगृहाध्यक्षः कोशाध्यक्षः स
वकेयन भागाद्वितीये अनलजीवी। अग्न्युपजीविकः। तृतीये तपोयुक्तस्तापसः। एतदेव प्रदक्षिणं प्रादक्षिण्येन।

	ना	

अन्यच्चाह। सिद्धभिक्षुर्कार्विधुन्ता ईर्ष्यायाम्यानलदिगंतरे। मध्येऽत्र यस्त्रिभागास्तेषु क्रमेण
व्यवस्थिताः। सिद्धस्य चित्रकर्मकृद्विज्ञायः। प्रथमे त्रिभागे द्वितीयेऽत्र च भागे भिक्षुर्वि
तस्मान्नग्ना स्त्रीस्त्रतीयेप रतः प्रदक्षिणानिर्ग्रत्योऽमध्येऽयमत्र यस्त्रिभागास्तेषु प्रथमे मातंगाद्यः।
पराणश्चापिमातंगागोप्यधमसमाश्रयाः। याम्या दक्षिणा अनला गे येत्यनयोरंतरे॥

ततः समाश्रितः पुमान् द्वितीये गोपो गोपालकः ततः समाश्रितः पुमान्। तृतीये धर्मसमाश्रयो धर्मानुरतः अन्ये त्वाहुः। नैर्ऋती
वारुणीमध्ये प्रथमे दासस्मृतिस्तस्करः। शौण्डिकः शाकुनिकः द्वितीये भावा वायव्यापश्चिमान्तरे। नैर्ऋतीवारुणीमध्यस्य त्रिभागास्तेषु
प्रथमे प्रमदाः स्त्रियः। द्वितीये मृतिप्रसवः। तृतीये तस्करो ग्रामीणः। वायव्यापश्चिमान्तरे स्थस्य त्रिभागा मध्येऽलितास्तेषु
प्रथमे शौण्डिको मद्यपानासक्तः कल्यपालः इति। कुविन्द इति द्वितीये शाकुनिको धीवरः। तृतीये दंष्ट्री क्रूरः। अन्ये त्वाहुः। निष्क्रा
न्तकर्णो स्वामिकृद्दकल्यास्ततः परं। धनवान्निक्षेपी कृष्णमाल्याकारस्ततः परं। ततः परमनन्तरं वायव्योत्तरयोरन्तरे ये त्रय
स्त्रिभागास्तत्र प्रथमे विषघातकः। विषेण घातयति मारयतीति। द्वितीये गोस्वामी गोमान् तृतीये कुटकल्पाद्युत्तानकृत्
ततः परमुत्तरेशान्यान्तरे ये त्रयस्त्रिभागास्तेषु प्रथमे धनधान्याढ्यः। द्वितीये दीक्षितो दैवज्ञः। तृतीये मालाकारः॥
पुष्पप्रचायकः। अन्ये त्वाहुः। वेश्मवस्त्ररक्षिवस्त्रवाणिज्यां रक्षणरतः। द्वात्रिंशद्देवभेदाः स्युः पूर्वादिगणिभिः सद्वात्रिंशाः। ऐ
शानीपूर्वयोरन्तरे ये त्रयस्त्रिभागास्तेषु प्रथमे वेश्मपालो विश्वम्भरः। द्वितीये चरकः चक्रचरः। तृतीये वाजिनाम रक्षा
रक्षणपालको नरः। सतः एवमनेन प्रकारेण द्वात्रिंशद्द्वाः पूर्वादिगणिभिः प्राग्वत्ताभिः प्राग्भिः सद्भावं मुनि
:कथितास्फुर्भवेयुः। अथ अत्रास्मिन् विश्वधिवर्तनाद् राजा कुमारो नेता च दूतः श्रेष्ठी चरो द्विजः। गजाध्यक्षश्च पू
र्वाद्याः क्रमशः प्राच्याश्चतुर्दिशं। राजा पूर्वस्यां दिशि कुमारो राजपुत्रः आग्नेय्यां। नेता च सेनापतिर्दक्षिणस्यां ३
दूतो गमागमिको नैर्ऋत्यां ४ श्रेष्ठी पश्चिमायां ५ चरो गूढपुरुषो वायव्यां ६ द्विजो ब्राह्मण उत्तरस्यां ७ गजाध्यक्षो हस्तिरा
क्ष्यक्ष ऐशान्यां। ८ एते पूर्वाद्याः स्थिताः। क्षत्रयाद्याश्चतुर्दिशं। चतुर्दिक्षु पूर्वाद्यासु क्षत्रियाद्या वर्णाः। त
द्यथा। पूर्वस्यां क्षत्रियाः। दक्षिणस्यां वैश्याः। पश्चिमायां शूद्राः। उत्तरस्यां ब्राह्मणा इति। अस्य चक्रस्य प्रविभागमा
ह। गच्छतस्तिष्ठतो वापि दिग्विज्ञायां प्रस्थितः। दिग्निति शाकुनो वाच्यस्तद्दिग्जेन समागमः। पुंसो गच्छतो यात्रा
यां व्रजतस्तिष्ठत एकदेशस्थस्य निश्चलस्य वा यस्यां दिशि व्यवस्थितः शकुनः प्राणी पक्षी वा शब्दं करोति॥ ३१८
तद्दिग्जेन तस्यां दिशि जातेन तस्य कथितेन सद्रूपाभिज्ञेन तस्य समागमः संयोगो वाच्यो वक्तव्यः। यथेंद्रा
दिशो मध्ये प्रथमत्रिभागस्थे शकुने कोशाध्यक्षेण सह संयोगः। द्वितीये नकाग्निविनाशनेनास्वेनापसेनेत्यादिस

वैश्यो दाह्यं। अत्र दिग्ज्ञानभ्रान्तिनिरासाय चक्रं कृत्वा प्रदर्शितः। अथ शकुनानां शुभाशुभत्वमाह। भिन्नभैरवदी
नार्तपरुषक्षामजर्जराः। स्वराः नेष्टाः शुभाः शान्तहृष्टः प्रकृतिपूरिताः। ये स्वराः शकुनानां भिन्ना विषमा भैरवाः क्रूरा दीनाः दैन्य
मागताः आर्ताः पीडिताः शकुनस्य मृदुत्वाः परुषा रूक्षाः। क्षामा ग्लानत्वमागताः। जर्जरा भिन्नभाण्डोपमसदृशाः नेष्टाः अ
एवं नेष्टानशुभाः। ये स्वराः शान्तेन शान्ताः हृष्टेनाकोपेन मधुरस्वरेण तद्वत् प्रकृतेन सद्वर्णपूरिताः प्रशस्त
न शुभाः। अथ येषां वामभागगताः शुभास्तेषां नामान्याह। श्रीकण्ठश्यामारलावोरुकपिंगलाछुच्छुन्दरी सारिकाः।
सुकरी परपुष्टा च पुन्नामानश्च वामतः। श्रीकण्ठश्च चाषो श्यामा पोतकी रलाप पक्षा शशिविशेषः। छुछुन्दरीपक्व
निः पिंगला उलूकचटिका। सारिकादि भिका। कृष्णमत्स्यः सुकरी ग्राम्या चटका। परपुष्टा च कोकिला। ये च पुन्नामा
नाः पुरुषसंज्ञास्ते यात् वामाङ्गताः वामभागगताः शुभाः। इकेन। छुच्छुन्दरी सुकरिकाशतानश्यामारलापिंगलकान्य
पुष्ट। प्रायेण वामा सारिकाधिकाच पुंसंज्ञा ताये च पतत्रिणस्युः। अथ येषां दक्षिणभागगताः शुभास्तेषां नामा
न्याह। स्त्रीसंज्ञा भासभषककपिश्रीकर्णछिक्कराः। शिखिश्रीकण्ठपिप्पीकरुरुश्येनाश्च दक्षिणाः। ये च स्त्रीसंज्ञाः स्त्री
नामानः। भासः पक्षी। भषकः सारमेयः। कपिर्वानरः। श्रीकर्णः पक्षी। छिक्करो मृगजातिः। शिखि मयूरः। श्रीकण्ठ
पिप्पीकः पक्षिणः। श्रीकर्णः काकुतिकञ्चिता रुरुर्मृगजातिः। श्येनः शाकुनिकः। एते दक्षिणा यातुर्दक्षिणभागगताः॥
शुभाः। इकेन। श्येनो रुरुः पूर्णकूटः कपिश्च श्रीकर्णछिक्कारकपिप्पिजाताः। स्त्रीसंज्ञका ये च ताश्च ये च दक्षिणाः
दिता दक्षिणभागसंज्ञा इति। अथान्येषामपि वामदक्षिणमानां शुभाशुभफलमतिदर्शनाद्। क्ष्वेडास्फोटितपु
ण्याहगीतशंखाम्बुनिःस्वनाः। सतूर्याध्ययनाः पुंवत् स्त्रीवदन्या गिरः शुभाः। क्ष्वेडा मुखशब्दः। आस्फोटितं करा
स्फोटनं वक्षस्थलस्य बाहोर्दृतीयचूरितनताडनं। पुण्याहशब्दः प्रशस्तवाचां गतिं प्रसिद्धं। शंखः। अम्बुजलं। एतासां
वैषां निःस्वनाः शब्दाः। सतूर्याध्ययनाः तूर्येण च सहिता अध्ययनशब्दाः वेदनिर्घोषाः। एते सर्वे च पुंवत् शुभा
नाम भागगता इत्यर्थः। स्त्रीवदन्या गिरः शुभा इति। अन्याः सर्वा गिरो वाचः स्त्रीवत् वामगतिकाश्च दक्षिणः
भागगता इत्यर्थः। उक्तं च। आस्फोटितास्फोटितशंखतूर्यपुण्याह गीतध्वनिगीतशब्दाः। वामः प्रशस्ता शुभशकुना
नामामार्कादितं दक्षिणतः परेषामिति। अधुना ग्रामस्थानां शुभाशुभत्वमाह। ग्राम्यो मध्यमस्वरस्तोगो

Dr. Bhau Daji Memorial

धारश्चेति शोभनाः। षड्जमध्यमगांधारा ऋषभश्च स्वरा हिताः। यानेयाने स्वराणां ग्रामौ मध्यमषड्जौ न शस्तौ शो
भनौ। गांधारश्चेति शोभनश्च। इति शब्दः प्रकारार्थः। मत्तगांधारादयो गृह्यन्ते। न मनुष्येषु। तथा। षड्जमध्य
मगांधारऋषभश्चैते स्वराः शस्ताः। उक्तंच। गांधारषड्जर्षभश्च रमध्यमाश्च यानेस्वराः शुभकरा न तु येचशे
षाः। ग्रामौ शुभावपि हि मध्यमषड्जसंज्ञौ गांधारगीतमपि भद्रमुशंति देवाः। अथान्यत गानुरंशुभाशुभमा
ह। कृतकीर्तितदृष्टेषु भारद्वाजाजबर्हिणः। धन्या नकुलचाषाश्च सरटः पापदः प्लवः। भारद्वाजो पक्षिविशेषः।
सरटेति प्रसिद्धा। अजश्छागः। बर्हिमयूरः। एते सर्वे कृतेन शब्देन कीर्तितेन नाम संकीर्तनेन दर्शनेन च धन्याः शुभाः
नकुलश्चाषश्च। नकुलः प्राणी। चाषः पक्षी। एतावपि शब्दानुल्यान्नु। इतकीर्तनदृष्टेष्विति। सरटः प्राणिभेदः सो
ऽप्लवः परतः पापदानिष्टफलः। अन्यदप्याह। जाहकाहिशशक्रोडगोधानां कीर्तनं शुभं। रुतसंदर्शने नेष्टमतीपं वा
नरर्क्षयोः। जाहकः प्राणी। अहिः सर्पः। शशः प्रसिद्धः। क्रोडः सूकरः। गोधा प्राणिविशेषः। एतेषां कीर्तनं नामग्रहणं शुभं। ए
षामेव रुतं शब्दः संदर्शनमवलोकनं न शुभं। प्रतीपं वानरर्क्षयोः। वानरः कपिः। ऋक्षः प्राणी। एतयोः प्रतीपमेतद्विप
रीतं। एषां रुतं दर्शनमिष्टं न कीर्तनमित्यर्थः। उक्तंच। भारद्वाजाजबर्हिचाषनकुलाः संकीर्तनादर्शनात्कर्मण्यश्च शुभप्र
दा न सरटो दृष्टः शिवाय क्वचित। गोधासूकरजाहकाहिशशकाः पापाः स्वतादर्शनेन अन्यंकीर्तनमृक्षवानरफलं तथैत
यानशोभनं। अन्यदप्याह। ऊंजः प्रदक्षिणं शस्तो मृगा मनकुलांडजाः। चाषः समकुलो वामो भृगुरादौ पराण्हतः। मृगाद्
रिणकुलांडजाः नकुलाः प्राणिनः अंडजाः पक्षिणः। तेचात्राविषमसंख्याः एकस्त्रयः पंच सप्तनावत्या दि प्रदक्षिणं
प्रागदक्षिणेपन शस्ताः शुभाः। यातुर्वामपार्श्वादग्रत आगत्य दक्षिणेन पार्श्वेनकामंतियतः प्रदक्षिणं शस्ता मृगाः
समनकुलांडजाः समं च। एतद्विपरीतलक्षणा पार्श्वाद्वामपार्श्वागमनं यत्न दृषमत्यं। एतत्सर्वं शकुनज्ञैरितीयं। यस्मा
चायंपरजापकः ऐंद्रान्नकादिशो भागाग्निभागे पुन्यचरितः क्रौंचश्च क्षानलाज्जावित पापमृतः प्रदक्षिणं मिति
चाषः समनकुलौ वामदतिचाषः समनकुलः नकुलेन सहितानावामौ वामभागगतौ धन्यः। भृगुरादौ पराह्णतरति भृगु
नाममुनिरुक्तमादौ तवान। यथा पराह्णताः पराह्णात्परतः वामभागाधन्यौ। नप्रदक्षिणे। तथाच भृगुः। वामगा ३१०

चाषनकुलौ च पराण्हे शुभप्रदाविति। तथाच योगयात्रायां। नकुलस्यमृगस्य पक्षिणां वाम दक्षिणभागमेननं। शुभं।
श्वसृगालयोर्दिक्षु समनकुलं न न यनं। चाषो नकुलः स्वचा संगादिदमाधात्परतः शुभप्रदाविति। अथान्यदप्याह। छि
कारः कूटपूर्णात्म पिंगला वामदक्षिणा। अपसव्याः मदाशस्ताः दीप्ता ग्रामसविक्लेशयाः। छिक्कारो मृगजातिः। कूटपू
र्णापराचिका। पिंगला पक्षिविशेषः। एतेन्छिकारादयः दक्षिणाः शस्ताः। दीप्ता वामदाहृदयः सविक्लेशयाः विक्लेशविक्ले
षोऽज्ञ। श्वा विन्नकुलादयः। दीप्ता विक्लेशयाः सदअपसव्या वामभागगताः शस्ताः शोभनाइति। अथद्विजमनःशा
कुनं शुभाशुभमाह। श्वेतोद्यमितिग्रासं ज्ञात्वमांसं च दक्षिणे। भ्रमकाश्चधि दधिनां पश्चादुदयां तिममाधवः। ह्या
श्वः असितः श्वेतवर्णायः कृष्णवृद्ध कुरूपः। एतेनाभ्यां ये यांदिशि शुभं। कन्यका कुमारी। दधिः क्षीरविकारः। एतेपश्चा
तपश्चिमायांदिशि शोभनं। गौः प्रसिद्धा। विप्रोद्विजः। साधुः सज्जनः। एतदुत्तरस्यांदिशि शोभनं। उक्तंच। द्रव्याणि शु
क्लानि तुरंगमश्च पूर्वेण याम्येन ज्वलं समांसं। पश्चात्कुमारी दधिवातितश्च सौम्येन गोब्राह्मणसाधवश्चेति। अथाशुभान्या
ह। जाल्मश्चरजणा नैष्टा प्राक्याम्याश्र्यस्त्रवाणिकौ। पश्चात्तासवमधैच रक्तासमनपुदक्। जाल्म प्रसिद्धं। सच तत्रनिर्गवि
ते। पशिणा यच्च वध्यं तेजालेन चरतोशुभा। चरतीतिजालश्चरणा एतौ प्राक्पूर्वस्यांदिशि नेष्टावशुभौ। दास्यमायुध
वान तनः अन्यत किंचित दान कार्य धकुएतौ याम्यो। दक्षिणस्यांदिशिनशुभौ। प्राक् घातकआस्त्रकृतायमदिकुष्ठा।
मंदक मद्यकृगावपिपश्चाद्दासनसौ वाक्यः सद्वादकु। अधुनाकुमांदो शाकुनांविशेषमाह। कुर्मसंगम युद्धप्रवेशे
न श्रमार्गणे। यानव्यत्यगता श्राघ्याविशेषश्चात्र न श्यते। कुर्मयत किंचितन्नि स्यतेसंगमः कूनन्निर्धू धाद्दितासद्
संयोगः युद्धं संग्रामं। एतेषु न श्राप्रवेशे ग्रीन श्रमार्गणेन ष्ट स्यावृप हतस्यवस्तुनो मार्गणं। एतेषु सर्वेषु यानव्यः
त्तगताग्राह्याः। यात्रायां येन प्रकारेण तत्तद्वत्य येनेतेषु ग्राह्याः। एतदुक्तं भवति। यात्रायां ये दक्षिणशस्ता
वामतः। यात्रायां ये वामतः शस्तास्तत्र दक्षिणाः। यात्रायां ये पुरतं स्त यष्टमतः। यात्रायां ये पृष्ठतस्ते पुरत
इति। दिक्षुप्येवंविपर्ययार्थवलोक्याः। तेन यात्रायां ये पूर्वस्यां दिशितत्र पश्चिमायां ये पश्चिमायां तेपूर्वस्यां ये चद
क्षिणस्यां ते उत्तरस्यां ते दक्षिणस्यामिति विशेषश्चात्र वक्ष्यति। अत्रास्मिन्नर्थे कर्मसंगमादिको विशेषो वक्ष्य
ते। उक्तंच। न प्रावलोकन समागम युद्धकर्मविशेषप्रवेशा नष्टेश्वर दर्शनेषु। यानप्रतीपा विधिनाशुभदाभव

वा॰ सं॰ नंति। अत्रैव विशेषमाह। दिवाप्रस्थानवत्र ग्राह्याः कुरंगरुरुवानराः। अन्यच्च यात्रायां भागे वामे चावकं तु कुर्वन्ति कृताः। ग्रार्विरापश्चि
मभागेन स्वकीटकपिंगलः। सर्वेऽपि विपर्यस्ता ग्राह्याः सर्वेषु यात्रा दिवा प्रस्थाने दिनि। कर्माद्रि दिवा दिनसकुरंग
३२० रुरुवानराः। कुरंगो हरिणः रुरुमृगजातिः वानरः कपिः। एते प्रस्थाने ग्राह्याः। शोधितास्तेषां वेतनानां सर्वेषु सर्वेषां
विपर्यस्ताः विपरीता ग्राह्याः। यात्रायां कर्मसंगमादिष्वपि सर्वत्र विपरीता ग्राह्याः। यात्रायां कर्मसंगमादिषु विपर्यस्ता
इ। तत्र मसंस्पर्शने ग्राह्या एवं गोपि प्रयाणवत्। शिशिरप्रवेशे पुनर्दानादिना गच्छेत्। वामदक्षिणगाः शकुना यात्रावत्
भवन्ति। प्रवेशे तु व्यत्ययः संदर्शनेः वक्रीकृत्य यद्यपि प्रवेशे गजादयः शुभं वदन्ति। तथापि प्रयाणवत् ग्राह्याः। सर्वेषु प्रवेशे च
मार्गे यान्यागता ग्राह्याः। एवं यद्यपि प्रवेशे स्थापि प्रयाणवत् ग्राह्याः। उक्तं च। केचित् गर्गमतेन च प्रदर्शनं चापि। गिरि
प्रवेशे पर्वते दर्शनेः गम्यप्रवेशे दर्शनं दीनां सरितां मनसा दृष्टेन। उत्तरेण यात्रा शकुनो यात्रायां शकुनानां च प्रयाणवत्
प्रवेशादिशकुनानां यात्रा यात्रा मतः शकुनानां ग्राह्यतः पुरतः दक्षिणतः क्रमतः इति। अथान्यच्चाह। त्रि या
दीप्ते विनाशाय यात्रायां परिसंज्ञितौ। तावेव तस्य भागम्प्रशान्तरूतं तच्छितौ। शकुनो शकुनद्वारसंज्ञिता च सिद्धये।
त्रियादि सम्यक् लक्षणं प्रोक्तं। त्रियादी मार्गा तत्र नभाव सु विज्ञेयाः शितो भवति। त्रियादी शकुनो यात्रायां मिथो यदि
परस्परसंज्ञितौ उभयपार्श्वे स्थितौ भवतः तदा विनाशाय यात्रास्वभवतः। तावेव शकुनौ परस्परसंज्ञितौ भवतः। यत्र
कुलो दक्षिणस्थिताः स च तत्रैव शुभाय यथा वा मभागस्थः। यस्य वाम भागस्थु भाग्य प्रशान्तरूतं चस्थितो। प्रशान्त
रूतं शब्दं च स्थितं यस्य स्थितो तथा भूतो शकुनो शकुनानां शुभानामर्थानां द्वारसंज्ञितो मार्गाभूता चर्थानां च सिद्धये भ
वतः। अधुना मतान्तरेण शकुनद्वारमाह। केचित् शकुनद्वारमिच्छन्ति पृष्ठतः स्थितः। शकुने रक्तजातीयः शान्तश्च
प्रावितानिभिः। केचिदाचार्यवर्गाः द्वयः शकुनद्वारमुभयतः स्थितः शकुनः पार्श्वोद्भयस्य वा स्थितं रक्तजातीयैः
कृतोऽन्यद्वयेः। शान्तश्च प्रावितानिभिर्गत। स्थान स्थिति। तिथिवायकं संस्थाने च हृष्टे साध्य यथाक्रममिति। एवं शान्त ३२०
चेष्टाविरावः। शब्दश्च यस्यास्ति शकुनद्वारमिच्छन्ति। कथयन्ति। तदा तं दिः। एकयोऽन्यद्वयेः शान्तेः शान्तं च द्वयं
चतिः। यथा भाग गतस्थोश्च शकुनद्वारमिच्छन्ति। अथान्यदप्याह। विसर्जयति यच्चैकः एकश्च प्रतिषेधति।

सविशेषोऽशुभो यात्रानु यान्ति वो बलवत्तरः। एकः शकुनो विसर्जयति। यात्रायां सिद्धिं वा चेष्टे एकस्तु प्रतिषेधति विरोधमाप
न्ने। स च यात्रानुगच्छतां विरोधः संतः अशुभश्च। अथवा तयोर्द्वयोर्बलवत्तरो। तिरावेन च बलं ग्राह्यं। बलं च प्राग्वेति।
यत्रन्याति बलस्थानमिति। अन्यदप्याह। पूर्वमावेशिको भूत्वा पुनः प्रस्थानिको भवेत्। सुखेन सिद्धिमाचष्टे प्रवेशोत्तरद्व
र्ययात्। पूर्वं प्रथमं शकुनः प्रवेशिको भूत्वा प्रवेशाय द्वोऽस्थितमुक्तं करोति। पूर्वमुक्तं प्रवेशेन स मार्गे गोयान्यागता ग्राह्या
इति। एवमादौ प्रावेशिको भूत्वा पुनः पश्चात् प्रयाणकार्य दिभवति। प्रयाणे यद्धितं तत् करोति। तदा स शकुनः सुखेनाशु
गन्ता यातुः सिद्धिमाचष्टे कथयति। प्रवेशो न हि प्रवर्त्या प्रवेशे यात्रायां निवर्त्य स्वगृहं यात्रा प्रविशति तस्मिन् प्रवेशे तः
